# લલિતવિસ્તરાખ્યા ચૈત્યસ્તવવૃત્તિ

ભદ્રંકરી ટીકા



ટીકાકાર : આ. શ્રી ભદ્રંકરસૂરિ મ. સા.



કર્ણાટકકેસરી, શ્રાવસ્તીતીર્થોદ્ધારક, કોંકણ ઉદ્ધારક, સંસ્કૃતવિશારદ **પૂ.આચાર્ય શ્રીમદ્વિજય ભંદ્રકરસૂરીશ્વરજી મ.સા.**

*કૃતિથી ભદ્રંકર ... આકૃતિથી ભદ્રંકર ...*
*વૃત્તિથી ભદ્રંકર ... પ્રકૃતિથી ભદ્રંકર ...*

એવા ભદ્રંકર પ્રભાવશાળી વ્યક્તિત્વથી શોભતા... યથા નામ તથા ગુણ ... એવા પૂજ્યશ્રીનો જન્મ ગુજરાતની પુનિતપાવન નગરી છાણીમાં વિ. સં. ૧૯૭૩, મહા વ.૬ને દીવસે થયો. માતા-મણિબેન, પિતા-શિવલાલ. શૈશવથી સંયમના શણગાર સજવાનાં સ્વપ્ન સેવ્યા. સુવર્ણ પળે સંયમનો સ્વીકાર પૂ.આ. લબ્ધિસૂ. મ.સા.ના વરદ્હસ્તે પાટણનગરે સં.૧૯૮૯ અષાઢ સુ. ૧૧ના શુભદીને કર્યો અને પૂ.આ.શ્રી ભુવનતિલકસૂ. મ.સા.નું શિષ્યત્વ સ્વીકાર્યુ.

દીક્ષા સાથે શિક્ષાનો પ્રારંભ ત્રણ જ વર્ષમાં સંસ્કૃત ટીકા વાંચતા થયા. સંસ્કૃત શ્લોકોની રચના કરવા માંડયા, સમુદાયમાં 'પંડીત મહારાજ' તરીકે પ્રસિદ્ધી પામ્યા.

ધર્મ, ન્યાય, વ્યાકરણ કાવ્ય આદિમાં અપ્રતિમ નિપુણતા પ્રાપ્ત કરી આજે વૃદ્ધાવસ્થામાં પણ યુવાનને શરમાવે એટલા ઉત્સાહથી વિદ્યોપાસના કરી રહ્યા છે. પૂ.ઉપા. યશોવિ મ.સા.ના ગહન - ગંભીર 'અધ્યાત્મસાર, અધ્યાત્મોપનિષત્, વિજયોલ્લાસ મહાકાવ્ય' પર સરળ, સુગમ ટીકા લખી સંસ્કૃતના પ્રગલ્ભ અને પ્રખર વિદ્વાન તરીકે ની પ્રતિભા સિદ્ધ કરી છે. પૂ. આ. હરિભદ્ર સૂ. મ. નો ગ્રંથ 'લલિતવિસ્તરા' પર ટીકા રચી તે આજે પ્રસિધ્ધ થયેલ છે. આગમિક ગ્રંથો દશવૈકાલિક - ઉત્તરાધ્યયન તથા દાર્શનિક ગ્રંથોના ગુજરાતી અનુવાદો ધ્વારા સાહિત્યોપાસના કરી છે.

પૂજ્યશ્રીને ગણિપંન્યાસપદ છાણીનગરે સં-૨૦૧૪ મા. સુ. ૬. આચાર્યપદે આદોનીનગરે (આંધ્ર) સં. ૨૦૨૬ મા. સુ. ૬ ના અલંકૃત કરવામાં આવેલ.

પૂજ્યશ્રી દૂરસુદૂર અનેક પ્રદેશોમાં વિચરી ઘણી જ શાસનપ્રભાવના કરેલ છે. પૂ. ના ઉપદેશથી સંભવપ્રભુની ચાર કલ્યાણકભૂમિ શ્રાવસ્તીનો તીર્થોધ્ધાર થયેલ છે.

પૂજ્યશ્રીને શાસનદેવ સ્વાસ્થ્યપૂર્ણ દીર્ઘાયુષ બક્ષો એવી મંગલ કામના ...અનંત વંદનાવલી....

॥ શ્રી શંખેશ્વરપાર્શ્વનાથાય નમઃ ॥

॥ શ્રાવસ્તિ તીર્થાધિપતિ શ્રી સંભવનાથાય નમઃ ॥

॥ પૂ. સૂત્રકાર - તાર્કિકશિરોમણિ આચાર્યદેવ શ્રી હરિભદ્રસૂરીશ્વરાય નમઃ ॥

॥ પૂ. પંજિકાકાર - આચાર્યદેવશ્રી મુનિચંદ્રસૂરીશ્વરાય નમઃ ॥

॥ પૂ. આત્મકમલ - લબ્ધિ - ભુવનતિલકસૂરીશ્વરાય નમઃ ॥

શ્રી ભુવનતિલકસૂરી ગ્રંથમાલા - ૫૪

# " લલિતવિસ્તરા "

## પ્રથમ વિભાગ


✻ ટીકાકાર ✻

પૂ. ધર્મદિવાકર, સિદ્ધહસ્તલેખક આચાર્યદેવશ્રીમદ્વિજય **ભુવનતિલકસૂરીશ્વરજી** **મ.સા.**ના પ્રથમ પટ્ટાલંકાર

પૂ. કર્નાટક કેસરી, કોંકણ ઉદ્ધારક, શ્રાવસ્તિતીર્થોદ્ધારક, સંસ્કૃતવિશારદ, સૂરીમંત્રપંચપ્રસ્થાનારાધક આચાર્યદેવ શ્રીમદ્વિજય **ભદ્રંકરસૂરીશ્વરજી મહારાજ**

✻ સંપાદક ✻

**મુનિવર્ય શ્રી વિક્રમસેન વિ.મ.**



✻ પ્રકાશક ✻

**ભુવનભદ્રંકર સાહિત્ય પ્રચાર કેન્દ્ર - મદ્રાસ**

**V. V. VORA - MADRAS.**

## -: પ્રાપ્તિસ્થાન :-

લબ્ધિભુવન જૈન સાહિત્ય સદન
C/o. રાજેશકુમાર નટવરલાલ શાહ
બજારમાં, કાપડના વેપારી, પો. : છાણી - ૩૯૧ ૭૪૦.
જિલ્લા : વડોદરા - ગુજરાત.

વીર સં. - ૨૫૧૭

વિ.સં. ૨૦૪૭

લબ્ધિ સં. ૩૦

મૂલ્ય - ૫૦.૦૦
(સાધુસાધ્વી મ. ને અભ્યાસાર્થે ભેટ)

અનંતશ્રી પ્રકાશન - કાનપુર

ભાવના પ્રિન્ટરી - મહેસાણા

ભરત પ્રિન્ટરી - અમદાવાદ

ટાઈટલ મુદ્રક - નેહજ એન્ટરપ્રાઈઝ - મુંબઈ.

# ❊ પ્રકાશકીય.....

❊

❊ પંડિતોની પીપાસા.....

❊

તાર્કિકોની તૃષા.....

દાર્શનિકોની દિવ્યાતુરતા..... પરિપૂર્ણ કરતો ઘણા જ સમયથી જેની રાહ જોવાતી હતી એવા એક અપૂર્વ..... અનુપમ..... અમૂલ્ય ગ્રંથરત્ન ને પ્રકાશિત કરતાં અમે ગૌરવતાની અનુભૂતિ કરીએ છીએ.

આજે જ્યારે ગીર્વાણગીરાનું અધ્યયન-અધ્યાપન, પઠન - પાઠન દોહીલું નહીં, અતિદોહીલું બનતું જાય છે અને સામાન્ય સંસ્કૃત ભાષાના ચરિત્રો - ગ્રંથો પણ વાંચવા મુશ્કેલ થઈ રહયા છે. ત્યારે તાર્કિક - ન્યાયિક અને દાર્શનિક ગ્રંથોનું અધ્યયન - અધ્યાપન તો કેટલું કષ્ટસાધ્ય બને તેવા સમયે ન્યાયિક - દાર્શનિક ગ્રંથ પર સંસ્કૃત ભાષામાં રચના કરવી તો ભગીરથ કાર્યબની જાય, કોક સર્જક પ્રતિભા જ આવું અનુપમ અને શકવર્તી સ્વર્ણિમ કાર્ય કરવા પ્રેરિત થાય છે.

મનીષી મૂર્ધન્ય..... વિધ્વત્વરેણ્ય..... ગીર્વાણગીરામાં વિવરણકારરૂપે વિખ્યાતિને વરેલા..... અલ્પાવધિમાં ચાર - ચાર દાર્શનિક - ન્યાયિક ગ્રંથરત્નો પર ટીકા રચી સંસ્કૃતનાલબ્ધપ્રતિષ્ઠિત સાક્ષર સ્વરૂપે સંસ્તવના સ્તવે છે. એવા પૂ. આ. **શ્રી કર્ણાટક કેસરી ભદ્રંકરસૂરીશ્વરજી મ. સા.** લલિતવિસ્તરા ગ્રંથ અને તેની પંજિકા ઉપર વિશદ - વિસ્તૃત ચાર હજાર શ્લોકપ્રમાણની ટીકા રચી છે.

ગહન ગંભીર અને ગુઢાર્થોથી ભરેલી યાકિનીમહત્તરાસુનુ, કારુણ્યમંડિત પૂ. આ. **શ્રી હરિભદ્રસૂરિજી મ. સા.** ચૈત્યવંદન સૂત્રોના રહસ્યને પ્રગટ કરનાર, યથાર્થ પરમેશ્વર્યની ઓળખાણ કરાવતી ન્યાય - તર્કથી ભરપૂર વ્યાખ્યાઓ વિરચિત કરી તેના પર ગીતાર્થશિરોમણી પૂ. આ. **શ્રી મુનિચંદ્રસૂરિજી મ. સા.** ગુઢાર્થને સ્પષ્ટ કરતી અતિસંક્ષિપ્ત પંજિકા રચી. (પંજિકા પદભંજિકા) પરંતુ કઠીણ, જટીલ વ્યાખ્યાઓ વાંચવી વિધ્વાન્ વર્ગને કષ્ટ સાધ્ય લાગ્યું. અનેક વિધ્વાનોની ઈચ્છા અને ભાવના હતી કે આવા ગંભીર ગ્રંથરત્ન પર સંસ્કૃતના સમર્થ વિદ્વાન કલમ ઉપાડે, એવામાં જ અધ્યાત્મસાર, અધ્યાત્મોપનિષત્ ગ્રંથ પરની પૂજયશ્રીની સરળ - સુગમ અને રહસ્યોદ્ઘાટિની ટીકાના પઠન - પાઠન કરેલા અનેક પૂજયશ્રીએ તથા પંડિતવર્યોએ વિનંતિ કરી. આપશ્રી એક વિશદ વ્યાખ્યાની રચના કરો !

પરોપકારપરાયણ પૂજ્યશ્રીએ એકલે હાથે જ તાર્કિક ગ્રંથ લલિતવિસ્તરા મૂલ અને પંજિકા પર અદ્‌ભુત - અનુપમ ટીકાનું સર્જન કર્યું.

અવશ્ય આ વ્યાખ્યાથી વિદ્‌વાન વર્ગને તથા બાલજીવોને એક સદ્‌ગ્રંથરત્નની પ્રાપ્તિ થશે, તથા અભ્યાસુવર્ગને એક રહસ્યોદ્‌ઘાટન એક ગ્રંથ ઉપલબ્ધ થશે.

આવા ભવ્ય ગ્રંથરત્નનું સર્જન કરી વિદવાન જગતમાં એક અપૂર્વ સાહિત્યનિધિ પ્રદાન કરવા આપની પરોપકારીતાની પ્રશસ્તિ રચવા શબ્દો પણ વામણા લાગે છે. જેટલો ઉપકાર માનીએ તેટલો ઓછો છે. સાથે પ્રાર્થના કરીએ છીએ કે આપ સાહિત્યના સર્જક બની મહાન ગ્રંથ રત્નોનું સર્જન કરી અમારા અજ્ઞાનરૂપી અંધકારનું વિસર્જન કરો...... એજ મંગલભાવના......

આ ગ્રંથમાં જ્ઞાનોપાસનામાં સહયોગી પૂ.આ. શાંતમૂર્તિ **પુણ્યાનંદસૂરિજી** મ.સા., પ્રવચનકાર **આ. વીરસેનસૂરિજી મ. સા.** તથા પ્રેસકોપી પ્રુફ સંશોધન આદિમાં વિશિષ્ટ સહયોગી મુનિવર **શ્રી વિક્રમસેન વિ. મ. સા.** આદિની ખુબ ખુબ અનુમોદના.....

ગ્રંથપ્રકાશનમાં આર્થિક સહયોગ પ્રદાન કરનાર શ્રુતભકિતપરાયણ શ્રી સંઘોનો તથા શ્રુતભકત મહાનુભાવોનો જેટલો આભાર માનીએ તેટલો ઓછો છે. સુંદર..... સુશોભન મુદ્રણ કરી આપવા બદલ પ્રિન્ટીંગ પ્રેસોના મેનેજરોનો આભાર માનીએ છીએ.

પ્રસ્તાવના આલેખક **મુનિપ્રવર અભયશેખર** વિ.મ.સા.નો પણ આભાર માનીએ છીએ.

આ ગ્રંથરત્નનો સ્વાધ્યાય દ્વારા પ્રભુભકિતમાં - ચૈત્યવંદન આદિ વિધિમાં અપૂર્વ ભાવના...... અનુપમ અધ્યવસાય પેદા કરી

**શુભ ભાવોનું પ્રગટીકરણ......**

**અશુભ કર્મોનું શુદ્ધિકરણ......**



**મોક્ષભાવનાનું પ્રગટીકરણ.....**

**કરો એજ મંગલ ભાવના.**

**પ્રકાશક.....**

જગતમાં ઉલ્લાસ લાવે છે આદિત્ય,
જીવનમાં ઉજાસ પ્રગટાવે છે સાહિત્ય ।

આવા સાહિત્યની સેવા કરતા રહો,
વન બનતા જીવનને ઉપવન બનાવતા રહો ।

**પૂ. કોંકણ ઉદ્ધારક આ. શ્રી ભદ્રંકરસૂરીશ્વરજી મ. સા.,
આ. શ્રી પુણ્યાનંદસૂરીશ્વરજી મ. સા., આ. શ્રી વીરસેનસૂરીશ્વરજી
મ. સા. આદિઠાણાના
ભારતનગર વિ. સં. ૨૦૪૬ના ચાતુર્માસ સ્મૃત્યર્થે ....**

રૂ- ૧૫૦૦૧ = ૦૦

# શ્રી ભારતનગર જૈન શ્વેતા. મૂર્તિ. સંઘ

ગ્રાંટ રોડ, મુંબઈ - ૪૦૦ ૦૦૭.



જગતમાં ઉલ્લાસ લાવે છે આદિત્ય,
જીવનમાં ઉજાસ પ્રગટાવે છે સાહિત્ય ।

સ્વયંની કરાવે ઓળખાણ
તે વાસ્તવિક અને ખરૂ જ્ઞાન ......

**પૂ. કર્ણાટક કેસરી, શ્રાવસ્તિતીર્થોદ્ધારક**
**આચાર્ય શ્રી ભદ્રંકરસૂરીશ્વરજી મ. સા. ની સત્પ્રેરણાથી .....**

રૂા- ૧૨૦૦૧ = ૦૦

# શ્રી આદિનાથ જૈન શ્વે. મૂર્તિ. સંઘ

ચિકપેઠ, બેંગલોર - ૫૬૦ ૦૫૩.



પરમપંથના પંથે કરવું છે પ્રસ્થાન,
આરંભવું છે અધ્યાત્મનું અભિયાન ।

ધર્મ સંસ્કૃતિનું કરવું છે ઉત્થાન,
શ્રુતભક્ત બની કરો જ્ઞાનનું બહુમાન ।

**પૂ. મરાઠાવાડાદેશોદ્ધારક આ. શ્રી વારિષેણસૂરીશ્વરજી મ. સા.**
**ની પ્રેરણાથી**

રૂ- ૧૧૦૦૧ = ૦૦

# શ્રી ભવાનીપુર જૈન સંઘ

કલકત્તા

રૂ- ૧૧૦૦૧ = ૦૦

# શ્રી કેનીંગસ્ટ્રીટ જૈન સંઘ

કલકત્તા

રૂ- ૧૦૦૧ = ૦૦

# શ્રી અમરાવતી જૈન સંઘ

અમરાવતી

# સુકૃતના સહભાગી...

**સ્વયંની કરાવે ઓળખાણ ...**

**તે વાસ્તવિક અને ખરૂ જ્ઞાન ...**

- પૂ. કર્ણાટક કેસરી આ. **શ્રી ભદ્રંકરસૂ. મ. સા.**, આ. **શ્રી પુણ્યાનંદસૂ. મ. સા.**, આ. **શ્રી વીરસેનસૂ. મ. સા.** આદિની સત્પ્રેરણાથી ...

  ૫૦૦૧/= શ્રી જૈન શ્વે. મૂ. સંઘ, મુનિસુવ્રતસ્વામી દેરાસર - કાનપુર
  ૫૦૦૦/= શ્રી જૈન શ્રાવિકા મૂ. સંઘ - રાજપીપળા, હ. સરલાબેન
  ૨૫૦૧/= શ્રી જૈન શ્વે. મૂ. સંઘ, છાણી
  ૨૦૦૧/= શ્રી જૈન શ્વે. પલ્લીવાલ સંઘ (કેશવપુરા) હિન્ડૌનસીટી
  ૧૫૦૧/= શ્રી જૈન શ્રાવિકા સંઘ (નઈમંડી) હિન્ડૌનસીટી
  ૫૦૧/= શ્રી ઋદ્ધિચંદજી જૈન, અંજનાદેવી અઠ્ઠાઈ નિમિત્તે, હિન્ડૌનસીટી

- પૂ. આ. **શ્રી અરૂણપ્રભસૂ. મ. સા.** તથા મુનિવર **મહાસેન વિ. મ.**ની પ્રેરણાથી ....

  ૩૦૦૧/= કારેલીબાગ જૈન શ્વે. મૂર્તિ. સંઘ - વડોદરા
  ૨૫૦૦/= કારેલીબાગ જૈન શ્રાવિકા સંઘ - વડોદરા
  ૫૮૦૦/= શ્રી અંધેરી ગુજરાતી જૈન સંઘ, કરમચંદ જૈન પૌષધશાલા - મુંબઈ
  ૧૧૦૧/= શ્રી ભીલવાડા જૈન શ્વે. સંઘ (રાજસ્થાન)

- પૂ. તપસ્વી આ. **શ્રી રાજતિલકસૂ. મ. સા.** ની પ્રેરણાથી .....

  ૨૦૦૦/= શ્રી રાજપુર જૈન સંઘ (ડીસા)

- **સાધ્વીજી દેવગુણાશ્રીની પ્રેરણાથી ....**

  **૩૦૦૦/= શ્રી ચંદ્રપ્રભસ્વામી જુના મંદીર, જૈન શ્રાવિકા સંઘ - મદ્રાસ**
  **૫૦૦૦/= શ્રી શાહુપુરી જૈન શ્રાવિકા સંઘ - કોલ્હાપુર**

- **સાધ્વીજી જયવંતાશ્રીની પ્રેરણાથી ....**

  ૧૦૦૧/= શ્રી ગોકાક જૈન સંઘ

■ સાધ્વીજી **હંસાશ્રી**ની સંયમપર્યાયની અર્ધશતાબ્દિ નિમિત્તે સાધ્વીજી **નિર્મલાશ્રી**ની પ્રેરણાથી
૧૦૦૧/= ચંદનબાલા જૈન ઉપાશ્રયની બહેનો હ. કાંતાબેન બી. શાહ - માલેગામ
૧૦૦૧/= વર્ધમાનનગર જૈન શ્રાવિકા સંઘ હ. કુમુદબબેન બી. શાહ - માલેગામ

■ સાધ્વીવર્યા **ઉમંગશ્રી**ની પ્રેરણાથી .....
૫૦૧/= જ્ઞાનખાતું - ઈડર
૭૫૧/= શ્રી જૈન શ્રાવિકા સંઘ - ઈડર
૫૦૧/= દેસાઈશાલની બહેનો - ઈડર
૫૦૦/= ભક્તવર્ગ - ઈડર

■ પં. **શ્રી પદ્મવિજયગણી** તથા **સુશીલ વિ. મ. સા.** ની પ્રેરણાથી .....
૫૦૧/= શેઠ કેસરીચંદ મોતીચંદ - દમણ

■ સુવિશુદ્ધસંયમી સાધ્વીજી **સુવ્રતાશ્રી**ના શિષ્યા સાધ્વીજી **લાવણ્યશ્રી**ની પ્રેરણાથી ....
૧૧૧૧/= શ્રી અડપોદરા જૈન સંઘ (ગુજરાત)
૫૦૦/= ભક્તવર્ગે કરેલ જ્ઞાનપૂજનમાંથી - પાલીતાણા
૭૦૦/= કાશી કેશર જૈન ધર્મશાલા આરાધક બહેનો - પાલીતાણા
૫૦૧/= ગુરુભક્ત મંગુબેન સાકલચંદ દોશી - ઈડર
૫૦૧/= સાધ્વીજી રતીશ્રી (ચાણસ્માવાલા) ૬૦ વર્ષના સંયમપર્યાય અનુમોદનાર્થે
૧૦૧/= ચંદ્રાબેન જશવંતભાઈ - હીંમતનગર

■ સાધ્વીજી **સુવ્રતાશ્રી**ના શિષ્યા સાધ્વીજી **જિતેન્દ્રશ્રી**ની પ્રેરણાથી ....
૧૦૦૧/= શ્રી જૈન શ્રાવિકા સંઘ - ધંધુકા
**૫૦૦૧/= શ્રી હોસ્પેઠ જૈન શ્વે. સંઘ (કર્ણાટક)**



॥ શ્રી અર્હં નમઃ ॥

# અથ પ્રસ્તૂયતે...

અનેક દેવ દેવીઓથી પરિવરેલા ઈન્દ્ર પોતાની ઈન્દ્રસભામાં બેઠા છે. ગીત અને સંગીતના જલસાઓ ગોઠવાયા છે. નૃત્ય અને ગાનમાં સહુકોઈ એકતાન બન્યા છે. અને અચાનક ....

ઈન્દ્રની આંખો મોટી થવા માંડી ... ભમરો ઊંચી થવા માંડી ... જોતજોતામાં આખા શરીર પર વૈશ્વાનર છવાઈ ગયો ... આ મારું સિંહાસન ધ્રુજાવ્યું કોણે ? એ ઈન્દ્રનો પ્રશ્ન હતો. પોતાના જ અવધિજ્ઞાનથી જ્યારે જવાબ જાણ્યો ત્યારે ક્રોધ હર્ષમાં પલટાયો. ત્રિલોકનાથ શ્રી તીર્થંકર પરમાત્માનું ચ્યવન જાણી રોમરાજી વિકસ્વર થઈ. અંતર ભક્તિભાવથી છલકાઈ ગયું.

ઈન્દ્ર સિંહાસન પરથી નીચે ઉતર્યા. પ્રભુની દિશામાં ૭ - ૮ ડગલાં ગયા, દિલમાં ભાવોલ્લાસ સીમિત નહીં રહી શક્યો અને **નમુત્થુણં (શક્રસ્તવ)** દ્વારા બહાર આવ્યો.

આવા મહત્વના પ્રસંગે ઈન્દ્ર મહારાજા જેવા પોતાના પ્રકૃષ્ટ ભક્તિભાવને આ શક્રસ્તવ દ્વારા વાચા આપે છે એનાથી જણાય છે કે આ સૂત્રમાં શ્રદ્ધા અને ભક્તિના કેવા ઉત્કૃષ્ટ રહસ્યો પડેલા છે.

સિદ્ધર્ષિ કે જેઓ મહાકવિ માઘના પિતરાઈ ભાઈ થાય, મહાત્મા ગર્ગર્ષિના ઉપદેશથી વૈરાગ્ય પામ્યા. એમણે સંસારને તિલાંજલિ આપી, પણ સંસારને પ્રાપ્તિ થઈ એક અજોડ કવિની સારા વિશ્વના વિદ્વાનો કહે છે કે, તેઓએ રચેલ ચમ્પૂ કાવ્ય 'ઉપમિતિ ભવ પ્રપંચાકથા' માત્ર સંસ્કૃત વાઙ્મયમાં જ નહીં, વિશ્વની તમામ ભાષાઓમાં અજોડ છે, આવી રૂપક કથા અન્ય કોઈ નથી.

ચમત્કારિક કલ્પનાશક્તિ ધરાવનાર આ વિદ્વાનના જીવનનો એક પ્રસંગ **લલિતવિસ્તરા** મહાગ્રન્થની ઉજ્જવળ યથોગાથા ગાય છે. બૌદ્ધદર્શનના સંગીત અભ્યાસ માટે તેઓ બૌદ્ધો પાસે ગયા. એમની વિધ્વતા પારખીને બૌદ્ધોએ એમને પોતાનામાં ખેંચી લેવા પ્રયાસો કરવા માંડયા. એમને પણ બૌદ્ધદર્શનનું આકર્ષણ થયું, અને ત્યાં રહી જવાનો નિર્ણય જણાવવા ગુરૂમહારાજ પાસે આવ્યા. ગુરૂદેવ પણ મહાન જ્ઞાની હતા. બૌદ્ધોના તર્કની સામે પ્રતિતર્ક દ્વારા જેમ દર્શનની સત્યતા સમજાવી, નિર્ણય બદલીને એની જાણ કરવા પાછા બૌદ્ધો પાસે ગયા. બૌદ્ધોએ પુનઃ દલીલો કરી પૂર્વના નિર્ણયનું વળગણ પેદા કર્યું. પાછા નિવેદન કરવા ગુરૂમહારાજ પાસે આવ્યા. પુનઃ ગુરૂદેવે એમને જૈનદર્શનમાં સ્થિર કર્યા. કહે છે કે આ રીતે સિદ્ધર્ષિએ ૨૧ વાર બૌદ્ધદર્શન અને જૈનદર્શન વચ્ચે આવનજાવન કર્યું.

છેલ્લીવાર જ્યારે તેઓ સ્વગુરૂ પાસે આવ્યા, ગુરૂદેવે એમને સ્વયં સમજાવવાનો રાહ ન લીધો. એના બદલે એમના હાથમાં **લલિતવિસ્તરા** મહાન ગ્રન્થ મૂકી પોતે જિનાલયને જુહારવાને નામે નીકળી ગયા.

અને **લલિતવિસ્તરા** ગ્રન્થે ચમત્કાર કર્યો: બૌદ્ધદર્શનની દલીલો અને તર્કો સામે જૈનદર્શનની મહાનતા - વિશાળતા અને સત્યતાની પ્રતીતિ સિદ્ધર્ષિને થઈ ગઈ. તેઓ હવે નિઃશંકપણે જૈનસાધુ બની ગયા.

બૌદ્ધ વગેરે દરેક દર્શનોને જડબાતોડ જવાબ આપી શકે એવા કેવા ઠોસ તર્કો **લલિતવિસ્તરા** ગ્રન્થમાં ભર્યા છે તે આના પરથી સ્હેજે કલ્પી શકાય છે.

બસ, આ જ પ્રસ્તુત ગ્રન્થનું મહાન સૌભાગ્ય છે.
નમુત્થુણં સૂત્ર એટલે ભક્તિ - શ્રદ્ધાની પરાકાષ્ઠા !
**લલિતવિસ્તરા** વૃત્તિ એટલે તર્કની પરાકાષ્ઠા !

કમાલ કરી સૂરિપુરંદર **શ્રી હરિભદ્રસૂરી મહારાજે ...**
સોનામાં સુગંધ ભેળવી દીધી ....
શ્રદ્ધા સાથે તર્કનો સુમેળ કર્યો !

સામાન્યથી શ્રદ્ધા અને તર્ક વિરોધી કહેવાય છે.
શ્રદ્ધાનો આવિર્ભાવ થાય દિલમાં, તર્કનો દિમાગમાં ....
શ્રદ્ધામાં જોર હોય ભાવનું, તર્કમાં બુદ્ધિનું ....
શ્રદ્ધામાં સમર્પણ હોય છે, તર્કમાં 'આ આવું શા માટે ?'
એમ માથું ઉંચકવાનું હોય છે.

પરસ્પર વિરુદ્ધ ભાસતા આ બન્નેનો સંબંધ સધાયો છે, ચૈત્યવંદન સૂત્રો અને તેની લલિતવિસ્તરા વૃત્તિમાં .....

શ્રદ્ધામાં આગળ વધવું છે ?
શ્રીજિનેશ્વરદેવ પ્રત્યે ભક્તિભાવની છોળો ઉછાળવી છે ?
નમુત્થુણં વગેરે સૂત્રના એક એક પદને મમરાવતા જાઓ ....
તર્કની સૂક્ષ્મતાનો પરિચય કેળવવો છે ?

શ્રી જૈનદર્શનમાં તત્ત્વોનું ત્રિકાળ અબાધિત, પૂર્વાપર અવિરુદ્ધ યથાર્થ નિરૂપણ છે એવી પ્રતીતિ કરવી છે ?

**લલિતવિસ્તરાના** એક એક વાક્યને વાગોળતા રહો ....
સિદ્ધર્ષિ ગણિને એ પ્રતીતિ થઈ તો આપણને કેમ નહીં થાય ?
સિદ્ધર્ષિ ગણિ જો બોલી ઉઠયા કે ....

नमोऽस्तु हरिभद्राय तस्मै प्रवरसूरये ।
मदर्थं निर्मितायेन वृत्तिर्ललितविस्तरा ॥

આપણે પણ આ બોલી ઊઠશું.

જેટલો ગોળ નંખાય એટલું ગળ્યું થાય.

આ ગ્રન્થને જેટલું વધુ ને વધુ વાગોળવાનું થાય એટલા ગૂઢ રહસ્યો એમાંથી પ્રાપ્ત થાય છે.

શકસ્તવની મુખ્યતા સાથે ચૈત્યવંદનના આ સૂત્રોના એક એક પદ પાછળ રહેલા ગૂઢ રહસ્યોના સાગરને યાકિનિમહત્તરાસૂનુ**શ્રી હરિભદ્રસૂરિ મહારાજે** આ **લલિતવિસ્તરા** મહાગ્રન્થમાં ઉતાર્યો છે. એક એક પદને હેતુ તરીકે લઈ, આગ્રન્થમાં હેતુવાદથી એ સિદ્ધિ કરવામાં આવી છે કે શ્રી તીર્થંકરદેવ જેવું કોઈ પરમોચ્ચ તત્ત્વ આ વિશ્વમાં નથી અને શ્રી જૈનદર્શન જેવું કોઈ સંપૂર્ણ સત્ય દર્શન આ વિશ્વમાં નથી. ચૈત્યવંદનની મહાન ક્રિયાને ભાવોના પ્રાણ રેડી ચૈત્યવંદન કરવાનું માર્ગદર્શન આ ગ્રન્થમાંથી મેળવી શકાય છે.

આ **લલિતવિસ્તરા** માં કેવા રહસ્યો છૂપાયેલા છે જાણવા માટે એનો કંઈક વિષય પરિચય મેળવીએ.

ગ્રન્થકારે મંગળ કરીને ચૈત્યવંદનની સફળતા દર્શાવ્યા બાદ એ સમ્યક્ કઈરીતે થાય એ માટેના વિધિમાં ઉપયોગ વગેરે ૫ અંગોનું નિરૂપણ કર્યું છે. ત્યારબાદ ધર્મના અને ચૈત્યવંદનના અધિકારીની વિશેષતાઓ દર્શાવી અનધિકારીને આપવામાં રહેલા દોષો - અધિકારીને આપવામાં થતા લાભોનું પ્રરૂપણ કર્યું છે. તદનન્તર અપવાદમાર્ગનું સ્વરૂપ, શાસ્ત્રપરીક્ષા અને શુદ્ધદેશનાનું નિરૂપણ કરી ચૈત્યવંદનની પૂર્વવિધિ જણાવી છે. તે પછી સ્તોતવ્ય વગેરે ૯ સંપદાઓ જણાવી વ્યાખ્યાનાં સંહિતા વગેરે ૬ પ્રકારનાં સ્વરૂપ અને જિજ્ઞાસા વગેરે ૭ પ્રકારનાં અંગો પર ગ્રન્થકારે સુંદર પ્રકાશ કર્યો છે. હવે પછી, નમોત્થુણં અરિહંતાણં વગેરે એક એક પદ લઈ તેની વ્યાખ્યામાં ગ્રન્થકારે નીચેની બાબતો અંગે રહસ્યો ખોલ્યાં છે.

**નમોત્થુણં અરિહંતાણં** - ધર્મવૃક્ષનાં બીજ વગેરે, ભાવનમસ્કારમાં તરતમતા, ઈચ્છા વગેરે ૩ યોગ, ધર્મ - યોગ સંન્યાસ

**ભગવંતાણં** - 'ભગ' ના ઐશ્વર્ય વગેરે ૬ અર્થોની શ્રી અરિહંતમાં વિદ્યમાનતા

**આઈગરાણં** - સાંખ્યના અકર્તૃત્વવાદનું તેમજ સ્વભાવમાત્રવાદનું ખંડન

**તિત્થયરાણં** - આગમધાર્મિકનાં વેદ અપૌરુષેયત્વવાદનું નિરસન ....

**સયંસંબુદ્ધાણં** - અનાદિ પરમેશ્વર મહેશના અનુગ્રહથી જ બોધ - નિયમની પ્રાપ્તિ થાય એવા મહેશાનુગ્રહ મતનું નિરાકરણ

**પુરિસુત્તમાણં** - બધા જીવો એક જાતીય હોય છે એવા કેટલાક બૌદ્ધોના મતનો નિરાસ, સહજ તથા ભવ્યત્વના કારણે શ્રી તીર્થંકરના જીવોમાં રહેલ પરાર્થવ્યસનીપણું વગેરે ૧૦ વિશિષ્ટ

ભાવોનું નિરૂપણ

**પુરિસસીહાણં** - ન્યૂનાધિક ઉપમા મૃષાવાદ છે એવા સાંકૃત્યમતનું મૃષત્વખ્યાપન.

**પુરિસવરપુંડરીયાણં** - વિજાતીયની ઉપમા ન અપાય એવા સુચારુશિષ્યના મતના ખંડન પૂર્વક પુંડરીક અને પ્રભુના ૮ ધર્મોની સમાનતાનું પ્રદર્શન

**પુરિસવરગંધહત્થીણં** - 'પ્રતીપાદન ક્રમશઃ જ જોઈએ' એવા બૃહસ્પતિના શિષ્યોના પ્રતિપાદનનું નિરસન

**લોગુત્તમાણં** - વાચ્યાર્થ એકદેશમાં પણ શબ્દપ્રયોગ થાય એનું નિરૂપણ

**લોગનાહાણં** - નાથ કોણ અને કોના એની વિશદ છણાવટ

**લોગહિયાણં** - સર્વજીવસ્વરૂપ કે પંચાસ્તિકાયમય લોકનું હિત કોને કહેવાય ? તેનો વિચાર

**લોગપઈવાણં** - વિશિષ્ટ સંજ્ઞીજીવો માટે જ ભગવાન દીપક સમાન છે એ વાતનો પ્રકાશ

**લોગપજ્જોઅગરાણં** - પ્રભુ ભવ્યજીવ સ્વરૂપ લોકોને જ જીવાદિતત્ત્વોના પ્રકાશક છે એનું પ્રરૂપણ

**અભયદયાણં** - ૭ પ્રકારના ભય, અભયની આવશ્યકતા વગેરેનું વિવેચન

**ચક્ખુદયાણં** - તત્ત્વબોધમાં કારણભૂત શ્રદ્ધાસ્વરૂપ ચક્ષુનું દાતૃત્વ

**મગ્ગ દયાણં** - ક્ષયોપશમવિશેષ સ્વરૂપ માર્ગની આવશ્યકતા, યોગાચાર્યકૃત સમર્થન

**સરણદયાણં** - તત્ત્વવિવિદિષા સ્વરૂપ શરણ અને બુદ્ધિના ૮ ગુણોની આવશ્યકતાનું નિરૂપણ, અવધૂતાચાર્યની સાક્ષી

**બોહિદયાણં** - સમ્યગ્દર્શન બોધિનું દાતૃત્વ. ભગવદ્ ગોપેન્દ્ર ની સાક્ષી

**ધમ્મદયાણં - ધમ્મદેસયાણં** - ચારિત્રધર્મનું દાયકત્વ અને દેશકત્વ

**ધમ્મનાયગાણં** - ધર્મનાયકપણાંનાં જ મૂળ હેતુઓ અને એ દરેકના ૪ - ૪ પેટાહેતુઓ

**ધમ્મસારહિણં** - ધર્મના સમ્યક્ પ્રવર્ત્તન - પાલન અને ૩ પ્રકારના દમન કરનારા હોવાથી સારથી

**ધમ્મવરચાઉરંતચક્કવટ્ટીણં** - ધર્મની ૩ પરીક્ષા શુદ્ધિ, ૪ પ્રકારના ધર્મનું સ્વરૂપ ...

**અપ્પડિહય** - ઈષ્ટતત્ત્વજ્ઞાનવાદી બૌદ્ધનું ખંડન

**વિયટ્ટછઉમાણં** - અવતારવાદી આજીવિકમતનો નિરાસ

**જિણાણં** - સ્વચ્છસંવેદનમાત્રવાદી બૌદ્ધમતનું નિરાકરણ, માધ્યમિકબૌદ્ધમત ખંડન

**તિણ્ણાણં** - અનંતનામના વાદીના મતનું ખંડન

**બુદ્ધાણં** - જ્ઞાનપરોક્ષતાવાદી મીમાસંકમતનું નિરાકરણ

**મુત્તાણં** - જગત્કર્તા બ્રહ્મમાં વિલય એ મોક્ષ એવા જાતનો નિરાસ

**સવ્વન્નૂ** - સાંખ્યના અસર્વજ્ઞતા મતનું મિથ્યાત્વખ્યાપન, જ્ઞાનમાંય સામાન્ય જ્ઞાત છે,

અમૂર્તજ્ઞાનમાં આકાર વગેરેની છણાવટ

**સિવ.** - આત્મવિભુત્વમતનું અને વૈશૈષિકમાન્ય દ્રવ્યાદિનું ખંડન, વ્યવહાર - નિશ્ચય દૃષ્ટિ - પરિણામીનિત્યતાનું નિરૂપણ

**નમો જિ.** - અધ્વૈતમુક્તિમત નિરાકરણ પ્રજ્ઞાના ૩ સંસ્કાર

આટલા નિરૂપણ બાદ સંપદાઓનું પ્રયોજન, સંપદાઓથી અનેકાંતવાદ - સ્યાદ્વાદની સિદ્ધિ એમાં વાસનામૂલક વ્યવહારવાદી બૌદ્ધમતનું ખંડન વગેરે કરી **'નમુત્થુણં'** નું વિવેચન સમાપ્ત કર્યું છે. છેવટે સ્તોત્ર કેવા અને કેમ બોલવા એ જણાવી અરિહંતચેઈઆણં સૂત્રનું વિવચેન ગ્રન્થકારે કર્યું છે. જેમાં અર્હત્ચૈત્યના વંદનાદિનો અધિકાધિક લાભ પામવાની શ્રાવકની લાલસા, વંદન - પૂજનાદિ પર તેમજ કાયોત્સર્ગ શ્રદ્ધા - મેધા વગેરે પાંચ સાધનો પર સુંદર પ્રકાશ ફેંક્યો છે. છેવટે શ્રદ્ધા વગેરે હોય તો જ સદ્અનુષ્ઠાન થાય એ દર્શાવી અન્નત્થ સૂત્રના વિવેચનનો પ્રારંભ કર્યો છે. એમાં **'આગાર'** નો અર્થ, એનું વિભાગીકરણ, એની આવશ્યકતા, કાયોત્સર્ગનું પરિણામ, ધ્યેય, કાયોત્સર્ગના પ્રકાર વગેરેનું નિરૂપણ કરીને ત્યારબાદ લોગસ્સસૂત્રની વિવેચનાનો **લલિતવિસ્તરા**માં પ્રારંભ થાય છે. એમાં લોગસ્સઉજ્જોઅગરે વગેરે પદોનું પદકૃત્ય વગેરે દર્શાવી 'પસીયંતુ' એ પ્રાર્થના નથી પણ સ્તુતિ છે એનું સ્પષ્ટીકરણ છે. આરોગ્યબોધિ લાભ વગેરેની માંગણી એ નિયાણું નથી કે મૃષાવાદ નથી એનું વિશદ વિવેચન વગેરે કરી લોગસ્સસૂત્રની વ્યાખ્યા પૂર્ણ થાય છે.

પુક્ખરવર સૂત્રની વ્યાખ્યામાં આગમ અપૌરુષેયત્વવાદનું ખંડન, શ્રુતવૃદ્ધિની આશંસાથી નિરાશંસભાવપ્રાપ્તિ વગેરેનું દિગ્દર્શન કરાવીને ગ્રન્થકારે સિદ્ધાણં સૂત્રની વ્યાખ્યાનો પ્રારંભ કર્યો છે. એમાં, સંસાર - મોક્ષ ઉભયને છોડીને સિદ્ધો રહે છે તે મતનું, અક્રમ મુક્તિવાદનું, અનિયતદેશવાદનું તેમજ સ્ત્રીમુક્તિનિષેધક દિગંબરમતનું ખંડન અને ઈક્કોવિ વચન અર્થવાદ છે કે વિધિવાદ એની રસપ્રદ ચર્ચા કરવામાં આવી છે. વૈયાવચ્ચ સૂત્રમાં વૈયાવૃત્ત્યકર દેવો સ્મરણીય કેમ ? ઈત્યાદિની પ્રરૂપણા છે.

જયવીયરાય સૂત્રની વિવેચનામાં ભવનિર્વેદ વગેરે આશંસાઓનું સ્પષ્ટીકરણ, પ્રણિધાનની ૧૧ મુદ્દાથી વિચારણા, ચૈત્યવંદન સિદ્ધ કરવા માટેની ભૂમિકાનાં ૩૩ કર્તવ્યો વગેરેનું વિશદ વિવરણ ગ્રન્થકારે કર્યું છે.

આટલા બધા વિષયોને આવરી લેતા આ **લલિતવિસ્તરાવૃત્તિ** મહાગ્રન્થનો વિસ્તાર કાંઈ હજારો શ્લોક પ્રમાણ વિશાળ નથી. એટલે સમજી શકાય છે કે આ લલિતવિસ્તરા ગ્રન્થ પણ અર્થગંભીર છે. એટલે કર્મપ્રકૃતિચૂર્ણિ પરની ટીપ્પણ વગેરેના રચયિતા આચાર્યવર્ય શ્રીમદ્ **મુનિચન્દ્રસૂરિમહારાજે** એને સ્પષ્ટ કરવા એના પર પંજિકાવૃત્તિની રચના કરી છે. આની એકદમ સરળ સંસ્કૃતભાષામાં - જાણે કે પરસ્પર ગુજરાતીમાં જ વાતો કરાતી ન હોય એવી સંસ્કૃતભાષામાં અનેકવિધ સાહિત્યસર્જક કર્નાટકકેસરી પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્વિજય **ભદ્રંકરસૂરીશ્વરજી મહારાજે** ભદ્રને કરનારી ભદ્રંકરા વૃત્તિ રચી સંઘ સમક્ષ રજુ કરી છે. ચારે બાજુ ફરી વળેલું ભૌતિકતાનું મોજું ચતુર્વિધ સંઘને પણ

આજે ઓછેવત્તે અંશે સ્પર્શી ગયું છે. સંસ્કૃતભાષામાં નવી રચનાઓતો લગભગ બંધ પડી જવાની સ્થિતિ છે. સંસ્કૃતભાષાના જૂના ગ્રન્થોનું અધ્યયન શ્રાવક - શ્રાવિકાવર્ગમાં તો લગભગ છે જ નહીં. સાધુ - સાધ્વી વર્ગમાં પણ એ આઘાતજનક હદે મંદ પડી રહ્યું છે. આજે સમાજનું વાતાવરણ એવું થયું છે કે ગુજરાતીમાં પણ જો તાત્ત્વિક - અર્થગંભીર રચના કરવી હોય તો એવો વાચકવર્ગ ન હોવાથી ઉત્સાહ પડી ભાંગે. આવા સાવ નિરાશા અને હતાશાજનક સંયોગોમાં પણ પૂજ્યપાદશ્રીએ ગીર્વાણગિરામાં પોતાની કલમ ચાલુ રાખી છે એ જાણે કે 'એકલો જાને રે...' ઉક્તિને સાર્થક કરે છે. આ વયોવૃદ્ધ ઉંમરે પણ, સ્વાસ્થ્યની એટલી બધી અનુકૂળતા ન હોવા છતાં પણ, પૂજ્યપાદશ્રીની ચાલુ રહેલી આ સાહિત્યસર્જનની પ્રવૃત્તિ, તેઓશ્રીના ધગશ, હિંમત, અપ્રમત્તતા, સ્વાધ્યાયરુચિ વગેરે ઉદાત્ત ગુણોને સૂચિત કરે છે, તેમજ યુવાન સાધુઓને એક સુંદર આદર્શ પૂરો પાડે છે. પૂજ્યપાદશ્રીના વિરાટ સંયમપર્યાય - ગુણો વગેરે આગળ હું તો સાવ વામણો છું. તેઓ શ્રીમદ્‌ના ગ્રન્થની પ્રસ્તાવના લખવાની મારી શી ગુંજાઈશ ? તેમ છતાં પૂજ્યપાદશ્રીએ એ માટે મને યાદ કરી તક આપી. એ માટે તેઓ શ્રીમદ્‌નો હું ખુબખુબ ઋણી છું પૂજ્યપાદશ્રીનું આ નવું સર્જન, ચતુર્વિધસંઘમાં મંદ પડતી જતી સ્વાધ્યાય પ્રવૃત્તિને વેગવંતી બનાવવામાં ફાળો આપશે એવી આશા રાખીએ.

સંસ્કૃતભાષામાં કરવામાં આવેલી આ સરળ વિવેચના છે. **લલિતવિસ્તરા** ગ્રન્થમાં રહેલા શ્રુતખજાનાની ગુજરાતીમાં વિસ્તૃત ઝાંખી કરવી હોય તો શાસ્ત્રવચનોના ગૂઢ રહસ્યોને યથાર્થપણે સરળરીતે રજુ કરવાની આગવી કલા ધરાવનારા પૂજ્યપાદ ગુરુદેવ આ. ભગવંતશ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજ સાહેબ લિખિત વિવેચના **પરમતેજ ભાગ ૧-૨** વાંચવાની જિજ્ઞાસાઓને ખાસ ભલામણ છે.

કર્નાટક કેસરી પૂજ્યપાદ આચાર્ય ભગવંત શ્રીમદ્ વિજય **ભદ્રંકરસૂરીશ્વરજી** મહારાજ સાહેબ ઉત્તરોતર અન્યપણ અનેક નવા સર્જનો કરી શ્રી સંઘની શ્રુતસમૃદ્ધિમાં વધારો કરતાં રહે એવી શુભભાવના સાથે વિરમું છું

**શ્રી પ્રેમ - ભુવનભાનુ - ધર્મજિત - જયશેખરસૂરીશ્વર**
**શિષ્યાણુ મુનિ અભયશેખર વિજય**
**કોલ્હાપુર**



# પ્રસ્તાવના

'આત્મકલ્યાણનો ઉદ્દેશ રાખી કરાતી સર્વજ્ઞભાષિત ક્રિયા અધ્યાત્મ કહેવાય છે' આવા અધ્યાત્મપ્રધાન જૈન શાસનના સંપૂર્ણ રીત્યા પરીક્ષક સૂરિપુરંદર **શ્રી હરિભદ્રસૂરીશ્વરજી** મહારાજાએ 'જ્ઞાનક્રિયાં મોક્ષઃ' એ ન્યાયાનુસારે જ્ઞાનસમન્વિત ક્રિયા મોક્ષનું પરમ સાધન છે. એ મુખ્ય ધ્વનિ આ ગ્રન્થમાં રજૂ કર્યો છે.

એટલે આજે કેટલાક એકલા જ્ઞાનને ત્યારે કેટલાક એકલી ક્રિયાને માત્ર જે મોક્ષના મુખ્ય સાધન તરીકે જાહેર કરે છે તેમણે આ ગ્રન્થ બહુ ધ્યાનપૂર્વક સાદ્યન્ત મનન પૂર્વક વાંચવો જોઈએ કે જેથી બોધિની ઉત્પત્તિ અને મિથ્યાત્વાંધકાર વિલીન થાય !

વળી આજનાં યુગમાં સક્રિયજ્ઞાન કે જ્ઞાનક્રિયાની અતિ અગત્ય હોય તેને દર્શાવનાર ગ્રન્થ અતિ ઉપયોગી થાય એમાં સંશય નથી.

જો કે સર્વજ્ઞભાષિત જૈનશાસનમાં અનેક અધ્યાત્મરૂપ ક્રિયાઓ છે તો પણ સર્વ ક્રિયા શિરોમણીભૂત તથા ચતુર્વિધ સંઘને સદા કરણીય 'દૈનિક' ક્રિયા આવશ્યક ક્રિયા અન્તર્ગત ચૈત્યવંદન ક્રિયા છે જે સકલ શ્રીસંઘના પ્રાણરૂપ છે તેમાં જરાય અતિશયોક્તિ નથી.

## <u>ચૈત્યવંદનની વિધેયતા —</u>

શ્રી અરિહંત ભગવંતના ગુણગુણના અનન્ય અનુરાગીઓએ ત્રણેય કાલ સદા ચૈત્યવંદન, અસાધારણ સમ્યગ્દર્શનની શુદ્ધિ માટે કરવું જોઈએ, તથા સમ્યગ્દર્શનની (પરમવિવેકની) શુદ્ધિથી જ્ઞાન પરિણતિ, યથાર્થ થાય છે અને ક્રમશઃ ચારિત્રાચારનો પરિણામ પ્રગટે છે વાસ્તે વિધિના અનુરાગી ભવ્ય પુરુષોએ અવશ્ય ચૈત્યવંદન કરવું જોઈએ એવી જિનેશ્વરોની આજ્ઞા છે.

## <u>પ્રસ્તુત ગ્રન્થની સફલતા અને ઉપયોગિતા —</u>

આચાર્યશ્રી **હરિભદ્રસૂરીશ્વરજી** મહારાજે આ **'લલિતવિસ્તરા'** નામક ગ્રન્થ, અનુષ્ઠાનોપયોગીરૂપે **રચેલો છે. જેમ દ્રવ્ય - ગણિત - કથાનુયોગોને ચારિત્રપ્રતિપત્તિહેતુરૂપે પ્રધાનપણાએ સ્વીકારી, તેઓનું જ્ઞાનફલદાયી બને છે. તેમ પ્રસ્તુત શાસ્ત્રનું જ્ઞાન, શાસ્ત્રમાં કહેલ અનુષ્ઠાન કરવા દ્વારા સફલ છે.**

**આ ગ્રન્થ, આવશ્યક ચૈત્યવંદન સૂત્રોના અનન્ય - અસાધારણ વ્યાખ્યાથી સુશોભિત હોઈ વિશેષથી ઉપયોગી તરીકે પ્રસિદ્ધ છે.**

**જ્યારે સૂત્રોના પરમ રહસ્યનું જ્ઞાન થાય ત્યારે પરિણામનો ઉલ્લાસ જાગે છે અને તેથી કર્મોના ક્ષય ક્ષયોપશમથી અપૂર્વ આત્મગુણોનો વિકાસ થાય છે.**

આ મુદ્દાસર ચૈત્યવંદન સૂત્રોનું અનુપમ અને સર્વોપયોગી વિવરણ કરવું વ્યાજબી ઠરે

છે. આ વિવરણના જ્ઞાન દ્વારા શ્રદ્ધાનું મૂલ મજબૂત બને છે. વિશેષણોની સફલતાનું પરિજ્ઞાન થવાથી અરિહંત ભગવંતના પ્રત્યે વિશેષથી નિરુપમ આદરભાવ અવશ્ય વિકસે છે. માટે આ ગ્રન્થમાં ઈતર દર્શનાભિપ્રેત દેવ, એ સુદેવ નથી એમ વિવેકનયનદાયક વિશેષણોની સફલતા દર્શક પ્રયાસ, યુક્તિયુક્ત છે માટે જ પરમોપયોગી ચૈત્યવંદન સૂત્રોનું વ્યાખ્યાન, શ્રી પરમોપકારી હરિભદ્રસૂરીશ્વરે કરેલ છે.

## પ્રસ્તુત વિવરણની અતિ પ્રાચીનતા —

આ ગ્રન્થ, તમામ વૃત્તિઓ કરતાં પ્રથમ - મૌલિક છે કેમ કે; હાલ વીસ (૨૦) થી અધિક પ્રાપ્ત થતા ચૈત્યવંદન સૂત્રના વિવરણો, આ હારિભદ્રીય વિવરણ કરતાં પ્રાચીન નથી.

વળી શ્રી હરિભદ્રસૂરીશ્વરજીના સમયે કોઈપણ ચૈત્યવંદન સૂત્રીય વિવરણ, પ્રસિદ્ધ ન હતું કારણ કે તેઓશ્રીએ કહ્યું છે કે 'યાવત્તથાપિ વિજ્ઞાતમર્થજાતં મયા ગુરોઃ, તાવદેવ નિગદતઃ' (શ્લોક ૩.) જો તે વખતે પ્રાચીન વિવરણ હોત તો જેમ 'યદાપિ મયા તથાઽન્યૈં કૃતાઽસ્ય વિવૃતિઃ' ઈતિ આવશ્યકની વ્યાખ્યાના અવસરે અન્યકૃતકૃતિની સ્મૃતિ કરી તેમ અહીં પણ પ્રાચીન વિવરણ વિદ્યમાન હોત તો અવશ્ય તેનો અંગુલીનિર્દેશ કરતેજ અને 'ગુરુથી અધિગત માત્ર અર્થના વિવરણ' રૂપ પ્રસ્તુત કૃતિની પ્રતિજ્ઞા નહીં કરતે.

એવંચ ચૈત્યવંદનનો વિધિ અને તેનું વિવરણ, શ્રીમાન્ હરિભદ્રસૂરિજીએ જ પ્રથમતઃ પ્રસિદ્ધ કરેલ છે. કેમકે; શ્રીમત્‌થી પ્રાચીન સૂત્ર નિર્યુક્તિ ભાષ્યચૂર્ણિ વૃત્તિ વિ. બીજે સ્થળે ચૈ. વિધિ કે તેનું વિવરણ દેખાતું નથી અને ચૈત્યવંદન ભાષ્યકાર શ્રી દેવેન્દ્રસૂરિજી આદિ આચાર્યોએ પણ જાહેર કર્યું છે કે 'લલિતવિસ્તરા' થી નવ (૯) અધિકારો ગ્રહણ કરેલ છે.

શ્રી કુલમંડનસૂરિએ વિચારામૃતસારસંગ્રહમાં સ્પષ્ટ જણાવ્યું છે કે 'શ્રીમત્‌ના પ્રામાણ્યથી જ ચૈ.વં. વિધિનું પ્રમાણપણું છે' અને શ્રીમાન્ 'પૂર્વધર આસન્ન કાલવર્તી' હતા.

## પ્રસ્તુત વિવરણ રચનાનો હેતુ ––

શ્રીમત્‌ના સત્તા સમયે કેટલાક સ્વસંપ્રદાયવર્તી એવા હતા કે જેઓ ચૈ. વં. સૂત્રને અવિવૃત મંત્રની માફક તેના સ્મરણ માત્રથી અનિષ્ટના ધ્વંસપૂર્વક ઈષ્ટ પ્રાપ્તિના કારણભૂત તરીકે માનતા હતા. તેઓના માટે જ ભગવાને 'તત્સંપાદનાર્થમેવચ નો વ્યાખ્યારંભ પ્રયાસઃ' એમ કહીને વિવરણ બોધપૂર્વક કરાતી ક્રિયાને 'સમ્યક્‌ક્રિયા' તરીકે જણાવી અને વ્યાખ્યાનના પ્રાંત ભાગે 'શુષ્કેક્ષુચવર્ણપ્રાયમવિજ્ઞાતાર્થમધ્યયનમ્' અર્થાત્ અર્થના શ્રદ્ધાયુક્ત જ્ઞાત વગરનો પાઠ, સુકાયેલ શેરડીના ચાવવા બરોબર છે. આમ પણ ચોખ્ખેચોખ્ખું દર્શાવ્યું, વળી ચૈ. વં. ક્રિયાને અને વિવરણરુપ ક્રિયાને સફલતા સંપાદક સમ્યક્ ક્રિયા તરીકે 'પ્રાયોઽધિકૃતસૂત્રોક્તેનૈવ' ઈત્યાદિથી, અને તેના અધિકારી લક્ષણો 'એતદ્‌બહુમાનિનઃ' ઈત્યાદિથી, તેના લક્ષણોના લિંગો 'તત્કથાપ્રીતિઃ' ઈત્યાદિ શ્રીમાન્ ભગવાને દર્શાવ્યા છે.

શ્રી હરિભદ્રસૂરિકૃતિની નિશાની તરીકે 'વિરહ' શબ્દ, આ ગ્રન્થમાં પ્રકરણના અંતિમભાગે, ગ્રન્થના ઉપસંહારમાં અને પ્રશસ્તિમાં એમ ત્રણવાર કહેલો માલુમ પડે છે.

પ્રસ્તુત ગ્રન્થમાં દર્શાવેલ મતાંતરોને જોવાથી સહૃદય પુરૂષોનું અંતઃકરણ, અવશ્ય, મધ્યસ્થદૃષ્ટિથી પ્રતિપાદન કરેલ નિર્ણયને અનુસરનારૂં બનશે જ.

## 'લલિતવિસ્તરા' એ કરેલો શ્રી સિદ્ધર્ષિગણિ ઉપર મહોપકાર —

સિદ્ધર્ષિ. બૌદ્ધના સિદ્ધાંતના અભ્યાસમાત્રથી ચલિત ચિત્તવાળા બનેલા, પરંતુ બૌદ્ધોના પરિચયથી નહીં. વળી તેઓ આચાર્ય શ્રી હરિભદ્રસૂરિજીના સાક્ષાત્ પરિચયમાં આવેલા નથી. કારણકે; "યાં બુદ્ધવા કિલ સિદ્ધસાધુરખિલવ્યાખ્યાતૃચૂડામણિઃ, સંબુદ્ધઃ સુગતપ્રણીતસમયાભ્યાસાચ્ચલચ્ચેતનઃ ! યત્કર્તુઃસ્વકૃતૌ પુનર્ગુરુતયા ચક્રે નમસ્યામસૌ"

અર્થાત્ - બુદ્ધના રચેલા શાસ્ત્રના અભ્યાસથી સિદ્ધર્ષિનું ચિત્ત, જૈનશાસનથી ચલિત થયું હતું પણ 'લલિતવિસ્તરા' ના વિચારપૂર્વકના વાંચનથી સિદ્ધર્ષિ, જૈનશાસનમાં સ્થિર થયા. અને સઘળા વ્યાખ્યાનકારોમાં ચૂડામણિ એવં કૃતજ્ઞશરોમણિ મહાજ્ઞાની સિદ્ધર્ષિએ પોતાની કૃતિ - ઉપમિતિભવ પ્રપંચાકથામાં ગુરુ તરીકે માની શ્રી હરિભદ્રસૂરિજીને નમસ્કાર કરેલ છે. વિ. શ્રી મુનિચંદ્રસૂરિ વિરચિત લલિતવિસ્તરાની પંજિકાના બીજા શ્લોકને જોવાથી સ્પષ્ટ માલુમ પડે છે. પરંતુ સિદ્ધર્ષિગણિને પ્રતિબોધ કરવામાં કયા સૂત્રનું વ્યાખ્યાન સમર્થ હેતુ તરીકે બન્યું છે તેનો નિર્ણય સ્પષ્ટ થઈ શકતો નથી. કેમકે; અનેક સ્થળે બૌદ્ધનું અને બૌદ્ધવિશેષોનું સામાન્ય વિશેષથી ખંડન પ્રાપ્ત થાય છે. શ્રીમત્ સિદ્ધર્ષિનો કોઈ ઉલ્લેખ નથી કે આ ગ્રન્થનો અમુક ભાગ મને બોધિસ્થિરતાકારક બન્યો છે. પરંતુ એટલું તો ચોક્કસ જ છે કે લલિતવિસ્તરાએ તેમની બોધિવિષયક સ્થિરતામાં પૂરેપૂરો ભાગ ભજવ્યો છે.

## આ. શ્રી હરિભદ્રસૂરિજીનું સંક્ષિપ્ત જીવન —

શ્રી પ્રભાવકચરિત્રમાં જણાવ્યા પ્રમાણે શ્રી હરિભદ્રસૂરિ ચિત્તોડનગરના રાજા જિત્તારીના પુરોહિત હતા, પણ કથાવલીના લેખના અનુસારે એવિદ્વાન્ 'પિર્વગુઈ' નામની કોઈ બ્રહ્મપુરીના રહેવાસી હતા, એમની માતાનું 'ગંગા' અને પિતાનું નામ 'શંકરભટ્ટ' હતું.

શ્રી હરિભદ્રે પોતે પ્રકાણ્ડપંડિત હોવાથી એવી પ્રતિજ્ઞા કરી હતી કે 'જેનું બોલેલું ન સમજું તેનો શિષ્ય થઈ જાઉં.' આ પ્રતિજ્ઞાની સાથે ચાલતા તે ચિત્તોડનગરે આવ્યા હતા. તે અવસર ચિત્તોડમાં જિનભટ્ટસૂરિ (કથાવલી પ્રમાણે જિનદત્તાચાર્ય) નામના જૈન આચાર્ય વસતા હતા, તેમના સંઘાડામાં 'યાકિની' નામક મહત્તરા સાધ્વી હતા. એક દિવસ હરિભદ્રે યાકિનીના મુખે 'ચક્કિદુગંહરિપણગં' ઈત્યાદિ ગાથા સાંભલી પણ તેઓ સમજ્યા નહીં તેમણે સાધ્વીને તે ગાથા સમજાવવા કહ્યું તો તેણીએ પોતાના પૂર્વોક્ત ગુરુ પાસે જવા કહ્યું. હરિભદ્રે આચાર્યજિનભટ્ટ પાસે જઈને ગાથાનો અર્થ પૂછયો પણ આચાર્યે કહ્યું કે આ સૂત્રોના અર્થો જૈન પ્રવ્રજ્યા લઈને વિધિપૂર્વક ભણે તેને જ કહેવામાં

આવે છે.

આ ઉપરથી તેમણે જૈન દીક્ષા ધારણ કરી અને તે પછી આચાર્ય યાકિની મહત્તરાનો પરિચય આપ્યો, એ ઉપરથી તેમણે કહ્યું 'આ દેવતાસ્વરૂપીણી ધર્મમાતાએ જ મને બોધ આપ્યો છે' ઉપરની હકીકત પ્રભાવકચરિત્રમાં છે પણ કથાવલી પ્રમાણે હરિભદ્રે 'ચક્કિદુગં' એ ગાથાનો અર્થ પૂછ્યો ત્યારે યાકિની તેને લઈને જિનદત્તસૂરિ પાસે ગઈ અને સર્વ હકીકત કહી સંભળાવી. તે ઉપરથી આચાર્યે તે ગાથાનો સવિસ્તર અર્થ હરિભદ્રને કહ્યો. તે સાંભળીને હરિભદ્રે પણ પોતાની પ્રતિજ્ઞાની વાત કહી. તેના ઉત્તરમાં આચાર્યે કહ્યું - ભદ્રે ! જો એમ છે તો તું એ મહત્તરાનો 'ધર્મપુત્ર થઈ જા' હરિભદ્રે કહ્યું - ભગવન્ ! ધર્મ કેવો હોય ?

એ ઉપરથી આચાર્યે ધર્મનું સ્વરૂપ કહ્યું, તે પછી હરિભદ્રે પૂછ્યું ધર્મનું ફલ શું ? ઉત્તરમાં આચાર્યે કહ્યું - સકામવૃત્તિવાળાઓને ધર્મનું ફળ સ્વર્ગાદિ પ્રાપ્તિ છે, જ્યારે નિષ્કામવૃત્તિવાળાઓને માટે ધર્મનું ફળ 'ભવવિરહ' (સંસારનો અંત) છે. આ સાંભળીને હરિભદ્રે કહ્યું - ભગવન્ ! મને 'ભવવિરહ જ પ્રિય છે માટે તેમ કરો જેથી ભવવિરહની પ્રાપ્તિ થાય, આચાર્યે કહ્યું જો એવી ઈચ્છા હોય તો સર્વપાપનિવૃત્તિમય શ્રમણવૃત્તિ ધારણ કર ! હરિભદ્રે તેમ કરવા ખુશી બતાવી અને જિનદત્તસૂરીએ તેમને દીક્ષા આપી.

જૈન શાસ્ત્રોમાં પ્રવીણ થતાં ગુરુએ શ્રી હરિભદ્રને આચાર્યપદ આપીને પોતાના પટ્ટધર બનાવ્યા. શ્રી હરિભદ્રસૂરીના હંસ અને પરમહંસ નામના બે શિષ્ય કે જેઓ સંસાર પક્ષમાં તેમના ભાણેજ થતા હતા, તે પછી ત્યાં જ તેમની દીક્ષા, શાસ્ત્રાધ્યયન, બૌદ્ધતર્ક ભણવા માટે બૌદ્ધોના નગરમાં ગમન, ત્યાં તેમની પરીક્ષા, ત્યાંથી ભાગવું, રસ્તામાં બૌદ્ધોની સાથે લડીને હંસનું મરણ, પરમહંસનું સૂરપાલ રાજાને શરણે જવું, બૌદ્ધોનો તેની સાથે વાદ, ત્યાંથી નાશીને ચિત્તોડ જવું અને બનેલ વૃતાંત કહેતા પરમહંસનું પણ મરણ, હરિભદ્રસૂરીનો ક્રોધ અને બૌદ્ધોની સાથે સૂરપાલની સભા વાદ, શરત પ્રમાણે બોદ્ધોનું તપ્તતૈલકુંડમાં પડવું, જિનભટ્ટસૂરી દ્વારા શ્રી હરિભદ્રસૂરીના ક્રોધની શાંતિ, નિરાશા અને ગ્રન્થ રચના કરવાનો નિશ્ચય ઈત્યાદિ વાતોનુ સવિસ્તર વર્ણન છે.

કથાવલી પ્રમાણે શ્રી હરિભદ્રસૂરીને સર્વશાસ્ત્રકુશલ જિનભદ્ર અને વીરભદ્ર નામના બે શિષ્યો હતા. તે સમયે ચિત્તોડમાં બૌદ્ધમતનું પ્રાબલ્ય હતું તેથી સૂરીજીના જ્ઞાન અને કલાની બૌદ્ધો ઈર્ષ્યા કરતા હતા, અને એજ સબલથી સૂરીજીના તે બંને શિષ્યોને બૌદ્ધોએ એકાંતમાં મારી નાખ્યા, કોઈપણ રીતે સૂરીજીને એ વાતની ખબર પડતાં સૂરીજીએ ઘણાજ દીલગીર થઈને અનશન કરવાનો નિર્ધાર કર્યો પણ પ્રવચનના પ્રભાવક જાણીને તેમને તેમ કરતાં રોક્યા. છેવટે સૂરીજીએ ગ્રન્થરાશિને જ પોતાની શિષ્યસંતતિ માનીને તેની રચનામાં તેઓ વિશેષ ઉદ્યમવાન થયા.

શ્રી પ્રભાવકચરિત્રમાં આગળ લખે છે કે, સૂરીજીએ ગુરુના ઉપદેશથી ક્રોધનો ત્યાગ કર્યો પણ એમના મનમાંથી શિષ્યોના વિરહનું દુઃખ મટતું ન હતું, જેથી અંબાદેવીએ આવીને સાન્ત્વન દીધું અને કહ્યું કે શિષ્યસંતતિ જોગું તમારૂં પુણ્ય નથી માટે ગ્રન્થસમૂહ એજ તમારી સંતતિ રહેશે.

સૂરીજીએ તેનું વચન સ્વીકાર્યું અને સમરાદિત્ય ચરિત્ર વગેરે ૧૪૪૪ ગ્રન્થપ્રકરણોની રચના કરી અને શિષ્યોના વિરહની સૂચના રૂપે દરેક ગ્રન્થ 'વિરહ' શબ્દથી અંકિત કર્યો. આ ગ્રન્થરાશિને લખાવીને તેનો ફેલાવો કરવા માટે સૂરીએ 'કાર્ણસિક' નામક એક ગૃહસ્થને ધૂર્તાખ્યાન દ્વારા ઉપદેશ દઈને જૈન બનાવ્યો. કાર્ણસિકને સૂરીજીના કથન પ્રમાણે વ્યાપાર કરતા લાભ થયો તેથી તેણે તે દ્રવ્ય વડે સૂરીજીના ગ્રન્થો લખાવીને સર્વસ્થળે પહોંચાડવા અને ચોરાશી દેવકુલિકા યુક્ત એક જૈનમંદિર પણ કરાવ્યું.

કથાવલી પ્રમાણે શ્રી હરિભદ્રસૂરીએ દશવૈકાલિક, ન્યાયપ્રવેશક આદિ ગ્રન્થોની યાકિનીપુત્રે નામાંકિત વૃત્તિઓ બનાવી અને અનેકાન્ત - જયપતાકા, સમરાદિત્યકથા આદિ ભવવિરહાંકિત ગ્રન્થોની રચના કીધી. આ ગ્રન્થનિર્માણ અને લેખનકાર્યમાં આચાર્યને 'લલ્લિગ' નામના ગૃહસ્થે ઘણી મદદ કરી. આ લલ્લિગ એમના શિષ્યો જિનભદ્ર અને વીરભદ્રનો કાકો હતો. ગરીબાઈથી કંટાળીને એણે પણ આચાર્ય પાસે દીક્ષા લેવાનો વિચાર કરેલ પણ આચાર્યે એને દીક્ષા ન આપી અને બજારમાં આવેલ મગ્લની ખરીદી કરવાનો એને સંકેત કર્યો. લલ્લિગે તે પ્રમાણે કર્યું તેથી તેને ઘણો લાભ થયો, તેથી તે હરિભદ્રના કાર્યમાં ઘણી સહાયતા કરતો. હરિભદ્રના ઉપાશ્રયમાં એણે એક એવું રત્ન મૂકી દીધું હતું કે તેના પ્રકાશથી રાત્રે પણ આચાર્ય, ગ્રન્થનિર્માણ કરતા અને ભીત - પાટી આદિ ઉપર લખી નાખતા, જે દિવસમાં લહિયાઓ પાસે પુસ્તક રૂપે લખાવી લેવાતું હરિભદ્ર જ્યારે ભોજન કરવા બેસતા ત્યારે લલ્લિગ તેમને મન ઈચ્છિત ભોજન કરાવતો. ભોજન કર્યા પછી યાચકો હરિભદ્રસૂરીને નમસ્કાર કરતા અને હરિભદ્રસૂરીજી તેમને 'ભવવિરહ કરવામાં ઉદ્યમી બનો' આવો આશીર્વાદ આપતા. તેઓ પોતાના સ્થાનકે જતા. આ પ્રમાણે હરિભદ્રસૂરી 'ભવવિરહસૂરી' એ નામથી પ્રસિદ્ધ થયા.

એકવાર બનારસથી વ્યાપારાર્થે આવેલ વાસુકા શ્રાવક પાસેથી હરિભદ્રસૂરીને વર્ગકેવલીનું મૂલ પુસ્તક મળ્યું અને સંઘના અગ્રેસરોના કહેવાથી તે ઉપર તેમણે વિવરણ લખ્યું પણ પાછળથી તેજ સંઘપ્રધાનોના કહેવાથી તે વિવરણ રદ્દ કરી નાખ્યું હતું.

શ્રી પ્રભાવક ચરિત્રમાં, હરિભદ્રસૂરીએ મહાનિશીથસૂત્રનો ઉદ્ધાર કર્યો, એમ જણાવ્યું છે.

૧૪૪૪ ગ્રન્થોના નિર્માતા, વાદી, પ્રાવચનિક, નૈમિત્તિક, યોગનિષ્ઠ યુગપ્રધાન શ્રી હરિભદ્રસૂરીશ્વરજી ભગવંતની જય હો !

## શ્રી હરિભદ્રસૂરીશ્વરજીનો સત્તાસમય —

(૧) પ્રથમ મતે વિ.સં.૫૮૫માં શ્રી હરિભદ્રસૂરીશ્વરજીનો સ્વર્ગવાસ, એક પ્રાચીન પરંપરાગત ગાથામાં દર્શાવ્યો છે.

(૨) દ્વિતીયમતે શ્રી હરિભદ્રસૂરીશ્વરજીએ પોતાના ગ્રન્થોમાં ધર્મકીર્તિ, કુમારિલ નામનો ઉલ્લેખ કર્યો છે તથા વિશેષાવશ્યકભાષ્યાદિ કર્તા પ્રસિદ્ધ યુગપ્રધાન જિનભદ્રગણિ ક્ષમાશ્રમણના ગ્રન્થોના અવતરણો પોતાના ગ્રન્થોમાં આપ્યા છે. આ બે હેતુઓથી ધર્મકીર્તિ, કુમારિલ અને શ્રી જિનભદ્રગણિથી

શ્રી હરિભદ્રસૂરીશ્વરજી અર્વાચીન ઠરે છે તેમજ રત્નસંચયપ્રકરણમાં એક બીજી પરંપરાગત ગાથા આપી છે જેમાં શ્રી હરિભદ્રસૂરીશ્વરજીને વીર સંવત્ ૧૨૫૫ (વિક્રમ સંવત ૭૮૫)માં વિદ્યમાન જણાવ્યા છે.

## <u>પ્રસ્તુતગ્રન્થઃ સંસ્કૃત ભાષામાં —</u>

પૂ. પા. દાદા ગુરુદેવ જૈનરત્ન વ્યાખ્યાન વાચસ્પતિ કવિકુલ કિરીટ સૂરિસાર્વભૌમ શ્રીમદ્વિજય **લબ્ધિસૂરીશ્વરજી** મહારાજના શુભ આશીર્વાદે તથા તેઓશ્રીના પટ્ટધર પૂ. પા. ગુરુદેવ ધર્મદિવાકર શ્રીમદ્વિજય **ભુવનતિલકસૂરીશ્વરજી** મ. ની કૃપાથી આ ગ્રન્થ પૂર્ણતાએ પહોંચ્યો એમ કહેવામાં જરાય અતિશયોક્તિ નથી.

અહીં છદમસ્થજનસુલભ જે કાંઈ મારી ખામી વિ. જણાય તેને ભવ્યો સુધારી હંસન્યાયે સારને જ માત્ર ગ્રહણ કરશે. જિનાજ્ઞા વિરૂદ્ધ કંઈપણ લખાયું હોય તો મિચ્છામીદુક્કડં.

એવી આશા સેવતો,

**આચાર્ય ભદ્રંકરસૂરિ**

॥ શ્રી શંખેશ્વર પાર્શ્વનાથાય નમઃ ॥

# ❋ ભૂમિકા ❋

मिच्छादंसणमहणं, सम्मदंसणविसुद्धिहेउं च ।
चिइवंदणाइ विहिणा, पन्नतं वीयरागेहिं ॥ १ ॥

વીતરાગ અને સર્વજ્ઞ એવા શ્રી અરિહંત - ભગવંતોએ સૂત્રોક્ત વિધિપૂર્વક થતી ચૈત્યવંદનાદિ ક્રિયાઓને મિથ્યાદર્શનનું મથન કરનાર અને સમ્યગ્‌દર્શનનું શોધન કરનાર તરીકે પ્રરૂપેલી છે. (૧)

**——— શ્રાવક પ્રજ્ઞપ્તિ ગાથા ૩૪૧**

ચૈત્યવંદન સૂત્ર ઉપર અનેક વૃત્તિઓ વિદ્યમાન છે. તેમાં સૌથી પ્રાચીન વૃત્તિનું નામ 'લલિતવિસ્તરા' છે. જેના કર્તા સુવિહિત શિરોમણિ, સમર્થશાસ્ત્રકાર, આચાર્ય ભગવાન્ શ્રી હરિભદ્રસૂરીશ્વરજી છે.

આ વૃત્તિનો મહિમા જૈનશાસનમાં એટલો બધો પ્રસિદ્ધ છે કે 'ઉપમિતિ ભવ પ્રપંચા કથા' જેવી મહાન કથાના કર્તા આચાર્ય શ્રી સિદ્ધર્ષિ ગણીજી જેવા કહે છે કે –

**"ભવિષ્યકાળમાં મારા માટે જ્ઞાનથી જાણીને જેમણે આ વૃત્તિને મારા ઉપર ઉપકાર કરવા માટે રચી છે." ❋**

એ વાતનું સમર્થન કરતા પૂ. શ્રી મુનિચંદ્રસૂરીજી મહારાજ, (જેઓ સિદ્ધરાજ જયસિંહની રાજ્યસભામાં સમર્થવાદી તરીકે પ્રસિદ્ધ પામેલા પૂ. શ્રી વાદિ દેવસૂરીજી જેવા આચાર્ય શ્રેષ્ઠના ગુરુ હતા તેઓશ્રી) લલિતવિસ્તરા ઉપર "પંજિકા" નામની લઘુટીકા રચતાં તેના મંગલાચરણમાં જ કહે છે કે :-

❋ 'अनागतं परिज्ञाय, चैत्यवंदनसंश्रया ।
मदर्थं निर्मिता येन, वृत्तिर्ललितविस्तरा ॥ १ ॥

**—— શ્રી સિદ્ધર્ષિગણી**

"સમસ્ત વ્યાખ્યાતાઓને વિષે મુકુટ મણિસમાન અને સુગતપ્રણીત શાસ્ત્રનો અભ્યાસ કરવાથી જેમનું ચિત્ત ચલિત થયું છે એવા **સિદ્ધર્ષિ** નામના સાધુ જેને જોઈને પ્રતિબોધ પામ્યા છે. અને પોતાની કૃતિમાં જેના કર્તાને પોતે ગુરુપણે સ્થાપન કરીને નમસ્કાર કર્યો છે, તે વૃત્તિના વિવરણને કરવા માટે કોણ સમર્થ છે ? તોપણ માત્ર મારા આત્માની સ્મૃતિ માટે હું આ પ્રયાસ કરું છું.[1]

ચૈત્યવંદન એક એવું ધર્માનુષ્ઠાન છે કે જેને શ્રી ગણધર ભગવંતોએ સાધુ - સાધ્વીની નિરંતર થતી આવશ્યક ક્રિયામાં ગૂંથી લીધું છે.

આ અનુષ્ઠાનનો મહિમા ગાતાં શાસ્ત્રકાર ભગવંતો ફરમાવે છે કે "શ્રી જિનેશ્વરોનાં ચૈત્યોને વંદન કરવાથી લોકોત્તર કુશલ પરિણામ જાગે છે, તેનાથી આત્માના જ્ઞાનાદિ ગુણોનું આવરણ કરવાના કર્મગ્રહણના અધ્યવસાયથી વિરૂદ્ધ છે, તેથી તે વારંવાર કરવા વડે સમસ્ત કર્મનો ક્ષય જેમાં રહેલો છે, એવા પરમ પુરૂષાર્થ મોક્ષનું તે કારણ થાય છે.[૨]

૧ 'यां बुद्धवा किल सिद्धसाधुरखिलव्याख्यातृचूडामणिः ।
संबुद्धः सुगतप्रणीतसमयाभ्यासाच्चलच्चेतनः
यत्कर्तुःस्वकृतौ पुनर्गुरुतया चक्रे नमस्यामसौ ।
को ह्येनां विवृणोतु नाम विवृतिं स्मृत्यै तथाप्यात्मनः ॥ १ ॥

२ 'चैत्यवंदनतः सम्यक् शुभो भावः प्रजायते ।
तस्मात् कर्मक्षयः सर्वः ततः कल्याणश्नुते ॥ २ ॥

ચૈત્યવંદનની ક્રિયાથી આવું લોકોત્તર ફળ મળે છે, તેનું એકજ કારણ છે કે તે શુભ ભાવની વૃદ્ધિ કરે છે. વિધિપૂર્વક ચૈત્યવંદનની ક્રિયા કરવાથી પ્રશસ્ત ચિત્તનો લાભ થાય છે.

શુદ્ધ ચૈત્યવંદન તેજ કરી શકે કે જેને તેના અર્થનું અને રહસ્યનું સ્પષ્ટ અને વિશદ જ્ઞાન હોય.

લલિતવિસ્તરા નામની વૃત્તિમાં વૃત્તિકાર આચાર્યદેવ **શ્રી હરિભદ્રસૂરીજી મહારાજ** ફરમાવે છે કે :-

'ચૈત્યવંદનની ક્રિયામાં શુદ્ધિ લાવવા જરૂરી એવા જ્ઞાનને આપવા માટેનો આ અમારો પ્રયાસ છે.' તેથી આ વિવરણનું મૂલ્ય ચૈત્યવંદનની ક્રિયા જેઓ નિત્ય કરે છે, તેઓ માટે ઘણું વધી જાય છે અને જેઓ આવી મહાન ક્રિયા કરવા માટે પ્રવૃત્તિ કરતા નથી, તેઓને આ કરવાની પ્રેરણા મળે છે.

ચૈત્યવંદનની આ ક્રિયા આજે પણ શ્રી જૈનશાસનમાં હજારો અને લાખો વ્યકિતઓ નિયમિતપણે કરે છે, તેથી આ ક્રિયા જીવંત છે. પરંતુ તે ભાવિત ચિત્તથી થવી જોઈએ. કેવળ કોલાહલરૂપ ન થવી જોઈએ.

ભાવિત ચિત્તથી આ ક્રિયાને જ શાસ્ત્ર સ્વીકારે છે. કેવળ કોલાહલરૂપ ક્રિયા શાસ્ત્રબાહ્ય ગણાય છે. તેવી ક્રિયા ઉપર વિદ્વાનોને આસ્થા નરહે તે સહજ છે.

આ ક્રિયાના ગર્ભમાં સ્થાનાદિ યોગો રહેલા છે. એમ જણાવીને પૂ. શ્રી હરિભદ્રસૂરીજીએ 'તે કેવળ કોલાહલરૂપ છે.' એમ કહેનારનો નિષેધ કર્યો છે. અને જે ક્રિયાના ગર્ભમાં સ્થાન, વર્ણ, અર્થ અને આલંબન રહેલાં હોય, તે ક્રિયા શુભ ચિત્તના લાભનું કારણ છે, એવું સમર્થન કર્યું છે.

લલિતવિસ્તરા ગ્રન્થનો મૂળ મુદ્દો એ છે કે ચૈત્યવંદનની ક્રિયામાં જે ચૈત્યોને વંદન કરવામાં આવે છે, તે શ્રી અરિહંતોના બિંબો છે અને બિંબોનું નામ 'ચૈત્ય' એટલા માટે છે કે તેમને કરેલા વંદનાદિ પ્રશસ્ત સમાધિવાળા ચિત્તને ઉત્પન્ન કરે છે.

શ્રી અરિહંતોના બિંબોમાં પ્રશસ્ત સમાધિવાળું ચિત્ત ઉત્પન્ન કરવાનું સામર્થ્ય શાથી આવે છે ? એ પ્રશ્નનો ઉત્તર ભાવ અરિહંતનું સ્વરૂપ જાણવાથી મલી રહે છે.

આ વૃત્તિમાં જે સૂત્ર ઉપર પ્રથમ વિવરણ કર્યું છે, તે સૂત્રનું નામ 'नमोत्थुणं' સૂત્ર છે, તેને શક્રસ્તવ પણ કહેવાય છે. તેમાં "ભાવઅરિહંત" ના સ્વરૂપને જાણવા માટે તેત્રીસ વિશેષણો આપવામાં આવ્યા છે અને તે પ્રત્યેક વિશેષણ કેટલું અર્થગંભીર છે, તે સમજાવવા માટે પૂ. શ્રી હરિભદ્રસૂરીજી મહારાજે અસાધારણ પ્રયાસ કર્યો છે.

આ પ્રયાસના ફળ રૂપે આપણને જાણવા મળે છે કે તીર્થંકર ભગવંતોનો સંબંધ ત્રણ લોકની સાથે રહેલો છે. તેમણે ત્રણે લોકના સમસ્ત જીવોના કલ્યાણની કામના કરેલી છે, તીવ્ર ભાવના ભાવેલી છે. સર્વજીવોનું આત્યંતિક કલ્યાણ થાય તે માટેનો માર્ગ શું હોઈ શકે તેના સંપૂર્ણ સાક્ષાત્કાર માટે અને તેમાં પ્રતિબંધક કર્મના નિર્મૂલ ક્ષય માટે તીવ્ર તપ તપ્યા છે, ઉગ્ર સંયમ પાળ્યા છે, ઘોર પરીષહો અને ઉપસર્ગો સહ્યાં છે ઊપરાંત ગુરુકુળવાસમાં વસી શાસ્ત્રોના વિધિપૂર્વક અભ્યાસ કર્યાં છે અને તે સમગ્ર સાધનાના પરિણામે વિશુદ્ધ સમ્યક્‌દર્શન અને પરહિત ચિંતનનો પ્રબળ અધ્યવસાય હોવાથી તેઓશ્રીને સર્વ પુણ્યપ્રકૃતિઓમાં ઉત્કૃષ્ટ એવી તીર્થંકર નામકર્મની પ્રકૃતિ નિકાચિત થાય છે.

તે પુણ્ય પ્રકૃતિના વિપાકોદય વખતે તેઓ વીતરાગ હોવા છતાં ત્રણ ભુવનને સુખ કરનારૂં અને ભવોદધિ તારનારૂં તીર્થ સ્થાપે છે. આ તીર્થના આલંબને અનેક કોટી જીવો પોતાનું કલ્યાણ સાધે છે. આવો ભવ્ય ઉપકાર શ્રી તીર્થંકર દેવોના આત્માઓથી જ થઈ શકે છે. પણ બીજાઓથી નહિ. તેનું કારણ આપતાં વૃત્તિકાર મહર્ષિ શ્રી તીર્થંકર ભગવંતનાં "पुरिसुत्तमाणं" એ વિશેષણનું વિવરણ કરતાં ફરમાવે છે કે શ્રી તીર્થંકરોના આત્માઓમાં અનાદિકાલીન વિશિષ્ટ યોગ્યતા રહેલી છે અને તે યોગ્યતા તેમનામાં એવા પ્રકારની પરાર્થરસિકતા ઉત્પન્ન કરે છે કે વરબોધિના લાભ વખતે તેઓ પોતાના સ્વાર્થને ગૌણ કરનારા અને પરના ઉપકારને મુખ્ય બનાવનારા બની રહે છે. આ પરાર્થવ્યસનિતા તેમને સર્વશ્રેષ્ઠ પદવી આપનાર થાય છે. તીર્થપદવી તેમની યોગ્યતાના કારણે છે અને એ યોગ્યતા તેમની પરાર્થવ્યસનિતામાં પ્રેરક બને છે.

પૂ. શ્રી હરિભદ્રસૂરીજી મહારાજ કહે છે કે પુરૂષોમાં શ્રી તીર્થંકર ભગવંતો ઉત્તમ એટલા માટે છે કે તેમનામાં જેવી પરાર્થવ્યસનિતા અને સ્વાર્થઉપસર્જનતા દેખાય છે, તેવી બીજા જીવોમાં દેખાતી નથી. આમ થવાનું કોઈ કારણ હોવું જોઈએ અને એ કારણ તેમની અનાદિ કાલીન અપ્રગટ (સ્વરૂપગત) યોગ્યતામાં રહેલ છે. સહકારી કારણો મળતાં જ તે યોગ્યતા નીકળી છે. અન્ય મોક્ષગામી

૧ चित्तस्य भावः कर्म वा चैत्यम् इति व्युत्पत्तेः ।

આત્માઓમાં પણ આવી ઉત્કૃષ્ટ પરાર્થવ્યસનિતાદિ આવતાં નથી.

આ વસ્તુ ઉપમા આપીને પૂજ્ય આચાર્ય ભગવંત સિદ્ધ કરી બતાવે છે. કાચને ગમે તેટલો સંસ્કાર કરવામાં આવે તો પણ તે પોતાની જાતિને છોડીને કદી મણિ બની શકતો નથી. મણિને ગમે તેટલો વખત કુસંસર્ગમાં રાખવામાં આવે તો પણ તે કદી કાચ બનતો નથી.

આવો મોટો ભેદ તીર્થંકર અને અતીર્થંકરના આત્માઓમાં રહેલો છે. બન્ને મુક્તિગામી હોવા છતાં અને બન્નેનું મોક્ષમાં સમાન સ્વરૂપ થવા છતાં સંસારમાં શ્રી તીર્થંકરોના આત્માઓની આ વિશિષ્ટતા શાસ્ત્રકાર મહર્ષિઓએ સ્વીકારી છે અને તેથી જ મોક્ષે જનારા જીવોના પંદર પ્રકાર પાડવામાં આવ્યા છે, તેમાં એક પ્રકાર તીર્થંકર સિદ્ધનો છે.

અરિહંતોના ચૈત્યોમાં જે પ્રભાવ આવ્યો છે, તે ભાવ અરિહંતોમાંથી આવ્યો છે, એમ માનવું જોઈએ. અને ભાવ અરિહંતોમાં જે પ્રભાવ આવ્યો છે, તે તેમની અર્હદ્ વાત્સલ્યાદિ સ્થાનકોની મહા ભવ્ય સાધના સાથે પરમ કલ્યાણની ઉત્કૃષ્ટ ભાવનામાંથી આવ્યો છે, એમ આજે શ્રદ્ધાપૂર્વક જૈનો સ્વીકારે છે. શ્રી અરિહંત દેવોની આત્માની ભાવના તીર્થંકર થવાના પૂર્વે ત્રીજા ભવમાં એવી ઉદાત્તઉચ્ચ હોય છે કે 'વિશ્વના સકલ જંતુઓ દુઃખપંકમાંથી મુક્ત થઈ અવ્યાબાધ સુખસ્વરૂપ મુક્તિપદને પામો એટલું જ નહિ પણ તે પામવાનો માર્ગ શું છે ? તેનું જ્ઞાન મેળવી તે મુજબ આચરણ કરી, દુઃખ મુક્ત થાઓ. તેમની ભાવના એટલેથી અટકતી નથી પણ આગળ વધે છે અને તેઓ વિચારે છે કે હું પોતે જ તેમના માટે એવા માર્ગનો સંપૂર્ણ સાક્ષાત્કાર કરૂં અને તે એવી રીતે પ્રગટ કરૂં કે જેના આલંબનથી જીવ માત્ર મુક્તિને પામે.

કાચ અને મણિની ઉપમાથી શ્રી તીર્થંકરના આત્માઓની અન્યથી વિશિષ્ટતા સમજાય છે. શ્રી તીર્થંકર પરમાત્માઓની જાતિ જ આ રીતે શાસ્ત્રકારોએ જુદી માનેલી છે, તો પછી અન્ય જીવો તેમનું ગમે તેટલું અનુકરણ કરે, તો પણ તેવી ઉત્કૃષ્ટ ભાવનાને કેવી રીતે મેળવી શકે ?

સર્વ જીવોના કલ્યાણની ભાવના પણ જો આત્મામાં વસી જાય તો તે પણ ઉચ્ચ પુણ્ય પ્રકૃતિનો બંધ કરાવનાર થાય છે. તો પછી સર્વ જીવોના કલ્યાણની ભાવના, તેમને દુઃખમાંથી અને કર્મની જાળમાંથી છોડાવવાની ઉત્કટ કરૂણા, જેઓના હૃદયમાં પોતાની અનાદિકાલીન યોગ્યતાના બળે ઉત્પન્ન થાય, તેઓ સર્વ પુણ્યોમાં શિરોમણિ એવું પુણ્યકર્મ નિકાચિત કેમ ન કરે ? તે પુણ્ય તીર્થંકર નામકર્મ નામનું શાસ્ત્રોમાં પ્રસિદ્ધ છે. જેનાથી ત્રિભુવન પૂજ્યપણું પ્રાપ્ત થાય છે જે પુણ્યના ભોગકાળે ત્રણ ભુવનને ઉપકારક તીર્થ સ્થપાય છે. જે તીર્થ શ્રી તીર્થંકર દેવના નિર્વાણ બાદ પણ વિશ્વમાં કાયમ રહીને પોતાના અસ્તિત્વ પર્યંત ભવ્ય જીવોને મુક્તિ પામવાનું અનન્ય સાધન બને છે.

વિશ્વમાં આવી ઉચ્ચ ભાવના શ્રી તીર્થંકરોના આત્મા સિવાય બીજાઓમાં પ્રગટી શકતી નથી, એમ લલિતવિસ્તરા ગ્રન્થ સાક્ષી પુરે છે. આ ભાવનાના બળથી જ તીર્થંકર નામકર્મ બંધાય છે, નિકાચિત થાય છે, ધર્મતીર્થ પ્રવર્તે છે, અધર્મનો નાશ થાય છે અને જીવોનું શાશ્વત કલ્યાણ થાય છે.

આમ કેમ બનતું હશે ? તે માટે કર્મનો નિયમ છે, જે અટલ છે, અકાટ્ય છે. કરે તેવું પામે, વાવે તેવું લણે; તેમાં મિથ્યા કોઈ કરી શકતું નથી. શ્રી તીર્થંકર દેવોનું આ વાત્સલ્ય કોઈ જીવ માટે નથી, સર્વ જીવ માટે છે. પ્રત્યેકનું સ્થાન તેમના હૃદયમાં અપેક્ષાએ પોતાના આત્માંથી પણ અધિક છે, એ હકીકત આપણને લલિતવિસ્તરા ગ્રન્થ સિવાય કોણ સમજાવી શકે ?

અમને તો એમ લાગે છે કે **શ્રી સિદ્ધર્ષિ** જેવા મહાપુરૂષનું ચિત્ત ચલિત થયા પછી પણ શ્રી જિનમતમાં અવિચળ સ્થિરતા પ્રાપ્ત થઈ હોય તો તે શ્રી તીર્થંકર ભગવંતોમાં પરાર્થવ્યસનિતા તથા સ્વાર્થ - ઉપસર્જનતા અકૃત્રિમપણે - સહજપણે અનાદિકાળથી રહેલી છે. એ ઉલ્લેખની અસર પણ હોવી જોઈએ. વિશ્વના પ્રભુ બનવાની, ત્રણ લોકના નાયક થવાની લાયકાત એમનામાં જ હોઈ શકે, એ વિચારે અને સાથે અર્હત શાસનની તર્ક શુદ્ધતા અવિસંવાદિતા અને સર્વસ્વીકારકતાના નિર્ણય તો તેમનામાં સ્થિરતાનો ભાવ પેદા નહિ કર્યો હોય ?

વિશ્વમાં એક એવી શક્તિ તો સ્વીકારવી જ પડે છે કે જે નિત્ય જગતના જીવોનું હિત કરી રહી હોય, જેને શાસ્ત્રો 'ધર્મ' તરીકે સંબોધે છે.

આસુરી સંપત્તિ અને દેવી સંપત્તિ, ધર્મ અને અધર્મ વચ્ચેનું યુદ્ધ અનાદિ કાળથી ચાલુ છે, તેમાં દૈવી સંપત્તિનો વિજય થાય છે. અને આસુરી સંપત્તિનો પરાજય થાય છે. એમ થવાનું કોઈ કારણ તો હોવું જ જોઈએ.

જગતના જીવોનું હિત ચિંતવનારા સત્પુરૂષો જેમ વિશ્વમાં મળી આવે છે, તેમ અહિત ચિંતવનારા દુષ્ટ પુરૂષો પણ મળી આવે છે.

દુષ્ટો અહિત ચિંતવે છતાં બધાનું અહિત થતું નથી એટલુંજ નહિ પણ વધારેમાં વધારે છ મહિનામાં સંસારથી એ આત્મા તો સકલ કર્મના બંધનથી છૂટીને મોક્ષ પામે છે, એમાં તે જીવનો પુરૂષાર્થ તો કામ કરે જ છે, પરંતુ પુરૂષાર્થ કરવાની પ્રેરણા અને સામગ્રી તેને કોણ પૂરી પાડે છે ?

કહેવું જ પડશે કે સર્વ જીવોનું આત્યંતિક હિત ઈચ્છનારા શ્રી તીર્થંકરોની ભાવના અને એમનો લોકોત્તર અચિન્ત્ય પ્રભાવ એટલો બધો પ્રબળ હોય છે કે તેની આગળ તેનાથી વિરોધી ભાવનાઓ સંસારના અનંતાનંત આત્માઓ કરે તો પણ તે બધાનો પરાભવ પમાડીને શ્રી તીર્થંકરોની ભાવના ફલીફૂત થાય છે. કેમ કે તે શુભ હોય છે. અશુભના બળ કરતાં શુભનું બળ વિશેષ જ રહેવાનું.

આજે પણ આપણે સારી નરસી ભાવનાનું બળ પ્રત્યક્ષપણે જીવનમાં અનુભવિએ છીએ. એજ અનુભવ આપણને તે સમજવા ફરજ પાડે છે કે શ્રી તીર્થંકર દેવોથી સર્વોત્કૃષ્ટ ભાવના અને એમના લોકોત્તર અચિન્ત્ય પ્રભાવના યોગે જ સંસારના જીવો પાપ - પરાયણ હોવા છતાં સુખના લેશને પામી શકે છે અને કાળક્રમે ધર્મપરાયણ બનીને મુક્તિના સુખને મેળવી શકે છે.

આ બધું વિચારતા એમ લાગે છે કે વિશ્વમાં મહાસત્તા એક જ છે, અને તે શ્રી

તીર્થંકર પરમાત્માઓના શાસનની જ. કેમકે તેમની ભાવના સમસ્ત વિશ્વના પરમ કલ્યાણની સદા રહેલી છે. તથા તેમણે વિશ્વને જે સ્વરૂપ યથાસ્થિતપણે પ્રકાશિત કરેલું છે. અને તેના આધાર પર મુક્તિમાર્ગની સાધના વિશ્વમાં અવિચ્છન્નપણે ચાલી રહેલી છે.

શાસ્ત્રોમાં કહ્યું છે કે આરાધેલી આજ્ઞા મોક્ષ માટે અને વિરાધેલી આજ્ઞા સંસાર માટે થાય છે. અહીં આજ્ઞા શબ્દનો જ પ્રયોગ શા માટે ? આજ્ઞા એટલે શાસન. આજ્ઞા એટલે મહાસત્તાનું નિયંત્રણ.

કર્મની સત્તા એક મહાન સત્તા છે, એમ આપણે સૌ કોઈ માનીએ જ છીએ પરંતુ તેનાથી પણ મોટી સત્તા રહેલી છે, એ વાત આપણને લલિતવિસ્તરા ગ્રન્થથી જાણવા મળે છે.

આ સત્તાને શ્રી જૈન શાસનની મહાસત્તા કહો, તીર્થંકરત્વની મહાસત્તા કહો કે વિશ્વની મહાસત્તા તેમાં કશો જ ફેર પડતો નથી.

જિનેશ્વરો અને તીર્થંકરો બે નામ એક જ છે. માત્ર સમજવાનું એટલું છે કે તેમનું શાસન જગત ઉપર કેવી રીતે ચાલે છે ?

१ नारका अपि मोदन्ते, यस्य कल्याणपर्वसु ।
पवित्रं तस्य चरित्रं, को वा वर्णयितुं क्षमः ॥ १ ॥

**પૂ. શ્રી હેમચંદ્રાચાર્ય**

२ आज्ञाराद्धा विराद्धा च, शिवाय च भवाय च ।

**પૂ. શ્રી હેમચંદ્રાચાર્ય**

વિશ્વના કોઈ પણ શાસન કરતાં આ શાસન વધુ વ્યવસ્થિત છે, વધુ કલ્યાણકર છે, કર્મની મહાસત્તા નીચે રહેલા જીવોને આ શાસન તેમાંથી છોડાવનાર છે, દુઃખ મુક્ત કરાવનાર છે.

આવી મહા શક્તિ આ શાસનમાં શાથી આવી ? તે વીતરાગ પુરૂષોનું શાસન છે, એટલા માટે જ એ શક્તિ આવતી હોય તો તેને માત્ર વીતરાગ શાસન કહેવાત, માત્ર સર્વજ્ઞોનું શાસન કહેવાત, માત્ર કર્મે મુક્તોનું શાસન કહેવાત, પણ તીર્થંકરોનું શાસન કેમ કહ્યું ?

શાસ્ત્રમાં આ શાસનને જિનશાસન અર્થાત તીર્થંકરોના શાસન તરીકે ઓળખાવેલ છે, તેની પાછળ કોઈ વિશિષ્ટ હેતુ રહેલો હોવો જોઈએ. તે આપણે શોધી કાઢવો પડશે તે માટે લલિતવિસ્તરાગ્રન્થ આપણને મહાન સહાય પૂરી પાડે છે.

સાચા હૃદયથી એ સહાય જો લેવામાં આવે તો આપણને તરતજ સ્પષ્ટ થાય એમ છે કે તે હેતુ બીજો કોઈ નહિ પણ શ્રી તીર્થંકરોના આત્માઓની અનાદિકાલીન વિશિષ્ટ યોગ્યતા જ છે. તેમના વ્યક્તિગત કે સમષ્ટિગત ઉભય પ્રકારના કલ્યાણની એક સરખી ભાવના ભવો સુધી ટકે છે.

આવી તીવ્રતમ ભાવના તેમના સિવાય બીજાકોઈને આવવાની શક્યતા જ નથી, કારણ

કે અનાદિ સિદ્ધ યોગ્યતા તેમના સિવાય બીજાઓમાં માનેલી જ નથી, તો પછી તેવી ભાવના કેવી રીતે આવે ?

તેમની ભાવના જ એવી છે કે જેથી કેવળ પુણ્યનું જ સર્જન થાય, કારણ કે તે ભાવનામાં સ્વાર્થનો એક અંશ પણ હોતો નથી અને પરાર્થમાં કોઈ બાકી રહેતું જ નથી.

જીવ માત્ર પ્રત્યેના તેમના વાત્સલ્યને માતાના વાત્સલ્યની સાથે પણ નહિ સરખાવી શકાય. એક માતા પોતાના બાળકનું પરિપૂર્ણ હિત ચિંતવે છે, તો પણ તે કેવળ ભૌતિક હોય છે, અથવા બહુ તો નૈતિક અને વિરલ પ્રસંગમાં જ આધ્યામિક હોય છે.

તીર્થંકરો પ્રત્યેક જીવના આધ્યામિક કલ્યાણને માતા કરતા પણ અનંત ગુણા વધારે ભાવથી ચાહે છે, અને એ આધ્યાત્મિક કલ્યાણની ભાવના જ એવી છે કે જ્યાં સુધી તે ફલીભૂત ન થાય ત્યાં સુધી નૈતિક તથા ભૌતિક કલ્યાણ આનુષંગિક રીતે અવશ્ય મળ્યા કરે છે, તેથી શ્રી તીર્થંકરો જગત જીવોને કેવળ મોક્ષ સુખના દાતા છે એમ નહિ પણ એ ન મળે ત્યાં સુધી જીવમાત્રને અસંકિલષ્ટ સુખમય જીવન જીવવા માટે જરૂરી સઘળી સામગ્રી મળવામાં અસાધારણ કારણભૂત છે, એમ કહેવું જરાપણ અતિશયોકિતવાળું નથી.

જીવોના પુણ્યથી બધી સામગ્રી મળે છે, તે કર્મનો નિયમ સાચો છે, તો પણ તે કર્મને શુભ બનાવનાર અથવા શુભ કર્મ કરવા માટેની પ્રેરણા ઉત્પન્ન કરનાર શ્રી તીર્થંકરોનો અચિન્ત્ય પ્રભાવ તેમની જીવ માત્ર પ્રત્યેની કલ્યાણ ભાવના અને તે ભાવનામાંથી ઉત્પન્ન થતા ધર્મતીર્થ સિવાય બીજું કોણ છે ?

શ્રી તીર્થંકરોની ભાવનાને પહોંચી શકે એવી ભાવના જ્યાં સુધી બીજા કોઈની સાબિત ન થાય, ત્યાં સુધી વિશ્વ પર શાસન શ્રી તીર્થંકર પરમાત્માઓનું વર્તી રહ્યું છે, તેમ માનવામાં લેશ પણ બાધા નથી. ઉલટું એમ ન માનવામાં આપણે જેના ઉપકાર તળે દબાઈ રહ્યા છીએ, એવા સર્વશ્રેષ્ઠ શાસનનો દ્રોહ કરનારા થઈએ છીએ.

એ શાસનનો દ્રોહ એટલે આપણું ભલું ચિંતવનાર શ્રી તીર્થંકર ભગવંતનો અથવા તેમની વિશ્વકલ્યાણકર ભાવનાનો દ્રોહ થાય છે.

આ વાત શ્રી સિદ્ધર્ષિ ગણીના ચિત્તમાં લલિતવિસ્તરા ગ્રન્થની પંક્તિઓથી જાણે અતિ સ્થિર થઈ ગઈ ન હોય અને તેના પરિણામે જ તેઓ પૂ. **શ્રી હરિભદ્રસૂરીશ્વરજી**ને પોતાના ધર્મબોધકર ગુરુ તથા પરમ કલ્યાણ મિત્ર તરીકેનું સંબોધન જાણે ન કરતા હોય, અને પોતાના માટે જ જાણે આ ગ્રન્થની રચના તેમણે ન કરી હોય તેમ ભક્તિભર નિર્ભર હૃદયથી સ્તવે છે.

આ ગ્રન્થ માત્ર **શ્રી સિદ્ધર્ષિ** ગણિમાં સ્થૈર્ય લાવનારો છે, એમ કહીએ તો તે પણ ખરેખર આ ગ્રન્થનું પરિપૂર્ણ ગૌરવ બતાવનારૂં થતું નથી, કેમકે માત્ર એટલું જ તેનું મૂલ્ય નથી.

શ્રી તીર્થંકર દેવોના શાસનની મહાસત્તા આ વિશ્વ ઉપર પરોપકારનું મહાન કાર્ય કરી રહેલ છે, એવી પ્રતીત આજે કેટલાને છે ? જો તે ન હોય અને ન હોવાથી વિશ્વોપકારક શાસનની

મહાસત્તાની ઉપેક્ષા કે દ્રોહ થતો હોય અને તે દ્વારા અનંત સંસાર પરિભ્રમણનું મહા પાતિક લાગતું હોય, તો તેનાથી ઉગારી લેનાર તથા સાચી શ્રદ્ધાને જગાડનાર આ ગ્રન્થ માત્ર **શ્રી સિદ્ધર્ષિ**નો ઉપકારક નહિ કિન્તુ તેનો આદર પૂર્વક અભ્યાસ વડે સત્ય તત્ત્વનો બોધ પામનાર પ્રત્યેક વ્યકિત ઉપર પણ તેટલો જ છે.

ધર્મનો પ્રારંભ જ પરોપકારની અને પરપીડા પરિહારની ભાવનાથી થાય છે. જેનામાં એ બેમાંથી એકે ભાવના નથી તેમાં ધર્મ જ ક્યાં છે ?

સર્વ ધર્મવાદીઓને આ વાત એકી અવાજે માન્ય છે. આ બન્ને ભાવનાની ટોચે પહોંચેલા શ્રી તીર્થંકરોના આત્માઓ ધર્મ પ્રવૃત્તિના નાયક છે, ધર્મરથના સારથિ છે, ધર્મ સામ્રાજ્યના ચક્રવર્તી છે, એ હકીકતનું રહસ્ય આપણને લલિતવિસ્તરા વૃત્તિ સિવાય બીજું કોણ સમજાવત ? અને જો એ ન સમજાવત તો આપણે આપણા ઉપકારી પ્રત્યે અને વિશ્વના પરમ ઉપકારી પ્રત્યે ભક્તિભાવ ક્યાંથી પ્રગટ કરત ?

લલિતવિસ્તરા ગ્રન્થના આવા કેટલાક ઉપકારો છે તે આપણે આ નાની પ્રસ્તાવનામાં ન સમાવી શકીએ. તે તો આ ગ્રન્થનો અભ્યાસ કરવો એ કાંઈ સામાન્ય કાર્ય નથી, તેની પંક્તિએ ન્યાય ભરેલો છે. દર્શન શાસ્ત્ર ભરેલું છે, તર્ક શાસ્ત્ર ગુંથેલું છે. વ્યાકરણ શાસ્ત્ર, અલંકાર શાસ્ત્ર અને સાહિત્ય શાસ્ત્ર, પણ અહીં અદ્દભુત રીતે સંકલિત થયેલાં જોવા મળે છે, તેને વાંચવાનું કામ એ જ જો દુષ્કર છે, તો પછી તેને કેવળ વાંચવું જ નહિ, પણ વિચારવું, પચાવવું અને પ્રચલિત ભાષામાં ઉતારવું એ કેટલું દુષ્કર ગણાય ? છતાં તે કાર્ય અમુક અંશે થયેલું આપણી સામે આજે નજરે જોવાય છે.

લલિતવિસ્તરા ગ્રન્થનો અનુવાદ કરવામાં અનુવાદ કરનાર મુનિશ્રીને કેટલો શ્રમ પડયો હશે, ઉચ્ચ કોટિના સંસ્કૃતને ગુજરાતી ભાષામાં રજુ કરવા માટે બુદ્ધિને કેટલી કસવી પડી હશે, તે તો તે વિષયના અનુભવીઓ જ જાણી શકે.

આટલું કષ્ટ ઉઠાવવા છતાં કહેવું પડશે કે ગ્રન્થમાં જે ભાવો ભર્યા છે, તેનો એક શતાંશ પણ અનુવાદમાં ઉતરી શક્યો નથી એ ખામી અનુવાદકની છે એમ માનવા કરતાં ગ્રન્થની ગહનતા જ એવી છે કે સમર્થમાં પણ ઐદંયુગીન વિદ્વાનો એને અન્ય ભાષામાં ઉતારવાનો પ્રયાસ કરે તો પણ અમૂક ખામી રહી જવાની.

આપણા વર્તમાન સાધુ સંઘમાં આવા ગહન વિષયવાળા ગ્રન્થોના અભ્યાસ કરવાની, તેનું વાચન અને મનન કરવાની શુભ વૃત્તિઓ વધતી જાય છે, તે એક ઘણું શુભ ચિન્હ છે.

આ ગ્રન્થ ઉપર આવા એક જ અનુવાદ નહિ પણ જુદાજુદા અભ્યાસીઓ દ્વારા અનેક અનુવાદો થવાની આવશ્યકતા છે અને એ રીતે અનેકના પરિશ્રમના અંતે એક સમય એવો આવવાની આશા રાખીએ કે જ્યારે ચૈત્યવંદનના સૂત્રો બોલતી વખતે તેના અર્થની ભાવનાથી ઓતપ્રોત બનેલો હોય.

એ સ્થિતિ ઉત્પન્ન કરવા માટે ચૈત્યવંદન સૂત્રોની આવૃત્તિને આથી પણ વધુ સહેલી ભાષામાં, આબાલ ગોપાલ સૌ કોઈ સમજી શકે, તેવી સરલતમ શૈલીમાં અનુવાદિત થયેલી જોવાની અભિલાષા કોને ન હોય ? અર્થાત્ સૌ-કોઈને હોય.

આજે તો આપણે કબૂલ કરવું જોઈએ કે પ્રતિદિન પ્રાતઃકાળ મધ્યાહ્નકાળ અને સાયંકાળ, ત્રણે કાળ ચૈત્યવંદનની ક્રિયા કરનાર હજારો નહિ બલ્કે જૈન સંઘના લાખો આત્માઓમાં તેના અર્થો અને રહસ્યો જાણનારા આંગળીના વેઢે ગણાય તેટલા પણ ભાગ્યે જ હશે.

આ સ્થિતિમાં પરિવર્તન લાવવું હોય તો આ ગ્રન્થના અભ્યાસીઓની સંખ્યા વધવી જ જોઈશે. પ્રસ્તુત અનુવાદ તેવા અભ્યાસીઓને આજ સુધી અલભ્ય એવું પ્રકાશન પુરૂં પાડે છે.

અનુવાદકે કરેલી મહેનત અને પ્રકાશકે ઉઠાવેલો શ્રમ સાર્થક બને તે ખાતર આ અનુવાદને આવકારદાયક સમજીને અર્થી આત્માઓ તેનો પુરે પુરો લાભ ઉઠાવે એવી અભિલાષા સાથે વિરમીએ છીએ.

**શ્રી મોહનવિજયજી જૈન પાઠશાળા**

**જામનગર,** **પં. ભદ્રંકરવિજયજી**

સં. ૨૦૧૫ શ્રાવણ સુદી ૧૧ ને શુક્રવાર. (આ. રામચંદ્ર સૂ. સમુદાયના)

(લલિતવિસ્તરા ગુજરાતી અનુવાદ પ્રથમ ભાગમાંથી)



૧ ગ્રન્થકારનું મંગલાચરણ અને ટીકાકારનું મંગલાચરણ ... ...
૨ અધ્યવસાયની અદ્ભુત શક્તિ ... ... ... ...
૩ સૂત્રનું વ્યાખ્યાનરૂપ વિવરણ, કોણે કેવી રીતે શકે ? તેની મીમાંસા ...
૪ મંગલાચરણનો હેતુ તથા અનુબંધ ચતુષ્ટય ... ... ...
૫ ચૈત્યવંદનસૂત્રની વ્યાખ્યાની સફલતા તથા ચૈત્યવંદનાત્મક ક્રિયાની સફલતા વિષયની ચર્ચા
૬ સમ્યક્ક્રિયા તથા તેના અધિકારીનું ચાલું સ્વરૂપ ... ... ...
૭ અધિકારીનેજ સૂત્રાદિનું દાન કરનારને મળતા મધુર ફલો ... ...
૮ જિનેન્દ્ર ભગવાનનું વચન જ હિત પ્રાપ્તિનો એક ઉપાય છે એ વિષયનું વિવેચન...
૯ અપવાદ પણ ઉત્સર્ગનો એક પ્રકાર છે એ વિષયની ચર્ચા
૧૦ શ્રેયોમાર્ગ સૂચક વિધિવાક્યો ... ... ... ...
૧૧ અધિકારી અનધિકારી વિભાગ ... ... ... ...
૧૨ શુદ્ધ દેશનાનું સ્વરૂપ ... ... ... ...
૧૩ ચૈત્યવંદનનો વિધિ ... ... ... ...
૧૪ નમોત્થુણં સૂત્ર બોલવાનો વિધિ ... ... ... ...
૧૫ સંપદાઓનું સંક્ષેપતઃ વર્ણન ... ... ... ...
૧૬ વ્યાખ્યાના લક્ષણોનું સ્વરૂપ વર્ણન અને પ્રકૃતમાં ઘટના ... ...
૧૭ વ્યાખ્યાના અંગ રૂપ - જિજ્ઞાસાદિ સપ્તકનું ક્રમશઃ વર્ણન ... ...
૧૮ ઉત્કૃષ્ટ ભાવનમસ્કારના સ્વામી વીતરાગ જ હોય છે એ વિષયની તથા પ્રસંગોપાત ચાર પ્રકારની પૂજાની કરાતી પ્રૌઢ ચર્ચા ... ... ...
૧૯ 'નમોત્થુણં અરિહંતાણં' એ વાક્યમાં ઈચ્છાયોગ ફલિત થાય છે. તેનું તથા પ્રસંગપર ઈચ્છાયોગશાસ્ત્રયોગ - સામર્થ્યયોગનું અને મિત્રાદિ આઠ દષ્ટિઓનું વિમલ વર્ણન
૨૦ ભગવત્ પદાન્તર્ગત ભગ્ શબ્દના અર્થનો વિસ્તાર ... ...
૨૧ સાંખ્યમત પ્રસિદ્ધ - આત્મવિષયક વર્ણન ... ... ...
૨૨ 'આદિકર' પદનું વિશદ વિવરણ ... ... ... ...
૨૩ 'તીર્થંકર' પદનું સૂક્ષ્મ નિર્વચન ... ... ... ...
૨૪ 'સ્વંયસંબુદ્ધ' પદનું સુભવ્ય બ્યાન ... ... ... ...
૨૫ 'પુરૂષોત્તમ' પદનો ચતુર ચિતાર ... ... ... ...
૨૬ 'પુરૂષસિંહ' પદનું સમર્થ વ્યાખ્યાન ... ... ... ...
૨૭ 'પુરૂષવર પુંડરીક' પદનું ગંભીર મંથન ... ... ...
૨૮ 'પુરૂષવર ગંધહસ્તી' પદનું વિશિષ્ટ વિવેચન ... ... ...
૨૯ 'લોકોત્તમ' પદનું લોકોત્તર પ્રતિપાદન ... ... ...

૩૦ 'લોકનાથ' પદનું નવીન નિરૂપણ ... ... ... ...
૩૧ 'લોકહિત' પદનું અનુપમ આલોચન ... ... ...
૩૨ 'લોકપ્રદીપ' પદની વિશિષ્ટ વ્યાખ્યા ... ... ...
૩૩ 'લોક પ્રદ્યોતકર' પદની ચતુરજન ચમત્કારી ચર્ચા ... ... ...
૩૪ 'અભયદ' પદની માર્મિક વિચારણા ... ... ... ...
૩૫ 'ચક્ષુર્દ' પદનો પ્રૌઢ પરામર્શ ... ... ... ...
૩૬ 'માર્ગદ' પદની મનનીય મીમાંસા ... ... ... ...
૩૭ 'શરણદ' પદનું સુંદર આલેખન ... ... ... ...
૩૮ 'બોધિદ' પદનું બોધક વ્યાખ્યાન ... ... ... ...
૩૯ ભાવરૂપ અભયાદિની ચર્ચા ... ... ... ...
૪૦ 'ધર્મદ' પદનું વિશિષ્ટ વિવેચન ... ... ... ...
૪૧ 'ધર્મદેશક' પદનું દિવ્ય પર્યાલોચન ... ... ... ...
૪૨ 'ધર્મનાયક' પદનું રોચક વ્યાખ્યાન ... ... ... ...
૪૩ 'ધર્મસારથિ' પદનું સુશોભન નિરૂપણ ... ... ...
૪૪ 'ધર્મવરચતુરન્તચક્રવર્તી' પદનું ચિત્તાકર્ષક વ્યાખ્યાન ... ...
૪૫ 'અપ્રતિહત વરજ્ઞાન દર્શનધર' પદનું પ્રતિપાદન ... ... ...
૪૬ 'વ્યાવૃત છદ્મ' પદનું વિશિષ્ટ વિવરણ ... ... ...
૪૭ 'જિનજ્ઞાપક' પદનું ઝીણવટભર્યુ બ્યાન ... ... ...
૪૮ 'તીર્ણતારક' પદની મનનીય મીમાંસા ... ... ...
૪૯ 'બુદ્ધબોધક' પદની નોંધપાત્ર ચર્ચા ... ... ... ...
૫૦ 'મુક્તમોચક' પદનું રોચક વિવેચન ... ... ... ...
૫૧ 'સર્વજ્ઞ સર્વદર્શી' પદનું નિરૂપમ નિરૂપણ ... ... ...
૫૨ 'શિવમચલમરૂજમનન્તમક્ષય - મવ્યાબાધ-મપુનરાવૃત્તિ - સિદ્ધિગતિનામ - ધેયં સ્થાનં સંપ્રાપ્તેભ્યઃ' પદનું વિશિષ્ટ વ્યાખ્યાન ... ... ...
૫૩ 'નમો જિનેભ્યઃ, જિતભયેભ્યઃ' પદનું લોકોત્તર બ્યાન ... ...
૫૪ વચનપ્રામાણ્ય મીમાંસાદ્વારા સર્વજ્ઞપણાની સિદ્ધિ ... ... ...
૫૫ નવમી સંપદાનો કરાતો ઉપસંહાર ... ... ... ...
૫૬ પ્રેક્ષાપૂર્વક પ્રવૃત્તિ કરનારાઓની જિજ્ઞાસાને લક્ષ્યમાં રાખી તેના જવાબદારરૂપે નવેય સંપદાઓનો ક્રમસર ખૂબીપૂર્વકનો જે ઉપન્યાસ કરેલ છે તેની ચર્ચા ...
૫૭ નાનાવિધ સંપદાઓના ઉપન્યાસનું પ્રયોજન અને અનેકાન્તવાદની સદષ્ટાંત સિદ્ધિ
૫૮ સ્તોત્રના અધિકારી, પાઠવિધિ, સ્તોત્રરૂપ કૃતિના સ્વરૂપના પ્રતિપાદનપૂર્વક પ્રસ્તુત પ્રતિપાત સૂત્રની વ્યાખ્યાની સમાપ્તિ ... ... ...
૫૯ નાનાવિધ (૯) સંપદાઓના ઉપન્યાસનું શોભન શૈલીપૂર્વક દર્શાવેલ પ્રયોજન ...
૬૦ પ્રબલહેતુ દૃષ્ટાંતપૂર્વક અનેકાન્તવાદની સિદ્ધિ ... ... ...



સ્વ. પૂ. આ. કમલસૂરીશ્વરજી મ. સા.



સ્વ. પૂ. આ. લબ્ધિસૂરીશ્વરજી મ. સા.



પૂ. સ્વ. આ. વિજયાનંદ સૂરીશ્વરજી મ. સા.



સ્વ. પૂ. આ. ... સૂરીશ્વરજી મ. સા.



તીર્થોદ્ધારક પૂ. આ. કર્ણાટકકેશરી ... સૂરીશ્વરજી મ. સા.

# *Preface*

मिच्छादंसणमहणं, सम्मदंसणविसुद्धिहेउं च ।
चिइवंदणाइ विहिणा, पन्नतं वीयरागेहिं ॥

The rites Chaityavandana' and others, being performed methodically as prescribed in aphorism by Shri Arihanta gods who are detached from the worldly affairs and are are omniscient, are reffered to as the ones crushing false perception and purifying right perception.

- Sravaka Prajnapti Gatha 341.

There are many commentaries in vogue on the Chaityavandana Sutra. The oldest one among these commentaries is known as 'Lalitavistra' whose compiler and composer is a great scholastic personality and amost able author of scriptures, Acharya Shri Haribhadrasuriswar.

The importance of this commentary in Jainism and Jain scriptures is so great and famous that the author of the great story like 'Upamiti Bhavaprapancha Katha,' Acharya Sri Siddhasi Gani states as under.

"He, having known aptly the future, has created and composed the commentary (named) 'Lalitavistara' restoring to Chaityavandana rite and thus has done a great benevolence to me."

Justifying the above statement, Reverend Sri Munichandrasuri Maharaja, who has the preceptor of a great Acharya like Shri Vadi Devasuri renowned as most proficient lawyer in the royal court of Siddharaja Jayasinha, has composed a 'Lighutika' )a brief commentary) on 'Lalitavistra'. In his preface he writes :

"After studying the scripture composed by sugata, the sage Siddharsi, whose mind had become unsteady and who was, the crest jewel' among all commentators, saw this and acquired enlightenment (pratibodha). And then he looked upon the composer of this commentary as his preceptor and directed his salutation to him. Who is capable of explaining and expanding the meaning of that commentary ? Nevertheless, I am endeavouring for this task in order to test my memory."

Chaityavandana is such religious rite as is knitted with the necessary day-today acts of a monk or a nun of by Sri Ganadhara gods.

Glorifying this rite, the honourable authors of scriptures announce," Extraordinary, good results are acquired and the acts whose nature is to cover the virtues of knoledge and so on of soul get perished by bowing to the

'Chaityas' (i.e. temples) of Sri Jineswara gods. The effect of bowing to the 'Chaityas' is just contradictory to the effect of taking 'Karmas', so the act

of 'Chaityavandana' amounts to supreme pursuatha (Diligencel) 'Liberatiom' and if the act is frequently performed, all the 'Karmas' get destroyed.

By performing the act of Chaityavandana, such extrordinary benefit is gained, for it increases pure sentiments. If the act of Chaityavandana is perfomed on proper lines, the perfomer benefitted by obtaining exalted mind and its instincts.

He who possesses obvious and distinct knoledge of the meaning and mystery of Chaityavandana can onlyperform it in its true sense of the word.

In the commentary named 'Lalitavistra', the commentator Acharya, Sri Haribhadrasuri declares :

'Our effort is to impart the knowledge necessary in bringing about purity in the act of Chaityavandana'. Therefore the value of this explanation is very great for those who perform Chaityavandana regularly and the persons *who don't perform such sublime act are inspired thereby.*

Even today the act of Chaiyavandana in the Jain sway is performed by thousands and millions of people regularly, so this act is 'alive'. This act ought to be performed silently, religiously and whole-heartedly, there should not be any din and bustle in performing it.

The act of Chaityavandana being performed siletnly, religiously and wholeheartedly is only accepted by the scriptures. The act full of din and bustle is not considered to be valid. The learned don's have trust and faith such act, and that is verily natural.

There are a number of events of place and others in this 'act' Declaring this, Reverned Sri Haribhadrasuri has refuted the person holding the opinion that the 'act' is full of din only. Besides the fact, that the act, in which there are place (Sthana), Colour (Varna), Wealth (Artha) and prop (Alambana), cause the benefits of sublime mind, is justified by him.

The main point of the volume 'Lalitavistara' is that in the act of Chaityavandana the 'Chaityas' which are saluted are the images of Sri Arihanta gods, and the images are named as Chaityas because the salutation and the other acts directed to them result in mind with commended meditation.

How is the capability of producing mind with commended deep meditation acquired through the images of Sri Arihanta gods ? The answer to that question is obtained by knowing the form of Bhara Arihanta.

In this commentary the aphorism which is explained at first is 'नमोत्थुण' and that is known as 'Sakrastava' also. In this aphorism, thirsty-three adjectives are given in order to know the form of 'BhavaArihanta'. Each of these adjectives is so pregnant with meaning that Reverend Sri Haribhadrasuri Maharaja endeavoured exceedingly to explain it.

As a result of this endeavour we come to know that Sri Tirthankara gods are in connection with the three worlds. They have strongly desired for the welfare of all living beings of the three worlds. In order to have vivid vision

as to how all living beings should attain complete bliss and peace and how the obstructive 'Karmas' should get destroyed, they have performed in tense penance observed hard restraints, suffered many annoyances and calamities and studied scriptures Systematically by staying in the hearmitage of some preceptor. And as a consequence of all self-discipline they gain clean and pure perfaction. Because of their great efforts of contemplating on doing benevolence for ever, they acquire the highest position and the most conveted title of Tirthanker gods.

At the time of the rise of 'fruit' of that pure 'nature' inspite of their being detached, they establish a place of pilgrimage appearing the three worlds and rescuing all from the ocean of life. This place of pilgrimage benefits millions of living beings.

Such a great benevolence can be done by the Tirthankar gods only, not by others. While giving its reason, the commentator, the honoured sage, explaining the adjective पुरिसुत्तमाणं Tirthankara god, announces that in the souls of Sri Tirthankara there is some specific worthiness from the time immemorial. That worthness creates a sense of interest of doing benevolence in them and thereby they are ever-benevolent rather than beingself centered. This state of having the tendency of doing benevolence all the while results in bestowing upon them the highest position. The position of 'Irtha' is due to their worthiness and that worthiness inspires them in doing the acts of benevolence.

Reverend Sri Haribhadrasuri Maharaj says that Sri Tirthankara gods are the best of all souls became they possess the virture of being benevolent more than any other soul. There must be some reason for this happening and that reason lies their in hidden worthiness of the time immemorial. With the agreeable reasons, that worthiness comes into existence. Such excellent virtures of benevolence and others cannot be found even in the souls desirous of salvation (MOKSHA).

This happening is proved by Revemed Sri Acharya by giving a simile. Even if aspiece of glass is purified and refined, it doesn't abandon its own 'class' and can never become a jewel. If a jewel is kept in the mean company (of pieces of glass), it will never become a piece of glass.

Such a vast difference is there between a Tirthankara soul and a non-Tirthankara soul. Both of them are desirous of salvation and both of them attain the similar 'form' in salvation. Even then, the great sages who are the authors of scriptures have accepted this specific charaterstic of the souls of Sri Tirthankaras in this world. Therefore the embodied souls attaining salvation are classfied into fifteen kinds, among which one kind is of Tirthankara siddha.

One should believe that the power or lustre in the chaityas (temples) of the Arihanta gods is obtained from the Arihanta gods themselves. Today the followers of Jainism religiously accept that the power or lustre in the BhavaArihantas has been derived from their excellent sentiment of doing super

welfare through arderous efforts for self-realization of their 'dwellings' full of virtues like love, etc. The earnest feeling of Sri Arihants gods in their third birth, before their attaining the state of Tirthankara, is extremely noble anf high. They express their desire thus. 'Let all the living beings in this world be rid of the mud of agony and achieve the abode of liberation, devoid of obstacles and abundant in happiness. How can one achieve this state ? Let them behave accordingly and free themselves from affliction. 'To the Tirthankarar, this is not enough. They think that they themselves should have a vivid vision of such sublime path for all the living beings and they themselves should bring the path into existence in such a way that by following it each and every embodied soul may achieve liberation.

The superiority of the souls of Sri Tirthankara gods over the other souls can be understand by the illustrations of a piece of glass and a jewel. Thus the class of Sri Tirthankara gods is believed to be altogather different by the authors of scriptures. Let the other souls imitate the Tirthankara. Even then how can they obtain such sublime sentiment of the gods ?

Let the feeling of welfare of all living beings be away, but if one has the feeling of welfare of a single soul, one can acquire a planty of merits (Panyas). But the souls, who have the sentiment of doing welfare to all the living beings, who have intense compassion of riding all of afflication and of the net of 'Karmas' and whose hearts are full of virtues owing to the eternal 'Worthiness', can achieve the multitude of best merits. Why can they not acquire such sublime acts of merits ? Because of such sublime acts, of merits, these souls are known as Tirthankaras in scriptures. These acts of merits are the cause of creation of places of pilgrimage beneficial to all the three worlds. These holy places remain for ever in this world even after the spriritual salvation of the Tirthankara gods. They become incomparable means of achieveing salvation for the noble souls.

According to the volume 'Lalitavistara', such high and noble sentiment is found in the souls of Sri Tirthankaras gods only: no where else it is found. On account of the power of this sentiment only the soul acquires the name and 'Karma' of a Tirthankara god; the religion and places of pilgrimage get promoted: immorality gets destroyed and embodies souls gain eternal bliss.

Why does it happen so ? For this, there is the doctrine of 'Karma', which is unavoidable and eternal. 'As you sow, so shall you reap.' Nobody can falsify this doctrine. The love and affection of Sri Tirthankara gods is not for one soul only, but it is for all souls. Who except the volume 'Lalitavistara, can explain to us the fact that the Tirthankaras cherish each and evey soul much more than their own self ?

We feel that even after the ming of the great man like Sri Siddharsi had become unsteady Sri Siddharsi gained steadiness in the Doctrine of Jina because of the generous sentiments of benevolence in the heart of Sri Tirthankara

gods. The thought that they only can be the masters of the Universe and that they only can have the worthiness of becoming the leaders of all the three worlds and the decision to assert that the Arhat Sway is logically sautless, harmonious and unanimous might have created the state of steadiness in Sri Siddharsi, mightn't it ?

It is unanimously accepted that in the Univerese there is such a supreme power as does regularly the welfare of all living beings in the world, and it is known as righteousness (Dharma) in scriptures.

A battle between Davilish property and celestial property, Righteousness and Unrighteousness has been going on from the time immemorial. In that battle the Celestrial property vanquished. There must be some reason behind this.

There are virtuous men thinking good of living beings in this world, and in the same way, there are wicked men thinking bad of all.

The wicked think to injure others but all don't get injured. Besides, at the most within six months at least one soul being free from all bondageof 'Karmas" attains salvation. In that case, the dilligence of that soul works. Who provides him with inspiration and equipment ?

It may be rightly said that the sentiments of Sri Tirthankaras desirous of doing endless good to all living beings and their super-human, unimagined powers are so intense that the sentiments of Tirthankaras are successful. Thousands and millions of souls in this world put forth opposing thoughts which are overcome by the godly sentiments of the Tirthankaras. The power of good is, verily, superior to that of bad.

Even today we directly experience in our life the power of good and bad sentimemts. The very experience compel us to comprehand that owing to the excellent sentiment and super-human power of the Tirthankaras, the embodied souls of this worldy life, though sinful, are able to obtain a little happiness, and after a long time becoming religious they are able to acquire Bliss of Salvation.

Taking all this into consideration it is felt that there is only one Almighty and it is Sway of Sri Tirthankara gods, for their sentiment is for the mass welfare of the whole world for ever, Moreover, they hace enlightened the universe, and according to it self-siscipline and ardous efforts for self-realization as well as self liberation are being done continuously in this world.

Reverend Sri Hemachandracharya asserts that obedience is for salvation and disobedience is for bondge (in wordly life). Why is the word Ajna (command) is used here ? Ajna means Rule or Sway. Ajna implied the meaning, 'Control of super power.'

Everyone of us believes that the power of 'Karmas' is a super power, but we come to know from the volume 'Lalitavistra' that there is a power greater

sentiment of any other soul is not proved as good as that of the Tirthankaras, there is the total sway of Sri Tirthankara gods only on this universe. On the countrary, if we don't believe it, we become the betrayers of that formost Rule under whose obligation we breathe.

To betray the Rule is to Betray the Tirthankara gods beneficent to us all or to betray the sentiment of theirs beneficent to the whole universe.

The abovementioned botion got steady in the mind of Sri Siddhari Gani in accordance with the lines of the volume 'Lalitavistara. As a result of that, he addressess Reverend Sri Haribhadrasuriswara as his religious, spiritual preceptor and his beneficent friend. Then he eeulogizes him whole heartedly and devoutly as if Sri Haribhadrasuri' swara had composed this colume for his sake only.

If we say that this volume only made Sri Siddharsi Gani Steady, the importance and greatness of this volume is not shown totally, because the value of that volume is not that much only.

The great power of the Rule of Sri Tirthankara gods does the noble deed of benevolence in this universe. How many persons have trust on it ? If there is no such trust or faith, and in absence of such trust or faith, if there is any sort of negligence or betrayal of the Great power of the Benevolent Rule and thereby if one commits a great sin, this volume 'Lalitavistara' saves one from that sin and creates true trust or faith in the person. This volume is beneficent to Sri Siddharsi as well as to the person who studies it religiously and who acquires realization of trust by its study.

Righteousness or Relligion commences with the sentiment of benev-eloence and with the act of abandonment of afflicating others. He who does not possess either of the two is really devoid of righteousness.

All religious authorities unanimously agree on above point. The souls of the Tirthankaras reaching the top of these two sentiment are the poineers of religion activities: the some souls are the charioteers of the chariot of re-ligion and they only are the sovereign rulers of the kingdom of Religions. Who else, excepting the commentary 'Lalitavistara' would explain to us the signifi-cance of this fact ? And if it (Lalitavistara) had not explained it how could we have exhibited our devotion and regard towards our benevolent and the great obliging personality of the universe ?

There are certain obligations of the volume 'Lalitavistara', which can't be included in this brief preface. Those obligations may be known through study of this volume only. But it is not an easy task to study this volume, for there are philosophy in it, abstract reasoning and logic are well-knitted in it, there is a science and art of rhetoric or poetics and also of literature.

The task of reading this volume is tough. Then how tough it would be while thinkiong, comtemplating, digesting and translating into correct language instead of mere reading it ! However, appears that to some extent the work

sentiment of any other soul is not proved as good as that of the Tirthankaras, there is the total sway of Sri Tirthankara gods only on this universe. On the countrary, if we don't believe it, we become the betrayers of that formost Rule under whose obligation we breathe.

To betray the Rule is to Betray the Tirthankara gods beneficent to us all or to betray the sentiment of theirs beneficent to the whole universe.

The abovementioned botion got steady in the mind of Sri Siddhari Gani in accordance with the lines of the volume 'Lalitavistara. As a result of that, he addressess Reverend Sri Haribhadrasuriswara as his religious, spiritual preceptor and his beneficent friend. Then he eeulogizes him whole heartedly and devoutly as if Sri Haribhadrasuri' swara had composed this colume for his sake only.

If we say that this volume only made Sri Siddharsi Gani Steady, the importance and greatness of this volume is not shown totally, because the value of that volume is not that much only.

The great power of the Rule of Sri Tirthankara gods does the noble deed of benevolence in this universe. How many persons have trust on it ? If there is no such trust or faith, and in absence of such trust or faith, if there is any sort of negligence or betrayal of the Great power of the Benevolent Rule and thereby if one commits a great sin, this volume 'Lalitavistara' saves one from that sin and creates true trust or faith in the person. This volume is beneficent to Sri Siddharsi as well as to the person who studies it religiously and who acquires realization of trust by its study.

Righteousness or Relligion commences with the sentiment of benev-eloence and with the act of abandonment of afflicating others. He who does not possess either of the two is really devoid of righteousness.

All religious authorities unanimously agree on above point. The souls of the Tirthankaras reaching the top of these two sentiment are the poineers of religion activities: the some souls are the charioteers of the chariot of re-ligion and they only are the sovereign rulers of the kingdom of Religions. Who else, excepting the commentary 'Lalitavistara' would explain to us the signifi-cance of this fact ? And if it (Lalitavistara) had not explained it how could we have exhibited our devotion and regard towards our benevolent and the great obliging personality of the universe ?

There are certain obligations of the volume 'Lalitavistara', which can't be included in this brief preface. Those obligations may be known through study of this volume only. But it is not an easy task to study this volume, for there are philosophy in it, abstract reasoning and logic are well-knitted in it, there is a science and art of rhetoric or poetics and also of literature.

The task of reading this volume is tough. Then how tough it would be while thinkiong, comtemplating, digesting and translating into correct language instead of mere reading it ! However, appears that to some extent the work

has been accomplished.

The persons who have experience of that subject can only know how much the venerable sage would have exerted in translating the volume 'Lalitavistata, how much he would have tested his intellect in introducing the high-levelled Sanskrit into Gujarati and how much pain he would have taken in preparing different sorts of notes and critical explanations in order to elucidate the significance of the original volume.

Though the sage have spared no pain in fulfilling his job, we are forced to state that the one hundredth part of the substance of the original volume could not have been translated on proper lines. Instead of believing it to be the deficiency of the translator, we shall have to agree that the volume is so imcomprehensible that even if the most proficient erudite personalities language, there will have been found some or other shorcoming.

In our existing group of sages, there is an increase auspicion tendency of studying, reading and contemplating over such volumes of deep subject. It is, verily a good sign.

Not only such a version of this volume but a good number of version by different scholers also should have been undertaken. Thus as a result of much exertion, let us look forward to such a time when each and every followers of Jainism while performing the rite of Chaityaradndana and while chanting the aphorisms of the same gets throughly absorbed in its meaning.

In order to create such situation, the edition of the aphorisms regarding 'Chaityavandana' ought to be translated in the easiest style comprehensible by all - old as well as by the young ambition of seeing such an edition published in the near future.

Today we should admit that we would seldom find a very few souls knowing the sense and significance of the 'Chiatryavandana' rite from among those thousands and million of the followers of Jainism always performing the rite methodically by reciting the aphorism thrice. In the early morning, at noon and during the dusk.

In this situation, if a change is expected, the number of readers of this volume will have to be increased. This version provides such readers with a useful publication unobtainable till today.

We conclude here with the hope that the desirous souls welcoming this version will take its full advantage so that the exertion of the translator and painstaking efforts of the published may be fulfilled.

Shri Mohanvijayaji Jain )
Pathasala )
Jamnagar, ) Pandit Bhadrakarvijaya.
Samvat 2015, Sravan Sudha, )
Ekhadasi, Friday. . )

# લલિતવિસ્તરા ગ્રંથના પંજિકાકાર

શ્રુત - હેમ - નિકષ **પૂજ્ય આચાર્યશ્રી મુનિચન્દ્રસૂરિજી મ.સા.**

લેખક - **પૂ. મુનિશ્રી મુનિચન્દ્ર વિજયજી મ.**

અગિયારમી સદીના ઉત્તરાર્ધનો સમય...
રળિયામણું .... દર્ભાવતી નગર..... (ડભોઇ નગર)
ચિંતક શેઠ....!
મોંઘીબેન શેઠાણી....!
"ચિંતય' એમનું કુળ....!

કોઇ પુણ્યવંતા દિવસે એમને ત્યાં એક તેજસ્વી બાળકનો જન્મ થયો. એના જન્મથી માત્ર માતા-પિતા જ નહિ, પણ બાજુના પાડોશીઓ પણ આનંદિત બની ઊઠયા.

એનું મુખ...! જાણે પૂનમનો ચન્દ્ર !
એનું કપાળ ! જાણે આઠમનો ચન્દ્ર !
એની આંખડી ! જાણે કમળની પાંખડી...!
એનો ત્રણ રેખાયુક્ત કંઠ ! જાણે કે દક્ષિણાવર્ત શંખ !

આવો મનમોહક બાળક કોને ન ગમે ? જેણે જેણે એ બાળક જોયો તે સૌએ મોંઘીબાઇને રત્નકુક્ષિ કહીને નવાજ્યા... !

એક દિવસે વિહાર કરતા કરતા આચાર્યશ્રી યશોભદ્રસુરિશ્વરજી આવી ચડયાં. ડભોઇના ભક્તિવંતા શ્રાવકોએ ભાવભીનું સ્વાગત કર્યું. દરરોજ વ્યાખ્યાનાદિ ચાલવા લાગ્યા. યશોભદ્રસૂરિશ્વરજીની જાદુઇ વાણીએ ડભોઇ પર જાણે કામણ કર્યું. નાનાથી માંડીને મોટેરા સૌ વ્યાખ્યાનમાં આવવા લાગ્યા. વિશાળ ઉપાશ્રય પણ સાંકડો પડવા લાગ્યો.

નાના બાળક સાથે મોંઘીબેન પણ પ્રવચનમાં આવતાં હતાં. એક દિવસે આચાર્યશ્રીની નજર એ નાનાકડા બાળક પર પડી. અને... જાણે તેનું ભાગ્ય પલટાઇ ગયું. આચાર્યશ્રીની આંખો આ તેજસ્વી બાળક પર જડાઇ ગઇ. ઘડીભર તેઓ જોઇ જ રહ્યાં. આચાર્યશ્રીની કાન્તદર્શી આંખો જાણે એ બાળકના કપાળ પરનું ઉજ્જવળ ભવિષ્ય વાચી રહી હતી. થોડીવાર પછી પૂછયું :

કેમ બેન...! આ તમારો નંદન છે ?

'હા જી' મોંઘીબેને ઉત્સાહિત ચહેરે કહ્યું.

આ બાળકના ચહેરા પર હું જૈનશાસનની મહાન પ્રભાવના જોઇ રહ્યો છું. બેન ! મારૂં માનતા હો તો આ બાળકને શાસનના શરણે સોંપી દો એનું જીવન ધન્ય બની જશે. માત્ર એનું જ નહિ, પણ તમારું જીવન પણ ધન્ય બની જશે અને રત્નકુક્ષિ માતા તરીકે તમારું નામ ઇતિહાસ પર સુવર્ણાક્ષરે લખાઇ જશે.

ગુરુદેવ ! મારો પુત્ર શાસનને સમર્પિત બને એવા મારા ભાગ્ય ક્યાંથી ? હું તો પહેલેથી જ એવી કામના કરતી રહી છું કે મારો પુત્ર શાસનનો શણગાર બને. આપ મારા પુત્રને સ્વીકારો. એના પિતાની પણ આ અંગે મંજૂરી જ છે. તેઓ તો મારાથી પણ વધુ ધાર્મિક વૃત્તિવાળા છે. ગુરુદેવ ! એને ભણાવજો ગણાવજો અને આપનો પટ્ટપ્રભાવક બનાવજો. જેથી મારું જીવન પણ

ધન્ય બને, મોંઘીબેને મધમીઠો જવાબ આપ્યો.

પહેલે જ ધડાકે પોતાના તેજસ્વી બાળકને ઉલ્લાસભર્યા હૃદયે સોંપી દેતી મોંઘીબેનને જોઇને આચાર્યશ્રીનું હૃદય નાચી ઉઠયું. તેઓ મનોમન બોલી ઊઠ્યા : ધન્ય રત્નકુક્ષિ માતા !

ધન્ય ડભોઇની પુણ્યભૂમિ !

મોંઘીબેન અને ચિંતક શેઠે પોતાનો વ્હાલસોયો પુત્ર ગુરુ ચરણે સમર્પિત કર્યો.

શુભ મુહૂર્તે બાળકની દીક્ષા થઇ...

ગુરુએ તેનું નામ પાડયું : શ્રી મુનિચન્દ્ર મુનિ !

હા.. આ બાલમુનિ ખરેખર 'મુનિચન્દ્ર જ હતા. કારણ કે તેઓ મુનિઓમાં ચન્દ્રની જેમ શોભતાં હતા. એમના દર્શન માત્રથી આંખડી ઠરતી હતી.

બાલમુનિ મુનિચન્દ્ર ઉંમરમાં જ માત્ર બાળ હતા, બુદ્ધિમાં નહિ. નાની ઉંમર પણ બુદ્ધિ એવી હતી કે મોટા મોટાખેરખાંઓ પણ સ્તબ્ધ બની જાય.

બુદ્ધિની સાથે શુદ્ધિ પણ એટલી જ જોરદાર હતી. આત્મશુદ્ધિ અંગે તેમની પહેલેથી જ એટલી તકેદારી હતી કે દીક્ષાના દિવસથી જ છયે વિગઇનો ત્યાગ કર્યો... અને વાપરવામાં બાર દ્રવ્યથી વધારે નહિ લેવા તેવી પ્રતિજ્ઞા કરી. મોટે ભાગે તેઓ આયંબિલ જ કરતાં રહ્યા.

બાલ્યાવસ્થામાં પણ કેવી અબાલ બુદ્ધિ !

(તેઓ પ્રાયઃ કાંજીનું પાણી પીતા આથી તેઓ 'સૌવીરપાયી' તરીકે પણ ઓળખાય છે.)

તેઓ ઉપાધ્યાયશ્રી વિનયચન્દ્રજી પાસે પોતાનો અભ્યાસ કરવા લાગ્યા. તીવ્ર બુદ્ધિના કારણે તપ સાથે જ્ઞાનમાં પણ તેઓ પ્રગતિ કરવા લાગ્યા.

એમનામાં કેટલી તીવ્ર મેધાશક્તિ હતી, તેનો હજુ ખાસ કોઇને પરિચય થયો નહોતો, પણ એક પ્રસંગ એવો બન્યો જેથી તેમની પ્રતિભાનો સૌને પરિચય થયો.

વિ.સં. ૧૦૯૪માં તેઓ પોતાના ગુરુદેવ સાથે વિહાર કરતા કરતા પાટણ પાસે આવ્યા.

પાટણ છોડીને આગળ વધતાં ગુરુદેવને કહ્યું : 'ગુરુદેવ ! આપ પાટણ છોડી દો છો?

'વત્સ.... ! એનું કારણ છે. પાટણમાં ચૈત્યવાસીઓનું જોર છે. આપણે સંવેગી સાધુઓ કહેવાઈએ. તેઓ આપણને ઊતરવા નહિ આપે. ચૈત્યવાસી સાધુઓએ રાજાઓ મારફત પોતાના સિવાય અન્ય સાધુઓને નહિ ઊતરવા દેવોનો કાયદો કરાવેલો છે. ઊતરવાની જગ્યા જ ન મળે પછી ત્યાં જવું શી રીતે ?

"ગુરુદેવ..! મને પાટણ જવાની ઘણી હોંશ છે. ત્યાંના તીર્થસ્વરૂપ મોટા મોટા મંદિરોના દર્શન કરવાની ખૂબ જ ઈચ્છા છે. તો થોડા દિવસ માટે કોઇ ઓળખીતા ને ત્યાં ઊતરવાની વ્યવસ્થા ન થઇ શકે ? આપે તો પાટણમાં ઘણી વાર દર્શન કર્યા હશે, પણ મેં કદી નથી કર્યા. અત્યારે આપણે પાટણની પાસે પહોંચ્યા જ છીએ તો ત્યાં જઇ આવીએ..."

'ભલે. તારી ચૈત્યપરિપાટીની ઈચ્છા હું પૂર્ણ કરીશ'. અને બાલમુનિ મુનિચન્દ્રની વાત માનીને ગુરુદેવે પાટણમાં પ્રવેશ કર્યો. કોઈ પરિચિતને ત્યાં ઊતર્યા.

બાલમુનિ ઝટપટ ચૈત્યોની પરિપાટી કરવા માટે નીકળી પડયા. એક વખતે તેઓ થારાપદ્રગચ્છના શ્રી આદિનાથ પ્રભુના દેરાસરમાં દર્શન કરવા ગયા.

દર્શન કરીને બહાર નીકળ્યાં ત્યાં એમના કાને સંસ્કૃત ભાષાની ચર્ચાના શબ્દો પડ્યા. તેમણે જોયું તો બાજુના સ્થાનમાં કોઇ આચાર્યશ્રી પોતાના બત્રીશ શિષ્યોને કંઇક ભણાવી રહ્યાં હતા. તપાસ

કરતાં ખ્યાલ આવ્યો કે ભણાવનાર આચાર્યશ્રી એ બીજા કોઈ નહિ પણ વાદિવેતાલ આચાર્યશ્રી શાન્તિસૂરિજી હતા. તેમને યાદ આવ્યું : ઓહ ! આ તો તે આચાર્યશ્રી, જેમણે ભોજરાજાની સભામાં ૮૪ વાદીઓને હરાવી જિન-શાસનની વિજયપતાકા ફરકાવી હતી. અને તે બદલ તેમને રાજાએ આપેલા ૮૪ લાખ દ્રમ્મથી ધારામાં જિનાલયો બનાવ્યા હતા. તેમની આવી વાદશક્તિ જોઈને મહાકવિ ધનપાલે રાજા ભોજને કહેલું : 'રાજન્ ! દરેક વિજય દીઠ જો આપ એક લાખ દ્રમ્મ આપવા જશો તો તિજોરી સાફ થઈ જશે. આમનું નામ ભલે શાન્તિસૂરિ હોય પણ તેઓ વાદીઓ માટે તો વેતાલ જેવા વિકરાલ છે. કવિની આ વાત વધાવીને રાજાએ તેમને 'વાદીવેતાલ' તરીકે ઘોષિત કર્યા હતા. બાલમુનિને આ બધી સાંભળેલી વાતો યાદ આવવા લાગી. આવા મહાન આચાર્યશ્રીના આમ અચાનક જ દર્શન થઈ જશે, એવી તેમને કલ્પના જ ન હતી. તેમના મનમાં વિચાર સ્ફુર્યો આવા આચાર્યશ્રી પાસે હું પણ કેમ ન ભણું ? આવો મોકો મળે ક્યાંથી...... ?

તેઓ તરત જ ચાલતા પાઠમાં ધીરેકથી પહોંચી ગયા અને નમસ્કાર કરી સૌથી પાછળ બેસી ગયા. થોડીવારમાં જ તેઓને સમજાઈ ગયું કે આચાર્યશ્રી બૌદ્ધદર્શનના પ્રમેયવાદનો પાઠ આપી રહ્યા છે. પાઠ ખૂબ જ કઠીન હતો. ચર્ચા ઘણી જટીલ હતી, પણ તીક્ષ્ણ બુદ્ધિમત્તાના કારણે તેમને તો તદ્દન સરળ લાગવા માંડી.

તેમને પાઠમાં ખુબ જ રસ પડયો. તેઓ દરરોજ પાઠમાં આવવા લાગ્યા.

દસ દિવસના અંતે આચાર્યશ્રીએ બત્રીશે ય શિષ્યોનો પાઠ સાંભળવા માંડ્યો. પણ અફસોસ...! બત્રીશમાંથી એક પણ શિષ્યને પાઠ આવડ્યો નહિ કે કઠીન ચર્ચા સમજાણી નહિ. આથી આચાર્યશ્રી નિરાશ બની ગયા. અરેરે ! બત્રીશમાંથી એક પણ પ્રતિભાશાળી નથી ? જો આટલો ય પાઠ નહિ સમજી શકે તો મારી પાટ સંભાળશે કોણ ? મારી વાદકળા અપનાવશે કોણ...? શું મારું જ્ઞાન મારી પાસે જ રહેવાનું ?

આચાર્યશ્રીનો હતાશ ચહેરો જોઈ બાલમુનિ મુનિચન્દ્ર તરત જ તેમની પાસે આવ્યા અને કહ્યું : 'પૂજ્યવર ! આપ જો આજ્ઞા ફરમાવો તો હું પાઠ સંભળાવું'.

આચાર્યશ્રીએ સામું જોયું. અપરિચિત ચહેરો જોઈ વિચારમાં પડી ગયા : કોણ છે આ બાલમુનિ ? જે હોય તે પાઠ સાંભળવા તો દો. આચાર્યશ્રીએ કહ્યું : તમે પણ પાઠ સંભળાવી શકો છો.'

અને... તરત જ બાલમુનિએ દસે ય દિવસનો પાઠ કડકડાટ સંભળાવી દીધો. અને આચાર્યશ્રીએ જે કઠીન પ્રશ્નો પૂછ્યા તેના પણ ઉત્તરો આપી દીધા.

બાલમુનિની પ્રચંડ પ્રતિમા જોઈ આચાર્યશ્રી ચકિત થઈ ગયા. પૂછયું : મુનિવર! તમે કોણ છો ? કયા ગચ્છના ? ગુરુ કોણ છે ? પાઠમાં કયારથી આવો છો ?

'પૂજ્યશ્રી ! મારું નામ છે : મુનિચન્દ્ર મારા ગુરુજીનું નામ છે : આચાર્યશ્રી યશોભદ્રસૂરિજી મારા ગચ્છનું નામ છે : વડગચ્છ. હું દસ દિવસથી પાઠમાં આવું છું. આપને પૂછ્યા વિના જ પાઠમાં બેસી ગયો તો ક્ષમા કરશો'.

'બાલ મુનિવર...! તમારા જેવાને હું પાઠ ન આપું તો કોને આપું ? મને પૂછ્યા વિના તમે પાઠમાં બેસી ગયા, છતાં મને આનંદ થયો છે. આમેય હું મારું જ્ઞાન આપવા કોઈ પાત્રને શોધી જ રહ્યો હતો. ત્યાં અચાનક જ તમે આવી ચઢ્યા. પણ મુનિવર ! તમે પુસ્તક ક્યાંથી મેળવ્યું ?

'મારી પાસે પુસ્તક છે જ નહિ.'

'પુસ્તક વિના જ બધું યાદ રાખ્યું ?

'આપની કૃપા'

બાલ મુનિશ્રીની આવી પ્રચંડ મેધા અને નમ્રતાપૂર્ણ વ્યક્તિત્વ જોઇ આચાર્યશ્રી તો રાજીના રેડ થઇ ગયા. તેઓ તરત જ પાટ ઉપરથી નીચે ઉતરી તેમને ભેટી પડ્યા અને કહ્યું : મહાત્મન્! તમે તો ધૂળમાં ઢંકાયેલા રત્ન છો. તમારા જેવા મેધાવઈ વિદ્યાર્થીને પ્રાપ્ત કરીને હું પણ ધન્ય બન્યો છું. હવે તમે અહીં જ રહો. મારે તમને ભણાવવા છે. મારું જ્ઞાન તમને આપીને મારે નિર્ભાર થવું છે.'

'પૂજ્યવર ! અહીં અમારા માટે ઊતરવાની ખૂબ જ તકલીફ છે. આ તો માત્ર ચૈત્યપરિપાટી માટે જ આવ્યા છીએ. આપ જાણો છો કે અમે સંવેગી સાધુ છીએ. અમારા માટે ઊતરવાનો તો નિષેધ છે'.

'મુનિવર...! તમારી વાત સાચી છે. પણ એ અંગે હવે ચિંતા કરશો નહિ. હું બધી વ્યવસ્થા કરાવી આપીશ. તમે તમારા ગુરુજીને આ જણાવશો. આચાર્યશ્રીની આવી કૃપા જોઈ બાલમુનિએ પોતાના ગુરુજીને વાત કરી. તેઓ પણ ત્યાં રહેવા સમ્મત થયા.

આચાર્યશ્રી શાન્તિસૂરિજીએ તેમને ટંકશાળની પાછળ શેઠ દોહડિના મકાનમાં ઉતરવાની વ્યવસ્થા કરી આપી અને દરરોજ તેઓ પોતાનો ખાસ સમય કાઢીને બાલમુનિને ભણાવવા લાગ્યા. જોતજોતામાં તેઓ છયે દર્શનના પારગામી બની ગયા.

બસ, ત્યારથી પાટણમાં સંવેગી સાધુઓને ઊતરવાની સુલભતા થવા લાગી.

પોતાનો જ્ઞાન-વારસો આપીને જાણે સંતુષ્ટ થયેલા આચાર્યશ્રી શાન્તિસૂરિજી ત્યાર પછી થોડા જ સમયમાં કાળધર્મ પામ્યા (વિ.સં.૧૦૯૬)

આચાર્ય પદવી :- વાદિવેતાલ આચાર્યશ્રી શાન્તિસૂરિજીની પરમ કૃપાથી મુનિચન્દ્ર મુનિ પણ મહાન વાદી બન્યા. તેમણે સાંભર (અજમેર પાસે)ના રાજા અર્ણોરાજની સભામાં શૈવવાદીને હરાવ્યો અને દિગંબરવાદી ગુણચન્દ્રની સાથે રાજગચ્છીય આચાર્યશ્રી ધર્મઘોષસૂરિજીના થયેલા વાદમાં તેઓશ્રીએ આ. શ્રી ધર્મઘોષસૂરિજીને સહાય કરી હતી અને દિગંબરવાદીને હરાવ્યો હતો. આમ તેમને અનેક વાદોમાં વિજય મેળવીને શાસનની વિજયપતાકા ફરકાવી હતી.

મુનિચન્દ્ર મુનિની આવી અદ્‌ભુત યોગ્યતા જોઇ આચાર્યશ્રી નેમિચન્દ્રે તેમને આચાર્યપદથી અલંકૃત કર્યા.

(વિ. સં. ૧૧૨૯થી ૧૧૩૯ની વચ્ચેના ગાળામાં)

આચાર્યશ્રી મુનિચન્દ્રસૂરિજીએ પોતાના ગુરુભાઇઓ, આનંદમુનિ, દેવપ્રભ મુનિ, માનદેવ મુનિને આચાર્યપદવી આપી હતી તથા શિષ્યોમાં અજિતપ્રભ, દેવ (વાદી દેવસૂરિજી), રત્નસિંહ વગેરેને આચાર્યપદથી અલંકૃત કર્યા હતા.

પૂનમિયો ગચ્છ :

વિ.સં. ૧૧૪૯માં એક શ્રાવકે, વાદીભ આચાર્યશ્રી ચન્દ્રપ્રભ જેવા મોટા આચાર્ય બિરાજમાન હોવા છતાં આચાર્યશ્રી મુનિચન્દ્રસૂરિજીના હાથે પ્રતિષ્ઠા કરાવી. આથી ગુસ્સે ભરાયેલા આચાર્યશ્રી ચન્દ્રપ્રભે, સાધુઓ પ્રતિષ્ઠા ન કરાવી શકે, પૂનમના દિવસે પાખી પાળે વગેરે નવી પ્રરૂપણાવાળો 'પૂનમિયો ગચ્છ' ચલાવ્યો. ત્યારે આચાર્યશ્રી મુનિચન્દ્રસૂરિજીએ 'આવસ્સય સત્તરી' બનાવી સંઘને સન્માર્ગ-દર્શન કરાવ્યું. આ વાતનો ઉલ્લેખ કરતાં તેમના પ્રશિષ્ય આચાર્યશ્રી મુનિભદ્રે (સં. ૧૪૧૦) શાન્તિનાથ મહાકાવ્યમાં કહ્યું છે :

**"सन्मार्गं प्रकाशांचकार भगवान् यो जीवमैत्रीं श्रयन्."**

આચાર્યશ્રી મુનિચન્દ્રસૂરિજી ખંભાતથી નાગોર સુધીના પ્રદેશમાં વિચર્યા હતા. તેમના પરિવારમાં ૫૦૦ સાધુઓ તથા અનેક સાધ્વીજી ભગવંતો હતા.

વિ.સં. ૧૧૭૮ કા.વ.૫ પાટણ મુકામે તેઓ લગભગ ૧૦૦ વર્ષની વયે સ્વર્ગવાસી બન્યા ત્યારે તેમના શિષ્ય વાદિદેવસૂરિજી, આબુ પાસે અંબિકાદેવીની સૂચનાથી આઠ દિવસ અગાઉ હાજર થઈ ગયા હતા.

ગુરુવિરહથી હતપ્રભ બનેલાં ચોધાર આંસુએ રડતા આચાર્યશ્રી વાદિદેવસૂરિજીએ તે વખતે ગુરુવિરહવિલાપ, મુણિચંદસૂરિથુઈ વગેરે ગુરુ પ્રત્યે પોતાનો સમપર્ણભાવ વ્યક્ત કરતા ગ્રન્થો રચ્યાં હતાં.

આચાર્યશ્રી વાદિદેવસૂરિજીએ દિગંબરવાદી કુમુદચન્દ્ર સહિત અનેક વાદીઓને જીતીને ગુરુનું નામ ઊજળું કર્યું હતું અને શાસનનું ગૌરવ વધાર્યું હતું.

વિ.સં. ૧૧૭૬માં 'પિંડ વિસોહી'ની 'સુબોધા' નામની ટીકામાં આચાર્યશ્રી યશોદેવસૂરિજીએ આચાર્યશ્રી મુનિચન્દ્રસૂરિજીએ 'શ્રુત-હેમ-નિકષ' કહ્યાં છે. એટલે કે તે યુગમાં આચાર્યશ્રી મુનિચન્દ્રસૂરિજી શ્રુતની બાબતમાં સંઘમાં સીમાસ્તંભરૂપ હતા. તે સમયનો સમગ્ર સંઘ આચાર્યશ્રી મુનિચન્દ્રસૂરિજીથી પ્રભાવિત હતો અને શાસન - પ્રભાવનાના કાર્યો તેમની નિશ્રામાં કરતો હતો.

વિ.સં. ૧૨૯૪માં મહેન્દ્રજીએ રચેલા 'શતપદી' નામના ગ્રન્થમાં કહ્યું છે કે આચાર્યશ્રી મુનિચન્દ્રસૂરિજી સાધુ નિમિત્તે બનાવેલી વસતિમાં રહેતા નહોતા. તેઓ વડગચ્છના હતા. તેઓ પોતાને ચૈત્યવાસીઓમાંથી નીકળેલા નહિ, પરંતુ પહેલેથી જ વસતિવાસી માનતા હતા. કેમ કે દેરાસર, પ્રતિમા, પોષાળ અને જૈનવંશો તો ચૈત્યવાસી પરંપરાના હતા.

આચાર્યશ્રી વિનયચન્દ્રે 'મલ્લિનાથ ચરિત્રની પ્રશસ્તિમાં આચાર્યશ્રી મુનિચન્દ્રસૂરિજીને 'સૈદ્ધાન્તિક' તરીકે નવાજ્યા છે. તથા વિ.સં. ૧૩૮૪માં રચાયેલા 'કલાવીચરિયં'માં પણ આચાર્યશ્રીને 'સૈદ્ધાન્તિક' કહ્યા છે.

ગુર્વાવલીમાં આચાર્યશ્રી મુનિસુંદરસૂરિજીએ

**"श्रीमुनिचन्द्रमुनिन्दो ददातु भद्राणि संघाय"**

(ગુર્વાવલી શ્લોક - ૭૨) એમ કહીને શ્રી મુનિચન્દ્રસૂરિજીની સ્તુતિ કરી છે.

બૃહદ્ગચ્છ પટ્ટે ગુર્વાવલીમાં શ્રીપાલ નામના મુનિએ કહ્યું છે : 'યશોભદ્રસુરિજી અને નેમિચન્દ્રસૂરિજીની માટે મુનિચન્દ્રસૂરિજી થયા. તેમનું બીજું નામ ચન્દ્રસૂરિજી પણ જાણવા મળે છે. તેમનું નામ જ શાન્તિક મંત્ર મનાય છે."

પૂજ્ય આચાર્યશ્રીએ રચેલા ગ્રન્થો :

પૂ.આ. શ્રી મુનિચન્દ્રસૂરિજીએ ઘણા ગ્રન્થો રચેલા છે, તેમાંથી કેટલાકના નામ આ પ્રમાણે જાણવા મળે છે :

(૧) પ્રાભાતિક સ્તુતિ શ્લોક - ૯
(૨) અંગુલસત્તરિ સ્વોપજ્ઞ વૃત્તિ સહિત શ્લોક - ૭૦
(૩) વણસ્સઇ સત્તરિ શ્લોક - ૭૦
(૪) આવસ્સય સત્તરિ શ્લોક - ૭૦
(૫) ઉવએસ પંચાસિયા શ્લોક - ૫૦

(૬) મોક્ષોપદેશ પંચાશક શ્લોક - ૫૧
(૭) ઉવએસ પંચવીસિયા શ્લોક - ૨૫
(૮) હિયોવએસ શ્લોક - ૨૫
(૯) વિસયનિંદાકુલયં શ્લોક - ૨૫
(૧૦) સામણ્ણ ગુણોવએસ શ્લોક - ૨૫
(૧૧) અણુસાસણંકુસં શ્લોક - ૨૫
(૧૨) ઉવએસામંય (પહેલું કુલક) - શ્લોક - ૩૨
(૧૩) ઉવએસામંય (બીજું કુલક) શ્લોક - ૩૨
(૧૪) સોગહરોવએસ શ્લોક - ૩૩
(૧૫) રયણત્તય કુલયં
(૧૬) બારસવયં શ્લોક - ૯૪ (બારસવય સંખેવો)
(૧૭) કાલસયગં શ્લોક - ૧૦૦
(૧૮) તિત્થમાભાથંય શ્લોક - ૧૧૨
(૧૯) પર્યુષણા પર્વ વિચાર શ્લોક - ૧૨૫
(૨૦) ગાહાકોસો શ્લોક - ૩૦૪
(૨૧) પ્રશ્નાવલી
(૨૨) સમ્મત્તુપાય વિહિ શ્લોક - ૨૯
(૨૩) સુહુમત્થવિયારલવ શ્લોક - ૧૫૦ (અપ્રાપ્ય)
(૨૪) હરિભદ્રસૂરિકૃત ઉપદેશ પદ પર ટીકા શ્લોક - ૧૪૦૦૦ (આ ટીકા નાગોરમાં શરૂ કરી અને પાટણમાં વિ.સં. ૧૧૭૧માં પૂર્ણ કરી. આમાં તેઓશ્રીના શિષ્ય વાદિદેવસૂરિજીએ સહાયતા કરી હતી.)
(૨૫) કર્મપ્રકૃતિ ટિપ્પન શ્લોક - ૧૯૫૦
(૨૬) હરિભદ્રકૃત ધર્મબિંદુ પર ટીકા શ્લોક - ૩૦૦૦
(૨૭) હરિભદ્રસૂરિકૃત લલિતવિસ્તરા પર પંજિકા શ્લોક - ૧૮૦૦
(૨૮) હરિભદ્રસૂરિકૃત અનેકાન્તજય પતાકા પર દીપિકા
(૨૯) દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ પર વૃત્તિ (વિ.સં. ૧૧૬૮)
(૩૦) શંખેશ્વર પાર્શ્વનાથ સ્તવન શ્લોક - ૧૦
(૩૧) કલિકુંડ પાર્શ્વનાથ સ્તવન શ્લોક - ૧૦
(૩૨) મંડલ વિચાર શતક.

**પૂ. આચાર્યશ્રીના જીવનને દર્શાવતા ગ્રન્થો :**

પ્રભાવક ચરિત્ર, પ્રબંધ ચિંતામણિ, પ્રબંધકોશ, શાન્તિનાથ મહાકાવ્ય પ્રશસ્તિ, કલાવઈ ચરિત્ર પ્રશસ્તિ, બૃહદ્ગચ્છ ગુર્વાવલી, ગુરુવિરહ વિલાપ, મુણિચંદસૂરિથુઇ, ગચ્છાચાર પયન્નાની વિજયવિમલી વૃત્તિની પ્રશસ્તિ, ગુર્વાવલી, તપાગચ્છ - પટ્ટાવળી વગેરે.

આવા મહાન આચાર્યશ્રી મુનિચન્દ્રસૂરિજીના ચરણોમાં આપણે શત-શત વંદન કરીએ.

॥ શ્રી ચિંતામણી પાર્શ્વનાથાય નમઃ ॥

જ્ઞાનદ્રવ્યનો કર્યો સદુપયોગ,
જીવનમાં વધારો જ્ઞાન યોગ ।

જ્ઞાનદ્રવ્યનું તમોએ કીધું દાન,
ઉપકાર માનીયે તમારો મહાન ॥

**પૂ. કર્ણાટકકેશરી આ. ભદ્રંકરસૂરીશ્વરજી મ.સા.** ના શિષ્ય - પ્રશિષ્ય
પૂ. સરલ સ્વભાવી, જિનભક્તિરસિક **આચાર્યશ્રી અરૂણપ્રભસૂરીશ્વરજી મ.સા.**
તથા નવોદિતપ્રવચનકાર **પૂ. મુનિવર્ય મહાસેનવિજય મ.સા.** ના
વિ. સં. ૨૦૪૭ ના ચાતુર્માસની પુણ્ય સ્મૃતિમાં ......

## ૧૧૦૦૦ - ૦૦ રૂા.

# શ્રી ચિંતામણી પાર્શ્વનાથ જૈન શ્વે. સંઘ.

આરે રોડ, ગોરેગામ (વેસ્ટ),
મુંબઈ - ૪૦૦ ૦૬૨.

॥ શ્રી શાંતિનાથાય નમઃ ॥

જ્ઞાનદ્રવ્યનો કર્યો સદુપયોગ,
જીવનમાં વધારો જ્ઞાન યોગ ।

જ્ઞાનદ્રવ્યનું તમોએ કીધું દાન,
ઉપકાર માનીયે તમારો મહાન ॥

પૂ. ધર્મદિવાકર આચાર્યદેવેશ **શ્રીમદ્ વિજય ભુવનતિલકસૂરીશ્વરજી મ.સા.**ના શિષ્યરત્ન પૂ. તપસ્વી **આચાર્યશ્રી અશોકરત્નસૂરીશ્વરજી મ.સા.** તથા. પૂ. પ્રવચનકાર **આચાર્યશ્રી અભયરત્નસૂરિશ્વરજી મ.સા.** ઠાણા - ૫ ના વિ.સં. ૨૦૪૭ ના ચાતુર્માસની સ્મૃત્યર્થે .....

## ૧૧૦૦૦ - ૦૦ રૂા.

# શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ

૧૮ / ૧૮૩ નેહરુ રોડ,
કર્નુલ - (આંધ્રપ્રદેશ) ૫૧૮૦૦૧



— ॐ नमः सर्वज्ञाय —

— श्री शंखेश्वर-पार्श्वनाथाय नमः —

— श्री संभवनाथाय नमः —

याकिनीमहत्तरासूनु-सूरिपुरंदर-परमसत्यप्रियेभ्यः
१४४४ ग्रंथानां रचयितृभ्यः परमपूज्य-आचार्य श्री
हरिभद्रसूरिवरेभ्यो नमः

आत्मकमललब्धिभुवनतिलकसूरीश्वरेभ्यो नमः

श्रीमन्मुनिचन्द्रसूरिविरचितपञ्जिकायुता
श्री हरिभद्रसूरिपुरन्दरवृब्धा, श्रीमद्विजय—भद्रंकर-
सूरिकृत—भद्रंकरी-टीका-सहिता—:

# ललितविस्तराख्या चैत्यस्तववृत्तिः

**सूत्रकार-मंगलाचरणम् —:**

प्रणम्य भुवनालोकं, महावीरं जिनोत्तमम् ।
चैत्यवन्दनसूत्रस्य, व्याख्येयमभिधीयते ॥१॥
अनन्तगमपर्याय, सर्वमेव जिनागमे ।
सूत्रं यतोऽस्य कार्त्स्न्येन, व्याख्यां कः कर्त्तुमीश्वरः ॥२॥
यावत्तथापि विज्ञातमर्थजातं मया गुरोः ।
सकाशादल्पमतिना, तावदेव ब्रवीम्यहम् ॥३॥
ये सत्त्वाः कर्म्मवशतो, मत्तोऽपि जडबुद्धयः ।
तेषां हिताय गदतः, सफलो मे परिश्रमः ॥४॥

(इति)

**पञ्जिकाकार-मंगलाचरणम् –:**

नत्वाऽनुयोगवृद्धेभ्यश्चैत्यवन्दनगोचराम् ।
व्याख्याम्यहं क्वचित्किञ्चिद्वृत्तिं ललितविस्तराम् ॥१॥
यां बुद्ध्वा किल सिद्धसाधुरखिलव्याख्यातृचूडामणिः,
सम्बुद्धः सुगतप्रणीतसमयाभ्यासाच्चलच्चेतनः ।
यत्कर्त्तुः स्वकृतौ पुनर्गुरुतया चक्रे नमस्यामसौ,
को ह्येनां विवृणोतु? नाम विवृतिं स्मृत्यै तथाऽप्यात्मनः ॥२॥
शास्त्रान्तरदर्शनतः, स्वयमप्यूहाद्गुरूपदेशाच्च ।
क्रियते मयैष दुर्गमकतिपयपदपञ्जिकारम्भः ॥३॥
(युग्मम्)

तत्राचार्यः शिष्टसमाचारतया विघ्नोपशमकतया च मङ्गलं, प्रेक्षावत्प्रवृत्त्यर्थमभिधेयं सप्रसङ्गं, प्रयोजनं, सामर्थ्यगम्यं सम्बन्धं च वक्तुकाम आह–

**पञ्जिका –:** तत्र 'प्रणम्य' प्रकर्षेण नत्वा 'भुवनालोकं' भुवनं-जगत्, आ–इति विशेषसामान्यरूप-विषयभेदसामस्त्येन लोकते केवलज्ञानदर्शनाभ्यां बुध्यते यः स तथा तं, कमेवंविधमित्याह 'महावीरं' अपश्चिमतीर्थपतिं 'जिनोत्तमं' अवध्यादि-जिनप्रधानं 'चैत्यवन्दनसूत्रस्य' प्रतीतस्य 'व्याख्या' विवरणम् 'इयं' अनन्तरमेव वक्ष्यमाणा 'अभिधीयते' प्रोच्यत इति ॥१॥ सम्प्रत्याचार्यः प्रतिज्ञात-व्याख्याकृत्स्नपक्षाक्षमत्वमात्मन्याविष्कुर्वन्नाह–

अनन्ता– अनन्तनामकसंख्याविशेषानुगता गमा-अर्थमार्गाः पर्यायाश्चोदात्तादयोऽनुवृत्तिरूपाः पर-रूपाभवनस्वभावाश्च व्यावृत्तिरूपा यत्र तत्तथा, 'सर्वमेव' अंगगतादि निरवशेषं 'जिनागमे' अर्हच्छासने 'सूत्रं' शब्दसन्दर्भरूपं 'यतो' यस्माद्धेतोस्तत इति गम्यते 'अस्य' सूत्रस्य 'कात्स्न्र्येन' सामस्त्येन 'व्याख्यां' विवरणं 'कः' कर्तुं' विधातुम् 'ईश्वरः' समर्थः ? अयं हि किंशब्दोऽस्ति क्षेपे, स किं सखा ? योऽभिद्रुह्यति, अस्ति प्रश्ने, किं ते प्रियं करोमि, अस्ति निवारणे, किं ते रुदितेन, अस्त्यपलापे, किं ते धारयामि, अस्त्यनुनये, किं ते अहं करोमि, अस्त्यवज्ञाने, कस्त्वामुल्लापयते, इह त्वपलापे, नास्त्यसौ यः सूत्रस्य कात्स्न्र्येन–व्याख्यां कर्त्तुं समर्थ इत्यभिप्रायोऽन्यत्र चतुर्दशपूर्व-धरेभ्यो, यथोक्त–'शक्नोति कर्त्तुं श्रुतकेवलिभ्यो, न व्यासतोऽन्यो हि कदाचनापी' ति, जिनागमसूत्रान्तर्गतं च चैत्यवंदनसूत्रमतोऽशक्यं कृत्स्नव्याख्यानमिति ॥२॥ इत्थं कृत्स्नव्याख्यापक्षा-शक्ताावितरपक्षाश्रयणमपि सफलतया वक्तुकामः श्लोकद्वयमाह –:

'यावत्' यत्परिमाणं 'तथापि' कृत्स्नव्याख्यानाशक्तिलक्षणो यः प्रकारस्तस्मिन् सत्यपि, 'विज्ञातं' अवबुद्धम्, 'अर्थजातम्' अभिधेयप्रकारस्तत्समूहो वा, प्रक्रमाच्चैत्यवंदनसूत्रस्य 'मया' इत्यात्मनो निर्देशे 'गुरोः–व्याख्यातुः 'सकाशात्' संनिधिमाश्रित्य, कीदृशेनेत्याह–अल्पमतिना' अल्पा तुच्छा गुरुमत्यपेक्षया मतिः–बुद्धिर्यस्य स तथा तेन 'तावदेव' विज्ञातप्रमाणमेव, अविज्ञातस्य वक्तुमशक्यत्वात्, 'ब्रवीमि' वच्मि 'अहं कर्त्तेति । अल्पमतिनेत्यनेन चेदमाह–कदाचिदधिकधीर्गुरोः शृण्वंस्ततोऽधिकमपीदमवैति–ध्यामलादपि दीपात्तु, निर्म्मलः स्यात्स्वहेतुत' इत्युदाहरणात् तत्सम-धीश्च तत्समं, अहं त्वल्पमतित्वाद्गुरुनिरूपितादपि हीनमेवार्थजातं विज्ञातवानिति, तदेव-ब्रवीमि ॥३॥ 'ये' इति अनिरूपितनामजात्यादिभेदाः 'सत्त्वाः' प्राणिनः कर्म्मवशतो' ज्ञानावरणा-द्यदृष्टपारतन्त्र्यात् 'मत्तोऽपि' मत्सकाशादपि, नान्यः प्रायो मत्तो जड़बुद्धिरस्तीति सम्भावनार्थोऽपि-शब्दः 'जडबुद्धयः' स्थूलबुद्धयो, विचित्रफलं हि कर्म्म, ततः किं न सम्भवतीति, 'तेषां' जडबुद्धीनां 'हिताय' पथ्याय 'गदतो' विवृण्वतः 'सफलो' बोधलक्षणतदुपकारफलवान्, अधिकसदृशबुद्धिकयोस्तु प्रमोदमाध्यस्थ्यगोचरतयाऽतोऽनुपकारात् 'मे' मम 'परिश्रमो' व्याख्यानरूपः । इह चेष्टदेवतानमस्कारो मङ्गलं, चैत्यवन्दनार्थोऽभिधेयः, तस्यैव व्याख्यायमानत्वात्, कर्तुस्तथाविधसत्त्वानुग्रहोऽनन्तरं प्रयोजनं, श्रोतुश्च तदर्थाधिगमः परम्परं तु द्वयोरपि निःश्रेयसलाभः, अभिधानाभिधेयलक्षणो व्याख्यानव्याख्येयलक्षणश्च सम्बन्धो बोद्धव्यः, इति मङ्गलादिनिरूपणसमाप्त्यर्थः ॥४॥,

**टीकाकार-मंगलाचरणम् –:**

**श्रीवर्धमानं प्रभुवर्धमानं, वन्दे समेन्द्रैः कृतकीर्तिगानं,**
**श्रीवर्तमानं परमेष्ठिताद्यैः, तम्मे–विनेशं चरमं जिनेशम् ॥१॥**
**श्री गौतमं लब्धिनिधिं गणेशं, सुधर्माभिधानं च तथा जनेशम् ।**
**सूरीन् समस्ताननुयोगिनश्च, श्री जैनधर्मस्य महत्त्वकारान् ॥२॥**
**तत्कालीनसमस्तवेदगतचिद्,–वेदान्तपारङ्गतः,**
**जात्या ब्राह्मणवर्य-शौर्यभरितः, सत्यप्रियः सज्जनः ।**
**नव्यज्ञानरसेन जैनगणिनीश्रीयाकिनी–मातृतः,**
**जीयाच्छ्रीहरिभद्रसूरिसविता सद्दर्शनं प्राप्तवान् ॥३॥**
**हीरगुरुर्वंशामयः, श्रीमदकब्बरं यवनसम्राजं ।**
**चकाराऽहिंसामयं, सूरिसम्राट् जयति भारते ॥४॥**
**लघुहरिभद्रबिरुदो, नव्यन्यायान्नवं युगं ससर्ज ।**
**सर्वत्र जैनतत्त्वेषु, जयति वाचकयशोविजयः ॥५॥**

सुधर्मपारम्पर्येण, त्रिसंख्याधिकसप्ततितमे पट्टे ।
पञ्जाबोद्धारकरा, विजयानन्दसूरयोऽभवन् ॥६॥
तत्पट्टभूषणवरा, विजयकमलसूरिप्रवरा जाताः ।
तत्पट्टाम्बररवयः, कवयो लब्धिसूरयोऽभवन् ॥७॥
तत्पट्टाब्जे हंसा, विजयभुवनतिलकसूरयो जाताः ।
तच्छिष्यसूरिणेयं, भद्रङ्करेण टीका कृता ॥८॥

टीका –"चैत्यवन्दनसूत्रस्य व्याख्येयमभिधीयते"=जैनशासने सर्वदा सकलसङ्घेन क्रियमाणत्वेन प्रतीतस्य चैत्यवंदनसूत्रस्य व्याख्या=अर्थविशेषरूपं विवरणं, इयं–अनन्तरमेव वक्ष्यमाणस्वरूपा, अभिधीयते–प्रोच्यते (अत्रेदं बोध्यम्-अस्या व्याख्याता कीदृशो निःस्पृहः यत् 'मया–अस्माभिः–हरिभद्रेणेत्यादि–शब्दालेखनशक्तिसत्त्वेऽपि 'का नाम निःस्पृहतेति' प्रश्नेऽत्र पश्यतु लोकः, निःस्पृह शिरोमणि श्री हरिभद्रसूरे निःस्पृहतायाः सिद्धान्तरूपादर्शं गृह्णातु) किं कृत्वाऽभिधीयते ? इत्याह 'प्रणम्ये' ति–प्रकर्षेण नत्वा, कं प्रणम्य ? इत्याह 'महावीरं' महत्त्वाऽवच्छिन्न–वीरता–विशिष्टं–विशेषणपक्षे, अन्तरङ्गारिजयेन सर्वजनगतोपद्रवादि–निवारकत्वेन दानशीलतपोभावादिसमग्रधर्म-वीरत्वेनापायापगमातिशयो द्योतितः, विशेष्यपक्षे-चरमतीर्थपतिं महावीरनामानं ज्ञातनन्दनमिति. पुनः कीदृशं तं ? इत्याह 'भुवनालोकं' विशेषसामान्याऽवच्छिन्नसकलप्रमेयमात्रं केवलज्ञानदर्शनाभ्यां जानन्तं पश्यन्तं (भुवनप्रकाशकारकं भुवनदर्शनीयं) सर्वज्ञं सर्वदर्शिनं महावीरं (अनेन विशेषणेन महावीरस्य परमात्मनो ज्ञानातिशयो दर्शितः) पु० की. महावीरं ? इत्याह 'जिनोत्तमं' जिनेषु–केवलिषूत्तमं प्रधानं तीर्थंकरत्वेन सातिशयत्वेन, (अनेन विशेषणेन पूजातिशयवचनातिशयौ दर्शितौ इति ॥१॥

कृत्स्नत्वेनाकृत्स्नत्वेन व्याख्याविभागो भवति, तन्मध्यात् कार्त्स्न्येन व्याख्याविधानेऽशक्तत्वमावि-ष्करोति व्याख्यानाऽऽचार्यः, शब्दसन्दर्भरूपसूत्रगताः, ये अनन्ताः–अनन्तनामकसङ्ख्याविशेषमिताः गमाः=अर्थज्ञानाय पद्धतिविशेषाः, पर्यायाः–परिवर्त्तन–शीलत्वेन उदात्तादयः शब्दभेदाः, अनुवृत्ति-रूपाः स्वपर्यायाः श्रुतानुसारिज्ञानत्वेन, निर्विभाज्यांशापेक्षया अनन्ताः, पररूपाभवनस्वभावाः व्यावृत्तिरूपा परपर्याया अनन्ताः, ते सन्ति विद्यन्तेऽर्थात् जिनागमे सर्वं सूत्रं पूर्वोक्तस्वरूपवदेव, यतोऽस्य सूत्रस्य सामस्त्येन व्याख्यां कर्त्तुं क ईश्वरः–सामर्थ्यवान् ? अर्थाच्चतुर्दशपूर्वधरान् वर्जयित्वा न कोऽपि समर्थः, जिनागमसूत्रान्तर्गतं चैत्यवन्दनसूत्रमतोऽशक्यं सामस्त्येन तस्य व्याख्यानमिति ॥२॥

शास्त्रकारो हरिभद्रसूरिः स्वाशक्यां सामस्त्येन व्याख्यां विमुच्येतरपक्षमाश्रयते श्लोकद्वयकथनद्वारा–

तथापि–सामस्त्येन व्याख्यानविषयकसामर्थ्याभावे सत्यपि, अल्पमतिना (गुरुमत्यपेक्षया) मया चैत्यवन्दनसूत्रस्य यावदर्थजातं गुरोः सकाशात् (सन्निधिमाश्रित्य) विज्ञातं तावदेव–विज्ञातप्रमाणमेव (अविज्ञातस्य वक्तुमशक्यत्वात्) ब्रवीमि अहं–कर्त्ता वच्मीति,

अल्पमतिनेत्यत्रेदं बोध्यं = गुरोः सकाशात् केचिदधिकबुद्धयः, दीपादिवत् केचिद् समानबुद्धयः केचिदल्पबुद्धयः इति बुद्धिवैभवभेदापेक्षया त्रयो भेदाः सन्ति, तत्र वज्रस्वाम्यादिवद् गुरोः शृण्वन्तोऽधिकबुद्धिबलिनः, (समल) ध्यामलदीपात्–परहेतुजन्यदीपात्, स्वहेतुजन्य–विशिष्टक्षयोपशमरूपहेतु-जन्यमण्यादिदीपवत् सदा ज्वलद्दीपवन्निर्मलाः, केचिद्गुरुबुद्धिसमानबुद्धिशालिनः, अहन्तु अल्पमतित्वाद् गुरुनिरूपितादपि हीनमेवार्थजातं विज्ञातवानिति, तदेव ब्रवीमि ॥३॥

ये सत्त्वाः–संसारिणो जीवा जैनशासनाऽभिप्रेतकर्मणां-ज्ञानावरणादिकपौद्गलिकादृष्टानां पारवश्येन, मत्तोऽपि-मत्सकाशादपि (अहमिति व्यक्तिविशेषतोऽपि,) जडबुद्धयः-स्थूलबुद्धयः सन्ति तेषां-जडबुद्धीनां हिताय–बोधरूपो भावोपकारो भवतु इति अनुग्रहाय कथयतः–विवरणं कुर्वतो मे, अधिकसदृशबुद्धिकयोऽस्तु प्रमोदमाध्यस्थ्यविषयतया अनुपकारात् मे–मम परिश्रमो–व्याख्यानरूपः सफलः–बोधरूपोपकारफलवान् अत्रानन्तर–प्रयोजनं–साक्षात्प्रयोजनं–फलं दर्शितम् ग्रन्थकारस्य सत्त्वोपयुपकाररूपं, श्रोतुरर्थज्ञानप्राप्ति वर्त्तते इतिः अत्रेदं अनुबन्धचतुष्टयं विज्ञेयम्,

(१) महावीरप्रभोः प्रणामरूपं मङगलं ।

(२) चैत्यवन्दनसूत्राणामर्था विषयरूपेणाभिधेयाः ।

(३) सत्त्वहितं प्रयोजनं ।

(४) सूत्रार्थयोः प्रतिपाद्यप्रतिपादकसम्बन्धो ज्ञेयः यतोऽत्र प्रेक्षावन्तः प्रवर्त्तन्ते एवेति ।

॥४॥

卐

**अत्राह–चिन्त्यमत्र साफल्यं चैत्यवन्दनस्यैव निष्फलत्वात् इति, अत्रोच्यते....**

**पंजिका** –'अत्र' मंगलादिनिरूपणायां सत्यां 'आह' प्रेरयति, 'चिन्त्यं' नास्तीत्यभिप्रायः, 'अत्र' चैत्यवंदनव्याख्यानपरिश्रमे, 'साफल्यं' सफलभावः, कुतः इत्याह–'चैत्यवंदनस्यैव' 'निष्फलत्वात्' अत्रैवशब्दोऽप्यर्थे, ततः पुरुषोपयोगिफलानुपलब्धेश्चैत्यवंदनमपि निष्फलमेव, किं पुनस्तद्विषयतया व्याख्यानपरिश्रमः ? ततो यन्निष्फलं तन्नारम्भणीयं, यथा कण्टकशाखामर्द्दनं, तथा च चैत्यवन्दनव्याख्यानमिति व्यापकानुपलब्धिः 'इतिः' परवक्तव्यतासमाप्त्यर्थः । अत्र 'उच्यते' प्रतिविधीयते ॥

**टीका**....(**पूर्वपक्षः**)...मंगलाद्यनुबंधचतुष्टयनिरूपणे सति, चैत्यवंदन–व्याख्या–परिश्रमः (पक्षः)–साफल्याभाववान् (साफल्याभावः साध्यः) चैत्यवन्दनस्यैव निष्फलत्वात् (हेतुः) ततः पुरुषोपयोगि भोजनादि–दृश्यबाह्यफलानुपलब्धेश्चैत्यवंदनमपि निष्फलमेव, किम्पुनश्चैत्यवंदनविषयक–व्याख्यान परिश्रमः?, स तु सुतरां निष्फल एवेति, यन्निष्फलं तन्नारम्भणीयं यथा कण्टकशाखामर्दनम्, तथा च चैत्यवन्दनव्याख्यानमिति व्यापकानुपलब्धिः।

व्यापकानुपलब्धिहेतो घंटना = यथा अस्मिन् प्रदेशे पनसो नास्ति वृक्षादर्शनात्, अत्र पनस इति व्याप्यम्, वृक्षः, अविरुद्धव्यापकोऽस्ति, यदि व्यापकः स्यात्तदा व्याप्येन भाव्यम्, व्यापक–वृक्षाभावे व्याप्यपनसाभावः, अविरुद्धव्यापकवृक्षानुपलब्धिरत्र हेतुरस्ति सामान्याभावे विशेषाभावः, ततः पनसरूपं प्रतिषेध्यं सिद्धयति, तथैव चैत्यवंदन–व्याख्यान–परिश्रम–निष्ठसफलता नास्ति, चैत्यवन्दनस्य निष्फलत्वात्, चैत्यवंदन–निष्फलताहेतुः, व्यापकानुपलब्धि–रूपोऽस्ति तथाहि चैत्यवंदनव्याख्यापरिश्रम–सफलतेति व्याप्यम्, चैत्यवंदन–सफलतेति, अविरुद्धव्याप्यकमस्ति, यदि चैत्यवंदनसफलतारूप–व्यापकस्य सत्त्वे,

चैत्यवंदनव्याख्यानपरिश्रमसफलतारूपं व्याप्यं स्यात्, परन्तु चैत्यवंदनसफलतारूपव्यापका-नुपलब्धेः सत्त्वे, चैत्यवंदनव्याख्यानपरिश्रम–सफलतारूपव्याप्यानुपलब्धिः स्यात्, एवं प्रतिषेध्येन सहा विरुद्ध–व्यापकीभूत–चैत्यवंदन–सफलतानुपलब्धिरूपहेतुसत्त्वे चैत्यवंदन–व्याख्यानपरिश्रम–सफलता-रूपं प्रतिषेध्यं सिद्धयति.

(प्रमाणनयतत्त्वालोकालंकारे तृ. प. प्रतिषेध्येनाविरुद्धानां स्वभावव्यापकः......अनुपलब्धिरिति सू.–६५....)

**निष्फलत्वादित्यसिद्धं, प्रकृष्टशुभाध्यवसायनिबन्धनत्वेन ज्ञानावरणीयादिलक्षणकर्म्मक्षया-दिफलत्वाद्, उक्तं च –**

**"चैत्यवंदनतः सम्यग् शुभो भावः प्रजायते।**
**तस्मात्कर्म्मक्षयः सर्वं, ततः कल्याणमश्नुते ॥१॥ ॥इत्यादि॥"**

**पं.**......'निष्फलत्वादित्यसिद्ध' इतिः–हेतुस्वरूपमात्रोपदर्शनार्थः, ततो यन्निष्फलत्वं हेतुतयोपन्यस्तं, तद् असिद्ध - असिद्धयभिधानहेतुदोषदूषितं, कुत इत्याह 'प्रकृष्टेत्यादि' अयमत्र भावो–लोकोत्तरकुशलपरिणामहेतुश्चैत्यवन्दनं, स च परिणामो यथासम्भवं ज्ञानावरणीयादिस्वभावकर्म्मक्षयक्षयोपशमोपशमफलः, कर्मादानाध्यवसायविरुद्धत्वा-त्तस्य, ततः कृत्स्नकर्म्मक्षयलक्षणपरमपुरुषार्थमोक्षफलतया चैत्यवन्दनस्य निष्फलव्याख्येयार्थविषयतया तद्व्या-ख्यानस्यानारम्भाऽऽप्रसञ्जनमयुक्तमिति।

**टी......प्रतिविधानं, (उत्तरपक्षः).....**यन्निष्फलत्वं हेतुतयोपन्यस्तं तद् असिद्ध–असिद्धयभिधान हेतु दोष (हेत्वाभास) दूषितं, "यस्यान्यथाऽनुपपत्तिः प्रमाणेन न प्रतीयतेऽसौ (हेत्वाभासः) असिद्धः" (४८, प्र.न.त.आ.अ. परिच्छेदषष्ठः) "हेतुस्वरूपाप्रतीतिप्रयुक्ता प्रतीतव्याप्तिको हेतुरसिद्धः"

यथा शब्दोऽनित्यः (परिणामी) चाक्षुषत्वात्, अत्र चाक्षुषत्वरूपहेतुः, शब्दस्य स्वरूपं नास्ति परन्तु शब्दस्वरूपं श्रावणत्वमस्ति, चाक्षुषत्वहेतोरज्ञानात् व्याप्तेरप्रतीतेः, चाक्षुषत्वमसिद्धं तथाऽत्र निष्फलत्वरूपहेतुस्वरूपरूपमसिद्धमस्ति, यतश्चैत्यवन्दनस्य निष्फलत्वरूपं स्वरूपं नास्ति, परन्तु चैत्यवन्दनस्य सफलत्वंस्वरूपमस्ति, यत् पूर्वोक्तं निष्फलत्वादिति हेतुरसिद्धिनामकदोषेण दूषितोऽस्ति, (स्वरूपासिद्धो हेत्वाभासो यथा शब्दो गुणश्चाक्षुषत्वात् रूपवत्, अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्, स्वरूपासिद्धये दोषाय, अनित्यः शब्दश्चाक्षुषत्वात्, शब्द–धर्मिणि उपदिष्टं चाक्षुषत्वं न स्वरूपतोऽस्तीति स्वरूपासिद्धम्) तन्न, आगमेऽपि कथितं च–चैत्यवंदन-रूपप्रशस्तक्रियाद्वारा सम्यग्शुभभावः प्रकृष्टशुभाऽध्यावस्यायः प्रकर्षेण जायते, तस्मात् प्रकृष्टशुभाऽध्य-वसायतः कर्मक्षयः, ततः–कर्मक्षयतः सर्वं मोक्षपर्यन्तरूपं कल्याणं जीवः प्राप्नोत्येव। यतः चैत्यवंदनं सफलं, लोकोत्तरशुभपरिणामजनकत्वात्, जिनवन्दनवत्, यद्यद्, लोकोत्तरपरिणामजनकं तत् सफलं यथा जिनादिवन्दनम्, यद् यद्, न सफलं न तत्, लोकोत्तरपरिणामजनकं यथा कण्टकशाखामर्दनम्, अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकिलिङगम्, तथाचायं–सफलताव्याप्य–लोकोत्तरशुभ-परिणामजनकं यथा जिनादिवंदनम् तथा–सफलताव्याप्यलोकोत्तरपरिणामजनकं, इदं चैत्यवंदनम्, तस्मात्तथेति–सफलताव्याप्यलोकोत्तर–परिणामजनकत्वात्, चैत्यवंदनं सफलं, हेतोः साध्यधर्मिण्यु-पसंहरणमुपनयः, लोकोत्तरपरिणामजनकत्वं चैत्यवंदनेऽस्ति, 'साध्यधर्मस्य पुनर्निगमनम्' तस्मात्–लोकोत्तरपरिणामजनकत्वात्, चैत्यवंदनरूपे धर्मिणि (पक्षे) सफलत्वसाध्यमस्ति। स च परिणामो यथासंभवं-आभ्यन्तर-ज्ञानावरणीयादि-स्वभावकर्मक्षयक्षयोपशमोपशमफलः, कर्मग्रहणहेतुरूपाध्यवसा-यविरुद्धत्वात् तच्च चैत्यवंदनपरिणामस्य, ततो, अर्थात् चैत्यवंदनं लोकोत्तर-कुशलपरिणामजनन-द्वारा सकलकर्मक्षयजन्यमोक्षफलजनकं, अतश्चैत्यवंदनसफलताहेतुक–चैत्यवंदन–विषयकव्याख्यानस्य सफलत्वात्, सकलव्याख्येयार्थवत्तया च तच्चैत्यवन्दन–व्याख्यानस्य पुरुषोपयोगि–अदृश्याभ्यन्तर-फलकत्वात्, तद्व्याख्यानस्यारम्भोऽवश्यं कर्त्तव्यः यत आरम्भव्यापकं फलं, अतश्चैत्यवंदनव्याख्यान-परिश्रमः सफल इति.

**आह–नायमेकान्तो, यदुत–ततः शुभ एव भावो भवति, अनाभोगमातृस्थानादेर्विपर्ययस्यापि दर्शनादिति,**

**पं०**...'एकान्त' इति एकनिश्चयः, 'अनाभोगेत्यादि' अनाभोगः––सम्मूढचित्ततया व्यक्तोपयोगाभावो, दोषाच्छादकत्वात्सांसारि (क) जन्महेतुत्वाद्वा मातेव माता 'माया' तस्याः स्थानं विशेषो मातृस्थानं, आदिशब्दाच्चल-

चित्ततया प्रकृतस्थानवर्णार्थालम्बनोपयोगादन्योपयोगग्रहस्तस्माद् 'विपर्ययस्यापि' अशुभभावस्यापि, शुभभावस्तावत्ततो दृश्यत एवेति सूचकोऽपि शब्दः, दर्शनाद्' उपलम्भाद्,

**टी०...(पूर्वपक्षः)**–शुभेतरभावाऽजनकत्वे सति शुभभावजनकं चैत्यवंदनमिति मते चैत्यवंदनक्रियायां कस्यचित् चित्तसम्मोहजन्यस्पष्टोपयोगाभावः, दोषाच्छादकत्वेन सांसारिकजन्महेतुत्वेन मातेव माता (माया) तस्याः स्थानं–विशेषो मातृस्थानं, आदि शब्दाच्चित्तचञ्चलत्वेन प्रकृतस्थानवर्णार्थालम्बनोपयोगादन्योपयोगग्रहस्तस्माद् 'विपर्ययस्याऽपि' अशुभभावस्य (अपि शुभभावस्तावत्ततो दृश्यत एवेति सूचकोऽपिशब्दः,) 'दर्शनाद्' अनुभवात्–उपलम्भादिति । अर्थात् चैत्यवंदनरूपकारणसत्त्वे अनाभोगादिदोषेण लोकोत्तरशुभपरिणामरूप–कार्यानुत्पादरूपान्वयव्यभिचारेण चैत्यवंदनक्रिया, लोकोत्तरशुभपरिणामरूपकार्यं प्रति कारणमस्तीति कार्यकारणभावविनिश्चयः कथं ?

**अत्रोच्यते–सम्यक्करणे विपर्ययाभावात्,**

**पं०....**'अत्र' शुभभावानेकान्तप्रेरणायां 'उच्यते' नायमनेकान्त इत्युत्तरमभिधीयते, कथं ? 'सम्यक्करणे विपर्ययाभावात्' यत्र तु 'सम्यक्करणे विपर्ययाभाव' इतिपाठस्तत्र प्रथमैव हेतौ,

**टी०...(उत्तरपक्षः)**–हे वादिन् ! चैत्यवंदनस्याशुभभावकारणत्वं यथा वर्णितं तथा अशुभभावं प्रति चैत्यवंदनं कारणं नास्ति परंतु अनाभोगादि–दोषा एव कारणं, दोषैरेवाऽशुभो भावो जायते, यदि दोषरहितेन आगमोक्तविधिना चैत्यवंदनं क्रियेत तदा शुभ–भाव एव जायते नाऽन्यथा, अशुभभावं प्रति दोषसहितत्वेनाऽसम्यक् क्रियाऽस्ति, सम्यक् चैत्यवंदन–क्रियाकरणे सत्येव शुभ–भावो जायते, शुभभावरूपकार्यं प्रति सम्यक् चैत्यवंदनक्रियैव कारणं, सम्यक्करणेऽशुभभावोत्पत्तिरूपविपर्ययस्याऽभावे, शुभभावविषयक–व्यभिचारसाङ्कर्याद्यपि नास्ति, एकान्तेन शुभभाव एव जायते, अस्तु सम्यक्करणे शुभाध्यवसायभावेन विवक्षित–फलं चैत्यवंदनं, परमकिञ्चित्करं तद्व्याख्यानमित्याशङ्क्याह–

**तत्सम्पादनार्थमेव च नो व्याख्यारम्भप्रयास इति, न ह्यविदिततदर्थाः प्रायस्तत्सम्यक्करणे प्रभविष्णव इति ।**

**पं०...**'तत्सम्पादनेत्यादि' तत्सम्पादनार्थं चैत्यवंदनसम्यक्करणसम्पादनार्थं ।

**टी०...**चैत्यवंदनविधेः सम्यक्करणत्वसम्पादनोद्देश्यकास्मच्चैत्यवंदनसूत्रविषयकव्याख्या–रूप–प्रयत्न आरब्ध एव, अतः, संपादितचैत्यवंदन–सूत्रार्थज्ञाना ये पुरुषाः, ते चैत्यवंदनसूत्रार्थ–ज्ञान–सहकारेण चैत्यवंदन–क्रियां सम्यक्क्रियात्वे परिणमयितुं समर्था भवन्ति नान्ये, अन्यच्च चैत्यवंदनसूत्रार्थज्ञानं तच्चैत्यवंदनसूत्र–व्याख्याधीनं सा व्याख्या भव्येषु तदर्थज्ञान–सम्पादनद्वारा चैत्यवंदनक्रियां सम्यग्रूपां जनयितुं अनुगृह्णाति, परं, तदर्थं चैत्यवंदनसूत्रतद्व्याख्यारम्भो नाकिंचित्करोऽपितु सफलोऽस्ति ।

**आह–लब्ध्यादिनिमित्तं मातृस्थानतः सम्यक्करणेऽपि शुभभावानुपपत्तिरिति,**

**टी०...(पूर्वपक्षः)** सूत्रार्थज्ञानसहकृत–चैत्यवंदनक्रिया, सम्यग्रूपा भूत्वाऽवश्यं शुभभावजनिकेति यः सिद्धान्तो न्यस्तः स नो युक्तः, कथमिति चेत्, लब्ध्यादि–ऐहिकपारलौकिक–पौद्गलिकसुखकीर्त्यादिकमुद्दिश्य मायातोऽपि क्रियमाणा, सूत्रार्थज्ञानपूर्वक–चैत्यवंदनक्रिया, सम्यग्रूपा क्रिया तावद् भवतु परन्तु शुभभावजनिका न, यतः कारणसत्त्वेऽपि कार्याभावरूपान्वयव्यभिचारः पुनरस्ति. ततः शुभभावकार्यं प्रति सूत्रार्थज्ञानसहकृतचैत्यवंदनरूपसम्यक्क्रिया कारणमस्ति नवेति कारणताविषयकः संशयोऽपि प्रादुर्भवति यतो युष्मत्स्थापित–चैत्यवंदनसम्यक्क्रियायाः सत्त्वेऽपि शुभभावाभावः ।

**न, तस्य सम्यक्करणत्वासिद्धेः ।**

**टी०...(उत्तरपक्षः)**–लब्ध्यादिनिमित्तं मातृस्थानतः, तस्य–चैत्यवंदनस्य सत्यपि सम्यक्करणे सम्यक्करणत्वमसिद्धमेवार्थाद् भोजनयशःकीर्तिपूजाप्रतिष्ठादिलाभरूपलब्धि–आदिरूपैहिकलोकफलस्पृहा, स्वर्गादिपारलौकिकफलकामना, तथा मायादि–दोषाः, सूत्रार्थविषयकज्ञानसत्त्वेऽपि चैत्यवंदनक्रियायाः सम्यक्करणत्वं प्रति प्रतिबन्धकाः सन्ति कार्य-प्रयोजकीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम्, शुभभावरूपकार्यं प्रति ऐहिकपारलौकिकफलेच्छाया अभावः, प्रयोजकं (व्यवहितं) कारणमस्ति, तस्य प्रतियोगी यस्याभावः स प्रतियोगी भवतीति न्यायेन ऐहिकादिपौद्गलिकफलेच्छादिर्भवति, तत्र प्रतियोगित्वादैहिकादिफलेच्छामायादि–दोषाः प्रतिबन्धकाः, कार्यमात्रं प्रति प्रतिबन्धकाभावः प्रयोजककारणमस्ति, शुभभावरूपकार्यं प्रति सूत्रार्थज्ञानसहकृतप्रतिबन्धकाभावविशिष्टचैत्यवंदनरूपसम्यक्क्रिया, कारणमिति कार्यकारणभावे, अन्वयव्यभिचाराभावप्रयुक्तकारणताविषयकसंशयाभावः, अथ सम्यक्करणत्व–सिद्धये प्रतिबन्धकबलाभिभावुका उत्तेजकविशेषा उच्यन्ते तथाहीति.

**तथाहि–प्रायोऽधिकृतसूत्रोक्तेनैव विधिनोपयुक्तस्याऽऽशंसादोषरहितस्य सम्यग्दृष्टेर्यथोदितमत एव सम्यक्करणं, नान्यस्य,**

**पं०...**'प्रायोऽधिकृतसूत्रोक्तेनैव विधिनेति' अधिकृतसूत्रं–चैत्यवंदनसूत्रमेव, तत्र साक्षादनुक्तोऽपि तद्व्याख्यानोक्तो विधिस्तदुक्त इत्युपचर्यते, सूत्रार्थप्रपञ्चरूपत्वाद्व्याख्यानस्य, प्रायोग्रहणान्मार्गानुसारितीव्रक्षयोपशमवतः कस्यचिदन्यथापि स्यात्,

**टी०...**अत्र प्रायोग्रहणान्मार्गाऽनुसारितीव्रक्षयोपशमवतः कस्यचिदन्यथाऽपि स्यात्-सूत्रोक्तविधेरज्ञानेऽपि शुभभावोत्पत्तिः स्यात्, 'अधिकृत–सूत्रं' चैत्यवन्दनसूत्रमेव तत्र साक्षादनुक्तोऽपि तद्व्याख्यानोक्तो विधिस्तदुक्त इत्युपचर्यते, सूत्रगर्भगतार्थविस्ताररूपत्वाद् व्याख्यानस्य,

(१) 'अधिकृतसूत्रोक्तेनैव विधिना' (सहितस्य) आगमादिनिमित्तजन्य-नैमित्तिकस्यान्योपायाभावः, अधिकृतसूत्रोक्तगत एवकारार्थः, अत्र प्रथमविशेषणद्वारा क्रियागतदोषचतुष्टयमध्यतो दोषद्वयस्य परिहारस्तथावचोऽनुष्ठानस्य प्रतिपत्तिर्भवति. शास्त्रविहितक्रियाक्रमतो वैपरीत्येन भवन्ती क्रिया, अविधिदोषदुष्टा भवति, तथा शास्त्रेण देशकालभावोचिता प्रवृत्तिर्यथा कथिता, तामुल्लङ्घ्य या क्रिया क्रियते साऽतिप्रवृत्तिनामकदोषदुष्टा भवति, अत्र क्रियादोषद्वयस्य परिहारो भवति तथा यथाशास्त्रविधानं सर्वत्रोचितप्रवृत्तिकरणरूपवचनाऽनुष्ठानं प्रतिपद्यते इति ।

(२) उपयुक्तस्येति द्वितीयविशेषणेन सूत्रार्थज्ञानसहितमनुष्ठानं सदनुष्ठानं भवितुमर्हति. क्रियागतशून्यदोष (क्रियागतोपयोगाभावरूप) स्य तथा अननुष्ठानरूपासदनुष्ठानस्य परिहारपूर्वकं तद्धेतु-अमृतक्रिययोर्लाभः प्राप्यते ।

(३) आशंसादोषरहितस्येति (प्रतिबन्धकाभावस्येति) विषयादिपौद्गलिकपदार्थवाञ्छारूपदोषरहितं अनुष्ठानं सदनुष्ठानं भवति, अनेन तृतीयविशेषणेन विषानुष्ठानस्य = ऐहिक-भोगफल-विषयककामनापूर्वकमनुष्ठानस्य, गरानुष्ठानस्य (पारलौकिक पौद्गलिक-सुखफल-विषयककामनापूर्वकानुष्ठानस्य) विषगरानुष्ठानरूपहेयानुष्ठानस्य तथा दग्धदोषस्य-पौद्गलिकभोगसुखकामनया सत्क्रियाफलं भस्मसात् कुर्वतः क्रियादोषस्य, परिहारो भवति ।

(४) सम्यग्दृष्टेरिति सम्यग्दृष्टिसम्पन्नस्यैव सम्यक्क्रिया भवति न मिथ्यादृष्टेः, यतः कर्मक्षयफलमुद्दिश्य सम्यग्दृष्टिना क्रियते ।

(५) भक्तिमत इति भक्तिमतः सम्यक् करणं भवति, भाववंदनकारणभूतसूत्राद्यालम्बनविषयक-भक्तिबहुमानवतः-भक्तिमत इति, एतद्विशेषणपञ्चकाभाववतः सम्यक्करणं न भवति ।

**अनधिकारित्वाद्, अनधिकारिणः सर्वत्रैव कृत्ये सम्यक्करणाभावात्, श्रावणेऽपि तर्ह्यस्याधिकारिणो मृग्याः ? को वा किमाह ? एवमेवैतत्, न केवलं श्रावणे, किं तर्हि ? पाठेऽपि, अनधिकारिप्रयोगे प्रत्युतानर्थसम्भवात्, 'अहितं पथ्यमप्यातुरे' इति वचनप्रामाण्यात्, तथा 'अर्थी समर्थः शास्त्रेणापर्युदस्तो धर्मेऽधिक्रियते' इति विद्वत्प्रवादः, धर्मश्चैतत्पाठादिः, कारणे कार्योपचारात्, यद्येवमुच्यतां के पुनरस्याधिकारिण इति, उच्यते ॥**

पं०....'अर्थीत्यादि' अर्थी-धर्म्माधिकारी, प्रस्तावात्तदभिलाषातिरेकवान्, समर्थो-निरपेक्षतया धर्म्ममनुतिष्ठन् कुतोऽपि तदनभिज्ञाद् बिभेति, शास्त्रेण-आगमेन 'अपर्युदस्तः' अप्रतिक्रुष्टः ।

टी०... एतद्विशेषणपञ्चकाभाववतः सम्यक्करणं न भवति यतोऽधिकारित्वाभावोऽस्ति, सर्वत्रैव क्रियातत्सूत्रव्याख्याश्रावणपाठादिषु कृत्ये-कर्त्तव्ये अनधिकारिणः-अधिकारशून्यस्य सम्यक्करणाभावः, श्रावणेऽपि तर्हि अस्य चैत्यवंदनसूत्रव्याख्याधिकारिणो मृग्याः-शोधनविषयाः कार्याः,

तत्र का शङ्का ? निःशङ्कत्वमेव, समञ्जसमेव न केवलं श्रावणे, किं तर्हि ? पाठेऽपि, अधिकारिणो गवेषणीयाः प्रत्युत–अन्यथा = अनधिकारिणां श्रावणपाठादितः, अनर्थस्य सम्भवोऽस्ति, कर्मक्षयादिरूपार्थहेतुत्वे–अवज्ञाऽदिनाऽनर्थभावोऽस्ति ।

'अहितं पथ्यमप्यातुरे' इति वचनप्रामाण्याद्–विशिष्टरोगसम्पन्नातुरं प्रति समर्थवैद्यराजस्य मार्गदर्शनं विना तथाऽवज्ञया पथ्यमप्यहितं–अहितकरं भवति एवं वचनस्य प्रामाण्यमस्ति, तथा 'अर्थी समर्थः, शास्त्रेणाऽपर्युदस्तो धर्मेऽधिक्रियते' इति विद्वत्प्रवादः' एवं धर्माधिकारिभेदाः–तथाहि

(१) अर्थी = धर्माभिलाषाधिक्यवान्, अर्थिनो लक्षणत्रयं यथा–

(अ) विनीतः–धर्मं च धर्मव्याख्यातारं प्रति अभ्युत्थानादिविनयरूपसेवायाः कर्त्ता ।

(आ) समुपस्थितः–धर्मश्रवणादिं प्रति सम्मुखताकारी, न विमुखः ।

(इ) प्रच्छन्–धर्मस्वरूपं प्रच्छन्, धर्मग्रहणाय विध्यादिं ज्ञातुमातुरः ।

(२) समर्थः = निरपेक्षतया धर्ममनुतिष्ठन् न कुतोऽपि तदनभिज्ञात् बिभेति. सिंहवद्धर्ममङ्गीकृत्य सिंहवद् भयादितोऽबिभ्यत् सिंहवत् पालन-समर्थः ।

(३) शास्त्रेणाऽपर्युदस्तः–सूत्रेणाऽनिषिद्धः,

अनर्थ्युद्देश्यकव्याख्यानस्याऽनुचितत्वादर्थिपदस्य सार्थक्यं, असमर्थे भंगोज्झनादिभावात् समर्थपदस्य साफल्यं विनयादिगुणरहितेऽपरिणमनात्, शास्त्रेणाऽपर्युदस्तपदस्य साफल्यम्, अर्थित्वविशिष्ट–समर्थत्व–विशिष्टशास्त्राऽपर्युदस्तव्यक्ति र्धर्मेऽधिक्रियते एवं विदुषां प्रवादो (प्रघोषो) जगति वर्त्तते. 'धर्मश्चैतत्पाठादिः'–एतच्चैत्यवंदनक्रियातत्सूत्रपाठादिको धर्मः कथ्यते. 'कारणे कार्योपचारा' दिति आगमवचनानुसारेण मैत्री–आदि–भावसहितमनुष्ठानं धर्मत्वेन कथ्यते, तस्य कारणं चैत्यवंदन-पाठादि, तद् धर्मत्वेन कथ्यते, यथाऽन्नं प्राणाः प्राणत्वाभाववति अन्ने, साधनरूपनिमित्तेन प्राणत्व-धर्ममारोप्य 'अन्नं वै प्राणाः' तथाऽत्राप्युपचारो व्यवहारः । यद्येवमुच्यतां, के पुनरस्याधिकारिणः ? इति अस्येति = चैत्यवंदनसूत्रस्य पाठादिसत्यक्रियादेरिति ।

**एतद्बहुमानिनो विधिपरा उचितवृत्तयश्च, न हि विशिष्टकर्म्मक्षयमन्तरेणैवंभूता भवन्ति क्रमोऽप्यमीषामयमेव, न खलु तत्त्वत एतदबहुमानिनो विधिपरा नाम, भावसारत्वाद्विधिप्रयोगस्य, न चायं बहुमानाभावे इति ॥**

**पं०**...स च एवंलक्षणो यस्त्रिवर्गरूपपुरुषार्थचिन्तायां धर्म्ममेव बहु-मन्यते, इहलोकपरलोकयोर्विधिपरो ब्राह्मणादिस्ववर्णोचितविशुद्धवृत्तिमांश्चेति, 'विधिपरा' इति, विधिः–इहलोकपरलोकयोरविरुद्धफलमनुष्ठानं स परः–प्रधानं येषां ते तथा 'उचितवृत्तय' इति, स्वकुलाद्युचितशुद्धजीवनोपाया इति, ननु ज्ञानावरणादिकर्म्मविशेषे, उपहन्तरि सति सम्यक्चैत्यवंदनलाभाभावात् तत्क्षयवानेवाधिकारी वाच्यः, किमेतद्बहुमानादिगवेषणयेत्याह–'नहीत्यादि' 'न' नैव 'हिः' यस्माद्, 'विशिष्टकर्म्मक्षयं' विशिष्टस्य-अन्तःकोडाकोटयधिकस्थितेः कर्म्मणो-ज्ञाना-

षरणादे: क्षयो-विनाशस्तमन्तरेण-विना 'इत्थंभूता' एतद्बहुमानादिप्रकारमापन्ना 'भवन्ति' वर्तन्ते, तत एतद्बहुमानादिव्यङ्ग्यकर्मविशेषक्षयवानेवाधिकारी, नापर इति । भवन्तु नामैवं, तथापि कथमित्थमेषामुपन्यासनियम इत्याह-'क्रमोऽपी' त्यादि, 'न चायम्' इति, नच-नैवं, अयं-भाव:, चैत्यवंदनविषयशुभपरिणामरूप:, संवेगादिविधिप्रयोगहेतुरिति ॥

**टीका...उच्यते–एतद्बहुमानिन:–(१) अर्थित्व–सामर्थ्य–शास्त्रापर्युदस्तत्वलक्षणो य:, स त्रिवर्गरूपपुरुषार्थ–चिन्तायां धर्ममेव बहुमन्यते, एतद्–चैत्यवंदनपाठादिकं बहुमानत: कुर्वन्ति ।, (२) विधिपरा: = इहलोकपरलोकयोरविरुद्धफलमनुष्ठानं तथा व्यवहारे प्रवर्त्तनं विधि:, स पर:–प्रधानं येषां ते विधिपरा:, तथा (३) उचितवृत्तय:–ब्राह्मणादिस्ववर्णस्वकुलानुचितजीवनोपायवन्त: एते धर्माधिकारिण उक्ता:,**

**सततशुभपरिणामजनने, प्रतिबन्धक–विशिष्ट–कर्मणि सति सम्यक् चैत्यवंदनलाभ: प्रतिबध्यतेऽतस्तत्कर्मविशेष–प्रतिबन्धकक्षयवानेवाधिकारी वाच्य:, किमनेनैतद्बहुमानादिनेति चेत् कथ्यते, नैवान्त: कोटाकोटियधिकस्थितिमज्ज्ञानावरणादि–कर्मविनाशं विनैतद्बहुमानादि-विशेषण-विशिष्टा भवन्ति, तत एतद्बहुमानादिव्यङ्ग्यकर्मविशेषक्षयवानेवाधिकारी नान्य इति.**

**विशिष्टकर्मक्षयवानेवाधिकारीत्येतत्समञ्जसमेव परन्तु कर्मक्षयविशेषव्यञ्जकानि, एतद्बहुमानित्वविधिपरत्वोचितवृत्तित्वाख्यानि विशेषणानि दत्तानि, तेषामुपन्यासक्रम: कथमस्तीत्याह–'क्रमोऽपीति'–एतद् बहुमानित्वविधिपरत्वोचितवृत्तीनाममीषां क्रमोऽपि–हेतुपूर्वकपूर्वानुपूर्वीक्रम: अयमेव, (१) प्रथमं तद्बहुमानं (२) तत: विधिपरत्वं (३) तत उचितवृत्तिरिति क्रम: यतो वस्तुत:, एतद्धर्मबहुमानरहिता विधिपरा न कथ्यन्ते, कथमिति चेत्, विधिप्रयोगो भावप्रधानो भवति. येषां चैत्यवंदनविषयकपाठादिकं प्रति बहुमानं नास्ति, तेषां इहलोकपरलोकयोरविरुद्धफलजनक–विधिपरत्वं न मतमस्ति, विधिभावकार्यं प्रति बहुमानं कारणमस्ति, अयं विधिप्रयोगो बहुमानाभावे न भवति, तथाऽयं भाव:, चैत्यवंदन–विषयशुभपरिणामरूप:, संवेगादिविधिप्रयोगहेतुरिति–संवेगादिविधिप्रयोगरूपकार्यं प्रति चैत्यवंदनविषयकशुभपरिणामरूपभाव: कारणमिति ।**

## न चामुष्मिकविधावप्यनुचितकारिणोऽन्यत्रोचितवृत्तय इति, विषयभेदेन तदौचित्याभावाद्, अप्रेक्षापूर्वकारिविजृम्भितं हि तत्,

पं०....'न चामुष्मिकेत्यादि' नच–नैव, चशब्द उचितवृत्तेर्विधिपूर्वकत्वभावनासूचनार्थ:, 'आमुष्मिकविधौ' परलोकफले कृत्ये, किं पुनरैहिकविधाविरपेरर्थ: 'अनुचितकारिणो' विरुद्धवृत्तय: 'अन्यत्र' इहलोके 'उचितवृत्तय:' स्वकुलानुचितपरिशुद्धसमाचारा भवन्ति, परलोकप्रधानस्यैवेहाप्यौचित्यप्रवृत्ते:, तदुक्तम्--"परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत् । आत्मानं योऽतिसंधत्ते, सोऽन्यस्मै स्यात्कथं हित: ?॥"

कुत एतदित्याह–'विषयभेदेन' भिन्नविषयतया 'तदौचित्याभावात्' तयो:–इहलोकपरलोकयो:, औचित्यस्य–दृष्टादृष्टापायपरिहारप्रवृत्तिरूपस्य, अभावात्, यदेव ह्यामुष्मिकं परिणामसुन्दरं कृत्यमिहापि तदेवेति

विधिपरता, विधिपूर्वकमेवोचितवृत्तित्वमिति, प्रकारान्तरनिरसनायाह-'अप्रेक्षापूर्वकारिविजृम्भितं हि तत्' अप्रेक्षापूर्वकारिणो ह्येवं विजृम्भन्ते, यदुतैकत्रानुचितकारिणोऽप्यन्यत्रोचितकारिणो भवेयुरिति ॥

**टी०**...ये विधिपूर्वकोचितवृत्तयः, आमुष्मिकविधिरूपचैत्यवंदनावश्यकविहारदानपूजादिकं परलोक-फलं कृत्यं प्रति (ऐहिकविधिं प्रत्यपि) अनुचितकारिणः-विरुद्धवृत्तयो, अन्यत्र-इहलोके उचितवृत्तयः स्वकुलाद्युचितपरिशुद्धसमाचारा नैव भवन्ति, अर्थात् परलोकफलकर्त्तव्यं प्रति समुचितकारिण एवेह-लोके उचितवृत्तयो भवन्ति, यतः परलोक-प्रधानस्यैवेहाप्यौचित्यप्रवृत्तिरस्ति, तदुक्तं-'परलोक-विरुद्धानि कुर्वाणं दूरतस्त्यजेत्, आत्मानं योऽतिसंधत्ते-वञ्चयति सोऽन्यस्मै कथं हितः-हितकरः स्यात् ?'

यतो लौकिकौचित्यद्वाराऽऽश्रयभावद्वारा, केवलपरलोकप्रधानकर्त्तव्यस्यावज्ञया, विषयभेदेनेहलोक-परलोकयोः - ऐहिकपारलौकिकप्रत्यक्षपरोक्षानर्थजालपरिहारे प्रवृत्तिरूपस्यौचित्यस्याभावो वर्त्तते यत्कर्त्तव्यस्य फलं परलोके सुन्दरमिहापि तत्कृत्यमेव सुन्दरमिति विधिपरता कथ्यते, विधिपूर्वक-मेवोचितवृत्तित्वमिति. यत्र विषयभेदस्तत्रौचित्याभावः, यत्र विषयभेदो न तत्रौचित्यसद्भावः, यथाऽप्रेक्षापूर्वकारिणो ह्येवं विजृम्भन्ते, विषयभेदद्वारौचित्यं स्थापयन्ति. य एकत्र चैत्यवंदनावश्यक-विहारदानपूजादिकरूप-परलोक-साधने विषयेऽनुचितकारिणो भवन्ति. अन्यत्र-केवलैहिककुल-क्रमागतकृत्ये विषये उचितकारिणो भवन्ति. परन्तु वस्तुतो विषयभेदद्वारौचित्यस्योच्छेदं कुर्वन्ति. अत एव, अथ विधिपरतासूचकं 'विधिपरा' इति पदं कारणतासूचकपदं प्रथमं प्रोक्तं पश्चात् 'उचितवृत्तयः' पदं कार्यतासूचकपदं प्रोक्तं विधिपूर्वकमेवोचितवृत्तित्वम्, कार्यकारणभावत्वेन, विधिपरत्वकारणजन्योचितवृत्तित्व-कार्यक्रम-योजनेति ।

**तदेतेऽधिकारिणः परार्थप्रवृत्तौलिंगतोऽवसेयाः, मा भूदनधिकारि-प्रयोगे दोष इति । लिंगानि चैवां तत्कथाप्रीत्यादीनि, तद्यथा-तत्कथाप्रीतिः, निन्दाऽश्रवणम् ॥**

**तदनुकम्पा चेतसो न्यासः परा जिज्ञासा, तथा-गुरुविनयः सत्कालापेक्षा उचितासनं युक्त-स्वरता पाठोपयोगः, तथा-लोकप्रियत्वं अगर्हिता क्रिया व्यसने धैर्यं शक्तितस्त्यागो लब्धलक्षत्वं चेति ॥**

**पं०**...'तेऽष्वनुकम्पेति' तेषु-चैत्यवंदननिन्दकेषु अनुकम्पा-दया, यथा-अहो कष्टं यदेते तपस्विनो रजस्तमोभ्यामाबे-ष्टिता विवशा हितेषु मूढा इत्थमनिष्टमाचेष्टन्त इति, 'चेतसोन्यास इति' अभिलाषातिरेकाच्चैत्यवंदन एव पुनः पुनर्मनसः स्थापनं 'परा जिज्ञासेति' परा-विशेषवती चैत्यवन्दनस्यैव जिज्ञासा-ज्ञातुमिच्छा, 'सत्कालापेक्षेति' सन्ध्यात्रयरूपसुंदरकालाश्रयणं, 'युक्तस्वरतेति' परयोगानुपघातिशब्दता 'पाठोपयोग' इति पाठे-चैत्यवंदनादिसूत्र-गत एवोपयोगो नित्योपयुक्तता, 'लब्धलक्षत्वं चेति' लब्धं-निर्णीतं सर्वत्रानुष्ठाने लक्षं-पर्यन्तसाध्यं येन स तथा तद्भावस्तत्त्वं, यथा—

"जो उ गुणो दोसकरो, न सो गुणो दोषमेव तं जाण ।
अगुणोवि हु होइ गुणो, विणिच्छओ सुन्दरो जत्थत्ति ॥१॥"

टी०......तस्मात् कारणाद्, एतद्बहुमान-विधिपरत्व-उचितवृत्तित्व-विशिष्टकर्मक्षयादिविशिष्टाः, एतेऽधिकारिणः -परार्थप्रवृत्तेः-परार्थप्रवृत्तिरूपव्याख्यानप्रवृत्तेः-व्याख्यातृवरिष्ठैः, लिङ्गतः-वक्ष्य-" माणलिङ्गैरवसेयाः-ज्ञेयाः, यतोऽनधिकारिणां चैत्यवंदनपाठादिप्रयोगे दोषो माऽभूद् एषामधिकारिणां तथाणां लिङ्गानि-उपलक्षकचिह्नानि यथा तत्कथाप्रीत्यादीनि, विशिष्टकर्मक्षयप्रयोज्यानामेतद्बहुमान्यादीनां क्रमेणैकैकस्य पंच पंच लिंगान्युच्यन्ते.

एतद्बहुमानिनोऽधिकारिणः पंच लिंगानि =

(१) तत्कथाप्रीतिः = चैत्यवंदनसूत्रतदाराधकानां कथायां प्रीतिः-प्रेम, प्रस्तुतधर्मकथनरूप-कथां प्रति प्रीतिरप्रतिमा, (आनंदाऽभिव्यञ्जक प्रीणनं,) तदेतत्प्रेम, बहुमानगमकं लिंगम्.

(२) निन्दाऽश्रवणम् = चैत्यवंदनादिसूत्रस्य तथा प्रस्तुतधर्माराधकानां प्रतिपक्षिकृत-निन्दाया अश्रवणम् यतो मनागपि निन्दाश्रवणे तत्प्रति रुचिभङ्गः स्यात्, तदेतद्बहुमानगमकं लिङ्गम्.

(३) तदनुकम्पा = तेषु चैत्यवंदनादि-धर्मनिन्दकेषु अनुकंपा-दया, यथा-अहो कष्टं यदेते तपस्विनो (वराकाः) राजसीतामसीवृत्तिभ्यामावेष्टिता-विवशा हितेषु मूढा इत्थमनिष्टमाचेष्टन्ते-आचक्षते इति, दयातो 'धर्मनिन्दा' पश्चाद्रुद्धा भवति, धर्मनिन्दकेषु दयारूपकार्यं तद्-बहुमानजन्यत्वेन बहुमानगमकं लिङ्गम्.

(४) चेतसो न्यास इति अभिलाषाऽतिरेकाच्चैत्यवंदन एव पुनः पुनर्मनसः स्थापनं, चित्तसमर्पणेन तत्प्रति सर्वस्वं दत्तं, तदेतद्बहुमानगमकं लिङ्गम्.

(५) परा जिज्ञासा = परा-विशेषवती, उत्तरोत्तरवर्धमाना चैत्यवंदनस्यैव जिज्ञासा ज्ञातुमिच्छा, सर्वोत्कृष्ट-ज्ञानेच्छया तत्साधनोत्कृष्टा भवति. एवमेतद् बहुमानसाध्यत्वेन बहुमानगमकं लिंगम्.

तथा विधि-पररूपाधिकारिणः पंच लिंगानि-

(१) गुरुविनयः = गुरूणां विनयः = मातुः पितुश्च विनयः, ज्ञानादिधर्मगुरुं प्रति उचितप्रतिपत्तिरूपसेवादिर्विनयः, धर्मश्रवणादि-सर्वधार्मिकक्रियादिषु क्रियमाणो विधितो विनयः, स विधिपरतागमकोऽस्ति, ततो विधिपरतालिंगमिदम्.

(२) सत्कालापेक्षा = सन्ध्यात्रय-प्रातर्मध्याह्नसायंकालरूपसुन्दरकालाश्रयणं, तथा प्रस्तुत-चैत्यवंदनादि-श्रवणग्रहणादिसर्वधर्मक्रियासु सत्कालो-योग्यकालोऽपेक्षितव्यो, या क्रिया, यत्काले कर्त्तव्यत्वेन शास्त्रेण विहितत्वेन निर्धारिता तत्कालमनतिक्रम्य कार्या, अथादेतद्विधिपरतालिंगं ज्ञेयम्.

(३) उचितासनम् = चैत्यवंदनादिसर्वधर्मक्रियासु समुचितासनं सेवनीयम्, तदेतद् विधिपरतां गमयति.

(४) युक्तस्वरता = परयोगानुपघातिस्वरता = स्वतो भिन्ना अन्ये ये चैत्यवंदनगत-स्तुति-स्तवनादि-क्रियासु प्रवृत्तास्तेषां स्व-स्वयोगे बाधा माऽभूत्तया रीत्या युक्तस्वरता = स्वरोच्चारो नातिमन्दोऽपि नात्युच्चैरपि तु मध्यमशब्दतया कर्त्तव्य इति विधिपरतां द्योतयति.

(५) पाठोपयोग: = पाठे–अर्थानुसन्धान–सहित–चैत्यवंदनादि–सूत्रगतपाठे एवोपयोगो–नित्योप-युक्तता कर्त्तव्येति विधिपरतागमकं लिंगम्.

उचितवृत्तेरधिकारिण: पंच लिंगानि =

तथा = बहुमानिविधिपरयोरधिकारिणो यथा पंचलिंगानि तथा उचितवृत्तेरधिकारिण: पंच गमकलिंगानि–

(१) लोकप्रियत्वं = उचितवृत्त्या वृत्तिं कुर्वन् सकललोकस्य प्रीतिं संपादयति सकललोक–प्रेम-संपादनं, उचितवृत्तिज्ञापकं लिंगम्.

(२) अगर्हिता क्रिया = बलवदनिष्टनरकाद्यपायकारक – द्यूतादि–व्यसन–सप्तकजीवहिंसादि–भयंकर–पापव्यापारत्यागपूर्वक–न्याससम्पन्न–जीवनरूपक्रिया, अगर्हित–अनिन्दित–क्रिया, उचित-वृत्तिगमकं लिंगम्.

(३) व्यसने धैर्यम् = परितो विपदांवार्दलैरभिभूतोऽपि दीनतां विमुच्य वीरत्वरक्षणमथवा विरुद्धहेतूनां सत्त्वेऽप्यविकृतचेतस्कता, धीरत्वम्–धैर्यम्–उचितवृत्तितायाः ज्ञापकं लिंगम्.

(४) शक्तितस्त्याग: = यथाशक्ति त्याग:–दानप्रत्याख्यानाभिग्रहतप आदिरूपस्त्याग:, एवमेतदुचि-तवृत्तित्वं द्योतयति.

(५) लब्धलक्षत्वम् – लब्धं–निर्णीतं सर्वत्राऽनुष्ठाने लक्षं–पर्यन्तसाध्यं येन स तथा, तद्भावस्तत्त्वं यथा 'यस्तु गुणो दोषकरो न स गुणो दोषमेव तं जानीहि। अगुणोऽपि खलु भवति गुणो, विनिश्चय: (पर्यवसानं) सुन्दरो यत्रेति ॥

अर्थात्, चैत्यवंदनादि-सर्वक्रियासु पर्यवसितसाध्यविनिश्चयं कुर्यादिति, उचितवृत्तिताद्योतकमिदं लिंगम्.

**एभिस्तदधिकारितामवेत्यैतदध्यापने प्रवर्त्तेत, अन्यथा दोष इत्युक्तं ।**

**टी०....**पूर्वोक्तै रेभिरधिकारि-लिंगैश्चैत्यवंदनपाठादेरधिकारितामवेत्य–ज्ञात्वा, एतस्य–चैत्यवंदन-सूत्रादेरध्यापने पाठने प्रवृत्तिं कुर्यादिति, 'अन्यथा' एभिर्लिङ्गैश्चैत्यवंदनपाठादेरधिकारितामनवेत्यैतस्य-चैत्यवंदनसूत्रादेरध्यापने दोष:–'सर्वमपि यतो दानं दत्तं पात्रे दायकानां हितमितरथाऽनर्थजनकं, प्रधानदानं श्रुतदानं' अर्थादनधिकारिणां पाठे दोष इति पूर्वोक्तमेवेति.

**आह-क इवानधिकारिप्रयोगे दोष: ? इति,**

**टी०...(पूर्वपक्ष:)**–अनधिकारिणां–अयोग्यानां चैत्यवंदनसूत्रादेरध्यापनादि–प्रयोगे दृष्टांतं दर्श-यित्वा किं प्रकारको दोष: ? इति प्रश्ने,

**उच्यते–स ह्यचिन्त्यचिन्तामणिकल्पमनेकानेकभवशतसहस्रोपात्तानिष्टदुष्टाऽष्टकर्म्मराशिज-**

**नितदौर्गत्यविच्छेदकमपीदमयोग्यत्वादवाप्य न विधिवदासेवते, लाघवं चास्यापाद-यतीति,**

**टी०**...उच्यते–प्रत्युत्तरयति, सोऽनधिकारी (अयोग्यः कुपात्रः) अनेकभवशतसहस्र (लक्ष) त उपात्त–गृहीतानिष्टदुष्टाष्टकर्मराशितो जनितस्य दौर्गत्यस्य विच्छेदकमचिन्त्यचिन्तामणिसदृशमपि चैत्यवंदनसूत्रादिकमवाप्य–संप्राप्य न विधिवद्–विधिपूर्वकमनधिकारी जीवो नासेवते–नाराधय-तीति प्रथमो दोषः । -

सोऽयोग्यो विधिवन्नाराधयतीत्येतावन्मात्रमपि न परन्तु 'अस्य' प्रकृतचैत्यवंदनसूत्रादेरवज्ञाऽऽशातना-निन्दाविराधनादितो 'लाघवं' लघुतां' आपादयति–प्रकरोत्येवैतत् सूत्रादिकस्य लघूकरणे पटुतां प्रयुङ्क्ते.

एतमेव विषयं विस्तारयति–:

**ततोऽविधिसमासेवकः कल्याणमिव महदकल्याणमासादयति, उक्तं च 'धर्म्मानुष्ठानवैत-थ्यात्प्रत्यपायो महान्भवेत् । रौद्रदुःखौघजनको, दुष्प्रयुक्तादिवौषधाद् ।। इत्यादि' अतो-ऽनधिकारि-प्रयोगे प्रयोक्तृकृतमेव तत्त्वतस्तदकल्याणमिति, लिंगैस्तदधिकारितामवेत्यैतद-ध्यापने प्रवर्त्तेत, एवं ही कुर्वता आराधितं वचनं, बहुमतो लोकनाथः परित्यक्ता लोक-संज्ञा, अंगीकृतं लोकोत्तरयानं, समासेविता धर्म्मचारितेति, अतोऽन्यथा विपर्यय इत्यालो-चनीयमेतदति सूक्ष्माभोगेन, नहि वचनोक्तमेव पन्थानमुल्लङ्घ्यापरो हिताप्त्युपायः, न चानुभवाभावे पुरुषमात्रप्रवृत्तेस्तथेष्टफलसिद्धिः ।।**

**पं०**...कीदृशः ? 'लोकसंज्ञेति' गतानुगतिकलक्षणा लोकहेरिः, 'लोकोत्तरयानमिति' लोकोत्तरा प्रवृत्तिः, पुरुषमात्र-प्रवृत्तिरपि हिताप्त्युपायः स्यान्न वचनोक्त एव पन्था इत्याशङ्क्याह- **नचानुभवेत्यादि अयमभिप्रायः–प्राक् स्वयमेव** दृष्टफले कृष्यादौ तदुपायपूर्वकं-आप्तोपदिष्टोपायपूर्वकं चादृष्टफले निधानखननादौ कर्मणि प्रवृत्तस्य स्वाभि-लषितफलसिद्धिरवश्यं भवति, नान्यथा, अतोऽतीन्द्रियफले चैत्यवंदने फलं प्रति स्वानुभवाभावे पुरुषमात्रप्रवृत्त्या-श्रयणाद्म विवक्षितफलसिद्धिर्व्यभिचारसम्भवाद्, अतः शास्त्रोपदेशात्तत्र प्रवर्त्तितव्यमिति ।।

**टी०**...ततः–तस्मात्कारणात् यथा चिंतामणीसमानं विधिना चैत्यवंदनसूत्रादिकमाराधयन् कल्याण-मासादयति तथाऽविधिनाऽऽराधयन्नप्यनाराधयन् 'महदकल्याणम्' दीर्घदुरन्तकालीनामंगलमासादयति, उक्तंच 'धर्म्मसाधकानुष्ठानस्य वितथ–असत्त्व–भावकरणादविधि–साधनात्, साधकस्य महान्–दीर्घदुरन्तकालिकाकल्याणरूपः प्रत्यपायो भवेत्, यथा–अविध्यादिदुष्टरीत्या–विपरीतत्वेन प्रयुक्तादौ-षधाद् रौद्रदुःखौघजनकः प्रत्यपायो भवेत्, तथाऽत्रापि ज्ञेयम्, इत्यादि' यथौषधं योग्यरीत्या न दत्तमन्यस्मै, अथवाऽपात्राय दत्तं तल्लाभस्य स्थाने महाहानिर्भवति तथा धर्मक्रियां वैपरीत्येनाचरतो-ऽनधिकारिणो भयंकरापायोत्पादनं भवति.

अस्मात्कारणादनधिकारिणां चैत्यवंदनसूत्रादिपाठरूपे प्रयोगे-योजने यदकल्याणमनर्थो भवति तत्र तत्त्वतः-वस्तुतो लिंगैरपरीक्षक-प्रयोक्तृकृतमेव-प्रयोजकव्यक्तिरूपकारणजन्यं तदकल्याणं ज्ञेयमर्थादपरीक्ष्य लिंगैरनधिकारिपाठकस्यापि सहाकल्याणं-पाठकाकल्याणेन सह पाठ्यस्याप्य कल्याणमेव. पाठ्यपाठकयोरुभयोरकल्याणम्, तथा विशिष्टलिंगैस्तदधिकारितामवेत्य-परीक्ष्य तदध्यापने प्रवर्त्तेत-पाठनाधिकारितां समीक्ष्य पाठकप्रवृत्तिः कर्त्तव्या नान्यथा. एवं पाठनविधिं कुर्वता तत्त्वत आराधितं-आराधनाविषयीकृतं जिनवचनं, 'लोकनाथः'-तीर्थंकरो जगन्नाथः 'बहुमतः'-हृदयगतभक्तिसूचकबहुमानविषयीकृतः, अत एव 'परित्यक्ता लोकसंज्ञा' गतानुगतिकत्व-रूपलक्षणगम्या-असत्य-लोकप्रवाहः परित्यागविषयी-कृतः, 'अंगीकृतं लोकोत्तरयानं' लोकोत्तरा-अलौकिकी प्रवृत्तिः प्रतिपन्ना, 'समासेविता धर्म्मचारिते' ति-अवश्यं धर्मविषयकमाचरणं कृतमेवेति. अतः-अस्माद् विधेरन्यथा-विपर्ययः = अधिकारितामपरीक्ष्याध्यापनप्रवर्त्तकेन 'विराधितं जिनवचनं' लोकनाथोऽबहुमतः, लोकसंज्ञा बहुमता, लोकोत्तरयानं परित्यक्तं, आशातिता धर्मचारितेति विचारणीयमेतदत्यन्तसूक्ष्मोपयोग-ध्यानेन । शास्त्ररूपवचनविहितमेव मार्गमतिक्रम्य, नहि हित-कल्याणप्राप्तेरुपायः-साधनमस्ति, वीतरागवचना-विनाभावि हितं नान्यथेति.

तथाहि-स्वेष्टफलसिद्धिं प्रति पुरुषप्रवृत्तिद्वारा, अनुभव (यथार्थज्ञानं) एवासाधारणकारणमस्ति. सत्यनुभवाभावे पुरुषप्रवृत्तिमात्रेण नेष्टफलसिद्धिः, यः पुरुषः सफले कर्मणि प्रवर्त्तते तत्कर्म द्विविधं भवति. (१) पूर्वं स्वयमेव यस्य कर्मणो दृष्टं फलं, तत्कर्म दृष्टफलं यथा कृष्यादिकं, तत्र तत्साधन-पूर्वकं प्रवृत्तस्य धान्यसिद्धिरूपमिष्टं दृष्टं फलं अवश्यं सिद्ध्यत्येव.(२)आप्तपुरुषेण (यथार्थवादिना) दर्शितं साधनपूर्वकं क्रियमाणं अदृष्टं (परोक्षमतीन्द्रियं) फलं यस्य तत्कर्मादृष्टफलकं यथा लौकिक-निधानखननादि, तत्र प्रवृत्तस्य निधानप्राप्तिरूपमिष्टं फलं भवति. प्रत्यक्षपरोक्ष (आप्तवचनादि) रूपयथार्थज्ञानानुभवः, दृष्टादृष्टफलसिद्धिं प्रति कारणम्, एवं च दृष्टफलककर्मण इष्टफलसिद्धिं प्रति प्रत्यक्षानुभवः कारणम्, अदृष्टफलककर्मण इष्टफलसिद्धिं प्रति आप्तवचनरूपानुभवः कारणम्, एवंविधकार्यकारणाभावे, इष्टफलसिद्धिर्न भवत्येव । तथा च प्रकृते चैत्यवंदनकर्म, अतीन्द्रियनिर्वाण-फलकं अत एतत्कर्म प्रति आगमवचनरूपानुभवः प्रमाणभूतकारणम्, तदभावे पुरुषप्रवृत्तिमात्रं नेष्टफलसाधकं, चैत्यवंदनकर्म प्रति आप्तवचनरूपागमानुभवः प्रवर्त्तकोऽस्ति यतः सकलपारमार्थिक प्रत्यक्षरूपकेवलज्ञानिवीतरागवचनानुसारिणी प्रवृत्तिरमोघफलदाऽस्ति । प्रवचनवचनमेवैको हिता-प्त्युपायो नान्यस्तत्र प्रवचनवचनमवगणय्य केवलपुरुषप्रवृत्त्या स्वेष्टफलसिद्धौ पूर्वोक्त एको दोषो दर्शितोऽथ प्रवचनवचनरूपानुभवं विना स्वेष्टफलसिद्धौ पुरुषमात्र-प्रवृत्त्या द्वितीयो दोषो दर्श्यते-

**अपि च-लाघवापादनेन शिष्टप्रवृत्तिनिरोधतस्तद्विघात एव, अपवादोऽपि सूत्राबाधया गुरु-लाघवालोचनपरोऽधिकदोषनिवृत्त्या शुभः शुभानुबन्धी महासत्त्वासेवित उत्सर्गभेद एव**

**ननु सूत्रबाधया, गुरुलाघवचिन्ताऽभावेन हितमहितानुबन्ध्यसमंजसं परमगुरुलाघवकारि-क्षुद्रसत्त्वविजृम्भितमिति ॥**

**पं०...**'अपिच' इति दूषणान्तरसमुच्चये, यदृच्छाप्रवृत्त्या सम्यक्चैत्यवंदनविधेः 'लाघवापादनेन' लघूकरणेन 'शिष्टप्रवृत्तिनिरोधतः' पूज्यपूजारूपशिष्टाचारपरिहारात् 'तद्विघात एव' उपायान्तरादपि संभवन्त्याः स्वेष्टफलसिद्धेर्विष्कम्भ एव, यथोक्तम् 'प्रतिबध्नाति हि श्रेयः, पूज्यपूजाव्यतिक्रमः'। (इतिकविकुलगुरुकालीदासोक्तिः) आह-ननु गतानुगतिकरूपश्चैत्यवंदनविधिरपवादस्तर्हि स्यादित्याशङ्क्याह-'अपवादोऽपीत्यादि' उत्सर्गभेद एवेति उक्तविशेष एवेति उक्तविशेषणोऽपवाद उत्सर्गस्थानापन्नत्वेनोत्सर्गफलहेतुरित्युत्सर्गविशेष एवेति ॥

**टी०...** 'अपिचेति' दोषान्तरसंग्रहवाचकपदमत्राऽस्ति, तथाहि स्वच्छन्दाचारेण सम्यक्चैत्यवंदनरूपक्रियाया लघुत्वकरणद्वारा पूज्यपूजारूपशिष्टाचारप्रतिबन्धतः, कारणान्तरजन्यतथेष्टफलसिद्धिरूपकार्याभावः, यतः पूज्यपूजाव्यतिक्रमः, श्रेयः प्रतिबन्धको भवति, अर्थात् शास्त्रवचनं प्रतीत्य प्रवर्त्तनेन सम्यक्चैत्यवंदनक्रियाया गुरुत्वोत्कर्षः क्रियते, तद्गौरवेण पूज्यपूजारूपः शिष्टाचारः सत्यापितः, शिष्टाचारपालनेन नियमतः स्वेष्टफलसिद्धिः, यतः पूज्यपूजाव्यतिक्रमः श्रेयः प्रतिबन्धकः, वीतरागो हि परमपूज्यः पुरुषः, तद्वचनं परमपूज्यं, तदाराधनं श्रेयस्करं, तद्व्यतिक्रमः श्रेयः प्रतिबन्धकः, तत्र किमाश्चर्यं ? पूज्यपूजारूपशिष्टाचारो नोलङ्घनीयः प्राणान्तेऽपि. ननु शिष्टाचारोऽपि गतानुगतिकत्वेन चैत्यवंदनविधिरपवादविधित्वेन नोत्सर्गविधिस्तर्हि स्यादित्याशङ्क्याह-'अपवादोऽपीत्यादि' (१) सूत्रमबाधितं रक्षित्वा (सूत्रोक्तबाधाऽभावेन सह) 'गुरुलाघवचिन्तया कृतस्य सूत्रेण सह पूर्वापरविरोधाभावात्' गुरुलाघवालोचनपरः-गुणदोषबहुत्वाऽबहुत्वविषयक समालोचनापरायणः। 'अवलम्ब्य कार्यं यत् किंचित्, समाचरन्ति गीतार्थाः, स्तोकापराधबहुगुणं सर्वेषां तत्प्रमाणं तु' (ध.प्र.) (२) अधिक (बहु) दोष-निवृत्त्या, पुण्यानुबन्धित्वविशिष्ट पुण्यरूपः, (३) महासत्त्वाऽऽसेवितः-संविग्नगीतार्थत्वविशिष्टमहासत्त्वरूपमहापुरुषासेवितः (आचरितः-संचालितः) ('आचरणाविहु आणा' इति कल्पनिर्युक्तिः-आचरणाऽपीति न केवलं सूत्रोक्तमेवाज्ञा, किन्तु आचरणाऽपि, संविग्नगीतार्थाचरितमपि आज्ञैव, हुरेवार्थे, सूत्रोपदेश एव, आतीर्थानुवर्तिजीताख्यपंचमव्यवहाररूपत्वादिति.) उत्सर्गभेद एवेति = उक्तविशेषणविशिष्टोऽपवाद उत्सर्गस्थानापन्नत्वेनोत्सर्गफलहेतुरित्युत्सर्गविशेष एवार्थादुत्सर्गप्रकार एव, 'न तु सूत्रबाधये'ति=सूत्रेण बाधितोऽपवाद उत्सर्गस्थानापन्नो न भवति, एष सगुणोऽस्ति वा निर्गुणोऽस्ति ? इत्यालोचनारूप-गुरुलाघवचिन्तारहितोऽपवाद उत्सर्गस्थानापन्नो न भवति, अतएव शुभरूपं हितं,
अशुभरूपाहितानुबन्धित्वतोऽसमंजसमयुक्तं ततोऽपवाद उत्सर्गस्थानापन्नो न भवति, परमगुरुं-तीर्थंकरं, निन्दादिद्वारा लघूकरणेन क्षुद्रसत्त्वेन (भवाभिनंदिजीवेन) विजृम्भितं चेष्टितमाचरितमपवादः, उत्सर्गस्थानापन्नो न भवतीति, य आचारः संयमादि बाधतेऽतः प्रमादरूपो भवत्यतो गुरुलाघवचिन्तारहितत्वेन यतनाया अभावाद् हिंसात्मको भवति, ऐहिकसुखप्रतिबद्धैरपुष्टासदालम्बन-

ग्राहिभिराचरितं शुद्धशीलवन्तो न सेवन्ते, यथा श्रावकादिषु ममत्वं, शरीरशोभार्थमशुद्धवस्त्राहारादिग्रहणम्, शिष्टजनाऽवाच्यासमंजसानेकविधक्षुद्रसत्त्वचेष्टादिकं, लिंगिजनताऽऽचरितमपि, निष्कलंक—चारित्रिपुरुषाणामप्रमाणत्वेनालंबनहेतुभूतं न भवति, यतः सूत्रेण निषिद्धत्वेन संयमादि—विरुद्धत्वेन, निष्कारणत्वेन चलितमप्यनुपादेयमेव ॥

श्रेयोमार्गप्रदर्शनम्—:

**एतदङ्गीकरणमप्यनात्मज्ञानां संसारसरिच्छ्रोतसि कुशकाशावलम्बनमिति परिभावनीयं सर्वथा,**

पं०. .'एतदङ्गीकरणमपीति' एतस्य-क्षुद्रसत्त्वविजृम्भितस्यापवादतयाऽङ्गीकरणमपि—आदरणमपि, किं पुनरनङ्गीकरणं ? आलम्बनं न भवतीत्यपिशब्दार्थः । 'कुशकाशावलम्बनमिति' कुशाश्च काशाश्च कुशकाशाः तेषामालम्बनं—आश्रयणमनालम्बनमेवापुष्टालम्बनत्वादिति,

टी०...तथाहि 'अनात्मज्ञानां'—आत्मज्ञानरहितानां, अध्यात्मध्यानशून्यानां क्षुद्रसत्त्वाचरितस्वीकरणं, संसाररूपसरितः श्रोतसि—प्रवाहे कुशकाशावलम्बनं—कुशाश्च काशाश्च, कुशकाशानां (प्रवाहस्थितदर्भतृणविशेषाणां) आलंबनं—अर्थात् संसारसरितो बहिर्निस्सरणाय भवाऽभिनन्दिभिराचरितं जडात्मभिः कृतमालंबनं वस्तुतः कुशकाशालम्बनसदृशं, ततः कदाचिद्बहि निस्सरणं न भवति यतस्तदालम्बनमनालंबनमेवापुष्टालम्बनत्वादिति सर्वथा परिभावनीयं—विचारणीयं सर्वथा (१)

**निरूपणीयं प्रवचनगाम्भीर्यं, विलोकनीया तन्त्रान्तरस्थितिः, दर्शनीयं ततोऽस्याधिकत्वं, अपेक्षितव्यो व्याप्तीतरविभागः ॥**

पं०...'दर्शनीयं ततोऽस्याधिकत्वमिति' दर्शनीयं—दर्शयितव्यं, परेषां स्वयं वा द्रष्टव्यं, 'ततः' तन्त्रान्तरस्थितेः 'अस्य' प्रकृततन्त्रस्य 'अधिकत्वं' अधिकभावः, कषादिशुद्धजीवादितत्त्वाभिधायकत्वात्, 'व्याप्तीतरविभाग' इति व्याप्तिश्च सर्वतन्त्रानुगमोऽस्य सर्वनयमतानुरोधित्वाद्, इतरा चाव्याप्तिस्तन्त्रान्तराणामेकनयरूपत्वाद्, व्याप्तीतरे, तयोः विभागो-विशेषः, इह चेतराशब्दस्य पुंवद्भावो 'वृत्तिमात्रे सर्वादीनां पुंवद्भावः' इति वचनात् ॥

टी०...(२) सर्वज्ञ—जिनेन्द्रभगवद्वचनरूपजैनप्रवचनरूप सदागमस्य गाम्भीर्यमगाधत्वं विशालत्वं च नितरां दृष्टांत—हेत्वादिद्वारा निरूपणविषयीकर्त्तव्यम् ।

(३) अन्यानि तन्त्राणि तन्त्रान्तराणि तेषां स्थितिः = व्रतादितत्त्वादिविधिनिषेधाद्यपवादोत्सर्गादि-मर्यादा, विलोकनीया—निरीक्षणीया ।

(४) दर्शनीयं ततोऽस्याऽधिकत्वमिति = दर्शनीयं—दर्शयितव्यं परेषां पुरः स्वयं वा द्रष्टव्यं ततः = तन्त्रान्तरस्थितेः सकाशात् 'अस्य' प्रत्यक्षभूतप्रकृतजैनतन्त्रस्य 'अधिकत्वं' अधिकभावः, कषच्छेदता-

वादिपरीक्षाशुद्धजीवादितत्त्वाऽभिधायकत्वात् तथाहि सर्वदर्शनान्तराणि सूक्ष्मेक्षिकया निरीक्ष्य परीक्ष्य च, एतज्जैनदर्शनस्य पूर्वापराऽविरोधि–(संवादि) यथार्थव्यवस्थितप्रतिष्ठित–सद्रूपपदार्थसार्थव्यवस्थाऽद्भुताऽद्वितीया–सुगम्यताऽपेक्षया सर्वतन्त्रतोऽधिकता–दर्शनीया परेषां, स्वयं वा द्रष्टव्या (तथा प्रस्तुतकालेऽपि प्रत्याख्यान–व्रतादि–महाव्रतादि–विषयिणी, चैत्यवंदनगुरुवन्दनादिक्रियाविषयिणी योजनाऽप्यलौकिकी सार्वतान्त्रिकस्याद्वादव्यवस्थाऽपि सर्वतन्त्रतो विशिष्यते.)

(५) 'अपेक्षितव्यो व्याप्तीतरविभाग:' = तथाहि जैनदर्शनस्य स्याद्वादरूपसिद्धान्त:, सार्वतान्त्रिक: सार्वदार्शनिक:–सर्वदर्शनानुगमविशिष्टोऽस्ति, यत: साङ्ख्य–नैयायिक (वैशेषिक) गुरुभट्टमुरारिमतानुयायिवेदान्ति–वेदानुयायीत्यादि–सर्वदर्शनानुयायिभि: स्याद्वाद: सिद्धत्वेन शरणत्वेन प्रतिपन्नोऽस्ति । अत एव जैनदर्शनस्य सर्वदर्शने व्याप्तिव्यापकताऽस्ति, जैनेतरदर्शनानां जैनदर्शनेऽव्याप्तिरव्यापकताऽस्ति । 'उदधाविव सर्वसिन्धव: समुदीर्णास्त्वयि नाथ ! दृष्टयो न च तासु भवान् विलोक्यते, प्रविभक्तासु सरित्स्विवोदधि:' इति सिद्धसेनदिवाकरपादा: । तथाहि जैनदर्शनं सर्वदर्शनानि स्वकुक्षिमध्ये समानिवेशयति, यावन्तो वच:प्रकारास्तावान्–नयवाद:, अत एव संपूर्णदर्शनानि नयवादे गर्भितानि सन्ति, यस्मिन् समये एष नयवादो मिथो निरपेक्ष: सन् वस्तुतत्त्वं प्रतिपादयति तदाऽयं नयवाद: परसमय: (जैनेतरदर्शनं) भवति, अतोऽन्यधर्मनिषेधकवक्तव्यं कथयज्जैनेतरदर्शनं, संपूर्णदर्शन–सर्वनयसमन्वयकारकं जैनदर्शनम् ।

'नयानशेषान–विशेषमिच्छन्, न पक्षपाती समयस्तथा ते' इत्यादिसूरीश्वरहेमचंद्रपादा:, सर्वनयानां समानतामिच्छन् हे भगवन्, ते–तव समयो न पक्षपाती, यथा विप्रकीर्णा भिन्नभिन्ना मुक्ता:, एकसूत्रे सम्भूय मनोज्ञा मुक्तामाला भवति, तथा भिन्नभिन्ना नया स्याद्वादसूत्रे संभूय संपूर्णनया: श्रुतप्रमाणत्वेन व्यवह्रियन्ते, न च प्रत्येकनया मिथो विरुद्धा: सन्ति तेषां नयानां; एकस्थाने एकत्रीकरणेन तेषां विरोधो विवादो वा कथं शाम्येदिति वाच्यम्, यथा परस्परं विवादिनो वादिन: प्रतिवादिनश्च मध्यस्थं न्यायाधीशं मध्ये कृत्वा यत्कृतं न्यायं–समाधानं प्राप्य विवादं विस्मृत्य मिथो मैत्रीं कृत्वा सप्रेमाऽऽसते तथा मिथो विरुद्धा नया: सर्वज्ञं भगवन्तं शरणं प्रतिपद्य.

'स्यात्' पदेन विरोधस्य विवादस्य च शमनात्, मिथोमिलितां बद्ध्वैकत्वस्थाने स्याद्वादे तिष्ठन्ति, एवं भगवतां शासनं सर्वनयरूपत्वेन सर्वदर्शनमयं संबोध्यते एव.

**यतितव्यमुत्तमनिदर्शनेष्विति श्रेयोमार्ग: ।**

पं०...'उत्तमनिदर्शनेष्विति' आज्ञानुसारप्रवृत्तमहापुरुषदृष्टांतेषु, अस्तु नामायं प्रवचनगाम्भीर्यनिरूपणादिरुत्सर्गापवादस्वरूपपरिज्ञानहेतु: श्रेयोमार्ग:, परं ज्वरहरतक्षकचूडारत्नालङ्कारोपदेशवदशक्यानुष्ठानो भविष्यतीत्याशङ्क्याह—

टी०...'उत्तमनिदर्शनेष्विति' जिनानामाज्ञामनुसृत्य प्रवृत्ता:–सकलप्रवृत्तिमन्त एव महापुरुषास्तेषां दृष्टांतेषु (उत्तमपुरुषाणां दृष्टान्ता ग्राह्या नाधमानामिति सम्यक्त्वदार्ढ्यनैर्मल्य

धैर्यवतां सिद्धांतः) यत्नविशेषः कर्त्तव्य इति श्रेयोमार्ग इति अस्तु नामायं प्रवचनगाम्भीर्य–निरूपणादिरुत्सर्गापवादस्वरूपपरिज्ञानहेतुः श्रेयोमार्ग्गः, अर्थादशक्यानुष्ठानत्वेन पूर्वोक्तश्रेयोमार्गे कोऽपि न प्रवर्त्तेत यदि कोऽपि प्रवर्त्तेत तदा कस्कस्तं मार्गमाराधयितु–जीवनसात् कर्त्तु समर्थोऽस्ति ? तं तं विशिष्टसाधकं सविस्तारं दर्शयतु भवान् भगवान् ।

**व्यवस्थितश्चायं महापुरुषाणां क्षीणप्रायकर्म्मणां विशुद्धाशयानां भवाबहुमानिनां अपुनर्बन्धकादीनामिति,**

पं०...'व्यवस्थितश्चेत्यादि' व्यवस्थितश्चायं–एष श्रेयोमार्गः प्रतिष्ठितश्च स्वयमेव, महापुरुषैः अपुनर्बन्धकादिभिरनुष्ठितत्वात्,

टी०...येऽपुनर्बन्धकादयः सन्ति, अत एव भवाऽबहुमानिनः, यतो भवबहुमानिनो नात एव विशुद्ध–निर्मलतमाशयवन्तः सन्ति, विशुद्धाशयवत्त्वेनैव कर्मणां क्षयक्षयोपशमोपशमवन्तो भवन्त्येव, ये क्षीणप्रायकर्माणोऽत एव महापुरुषाः सन्ति, एवमधिकारितया पश्चानुपूर्वीक्रमेण परस्परं कार्यकारणभावो ज्ञेयः, अतस्तैर्महापुरुषैरेष श्रेयोमार्गः स्वजीवने, आत्मसात् प्रतिष्ठितः कृतः परेषामुपदिष्टः स्वयं च प्रतिष्ठित इति, अथवा यथासंभवं ये क्षीणप्रायकर्माणस्ते विशुद्धाशया ज्ञेयाः, ये विशुद्धाशयास्ते भवाबहुमानिनः, ये भवाऽबहुमानिनस्तेऽपुनर्बन्धकादयः, आदिपदेनाविरतसम्यगृदृष्टि–देशविरतसर्वविरता ज्ञयाः, अपुनर्बन्धकादीनां महापुरुषाणामेष श्रेयोमार्गः कृतिप्रयत्नसाध्यत्वेनाशक्यानुष्ठानो नाऽपितु शक्यानुष्ठानः श्रेयोमार्गः, अत एतस्य श्रेयोमार्गस्य विधिरूप उपदेशः सफल एवेति निश्चप्रचम् ।

**अन्येषां पुनरिहानधिकार एव, शुद्धदेशनाऽनर्हत्वात्,**

टी०...पूर्वोक्तापुनर्बन्धकादेरन्येषां–भिन्नानां सकृद्बन्धका–(सकृदेकशः यो यथा–प्रवृत्तकरणद्वारा ग्रन्थिदेशं यावदागतो योऽभिन्नग्रन्थिकोऽस्ति य एकशो मिथ्यात्वमोहनीयकर्मण उत्कृष्टसप्ततिकोटाकोटीसागरोपम–प्रमाणां स्थितिं भन्त्स्यति स सकृद्बन्धकः कथ्यते) दिमिथ्यादृष्टीनां चैत्यवंदनादिधर्ममार्गेऽधिकारो नास्ति, यतोऽपुनर्बन्धकादीनां जीवदलगतपरिणामविशेषेणाथवा गुणस्थानकविशेषजन्य–प्रमोदरूपभावेन जघन्यादि–भेदभिन्नाश्चैत्यवंदनायास्त्रिधा प्रकाराः,

(१) अपुनर्बन्धकस्य जघन्यरूपा चैत्यवंदना, यतो विशुद्धेरपेक्षया प्रायः, तस्य परीणामो जघन्यकोटीकोऽस्ति ।

(२) अविरतसम्यगृदृष्टेः प्रायो मध्यम–चैत्यवंदना, यतस्तस्य विशुद्धेरपेक्षया परिणामो मध्यकोटीकोऽस्ति ।

(३) विरतिमतामुत्कृष्ट–चैत्यवंदना, यतो विशुद्धेरपेक्षया प्रायस्तस्य परिणाम उत्कृष्टकोटीकोऽस्ति,

अपुनर्बंधकादेरन्येषां–सकृद्बन्धकादि–भवाभिनन्दि–मिथ्यादृशां शास्त्रे चैत्यवंदनाया अधिकारो नास्ति, अत एव चैत्यवंदनादिग्रंथेऽपुनर्बंधकादेरन्येषां प्रवेशो–गति र्नास्तीति, कथमिति चेत् कथ्यते–सकृद्बन्धकदूरभव्यादिमिथ्यादृष्टीनां, एतच्चैत्यवंदनायामधिकारो नास्ति, यतस्तेषां भवाभिनंदिनां शुद्धदेशनाया (जिनोपदेशरूपविशुद्धदेशनाया) अनर्हत्वमयोग्यत्वमस्ति, ये विशुद्ध-देशनाया अयोग्याः सन्ति, ते चैत्यवंदनाया अनधिकारिणः ।
का शुद्धदेशना ? तत्स्वरूपं प्रज्ञापयति–:

**शुद्धदेशना हि क्षुद्रसत्त्वमृगयूथसंत्रासनसिंहनादः ।**

टी०...चरमपुद्गलपरावर्त्तान्तर्वर्तिनोऽपुनर्बन्धकादयः शुद्धदेशनाया योग्याः सन्ति, चरमावर्त्तकालोपरिवर्तिनः (बाह्यकालवर्तिनः) भवाभिनंदिरूपक्षुद्रसत्त्वाः शुद्धदेशनाया अनर्हा भवन्ति, यतः शुद्धदेशना खलु क्षुद्रसत्त्व (भवाभिनन्दिरूपक्षुद्रजीव) रूपमृगाणां यूथं–समूहं प्रति संत्रास–भयकारण–सिंहनादः–केसरि सिंहस्य गम्भीरगर्जनारूपसिंहनाद एव ज्ञेयः ।
अत्यंतशुद्धदेशनाजन्यक्षुद्रसत्त्वगतसंत्रासः किं स्वरूपः ? तत्स्वरूपं दर्शयति–:

**ध्रुवस्तावदतो बुद्धिभेदस्तदनु सत्त्वलेशचलनं कल्पितफलाभावापत्त्या दीनता, स्वभ्यस्त-महामोहवृद्धिः, ततोऽधिकृतक्रियात्यागकारी संत्रासः ।**

पं०...'ध्रुवेत्यादि' ध्रुवो–निश्चितः, तावच्छब्दो वक्ष्यमाणानर्थक्रमार्थः 'अतः' शुद्धदेशनायाः 'बुद्धिभेदो' यथाकथञ्चित् क्रियमाणायामधिकृतक्रियायामनास्थया, क्षुद्रसत्त्वतया च शुद्धकरणासामर्थ्यात् करण-परिणामविघटनं, 'तदनु' ततो बुद्धिभेदात्क्रमेण 'सत्त्वलेशचलनं, सुकृतोत्साहलवभ्रंशः 'कल्पितफलाभावापत्त्या' स्वबुद्धिसंभावितस्य फलस्यायथास्थितकरणेऽपि न किञ्चिदिति देशनाकर्त्तुं र्वचनादसत्त्वसंभावनया 'दीनता' मूलत एव सुकृतकरणशक्तिक्षयः, 'स्वभ्यस्तमहामोहवृद्धिः' महामोहो–मिथ्यात्वमोहस्ततः स्वभ्यस्तस्य–प्रतिभवा-भ्यासात्महामोहस्य वृद्धिः–उपचय इति ।।

टी०...अनर्थक्रमः– (१) अतो ध्रुवो बुद्धिभेदः = 'अतो'–शुद्धदेशनारूपसिंहनादेन 'बुद्धिभेदः' भवाभिनंदिरूपक्षुद्रसत्त्वेषु महता कष्टेन क्रियमाणाधिकृत–चैत्यवंदन–क्रियां प्रति श्रद्धाया अभावेन तुच्छवीर्यतया शुद्धकरणाऽसामर्थ्येन करणविषयकपरिणामस्य निश्चितो भेदो–ध्वंस इति प्रथमोऽनर्थः ।
(२) 'तदनु' ततो बुद्धिभेदात्चैत्यवंदन–शुद्धकरणासामर्थ्यप्रयुक्तपरिणामविघटन–प्रयुक्तं क्रमेण 'सत्त्वलेशचलनं'–सुकृतोत्साहलवभ्रंशः – सुकृतविषयकाल्पोत्साहरूपसत्त्वलवाच्चलनं – भ्रंशरूपचलनं ज्ञेयम्. इति द्वितीयोऽनर्थः ।
(३) ततः 'कल्पितफलाभावापत्त्या' कल्पितस्य–स्वमतिरूपकल्पनाकल्पितस्य–संभावितस्य फलस्य

(अत्र लौकिकफलस्यात्यंतिकोत्तमतया-एकान्तेन कल्याणकारित्व-या भावः प्रदर्शितः) अयथाव-स्थित-अयथार्थकरणेऽपि न किञ्चिदिति देशनाकर्तुर्वचनम्-(क्रियमाणाया शास्त्रस्याप्यनधिकारि-त्वं तथाऽङ्गीकृतक्रियात्यागेनाऽस्मनोऽनर्थकारित्वं स्यात्) स्वेष्टफलस्या-सत्यत्वांनावगमक 'दीनता'-मूलस एव सुकृतकरणोत्साहधैर्यरूपशक्तिक्षय इति तृतीयोऽनर्थः ।

(४) ततः 'स्वभ्यस्तमहामोहवृद्धिः'-महामोहो-मिथ्यात्वमोहस्ततः, सु-सम्यग्, अभ्यस्तस्य, प्रति-भवाऽभ्यासापेक्षया, महामोहस्य-मिथ्यात्वरूपमोहस्य वृद्धिः-उपचय इति चतुर्थोऽनर्थः । तत एतैरन-र्थैरधिकृत-क्रियायाः-चैत्यवंदनरूपक्रियायाः अस्याकरणसंत्रासो भवतीति ॥

अथ योग्यानां लाभक्रमः-शुद्धदेशनाऽर्हाणामपुनर्बन्धकादीनां बुद्धिभेदो न भवति अर्थात्

(१) व्यवस्थितपद्धत्या क्रियमाणायां चैत्यवंदनादिरूपायामधिकृतक्रियायां श्रद्धालुतया प्रौढसत्त्वतया च शुद्धकरणसामर्थ्यात् करणपरिणामो वर्धमानो भवति.

(२) ततो बुद्धिभेदाभावेन सुकृतकरणोत्साहप्राचुर्यं भवति.

(३) स्वबुद्धिकल्पितफलाभावेन संवेगभावेन यथास्थितकरणेनेष्टं फलमवश्यं भावीति देशनाकर्तु-स्तीर्थंकरस्य वचनेनैव सत्त्वपूर्णतासिद्धि-सद्भावतया, स्वप्रकृतितः सम्पूर्णदीनताया अत्यन्ताभावत एव सुकृतकरण-शक्तेरनुबन्धप्रवाहो वहत्येव ।

(४) मिथ्यात्वमहामोहस्य क्षयक्षयोपशमोपशमभावेन सम्यक्त्वशुद्धिर्वर्धमाना भवत्येवं लाभा भवाभिनंदिनां देशनाऽनर्हाणां न भवन्त्येवेति ज्ञेयम् ।

तत एते लाभक्रमैरधिकृतचैत्यवंदनरूपक्रियाया विशिष्टवर्धमानकरणरूपः संत्रासाभावे-भयाभावो भवतीति भवाभिनंदिनां शास्त्रसद्भावाश्रयः-

**भवाभिनन्दिनां स्वानुभवसिद्धमप्यसिद्धमेतद्, अचिन्त्यमोहसामर्थ्यादिति, न खल्वेताननधिकृत्य विदुषा शास्त्रसद्भावः प्रतिपादनीयो, दोषभावादिति, उक्तं च-"अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् । दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥१॥" इति कृतं विस्तरेण,**

टी०...अचिन्त्य-कल्पनातीता, मिथ्यात्वनामक-मोहस्य सामर्थ्यरूपशक्ति विद्यतेऽतो भवाभिनंदिनां स्वानुभवसिद्धत्वेऽपि विधिपूर्वकयथार्थक्रियाया अभावेन स्वेष्टफलसिद्ध्यपेक्षतायाऽचै-त्यवंदनादिकमेतत्कर्म-सिद्धमेवात एवापुनर्बन्धकादि-भिन्नानन्यान् भवाऽभिनन्दिन (क्षुद्रत्वलोभदी-नतामात्सर्य-भयशाठ्यमौढ्यनिष्फलारम्भिनो भवाभिनन्दिनः कथ्यन्ते) उद्दिश्य विदुषा-गीतार्थशि-रोमणिना 'शास्त्रसद्भावः'-शास्त्रं सदिति भावः' शास्त्रप्रतिपादितैत्यवंदनादिक्रियात्मक-सत्स्वरूपपदार्थसत्ता, शास्त्र-नयसमुदायरूप-विद्यमानस्वरूपम:-हार्दरहस्यभावः, न प्रतिपादनीयो-नोपदेशनीयः यतः-अनधिकारिभवाऽभिनन्दिनामामिकं वचनं गुणकारकं न भवति अपितु प्रत्युत

दोषकारकं–हानिप्रदं भवति, तद्धिताय न देयमिति वरं, एतद्विषये साक्षिवचनं 'अत्यन्ताऽशान्त-मतिमिति शास्त्रविषयकसद्भाव–सदाशय–सद्रहस्यस्य प्रतिपादनं, दोषायैव यथा नवीन उदयमागते ज्वरे शमनीयमौषधदानम् दोषाय तथाऽत्रापि ज्ञेयम् ।

तथा च यस्य कस्यचिज्ज्वरिणो ज्वरशमनाय दत्तमपि प्रारम्भे, औषधं विपरीतं भवति, तथापि ज्वरस्य समयपरिपाकानन्तरं ज्वरः शाम्यति, औषधमपि लाभप्रदं भवति परन्तु समयपरिपाकात् प्रागौषधमपि गुणदं न भवति, एवं चात्माऽपि संसारे जन्मादिचक्रे भ्राम्यन् २ दुःखक्लेशतापादिना खिद्यमानश्च मोक्षमभिलषन्, स्वभावतः कालतश्च भवस्थितिपरिपाकं भजन्, अत एवोत्तमधर्मरूपौ-षधमप्यन्तिमपुद्गलपरावर्त्तकालप्राप्तायात्मने दत्तं गुणकारकं भवति, अन्यस्मै दत्तं दोषाय जायते, एवं शब्दप्रपंचरूपविस्तरेण कृतमिति.

अधिकारिण उद्दिश्य प्रस्तुताभिधानम्–:

**अधिकारिण एवाधिकृत्य पुरोदितान् अपक्षपातत एव निरस्येतरान् प्रस्तुतमभिधीयत इति ।**

टी०...पूर्वोक्तान्, अपुनर्बन्धकादीनधिकारिणः (शुद्धदेशनाया विषयीकृत्य) अधिकृत्य समुद्दिश्य, पक्षपातं–भेदभावमकृत्वैव 'इतरान्'–अनधिकारि–भूतान् भवाभिनन्दिनः क्षुद्रसत्वान् 'निरस्य' अनुद्दिश्य–दूरीकृत्य–शुद्धदेशनाया अविषयीकृत्य, प्रस्तुतं–प्रस्तावायातं चैत्यवंदनसूत्रमभि-धीयते–अभिधाविषयीक्रियते ।

इत्येवमधिकारिताया यथार्थनिरूपणानन्तरं चैत्यवंदनसूत्रव्याख्यारंभात् प्राक् चैत्यवंदनादौ किं वक्तव्यम् ? तस्य च को विधिरिति तन्निरूपयति शास्त्रकारः ।

**इह प्रणिपातदण्डपूर्वकं चैत्यवंदनमिति स एवादौ व्याख्यायते–**

टी०...'इह' चैत्यवंदनविधिप्रसंगेऽत्र 'प्रणिपातदण्डपूर्वकं' प्रणिपातदण्डः (शक्रस्तवः, तीर्थंकरदेवानां नमस्कारकारकसूत्रत्वेन (नमोत्थुणंसूत्रं) 'सव्वे तिविहेण वंदामीति यावत्, एतदन्त-स्यैव वर्णगणनस्यैव वृद्धसम्प्रदायेन प्रणिपातदण्डकतया रूढत्वात्' ) पूर्वो यस्मिंस्तत् प्रणिपातदण्डपूर्वकं चैत्यवंदन-मिति विधिनियमवत्त्वेन 'स एव' स–प्रणिपातदण्डः (शक्रस्तवः–नमोत्थुणंसूत्रं) एवकारेणाऽन्यनिषेधोज्ञेयः, आदौ–चैत्यवंदनसूत्रव्याख्यानस्य प्रथमतः–आरम्भे, व्याख्यायते–विवरणविषयीक्रियते ।

**तत्र चायं विधिः–**

**इह साधुः श्रावको वा चैत्यगृहादावेकान्तप्रयतः परित्यक्तान्यकर्त्तव्यः प्रदीर्घतरतद्भावगम-नेन यथासम्भवं भुवनगुरोः सम्पादितपूजोपचारः, ततः सकलसत्त्वानपायिनीं भुवं निरीक्ष्य परमगुरुप्रणीतेन विधिना प्रमृज्य च क्षितिनिहितजानुकरतलः प्रवर्द्धमानातितीव्रतरशुभ-**

परिणामो भक्त्यतिशयात्, मुदश्रुपरिपूर्णलोचनो रोमांचाञ्चितवपुः, मिथ्यात्वजलनिलया-नेककुग्राहनक्रचक्राकुले भवाब्धावनित्यत्वाच्चायुषोऽतिदुर्लभमिदं सकलकल्याणैककारणं चाधःकृतचिन्तामणिकल्पद्रुमोपमं भगवत्पादवन्दनं कथञ्चिदवाप्तं, नचातः परं कृत्यमस्तीति; अनेनात्मानं कृतार्थमभिमन्यमानो भुवनगुरौ विनिवेशितनयनमानसोऽतिचारभीरुतया सम्यगस्खलितादिगुणसम्पदुपेतं तदर्थानुस्मरणगर्भमेव प्रणिपातदण्डकसूत्रं पठति ।

टी०...तत्र–नमोत्थुणं सूत्रपाठे चायं विधिः–

(१) चैत्यवंदनेच्छुकः साधुः श्रावको वा (उपलक्षणतोऽविरतसम्यग्दृष्टिरपुनर्बन्धकादि ज्ञेयः) चैत्यगृहादौ–आदिनोपाश्रयादौ, 'एकान्तप्रयतः' एकान्ते–शान्तस्थाने (एकनिश्चयतः) 'प्रयतः' प्रभुपूजादिना शुचि–प्रसन्नमनाः–सम्यक्प्रयत्नशीलः सन्–एकान्तेन प्रणम्रो वा प्रकर्षेण यतनाशीलः सन्,

(२) चैत्यसत्कां चिन्तां परिहृत्य केवलं प्रभुभक्तौ दत्तचित्तः, प्रभोरङ्गपूजामग्रपूजां च कृत्वानन्तरं चैत्यवंदनारम्भे नैषेधिकीत्रिकादन्तिमनैषेधिकी–विधानरूपेण 'परित्यक्ताऽन्यकर्त्तव्यः' चैत्यवंदनसमयेऽन्यसर्वकार्यत्यागं कुर्वन् सन्,

(३) अत्यंतदीर्घतरकालं यावत्–'तद्भावगमनेन' चैत्यवंदनविधायकप्रणिपातदण्डकविषयकभावे गमन–प्रवेशद्वारा, यथासम्भवं साधोर्द्रव्यपूजारूपोचाराभावात्, यथाऽधिकारं 'भुवनगुरोः' त्रिभुवनपूज्यतीर्थंकरस्य संपादितो द्रव्यभावरूपपूजोपचारो येन सः, सम्पादितपूजोपचारः सन्,

(४) ततः, तीर्थंकरप्रभुविषयकपूजासंपादनाऽनन्तरं सकल–त्रसस्थावररूप–सकलसत्त्वानामनपायिनीमबाधिकां चैत्यवंदनक्रियास्थानभूतां भुवं–भूमिं 'निरीक्ष्य' चक्षुर्द्वारा सम्यक्समीक्ष्य 'परमगुरुप्रणीतेन विधिना' जिनेश्वरकथितेन विधिना (प्राग् ईर्यापथिक्यादिविधिद्वारा) निरीक्षणानन्तरं प्रमार्जनं कुर्यादिति नियमेन श्रावक उत्तरासंगरूपवस्त्रप्रान्तेन, सपौषधः श्रावकश्चरवलारूपरजोहरणेन, निर्ग्रन्थस्तु, ओघारूपरजोहरणेन प्रमार्जयेत् (भूमिप्रमार्जननामकं सप्तमं त्रिकं सत्यापितम्) यतो जैनी सर्वक्रिया यतना (जीवदयाविचार) प्रधाना भवति, अतो विशिष्टां भुवं प्रमृज्य च 'क्षितिनिहितजानुकरतलः' पंचांगीमुद्रयाऽर्थात् पंचांगीप्रणिपातत्वाद् द्वाभ्यां जानुभ्यां द्वाभ्यां कराभ्यां मस्तकेन सह स्पृष्टभूमिकः सन् (अथवा द्वे जानुनी क्षितौ निधाय द्वौ करौ मस्तके निधायेत्यप्यर्थो भाव्यः) (प्रणिपातदण्डकमुद्राया विशेषचर्चाविवरणं प्रतिक्रमण–हेतु–पुस्तके दर्शनीयं)

(५) 'प्रवर्द्धमानाति–तीव्रतरपरिणामो'–प्रकर्षेण वर्धमानः–अत्यन्ततीव्रतरःशुभः–धर्मध्यानद्योतकसंवेगनिर्वेदादिरूपः परिणामो भावो यस्य स प्रवर्द्धमानातितीव्रतरशुभपरीणामः सन्,

(६) 'भक्त्यतिशयान्मुदश्रुपरिपूर्णलोचनो'–उत्कृष्टभक्तिभावप्रभावजन्यानन्दतोऽश्रुभिः परिपूर्णनयनः सन्,

(७) 'रोमांचांचितवपुः'–परमभक्तिजन्यं सर्वांगीणं हर्षप्रकर्षप्रवेशप्रेरितं सार्धत्रिकोटिप्रमाणानां रोम्णामुच्चैरुत्थानरूपं रोमांचं वपुषि धारयन् सन्,

(८) मिथ्यात्वरूपजलनिलये–जलाश्रये तथा अनेककदाग्रहिरूपनक्रचक्रेणाकुले संसारसागरे, आयुषोऽनित्यत्वाच्चात्यंतदुर्लभमिदं सकलकल्याणानामेकं–असाधारणं कारणं, अधःकृता–तिरस्कृता चिन्तामणेः कल्पद्रुमस्य चोपमा येन तत्; भगवतां पादयोर्वन्दनं कथंचित्–महता कष्टेन पुण्योदयेनावाप्तं–प्राप्तं, न चातः भगवत्पादवन्दनतः, परं–उत्कृष्टं कृत्यं–कर्त्तव्यमस्तीति, अनेन–भगवत्पादवन्दनेनात्मानं–स्वं कृतार्थं–कृतकृत्यमभितो मन्यमानो भुवनगुरौ (जिनेन्द्रे जिनसदृशजिनप्रतिमायां –स्थापनानिक्षेपरूपे भुवनगुरौ, भावनिक्षेपरूपे साक्षात्तीर्थंकरे भुवनगुरौ वा) विशेषेण निवेशिते नयनमानसे येन स विनिवेशितनयनमानसः सन् (दिक्त्रयनिरीक्षण–निवृत्तिरूपषष्ठत्रिकं सूचितं) 'अतिचाराणां–दोषाणां भीरुतया–भयेन सम्यगिति = वर्णालम्बनरूपालम्बनपूर्वकं (प्रभोःपार्श्वे चैत्यवंदनादिकरण–समये यद्यत्सूत्रोच्चारणे ह्रस्वदीर्घादिरूपाण्यक्षराणि भवेयुस्तानि तथैवान्यूनाधिकत्वेन पदसम्पदादिकं लक्षीकृत्योच्चारणपूर्वकं)

'अस्खलितादिगुणसम्पदुपेतं' सम्यग्रीत्या, अस्खलितं–स्खलनारहितं आदिना (अमीलितं–विरामादिसंयुक्तं, अव्यत्याम्रेडितं–पुनरुक्त्यादिदोषरहितं, कण्ठोष्ठ–विप्रमुक्तं बालादिवदस्पष्टतारहितं, गुरुवाचनोपगतमित्यादिगुणा ज्ञेयाः) अर्थादस्खलितादिगुणोपेतं, महापदरूपयतिविशेषरूपसम्पदुपेतं, 'तदर्थानुस्मरणगर्भमेव' 'अर्थाऽऽलम्बनपूर्वक' मिति शक्रस्तवविषयकार्थानुस्मरणगर्भ–गर्भितरूपेण शक्रस्तवीयार्थानां मनः करणकानुस्मरणपूर्वकमेव प्रणिपातदण्डकसूत्रं = नमोत्थुणं सूत्रं–शक्रस्तवाख्यं स्तोत्ररूपं सूत्रं पठति–भणतीति यावत्,

**तच्चेवम्–नमोऽत्थुणं अरहंताणं १, भगवंताणं २, आइगराणं ३, तित्थयराणं ४, सयंसंबुद्धाणं ५, पुरिसुत्तमाणं ६, पुरिससीहाणं ७, पुरिसवरपुंडरीयाणं ८, पुरिसवरगंधहत्थीणं ९, लोगुत्तमाणं १०, लोगनाहाणं ११, लोगहियाणं १२, लोगपईवाणं १३, लोगपज्जोअगराणं १४, अभयदयाणं १५, चक्खुदयाणं १६, मग्गदयाणं १७, सरणदयाणं १८, बोहिदयाणं १९, धम्मदयाणं २०, धम्मदेसयाणं २१, धम्मनायगाणं २२, धम्मसारहीणं २३, धम्मवरचाउरंतचक्कवट्टीणं २४, अप्पडिहयवरनाणदंसणधराणं २५, विअट्टछउमाणं २६, जिणाणं जावयाणं २७, तिण्णाणं तारयाणं २८, बुद्धाणं बोहयाणं २९, मुत्ताणं मोयगाणं ३०, सव्वण्णूणं सव्वदरिसीणं ३१, सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावित्तिसिद्धिगइनामधेयं ठाणं संपत्ताणं ३२, णमो जिणाणं जिअभयाणं ३३,॥ इह द्वात्रिंशदालापकाः, त्रयस्त्रिंशदित्यन्ये 'वियट्टच्छउमाणमित्यनेन सह ।**

टी०...'इह' अत्र शक्रस्तवे द्वात्रिंशदालापकाः–पदानि (पदं तु विवक्षिताभिधेय–युक्तं न पुनः सुप्तिङन्तयुक्तम्) अन्ये–केचित् 'वियट्टछउमाणमिति पदेन सह त्रयस्त्रिंशदालापका इति मन्यन्ते ॥

**इह चाद्यालापकद्वयेन स्तोतव्यसम्पदुक्ता, यतोऽर्हतामेव भगवतां स्तोतव्ये समग्रं निबन्धनं,**

टी०...(१) 'इह च' नमोत्थुणं स्तोत्रे प्रथमालापक-पदद्वयेन, चैत्यवंदनभाष्यापेक्षया नमोत्थुणं अरिहंताणमित्येकं पदं 'भगवंताण' मिति द्वितीयं पदमिति द्विपदवती स्तोतव्यसम्पद्विज्ञेया तथा प्रवचनसारोद्धारापेक्षया 'अरिहंताणं' इत्येकं पदं, भगवंताण' मिति द्वितीयं पदमेवं द्विपदी स्तोतव्यसंपज्ज्ञेया यतो 'नमोत्थुणं' मिति कर्तृ क्रियावाचकपदं सम्पन्मध्ये न गण्यते, पूर्वोक्ता द्विपदी सम्पत्–स्तोतव्यसम्पदस्ति, यतः सर्वे पूजनीयप्रकाराः–धर्माश्च गुणा अर्हत्सु–भगवत्सु विद्यन्ते, अर्हतां भगवतां स्तोतव्ये–स्तोतव्यत्वे (भावनिर्देशे) सति समग्रं–सम्पूर्णं निबन्धनं–मूलकारणम् अथवाऽर्हतां भगवतां स्तोतव्यत्वं विशेष्यीकृत्य समग्रं नितरां बन्धनं–वाक्यरचनारूपं सम्पत्स्वरूपं विद्यतेऽथवा-ऽर्हद्भगवद्रूपपदद्वयवती स्तोतव्यसम्पदेव समस्तानां सम्पदां निबन्धनं–मूलभूताऽऽलम्बनमस्तीति:
सम्पदित्युक्ते कः पारिभाषिकोऽर्थः ? इत्यत्रोच्यते महापदरूपा, अर्थाधिकारविशेषरूपा, विश्रामरूपा, यतिरूपा वा 'पायसमा उसासा' इति वचनात् पादसमानं–एकश्वासोश्वासकालप्रमाणं, गाथाया एकपादोच्चारणकालप्रमाणशब्दानां-पदानां वाक्यम्, गाथाया एकपादप्रमाणा संपदित्यर्थः, सूत्रेऽस्मिन् व्याप्रियमाणप्रत्येकसंपदा भिन्नभिन्नविषयप्रतिपादकानि स्तोतव्यसंपदादिकानि नामानि प्रदर्शितानि सन्ति.

(१) तथा चार्हद्भगवद्रूपा आत्मानः (परमात्मानः) सदा स्तोतव्या एव तत्रार्हत्ता भगवत्ता च भावं भजते, अर्थात् स्तुतियोग्यानां अर्हतां भगवतां निर्देशः, अस्यां संपदि भवत्यतोऽस्याः संपदो नाम 'स्तोतव्य–संपद्'

अथ हेतुसंपदं निर्दिशति =

**तदन्यैस्तु त्रिभिः स्तोतव्यसम्पद एव प्रधाना साधारणासाधारणरूपा हेतुसम्पद् यत आदिकरणशीला एव तीर्थकरत्वेन स्वयंसम्बोधितश्चैते भवन्ति,**

पं०..'साधारणासाधारणरूपेति' सर्व्वजीवैः साधारणमादिकरत्वं, मोक्षापेक्षया आदौ-भवे सर्वजीवानां जन्मादिकरणशीलत्वात्, तीर्थकरत्वस्वयंसंबोधावसाधारणौ, अर्हतामेव भवतः 'एते' इति अर्हन्तो भगवन्तः ।

टी०...(२)'तदन्यैस्तु' स्तोतव्यसम्पत्पदेभ्योऽन्यैः 'त्रिभिरालापकैः'–पदैः 'आइगराणं' तित्थयराणं सयंसंबुद्धाणमिति त्रिभिः पदैः' स्तोतव्यसम्पत्संबन्धिनी, अत एव प्रधाना मुख्या, साधारणासाधारणरूपा (गुणरूपा) हेतुसम्पत् (ओघहेतुसम्पदित्यपरसंज्ञावती) साधारणासाधारण हेतुघटना = सर्वजीवेषु, आदिकरत्वस्य व्यापकत्वात् साधारणं–सामान्यं यतो मोक्षाऽवस्थापेक्षया आदौ–पूर्वस्मिन् भवेभवे सर्वजीवानां जन्मादिप्रपञ्चकरणस्वभावोऽस्ति, तत आदिकरत्वं सर्वजीव-साधारणम् (१)

तीर्थंकरत्वं स्वयंसम्बोधिश्चेति द्वौ धर्मौ वा गुणौ, अर्हद्भगवद्रूपव्यक्तिविशेषगतावेव नान्यत्रेत्य-साधारणावसामान्यौ, यतः प्रधानतयाऽर्हत्सु भगवत्स्वेव विद्यमानत्वेनास्तित्वमिति, अत एषा सम्पत् साधारणासाधारणरूपा हेतुसम्पत् कथ्यते. यत आदिकरणशीला एव तीर्थंकरत्वेन स्वयंसम्बोधितश्चैते इति अर्हन्तो भगवन्तो भवन्तीति (२) असाधारणहेतुसम्पदं वर्णयति–

**तदपरैस्तु चतुर्भिः स्तोतव्यसम्पद एवासाधारणरूपा हेतुसम्पत्, पुरुषोत्तमानामेव सिंह-पुण्डरीकगन्धहस्तिधर्म्मभाक्त्वेन तद्भावोपपत्तेः,**

टी०...तस्या हेतुसम्पदः (साधारणासाधारणहेतुसम्पदः) अपरैरन्यैस्तु चतुर्भिः पदैः (पुरिसुत्तमाणं, पुरिससीहाणं, पुरिसवरपुंडरीयाणं, पुरिसवरगंधहत्थीणं) पुरुषोत्तमपुरुषसिंह–पुरुष-वरपुंडरीकपुरुषवरगन्धहस्तिरूपैः पदैः, चतुष्पदवती, स्तोतव्यसंपदः–अर्हद्भगवद्रूप–प्रथम–सम्पद एव, नान्यसम्पदोऽसाधारणरूपा हेतु–सम्पत्, यतोऽर्हन्तोभगवन्तः पुरुषोत्तमा उच्यन्ते यतः पुरुषोत्तमा एव सिंहस्य धर्मान् (निर्भयताप्रभृतिसमानधर्मान्) भजन्ते, तथा पुण्डरीकस्य (श्वेतकमलस्य) धर्मान् (निर्लेपता–शुक्ति–मनोहरताऽदीन् समानधर्मान्) भजन्ते, तथा गन्धहस्तिधर्मान् भजन्ते (यथा गन्धहस्ती, यत्र यत्र विचरति तत्र तस्य मदस्य तीव्रगन्धेन स लक्ष्यते, अतः सामान्यहस्तिन एतस्यागमनेन पलायन्ते, तथैव यत्र यत्र तीर्थंकरः–प्रभुर्विचरति तत्र तत्र तस्य पवित्रपरमाणूनां सुरभिः प्रसरति, तत्र पवित्राभि र्बलवतीभिः परमाणुवर्गणाभिः, दुर्भिक्ष–मारि–परचक्रादय उपद्रवा नश्यन्ति, सद् गन्धहस्तिधर्मान् भजन्ते) तत एव पुरुषोत्तमेषु तत्–सिंहादिधर्मवत्त्वेन, अर्हत्सु भगवत्सु स्तोतव्यभाव उपपन्नो भवतीति (एतत्सामान्यहेतूनामतीव स्पष्टत्वं कर्त्तुं पुरुषोत्तमादि पदचतुष्टयवती तृतीयोत्तरहेतु (विशेषहेतु) सम्पदपि कथ्यते.)
अथ सामान्येनोपयोग–सम्पदं कथयति–

**तदन्यैस्तु पञ्चभिः स्तोतव्यसम्पद एव सामान्येनोपयोगसम्पत्, लोकोत्तमत्वलोकनाथत्व-लोकहितत्वलोकप्रदीपत्वलोकप्रद्योतकरत्वानां परार्थत्वात्,**

टी०...तस्याः–असाधारणरूपहेतुसम्पदः पदेभ्योऽन्यैः पञ्चभिः पदैः (लोगुत्तमाणं, लोगनाहाणं, लोगहियाणं लोगपईवाणं, लोगपज्जोअगराणं) इति पदपञ्चकवती स्तोतव्यसम्पदः (अर्हद्भगवत्सम्बन्धिनी) एव, नान्य–संबन्धिनी, सामान्येनोपयोगसम्पत् कथ्यते, यतोऽर्हद्भग-वदात्मनिष्ठानि लोकोत्तमत्वलोकनाथत्वलोकहितत्वलोकप्रदीपत्वलोकप्रद्योतकरत्वानि परार्थत्व-रूपाण्येव, अस्यां सम्पदि, श्रीतीर्थंकरदेवः, स्वशक्तीनां लोकस्य भिन्नभिन्नक्षेत्रेषु कीदृशमुपयोगं विदधाति, तदुपयोगदर्शकत्वेनैषा सम्पत्, तथा चार्हतां भगवतां सामान्येन सर्वलोकेषु भिन्न–भिन्न-रूपेण परार्थकरणरूपोपयोगप्रवेशेन पदपञ्चकवती, चतुर्थी सामान्येनोपयोगसम्पदुच्यते इति.

(प्रथमसम्पदमेव विशेषेण स्पष्टयितुमियं, उपयोगसम्पदस्ति, तीर्थंकरः प्रभुः सामान्येन सर्वलोकेषु परमार्थकरणद्वारोपयोगी भवत्यतोऽयोगव्यवच्छेदार्थकैः पञ्चभिर्विशेषणैः परार्थकरणरूप उपयोगः समाविष्टो वर्त्तते)
पंचमीं सामान्येनोपयोगसम्पदो हेतुसम्पदं कथयति–:

**तदपरैस्तु पञ्चभिरस्या एवोपयोगसम्पदो हेतुसम्पत्, अभयदानचक्षुर्दानमार्गदानशरणदानबोधिदानैः परार्थसिद्धेः,**

टी०...(५) तस्याः–सामान्येनोपयोगसम्पदःपदेभ्योऽन्यैरपरैस्तु पञ्चभिः पदैः (अभयदयाणं, चक्खुदयाणं, मग्गदयाणं, सरणदयाणं, बोहिदयाणमिति पदपञ्चकवती,)अस्या एवोपयोगसम्पदो = लोकोत्तमादि–पदपञ्चकवत्याः सामान्येनोपयोगसम्पद एव–नान्यसम्पदः, हेतुसम्पद्, यतोऽभयदानचक्षुर्दानमार्गदानशरणदानबोधिद्धानैर्हेतुभिः परार्थस्य (पूर्वोक्तोपयोगस्य) सिद्धिर्भवतीति, अस्यां सम्पदि श्रीतीर्थंकरप्रभोः शक्तीनां हेतुविशेषद्वारा विशेषत उपयोगो दर्शितः, (एतस्याः सामान्येनोपयोगसम्पदः कारणं 'अभयदयाणं' इत्यादिपदेषु पञ्चसु दर्शितमतस्तत्पदपञ्चकवती 'तद्धेतुसंपद्' उपयोगसम्पद एवार्थं हेतुसद्भावाऽपेक्षया कथयति सा हेतुसम्पदिति.)
षष्ठी स्तोतव्यसम्पद एव विशेषेणोपयोगसम्पत् कथ्यते–

**तदन्यैस्तु पञ्चभिः स्तोतव्यसम्पद एव विशेषेणोपयोगसम्पत्, धर्म्मदत्वधर्म्मदेशकत्वधर्म्मनायकत्वधर्म्मसारथित्वधर्म्मवरचातुरन्तचक्रवर्तित्वेभ्यस्तद्विशेषोपयोगात्,**

टी०...(६) तस्याः–सामान्येनोपयोगसम्पदो हेतुसम्पदः पदेभ्योऽन्यैः पञ्चभिः पदैः (धम्मदयाणं, धम्मदेसयाणं, धम्मनायगाणं, धम्मसारहीणं, धम्मवरचाउरंतचक्कवट्टीण' मिति पदपञ्चकवती) स्तोतुव्यसम्पत्सम्बन्धिन्येव–नान्यसम्पदः, विशेषेणोपयोगसम्पत्, यतो धर्मदत्वात् (धर्मदानतः) धर्मदेशकत्वात् (धर्मदेशनातः) धर्मनायकत्वात् (धर्माधिपत्यतः) धर्मसारथित्वतः (धर्मरथचालकत्वरक्षकत्वादितः) धर्म्मवरचातुरन्तचक्रवर्तित्वतः (धर्मराज्यसार्वभौमत्वतः) अर्हद्भगवद्रूपस्तोतव्यसम्पत्–संबंधिनी विशेषेणोपयोगवत्त्वेन विशषोपयोगसम्पत् कथ्यतेऽर्थादर्हन्तो भगवन्तो धर्मक्षेत्रेषु कुत्र कुत्र किं किं कार्यं (उपयोगविशेषं) कुर्वन्ति तद् दर्शयितु सम्पद्यस्यां पञ्चभिः पदैर्वर्णितमस्ति,
(उपयोगसम्पदोऽयंगुणं दीपयितुमर्थविशेषं ज्ञापयितुमर्थात् सकारणं स्तोतव्यस्य स्वरूपकथनस्य संभवेन सविशेषहेतूपयोगसम्पदपि ज्ञेया, एवं च प्रथम–सम्पद एव विशेषोपयोग–कार्यरूपोऽर्थो धर्मदादिपदपञ्चके विद्यतेऽत एषा विशेषोपयोगसम्पत्कथ्यते.) अथ सप्तमीं द्विपदीं स्तोतव्यसंपद एव सकारणां स्वरूपसम्पदं कथयति–:

**तदन्यद्वयेन तु स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पत्, अप्रतिहतवरज्ञानदर्शनधरा व्यावृत्तच्छद्मानश्चार्हन्तो भगवन्त इति हेतोः,**

टी०...(७) तस्याः–विशेषेणोपयोगसम्पदःपदेभ्योऽन्यपदद्वयेन–(अप्पडिहयवरनाणदंसणधराणं विअट्टछउमाणमिति पदद्वयवती) स्तोतव्यसम्पदः–अर्हद्भगवद्रूपस्तोतव्यसम्पत्सम्बन्धिनी, एव भाव्य-सम्बन्धिनी, सकारणा–कारणेन सहिता, स्वरूपसम्पत् कथ्यते, यतोऽप्रतिहतवरज्ञानदर्शनधरा व्यावृत्तच्छद्मानश्चार्हन्तो भगवन्तो भवन्तीति हेतुरस्तीति.
(अर्हतां भगवतां किं स्वरूपमस्ति ? येन स्तोतव्या भवन्ति, तेषां स्वरूपं 'अप्रतिहतवरज्ञानदर्शनधराश्च व्यावृत्तच्छद्मान इति पदद्वये दर्शितमस्ति, तत एव सप्तमी स्वरूपसम्पत् कथ्यते, एवं परमात्मनः स्तुतौ प्रबलं प्रकटं कारणं दर्शयितुं पदद्वयवतीयं स्वरूपहेतु–सम्पदपि कथिताऽस्ति.)
तथा च श्रीतीर्थंकरदेवस्य केवलज्ञानमयं पूर्णतामयं स्वरूपं निरूपयितुं सम्पदेषा सकारणा स्वरूपसम्पद् येन हेतुना स्वरूपं वर्ण्यते सा सहेतुक–स्वरूपसम्पद्विज्ञेयेति.
अथ चतुष्पदी, आत्मतुल्यपरफलकर्तृत्वसम्पदष्टमी वर्ण्यते–:

**तदपरैश्चतुर्भिरात्मतुल्यपरफलकर्तृत्वसम्पत्, जिनजापकत्वतीर्णतारकत्वबुद्धबोधकत्वमुक्तमोचकत्वानामेवंप्रकारत्वात्,**

टी०...(८) तस्याः सकारणस्वरूपसम्पदः पदद्वयाद्भिन्नैश्चतुर्भिः पदैः (जिणाणं जावयाणं, तिण्णाणं तारयाणं, बुद्धाणं बोहयाणं मुत्ताणं मोयगाणमिति पदचतुष्टयवती) आत्मतुल्यपरफलकर्तृत्वनामिकाऽष्टमी सम्पदस्ति, यतो जिनजापकत्व–तीर्णतारकत्व–बुद्धबोधकत्वमुक्तमोचकत्वानि, आत्म (अर्हद्भगवद्रूपात्म) तुल्यपर (भक्तादिपर) फलकर्तृत्वरूपैवंप्रकार–धर्म–शक्ति–गुणवन्ति सन्ति ।
(अस्यां सम्पदि, अर्हन्तो भगवन्तो यादृशं स्वस्वरूपमस्ति तादृशं स्वरूपफलं, अन्येभ्यो जीवेभ्यो ददतीत्यर्थः, यस्या अपरं नाम निजसमफलदसम्पदपि श्रूयतेऽर्थाद् विशुद्धप्रेम्णा प्रभोः स्तुतिं कुर्वतो भक्तान् प्रभुः स्वतुल्यान् कर्तुं प्रभुः प्रभवति 'नात्यद्भुतं भुवनभूषणभूत नाथ ! इत्यादि भक्तामरस्तोत्र–श्लोकोऽप्यत्र स्मरणीयः') अथ नवमीं प्रधानगुणाऽपरिक्षयप्रधानफलाप्त्यभयसम्पदं वर्णयति–:

**तदन्यैस्तु त्रिभिः प्रधानगुणापरिक्षयप्रधानफलाप्त्यभयसम्पदुक्ता, सर्वज्ञसर्वदर्शिनामेव शिवाचलादिस्थानसम्प्राप्तौ जितभयत्वोपपत्तेः,**

पं०...'प्रधानगुणापरिक्षयप्रधानफलाप्त्यभयसम्पदुक्तेति' प्रधानगुणयोः सर्वज्ञत्वसर्वदर्शित्वयोः, अपरिक्षयेण–अव्यावृत्त्या प्रधानस्य शिवाचलादिस्थानस्य, आप्तौ–लाभे 'अभयसम्पत्' जितभयस्वरूपा उक्तेति ।

ननु चैकस्वभावाधीनत्वाद्वस्तुनः कथमनेकस्वभावाक्षेपिका चित्रा सम्पदेकत्र ? यदि परमुपचारवृत्त्या स्यादित्याशङ्कयाह—

टी०...(९) तस्या—आत्मतुल्यपरफलकर्तृत्वरूपसम्पदः पदेभ्योऽन्यैस्त्रिभिः पदैः (सव्वण्णूणं सव्वदरिसीणं सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावित्तिसिद्धिगइनामधेयं ठाणं संपत्ताणं णमो जिणाणं इति पदत्रयवती) प्रधानगुणापरिक्षयप्रधानफलाप्त्यभयाख्यसम्पदुक्ता—कथिता, यतः सर्वज्ञत्वसर्वदर्शित्वरूपप्रधानगुणा—परिक्षयेण अव्यावृत्त्या (क्षायिककेवलज्ञानकेवलदर्शनवत्त्वेनैव—नैव क्षायिककेवलज्ञानकेवलदर्शनरहितत्वेन) प्रधानफलरूपशिवाचलारुजानंताक्षयाव्याबाधापुनरावृत्तिसिद्धिगतिनामकस्थानसम्प्राप्तौ सत्यां जितभयत्वं—भयजेतृत्वमुपपन्नं भवति.
(एषा परमार्थतो मोक्षपदप्राप्तानां महतां भगवतां स्तुतिरूपा तथा परमार्थदृष्ट्या सत्यनित्यमोक्ष सुखस्वरूपगर्भिता, सव्वण्णूणमित्यादिपदत्रयवती नवमी मोक्षसम्पदपि कथ्यते)
तथाचान्तिमसम्पद्द्वयी प्रथमस्तोतव्यसम्पत्सम्बन्धवत्येव यद्यपि ग्रन्थे स्पष्टाक्षरै र्न कथिता तथाप्यर्थापत्त्या द्वितीयासम्पदादिवदेषाऽन्तिमसम्पद्द्वयी प्रथमसम्पत्सम्बन्धवत्येवेति. ननु चैकस्वभावाधीनत्वाद्वस्तुनः कथमनेकस्वभावाक्षेपिका स्तोतव्यसम्पदादिका चित्र-सम्पदेकत्र ? यदि परमुपचारवृत्त्या स्यात्—तथा चैकः स्वभावो वस्तुनः कथ्यते, वस्तुनो लक्षणं एकस्वभावाधीनत्वमत एकव्यक्तिविशेषवस्तुन्येकसम्पद् युज्यते, कथमनेकस्वभावाक्षेपिका—नानास्वभावाकर्षिका, स्तोतव्यसंपदादिका नवसंख्याका भिन्नभिन्नगुणधर्मस्वभावशक्तियुक्ता, चित्रा—साक्षात्पारंपर्येण वा नानाप्रकारा सम्पदेकत्र-अर्हद्भगवद्व्यक्तिविशेषे मुख्यवृत्त्या कथं ? यदि परमुपचारवृत्त्या गौणवृत्त्या स्यादित्याशङ्कयाह—:

**इयं च चित्रा सम्पत्, अनन्तधर्म्मात्मके वस्तुनि मुख्ये मुख्यवृत्त्या,**

पं०...'इयं च' चित्रेत्यादि'.

टी०...अनन्तधर्मात्मकवस्तुनि-अर्हद्भगवद्रूपमुख्यवस्तुन्येतत्स्तोतव्यसम्पदादि—नवविधा—चित्रा नानाधर्मवत्यः, मुख्यवृत्त्या-अन्ययोगव्यवच्छेदकविशेषणरूपतत्तद्धर्मवाचकशब्दतः कथ्यमानया घटन्ते न तत्र शङ्कावकाशः,
(अथवेयमन्तिमा प्रधानगुणाऽपरिक्षयप्रधानफलाप्त्यभयसम्पत्, प्रधानगुण—अक्षयस्थिति—जितभयत्वरूपोत्कृष्टपर्यन्तफलरूप—धर्मत्रयवती चित्रा—(अनेकधर्मावच्छिन्ना) सम्पत्, अनन्तधर्मात्मकमुख्यवस्तुरूपसिद्धपरमात्मनि पूर्वोक्तधर्मत्रयस्य मुख्यत्वाद् धर्मत्रयविशिष्टसिद्धहेतु—परमात्मनः स्तुतिर्मुख्यवृत्त्या मुख्या ज्ञेया.) प्रणिपातदण्डकसूत्ररूपशक्रस्तवे, दर्शितानां सम्पदां क्रमोपन्यासे किं कारणमस्ति ? ताद्दृशशङ्कानिरासायाह—:

**स्तवप्रवृत्तिश्चैवं प्रेक्षापूर्वकारिणामिति संदर्शनार्थमेवमुपन्यासोऽस्य सूत्रस्य, स्तोतव्यनिमित्तोपलब्धौ तन्निमित्तान्वेषणयोगादिति प्रस्तावना ।**

पं०...'स्तोतव्यनिमित्तोपलब्धाविति' स्तोतव्याः–स्तवार्हा अर्हन्तस्त एव निमित्तं–कर्मकारकत्वा-द्धेतुः स्तवक्रियायास्तस्योपलब्धौ–ज्ञाने । 'तन्निमित्ताद्यन्वेषणयोगादिति' तस्य–स्तोतव्यरूपस्य निमित्तस्यार्हल्लक्षणस्य निमित्तं, आदिकरत्वाद्यादिशब्दादुपयोगादिसंग्रहः, तस्यान्वेषणाद्–घटनादिति ।

टी०...'प्रेक्षापूर्वकारिणा' मिति = बुद्धिपूर्वकप्रवृत्तिं कुर्वतामेवमेव स्तवस्तोत्रविषयक-प्रवृत्तिर्भवतीति सन्दर्शनार्थमेवास्य सूत्रस्य–एतन्नमोत्थुणं सूत्ररूपस्तोत्रस्योपन्यासः–प्रौढार्थगर्भितपद-रचनारूप उपन्यासः कृत एवेति.

ये स्तुतियोग्या अर्हन्तः सन्ति त एवार्हन्तो निमित्तं–स्तवक्रियायाः कर्मकारकत्वेन हेतुरस्ति (कर्त्तुर्व्याप्यं कर्म (सि. २–२–३) कर्त्रा क्रियया यद्विशेषेणाप्तुमिष्यते तत्कारकं कर्म च स्यात् (कर्त्तुरीप्सिततमं, क्रियाजन्यफलाश्रयं कर्म) कर्त्ता च क्रियां विना न किञ्चिदाप्तुं शक्नोति, अतः कारणरूप–स्तुतिक्रियया यद् (अर्हदादि) विशेषेणाप्तुमिष्यते स्तुतिकर्त्रा, तदर्हदादि, कर्मकारकं, किमर्थं स्तुतिरूपक्रियया तदर्हदादि, आप्तुमिष्यते ? न निवर्त्तयितुं, नापि गुणान्तराण्यापादयितुं, आप्तुमिष्यते, अपि तु घटं पश्यतीति वत्, विषयीकर्त्तुमर्हदादि, स्तुतिकर्त्रा, आप्तुमिष्यते इति ज्ञेयम्, 'क्रिया–हेतुः कारकम्' (सि. २–२–१) कारकत्वं च क्रियाजनकत्वम्, करोति क्रियां निर्वर्त्तयतीति व्युत्पत्तेर्भाष्येऽपि दर्शनात् । न च क्रियाशब्दस्य प्रधानक्रियायां मुख्यत्वेन कर्मादिकारकाणां प्रधान-क्रियाऽनिवर्त्तकत्वात्कथं तेषां कारकत्वम्, वाच्यम्, सर्वेषां कारकाणां स्वस्वाऽवान्तर–क्रियाद्वारा प्रधानक्रियानिष्पादकत्वात्तदुपपत्तेः (जनकत्वोपपत्तेः) अर्थात् स्तवनक्रियां प्रति विषयनिमित्तभूता-र्हद्भगवद्–विषयकोपलब्धौ–ज्ञाने सति, प्रेक्षावतां विशेषज्ञानसम्पादनाय जिज्ञासोद्भवति यथा स्तोतव्यरूपस्य निमित्तस्यार्हल्लक्षणस्य किं निमित्तं–स्तोतव्यस्यार्हतः स्तुतिं कर्त्तुं, तत्र स्तोतव्ये किं विशेषतत्त्व वर्त्तते ? इति जिज्ञासा–शमनाय, सूत्रकारो द्वितीयसम्पदि स्तोतव्यनिष्ठमन्ययो-गव्यवच्छेदकविशेषणगर्भितमादिकरत्वादिकमन्वेषयति घटते–युज्यते एव, आदिशब्दादुपयोगा-दिसंग्रहः–तस्यान्वेषणाद्–घटनादिति.

अत्र प्रेक्षावज्जिज्ञासा–शमनानुकूलसम्पदां क्रमघटना–संगतिरस्ति तद्वस्तु, दर्श्यते तथाहि–

(१) प्रथमः प्रश्न = प्राश्निकनिष्ठजिज्ञासाप्रतिपादकवाक्यं हि प्रश्नः केन निमित्तेन (कं विषय-मुद्दिश्य) स्तवनरूपक्रियायाः प्रवृत्तिरस्ति ? अर्थात् स्तवनक्रियायाः किं कर्माऽस्ति ? कं स्तोतुं भवन्तः प्रवृत्ताः ? (एष प्रेक्षावतो जिज्ञासापूर्वकः प्रथमः प्रश्नः)

प्रत्युत्तरम् = एवं प्रेक्षावत्पुरुषनिष्ठ–जिज्ञासायाः पूरणार्थं प्रथम–सम्पद उपन्यासः (प्राश्निकस्य प्रश्नं ज्ञात्वोत्तरदातुः कथनेच्छा प्रवर्त्तते, तत्कथनेच्छाया वाक्यरचनोपयोग उपन्यासः) कृतोऽस्ति, अर्थादर्हतो भगवतो विषयीकृत्य–विशेष्यीकृत्य स्तवनक्रियाप्रवृत्तिरस्ति, स्तवनरूपक्रियायाः कर्म (विषयरूपनिमित्तं) अर्हन्तो भगवन्तः सन्ति.

(२) प्रश्नः = अर्हत्सु भगवत्सु हेतुभूतं विशिष्टं किं तत्त्वमस्ति ? यतस्ते स्तोतव्या एव.

प्रत्युत्तरम् = एवं प्रेक्षावद् द्वितीयजिज्ञासाशमनाय द्वितीयसम्पदुपन्यासः, यतोऽर्हन्तो भगवन्त आदिकरत्वेन, तीर्थंकरत्वेन, स्वयंसम्बुद्धत्वेन स्तोतव्या एव, अत्रार्हतां भगवतां स्तुतौ साधारणासाधारण-हेतवो दर्शिताः प्रेक्षावतामेतावन्मात्रेण जिज्ञासा–तृप्ति नं भवति, ते तु पारंपर्येण–मूलतस्ते स्तोतव्यात्मनो वैशिष्ट्यं–मौलिकमुच्चत्वं द्रष्टुमत्यातुराः पुनः पृच्छन्ति,

(३) प्रश्नः = किं स्तोतव्या अर्हन्तो भगवन्त आकालं–सदाकालं विशिष्टकोटीकाः सन्ति वा न वा ? स्तोतव्येषु सर्वपुरुषेभ्य उत्तमत्वं वा वैशिष्ट्यं मौलिकं वा पाश्चात्त्यं किं वर्त्तते ?

प्रत्युत्तरं = एतेऽर्हन्तो भगवन्तः स्तोतव्याः सदाकालं विशिष्टकोटीकाः सन्त्येव ततो विशेषेण स्तोतव्या इति सन्दर्शनार्थं तथा प्रेक्षावत् = पुरुषजिज्ञासापूरणाय, तृतीयसम्पद उपन्यासः, अर्थात् पुरुषोत्तम–पुरुषसिंह–पुरुषवरपुंडरीक–पुरुषवरगन्धहस्तिन इति विशेषणैः सर्वपुरुषेभ्यः सदाकालं अर्हतां भगवतामात्मानो विशिष्टतमा दर्शिताः, अत्र स्तोतव्य–विषयकस्तुतिकरणे विशिष्टगुणरूपा हेतवो निरूपिताः सन्ति.

(४) प्रश्नः = किमेतेऽर्हन्तो भगवन्तः, केवलं पुरुषेष्वेवोत्तमाः सन्ति अथवा समस्तेलोकेऽपि विशिष्टाः सन्ति ? यदि लोकेऽप्युत्तमा भवेयुस्तदा ते लोकोत्तमाः स्वस्वशवतीनां लोकेऽपि भिन्न-भिन्नलोकरूपक्षेत्रेषु कीदृशमुपयोगं (परमार्थं) विदधति ?

प्रत्युत्तरं = एवं प्रेक्षावज्जिज्ञासापूरणाय चतुर्थ्याः सामान्येनोपयोगसम्पद उपन्यासः कृतः, एते तीर्थंकरा लोकोत्तमा–लोकनाथा-लोकहिता-लोकप्रदीपा–लोकप्रद्योतकरा भवन्ति, तीर्थंकराः समस्त–पंचास्तिकायात्मक-लोके, उत्तमाः सन्ति, एतत्सम्पदः प्रथमपदेन दर्शितमिति, अथ कया कयारीत्या ते उत्तमाः ? एतद्दर्शयितुं लोकनाथादीनि चत्वारि विशेषणपदानि दत्तानि, अस्यां सम्पदि श्रीतीर्थंकरदेवः स्वशक्तीनां लोकस्य भिन्नभिन्नविभागेषु कीदृशमुपयोगं–परमार्थं कुर्वन्तः सन्ति ? इति ज्ञापयति. अत एषोपयोगसम्पत् कथ्यते.

–अथ सामान्येनोपयोगसम्पदो हेतूनां जिज्ञासां पृच्छति–

(५) प्रश्नः = एतेऽर्हन्तो भगवन्तः कीदृशं किं वा दानं कृत्वा लोकेषु सामान्येनोपयोगं–परमार्थं कुर्वन्तीति तस्योपयोगस्य हेतून् भवन्तो दर्शयन्तु ।

प्रत्युत्तरम् = प्रेक्षावल्लोकेषु सामान्येनोपयोगहेतुविषयक–जिज्ञासा यदोद्भूता तदा सूत्रकारस्त-ज्जिज्ञासापूरणाय पञ्चमीं सामान्येनोपयोगहेतुसम्पदं कथितवान्, अनया रीत्या तीर्थंकरो भगवान्, अभयदानं–चक्षुर्दानं–मार्गदानं–शरणदानं–बोधिदानं कृत्वा लोकेषु परमार्थं विदधातीति.

(६) प्रश्नः = अर्हतां भगवतां हेतुपूर्वकः सामान्येनोपयोगो भवद्भिर्ज्ञापितः परंतु वयं पृच्छामः, यत् तीर्थंकरदेवानां विशेषेणोपयोगो (परमार्थः) विद्यते वा न वा ? यद्यस्ति तर्हि दर्श्यतां, कस्मिन् विषये विशेषेणोपयोगोऽस्तीति ?

प्रत्युत्तरम् = एवं-प्रकारावच्छिन्नजिज्ञासापूरणाय सूत्रकारेण षष्ठी विशेषेणोपयोगसम्पदुपन्यस्ता, अर्थात् तीर्थंकरदेवा धर्मस्य क्षेत्रेषु किं कीदृशं वा कार्यं विदधति ? तदेतत्सम्पन्मध्ये दर्शितम् ।
—अथ विशेषनिश्चयार्थिनः प्रेक्षावन्तोऽर्हतां स्वरूपं निर्णेतुं पृच्छन्ति—
(७) प्रश्नः = यानर्हतः स्तोतुं भवन्तः सज्जास्तदा तेषामद्भुतमच्युतं स्वरूपं किमस्ति ? तद्दर्श्यतां, तज्ज्ञात्वा, तत्स्तुतौ, अद्वैतानन्दरस उल्लसत्येवाऽस्माकम् ।
प्रत्युत्तरं = एवंविधजिज्ञासापूर्त्यर्थं सकारणा स्वरूपसम्पदुपन्यस्ता, अप्रतिहतवरज्ञानदर्शनधरत्वं व्यावृत्तच्छद्मत्वमित्यर्हतां भगवतां शाश्वतस्वरूपमस्ति, एतादृशस्वरूपवन्तोऽर्हन्तो भगवन्तः स्तोतव्या एवेति.
—अथ कश्चिद्, श्रीमान् लक्षाधिकलक्ष्मीपतिः श्रेष्ठी समस्ति, तस्य सुष्ठुभक्ति—सेवाकारकं सेवकं स्ववद् धनवन्तं श्रीमन्तं वा कर्तुं नालं तर्हि तस्य श्रेष्ठिनः श्रीमत्वं निरर्थकं गण्यते, तस्यैतादृशस्य श्रेष्ठिनः सेवां कर्तुं कश्चित् सज्जनो नेच्छति, तादृशीरीति र्देवोपासना—सत्कैवाऽस्ति, यस्य देवस्य सेवया (स्तुत्या) परिणामेऽन्ततो गत्वा तद्वत्पदप्राप्ति र्न भवेत्तदा, ताः सेवाभक्तिस्तुतयो निष्फलतां यान्ति, परन्तु जिनेश्वरो देवाधिदेवः स्वाज्ञापालनतत्परं भक्तं (भक्त्या स्वसत्यगुणस्तावकं) स्वतुल्यं कर्तुं समर्थो भवति वा न वा ? एतादृशजिज्ञासातुरः पेक्षावान् पृच्छति =
(८) प्रश्नः = भगवन् ! एष जिनेश्वरो देवः स्वस्य परमभक्तं (स्वसद्गुणस्तावकं) स्वदर्शितमार्गगमनकारकं स्वतुल्यं कर्तुं समर्थोऽस्ति वा न वा ? एतेषामर्हतां स्वरूपं दर्शय !
प्रत्युत्तरं=एवंविध-जिज्ञासासम्पूरणकृते सूत्रकारेणाऽष्टमी, आत्मतुल्यपरफलकर्तृत्वरूपा सम्पदुपन्यस्ता एतस्यां सम्पदि श्री परमात्मा वीतरागः, स्वतुल्यं परभक्ताय फलं कर्तुं प्रत्यलोऽस्ति. श्रीभगवान् महाकृपासागरोऽस्ति, भगवत्सत्क—स्तुति—भक्ति—स्वतादात्म्य—स्वाभेदकर्त्तारं स्वतुल्यं करोत्येवेति.
(९) प्रश्नः—सर्वज्ञतासर्वदर्शितारूपप्रधानगुणस्याऽक्षयस्थितिद्वारा शिवाचलादिरूपसिद्धिगतिस्थानरूपप्रधानफलवन्तोऽर्हन्तोभगवन्तः सन्ति न वा ? तथा च तद्दुर्लभलाभप्राप्त्या सदा भय—विजेतारः सन्ति वा न वा ?
प्रत्युत्तरं = एवंविधजिज्ञासायाः शान्तये नवमी, प्रधानगुणापरिक्षय—प्रधानफलाप्त्यभयनामिका सम्पत्, सूत्रकारेणोपन्यस्ता, अर्थात् सर्वज्ञेषु सर्वदर्शिषु, एव शिवाचलादिस्थानस्य प्राप्तौ सत्यामभयता सदा सञ्जाघटीति, इयतीनां सम्पदां स्वामिनस्तेऽर्हन्तो भगवन्तः कथं प्रेक्षावतां स्तोतव्या न स्युः ? अपितु सदा स्तोतव्या एव तत्र कः प्रश्नः ?

**अथास्य व्याख्या—तल्लक्षणं च संहितादि, यथोक्तम्—"संहिता च पदं चैव, पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा ॥१॥" इति,**

**टी०**...चैत्यवंदनसूत्रस्य व्याख्यानस्य प्रस्तावनाऽनन्तरं—अथ प्रस्तुतसूत्रस्य व्याख्या—तल्लक्षणांगादि—विभागक्रमं दर्शयति तथाहि = अथ 'अस्य' चैत्यवंदनसूत्रस्य व्याख्या—विवरणं क्रियते,

प्रथमतः, तल्लक्षणं–व्याख्याया लक्षणमधुनाऽऽरभ्यते 'संहतादि, तल्लक्षणं' व्याख्याया लक्षणम् (असाधारण–धर्मो वा त्रिदोषशून्यम्) संहिताद्यन्यतमत्वं व्या. लक्षणम्. यथोक्तं संहितादि. (समुदितपदामादौ विद्वान् वदेदिह संहितां, तदनु च पदं तस्यैवार्थं वदेदथ विग्रहम्। निपुणभणितिं तस्याऽऽक्षेपं तथाऽस्य च निर्णयं बुधजनमता सूत्रव्याख्या भवेदिति षड्विधा ।। इत्यत्र मधुरं भणनीयं च गेयम्) अन्यत्राऽपि एवं भण्यते तथाहि

"पदच्छेदः पदार्थोक्तिः, विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं, व्याख्यानं पञ्चलक्षणम् ।।
पदप्रकृतिभावश्च, वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः, संहिता वा पदाश्रया ।।"

इति वाक्यपदीये द्वितीयकाण्डे श्लो. ५८)
अथ शास्त्रकारेण व्याख्याया अंगानि कथ्यन्ते–:

**एतदंगानि तु जिज्ञासा गुरुयोगो विधि इत्यादीनि अत्राप्युक्तम्–"जिज्ञासा[1] गुरुयोगो[2] विधिपरता[3] बोधपरिणतिः[4] स्थैर्यम्[5] । उक्तक्रिया[6]ल्पभवता[7], व्याख्यांगानीति समयविदः।।४।। "**

**टी०**...इत्युद्देशग्रन्थः (नाममात्रेण वस्तुसंकीर्तनमुद्देशः) अथ शास्त्रकारः संहितादि–षड्विधां व्याख्यां, नमोत्थुणं सूत्रमध्ये 'नमोत्थुणं अरिहंताणं'–'नमोऽस्त्वर्हद्भ्यः' इति वाक्यं गृहीत्वा संगमयति.

**तत्र 'नमोऽस्त्वर्हद्भ्यः' इति संहिता,**

**टी०...(१)** तत्रेति–नमोत्थुणं सूत्रे प्रथमं तावत् 'नमोत्थुणं अरिहंताणं–नमोऽस्त्वर्हद्भ्यः' इति वाक्ये संहितारूपं प्रथमं व्याख्यालक्षणं घटयति. तथाहि = 'नमोऽस्तु' अत्र विसर्गसंहिता, 'नमोऽस्त्वर्हद्भ्यः' अत्र स्वरसंहिता, 'अर्हद्भ्यः' अत्र व्यञ्जनसन्धिः, (अत्र 'अतोऽति रोरुः, सि. १-३-२०'। 'अवर्णस्येवर्णादिनैदोदरल्, सि. १-२-७'। 'एदोतः पदान्तेऽस्य लुक्, सि. १-२-२७' 'इवर्णादेरस्वे स्वरे यवरलम्, सि. १-२-२१' 'तृतीयस्तृतीयचतुर्थे, सि. १-२-४६'। इत्यादिसूत्राण्युपयुक्तानि, तत्रास्खलितपदोच्चारणं संहितेति परिभाषा, परःसन्निकर्षः संहिते–पा. १-४-१०९ ति वचनात्, 'संहितैकपदे नित्या, नित्या धातूपसर्गयोः नित्या समासे वाक्ये तु, सा विवक्षामपेक्षते' ।। वर्णानामतिशयितः सन्निधिः संहिता.)

**पदानि तु नमः, अस्तु, अर्हद्भ्यः,**

**टी०...(२)** 'नमोऽस्त्वर्हद्भ्यः' इति वाक्ये, पदरूपं द्वितीयं व्याख्यालक्षणं घटयति.

'नमः' नैपातिकं (निपात-पठितं) प्रथमं पदं, 'अस्तु' इति द्वितीयं पदं कर्तृक्रियावाचकं (आख्यातिकं–क्रियापदं), 'अर्हद्भ्यः' चतुर्थी–विभक्त्यन्तं नमोयोगात्, विशेष्यवाचकं इत्यस्मिन् वाक्ये त्रीणि पदानि (अर्थवाचकानि, विभक्त्यन्तानि च)
अथ 'नमोऽस्त्वर्हद्भ्यः' इति वाक्येऽस्मिन् पदत्रयप्रतिपाद्यार्थरूपं व्याख्यायास्तृतीयं लक्षणं घटयति–:

**पदार्थस्तु 'नम' इति पूजार्थं, पूजा च द्रव्यभावसङ्कोचः, तत्र करशिरः पादादिसंन्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोग इति, अस्त्विति भवतु प्रार्थनाऽर्थोऽस्येति, णमिति वाक्यालङ्कारे, प्राकृतशैल्या इति चेहोपन्यस्तः, 'अर्हद्भ्यः' इति देवादिभ्योऽतिशयपूजामर्हन्तीत्यर्हन्तस्तेभ्यो, नमः शब्दयोगाच्चतुर्थी ।**

पं०...'प्राकृतशैल्येति चेहोपन्यस्त इति' प्राकृतशैल्या–प्राकृत–ग्रन्थस्वाभाव्येन, 'इति' एवं वाक्यालङ्कारतया 'चः' समुच्चये 'इह' सूत्रे 'उपन्यस्तः' संस्कृते वाक्यालङ्कारतयाऽस्य प्रयोगादर्शनात् ।।

टी०...(३) नमस्कारवाचकस्य 'नमः' पदस्य शक्तिः, कोशाप्तवाक्यादितः पूजारूपे विशिष्टार्थे निरूढाऽस्ति, तथाहि प्रथमं तावत् 'नमः' इति पदस्य सामान्यज्ञानाऽनन्तरं 'नमः' पदस्य शक्तिः' पूजाऽर्थेऽस्तीति ज्ञानं भवति, ततः 'नमः' इति पदेन पूजार्थस्योपस्थितिर्भवत्यर्थान्नमः पदं पूजार्थम्, पूजा च द्रव्यभाव–संकोचरूपेण भेदद्वयवती.

(१) तत्र–द्रव्यभावसंकोचरूपप्रकारद्वयावच्छिन्नपूजाघटकद्रव्यसंकोचं स्वरूपयति 'करशिरः पादादिसंन्यासो द्रव्यसंकोचः' अर्थात् करपादमस्तकादि–शरीरसत्कावयवानां ग्रहणकम्पनचलनादि क्रियां निरुद्ध्य, करद्वयं ललाटे नियुज्य प्रणामरूपाऽञ्जलिबन्धः, अर्धाङ्गावनतप्रणामस्तथा पञ्चाङ्गीप्रणिपातादिमुद्रावि (सं) न्यासः (सम्यङ्न्यासः) द्रव्य–सङ्कोचः

(२) 'भावसङ्कोचस्तु विशुद्धस्य मनसो नियोगः इति, अर्थाद्, अर्हदादिगुणेषु विशुद्धस्य–निर्दोषस्य परमपवित्रस्य मनसोऽन्तः करणस्य–उपयोगस्य नियोगः (प्रवेशः–प्रीत्या प्रणिधानं–अनन्यवृत्तिः) भावसंकोचः–अत्यन्तनिर्मलमनसः प्रभोर्गुणगणैः सह विशिष्टसुदृढरूपतया बन्धनमित्यर्थः

(इत्थ नमुत्ति पयं दव्वभावसंकोचरुव पूयत्थं । करशिरमाइ द्रव्वे, पणिहाणाइ भवे भावे) द्रव्यभावसंकोच–विषयिणी चतुर्भङ्गी निरुप्यते.

(१) द्रव्यसंकोचनमस्कारो भवतु न भावसंकोचनमस्कारः,
(२) द्रव्यसङ्कोचो न भवेच्च भावसंकोचो भवतु,
(३) द्रव्य–संकोचो भवेच्चापि भावसंकोचो भवतु,
(४) द्रव्य–संकोच–भावसंकोचो–भयाभावः ।।

अत्राऽन्तिमो भङ्गस्तु शून्य एव, द्वितीय–तृतीयभङ्गावादरणीयौ, प्रथमभङ्गस्त्वनादरणीय एव. द्रव्यभावसङ्कोचयोर्मध्ये भावसङ्कोच एव मुख्योऽस्ति, यतः स एव, ऐकान्तिकात्यन्तिक-फलदोऽस्ति भाव संङकोचरहितो द्रव्यसङ्कोचः पालकादिवन्निष्फलः, तथाऽनुपयुक्तसम्यग्दृष्ट्यादेस्तु निष्फलः ।

द्रव्यसङ्कोचरहितो भावसंकोचः, अनुत्तरदेवादेः, ग्लानादेः, उपयुक्तसम्यग्दृष्ट्यादेस्तु सकलोऽस्ति, तथापि द्रव्यसंकोचभावसंकोचसम्पन्नस्य या विशुद्धिर्भवति, सा विशुद्धिः प्रायो द्रव्यसंकोचरहितस्य केवल–भावसंकोचवतो न भवति, द्रव्यभावसंकोचरूपनमस्कारो यथाविधि-शिरोनमनादिक्रियानिष्ठो पयुक्त–सम्यग्दृष्ट्यादिषु घटते, शाम्बकुमारवदुभयसंकोचः श्रेष्ठपरममंगलकार्येव. 'अस्त्विति–भवतु प्रार्थनाऽर्थोऽस्येति' अस्तु–भवतु इति द्वितीयपदेन विवरणं कृत्वा, क्रियापदस्यार्थः प्रार्थनाऽस्ति.

(अत्र विवरणादपि शक्तिग्रहः । विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम् । यथा घटोऽस्तीत्यस्य कलशोऽस्तीति विवरणाद् घटपदस्य कलशेशक्तिग्रहस्तथा–अस्त्वित्यस्य भवतु इति विवरणात् प्रार्थनाऽर्थ उपलभ्यते 'अत्थुति पत्थणा' इत्याप्तवाक्यादपि प्रार्थनार्थः ।)

'ण' मिति वाक्यालङ्कारे, 'नमोत्थुणं' इति प्राकृतवाक्यस्थितं 'ण' मिति पदं वाक्येऽलङ्काररूपार्थं द्योतयति, किञ्चेह प्राकृतशैलीद्वारा 'ण' मिति पदस्योपन्यासः कृतः । 'अर्हद्भ्यः' इति देवादिभिरतिशयरूपपूजामर्हन्तीत्यर्हन्तस्तेभ्यो नमः शब्दयोगाच्चतुर्थी, 'सुरासुरादिभिर्निर्मिताशोकवृक्षाद्यष्टमहाप्रातिहार्यरूपां धर्मचक्राद्यतिशयस्वरूपां त्रिभुवनाऽतिशायिनीं पूजामर्हन्तीत्यर्हन्तस्तेभ्यो नमः–नमः शब्दयोगाच्चतुर्थी विभक्तिः.

('नमःस्वस्ति–स्वाहा–स्वधाभिः' सि.–२-२-६८, एभिर्योगे नित्यं चतुर्थी) चतुर्थीविभक्त्या अर्थ उद्देश्यत्वम्, तथाचार्हदुद्देश्यकनमस्कारो (पूजा) भवतु–इति प्रार्थना, विधिनिमन्त्रणामन्त्रणाधीष्ट–संप्रश्न प्रार्थने–सि.–५-४-२८, विध्यादिषु षट्सु सर्वप्रत्ययापवादौ सप्तमी (विध्यर्थः) पञ्चम्यौ (आज्ञार्थः) प्रार्थना–मे 'नमोऽस्त्वर्हद्भ्यः' इति बोध्यम्)

अथ 'नमोस्त्वर्हद्भ्यः' इति अत्र पदविग्रहरूपं लक्षणं घटते वा नवेति प्रश्ने–:

**पदविग्रहस्तु यानि समासभाञ्जि पदानि तेषामेव भवतीति नेहोच्यते,**

टी०...(४) 'नमोऽस्त्वर्हद्भ्यः' इति वाक्ये पदविग्रहरूपं व्याख्यालक्षणं नास्ति, यतः पदविग्रहस्तु तेषां पदानां भवति, यानि पदानि समासभाञ्जि भवन्ति, अत्र त्रीणि पदानि समासगतानि न सन्त्यतः पदविग्रहरूपं व्याख्यालक्षणं नास्त्येव.

**चालना तु अधिकृतानुपपत्तिचोदना, यथा–अस्त्विति प्रार्थना न युज्यते, तन्मात्राद्विष्टासिद्धेः,**

टी०...(५) चालना = अधिकृतस्य–प्रस्तुतस्यानुपपत्तये (अघटनाय) चोदना–प्रेरणा–प्रश्न–उद्भावना 'चालना' अर्थाद् 'आक्षेपः' कथ्यते. यथा 'अस्त्वि' ति पदप्रतिपाद्योऽर्थः प्रार्थना, न युज्यते–युक्तियुक्ता न भवति. यतः, तन्मात्रात्–प्रार्थनामात्रेणेष्टं फलं न सिद्ध्यति.

प्रत्यवस्थानं = अत्र प्रत्यवस्थानरूपं व्याख्यालक्षणं षष्ठं घटयति–:

**प्रत्यवस्थानं तु नीतितस्तन्निरासः, यथा—युज्यत एव, इत्थमेवेष्टसिद्धेरिति, पदयोजना-मात्रमेतद्, भावार्थं तु वक्ष्यामः,**

टी०...(६)प्रत्यवस्थानं—समाधानं, तु 'नीतितः' न्याय—युक्तितः (व्यवहारप्रतीति-रूपनीतितः) 'तन्निरासः' चालनायाः—आक्षेपस्य—पूर्वपक्षीयानुपपत्तेर्निरासः—निरसनमर्थादुत्तरपक्षीयं समाधानं प्रत्यवस्थानं ज्ञेयम्, यथा 'अस्तु' इति पदार्थः प्रार्थना युज्यत एव—युक्तियुक्ता भवत्येव यत इत्थमेव-अनेन प्रकारेणैवेष्टं फलं सिद्ध्यति। व्याख्यालक्षणं संहितादि—विषयकं 'नमोत्थुणं अरहंताणं' इति वाक्ये पदयोजनामात्रमेतद् भावार्थ—विवरणं तु वक्ष्यामोऽग्रे कथयिष्यामः।

अथ संहितादिरूपं व्याख्याया लक्षणं प्रतिपाद्य, व्याख्याया हेतुरूपाण्यङ्गानि प्रारभ्यन्ते—:

**व्याख्याङ्गानि तु जिज्ञासादीनि, तद्व्यतिरेकेण तदप्रवृत्तेः,**

टी०...व्याख्याया अङ्गानि—हेतुरूपाणि जिज्ञासादीनि भवन्ति, यतो जिज्ञासादीनाम-भावे व्याख्यायाः प्रवृत्तेरभावः, जिज्ञासादिसद्भावे व्याख्याप्रवृत्तिसद्भावः, इत्यन्वयव्यतिरेकसह-चारज्ञानेन कार्यकारणभावनिश्चयो भवत्यतो व्याख्यानविषयक—प्रवृत्तिं प्रति जिज्ञासादयः परम-कारणमस्तीति सिद्धम्।

अथ प्राग् नैसर्गिकी जिज्ञासोद्भवति यतः 'नमोत्थुणं अरहंताणं' एवंविध—चैत्यवंदनान्तर्गत—वन्दनायाः को हेतुः ? इति प्रश्नोत्तरदानाय कथयति—:

**तत्र धर्मं प्रति मूलभूता वन्दना,**

टी०...चैत्यवंदनसूत्रघटकवंदनाऽथवा 'नमोत्थुणं अरहंताणं' इति वाक्यघटकनमस्कार—रूपवन्दना, व्यवहारनिश्चयनयसम्मतसर्वज्ञप्रणीत—धर्मं प्रति मूलभूता वन्दना.

(वन्दनैषा धर्मं प्रत्यात्मनोऽग्रतो वर्धितुं मूलमस्त्यर्थाद्—गुणगणस्वरूपवतां भगवतां वन्दनेनाऽऽत्मक्षेत्रे धर्मबीजस्य वपनं, अनुकूलसामग्रीतो बीजतो धर्मचिन्ताऽऽदिरूपाण्यंकुराणि, प्रादुर्भवन्ति च श्रुता-ऽभ्याससदाचाररूपशाखाप्रशाखादिः, स्वर्गापवर्गप्राप्तिरूपपुष्पफलादिः, प्रादुर्भवति. तथा च नमस्कारकरणविषयिणी योग्यताऽपि, अतिशयलघुकर्मणाऽऽत्मनैव प्राप्यते, अल्पीयस्यात्मशुद्धिरपि येषामात्मनां जाता नास्ति ते, आत्मानः परमशुद्धपरमपदप्राप्त—परमात्मदशां प्राप्तेभ्यो भावतो नमनं कर्त्तुं न शक्नुवन्ति.)

अथ व्याख्याया अङ्ग—हेतुरूपाणि जिज्ञासादीनि निरूपयन् प्रथमं तावद् 'यथोद्देशं निर्देशः' इति न्यायेन जिज्ञासां सूक्ष्मेक्षिकया वर्णयति—:

**अथ कोऽस्यार्थ इति भावतो जिज्ञासा, न सम्यग्ज्ञानादृते सम्यक्क्रिया 'पढमं नाणं तओ दये' त्ति वचनात्, विशिष्टक्षयोपशमनिमित्तेयं नासम्यग्दृष्टेर्भवतीति तन्निमित्तः,**

टी०.. (१) अथ 'अस्ये' ति चैत्यवंदनसूत्रस्याथवा 'नमोत्थुणं अरहंताणं' इति वाक्यस्य कोऽर्थः ? इति ज्ञानविषयकेच्छा, जिज्ञासा (चैत्यवंदनादि-सूत्रविशेष्यकार्थप्रकारकज्ञानविषयकेच्छा, जिज्ञासा) तथा च चैत्यवंदनादिसूत्रविषयकव्याख्यानं प्रति चैत्यवंदनादिसूत्रविषयकार्थ–ज्ञानविषयकेच्छा, जिज्ञासा, प्रथमांगरूपं कारणमस्ति यतः, तादृशार्थज्ञानरूपं सम्यग्ज्ञानं विना, सम्यक्क्रिया न भवति; 'पढमं नाणं ततो दयेति' वचनात् "(पढमं ज्ञानं तओ दया, एवं चिट्ठइ सव्वसंजए। अन्नाणी किं काही किं वा नाही छेअपावगं ? ॥१७॥ दश वै. ४ अ. गा.–१० हारि. वृत्तिः, 'पढमं नाण' मित्यादि, प्रथममादौ ज्ञानं जीवस्वरूपसंरक्षणोपायफलविषयं, 'ततः' तथाविधज्ञानसमनन्तरं 'दया' संयमस्तदेकान्तोपादेयतया भावतस्तत्प्रवृत्तेः 'एवम्' अनेन प्रकारेण ज्ञानपूर्वकक्रियाप्रतिपत्तिरूपेण 'तिष्ठति' आस्ते 'सर्वसंयतः' सर्वः प्रव्रजितः, च पुनः 'अज्ञानी' साध्योपायफलपरिज्ञानविकलः स किं करिष्यति ? सर्वत्राऽन्धतुल्यत्वात् प्रवृत्ति–निवृत्तिनिमित्ताभावात्, किं वा कुर्वन् ज्ञास्यति ? 'छेकं' निपुणं हितं कालोचितं 'पापकं वा' अतो विपरीतमिति, ततश्च तत्करणं भावतोऽकरणमेव, समग्रनिमित्ताभावात्, अन्ध–प्रदीप्तपलायनघुणाक्षरकरणवत्, अत एवान्यत्राऽप्युक्तं 'गीयत्थो अ विहारो बीओ गीयत्थमिसिओ भणिओ' इत्यादि, अतो ज्ञानाऽभ्यासः कार्यः। एवं तावत् क्षायोपशमिकं ज्ञानमाश्रित्योक्तम्.)

पूर्वोक्तवचनानुसारेण प्रथमसम्यग्ज्ञानरूपकारणं ततो दया-सम्यक्क्रियारूपं कार्यं स्थितमर्थात् सम्यक्क्रियाकार्यं प्रति सम्यग्ज्ञानं कारणमिति–अन्वयव्यतिरेकाभ्यां कार्यकारणभावो विनिश्चितः, तथा चैतस्या जिज्ञासाया उत्थाने वोत्पत्तौ विशिष्ट–ज्ञानावरणीयादिविषयकक्षयक्षयोपशमादि, निमित्तमस्ति, अर्थाद्–हेयोपादेयतत्त्वविषयकबुद्धिजनकस्तथाविधज्ञानावरणादि–कर्म–क्षयक्षयोपशमादि भवति. विशिष्टक्षयक्षयोपशमादिसत्तायामेव निरुक्तजिज्ञासासत्ता, यः सम्यग्दृष्टि र्नास्ति, तस्य निरुक्तजिज्ञासायाअसम्भवः, सम्यग्दृष्टेरेव तादृश–जिज्ञासोद्भव इति शास्त्रवेत्तारो निरूपयन्ति.

अथ व्याख्यानस्य द्वितीयमङ्गं गुरुयोगनामकं दर्शयति–:

**तथा गुरुणा–यथार्थाभिधानेन स्वपरतन्त्रविदा परहितनिरतेन पराशयवेदिना सम्यक् सम्बन्धः, एतद्विपर्यये तद्विपर्ययसिद्धेः, तद्व्याख्यानमपि अव्याख्यानमेव, अभक्ष्यास्पर्शनीय-न्यायेनानर्थफलमेतदिति परिभावनीयं,**

पं०...'एतद्विपर्ययेत्यादि' ईदृशगुणविपरीताद् गुरो विपर्ययसिद्धेः–अव्याख्यानसिद्धेः; एतद्भावनार्थमाह–'तद्व्याख्यानमित्यादि' 'अभक्ष्यास्पर्शनीयन्यायेनेति' भक्ष्यमपि गोमांसादि कुत्सितत्वादभक्ष्यं तथाऽस्पर्शनीयमिति चण्डालादि, कस्यचित् कुत्सितत्वादस्पर्शनीयं तेन न्यायो–दृष्टान्तस्तेन,

टी०...(२) यथा जिज्ञासैका व्याख्यानस्य प्रथममङ्गं-कारणमस्ति, तथा व्याख्यानस्य द्वितीयमङ्गं–गुरुयोगाख्यं विवेचयति = गुरुणा–यथार्थाभिधानेन (यथार्थं–वीतरागवचनानुसारित्वेनाभिधानं–कथनं यस्य स तेनाथवा यथार्थं–धर्मोपदेशकत्वेन, अज्ञानान्धकारनिवारकत्वेन गुरोरभिधानं नाम यस्य तेन) तत्त्वनिरूपकेण न तु मूकगीतार्थेन तदाश्रितागीतार्थेन वा स्वतन्त्रं च परतन्त्रं वेत्तीति, स्वपरतन्त्रवित्–तेन स्वपरतन्त्रविदा, परिश्रममगणयता, परहितनिरतेन = परेषां सत्त्वानां हिते परायणेन, बालादिदशाज्ञाय्यकेन पराशयवेदिना–परेषामभिप्रायं वेत्तीति, तेन, एतादृशविशेषणचतुष्टयसम्पन्नेन गुरुणा सह परमशुश्रूषाबद्धभावेन सम्यक्–सत्यसम्पूर्णं हार्दिकसम्बन्धो गुरुयोगः कथ्यते.

वस्तुतस्तु व्याख्यानरूपकार्यं प्रति गुरुयोगः परमकारणमस्ति, यतो गुरुयोगस्य सत्तायां व्याख्यानसत्ताऽस्ति, यतस्तस्येष्टफलदत्वेन व्याख्यानं सद्व्याख्यानम्, गुरुयोगस्याऽसत्त्वे, तद्व्याख्यानं व्याख्यानं न, परन्तु विपरीतव्याख्यानं यतोऽनर्थफलदम् । एवं च गुरुगुणसम्पन्नगुरुयोगरूपस्य व्याख्यांगस्य विपरीतत्वे, व्याख्याने विपरीतत्वं भवति. अर्थात् कुगुरुयोगजनितं व्याख्यानं मिथ्याव्याख्यानत्वेनाव्याख्यानमथवा तादृशगुरुयोगनिरपेक्षं स्वतंत्रं स्वमतिकल्पितं व्याख्यानमप्यव्याख्यानं यतो भावपरिणामोऽतिदारुणो भवतीति, गुरुयोगविनाकृतं व्याख्यानमव्याख्यानं कथं ? तत्र न्यायो–दृष्टान्तो दर्श्यते, न्यायः–यथा गोमांसादेः भक्ष्यत्वे (जिह्वामुख–रसनेन्द्रिय–दंतादिना भक्ष्यत्वे) सति बलवदनिष्टानुबन्धित्वेन कुत्सितत्वात् (अत्रापि मोक्षमार्गबाधकत्वेन) अभक्ष्यत्वं सिद्धम्,

१

एवमस्पर्शनीयजातिविशिष्टचण्डालादेः (अन्त्यजादेः) स्पर्शनीयत्वेऽपि-ऐहिकानर्थफलदायित्वेनास्पर्शनीयत्वम्, तथाऽत्रापि मोक्षमार्गबाधकत्वेन गुरुयोगरहितं व्याख्यानमव्याख्यानमनर्थफलत्वेन विज्ञेयमिति.

(१–'मंगलं सफलं शिष्टाचार–विषयत्वा' तत्र–श्येनेनाऽभिचरन् यजेतेति वेदवचनेन शत्रुनाशाय श्येनयागो विहितः, शिष्टाचारविषयत्वं तत्राऽस्ति परन्तु सफलत्व–साध्यं नास्ति, अर्थात् सफलत्वरूप–साध्याभाववति श्येनयागे, शिष्टाचारविषयत्वरूपहेतो वृत्तित्वेन स हेतु र्व्यभिचारी कथ्यते, तद्व्यभिचारदोषनिवृत्तये हेतावविगीतत्वं निवेश्यं, तत्राऽविगीतत्वं बलवदनिष्टाननुबन्धित्वम् ज्ञेयं, बलवतोऽनिष्टस्याजनकं, अविगीतत्वमित्यर्थः, अविगीतो यः शिष्टपुरुषाणामाचारस्तस्य विषयत्वं–अविगीतशिष्टाचारविषयत्वरूपो हेतुः श्येनयागे नास्ति. यः पुरुषः शत्रुहननाय श्येनयागं करोति. तस्य स शत्रुर्म्रियत एव परन्तु श्येनयागस्य कर्त्ता पुरुषः परलोके नरकगतिं याति ध्रुवं, अभिचारयागस्य कर्त्तुः कारयितुश्च प्रायश्चित्तं कर्त्तुमुपदेशोऽस्ति, अतः स श्येनयागविषयकः शिष्टपुरुषाचारः बलवदनिष्टस्याऽजनको नास्ति, परन्तु नरकरूपबलवदनिष्टस्य जनकोऽस्त्येव, श्येनयागे सफलत्वरूपसाध्याभावप्रयुक्ताविगीत–शिष्टाचार–विषयत्वरूपहेतोरभावोऽस्ति, अतो हेतौ व्यभिचारो नास्ति, अत्रेत्थं बोध्यं, वेदे श्येनयागस्य करणीयत्वेऽपि बलवदनिष्टानु-

बन्धित्वहेतुनाऽकरणीयमेव विशिष्टशिष्टैः, तथा मधुविष–सम्पृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वज्ञानेन चिकीर्षा नोत्पद्यतेऽतः, प्रवृत्ति र्न भवति. बलवदनिष्टानुबन्धित्वज्ञानेन मधुविषसम्पृक्तान्नभोजनादिकमभक्ष्यं भवति.

'न कलञ्जं भक्षयेत्' इत्यत्र 'शूलूयं मांसं कलञ्जं' इति केचित्, विषदिग्धबाणाहतमृगमांसं कलञ्जमित्यन्ये, पलाण्डुः (रक्तलशुनं) कलञ्जमिति परे, मुक्तावल्यां–ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञार्थान्वयः ? इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेद् न तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यतेऽर्थात् कलञ्जभक्षणं बलवदनिष्टाननुबन्धित्वाभाववद् बलवदनिष्टानुबन्धित्वेन कलञ्जोऽभक्ष्यो भवति अतः कलञ्ज–भक्षण–त्यागो विधेयः,

(अगम्या-(परस्त्री-आदिरूपागम्या) गमनं नरकरूपबलवदनिष्टसाधनत्वेन निषिद्धं, नरक साधनत्वेन गम्यत्वेऽपि, अगम्या कथ्यते, ततोऽगम्यागमनं निषिद्धं, सुरापानमप्यनिष्टानुबन्धित्वेन पेयत्वेऽप्यपेयमुच्यतेऽर्थाद् यद्, अनिष्टानुबन्धित्वविशिष्टं तन्निषेध्यत्वेन निषिद्धं सर्वत्रेति.)

अथ व्याख्यानस्य तृतीयं कारणरूपमङ्गं विधिपरतानामकं कथयति–:

**तथा विधिपरता–मण्डलिनिषद्याक्षादौ प्रयत्नो, ज्येष्ठक्रमानुपालनं, उचितासनक्रिया, सर्वथा विक्षेपसंत्यागः, उपयोगप्रधानतेति श्रवणविधिः, हेतुरयं कल्याणपरम्परायाः, अतो हि नियमतः सम्यग्ज्ञानं, नह्युपाय उपेयव्यभिचारी, तद्भावानुपपत्तेरिति,**

पं० 'तद्भावानुपपत्तेरिति' उपेये व्यभिचारिणि उपायस्य उपायत्वं नोपपद्यत इति भावः ।।

टी०..(३) यथा जिज्ञासागुरुयोगौ व्याख्यानस्यांगभूतौ तथा विधिपरतेति तृतीयमङ्गं–कारणं व्याख्याया दर्श्यते.

विधिपरता = श्रावकसाधुधर्मानुष्ठानगतसर्वविधिषु परायणता = साधुधर्मगताहारग्रहणे चारित्रगुणे स्थिरतार्थमनेकग्रन्थदर्शित–क्रियाकरणे यथाविधिकरणे सानन्दा सोत्साहा सज्जता, विधिपरता षोढा वर्णयति–:

(१) मण्डलि–निषद्याऽक्षादौ प्रयत्नो = सूत्रतदर्थभोजनकालाऽऽवश्यकस्वाध्यायसंस्तारकाख्याः सप्तमण्डल्यस्तत्रैकाचामाम्लं कृत्वा प्रवेशः क्रियते । सभारूपोऽर्थो द्वितीयः, निषद्या–आसनमक्षः स्थापनाचार्यः, इत्यादि–विधौ प्रकर्षेण यत्नः । (सभास्थितो निषद्याद्वयविधाता)

(२) ज्येष्ठक्रमानुपालनम् = ज्येष्ठानां–रत्नाधिकानां (आचार्योपाध्यायप्रवर्त्तकस्थविरगणावच्छेदकादीनां) कर्मक्षयार्थं क्रमशः कृतिकर्मादिरनुपालनम् (लघुभिर्ज्येष्ठा वन्दनीयाः, उपस्थापनाऽनन्तरं श्रमणपर्यायो ज्ञेयः साध्वीभिः सर्व–साधवो वन्द्याः)

(३) उचितासनक्रिया = समोच्चासनवर्जनेनोचिता-सनोपयोगः, अर्थाद् गुरोः सकाशात् समोच्चासन उपवेशनपरित्यागः, गुरोः सदृशानि तथाधिकमूल्यानि वस्त्राणि त्याज्यान्यन्यथा दोषसद्भावः ।

(४) सर्वथा विक्षेपसंत्यागः = सर्वप्रकारेण विकथानिन्दादिरूपविक्षेपसंत्यागः, अर्थाद् राजदेशस्त्री-भोजनरूपाश्चतस्रो विकथास्त्याज्याः, यतः, अनर्थदण्डरूपास्तथा निरर्थकवार्तालापोऽपि प्रमादप्रकार-त्वात्संसारवर्धकः, निरर्थकखेदजनकोऽस्ति, परपरिवादोऽपि परिहरणीयः सर्वथा ।

(५) उपयोगप्रधानतेति श्रवणविधिः = सर्वविधिषूपयोगस्य (ज्ञानदर्शनरूपबोधव्यापाररूपस्याथवा प्रणिधानस्य–ध्यानस्य) प्रधानता ज्ञेया यतस्ते विधयो भावरूपा भवन्ति, अन्यथा द्रव्यरूपाः, 'इति' तस्मात् कारणात् सूत्रार्थतदुभयश्रवणविधौ, उपयोगप्रधानता कर्तव्या.

(६) अयं–श्रवणादिविधिः कल्याणपरम्पराया–मंगलपरम्पराया हेतुरस्ति, अतो हि-विधिपरतया निश्चयेन-नियमतः सम्यग्ज्ञानं, 'नह्यु पाय उपेयव्यभिचारी' उपायः (कार्यनिष्पादकासाधारणकारणं) उपेयस्य (साध्यरूपकार्यस्य–फलस्य) व्यभिचारी (फले विरोधी–अविसंवादी) न हि भवति ।

यदि साधनं साध्यसाधकं न भवेत्तदा फलोपधायकत्वरूपोपायता, उपाये सम्यक्तया न घटेतेति.

'तद्भावानुपपत्तेरिति'–विधिरूपसम्यक्क्रियया सम्यग्ज्ञानसाध्यकानुमिति भवति, तथाहि = अय-मात्मा, सम्यग्ज्ञानवान्, सम्यक्क्रियावत्त्वाद्, यत्र यत्र सम्यक्क्रिया तत्र तत्र सम्यग्ज्ञानं, यत्र यत्र सम्यग्ज्ञानाभावस्तत्र तत्र सम्यक्क्रियाऽभावः, इत्याकारक–नियतान्वयव्यतिरेकसहचारज्ञानज्ञापित सम्यग् ज्ञाननिरूपिता व्याप्तिः (सद्धेतुस्वरूपरूपा) तथा च हेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगि-साध्यसामानाधिकरण्यं, व्या. ल. अत्रेत्थं समन्वयः, सम्यक्क्रियाऽधिकरणे (सम्यक्क्रियावत्यात्मनि) वर्तमानो य उदासीनघटाद्यभावः (सम्यग्ज्ञानभावो धर्तुं न शक्यते, तत्र सम्यग्ज्ञानस्य सत्त्वात्) तत्प्रतियोगी (यस्याभावः स प्रतियोगी) उदासीनघटादिः, तदप्रतियोगि सम्यग्ज्ञानरूपसाध्यं, तत्सामानाधिकरण्यं सम्यक्क्रियारूपहेतावस्तीति लक्षणसङ्गतिः (उपायः–सम्यक्क्रियावत्त्वरूपहेतुः, न सम्यग्ज्ञानरूपसाध्यव्यभिचार (साहचर्य–सामानाधिकरण्याभाव) वान् किन्तु साध्य–सहचरः–साध्यसामानाधिकरणो हेतुः, तथा च हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिस्वरूपवान् हेतुः, साध्याभाववद्वृत्तित्वरूपव्यभिचाराभावरूपव्याप्तिस्वरूपवान् हेतु र्वा । सम्यक्क्रियानिष्ठ-व्याप्तिज्ञानं प्रति नियतान्वयव्यतिरेकसहचारज्ञानं कारणं, तथा व्यभिचारज्ञानाभावः कारणं, यदि व्यभिचारज्ञानरूपप्रतिबन्धकः स्यात् तर्हि सम्यक्क्रियानिष्ठहेतुस्वरूपरूपव्याप्तिज्ञानानुपपत्ते र्न च तथाऽत्र, सम्यक्क्रियावत्यात्मनि, सम्यक्क्रियाऽस्तु, सम्यग् ज्ञानं माऽस्तु इत्यप्रयोजकशङ्कायां प्रसक्तायां यदि तत्र सम्यग् ज्ञानं न स्यात् तर्हि सम्यक्क्रियाऽपि न स्यादिति तर्कः प्रयोक्तव्यः यतः कार्यकारणभावभङ्गप्रसङ्गलक्षणेन तर्केण निरुक्तव्यभिचारशङ्का निवर्तते इति न्यायमार्गः श्रयणीयः ॥

(अयमात्मा, सम्यग्ज्ञानवान्, तादृशसम्यक्क्रियावत्त्वात्, सत्येव सम्यग्ज्ञानवत्त्वे सम्यक्क्रियावत्त्व-स्योपपत्तेः, असति सम्यग्ज्ञानवत्त्वे सम्यक्क्रियावत्त्वस्यानुपपत्तेः निश्चिताऽन्यथानुपपत्तिलक्षणो हेतुः, सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः, असति साध्ये हेतोरनुपपत्तिरेवान्यथाऽनुपपत्तिः)
अथ व्याख्यानस्य चतुर्थमङ्गरूपं कारणं बोधपरिणतिनामकं व्याख्याति–:

**तथा बोधपरिणतिः–सम्यग् ज्ञानस्थिरता, रहिता कुतर्कयोगेन, संवृतरत्नाधाराप्तिकल्पा, युक्ता मार्गानुसारितया, तन्त्रयुक्तिप्रधाना, स्तोकायामप्यस्यां न विपर्ययो भवति, अना-भोगमात्रं, साध्यव्याधिकल्पं तु तद्, वैद्यविशेषपरिज्ञानादिति,**

पं०...'वैद्यविशेषपरिज्ञानादिति' वैद्यविशेष इव परिज्ञानं तस्माद् अयमत्र भावो–यथा वैद्यविशेषात् साध्यव्याधिर्निवर्त्तते तथा परिज्ञानादनाभोगमात्रमिति,

टी०...(४)यथा जिज्ञासागुरुयोगविधिपरताख्यानि व्याख्यानस्यांगानि तथा बोधपरि-णति व्याख्यानस्यांगं कारणमस्ति, बोधपरिणतिं परिचाययति.

(१) 'सम्यग्ज्ञानस्थिरता' = सम्यग्ज्ञाने स्थिरता–मनोवचःकायव्यापारगतव्याकुलताया अभावः (रागद्वेषाद्युपशमः, हेयोपादेयोपेक्षणीयादितत्त्वनिश्चयः)

(२) 'रहिता कुतर्कयोगेन' = सा बोधपरिणतिः–कुत्सिततर्करूपकुतर्कस्य (बोधरोगः शमापायः श्रद्धाभङ्गोऽभिमानकृत्, कुतर्कश्चेतसो व्यक्तं भावशत्रुरनेकधा) योगः–सम्बन्धस्तेन रहिता–अभाववती.

(३) बोधपरिणतिः = 'संवृतरत्नाधाराप्तिकल्पा' संवृतः–अनुद्घाटितः रत्नअ (नुष्ठानबुद्धिरूपरत्न) स्याधारभूतकरण्डकस्तत्प्राप्तितुल्या. यथा कश्चित् संवृतरत्नाधारकरण्डकं प्राप्तवान्, तथाऽपि तदन्तर्गतरत्नादिवस्तु, समस्तीत्यजानन्नस्ति, तदपि यदा स ज्ञास्यति तदा तत्फलं निश्चयतः तमेव प्राप्स्यति, स यदि तद्रक्षिष्यति ।

(४) 'युक्ता मार्गानुसारितया' नीतिसहिता सम्यग्दर्शनज्ञानचारित्ररूपमोक्षमार्गादिके निरतिचार-प्रवृत्तिरूपमार्गानुसारितया सह ससम्बन्धा बोधपरिणतिः ।

(५) 'तन्त्रयुक्तिप्रधाना' तन्त्रं (शास्त्रं) च युक्तिश्च तन्त्रयुक्ती, यत्र प्रधाने सा तन्त्रयुक्तिप्रधाना बोधपरिणतिः ।

(६) 'स्तोकायामप्यस्यां न विपर्ययो भवति' अस्यां विशिष्टायां बोधपरिणतौ स्तोकायां–स्वल्पायां (स्वल्पपदार्थाऽवगाहित्वेन) अपि (अधिकपदार्थावगाहित्वे तु कः प्रश्नो 'ऽपि' शब्दार्थः) 'न विपर्ययो भवति' (विपरीतैककोटिनिष्टङ्कनं विपर्ययः, यथा शुक्तिकायामिदं रजतमिति. प्रत्यक्षानुमाना-दिविपर्ययः, मिथ्याज्ञानं विपर्ययः, विपर्ययो नाम भ्रमः)

'अनाभोगमात्रं' केवलशेषपदार्थविषयक-ज्ञानाभावः, 'साध्यव्याधिकल्पं' = अवशिष्टपदार्थविषय-काज्ञानं तु साध्य–नाश्यरोगसमानं वर्त्तते तथाऽपि वैद्यविशेषतस्स रोगो नश्यति तथा तन्नश्यत्येवेति.

'वैद्यविशेषपरिज्ञानादिति' अर्थादवशिष्टाशेषपदार्थविषयकपरिज्ञानरूपवैद्यविशेषतः, अनाभोगनामकः साध्यव्याधिरवश्यमेव पलायते. ॥
अथ व्याख्यानस्य पञ्चमं कारणरूपमङ्गं स्थैर्यं विश्लेषयति-:
यथा जिज्ञासादीनि चत्वार्यङ्गानि व्याख्यानस्य सन्ति तथा पञ्चममङ्गं स्थैर्यनामकमस्ति-:

**तथा स्थैर्यं = ज्ञानद्यर्यनुत्सेकः, तदज्ञानुपहसनं, विवादपरित्यागः, अज्ञबुद्धिभेदाकारणं, प्रज्ञापनीये नियोगः, संयमपात्रता नाम बहुमता गुणज्ञानां विग्रहवती शमश्रीः स्वाश्रयो भावसम्पदामिति,**

पं०...तदज्ञानुपसहनमिति' स्वयंज्ञातज्ञेयानभिज्ञानुपहसनं 'विवादपरित्यागः' तदनभिज्ञैः सहेति गम्यते 'अज्ञबुद्धिभेदाकरणमिति' सम्यक्चैत्यवंदनाद्यजानतां तत्राप्रवृत्तिपरिणामानापादनं 'प्रज्ञापनीये नियोग' इति प्रज्ञापनीयमेव सम्यक्करणे नियुङ्क्त इति,

टी०...(५) = (१) ज्ञानरूपसमृद्धि-सम्पत्तेगौरव-अभिमानाभावः,
(२) तदज्ञानुपहसनं = स्वतो ज्ञाता ये ज्ञेयाः पदार्थास्तानजानतः-तदनभिज्ञान् प्रति हसनाभावः,
(३) विवादपरित्यागः = तत्तत्पदार्थाऽनभिज्ञैः सह विवादस्य परितस्त्यागः (लब्ध्याद्याप्त्यर्थिना तु स्याद् दुःस्थितेन महात्मना, छलजाति-प्रधानो यः स विवादः स्मृतः)
(४) अज्ञबुद्धिभेदाऽकरणमिति = अज्ञानिनां जनानां क्रियायां बुद्धे र्भेदः-पृथक् करणं वर्जनीयं, अज्ञविज्ञयो र्मध्ये बुद्धे र्यदन्तरं-भेदोऽज्ञानिनामग्रे न कर्त्तव्यः
(५) प्रज्ञापनीये नियोगः = प्रज्ञापनाया योग्य-पात्ररूपशिष्यं प्रति शास्त्राऽभ्यासविषये विधि-प्रेरणा-योजनादिकं कर्त्तव्यं, यतः सद्गुरुः पात्रशिष्यमेव सम्यक्क्रियायां नियुङ्क्ते इति,
(६) संयमपात्रता नाम बहुमता गुणज्ञानां विग्रहवती शमश्रीः = संयमपात्रताया एषोऽर्थो भवति यथा मूर्तिमती शान्तरससरसोपशमलक्ष्मीः, गुणज्ञानां बहुमानविषया, संयमपात्रता कथ्यते, सा स्थैर्येण प्राप्यते इति.
(७) स्वाश्रयो भावसम्पदामिति = एतत्स्थैर्यं, भावरूपसम्पदां क्षायोपशमिकादिभावनामकसम्पत्तीनां स्वगृहं कथ्यते.
अथ व्याख्यानस्य षष्ठमङ्गभूतकारणं उक्तक्रियेति नामकं कथ्यते-:

**तथोक्तस्य-विज्ञातस्य तत्तत्कालयोगिनः, तदासेवनसमये तथोपयोगपूर्वं शक्तितस्तथाक्रिया, नौषधज्ञानमात्रादारोग्यं क्रियोपयोग्येव तत्, न चेयं यादृच्छिकी शस्ता, प्रत्यपायसम्भवादिति,**

पं०...'उक्तस्येत्यादि' उक्तस्य-वचनादिष्टस्य चैत्यवंदनादेः, तदेव विशिनष्टि 'विज्ञातस्य' वच-

नानुसारेणैव विनिश्चितविषयविभागस्य 'तत्तत्कालयोगिनः' तेन तेन–चित्ररूपेण कालेन तदवसरलक्षणेन सम्बन्धवतः, इत्यमुक्तं विशेषणं, क्रियां विशेषयन्नाह—

'तदासेवनसमये' तस्योक्तस्य करणकाले, 'तथोपयोगपूर्वं' आसेव्यमानानुरूप उपयोगः पूर्वो–हेतुर्यत्र तत्तथा भवति, 'शक्तितः' स्वशक्तिमपेक्ष्य तदनतिक्रमेणापि 'तथाक्रिया' उक्तानुरूपप्रकारवान् व्यापारः, आह-किमुक्तक्रियया ? व्याख्यानफलभूताद् उक्तज्ञानादेवेष्टफलसिद्धिसम्भवादित्याशङ्क्याह–'न' नैवौषधज्ञानमात्रात्–क्रियारहितादौषधज्ञानात् केवलाद् आरोग्यं–रोगाभावः, कुत इत्याह–'क्रियोपयोग्येव तद्' यतः क्रियायां—चिकित्सालक्षणायामुपयुज्यते उपकुरुते, तच्छीलं च यत्तथा, नारोग्योपयोगावदपीत्येवकारार्थः, तद्—इत्यौषधज्ञानमात्रं, क्रियाया एवारोग्योपयोगात् । तर्हि क्रियैवोपादेया न ज्ञानमित्याशङ्क्याह—'न चेयमित्यादि' नच–नैव इयं वंदनादिक्रिया यादृशी तादृशी यथा तथा कृता शस्ता—इष्टसाधिका मता, किन्तु ? ज्ञानपूर्विकैव शस्ता भवतीति ॥

टी०...(६)नानाप्रकारावच्छिन्नेन चैत्यवंदनाद्यवसरलक्षणकालेन सम्बन्धवतः, वचनानुसारेणैव विनिश्चितविभागस्य, पूर्वोक्तविशेषणविशिष्टस्य, उक्तस्य–वचनादिच्छाविषयभूतस्य चैत्यवंदनादिरूपविशेषस्य, तस्योक्तरूपचैत्यवंदनादेः करणकाले, आराध्यमानानुरूपोपयोगरूपहेतुजन्यः, शक्तिमपेक्ष्य-शक्तिमनतिक्रम्य, वचनानुकूल-चैत्यवंदनादिप्रकारभेदवान्–क्रियाव्यापारः 'उक्तक्रिया' ननु व्याख्यानफलभूतस्योक्तस्य–वचनादिष्टस्य चैत्यवंदनादे ज्ञानादेवेष्टफलसिद्धिरिति चेत्, 'नौषधज्ञानमात्रात्' (क्रियावियुतज्ञानस्यानुपादेयत्वात्) नैवौषधज्ञानमात्रात्–क्रियारहितादौषधज्ञानात् केवलादारोग्यं–रोगाभावः, केवलक्रियाऽभावपूर्वकौषधविषयकज्ञानजन्यो रोगाभावो न परन्तु रोगसद्भाव एव, यतो व्याधिप्रतिकारचिकित्सालक्षण–क्रियां प्रति, उपयोग–उपकारकारकं, औषधज्ञानमात्रं नारोग्योपयोगवदपीत्येवकारार्थः,

आरोग्यं प्रति निरुक्त–क्रियाया एवोपयोगो भवति.

क्रियां प्रति औषधज्ञानमात्रमुपयोगि भवति.

अर्थादौषधज्ञानपूर्वकनिरुक्तक्रियोभयत आरोग्यफलं भवति.

ननु तर्हि क्रियैवोपादेयाऽस्तु न ज्ञानमुपादेयमिति चेत्, नैवं, चैत्यवंदनादिसकला क्रिया यादृच्छिकी (स्वमतिप्रवृत्ते भवाङ्गत्वात्) यादृशी तादृशी यथा तथा कृता शस्ता = इष्टसाधिका मता किन्तु ? ज्ञानपूर्विकैव शस्ता भवतीति, अर्थाच्चैत्यवंदनादिसकलाक्रिया, वचननिरपेक्षज्ञानशून्यभावोपयोग–रहिता यादृच्छिकी क्रिया, निष्फला भवति, यतो नरकादिदुर्गतिरूपप्रत्यपायकारिका भवतीति.

या कर्मरूपरोगाणां चिकित्सा, सर्वज्ञरूपभाववैद्यस्य शालारूपजैनशासने भूतकालेऽभूत, भवति च भविष्यति, वस्तुतस्तु ते पुण्यवन्तोऽभूवन्, भवन्ति च भविष्यन्ति. यतो वीतरागवचनाज्ञां ज्ञात्वा–प्रतिपद्य, क्रियायां मुक्त्वा कर्मरोगरहितत्वरूपारोग्यवन्तोऽभूवन्, भवन्ति, भविष्यन्ति च, येषां भगवदाज्ञाज्ञानमस्ति, परन्तु आज्ञाभ्यासरूपाराधना नास्ति तेषां कथं कर्मरोगान्-मुक्तिर्भवेत् ? मात्र-

-शुष्कज्ञानं न मुक्तिं नयति, परन्तु क्रियासहचरितं ज्ञानं वा ज्ञानव्याप्तिमती क्रिया मक्तिमंदिरं नेतुं समर्था.

तस्माद् भो भो ज्ञानिनः ! प्रमादमवधूय सम्यक्क्रियायां प्रयत्नवन्तो भवन्तो भवन्तु निरन्तरम् ।

अथ व्याख्यानस्य सप्तममङ्गरूपकारणं 'अल्पभवते' ति नामकं निर्वक्ति–:

**तथा अल्पभवता–व्याख्यांगं प्रदीर्घतरसंसारिणस्तत्त्वज्ञानायोगात्, तत्राल्पः–पुद्गलपरावर्त्तादारतो भवः–संसारो यस्य तद्भावः अल्पभवता, नहि दीर्घदौर्गत्यभाक्, चिन्तामणिरत्नावाप्तिहेतुः, एवमेव नानेकपुद्गलपरावर्त्तभाजो व्याख्यांगमिति समयसारविदः, अतः साकल्यत एतेषां व्याख्यासिद्धिः, तस्याः सम्यग्ज्ञानहेतुत्वादिति सूक्ष्मधियाऽऽलोचनीयमेतत्,**

**पं०...'चिन्तामणिरत्नावाप्तिहेतुरिति'** चिन्तामणिरेव रत्नं मणिजातिप्रधानत्वाच्चिन्तामणिरत्नं, पृथग् वा चिन्तामणिरत्ने, तस्य तयोर्वाऽवाप्तिहेतुः, अभाग्य इति कृत्वा ।

**टी०...(७)** यथा जिज्ञासादीनि व्याख्यानस्याङ्गरूप-कारणानि सन्ति तथा 'अल्पभवता' व्याख्याङ्गमस्ति, अर्थात् संसारपरिमिति र्व्याख्यानस्य कारणमस्ति यतः प्रदीर्घतरसंसारिणः = अपरिमित–अनंतजन्मादिप्रपंचसंसारवतस्तत्त्वज्ञानायोगोऽस्ति, तत्त्वज्ञानं प्रत्यनल्पानन्त-भवता, प्रतिबन्धिका, तत्त्वज्ञानजनिकाऽल्पभवता, व्याख्याकारणम्, तत्र–अल्पभवतावाक्यघटकोऽल्पः–परिमितः, पुद्गलपरावर्त्तात् (षडरा मिलित्वा–एकोत्सर्पिणी), तथा षडरा मिलित्वा विपरीतक्रमेणाऽवसर्पिण्येका, द्वादशाऽरा मिलित्वैकं कालचक्रं, अनन्तकालचक्र–प्रमाण एकः पुद्गलपरावर्त्तो भवति, तस्मात्) आरतः (अराणां समुदायरूपपुद्गलपरावर्त्तात्) अल्पः–(न्यूनः–परिमितः) संसारो यस्य सोऽल्पभवः, तस्य भावोऽल्पभवता, (शब्दप्रवृत्तिनिमित्तं भावः 'समासकृत्तद्धितात्तु सम्बन्धे' इति वचनात्, समासात् सम्बन्धे भावप्रत्ययः अल्पभवतेत्यत्राऽल्पसंसार–सम्बन्धो, भावप्रत्यार्थः) चरमपुद्गलपरावर्त्तान्त–विशिष्टकालः, अल्पभवतेत्युच्यते. दीर्घकालीनदौर्गत्यं (दुर्गतत्व–दौर्भाग्य–दारिद्र्यं) भजते इति, दीर्घदौर्गत्यभाक्, चिन्तामणिनामकरत्नप्राप्तिकारको न भवति, अनेन प्रकारेणैकपुद्गलपरावर्ताधिकानेकपुद्गलपरावर्त्तरूपसंसार–भवादिप्रपंच–विशिष्ट–संसारिणो व्याख्याया अङ्गरूपकारणं न भवन्तीति शास्त्ररहस्यवेदिनो वदन्तीति । अत एवाल्पभविनः–शुक्लपाक्षिकाः–आसन्नभव्या–लघुकर्मिणो जीवा तत्त्वज्ञानरूपभावचिन्तामणिरत्नं लभन्ते (जो जो कीरीयावाइ सो नियता सुक्कपक्खिया अंतो पुग्गल परीयट्टसु सिज्झई–(दशा श्रु. चू.) अन्यथा अभव्या–दूरभव्या–भवाभिनन्दिनः–कदाग्रहिणः–जिनगुर्वादिगाढाशातनाकारिणः स्वप्नेऽपि तत्त्वज्ञान चिन्तामणिं न लभन्ते. तत्त्वज्ञानाभावेन व्याख्यानानधिकारः ।

अथैनं विषयमुपसंहरन्नाह—:

**अतः साकल्यत एतेषां व्याख्यासिद्धिः, तस्याः सम्यग्ज्ञानहेतुत्वादिति सूक्ष्मधियाऽऽलोचनीयमेतत् ।**

टी०...अतः—अस्मात्कारणादेतेषां—जिज्ञासादीनां सप्ताङ्गानां साकल्यतः सामस्त्यतः अर्थात् समस्त—जिज्ञासा—गुरुयोग—विधिपरता—बोधपरिणति—स्थैर्य—उक्तक्रिया—अल्पभवतारूपाणां सप्तानां सामस्त्येन व्याख्यासिद्धिः (दण्डचक्रादिन्यायेन जिज्ञासादि—सप्ताङ्गानां मिलितानां—समुदितानामेव व्याख्यानं प्रति कारणता, न तु तृणाऽरणिमणिन्यायेन प्रत्येकं कारणतेति बोध्यम्) यतः सकलाङ्गी व्याख्यासिद्धिः, सा व्याख्यासिद्धिः सम्यग्ज्ञानस्य हेतुरस्ति इति सूक्ष्मबुद्धिद्वाराऽऽलोचनीयमेतदिति ।

अथाऽस्तु पदस्यार्थरूपां प्रार्थनां प्रौढतया परामृशति—:

**तत्र 'नमोऽस्त्वर्हद्भ्यः' इत्यत्रास्तु—भवत्वित्यादौ प्रार्थनोपन्यासेन दुरापो भावनमस्कारः, तत्त्वधर्म्मत्वाद्, अत इत्थं बीजाधानसाध्य इति ज्ञापनार्थं, उक्तं च—**

**"विधिनोप्ताद्यथा बीजादङ्कुराद्युदयः क्रमात् ।**
**फलसिद्धिस्तथा धर्म्मबीजादपि विदुर्बुधाः ॥१॥**
**वपनं धर्म्मबीजस्य, सत्प्रशंसादि तद्गतम् ।**
**तच्चिन्ताद्यङ्कुरादि स्यात्फलसिद्धिस्तु निर्वृतिः ॥२॥"**

पं०...'वपन' मित्यादिश्लोकः, वपनं—निक्षेपणं, धर्म्मस्य—श्रुतचारित्ररूपस्य, बीजं फलनिष्पत्तिहेतुर्धर्म्मबीजं तस्यात्मक्षेत्र इति गम्यं, किं तदित्याह—'सत्प्रशंसादि' सत् संशुद्धं, तच्चेत्थंलक्षणं—"उपादेयधियाऽत्यतं, संज्ञाविष्कम्भणान्वितम् । फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ॥१॥" प्रशंसादि—वर्णवादकुशलचित्तोचितकृत्यकरणलक्षणं, तद्गतं, 'तच्चिन्तादि' तस्य धर्म्मस्य चिन्ता—अभिलाषः, आदिशब्दात् सच्छ्रुत्यादि, वक्ष्यमाणम्, अङ्कुरादि-अङ्कुरसत्काण्डादि, वक्ष्यमाणमेव 'फलसिद्धिस्तु निर्वृतिरिति' प्रतीतार्थमेव.

टी०....तत्र नमोत्थुणंसूत्रघटक 'नमोऽस्त्वर्हद्भ्यः' इति वाक्यघटक 'अस्तु इति विवरणात् भवत्वित्यादिपदव्याख्यानावसरेऽस्तुपदार्थः प्रार्थनारूपः कृतः, तत्प्रार्थनोपन्यासेन—'नमोऽस्त्वर्हद्भ्यः' इत्याकारकभावनमस्कारलाभरूप—फलवदाशंसारूपप्रार्थनोपन्यासेन—वाक्यप्रयोगेण हेतुना, दुरापः—दुर्लभो भावनमस्कारो ("अत्थुत्ति पत्थणा दुल्लहो उ उक्कोस भावनमुक्कारो । लब्भइ बीयाहाणाइयं आसंसाइ तं नुभवे" ॥१॥) यतस्तत्त्वधर्मोऽस्ति । तथा च भावनमस्कारस्य दुर्लभत्वेन भावनमस्कारविषयकप्रार्थनाऽस्ति, यदि स भावनमस्कारोऽप्राप्यश्चेत्तदा भावनमस्कारविषयकप्रार्थना निष्फला भवेदत एव भावनमस्कारो दुर्लभोऽस्त्यतो भावनमस्कारविषयकप्रार्थना सफलाऽस्ति. पूर्वकथिता-

शंसारूपप्रार्थनारूपबीजवपनद्वारा भावनमस्कारसाध्यसिद्धिर्भवतीति ज्ञापनार्थं प्रार्थनोपन्यासः कृतः, एवं च भावनमस्काररूपतत्त्वधर्मलाभकार्यं प्रति 'नमोऽस्त्वर्हद्भ्यः' इत्याकारकाशंसारूपप्रार्थना, बीजवपनरूपकारणमस्त्येवं कार्यकारणभावो ज्ञेयः । अत्र 'नमोऽस्त्वर्हद्भ्यः' इति पदेन भावनमस्कारस्य प्रार्थनाद्वारा भावनमस्कार–लाभकामना दर्शिता, 'भावनमस्कारमहं करोमीति मिथ्याऽभिमानिता न कृता, तथा च तत्त्वधर्मरूप–महादुर्लभभावनमस्कार–विषयाऽभिलाष एव भावधर्मबीजवपनमस्तीति सूचितम् । उक्तं च 'यथा विधिनोप्ताद् बीजात् क्रमादङ्कुरादेरुदयस्तथा धर्मबीजादपि फल–सिद्धिः, इति बुधा विदुः' ॥१॥

"अत्यन्तं यथास्यात्तथोपादेयमिति बुद्ध्या गृहीतं, आहारादि–संज्ञा–निरोधाऽन्वितं फलकामनारहितं धर्मबीजं प्रशंसादि सत् संशुद्धमुच्यते ।"

अथ क्रमपूर्वकमङ्कुरादिस्थानं निरूपयति–:

**चिन्तासत्–श्रुत्यनुष्ठानं, देवमानुषसम्पदः ।**
**क्रमेणाऽङ्कुर–सत्–काण्डनालपुष्पसमा मताः ॥३॥**
**फलं प्रधानमेवाहु–र्नानुषङ्गिकमित्यपि ।**
**पलालादिपरित्यागात्–कृषौ धान्याप्तिवद् बुधाः ॥४॥**
**अत एव च मन्यन्ते, तत्त्वभावित–बुद्धयः ।**
**मोक्षमार्ग–क्रियामेकां, पर्यन्तफलदायिनीम् ॥५॥ इत्यादि**

पं०...'फलमित्यादिश्लोकः' फलं–साध्यं, किं तदित्याह–'प्रधानमेव' ज्येष्ठमेव, फलमिति पुनः सम्बध्यते, ततः प्रधानमेव फलं फलमाहुः, अवधारणफलमाह–'नानुषङ्गिकमित्यपि' नोपसर्जनभवमपीति, दृष्टान्तमाह–'पलालादि–परित्यागात्' पलालपुष्पं परित्यज्य, 'कृषौ' कर्षणे, धान्याप्तिमिव 'बुधाः' सुधियः, 'अत एवेत्यादि' 'अत एव' फलं प्रधानमेवेत्यादेरेव हेतोः, चकारोऽर्थप्राप्तमिदमुच्यत इति सूचनार्थः, 'मन्यन्ते' प्रतिपद्यन्ते 'तत्त्वभावितबुद्धयः' परमार्थदर्शिधियो 'मोक्षमार्गक्रियां' सम्यग्दर्शनाद्यवस्थां 'एकां' अद्वितीयादिरूपां, 'मोक्षमार्गत्वेन' 'पर्यन्तफलदायिनीमित्यादि' मोक्षरूपचरमकार्यकारिणीं, शैलेश्यवस्थामित्यर्थः, अन्यावस्थाभ्यो ह्यनन्तरमेव फलान्तरभावेन मोक्षाभावात् ।

टी०...एवं धर्मबीजस्य विधिना वपनेन, क्रमेण धर्मविषयकाऽभिलाषरूपचिन्ता, अङ्कुरस्थानीया, धर्मसत् श्रवणं सत्काण्डस्थानीयं, धर्मानुष्ठानं नालस्थानीयं, देवमानुषसम्पदः पुष्पस्थानीया मताः ॥३॥ 'फलमित्यादिश्लोकः' फलं साध्यं किं तदित्याह–'प्रधानमेव' ज्येष्ठमेव, फलमिति पुनः सम्बध्यते, ततः प्रधानमेव फलं फलमाहुः, (फलं = यमर्थमधिकृत्य प्रवर्तते तत्फलं, यदुद्दिश्य प्रवर्त्तन्ते पुरुषास्तत्प्रयोजनं–फलम्, साध्यतयेच्छाविषयः फलम्, उद्देश्यं फलम्) प्रधानं फलं = स्वविधेयक–प्रवृत्ति–प्रयोजकीभूतोत्कटेच्छाविषयीभूतं स्वस्य मुख्यं फलम् । धान्यप्राप्तिविधेयककृषिरूपप्रवृत्ति–प्रयोजकीभूता, अनया प्रवृत्त्या धान्यप्राप्तिरेव भवतु इत्याकारिका या उत्कटेच्छा तस्या विषयीभूतं

फलं-धान्यप्राप्तिरूपं फलं कृषिरूपप्रवृत्ते मुंख्यं फलं भवति. तद्वदत्रापि प्रकृते मुक्तिप्राप्तिविधेयक-मोक्षमार्गक्रिया-प्रयोजकीभूता 'अनया क्रियया मुक्तिप्राप्तिरेव भवतु' इत्याकारिका या, उत्कटेच्छा तस्या विषयीभूतं फलं मुक्तिप्राप्तिरूपं फलं मोक्षमार्गक्रियाया मुख्यं फलं बोध्यम् ।

नाऽनुषङ्गिककमित्यानुषंगिकम्' = स्वविधेयप्रवृत्ति--प्रयोजकानुत्कटेच्छाविषयीभूतं स्वस्यानुषंगिकं फलम् । फलस्य गौणत्वं च मुख्यफलेच्छाधीनेच्छाविषयत्वम् । उद्देश्याऽन्तरप्रवृत्तस्य तत्कर्मनान्तरीकयता-प्राप्तः प्रासंगिकोऽनुद्देश्यः कार्यविशेष आनुषंगिकम् । यथा भो बटो ! भिक्षामट यदि गां पश्येस्तां चानयेत्यादौ । अत्र भिक्षार्थप्रवृत्तस्य दैवाद् गोदर्शनात्तस्या आनयनं, आनुषंगिकम् । तत्रोद्देश्यत्वाभावादिति बोध्यम्. (वाच.)

आनुषंगिकं = धान्यप्राप्ति-विधेयक-कृषिरूपप्रवृत्ति-प्रयोजकानुत्कटेच्छाविषयभूतं पलालादि, कथ्यते, धान्यप्राप्तिरूपं फलं कृषिरूपप्रवृत्तेर्मुख्यं फलं तथाऽत्र मोक्षमार्ग-क्रियाया मुख्यं फलं मोक्षफलं, भोगाद्यैश्वर्यमैहिकपारलौकिक-सांसारिकसुखरूपं पलालपुष्पवदानुषंगिकं कथ्यते तत्रोद्देश्याभावात्, अर्थान्मोक्षमार्गक्रियाया मुख्यं फलं शैलेश्यऽवस्थैव प्रधानफलमुपादेयं तया शैलेश्यवस्थया फलान्तराभावेन मोक्षभावात्, पुष्प-पलालादिवदानुषंगिक-अनुद्देश्यरूपं सांसारिक-भोगैश्वर्यादि, सर्वं त्याज्यमेव, (आनुषङ्गिकं फलं फलं न, प्रधानं फलं फलमेवेति)

**आह-यद्येवं न सामान्येनैवं पाठो युक्तो, भावनमस्कारवतस्तद्भावेन तत्साधनायोगात्, एवमपि पाठे मृषावादः, 'असदभिधानं मृषेति' वचनात्, असदभिधानं च भावतः सिद्धे तत्प्रार्थनावचः, तद्भावेन तद्भवनायोगादिति,**

**पं०...**'तत्साधनायोगादिति' तस्य-सिद्धस्य नमस्कारस्य यत् साधनं-निर्वर्तनं प्रार्थनया तस्यायोगाद्-अघटनात् ।

'असदभिधानमिति' असतोऽयुज्यमानस्याभिधानं-भणनमिति, 'तद्भावेनेत्यादि' तद्भावेन, भावनमस्कारभावेन तद्भवनायोगाद्-आशंसनीयभावनमस्कारभवनायोगाद्, अनागतस्येष्टार्थस्य लाभेनाविष्करणमाशीः, सा च प्रार्थनेति,

**टी०...**भावनमस्काररूपफलस्य बीजवपनरूपप्रार्थनार्थकं 'अस्तु' इति पदमस्तीति यदा व्यवस्था, तदा वादी वदति. आहेति.

एवं व्यवस्था तदा सामान्येन-भावनमस्कारसहितत्व-भावनमस्काररहितत्वरूपसाधारण्येन 'अस्तु' इति पदस्य पाठः-पठनं (उच्चारणं) न युक्तः, अर्थाद् भावनमस्कारसहितेन च भावनमस्काररहितेन निरुक्तपदपाठो वक्तुं न युक्तो यतो भावनमस्कारवति तु भावनमस्काररूपसाध्यस्य विद्यमानत्वेन सिद्धस्यासाधनं (सिद्धस्य साध्यस्यासाधनं, असिद्धसाध्यस्य साधनमिति नियमः) यदि यः सिद्धभावनमस्कारवान् प्रार्थनार्थकं 'अस्तु' पदं पठेत्तदा तस्य मृषावादो दोषो लगति. यतः, 'असदभिधानं'-

अयुक्तकथनं मृषा, इति वचनमस्ति, ध भावतः सिद्धे–भावनमस्कारे सिद्धे सति तत्प्रार्थनावचः–भावनमस्कारविषयकप्रार्थनावचो मृषा, यतो भावनमस्कारभावेन प्रार्थनीयेष्टभावनमस्कारप्राप्तिफलभवनस्याभावो वर्त्तते, भविष्यत्कालीनेष्टार्थस्य लाभहेतुनाऽविष्करणमाशीः, सा च प्रार्थनेति, अर्थादिष्टपदार्थप्राप्तिमति, प्राप्तेष्टपदार्थविषयकप्रार्थनावाचकं 'अस्तु' इति पाठोऽसन् वा मृषावादरूपः कथं न ?

**उच्यते, यत्किञ्चिदेतत्, तत्तत्त्वापरिज्ञानात्, भावनमस्कारस्यापि उत्कर्षादिभेदोऽस्त्येवेति तत्त्वं, एवं च भावनमस्कारवतोऽपि तथा तथोत्कर्षादिभावेनास्य तत्साधनायोगोऽसिद्धः, तदुत्कर्षस्य साध्यत्वेन तत्साधनत्वोपपत्तेरिति,**

पं०...'भावनमस्कारस्यापीति' किं पुनर्नामादिनमस्कारस्येत्यपिशब्दार्थः, 'तत्साधनत्वेनोपपत्तेरिति' तस्योत्कर्षानन्यरूपस्य नमस्कारस्य प्रार्थनया साधनभावस्य घटनात् ।

टी०...इति चेदुच्यते–पूर्वोक्तं वादिकथनं यत्किञ्चिद्रूपमस्ति, यतस्तस्य भावनमस्कारस्य तत्त्वं–मर्म–रहस्यं ज्ञातं न वर्त्तते, यत उत्कर्षादिभेदोऽस्त्येवेति तत्त्वम् = उत्कर्षः–उत्कृष्टनमस्कारः, अपकर्षः–अपकृष्ट–जघन्योऽर्थाद्ज्जघन्य–मध्यम–उत्कृष्टादिरूपभेद–प्रकारवान् भावनमस्कारोऽस्तीति तत्त्वं–रहस्यमस्ति, अर्थाद्, यत्प्रकारावच्छिन्न–भावनमस्कारवानस्ति ततोऽप्युत्कृष्टप्रकारावच्छिन्न–भावनमस्कारलाभोऽस्तु, इति प्रार्थनाऽस्ति, ततस्तादृशभावनमस्कारवतामपि तादृश–प्रार्थना–वचः संगतमस्ति, अर्थाद् भावनमस्कारवतोऽपि तथा तथा–तत्तत्प्रकाररूपोत्कर्षादिभावेन सिद्धभावनमस्कारवतस्तत्साधनस्यायोगोऽसिद्धः = तत्साधनयोगः सिद्ध एव, तदुत्कर्षस्य–तत–उत्कृष्टभावनमस्कारस्य साध्यत्वेन, तस्योत्कर्षानन्यरूपस्य नमस्कारस्य प्रार्थनया साधनभाव उपपन्नो भवति, एवं च हीनभावनमस्कारवान्, उत्कृष्टभावनमस्कारकामनया 'अस्तु' इत्यादि–पदेन प्रार्थयत इति सर्वं समञ्जसम् ।

**एवं चैवमपि पाठे मृषावादः, इत्याद्यपार्थकमेव, असिद्धे तत्प्रार्थनावच इति न्यायोपपत्तेः,**

टी०...एवं भावनमस्कारस्योत्कर्षादिभेद–सिद्धौ 'अस्तु' इत्यादि–पाठे मृषावाद इत्यादि पूर्वोक्तं तन्निरर्थकमेव यतोऽसिद्धे-अप्राप्ते तत्प्रार्थनावच इति न्यायस्योपपत्तिर्भवतीति, इदमत्र हृदयं = सर्वोत्कृष्ट–परमोत्कृष्ट भावनमस्कारस्यासिद्धौ–अप्राप्तौ जघन्यमध्यमादि–हीनसिद्धभावनमस्कारवद्भिः, सर्वे वीतरागरहितैः परमोत्कृष्टभावनमस्कारकामनया 'नमोऽस्तु' इत्यादिवचः–पाठोऽवश्यं पठनीय इति न्यायसंगतिः,

अथ भावनमस्कारोत्कर्षवन्तं वर्णयति,

**तत्प्रकर्षवांस्तु वीतरागो न चैवं पठतीति, न चाप्यस्तत्प्रकर्षवान्, भावपूजायाः प्रधानत्वात् तस्याश्च प्रतिपत्तिरूपत्वाद्,**

पं०...'न चैवं पठतीति' एवमिति प्रार्थनं, नमस्तीर्थायेति निराशंसमेव तेन पठनात्,

टी०...उत्कृष्टोत्कृष्टभावनमस्कारस्य स्वामी (अधिकारी) वीतराग एव (उपशांतमोह क्षीणमोहसयोगिकेवल्यादि वीतरागः) ("बिति अणासंसं चिय तित्थस्स नमोत्ति उपशमजिणाइ। अविगलआणापालणपहाणपडिवत्तिपूयपरा" "तुरिय भेद पडिवत्ति पूजा, उपशम खीण सयोगीरे, चउहा पूजा इम उत्तरज्झयणे, भाषी केवल भोगी रे। आनंद. चो. सुवि. स्त. ६" यदुक्तमुत्तराध्ययनेषु "अरहंता तित्थयरा, तेसिं चेव भत्ती कायव्वा, सा पूआ वंदणाईहिं भवई, पूअंमि पुप्फामिसथुईपडिवत्तिभेयओ चउव्विहंपि जहासत्तीए कुज्जा"—उ.सू.सम्य.प.अध्य.) .
किञ्च वीतरागस्तु भावनमस्कारलाभफलकप्रार्थनार्थकं 'अस्तु' इति पदं न वदति परन्तु 'नमस्तीर्थाय' तीर्थाय नमोऽस्ति तादृशार्थवाचकपदं निराशंसं वदति, 'अस्तु' इति पदं न प्रयुङ्क्ते, परन्तु 'अस्ति' इति क्रियापदमध्याहारेण गृह्यते. तथा च वीतरागभिन्नोऽन्य आत्मा, प्रकृष्टभावनमस्कारवान् नास्त्येव, यतः सर्वपूजासु भावपूजायाः प्रधानत्वं वर्त्तते भावपूजैव प्रतिपत्तिरूपाऽस्ति, अविकलाज्ञापालनरूपाऽथवा निष्कषायवृत्तिः, चतुर्थी प्रधानरूपा प्रतिपत्तिपूजा कथ्यते.
अथ चतुर्थी पूजायाः स्वमतसिद्धत्वेऽपि जैनमतभिन्नानां परेषां साक्षित्वपूर्वकं कथयति—

**उक्तं चाऽन्यैरपि—"पुष्पामिषस्तोत्रप्रतिपत्तिपूजानां यथोत्तरं प्राधान्यं" प्रतिपत्तिश्च वीतरागे,**

पं०..'पुष्पामिषस्तोत्रपूजानामित्यादि' तत्रामिषशब्देन मांसभोग्यवस्तुरुचिरवर्णादिलाभसञ्चयलाभरुचिररूपादिशब्दनृत्यादिकामगुणभोजनादयोऽर्था यथासम्भवं प्रकृतभावे योज्याः, देशविरतौ चतुर्विधाऽपि सरागसर्वविरतौ तु स्तोत्रप्रतिपत्ती द्वे पूजे समुचिते, भवतु नामैवं यथोत्तरं पूजानां प्राधान्यं, तथापि वीतरागे का सम्भवतीत्याह—'प्रतिपत्तिश्च वीतरागे इति' प्रतिपत्तिः, अविकलाप्तोपदेशपालना 'चः' समुच्चये वीतरागे—उपशान्तमोहादौ पूजाकारके। .

टी०..किञ्चान्यैरप्युक्तं हि पुष्पपूजातो नैवेद्यपूजा प्रधाना, नैवेद्यपूजातः स्तोत्रपूजा प्रधाना, स्तोत्रपूजातः प्रतिपत्तिः प्रधाना, उत्तरत्वेन पूजायाः प्रधानत्वेन उत्तरोत्तरपूजा प्रधाना, पूर्वपूर्वपूजा, अप्रधानेति कथ्यते. यद्यप्यामिषशब्दस्यानेकार्थसम्भवेऽपि नैवेद्यपूजारूपोऽर्थ एक एवोपयुज्यते, श्रावकत्वे द्रव्यपूजाभावपूजयोरधिकारित्वेन पुष्पादिका चतुर्विधा पूजा युक्ता. साधुत्वे द्रव्यपूजाया अनधिकारित्वेन भावपूजाया एवाधिकारित्वेन स्तोत्रप्रतिपत्तिपूजाद्वयं युक्तिमद्, अविकलाप्तोपदेशपालनरूपा प्रतिपत्तिस्तु वीतराग एवेति.

अनिष्कल (संपूर्ण) आप्त-सर्वशोभनेत्यादिकल्पान्तरूपा, सर्वपूजात्मप्रधाना प्रतिपत्तिमात्मिका चतुर्थी पूजा पूजाकारकोपशान्तक्षीणमोहसयोगिकेवलिरूपे वीतरागे सम्भवति.

अथ यदि नामैवं पूजाक्रमो वीतरागे च तत्सम्भवस्तथापि नमस्कारविचारे तदुपन्यासोऽयुक्त इत्याह—:

**पूजार्थं च नम इति, पूजा द्रव्यभावसङ्कोचः' इत्युक्तं, अतः स्थितमेतदनवद्यं 'नमोऽस्त्वर्हद्भ्यः' इति। इह च प्राकृतशैल्या चतुर्थ्यर्थे षष्ठी, उक्तं च—"बहुवयणेण दुवयणं, छट्ठिविभत्तीए भण्णइ चउत्थी। जह हत्था तह पाया, नमोऽत्थु देवाहिदेवाणं ॥१॥"**

पं०...'पूजार्थं चेत्यादि' प्रतिपत्तिरपि द्रव्यभावसङ्कोच एवेति भावः,

टी०...नम इति पदं पूजार्थकं ज्ञेयं, पूजा च द्रव्यभावसंकोचरूपेति पूर्वोक्तमेवेति, अस्मात्कारणात् स्थितेतद्, अनवद्यं–निर्मलं 'नमः, अस्तु अर्हद्भ्यः' इति वाक्यम् ॥ इह–प्रकृतवाक्ये प्राकृतभाषाशैलीद्वारा चतुर्थ्यर्थकषष्ठी–विभक्तिरस्ति, पाकृतभाषायामुक्तं च "बहुबचनेन द्विवचनं षष्ठी–विभक्त्या भण्यते चतुर्थी, यथा हस्तौ तथा पादौ, नमोऽस्तु देवाधिदेवेभ्यः"

'नमोऽत्थुणं अरहंताणं' इति अर्हत्पदघटकषष्ठी (चतुर्थी) विभक्तिगत–बहुवचनप्रयोगः किमर्थकः ? इति शङ्कानिरासायाह—:

**बहुवचनं तु अद्वैतव्यवच्छेदेनार्हद्बहुत्वख्यापनार्थं, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च,**

पं०...'अद्वैतव्यवच्छेदेनेति' द्वौ प्रकारावितं द्वीतं तस्य भावो द्वैतं तद्विपर्ययेणाद्वैतम्-एकप्रकारत्वं, तदाहुरेके–"एक एव हि भूतात्मा, देहे देहे प्रतिष्ठितः। एकधा बहुधा चापि, दृश्यते जलचन्द्रवत् ॥१॥" ज्ञान-शब्दाद्यद्वैतबहुत्वेऽप्यात्माद्वैतमेवेह व्यवच्छेद्यं, अर्हद्बहुत्वेन तस्यैव व्यवच्छेद्यत्वोपपत्तेः, "फलातिशयज्ञापनार्थं चेति" "फलातिशयो–भावनोत्कर्षं इति ॥

टी०...अत्राऽन्ययोगव्यवच्छेदकन्यायापेक्षया बहुवचनं तु,

अत्र जैमिनीयापरनामकस्य मीमांसकस्य द्वौ भेदौ स्तः, (१) याज्ञिकादिः कर्मवादी पूर्वमीमांसकः (२) उत्तरमीमांसको वेदान्ती. 'सर्वमेवेदं ब्रह्म' इति वाक्यप्रामाण्येनैतज्जगद् ब्रह्मस्वरूपमस्ति, एक एव भूतात्मा–प्रतिदेहस्थ आत्मा, जलचन्द्रवत्, एकधा बहुधा दृश्यते इति मन्यतेऽथवा 'तत्रेश्वरः सर्वज्ञः परमात्मा, एक एव' इति सिद्धान्तवादिनैयायिकवैशेषिकाणामीश्वरविषयकाद्वैतव्यवच्छेदद्वारा 'अर्हन्त ईश्वरा' अर्थान्नास्त्येकः परन्तु बहवः सन्ति (बहुवचनं सर्वकालिकार्हत् प्रतिपत्त्यर्थं, तत्रातीताः केवलज्ञानिप्रभृतयः, अनागताः पद्मनाभादयः, वर्तमाना ऋषभादयः सीमन्धरादयो वेत्यन्ययोगव्यवच्छेदकन्यायापेक्षया) इति बहुवचनस्य प्रथमो हेतुः,

नमस्कारक्रियाविषयभूतानां-पुष्टालम्बनभूतानामर्हतां-भगवतां बहुत्वेन नमस्कारकर्तुः, फलातिशयो–

भावनोत्कर्षो भवतीति ज्ञापनार्थं, अर्थाद् बहुवचनस्य द्वितीयो हेतुः (अत्रानुक्त–समुच्चायक–चकार-ग्रहणेन 'गौरवार्हे' गौरवार्थे बहुवचनमपि.)
अथैतद्विषयकमैदम्पर्यं, अग्रतो वक्ष्यमाणमस्तीति कथयति–:

**इत्येतच्चरमालापके 'नमो जिणाणं जियभयाणं' मित्यत्र सप्रतिपक्षं भावार्थमधिकृत्य दर्शयिष्यामः,**

टी०...इति एवं पूर्वोक्तवाक्यार्थविषयकं भावार्थं (तात्पर्यार्थं) अधिकाररूपविषयं लक्षीकृत्य प्रतिपक्ष (आक्षेप-पूर्वपक्ष) सहितं, एतस्य शक्रस्तवस्यान्तिमपदे 'नमो जिणाणं जियभयाणमिति' स्थले, तदवसरे दर्शयिष्यामः–प्रकटयिष्याम इति.
अथ 'नमोऽस्त्वर्हद्भ्यः' इति वाक्यार्थ–निर्णये योगाचार्याऽभिप्रायं दर्शयति–:

**अन्ये त्वाहुः–'नमोऽस्त्वर्हद्भ्यः' इत्यनेन प्रार्थनावचसा तत्त्वतो लोकोत्तरयानवतां तत्साधनं प्रथममिच्छायोगमाह, ततः शास्त्रसामर्थ्ययोगभावात्, सामर्थ्ययोगश्चानन्तर्येण महाफलहेतुरिति योगाचार्याः ।**

टी०...अन्ये–योगाचार्यास्त्वाहुः 'नमोऽस्त्वर्हद्भ्यः'-इत्याकारकेणानेन प्रार्थनावाचकवचनेन तत्त्वतः परमार्थतो, लोकोत्तरयानवतां–निर्वाणमार्गवरयानजिनमतवतां' तत्साधनं-लोकोत्तर-(आध्यात्मिक–जैन) यान–मार्गस्य साधनभूतं प्रथमं, इच्छायोगमाह, ततः = इच्छायोगतोऽनन्तरं शास्त्रयोगश्च सामर्थ्ययोगश्च भवतोऽतः प्रथममिच्छायोगमाह, अव्यवहितत्वेन-अनन्तरत्वेन महाफलंसिद्धिप्राप्ति प्रति साक्षात्–हेतुः सामर्थ्ययोगोऽस्ति इति योगाचार्याः ।
[अत्र पूर्वं 'नमोऽत्थुणं अरहंताणं' इत्यादि-पदेनेच्छायोगोनिरूपितः, अग्रतो वक्ष्यमाणेन 'नमो जिणाणं' मित्यादिपदेन शास्त्रयोगोऽस्ति 'इक्को वि नमुक्कारो' इत्यादिपदेन सामर्थ्ययोगो वक्ष्यमाणोऽस्ति.]
अथेच्छायोगादि–स्वरूपलक्षणविभागादि–जिज्ञासया प्रश्नयति–:

**अत्र के एते इच्छायोगादयः ?, उच्यते–अमी खलु न्यायतन्त्रसिद्धाः इच्छादिप्रधानाः क्रियया विकलाविकलाधिकास्तत्तत्कर्मव्यापाराः,**

पं०...'न्यायतन्त्रसिद्धाः' इति न्यायो–युक्तिः स एव तन्त्रम्–आगमस्तेन सिद्धाः–प्रतिष्ठिताः, सूत्रतः समये क्वचिदपि तदश्रवणात्, वक्ष्यति च–'आगमश्चोपपत्तिश्चेत्यादिः.

टी०...अथ किंस्वरूपाः किंसङ्ख्यका एते, इच्छायोग-शास्त्रयोग-सामर्थ्ययोगास्त्रयः? इति प्रश्ने प्रत्युत्तरयति–उच्यते इति–निश्चयेन प्रत्यक्षतो दर्श्यमाना 'न्यायतन्त्रसिद्धाः' युक्तिरूपागमद्वारा

प्रतिष्ठाप्राप्ता यतः सूत्रतः समये क्वचिदपि तदश्रवणात्, वक्ष्यति च 'आगमश्चोपपत्तिश्चेत्यादि' 'इच्छादिप्रधानाः' इच्छा च शास्त्रं च सामर्थ्यं च प्रधाना, प्रधाने च येषां ते' इच्छादिप्रधानाः' क्रियया–क्रियाऽपेक्षया, विकलाश्चाविकलाश्चाधिकाश्च ते, 'विकलाविकलाधिकाः' तत्त्वधर्मव्यापाराः, अथ विस्तरत इच्छादियोगान् वर्णयति–:

'उक्तं च' योगदृष्टिसमुच्चयनामके ग्रन्थे, उक्तं च

**कर्त्तुमिच्छोः श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादतः ।**
**विकलो धर्म्मयोगो यः, स इच्छायोग इष्यते ॥१॥**

पं०...'कर्त्तुमित्यादिश्लोकत्रयं' अथास्य व्याख्या–कर्त्तुमिच्छोः–कस्यचिन्निर्व्याजमेव तथाविधकर्म्मक्षयोपशमभावेन, अयमेव विशिष्यते = 'श्रुतार्थस्य' श्रुतागमस्यार्थशब्द आगमवचनः, अर्यतेऽनेन तत्त्वमिति कृत्वा, अयमपि कदाचिदज्ञान्येव भवति, क्षयोपशमवैचित्र्याद्, अत आह 'ज्ञानिनोऽपि' अवगतानुष्ठेयतत्त्वस्यापीति बोऽर्थः, एवंभूतस्यापि सतः किमित्याह'–'प्रमादतः' प्रमादेन–विकथादिना 'विकलः' असम्पूर्णः, कालादिवैकल्यमाश्रित्य 'धर्म्मयोगो' धर्मव्यापारो 'य' इति वन्दनादिविषयः, स इच्छायोग उच्यते, इच्छाप्रधानत्वं चास्य तथाकालादावकरणादिति ।

टी०...तथाविध-क्षयोपशमभावमपेक्ष्य कश्चिदधिकारी, द्रव्यादिपौद्गलिकफलाभिसन्धिरहितः, धर्मानुष्ठानचिकीर्षाविशिष्टः, सिद्धान्तोक्तानेकतत्त्वविषयस्य ज्ञातृत्वेऽपि कर्त्तव्यधार्मिकाऽनुष्ठानविधीनां ज्ञातृत्वेऽपि यत्कालीनं धर्मानुष्ठानं कार्यं, तस्मिन् काले यो न कुर्याद्, यथा प्रतिक्रमणनामक–क्रियां कुर्वाणस्य सूर्यास्तसमये 'वंदितासूत्र' मागच्छेत् परन्तु, अद्यतनकाले तु तदारम्भोऽपि न भवति, चैत्यवंदनं कुर्वाणेन तदर्थाऽनुप्रेक्षा तथा तच्चित्तैकाग्र्यं क्रियते परन्तु प्रमादतस्तन्न भवति, तथा च क्षयोपशमवैचित्र्येणाज्ञानी नास्ति, परन्तु ज्ञानवानस्ति तथा धर्मानुष्ठानज्ञाताऽस्ति मात्रविकथादिप्रमादपारवश्येन यदा क्रिया कार्या तदा क्रियां न करोति, पूजाकाले पूजां न कुर्यात्, गुरोर्वन्दनकाले गुरुं न वन्देत, सुपात्रदानाऽवसरे दानं न दद्यात्, मात्रतत्तद्विषयकभावनां प्रचण्डां भावयति, अपि कर्त्तुं न शक्नोति, अथवा कालमुल्लङ्घ्य करोति, विकाले करोति, शास्त्रविहितकाले न करोति, अत एवेच्छायोगः कथ्यते, चतुर्थगुणस्थानकादौ भवति. ॥१॥

अथ शास्त्रयोगस्वरूपाऽभिधित्सयाऽऽह–:

**शास्त्रयोगस्त्विह ज्ञेयो, यथाशक्त्यप्रमादिनः ।**
**श्राद्धस्य तीव्रबोधेन, वचसाऽविकलस्तथा ॥२॥**

पं०...'शास्त्रयोगस्त्विति' शास्त्रप्रधानो योगः शास्त्रयोगः, प्रक्रमादेतद्विषयव्यापार एव, स पुनरिह–योगतन्त्रे ज्ञेयः, कस्य कीदृगित्याह'–यथाशक्ति' शक्त्यनुरूपं 'अप्रमादिनो' विकथादिप्रमादरहितस्य, अयमेव विशिष्यते–'श्राद्धस्य' तथाविधमोहापगमात् स्व-सम्प्रत्ययात्मिकादिश्रद्धावतः 'तीव्रबोधेन' हेतुभूतेन 'वचसा' आगमेनाविकलः–अखण्डः, तथा–कालादिवैकल्याबाधया, न ह्यपटवोऽतिचारदोषज्ञा इति कालादिवैकल्येनाबाधायां तीव्रबोधो हेतुतयोपन्यस्तः ।

**टी०**...विषयतया शास्त्रप्राधान्यविशिष्टो योगः–तत्त्वधर्मव्यापारः = शास्त्रयोगः, स पुनरिह–योगतन्त्रे ज्ञेयः, तथाविध–मिथ्यात्वादिमोहापगमजन्यं स्वसम्प्रत्ययरूपं (अहमात्मास्मीत्याकारकं स्वनिर्णयात्मकज्ञानं) तथाऽऽत्मिकं (स्वीयं ज्ञानादि) तदादितत्त्वविषयकश्रद्धावतः, अप्रमादिनः-विकथादिरूपप्रमादरहितस्य, यथाशक्ति, विशेषणद्वयविशिष्टस्याऽन्तरात्मनः, तीव्रबोधरूपहेतुना, शास्त्रेण–आगमवचसा, अविकलः–अखण्डः (परिपूर्णः) तथा–कालादिवैकल्यरूपबाधारहित्वेन तीव्रबोधेन = अपटवो–मन्दबुद्धयोऽतिचारदोषान् न जानन्त्येवेत्यतः, कालादिवैकल्यविषयकबाधाया अभावे तीव्रबोधहेतुत्वेन स्थापितः, तथा च वंदनादिविषयकक्रियाद्वारा, शास्त्रेणाखण्डः, तीव्रबोधद्वारा, कालादिवैकल्यरूपबाधारहितः, यथाशक्ति, अप्रमादिनः, श्राद्धस्य (श्रद्धावतः) तत्त्वधर्मव्यापारः शास्त्रयोगः कथ्यते ॥२॥

अथ सामर्थ्ययोगलक्षणमाह–:

**शास्त्रसंदर्शितोपायस्तदतिक्रान्तगोचरः ।**
**शक्त्युद्रेकाद्विशेषेण, सामर्थ्याख्योऽयमुत्तमः ॥३॥**

**पं०**...'शास्त्रसंदर्शितोपायः' सामान्येन शास्त्राभिहितोपायः, सामान्येन शास्त्रेऽभिहितः तदभिधानात् 'तदतिक्रान्तगोचरः' शास्त्रातिक्रान्तविषयः, कुत इत्याह–'शक्त्युद्रेकात्' शक्तिप्राबल्यात्, 'विशेषेण' न सामान्येन शास्त्रातिक्रान्तगोचरः, सामान्येन फलपर्यवसायित्वाच्छास्त्रस्य, 'सामर्थ्याख्योऽयं' सामर्थ्ययोगाभिधानोऽयं–योगः 'उत्तमः' सर्वप्रधानोऽक्षेपेण प्रधानफलकारणत्वादिति ।

**टी०**...'शास्त्रसन्दर्शितोपायः' यतः शास्त्रं, सामान्य–व्यवहितसाधन–साधारणोपायजन्यफल–कार्यपर्यवसितं भवति न त्वसाधारण–विशेषफल–कार्यपर्यवसायीति, शास्त्रसामर्थ्ययोगयोर्महदन्तरं भवति, साधारणासाधारणोपायजन्यफलभेदात्, अतः प्रबलशक्तिविशिष्टक्रियाविशिष्टः, सर्वप्रधानोऽव्यवहितत्वेनाचिरेण प्रधानासाधारणफल–मोक्षफल–कारणत्वेनोत्तमो योगः सामर्थ्ययोगः, शास्त्रसामर्थ्ययोगयोर्भेदे विषयभेद–वैशिष्ट्यं वर्त्तते–:

**सिद्धयाख्यपदसम्प्राप्तिहेतुभेदा न तत्त्वतः ।**
**शास्त्रादेवावगम्यन्ते, सर्वथैवेह योगिभिः ॥४॥**
**सर्वथा तत्परिच्छेदात्साक्षात्कारित्वयोगतः ।**
**तत्सर्वज्ञत्वसंसिद्धेस्तदा सिद्धिपदाप्तितः ॥५॥**

**पं०**...एतत्समर्थनायैवाह–'सिद्धयाख्यपदसम्प्राप्तिहेतुभेदा इति' मोक्षाभिधानपदसम्प्राप्तिकारणविशेषाः सम्यग्दर्शनादयः, किमित्याह 'न तत्त्वतो' न परमार्थतः 'शास्त्रादेव' आगमादेवावगम्यन्ते, न चैवमपि शास्त्रवैयर्थ्यमित्याह–'सर्वथैवेह योगिभिः' सर्वैरेव प्रकारैरिह–लोके साधुभिः, अनन्तभेदत्वात्तेषामिति.

सर्वथा तत्परिच्छेदे शास्त्रादेवाभ्युपगम्यमाने दोषमाह–'सर्वथा' सर्वैः प्रकारैः अक्षेपफलसाधकत्वादिभिः 'तत्परिच्छेदात्' शास्त्रादेव सिद्ध्याख्यपदसम्प्राप्तेर्हेतुपरिच्छेदात्, किमित्याह–'साक्षात्कारित्वयोगतः' केवलेनेव साक्षात्कारित्वयोगात् कारणात् 'तत्सर्वज्ञत्वसंसिद्धेः', श्रोतृयोगिसर्वज्ञत्वसंसिद्धेः, अधिकृतहेतुभेदानामन्येन सर्वथा परिच्छेदायोगात्, ततश्च 'तदा' श्रवणकाल एव 'सिद्धिपदाप्तितः' मुक्तिपदाप्तेः, अयोगिकेवलित्वस्यापि शास्त्रादेवायोगिकेवलिस्वभावभवनेनावगतिप्रसंगाद्, अविषयेऽपि शास्त्रसामर्थ्याभ्युपगम इत्यमपि शास्त्रसामर्थ्यप्रसंगात्.

टी०...मोक्षाऽभिधानपदसम्प्राप्तिकरणविशेषरूपसम्यग्दर्शनादीनामनन्तभेदा भवन्त्यतः, लोके साधुरूपयोगिभिः, सर्वैरेव प्रकारैस्तत्त्वतः, शास्त्रादेव नाऽवगम्यन्ते, सिद्धिनामकपदसम्प्राप्ति–हेतु–भेदाः सर्वथा सर्वहेतु–परिच्छेदे शास्त्रादेवाऽभ्युपगम्यमाने दोषमाह–

अक्षेपफलसाधकत्वादियुक्तानन्तभेदावच्छिन्न–सर्वप्रकारैः, शास्त्ररूपकारणादेव सिद्धिनामकपदसम्प्राप्तिसर्व–हेतुविषयक–प्रत्यक्ष–परिच्छेदात्, केवलज्ञानेनेव साक्षात्कारित्वयोगकारणात्, श्रोतृरूपयोगिनि सर्वज्ञत्वसंसिद्धिर्भवेत्, यतोऽधिकृत–मुक्तिहेतुभेदानामनन्तानां शास्त्रभिन्नहेतुना सर्वथा परिच्छेदस्याऽभावोऽस्ति, ततश्च तदा–श्रवणकाल एव मुक्तिपदप्राप्ति र्भवेत्, (अयोगिकेवलित्वेऽपि शास्त्ररूप–मुख्यकारणजन्यायोगिस्वभावभवनद्वारा शास्त्राक्गम–श्रुतज्ञानस्य प्रसङ्गो भवति. मुख्य-कार्यकारणयोरभेदात्, शास्त्रस्याविषयेऽपि शास्त्रसामर्थ्याभ्युपगमः, अर्थाद्, शास्त्रस्य श्रवणेन श्रुतज्ञानं भवति, सामर्थ्येन प्रतिबन्धककर्मक्षयजन्य–मुक्तिप्राप्तिर्भवति, अविषयेऽपि शास्त्रे सामर्थ्य-स्वीकारेण शास्त्रे सामर्थ्ययोगस्य प्रसङ्ग–आपत्ति र्भवति परन्तु शास्त्रं भिन्नं सामर्थ्ययोगोपि-भिन्नोऽस्ति.)

शास्त्राणि दिग्दर्शकानीति-वचनाद्, शास्त्रद्वारा मोक्षप्राप्तेरनन्तसाधनभेदाः कथं ज्ञायन्ते ? न ज्ञायन्त एव, तज्ज्ञाने श्रोतृरूपयोगिनि, सिद्धिमार्गस्यानन्तभेदानां साक्षात्कारेण श्रवणसमय एव सर्वज्ञत्व-प्राप्त्या सह सिद्धिपद–प्राप्तिरवश्यं भाविनी स्यात्, तन्न भवत्येव. अथ शास्त्रज्ञानेनाऽयोगिकेवलित्व-विषयकं श्रुतज्ञानं भवति–

सिद्धिर्न भवत्यतः केन ज्ञानेन सामर्थ्ययोगो भवति ? येन सामर्थ्ययोगेन सर्वज्ञत्व–सिद्धिर्भवति ?–:

न चैतदेवं यत्तस्मात्प्रातिभज्ञानसंगतः ।
सामर्थ्ययोगोऽवाच्योऽस्ति, सर्वज्ञत्वादिसाधनम् ॥६॥

पं०...स्यादेतत्, अस्त्वेवमपि का नो बाधेत्यत्राह–'न चैतदेवं' अनन्तरोदितं, शास्त्रादयोगिकेवलित्वावगमेऽपि सिद्ध्यसिद्धेः, यस्मादेवं तस्मात् 'प्रातिभज्ञानसंगतो' आर्षानुसारिप्रकृष्टोहज्ञानयुक्तः, किमित्याह-'सामर्थ्ययोगः' सामर्थ्यप्रधानो योगः सामर्थ्ययोगः, प्रक्रमाद्धर्मव्यापार एव क्षपकश्रेणिगतो गृह्यते, अयमवाच्योऽस्ति तद्योगिस्वसंवेदनसिद्धः, 'सर्वज्ञत्वादिसाधनं' अक्षेपेणातः सर्वज्ञत्वसिद्धेः ।.

टी०...शास्त्रीयज्ञानमात्रेण मोक्षफलसिद्धि र्न भवति, सामर्थ्ययोगेन सिद्धिर्भवति.

सामर्थ्ययोगः केन ज्ञानेन संगतो भवतीति प्रश्ने–आह 'प्रातिभज्ञानसंगतो'–मोक्षमार्गानुसारि–प्रकृष्टोहज्ञान–मानसिकतादृशविशिष्टज्ञानयुक्तः, ननु प्रातिभज्ञानं श्रुतज्ञानं तदस्तीति तस्याऽस्वीकारे, शास्त्रे पञ्च ज्ञानानि कथितानि सन्ति, तदतिरिक्तमते षड्ज्ञानानि भविष्यन्ति । प्रातिभज्ञानं केवलज्ञानं न कथ्यते केवलज्ञानं तु सामर्थ्ययोगस्य कार्यं भवति, प्रातिभज्ञानस्य श्रुतज्ञानेन्तऽर्भावश्चेत्तदा मोक्षप्राप्तिसधनानि यानि यानि सन्ति तानि तानि श्रुतज्ञानरूपशास्त्रजन्यान्येवेति निश्चये को दोषः? इत्युच्यते प्रातिभज्ञानं न श्रुतज्ञानं न तु केवलज्ञानं पञ्चज्ञानेभ्योऽतिरिक्तं नास्त्येव. (सन्ध्येव दिनरात्रिभ्यां, केवलश्रुतयोः पृथक् । बुधैरनुभवो दृष्टः, केवलार्करुणोदयः॥ ज्ञानसारे अनु.भ.उ.यशो.) केवलज्ञानसूर्यात्प्राक्कालीनारुणोदयसमानानुभवापरपर्यायं प्रातिभज्ञानं कथ्यते, प्रातिभज्ञानं न श्रुतज्ञानं तथा न केवलज्ञानं कथ्यते, यतः सामर्थ्ययोगकालीनक्षपकश्रेणिगतत्वेनोत्कृष्टक्षयोपशमभावं गृहीत्वा प्रातिभज्ञानं श्रुतज्ञानं न कथ्यते, क्षायोपशामिकभाववत्त्वेन, सर्वद्रव्यपर्यायाऽविषयकत्वेन केवलज्ञानं न कथ्यते, प्रातिभज्ञानमे तदर्कारुणोदयकल्पं केवलज्ञानपूर्वकालीनावस्थाविशेषात्मकं कथ्यते, परे तारकनिरीक्षण–ज्ञानं कथयन्तीति अर्थात् प्रातिभज्ञानसंगतो वाचाऽवाच्योऽपि सामर्थ्ययोगिस्वानुभवसिद्धः, सर्वज्ञत्वाव्यवहितसाधनरूपः क्षपकश्रेणिगतः, क्रियाऽतिशयसम्पन्नतत्त्व–धर्मव्यापारविशेषः सामर्थ्ययोगः कथ्यते.

सामर्थ्ययोगभेदाऽभिधानायाऽऽह–:

**द्विधाऽयं धर्म्मसंन्यासयोगसंन्याससंज्ञितः ।**
**क्षायोपशमिका धर्मा योगाः कायादिकर्म्म तु ॥७॥**

**पं०**...'द्विधा' द्विप्रकारोऽयं–सामर्थ्ययोगः, कथमित्याह–'धर्म्मसंन्यासयोगसंन्याससंज्ञितः' संन्यासो निवृत्तिरुपरम इत्येकोऽर्थः, ततो धर्मसंन्याससंज्ञा सञ्जाताऽस्येति धर्मसंन्याससंज्ञितस्तारकादिभ्य इत (तदस्य संजातं तारकादिभ्य इतच् पा.५-२-३६) एवं योगसंन्याससंज्ञा सञ्जाताऽस्येति योगसंन्याससंज्ञितः, क एते धर्म्माः ? के वा योगा इत्याह–'क्षायोपशमिका धर्म्मा' क्षयोपशमनिर्वृताः क्षान्त्यादयो, योगाः पुनः कायादिव्यापाराः कायोत्सर्ग्गकरणादय एवमेव द्विधा सामर्थ्ययोग इति.

**टी०**...अत्र संन्यासशब्दस्य पारिभाषिकोऽर्थः, निवृत्तिर्विरतिस्त्याग इत्येकोऽर्थो न तु सम्यक्तया न्यासः–स्थापनं, धर्म्मसंन्यासनामकसामर्थ्ययोगघटकधर्मपदेन क्षायोपशमिकाः क्षमाद्या दशविधाः साधुधर्मा ग्राह्याः, योगसंन्यासनामकसामर्थ्ययोगघटकयोगपदेन कायोत्सर्गकरणादिरूपाः कायादिव्यापारा एवाद्येया नान्ये.

अथ द्विविधः सामर्थ्ययोगो यदा भवति तं तदाभिधातुमाह–:

**द्वितीयापूर्वकरणे, प्रथमस्तात्त्विको भवेत् ।**
**आयोज्यकरणादूर्ध्वं, द्वितीय इति तद्विदः ॥८॥**

**पं०**...'द्वितीयापूर्वकरण इति' ग्रन्थिभेदनिबन्धनप्रथमापूर्वकरणव्यवच्छेदार्थं द्वितीयग्रहणं, प्रथमेऽधि-

कृतसामर्थ्ययोगासिद्धेः, अपूर्वकरणं त्वपूर्वपरिणामः शुभोऽनादावपि भवे तेषु तेषु धर्मस्थानेषु वर्तमानस्य तथा-ऽसञ्जातपूर्वो ग्रन्थिभेदादिफल उच्यते, तत्र प्रथमे तस्मिन् ग्रन्थिभेदः फलं, अयं च सम्यग्दर्शनफलः, सम्यग्दर्शनं च प्रशमादिलिंग आत्मपरिणामः, यथोक्तम्–"प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं, तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति" (तत्त्वार्थभाष्यम् अ. १ सू. २) यथाप्रधानमयमुपन्यासो लाभश्च पश्चानुपूर्व्येति समयविदो, द्वितीये त्वस्मिंस्तथाविधकर्मस्थितेस्तथाविधसंख्येयसागरोपमातिक्रमभाविनि, किमित्याह-"प्रथमस्तात्त्विको भवेदिति" प्रथमो धर्मसंन्याससंज्ञितः, सामर्थ्ययोगस्तात्त्विकः–पारमार्थिको भवेत्, क्षपकश्रेणियोगिनः क्षायोपशमिकक्षान्त्यादिधर्मनिवृत्तेः, अतोऽयमित्थमुपन्यास इति, अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति सावद्यप्रवृत्तिलक्षणधर्मसंन्यासयोगः, प्रव्रज्याया ज्ञानयोगप्रतिपत्तिरूपत्वात्, "आयोज्यकरणादूर्ध्वमिति" केवलाभोगेनाचिन्त्यवीर्यतयाऽऽयोज्य–ज्ञात्वा तथा तथा तत्तत्कालक्षपणीयत्वेन भवोपग्राहिकर्मणस्तथाऽवस्थानभावेन कृतिः–आयोज्यकरणं, शैलेश्यवस्थायामस्य भावात् तत आयोज्यकरणादूर्ध्वं तु द्वितीयः ॥

टी०...अत्र प्रथमापूर्वकरणं व्यवच्छेद्यं भवत्यतो द्वितीयापूर्वकरणं ग्राह्यम् यतः प्रथमाऽपूर्वकरणमधिकृतसामर्थ्ययोगसाधकं न भवति परन्तु ग्रन्थिभेदं प्रति मूलं–मुख्यं कारणं, अपूर्वकरणस्य लक्षणमपूर्वपरिणामः शुभोऽभूतपूर्वोग्रन्थिभेदादिफलजनकः, अर्थात्प्रथमापूर्वकरणस्य फलं ग्रन्थिभेदः, ग्रन्थिभेदस्य फलं सम्यग्दर्शनं चात्मपरिणामः प्रशमादिपञ्चकलक्षणेनाऽनुमीयते, प्रशमाभिव्यक्तितः, संवेगाभिव्यक्तितः, निर्वेदाभिव्यक्तितः, अनुकम्पाऽभिव्यक्तितः, आस्तिक्याभिव्यक्तितश्च लक्ष्यते इति लक्षणं, प्रशमाद्यभिव्यक्ति–लक्षणम्, तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् इति, प्रधान–श्रेष्ठस्यापेक्षया क्रमशः प्रशमादीनामुपन्यासः, प्रथमः प्रशमः प्रधानः, द्वितीयः संवेग प्रधानः इत्यादि-यथाप्रधानोपन्यासः, लाभश्च पश्चानुपूर्व्या यथाऽऽस्तिक्यस्य प्रथमो लाभः, अनुकम्पायास्तदनु लाभ इत्यादि प्रधानलाभौ समयविदः कथयन्ति.

तथाहि तथाविधकर्मस्थितेः—सम्यग्दर्शनप्राप्त्यनन्तरमवशिष्टकर्मस्थितेस्तथाविधसंख्येयसागरोपमाऽतिक्रमभाविनि द्वितीयापूर्वकरणे प्रथमो धर्मसंन्याससंज्ञितः सामर्थ्ययोगस्तात्त्विको भवेत्, यतः क्षपकश्रेणियोगिनः क्षायोपशमिकक्षमादिधर्मस्य निवृत्तिर्भवति, अतोऽयमित्थमुपन्यासः, अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति. ("कान्ता मे समतैवेका, ज्ञातयो मे समक्रियाः । बाह्यवर्गमिति त्यक्त्वा धर्मसंन्यासवान् भवेत् ॥३॥ ज्ञानसारे. त्यागाष्टके" अत्रैवं निश्चयभावेन बाह्यपरिवारं त्यक्त्वा गृहस्थसत्कारसमृद्धिप्रमुखौदयिकभावधर्मसंन्यासवान् भवेत्, अर्थादौदयिकभावं त्यक्त्वा क्षयोपशमवान्, औदयिकभावधर्मत्यागरूपातात्त्विकधर्मसंन्यासरूपसामर्थ्ययोगः प्रव्रज्याकाले भवति) षष्ठगुणस्थानकेऽपि भवति (दानप्रभुपूजादि-सदारम्भरूप) सावद्यप्रवृत्तिलक्षणधर्मसंन्यासयोगः, प्रव्रज्याया (आत्मरतिरूप) ज्ञानयोगप्रतिपत्तिरूपत्वात्.

"योगसंन्यासतस्त्यागी योगानप्यखिलांस्त्यजेत् । इत्येवं निर्गुणं ब्रह्म परोक्तमुपपद्यते ॥७॥ ज्ञानसारे त्यागाष्टके" त्यागी (क्षायोपशमिकधर्मसंन्यासी) योगसंन्यासतः सर्वयोगानपि त्यजेत्. एष योगसंन्यासश्चतुर्दशगुणस्थानके भवेत्तथाहि–केवलज्ञानेनाचिन्त्यवीर्यशक्तितो भवोपग्राहिकर्मणस्तथाविध-

स्थितिमानीय क्षयकरणीय-क्रिया साऽऽयोज्यकरणं, तस्य फलं शैलेशी = योगानामत्यन्तस्थिरताऽस्ति, तदनन्तरं द्वितीयो योगसंन्यासनामा सामर्थ्ययोगः प्राप्यते, एवं तत्स्वरूपविदो वदन्ति, शैलेश्यवस्थायां कायादिकर्मणां त्यागेन 'अयोग' नामकः सर्वयोगसंन्यासरूपसर्वोत्तमयोगः प्राप्यते, अनया रीत्याऽन्यैर्योगाचार्यै र्ज्ञापितं निर्गुणं ब्रह्म (मोक्षपदं) उपपद्यते, जैनशैलीप्रमाणेन शैलेशीकरणेन सम्पूर्णयोगनिरोधरूपः, सर्वसंवररूपसंयमेन समस्तकर्मक्षयरूपं मोक्षपदं प्राप्यते, एतदेव निर्गुणं ब्रह्म कथ्यते, सर्वोपाधिक–धर्मयोगाभाव एव निर्गुणपदार्थः)

अर्थात् केवलज्ञानरूपोपयोगेन ज्ञात्वाऽचिन्त्यवीर्यशक्तिद्वारा तथा तथा तत्तत्कालक्षपणयोग्यत्वेन भवोपग्राहि (अघाति) कर्मणः क्षपणकरणे प्रयत्नविशेषो नामायोज्यकरणं, शैलेश्यवस्थायामस्य भावात् तत आयोज्यकरणादूर्ध्वं द्वितीयो योगसंन्यासनामकः सामर्थ्ययोगो भवति.

**अतस्त्वयोगो योगानां, योगः पर उदाहृतः ।**
**मोक्षयोजनभावेन, सर्वसंन्यासलक्षणः ॥११॥ इत्यादि**
**(योगबृ. समु.–३–११)**

पं०...'अतस्त्विरयादि' अत एव–शैलेश्यवस्थायां योगसंन्यासात्कारणात् 'अयोगो' योगाभावो 'योगानां' मैत्र्यादीनां, मध्य इति गम्यते, योगः 'परः' प्रधानः उदाहृतः, कथमित्याह–'मोक्षयोजनभावेन' हेतुना, योजनाद् योग इतिकृत्वा, स्वरूपमस्याह–'सर्वसंन्यासलक्षणो' धर्माधर्मसंन्यासयोरप्यत्र परिशुद्धिभावादिति.

टी०...अत एव = शैलेश्यवस्थायां प्राप्ययोगसंन्यासरूपासाधारण-कारण-अव्यवहितकारणजन्यो मनोवचः कायकर्मरूपयोगाभावः 'अयोगः' कथ्यते 'योगानां' मित्रादिरूप–योगदृष्टयादीनामथवा मैत्रीप्रमोदकारुण्यमाध्यस्थ्यादिरूपभावनारूपयोगानां मध्ये, अयोगरूपो योगः 'परः' प्रधानः–श्रेष्ठ उच्यते, अयोगरूपपरयोगस्य प्रधानता–सिद्धये, उच्यते 'मोक्षयोजनभावेन' योजनाद्योग इति व्युत्पत्त्यपेक्षया मोक्षेण सहयोजनभावरूपहेतुना 'अयोगः' योगः कथ्यते, अयोगरूपयोगस्य स्वरूपमाह 'सर्वसंन्यासलक्षणः' तात्त्विका–तात्त्विकधर्मसंन्यास–योगसंन्यासरूपपौद्गलिकादृष्ट–धर्माधर्मपुण्य–पापसंन्यासरूपसर्वसंन्यासलक्षणः, योगानां परयोगरूपः 'अयोगनामको' योगः, अव्यवहितत्वेन मोक्षेण सह योजकत्वेन कथ्यते इति हृदयम् ।

'इत्यादि' अत्रादिपदेन "एतत्त्रयमनाश्रित्य, विशेषेणैतदुद्भवाः । योगदृष्टय उच्यन्ते, अष्टौ सामान्यतस्तु ताः ॥ मित्रा तारा बला दीप्रा, स्थिरा कान्ता प्रभा परा, नामानि योगदृष्टीनां लक्षणं च निबोधतेत्यादि" योग दृ. १२/१३ श्लो. योगदृष्टीनां संक्षिप्तं स्वरूपं–:

(१) मित्रा = अस्यां दृष्टौ, बोधस्तु तृणाग्नितुल्योऽस्ति, वस्तुतः स्वकार्यसाधको नास्ति, अल्पशक्तिकत्वादावश्यककार्यसमयं यावन्न तिष्ठति, सुन्दरस्मृतिबीजरूपशुभसंस्काराभावेन देवगुरुवन्दनादौ वैकल्यमायाति, भावतो वंदनादिकार्यं न भवति ।

(२) तारा = अस्यां दृष्टौ बोधस्तु करीषाग्निकणतुल्योऽस्ति, पूर्वस्या ईषदधिकोऽस्ति तथापि कार्यकाले बोधदीपो विध्यापितो भवति, वस्तुतस्तु बहुकालं न तिष्ठति; अतः कारणात् पूजादिशुभकार्यशुभकरणे सज्जतायामपि पूर्वस्मृतेः शुभत्वाभावेन कार्यं कर्त्तुं न शक्नोति ।

(३) बला = अस्यां काष्ठाग्निकणतुल्यो बोधोऽस्ति, अत्राभ्यन्तरे पूर्वदृष्टिद्वयादीषदधिको वर्त्तते, अत्र प्रथमबोधद्वयमिलनेन वीर्यशक्तिरीषदधिका वर्त्तते, स्मृतिरपि मनाक्शुभा वर्त्ततेऽतः प्रभुपूजादिशुभ कार्येषु प्रीतिर्जायते परन्तु प्रयत्नोऽल्पोऽपि क्रियते ।

(४) दीप्रा = अस्यां बोधस्तु दीपप्रभातुल्यः, पूर्वस्या अत्यन्तं शुभः, यतः पूर्वासां तिसृणां बोधोऽत्रायाति, अतोऽत्र वीर्यशक्तिस्तीव्रा, तथा कार्यकरणकालेऽत्र स्मृतिस्तीव्रा, अतो द्रव्यभावाभ्यां देवपूजागुरुभक्ति–प्रभृति–शुभकार्याणि करोति.

(५) स्थिरा = अस्यां ग्रन्थिभेदभवनेन सम्यग्दर्शनं स्थिरं भवति, अत्र बोधस्तु रत्नप्रभातुल्यश्चिरस्थायी, परिणामतोऽप्रतिपाती, तत्त्वार्थरूपसूक्ष्मबोधो यथार्थो भवति, अज्ञानमिथ्यात्वयोरभावः, सरला बुद्धिः, शुभकार्यप्रवृत्तिः, प्रेमातिशयज्ञानपूर्विका क्रिया, असत्प्रवृत्ति–निवृत्तिः ।

(६) कान्ता = अस्यां बोधस्तु ताराप्रभा–तुल्यो भवति, रत्नप्रभाप्रकाशस्तु, अमुकमर्यादापर्यन्तो, यदाऽऽकाशस्थताराप्रकाशो, वहुदूरदेशं यावद् याति, स्थिरातोऽस्यां दृष्टौ बोधोऽत्यन्तशुभो भवति, एतद् दृष्टिमान् स्थिरशान्तप्रकृतिप्रवृत्तिमत्त्वेन, धर्मानुष्ठानेषु निरतिचारत्वं भवति, शुद्धोपयोगसत्त्वेन प्रमादरहितत्वेन, वस्तुग्रहणमोचनकाले, शुद्धिप्रवृत्तिप्रधानो भूत्वा गम्भीरोदाराशयवान् सन्ननुष्ठानं करोति ।

(७) प्रभा = अस्यामादित्यप्रकाशतुल्यो बोधो भवति, नैरन्तर्येणात्मध्याने निमग्नो भवति, प्रायेणाऽस्यां संकल्पविकल्पाभावो यथा तथा यत्तत्प्रतिकूलविपरीतविचारमालातरङ्गाभावो भवति, यां यां करोति चेष्टां सा साऽवन्ध्यफला भवति.

(८) परा = अस्यां चन्द्रज्योत्स्नातुल्यः सूक्ष्मो बोधः, सातत्येन स्व–स्वरूपे रममाणतारूपध्याने मग्नो भवति, तथा निर्विकल्पोऽतः परमसुखमनुभति, वृक्षारूढस्य पुनरारोहणमनावश्यकं तथैतद्दृष्टिमत उत्कृष्टान्तरात्मनो महात्मन आवश्यकादि–क्रियाऽनुष्ठानमनावश्यकं परन्तु यथाभव्यं परोपकारस्तथा पूर्ववदवन्ध्यक्रिया वर्त्तते ॥

अथाऽत्र चैत्यवंदनसूत्रमध्ये कुत्र कुत्र योगः कस्को योगोऽस्तीति निरूपणम्–:

**तत्र 'नमोऽस्त्वर्हद्भ्यः' इत्यनेनेच्छायोगाभिधानं, 'नमो जिनेभ्यो जितभयेभ्य' इत्यनेन तु वक्ष्यमाणेन शास्त्रयोगस्य, निर्विशेषेण सम्पूर्णनमोमात्राभिधानात्, विशेषप्रयोजनं चास्य स्वस्थान एव वक्ष्याम इति ॥ तथा–'इक्कोऽवि नमुक्कारो, जिणवरवसहस्स वद्धमाणस्स**

**संसारसागराओ, तारेइ नरं व नारिं वा ॥१॥' इत्यनेन पर्यन्तवर्तिना सामर्थ्ययोगस्य, कारणे कार्योपचारान्न संसारतरणं सामर्थ्ययोगमन्तरेणेति कृत्वा ।**

**टी०...**(१) पूर्वोक्तवर्णनद्वारा 'अत्र' चैत्यवंदनसूत्रमध्ये 'नमोऽस्त्वर्हद्भ्यः' इत्यनेन-प्रथमपदेनेच्छा-योगस्य (इच्छा-प्रधान-क्रियाविकल-नमस्काररूपतत्त्वधर्मव्यापारस्य प्रतिपादनेनेच्छायोगस्य) अभिधानमस्ति.

(२) 'नमो जिनेभ्यो जितभयेभ्यः' इत्यनेन तु वक्ष्यमाणेन-अन्तिमनवमीसम्पद्घटकपदेन शास्त्र-योगस्य विधानं, यतो निर्विशेषेण-विशेषं विना सामान्येन-सम्पूर्ण-(अविकल-क्रियावत्त्वेन) नमस्कारमात्राभिधानं.

(शास्त्रप्रधानत्वेनाविकल-नमस्काररूप-तत्त्वधर्मव्यापाररूपशास्त्रयोगाभिधानं) अर्थात् स्तोतव्य-भावार्हदालम्बनविशेषस्थानरूपप्रथमाधिकारशक्रस्तवस्य समाप्तौ वर्तमाननमःपदार्थरूपनमस्कारः शास्त्रयोगं दर्शयति. विशेषप्रयोजनं चास्य स्वस्थान एव-नवमीसम्पद्व्याख्यानावसरे, एव शास्त्र-योगस्य विशेषप्रयोजनं वक्ष्यामः-कथयिष्याम इति ।

'तथा चैत्यवंदने सिद्धस्तवे 'एकोऽपि नमस्कारो जिनवरवृषभस्य वर्धमानस्य संसारसागरात् तारयति नरं वा नारीं वा ॥१॥' इत्यनेन तु नमःपदार्थरूपनमस्काररूपेण पर्यन्तवर्त्तिना पदेन सामर्थ्य-योगस्य (अभिधानं) कारणे कार्योपचारादर्थाद् 'नमस्कारः सामर्थ्ययोगः' अत्र नमस्कारः कारणं, यदा संसारतरणरूपकार्यं प्रति, अव्यवहितहेतुरूप-सामर्थ्ययोगोऽस्ति, अर्थाद् यथा 'घृतमायुः' आयुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते, अव्यभिचारेण आयुष्करत्वम् प्रयोजनं तथा 'नमस्कार सामर्थ्ययोगः' इत्यत्र सामर्थ्ययोगकारणमपि नमस्कारः, कार्यकारणभावसम्बन्धसम्बन्धी सामर्थ्ययोगस्ता दात्म्येन प्रतीयते, अव्यभिचारेण सामर्थ्ययोग-करत्वं प्रयोजनं, नमस्कारे सामर्थ्ययोगत्वारोपः, सामर्थ्ययोगसाधनत्वादित्यवधेयम्. इदमत्रहृदयम् = नमस्काररूपकरणे सामर्थ्ययोगरूपकार्यस्योपचारं (कारणे कार्योपचारविषयज्ञापनार्थं मृत्तिका-घटयोरुदाहरणं विमर्शनीयम्-यदा मृत्तिका, मृत्तिकाऽवस्थायां स्यात्, मृत्तिकारूपेण भवेत्, घटरूपेण परिणता न भवेत्तदाऽपि सत्कार्यवादापेक्षयाऽथवा तिरोभाव-विवक्षया, मृत्तिका घटरूपा मन्तव्येत्येतदुपचारस्योदाहरणम्. मृत्तिकावस्थायामपि मृत्तिका घटोऽस्तीति कथनमसत्यरहितम्, यद्यपि मृत्तिकायामस्यां घटनिष्ठजलाहरणादिका धर्मा न सन्ति, अर्थान्मृत्तिकयाऽनया किञ्चिदपि घट-कार्यं न क्रियते-न कर्तुं शक्तिरस्ति, तथापि रूपाद्याः केचिद् धर्माः समाः सन्ति तथा भविष्यत्काले घटो भवितुमर्हतीति न्यायेन द्रव्यघटे-घटाकारजननयोग्यतावति भावघटस्योपचारो-व्यवहारो भवति) कृत्वा, नमस्कारः सामर्थ्ययोग इति व्यवह्रियते, संसारात्तरणं सामर्थ्ययोगं विना न सम्भवति, सामर्थ्ययोगाविनाभावि संसारात्तरणं, सामर्थ्ययोगस्तु तादृशनमस्कारं विना न भवति, अर्थाद्, नमस्कारः सामर्थ्ययोगजननद्वारा संसारतरणरूपकार्यं प्रति कारणम्, यथा दण्डो घटस्य कारणमस्ति साक्षान्नहि परन्तु भ्रमिद्वारा, तथा नमस्कारः संसारतरणं प्रति कारणमस्ति, साक्षान्नहि परन्तु

सामर्थ्ययोगजननद्वारैव, यथा मंगलमपि विघ्ननाशं कृत्वा ग्रन्थसमाप्तिं करोति, तथा नमस्कारोऽपि सामर्थ्ययोगं जनयित्वा संसारतरणकार्यं करोति, नान्यथेति. यथा धर्मिव्यापारस्तथा सामर्थ्ययोगोऽप्येकप्रकारो व्यापारः, यतो नमस्कारजन्यसामर्थ्ययोगः, संसारतरणरूपकार्यं प्रति जनकोऽप्यस्ति. (द्वारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वम्) अथ वादी-:

**आह-अयं 'प्रातिभज्ञानसंगत' इत्युक्तं, तत्किमिदं प्रातिभं नाम ?, असदेतत्, मत्यादिपञ्चकातिरेकेणास्याश्रवणात्, उच्यते-चतुर्ज्ञानप्रकर्षोत्तरकालभावि केवलज्ञानादधः, तदुदये सवित्रालोककल्पमिति न मत्यादिपञ्चकातिरेकेणास्य श्रवणं, अस्ति चैतद्, अधिकत्वावस्थोपपत्तेरिति, एतद्विशेष एव प्रातिभमिति कृतं विस्तरेण १ ।**

**टी०**...सामर्थ्ययोगस्य लक्षणप्रसंगे 'अयं' सामर्थ्ययोगः 'प्रातिभज्ञानसंगतः' सामर्थ्ययोगस्य प्रातिभज्ञानसंगतत्वं विशेषणमुक्तं पूर्वत्र, अत्र प्रश्नः-तत् किमिदं प्रातिभं नाम ? सामर्थ्ययोगेन सह प्रातिभं ज्ञानं किमपूर्वं श्रूयतेऽतोऽसदेतदसत्यं वाऽविद्यमानमेतद् यतो मति-श्रुत-अवधि-मनःपर्यव केवलज्ञानादिपञ्चकातिरेकेणाऽऽस्य-प्रातिभज्ञानस्याऽश्रवणं विद्यते, जैनागमे मत्यादिपञ्चकज्ञानादतिरिक्तं-भिन्नं प्रातिभज्ञानं न श्रूयतेऽतः प्रातिभज्ञानमत्र कथं मन्येतेति चेदुच्यते क्षायोपशमिकमत्यादिरूपाणि यानि चत्वारि ज्ञानानि सन्ति तेषां चतुर्ण्णां यः प्रकर्षः-सम्पूर्ण-प्रकृष्टदशा, तदुत्तरकालभावि, केवलज्ञानपूर्वकालीनं, केवलज्ञानोदयात्पूर्वं सूर्यालोक = अरुणोदयसमानं प्रातिभज्ञानं, अर्थाद् यदा केवलज्ञानं सूर्यस्तदा तत्पूर्वं प्रातिभज्ञानमरुणोदयः, प्रातिभज्ञान-पूर्णानुभवज्ञानानन्तरं केवलज्ञानसविता, समुदेति, अत एव प्रातिभज्ञानं मत्यादिपञ्चकादतिरिक्तं कुतः श्रवणं स्यात् ?, किंचैतत् प्रातिभज्ञानमस्ति, यतश्चतुर्ज्ञान प्रकर्षरूपाधिकत्वविशिष्टावस्थाया उपपत्ति विद्यते, अर्थात् चतुर्ज्ञानप्रकर्षोत्तरकालीन-केवलज्ञानाऽव्यवहित-पूर्वकालीनाधिकत्वाऽवस्थाविशेष एव प्रातिभं(पारिभाषिकार्थविशिष्टं) इति प्रातिभज्ञानं, एवं शब्दविस्ताररूपेण विस्तरेण कृतमलम् ।१। 'नमोत्थुणं अरहंताणं' रूपस्य चैत्यवंदनसूत्रस्य प्रथमपदस्य विवरणं समाप्तम् ॥

अथ शास्त्रकारः 'भगवद्भ्यः' इति द्वितीयं विशेषणपदं कीदृशं कथं कथितं ? तथाऽस्यावतरणिकाऽनन्तरं 'भगवद्भ्यः' इति पदस्याद्भुता व्याख्या निरुच्यते-:

**एते चार्हन्तो नामाद्यनेकभेदाः 'नामस्थापनाद्रव्यभावतस्तन्न्यास' इति (तत्त्वा.अ-१सू.-५) वचनात्, तत्र भावोपकारकत्वेन भावार्हत्सम्परिग्रहार्थमाह-'भगवद्भ्य इति'**

**टी०**...पूर्वोक्तार्थसंयुक्ताः, 'एते' प्रत्यक्षीक्रियमाणा 'अर्हन्तो' नामाद्यनेकभेद-प्रकारवन्तः सन्ति, यतः 'नामस्थापनाद्रव्यभावतस्तन्न्यासः' सम्यग्दर्शनाद्या मोक्षमार्ग-रत्नरूपा, जीवाद्या तत्त्वरूपाः पदार्थाः, नामादिभिश्चतुर्भि र्निक्षेपैः साध्या-विचारणीया एवं च "नामजिणा जिणनामा,

ठवणजिणा जिणिंदपडिमाओ । दव्वजिणा जिणजीवा, भावजिणा, समवसरणत्था'' (चैत्य.भा.गा.५१) तत्र नामजिना अर्हतां पर्यायवाचकाः शब्दा यथा अर्हञ्जिनः पारगत इत्याद्याः, अथवा ऋषभाजितादीनि नामानि, स्थापनाजिनाः–जिनेन्द्राणां शाश्वत्यशाश्वत्यादि–रूपाः प्रतिमाः, द्रव्यजिनाः–जिनजीवाः, द्रव्यदलिकं भूतभाविकारणं तदाश्रित्य जिना द्रव्यजिना । भावजिनाः, समवसरणस्था जिना भावजिना, शिवगताश्च परमपदप्राप्ता भावतः सद्भावतो जिना भावजिना. इत्यर्हतां नामाद्यनेकभेदसत्त्वे, 'तत्र नामादि–चतुर्भेदमध्ये भावोपकारकत्वेन ('भावुवयारो सम्मत्तनाणचरणेसु जमिह संठवणं' ध.सं., यदिह सम्यक्त्व-ज्ञान-चरणेषु संस्थापनं स भावोपकारो विज्ञेयः) भावोपकारस्य–तीर्थप्रवर्त्तनादिरूपभावोपकारस्य कारकत्वेन भावनिक्षेपो ग्राह्यो 'भावार्हतः परिग्रहार्थं भगवद्भ्यः' इति, अर्हन्तः कीदृशा अत्र गृहीता इति प्रश्ने विशेषणद्वारा भावार्हतो विज्ञापयति यथा 'नमोऽस्त्वर्हद्भ्यो भगवद्भ्यः, भावार्हद्रूपभगवद्भ्योऽर्हद्भ्यो नमोऽस्तु'

अथ भगवत्पदघटकभगशब्दस्यार्थमर्हति वैशिष्ट्येन सङ्गमयति–:

**तत्र भगः–समग्रैश्वर्यादिलक्षणः, उक्तं च–''ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः । धर्म्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ।।१।।'' समग्रं चैश्वर्यं–भक्तिनम्रतया त्रिदशपतिभिः शुभानुबन्धिमहाप्रातिहार्यकरणलक्षणं, रूपं पुनः–सकलसुरस्वप्रभावविनिर्मिताङ्गुष्ठरूपांगारनिदर्शनातिशयसिद्धं, यशस्तु–रागद्वेषपरीषहोपसर्ग्गपराक्रमसमुत्थं त्रैलोक्यानन्दकार्याकालप्रतिष्ठं, श्रीः पुनः–घातिकर्मोच्छेदविक्रमावाप्तकेवलालोकनिरतिशयसुखसम्पत्समन्विततता परा, धर्म्मस्तु–सम्यग्दर्शनादिरूपो दानशीलतपोभावनामयः साश्रवानाश्रवो महायोगात्मकः, प्रयत्नः पुनः–परमवीर्यसमुत्थ एकरात्रिक्यादिमहाप्रतिमाभावहेतुः समुद्घातशैलेश्यवस्थाव्यंग्यः समग्र इति, अयमेवंभूतो भगो विद्यते येषां ते भगवन्तः तेभ्यो भगवद्भ्यो नमोऽस्त्विति ।२।, एवं सर्वत्र क्रिया योजनीया, तदेवंभूता एव प्रेक्षावतां स्तोतव्या इति स्तोतव्यसम्पत् १ ।**

टी०...(१)समग्रं चैश्वर्यम्–प्रकृष्टं प्रभुत्वं = भक्तिनम्रत्वहेतुना चतुष्षष्टिसुरेन्द्रैः–त्रिदशपतिभिः–त्रिभुवनपतीनां भावाऽर्हतां पुरतः शुभानुबन्धि-उत्तरोत्तरपुण्य-पुञ्जस्याविच्छिन्नधारावाहि–अशोकवृक्षाद्यष्टमहाप्रातिहार्यकरणलक्षणरूपं, अर्थादशोकवृक्षादिमहाप्रातिहार्यकरणे त्रिदशपतिभिर्विरचने भाव–परमात्मनः पूर्ण–प्रभुताया दर्शनं भवति ।

(२) समग्रं रूपं–सर्वोत्कृष्टं–अतिरम्यं रूपं = सर्वैः सुरैः स्वकीयप्रभावेण विनिर्मितमङ्गुष्ठरूपं तव पदस्य पुरस्तोऽङ्गार सदृशं दृश्यते इति दृष्टांतेन तव रूपमतिशयसिद्धमस्ति (अङ्गुष्ठमेकमणुभिर्मणिजैः सुरेन्द्रा, निर्माय चेत्तव पदस्य पुरो धरेयुः । पुष्णोऽग्र उल्मुकमिवेश ! स (तद्) दृश्यतैव, यत्ते समानमपरं नहि रूपमस्ति ।।१२।। श्रीधर्मवर्धनकृतवीरभक्तामरे) (सव्वसुरा जईरूवं अंगुठ्ठपमाणयं विउविज्जा । जिणपायंगुठ्ठं पइ न सोहए तं जहिं गालो ।। आ.नि.५६९)

(३) समग्रं यश:–सर्वोत्कृष्टं यश: = रागद्वेषपरिषहोपसर्गरूपभावशत्रुसेना–विजये क्षमापूर्वकपराक्रमसमुत्थं (सर्वदिगंतपर्यन्तव्यापिख्यातिरूपयश:) गुणगानद्वारा सुरासुरनरादिरूपत्रैलोक्यस्यानन्दरूपसुखस्य (तीर्थंकरा जन्मादिकल्याणकद्वारा) कारकं, अत एव सर्वकालं (सर्वकालावच्छेदेन) सार्वकालिकीं प्रतिष्ठां–प्रकृष्टस्थितिं प्राप्तं, त्रिभुवनग्राह्यं चन्द्रोज्ज्वलं यशो विजयते,

(४) समग्रा श्री:–सर्वोत्कृष्टा श्री: = ज्ञानावरणीय–दर्शनावरणीय–मोहनीयान्तरायरूपघनघातिकर्मचतुष्टयक्षयसमर्थविक्रमेणावाप्त–केवलज्ञानज्योतिर्निरतिशय–सर्वातिशायिसुखरूपलक्ष्मीसमन्वय: सर्वोत्कृष्टो विद्यते, अर्थात् तादृश–केवलज्ञाननिरतिशयानंदरूपश्रिया नित्यसम्बन्धवन्तो भावार्हन्तो भवन्ति, समवसरणादिबाह्यलक्ष्मीपतयश्च केवलज्ञानादि–अन्तरंगलक्ष्मीपतयो भावाऽर्हन्तो भवन्त्येव ('बहीलच्छी ओसरणाइ अंतरंगाउ केवलाईआ, धम्मो फल–रूवोजं न जिणत्ता धम्मफलमन्नं' ।।)

(५) समग्रो धर्म:–सर्वोत्कृष्टो धर्म: = सम्यग्दर्शनज्ञानचारित्ररूप:, दान–शील–तपोभावनामय:, साश्रव:–पुण्यलक्षणश्चानाश्रव:–(संवर:–संज्ञानयोगलक्षण:) साश्रवानाश्रवरूप:, (धर्मो द्विधा मत: संज्ञानयोग एवैकस्तथाऽन्य: पुण्यलक्षण:, संज्ञानयोग:-समीचीनमर्हत्प्रवचनानुसारि ज्ञानं गुरुपारतन्त्र्यनिमित्तं संवेदनं तेन सहितो योग: शुभवीर्योल्लास:, शास्त्रवार्त्तासमुच्चये)
तीर्थंक—धर्मसंन्यासेन सामर्थ्ययोग—योगसंन्यासरूपसामर्थ्ययोगलक्षणमहायोगात्मकोऽर्थात् समग्र–धर्मचक्रवर्ती भावाऽर्हन्नेव वर्तते,

(६) समग्र: प्रयत्न:–सर्वोत्कृष्ट: प्रयत्न: = परमवीर्यं (उत्कृष्टात्मवीर्यं) समुत्थ:, एकरात्रिक्यादिमहाप्रतिमाभावहेतु: (कायोत्सर्गविशेष–तपोविशेषाभिग्रहविशेषरूपार्थत्रयरूप–महाप्रतिमाभावं प्रति हेतु:) केवलिसमुद्घात: शैलेश्यवस्थातो व्यङ्ग्य:(व्यञ्जनाशक्तिगम्य:, लक्ष्य:, मेय:) समग्र: = सर्वोत्कृष्ट:–परम: प्रयत्न:, सकल–परम–प्रयत्नपतयो भावाऽर्हन्त एव भवन्ति. भगपदस्य ये षडर्था: सन्ति तदर्थवन्तो भगवन्त उच्यन्ते, तेभ्यो भगवद्भ्यो नमोऽस्त्विति द्वितीयपदम् । अर्थात् 'नमोऽस्त्वर्हद्भ्य:' कीदृशा अर्हन्त: ? इति प्रश्ने भगवद्भ्य: इति प्रत्युत्तरे दत्ते, नमोऽस्त्वर्हद्भ्यो भगवद्भ्य: इति कथने भावार्हन्त एव स्तोतव्या इत्यायातम् ।

एवं सर्वत्र विशेषणस्थलेषु 'नमोऽस्त्वर्हद्भ्य:' इति क्रियापदं योजनीयम् तस्मात्कारणादेवंभूता:– भगवत्स्वरूपविशेषणविशिष्टा भावाऽर्हन्तो देवाधिदेवा एव प्रेक्षावतां (विचारकाणां) पुरुषाणां स्तोतव्या:–स्तुतिकर्मविषया भवन्ति, इति स्तोतव्यसम्पत् = 'नमोऽत्थुणं अरहंताणं भगवंताणं' रूपा पदद्वयवती स्तोतव्यसंपत्, समाप्ता, अत एव तद्व्याख्यानमपि समाप्तम् । साङ्ख्यानां द्वौ भेदौ वर्त्तेते तथाहि (१) पूर्व (मौलिक-प्राचीन-निरीश्वर)–सांख्यास्तु प्रत्यात्मप्रधान (प्रकृति) भेदवादिन:– आत्मनि, आत्मनि प्रकृते भेदं मन्यन्ते (२) उत्तरसांख्यास्तु, आत्मनि, आत्मनि, एकां प्रकृतिं मन्यन्ते, ते, प्रत्यात्मप्रधानवादिन: सन्ति, इति सांख्यमतभेदौ,

अथात्र त्रिभिः पदैः स्तोतव्यसम्पद एव प्रधानायाः, साधारणासाधारणरूपाया हेतु—सम्पदो व्याख्यां कर्त्तुं परायणः शास्त्रकारः पूर्वमवतरणिका—सहितं द्वितीयसम्पद्घटकं प्रथमं पदं व्याख्याति—:

**एतेऽपि भगवन्तः प्रत्यात्मप्रधानवादिभिर्मौलिकसाङ्ख्यैः सर्वथाऽकर्त्तारोऽभ्युपगम्यन्ते 'अकर्त्ताऽऽत्मेति' वचनात्, तद्व्यपोहेन कथञ्चित् कर्त्तृत्वाभिधित्सयाऽऽह—"आदिकरेभ्यः" इति,**

**पं०**...'प्रत्यात्मप्रधानवादिभिरिति' सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सैव प्रधानं, ततः आत्मानमात्मानं प्रति प्रधानं वदितुं शीलं येषां ते प्रत्यात्मप्रधानवादिनस्तैः, उत्तरे हि साङ्ख्या 'एकं नित्यं सर्वात्मसु प्रधान' मिति प्रतिपन्नास्तद्व्यवच्छेदार्थं मौलिकसाङ्ख्यैरित्युक्तं, तद्ग्रहणमपि च प्रत्यात्मकर्म्मभेदवादिनां जैनानां कर्त्तृत्वमात्रविषयैव तैः सह विप्रतिपत्तिरित्यभिप्रायात् कृतम् ।

**टी०**...अथैतेऽपि—अर्हन्तो भगवन्तः, अपिशब्दतः सर्वे, आत्मानः, प्रत्यात्मप्रधानभेदवादिभि मौलिक (पूर्वं) साङ्ख्यैः (अत्र सुखदुःखमोहलक्षणरूपाणां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरेव प्रधानं—प्रत्येकात्मसु भिन्नं भिन्नमिति वादिभिः प्राचीनसाङ्ख्यैः) सर्वथा (सर्वैः प्रकारैरेकान्ततः) अकर्त्तारः (कर्त्तृत्वरहिताः) अभ्युपगम्यन्ते—स्वीक्रियन्ते, यतः 'अकर्त्ताऽऽत्मे' ति वचनमस्ति, अत्रोत्तरे (अर्वाचीनाः) हि साङ्ख्या एकं नित्यं सर्वात्मसु प्रधानमिति प्रतिपन्नाः—सर्वेषु, आत्मसु, एकं नित्यं प्रधानं (प्रकृतिं) इति प्रतिपद्यन्तेऽर्वाचीनास्तद्व्यवच्छेदार्थं मौलिक—साङ्ख्यैरित्युक्तम्, **तद्ग्रहणमपि प्रत्यात्मप्रधानभेदवादिनां मौलिक सांख्यानां ग्रहणमपि च प्रत्यात्मकर्मभेदवादिनां जैनानां कर्त्तृत्वमात्र—विषयैव तैः (प्राचीनसाङ्ख्यैः) सह विप्रतिपत्तिः (विरुद्धार्थ—प्रतिपादक—वाक्यद्वयं विप्रतिपत्तिर्विरोधः)**

| —विप्रतिपत्तिवाक्यं— | —विप्रतिपत्तिवाक्यं— |
|---|---|
| प्रत्यात्मप्रकृतिभेदवादिनो मौलिक—<br>सांख्याः—आत्मा, जन्मादिप्रपञ्चस्य<br>कर्त्ता नास्ति, प्रकृतिरेव कर्त्रीति वदन्ति. | प्रत्यात्मकर्मभेदवादिनो जैनाः<br>आत्मा, जन्मादिप्रपञ्चस्य कर्त्ताऽस्ति,<br>प्रकृतिः कर्त्री नास्ति, अचेतनत्वादिति वदन्ति. |

इति अभिप्रायात् कृतम् = अत्र मौलिकसांख्यैरिति कथनेनात्र प्राचीनसांख्याभिमतप्रत्यात्मप्रकृतिभेदवादेन सह प्रत्यात्मकर्मभेदवादिभिः जैनैः सह साम्यत्वेऽपि, आत्मनिष्ठकर्त्तृत्वविषयको विरोधो दर्शितः । अत्र सांख्याभिमतात्मनिष्ठाकर्त्तृत्वरूपविषयखण्डनाय, कथञ्चित्-अनेकान्तदृष्टया—स्याद्वादं प्रतीत्य-व्यवहारनयापेक्षया, कर्त्तृत्वाभिधित्सया = सर्वे जीवात्मानः स्वस्वजन्मादि—कर्मादि—प्रपञ्चरूपस्वसृष्टिं कुर्वन्ति, नान्य इति कर्तृत्वमभिधातुमिच्छया 'आदिकरेभ्य.' इति पदं सूत्रितम् ।

**इहादौ करणशीला आदिकराः, अनादावपि भवे तदा तदा तत्तत्कर्म्माण्वादिसम्बन्धयोग्यतया विश्वस्यात्मादिगामिनो जन्मादिप्रपञ्चस्येति हृदयं, अन्यथाऽधिकृतप्रपञ्चासम्भवः,**

**पं०**...'अनेत्यादि' अनादावपि प्रवाहापेक्षया, किं पुन: प्रतिनियतव्यक्त्यपेक्षया, आदिमतीत्यपि-शब्दार्थ:, भवे–संसारे; 'तदा तदा' तत्र तत्र काले 'तत्तत्कर्माण्वादिसम्बन्धयोग्यतया' तत्तच्चित्ररूपा: कर्माणवो–ज्ञानावरणादिकर्मपरिणामार्हा: पुद्गला:, आदिशब्दात्तेषामेव बन्धोदयोदीरणादिहेतवो द्रव्यक्षेत्रकालभावा गृह्यन्ते, तेन सम्बन्ध:–परस्परानुवृत्तिचेष्टारूप: संयोगस्तस्य योग्यता–तं प्रति प्रह्वता तया, विश्वस्य–समग्रस्य एवंविध-योग्यतैवात्मन: कर्तृत्वशक्तिरिति, आत्मादिगामिन:–आत्मपरतदुभयगतस्य जन्मादिप्रपञ्चस्यप्रतीतस्य, इति हृदय-मिति–एष सूत्रगर्भ: । विपक्षे बाधकमाह–'अन्यथा' कर्तृत्वेऽनधिकृते 'प्रपञ्चासम्भवो' विश्वस्यात्मादिगामिनो जन्मादिप्रपञ्चस्यानुपपत्ति:, कुत इत्याह–

**टी०**...'इह' संसारे वाऽऽत्मनि मुक्तावस्थात: 'आदौ' प्रथमावस्थायां, आत्मान: जन्मादि-प्रपञ्चकरणस्वभावा: 'आदिकरा:' अन्ययोगव्यवच्छेदकापेक्षयेदं विशेषणमत: साङ्ख्यमताऽभिमता-त्मनिष्ठाकर्तृत्व–विषयस्य व्यवच्छेदो भवतीत्यर्थ: । अत्र कर्मसंबंधरूप: संसार:, प्रवाहापेक्षयाऽतीत-कालवदनादि:–अतीतकाल: कदाऽऽरम्भवान् जात: ? तस्य प्रथमोत्पत्तिरूपाऽऽरम्भो यथा नास्ति अर्थादनादिस्तथाजीवानां कर्मसंबन्धरूपसंसारस्यादिरारम्भो नास्ति, तत: कर्मसम्बन्धात्मकभवोऽनादि:, खनिस्थस्वर्णमृत्तिकासम्बन्धवदनादि:, अत्र प्रतिनियत–विशिष्टैक–कर्मविशेषस्याथवैकभवाश्रितै–कजीवव्यक्तिरूप–विशेषस्यापेक्षया, आदिमति–सादौ, अर्थादपेक्षयाऽनादौ सादौ च संसारे तत्तत्का-लाऽवच्छेदेन तत्तच्चित्ररूप–विशिष्ट–विविधरूप–प्रकारभेदावच्छिन्ना:, कर्माणव: = ज्ञानावरणादि-कर्मरूप–परिणामयोग्या: पुद्गला:, आदिशब्दात्तेषामेव कर्मपुद्गलानामेव बन्धोदयोदीरणादिदमानां निमित्तभूता द्रव्यक्षेत्रकालभावा गृह्यन्तेऽर्थात् तेन–तत्तत्कर्माण्वादिना सह सम्बन्ध: = परस्परं कर्म-स्कन्धै: सहात्मनो वेष्टनरूपा, आत्मना सह कर्मस्कन्धानां ग्रथनरूपा चेष्टा (क्रिया) तद्रूप: संयोग-स्तस्य योग्यता–तथारूपसंयोगसम्बन्धं प्रति नम्रता–पराधीनता, तया, विश्वस्य–समग्रस्य, एवंविध योग्यतैवात्मन: कर्तृत्वशक्तिरिति. अर्थादात्मगतस्य परपुद्गलगतस्यात्मपररूपोभयगतस्य समग्रस्य प्रतीतस्य जन्मादिप्रपञ्चस्य. पूर्वोक्तैवंविध–योग्यतैवात्मन: कर्तृत्वशक्तिरिति, तादृश–शक्तिद्वारा-ऽऽत्मा, जन्मादिप्रपञ्चस्य कर्त्ताऽऽत्मेति,

सारांशस्तु, आत्मपुद्गलरूपे द्रव्यद्वये बहवीभिरनंतयोग्यताभि: सह परस्परमेकीभवनस्य योग्यताऽप्य-स्ति, यद्योग्यतापरिणामेनैतद्वैविध्यपूर्णजीवजडयो: सृष्टि दृश्यमानाऽस्ति, आत्मपुद्गलयो द्रव्ययो: स्वाभाविकी शक्तिरेवेतादृशी विद्यते, यदमुकसंयोगा भवेयुस्तदोभयो मिश्रणं भवितुं शक्यते, तथा-ऽऽत्मन: प्रकाशोऽप्येतादृशो भवति, यत्कार्मणस्कन्धै: परित आव्रियते-परिभूयतेऽभिभूयते वा रुध्यतेऽत एव आत्मशक्तिप्रकाशावारकं कर्मपुद्गलरूपमावरणमस्ति, नान्यत्, तथाहि–निर्मल आत्मनि निर्म-लात्मन, आवरणं न भवति–आत्माऽत्मना नाव्रियते, धर्माऽधर्माऽऽकाशकाला अरूपिण: सन्ति, तैरात्मा चावरीतुं न शक्यतेऽर्थादात्मन एतां दृश्यमानां शरीरादिकां रूपिणीं सृष्टिमुत्पादयितुं तेऽरूपिणो नो शक्नुवन्ति, अतो यथा जले क्षिप्ता शर्करा सती जलस्य प्रत्येकाणुषु व्याप्ता भवति,

निर्मलं सलिलं मधुरं करोति, तथाऽऽत्मनः प्रतिप्रदेशं समभिव्याप्य कर्म, आत्मानं कर्ममयं करोति, प्रतिस्कन्धं, अनंतानंताः परमाणवः सन्ति, एकैकवर्गणायामनन्तान्ताः स्कन्धाः सन्ति, एतादृश्योऽनन्त–कार्मणवर्गणाः सूक्ष्मा अति स्निग्धा यदि स्युस्तदाऽऽत्मन एकं प्रदेशं लगितुं शक्नुवन्ति, अर्थादात्मना सह लेपतः पूर्वं, एते योग्यस्कन्धाः केवलं कार्मण–वर्गणाः कथ्यन्ते, यत्काले आत्मना सह लगित्वा मिश्रिताः स्युस्तदा तद्वर्गणा एव कर्मसंज्ञां लभन्ते तथा च कार्मणवर्गणायाः पुद्‌गलेषु जीवः स्वसत्तां स्थापयितुमेतादृशीं क्रियां करोति, यतस्तेषु, आत्मना सह लिप्ततायाः योग्यता–फलं जायते, तस्मा-दात्मना सह लिप्यमानायां तस्यां कार्मणवर्गणायां यदाऽऽत्मना सह संयुक्तताफलं जायते, तदा साऽपि कार्मण–वर्गणा कर्म कथ्यतेऽर्थाज्जीवः कर्त्ताऽस्ति, लिप्ताऽऽत्मना सह कार्मणवर्गणा, कर्म भवति, तादृशः संयोगः फलमस्ति, मिथ्यात्वाद्या हेतवः सन्ति, स्वेन सह संयोजनप्रयत्नरूपयोगत्रय-रूपा, जीवस्य क्रियाऽस्ति.

यथैवं व्याकरणे कर्तुः क्रियाफलाश्रयपदार्थसूचकं नाम कर्मत्वेन कथ्यते तथैवं, आत्मना सह सम्बध्य-माना कार्मणवर्गणाऽपि कर्मत्वेन व्यवह्रियते.)

एवं च निरुक्तयोग्यतारूपाऽऽत्मनिष्ठकर्तृत्वशक्तिद्वारा स्वपरोभयगतसमग्र–जन्मादि–कर्मादि–प्रपञ्च-स्य कर्त्ताऽऽत्माऽस्ति, (अत्र साङ्ख्याभिमतात्माऽकृतप्रपंचत्वरूपपरपक्षस्य खण्डनात्मकाऽन्ययोगव्यव-च्छेदकविशेषणाऽपेक्षया 'आदिकरत्व' विशेषणस्य सार्थक्यं दर्शितं, परन्तु स्वपक्षसाधनरूपायोग-व्यवच्छेदकविशेषणाऽपेक्षया श्रुतपदमध्याहार्यं गणयित्वा 'श्रुतस्यादिकराः' इत्यपि व्याख्या कार्या, यतोऽर्हन्तोऽर्थत आत्मागमवन्तो भवन्तीति.)

विपक्षे बाधकमाह 'अन्यथा' कर्तृत्वेऽनधिकृते–आत्मनिष्ठकर्तृत्वाभावरूपमान्यतायां 'अधिकृतप्रप-ञ्चाऽसम्भवो' स्वपरोभयगतजन्मादिप्रपञ्चस्य समग्रस्यानुपपत्तिः = दृश्यमानः प्रपञ्चो न घटते इति. (अथवाऽधिकृत–भगवदादे र्भव आकस्मिको-निर्हेतुको भवेदतो वस्तुतो जन्मादिपूर्वक एव भवप्रपञ्चो मन्तव्यः) कुत इत्याह–

**प्रस्तुतयोग्यतावैकल्ये प्रक्रान्तसम्बन्धासिद्धेः, अतिप्रसंगदोषव्याघातात्, मुक्तानामपि जन्मादिप्रपञ्चस्यापत्तेः, प्रस्तुतयोग्यताऽभावेऽपि प्रक्रान्तसम्बन्धाविरोधादिति परिभावनी-यमेतत् ।।**

पं०...'प्रस्तुतयोग्यतावैकल्ये' प्रस्तुतायाः–अनादावपि भवे तदा तदा तत्तत्कर्माण्वादिसंबन्धनिमि-त्ताया योग्यतायाः–कर्तृत्वलक्षणाया अभावे 'प्रक्रान्तसंबंधासिद्धेः' प्रक्रान्तैः-प्रतिविशिष्टैः कर्माण्वादिभिः संबंध-स्योक्तरूपस्यानिष्पत्तेः, एतदपि कुत इत्याह–'अतिप्रसंगदोषव्याघाताद्' एवमभ्युपगमे योऽतिप्रसंगः–अतिव्याप्तिः स एव दोषः, अनिष्टत्वात्तेन व्याघातो निवारणं, प्रकृतयोग्यतावैकल्ये प्रस्तुतसंबंधस्य, तस्माद्, अतिप्रसंगमेव भावयति–'मुक्तानामपि' निर्वृतानामप्यास्तामन्येषां 'जन्मादिप्रपञ्चापत्तेः' जन्मादिप्रपंचस्यानिष्टस्य प्राप्तेः, कुत इत्याह–'प्रस्तुतयोग्यताऽभावेऽपि' प्रस्तुतयोग्यतामन्तरेणापि 'प्रक्रान्तसम्बन्धाविरोधात्' तत्तत्कर्माण्वादिभिः सम्बन्धस्यादोषाद्, आत्माकर्तृत्ववादिनामित्येवमन्वयव्यतिरेकाभ्यां भावनीयमेतत् । अथ पराशङ्कां परिहरन्नाह–

टी०...अर्थात् प्रस्तुत–योग्यताप्रक्रान्तसम्बन्धयोः कार्यकारणभावे सिद्धे, तत्रान्वयव्यतिरेकप्रक्रियां घटयति. प्रस्तुतयोग्यतारूपकारणाभावे सति प्रक्रान्तसंबंधरूपकार्यसत्ता नास्ति, इति व्यतिरेकः प्रस्तुतयोग्यताऽत्र कारणं, प्रक्रान्तसम्बन्धः कार्यम्, प्रस्तुतयोग्यतासत्तायां प्रक्रान्तसम्बंधरूपकार्यसिद्धिः, ततोऽधिकृतजन्मादिप्रपञ्चसत्ता, एवं च पूर्वोक्तव्यतिरेकस्य मान्यतायां वक्ष्यमाणातिव्याप्तिरूपातिप्रसंगनामकदोषस्य व्याघातो–निवारणं भवति, यदि प्रस्तुतयोग्यताया अभावे प्रक्रान्तसंबंधरूपकार्यस्य मान्यतायां, अतिव्याप्तिः = कारणाभावप्रयुक्तकार्योत्पत्तिरूपव्यतिरेकव्यभिचार आयाति (वादिनो ऽग्रतोऽतिप्रसंगनामकदोषरूपो महाव्याघ्र उत्थाप्रितः स्यात्तदा स स्वयमेव प्रकृतयोग्यताया अभावे प्रस्तुत–संबंधस्याभावरूपं व्यतिरेकं स्वीकरिष्यति, इत्युद्दिश्यातिप्रसङ्ग उत्थापितः, अथाऽतिप्रसङ्गं प्रदर्शयति ये कर्मसंबंधप्रपंचरहिता मुक्ताऽऽत्मानः सन्ति तेषु प्रस्तुतयोग्यताया अभावोऽस्ति, तत्र प्रक्रान्तसम्बन्धस्य प्रतिपत्तौ, अनिष्टमहानिष्टजन्मादिप्रपंचस्यातिप्रसङ्ग–आपत्तिः स्यादेव, यतो युष्माकं मते प्रस्तुतयोग्यताया अभावे प्रक्रान्तसंबंधस्य विरोधो नास्त्येव, इदमत्र हृदयम् 'भो आत्माऽकर्तृत्ववादिन् । यदि त्वं प्रस्तुतयोग्यताया अभावे प्रक्रान्तसंबंधोऽस्ति, इति कथयसि तदा मुक्ताऽऽत्मसु किमपितु मुक्तात्मभिन्न–सर्व–जीवाऽऽत्मसु त्वन्मतेन नित्यप्रक्रान्तसंबंधोऽस्तीत्यनिष्टनित्यजन्मादि–प्रपंचस्यापत्तिः–अतिप्रसङ्गः–निर्विवादं भविष्यति) वस्तुतः प्रस्तुतविषयः = प्रस्तुतयोग्यतासत्त्वे प्रक्रान्तसम्बन्धसत्तारूपेणान्वयेन, प्रस्तुतयोग्यताया अभावे, प्रक्रान्तसम्बन्धस्याभावरूपेण व्यतिरेकेण सूक्ष्मधिया विचारणीयः ।।

**न च तत्तत्कर्माण्वादेरेव तत्स्वभावतयाऽऽत्मनस्तथा सम्बन्धसिद्धिः, द्विष्ठत्वेन अस्योभयोस्तथास्वभावापेक्षित्वात्, अन्यथा कल्पनाविरोधात्, न्यायानुपपत्तेः, न हि कर्माण्वादेस्तथाकल्पनायामप्यलोकाकाशेन सम्बंधः,**

पं०...'नच' नैव तद् यदुत–तत्तत्कर्म्माण्वादेरेवोक्तरूपस्य 'तत्स्वभावतया' स आत्मना सह सम्बन्धयोग्यतालक्षणः स्वभावो यस्य तत्तथा तद्भावस्तता तया, आत्मनो–जीवस्य 'तथा' सम्बन्धयोग्यतायामिवास्मदभ्युपगतायां 'सम्बन्धसिद्धिः' कर्माण्वादिनेति, कुत इत्याह–'द्विष्ठत्वेन' द्वयाश्रयत्वेनास्य–सम्बन्धस्योभयोः–आत्मनः कर्म्माण्वादेश्च तथास्वभावापेक्षित्वात्, विपक्षे बाधकमाह–'अन्यथा' आत्मनः सम्बन्धयोग्यस्वभावाभावे 'कल्पनाविरोधात्' कर्म्माण्वादेरेव स्वसम्बन्धयोग्यस्वभावेन आत्मना संबंधसिद्धिरिति कल्पनाया व्याघातात्, कुत इत्याह –'न्यायानुपपत्तेः' न्यायस्य-शास्त्रसिद्धदृष्टान्तस्यानुपपत्तेः, न च तथासंबंधसिद्धिरिति योज्यं (थं), न्यायानुपपत्तिमेव भावयन्नाह–'न' नैव 'हिः' यस्मात् 'कर्माण्वादेः' उक्तरूपस्य 'तथाकल्पनायामपि' अलोकाकाशे संबंधयोग्यस्वभावकल्पनायामपि, किं पुनस्तदभाव इत्यपिशब्दार्थः, किमित्याह–'अलोकाकाशेन' प्रतीतेन 'संबन्धः' अवगाह्यावगाहकलक्षणः, कुत एवं इत्याह—

टी...(१) उक्तरूपतत्तत्कर्माण्वादिनिष्ठाऽऽत्मना सह संबंधयोग्यता, स्वभावतयैव, आत्मनिष्ठकर्मादिना सह सम्बन्धयोग्यताया सत्यां कर्मादिना सह सम्बन्धसिद्धि र्नेति वाच्यम्, यतो द्वयाश्रयत्वेनास्य सम्बन्धस्यात्मनः कर्माण्वादेश्च तथायोग्यस्वभावापेक्षित्वात्,

("सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धिनियामकः" इत्यभि-युक्तव्यवहारात्, यथा घटवद्भूतलमित्यादौ संयोगरूपः संबंधः संबंधिभ्यां भिन्नो द्विष्ठो घटनिरूपित-संयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकस्तथाऽत्रापि 'कर्मवानात्मा' यथोक्तचेष्टारूपसंयोग-संबंधः, सम्बन्धिभ्यां भिन्नो द्विष्ठो (कर्मात्मोभयनिष्ठः) कर्मनिरूपितयथोक्तचेष्टारूपसंयोगसम्बन्धा-श्रय आत्मेति विशिष्टबुद्धिनियामकः। द्विष्ठत्वमत्रोभयनिरूपितवृत्तित्वमथवा स्थानद्वयवृत्तित्वम्। सम्बंधस्य किञ्चित्प्रतियोगित्वं किञ्चिदनुयोगित्वम्। भिन्नयो द्रव्ययोः संयोगः) इदमत्र हार्दम्, परशङ्का =

तादृशकर्मपुद्गलनिष्ठ एवेतादृशः–स्वभावोऽस्ति, यदात्मना सह तादृशसंबंधं करोत्येवेति मान्यतायां, यथा भवन्त आत्मनि संबंधयोग्यतां मत्वा कर्मपुद्गलैः सहाऽऽत्मनः सम्बन्धस्य सिद्धिं कल्पयन्ति, तत्स्थानेऽस्मद्वत् तादृश–कर्मपुद्गलेषु संबंधयोग्यस्वभावं मत्वा, कर्मपुद्गलैः सहात्मनः सम्बन्ध-सिद्धिकल्पने भवतां का हानिः ? किमर्थं आत्मनि सम्बन्धयोग्यस्वभावं कल्पयन्ति ?

समाधानं = तादृश–सम्बन्धः, एकस्मिन् सम्बन्धिनि न तिष्ठति, परन्तु सम्बन्धिद्वय एव तिष्ठति, आत्मा च कर्माणवश्च पूर्वोक्त सम्बन्धयोग्यतारूपस्वभावमपेक्षन्ते, अर्थादात्मकर्मपुद्गलरूपसम्बन्धिनौ पूर्वोक्तसंबंधयोग्यतारूपस्वभावमपेक्षेते इति.

द्विष्ठत्ववत्सम्बन्ध–विरुद्धरूप–विपक्षे बाधकमाहान्यथेति.

अर्थात्–यथात्मनि सम्बन्धयोग्यस्वभावस्याभावे सति, कर्माण्वादिनिष्ठसम्बन्धयोग्यस्वभावे सति, आत्मना सह (कर्माणूनां) सम्बन्धसिद्धिरस्तीति कल्पनया सह विरोधो भवति. अतः शास्त्रसिद्ध दृष्टान्तरूपन्यायस्याऽनुपपत्तेः, कर्माण्वादावेव सम्बन्ध–योग्यस्वभावे सति, आत्मना सह सम्बन्धरूप–कल्पनाविरोधः,

इदमत्र हृदयम् = वक्ष्यमाणन्यायानुपपत्तौ सत्यां पूर्वोक्तकल्पनाविरोधोऽस्ति, पूर्वोक्तकल्पना विरोधस्य दूरीकरणायात्मनि सम्बन्धयोग्यस्वभावोऽवश्यं मन्तव्य एव (अथवाऽऽत्मनि संबंधयोग्यस्वभावाभावे सति आत्मजन्मादिरूपप्रपञ्चकल्पनाया अभावो भवेद् यतः 'द्वयाधीनो बंधः' बंधः–सम्बन्ध–उभया-धीनो भवति, एतद्रूपन्यायानुपपत्तेः, सम्बन्धिद्वये सम्बन्धयोग्यस्वभावो मन्तव्यः)

न्यायानुपपत्तिमेव भावयन्नाह–न हीति = पूर्वोक्तरूपकर्मपरमाण्वादिनिष्ठालोकाकाशेन सह संबंध-योग्यस्वभावोऽस्तीति तथा कल्पनायामपि (किं पुनस्तदभावे इत्यपिशब्दार्थः) (अलोकाऽभ्रं तु धर्माद्यैर्भावैः पञ्चभिरुज्झितम्। अनेनैव विशेषेण लोकाभ्रात् पृथगीरितम्, लो.प्र.) अलोकाकाशेन सहावगाह्यावगाहकलक्षण–सम्बन्धः (कर्माण्वादौ) न घटते यतोऽलोकाकाशनिष्ठः, कर्माण्वादिना सह सम्बन्धयोग्यस्वभावाभावोऽस्ति. इदमत्र हृदयम् = यथा कर्माण्वादौ, अलोकाकाशेन सह संबंध-योग्यस्वभावकल्पनायां, अलोकाऽऽकाशे सम्बन्धयोग्यस्वभावाऽभावे सति कर्माण्वादि–अलोकाकाशयोः संबंधो न भवति, तथाऽऽत्मनि संबंधयोग्यस्वभावो नास्तीति कल्पनायां च कर्माण्वादौ, आत्मना सह

संबंधयोग्यस्वभावकल्पनायां, कर्माण्वादि–आत्मनोः सम्बन्ध–सिद्धि नं भवति. यतः अलोकाकाशे इव आत्मनि सम्बन्धयोग्यस्वभावो नास्ति.

**तस्य तत्सम्बन्धस्वभावत्वाऽयोगात्, अतत्स्वभावे चालोकाकाशे विरुध्यते कर्माण्वादेस्तत्स्वभावत्वकल्पनेति न्यायानुपपत्तिः, तत्स्वभावत्वांगीकरणे चास्यास्मदभ्युपगतापत्तिः,**

पं०...'तस्य तत्सम्बन्धस्वभावत्वायोगात्' तस्य–अलोकाकाशस्य तेन-कर्माण्वादिना संबंधस्वभावत्वं तस्यायोगात्, भवतु नामैवं, तथापि प्रकृतकल्पनाविरोध इत्याह–'अतत्स्वभावे च' कर्माण्वादिना संबंधायोग्यस्वभावे च 'अलोकाकाशे विरुध्यते' असंबंधद्वारायातया अतत्स्वभावतालक्षणया निराक्रियते कर्माण्वादेस्तत्स्वभावता-कल्पना 'इति' एवं 'न्यायानुपपत्तिः' न्यायस्योक्तलक्षणस्यानुपपत्तिः, प्रयोगश्च यो येन स्वयमसम्बन्धयोग्यस्वभावो भवति, स तेन कल्पितसंबंधयोग्यस्वभावेनापि न सम्बध्यते, यथाऽलोकाकाशं कर्माण्वादिना, तथा चात्मा कर्माण्वादि-नैवेति व्यापकानुपलब्धिः, एवं तर्हि तत्स्वभावोऽप्ययमङ्गीकरिष्यते इत्याह–'तत्स्वभावताङ्गीकरणे च' कर्माण्वादि-संबंधयोग्यरूपाभ्युपगमे च 'अस्य' आत्मनः 'अस्मदभ्युपगतापत्तिः' अस्माभिरभ्युपगतस्य कर्तृत्वस्यापत्तिः–प्रसङ्गः, अत्रैव शङ्काशेषनिराकरणायाह—

टी०...उक्तरूपकर्माण्वादौ, अलोकाकाशे सम्बन्धयोग्यस्वभावकल्पनायामपि, अलोका-काशेन सहावगाह्यावगाहकलक्षणसम्बन्धो न हि कुतः ? यतः कर्माण्वादिना सह–अलोकाकाशनिष्ठ-संबंधस्वभावताया अभावोऽस्ति, भवतु नामैवं तथाऽपि प्रकृतकल्पनाविरोध इत्याह–कर्माण्वादिना सह संबंधाऽयोग्यस्वभावकदलोकाकाशमस्ति, तथाऽसंबंधद्वाराऽऽयाताऽतत्स्वभावताकल्पनाद्वारा, कर्माण्वादौ, अलोकाकाशसंबंधयोग्यस्वभावकल्पना निराक्रियते, एवं उक्तलक्षणन्यायस्याऽनुपपत्तिः, प्रयोगश्चेत्थं = यो येन सह स्वयं सम्बन्धयोग्यस्वभाववान् नास्ति, स तेन कल्पितसंबंधयोग्यस्वभाव-वता सह न सम्बध्यते, यथाऽलोकाकाशं, कर्माण्वादिना सह स्वतः संबंधयोग्यस्वभाववान् नास्ति, ततः तदलोकाकाशं कल्पितसंबंधयोग्यस्वभाववता कर्माण्वादिना सहापि न संबध्यते, तथा चात्मा, कर्माण्वादिना सह स्वतः संबंधयोग्यस्वभाववान् नास्ति, ततः स आत्मा, कल्पितसंबंधयोग्यस्वभाव-वता कर्माण्वादिना सहापि न सम्बध्यते;

इदमत्र हृदयम् = यथाऽलोकाकाशं कर्माण्वादिना सह कल्पित–संबंधयोग्यस्वभाववान् नास्ति, यतो-ऽलोकाकाशे स्वतः सम्बन्धयोग्यस्वभावो नास्ति. तथाऽऽत्मा, कर्माण्वादिना सह कल्पित संबंधयोग्य-स्वभाववान् नास्ति, यत आत्मनि स्वतः संबंधयोग्यस्वभावो नास्ति, इत्येषा व्यापकानुपपत्तिः तद्रूप-हेतुबलेन (प्राप्तपूर्वोक्तन्यायानुपपत्तेः) पूर्वोक्तकल्पनायाः–कर्माण्वादावेव स्वतः संबंधयोग्यस्वभावे-नात्मना सह सम्बन्धसिद्धिरूपकल्पनाया विरोधः–अभावो भवति, अर्थात् कल्पनाया दूरीकरणाय आत्मनि स्वतः सम्बन्धयोग्यस्वभावो मन्तव्य एव, यद्येवं तर्हि आत्मनि सम्बन्धयोग्यस्वभावोऽप्ययं वादी, अङ्गीकरिष्यते,

अथाऽऽत्मनि कर्माण्वादिना सह संबंधयोग्यस्वभावस्वीकारे यथा कथं नात्मनि पूर्वोक्तयोग्यतारूप-कर्तृत्वशक्ति स्वीकुर्मः, हे वादिन् ! त्वया पिनेच्छां कर्तृत्वशक्तिमत्स्वीकारः कर्तव्य एव.

**न चैवं स्वभावमात्रवादसिद्धिः, तदन्यापेक्षित्वेन सामग्र्याः फलहेतुत्वात्, स्वभावस्य च तदन्तर्गतत्वेनेष्टत्वात्, निर्लोठितमेतदन्यत्रेत्यादिकरत्वसिद्धिः ३ ।**

पं०...'नच' न 'एवं' एतत्स्वभावसांगीकरणे 'स्वभावमात्रवादसिद्धिः' स्वभावमात्रवादस्य-'कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च, स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः ॥१॥' एवंलक्षणस्य सिद्धिः, कुत इत्याह—'तदन्यापेक्षित्वेन' स्वभावव्यतिरिक्तकालाद्यपेक्षित्वेन 'सामग्र्याः' कालः स्वभावो नियतिः पूर्वकृतं पुरुषश्चेत्येवंलक्षणायाः 'फलहेतुत्वात्' कथं तर्हि प्राक् स्वभावः फलहेतुरुपन्यस्त इत्याह–'स्वभावस्य च तदन्तर्गतत्वेन' सामग्र्यन्तर्गतत्वेनेष्टत्वात्, फलहेतुतया, 'निर्लोठितं' निर्णीतमेतत्–सामग्र्याः फलहेतुत्वं अन्यत्र–उपदेशपदादौ,

**टी०**...एवमात्मनि कर्माण्वादिना सह सम्बन्ध–योग्यस्वभावस्वीकारे स्वभावमात्रवादस्य सिद्धि र्न भवति, यतः स्वभावेतरकालादिमपेक्ष्यैव सामग्र्याः–कालः स्वभावः नियतिः पूर्वकृतं पुरुषश्चेत्येवंरूपायाः सामग्र्याः, फलं प्रति–कार्यं प्रतिकारणं वर्त्तते. पूर्वं कथं स्वभावः फलहेतुत्वेनोपन्यस्त इति चेत् कथ्यते, स्वभावस्तु सामग्र्यन्तर्गततयेष्टोऽस्ति, फलहेतुत्वेन, सामग्र्याः फलहेतुत्वमुपदेश-पदादौ निर्णीतमिति.

एवमादिकरत्वरूपविशेषणसिद्धि ज्ञेया, एवं शक्रस्तवस्य तृतीयपदस्य पूर्णतेति, अर्थाद् द्वितीयसम्पत्प्रथ-मपदस्य व्याख्या समाप्ता, 'नमोस्त्वर्हद्भ्यो भगवद्भ्यः, आदिकरेभ्यः इति.

अथान्ययोगव्यवच्छेदकविशेषणापेक्षया, द्वितीयसम्पद्–द्वितीयपदव्याख्यानतः प्राक् तस्यावतरणिकाम-वतारयति यथा =

**एवमादिकरा अपि कैवल्याऽवाप्त्यनन्तरापवर्गवादिभिरागमधार्म्मिकैरतीर्थकरा एवेष्यन्ते, 'अकृत्स्नकर्म्मक्षये कैवल्याभावा' दितिवचनात्, तन्निरासेनैषां तीर्थंकरत्वप्रतिपादनायाह–**

पं०...'आगमधार्म्मिकै' रिति आगमप्रधाना धार्म्मिका वेदवादिनस्तैः, ते हि धर्माधर्म्मादिकेऽतीन्द्रियार्थे आगममेव प्रमाणं प्रतिपद्यन्ते, न प्रत्यक्षादिकमपि, यदाहुस्ते—'अतीन्द्रियाणामर्थानां, साक्षाद्द्रष्टा न विद्यते । वचनेन हि नित्येन, यः पश्यति स पश्यति ॥१॥ इति.

**टी०**...एवमादिकरा–अर्हन्तो भगवन्तः 'मोक्षावस्थात आदौ– प्रागवस्थायां जन्मादि-प्रपञ्चकरणशीला–आदिकरा अपि 'कैवल्यं'–केवलज्ञानदर्शनप्राप्तेरनन्तरं = अव्यवहितेन मुक्तिवा-दिभिरेवं वेदवादिभिरर्हन्तो भगवन्त आदिकरत्वेन मन्यमाना अपि अतीर्थंकरा एवेष्यन्ते यतः 'अकृ-त्स्नकर्मक्षये कैवल्याभावादिति वचनमस्ति, अर्थात् कृत्स्नकर्मक्षयं विना केवलज्ञानदर्शनरूपकैवल्य-

स्याभावोऽस्ति, एवं वेदवादिनामागमधार्मिकाणां मतं-प्रतिपादकवचनमस्ति, इति वेदवादिनां मतनिरासनद्वारा 'एषां' अर्हतां भगवतामादिकराणां तीर्थकरत्वप्रतिपादनायाह—

**'तीर्थंकरेभ्यः' इति, तत्र तीर्थंकरणशीलाः तीर्थंकराः, अचिन्त्यप्रभावमहापुण्यसंज्ञिततन्नामकर्म्मविपाकतः, तस्यान्यथा वेदनायोगात्, तत्र येनेह जीवा जन्मजरामरणसलिलं, मिथ्यादर्शनाविरतिगम्भीरं महाभीषणकषायपातालं सुदुर्लङ्घ्यमोहावर्त्तरौद्रं विचित्रदुःखौघदुष्टश्वापदं रागद्वेषपवनविक्षोभितं संयोगवियोगवीचीयुक्तं प्रबलमनोरथवेलाकुलं सुदीर्घं संसारसागरं तरन्ति तत्तीर्थमिति, एतच्च यथावस्थितसकलजीवादिपदार्थप्ररूपकं अत्यन्तानवद्यान्याविज्ञातचरणकरणक्रियाऽऽधारं त्रैलोक्यगतशुद्धधर्मसम्पद्युक्तमहासत्त्वाश्रयं अचिन्त्यशक्तिसमन्वितविसंवादिपरमबोहित्थकल्पं प्रवचनं सङ्घो वा, निराधारस्य प्रवचनस्यासम्भवाद्, उक्तं च—"तित्थं भंते ! तित्थं ? तित्थगरे तित्थं ? गोयमा ! अरहा ताव नियमा तित्थंकरे, तित्थं पुण चाउव्वण्णो समणसंघो" ततश्चैतदुक्तं भवति—घातिकर्म्मक्षये ज्ञानकैवल्ययोगात्तीर्थंकरनामकर्म्मोदयतस्तत्स्वभावतया आदित्यादिप्रकाशनिदर्शनतः,**

**पं०**...'महाभीषणकषायपातालमिति' पातालप्रतिष्ठितत्वात् तद्वद्गम्भीरत्वाच्च पातालानि, योजनलक्षप्रमाणाश्चत्वारो महाकलशाः, यथोक्तम् = "पणनउई उ सहस्सा, ओगाहित्ता चउद्दिसिं लवणं। चउरोऽलिंजरसंठाणसंठिया होंति पायाला ॥१॥' ततो महाभीषणाः कषाया एव पातालानि यत्र स तथा तत्, 'त्रैलोक्यगतशुद्धधर्मसम्पद्युक्तमहासत्त्वाश्रयमिति' त्रैलोक्यगताभुवनत्रयवर्त्तिनः शुद्धया—निर्दोषया धर्मसम्पदा—सम्यक्त्वादिरूपया समन्विता—युक्ता महासत्त्वा—उत्तमप्राणिनः आश्रय—आधारो यस्य तत्तथा, 'घातिकर्म्मेत्यादि' घातिकर्मक्षये—ज्ञानावरणाद्यदृष्टचतुष्टयप्रलये 'ज्ञानकैवल्ययोगात्' ज्ञानकैवल्यस्य केवलज्ञानदर्शनलक्षणस्य च संबंधं प्राप्य 'तीर्थंकरनामकर्मोदयात्' तीर्थंकरनाम्नः कर्मणो विपाकाद्धेतोः 'तत्स्वभावतया' तीर्थंकरणस्वाभाव्येन, कथमित्याह—'आदित्यादिप्रकाशनिदर्शनतः' इति,—'तत्स्वाभाव्यादेव प्रकाशयतिभास्करो यथा लोकम्। तीर्थप्रवर्त्तनाय प्रवर्त्तते तीर्थंकर एवम् ॥१॥' (तत्त्वार्थ. भा. कारिका ६) आदिशब्दाच्चन्द्रमण्यादिनिदर्शनग्रहः, किमित्याह—

**टी०**...तीर्थंकरेभ्यः = तीर्थंकरा इत्युक्ते कोऽर्थः ? इति प्रश्ने, कथयति. तत्र शक्रस्तवे तीर्थंकरणशीलास्तीर्थंकराः, कस्मात् कारणात् तीर्थंकरणशीलास्तीर्थंकरा, तद् हेतु कथयति—कल्पनातीतमाहात्म्यवन्महापुण्यापरनामकतीर्थंकरनामकर्मणो विपाकोदयतस्तीर्थंकरणशीलास्तीर्थंकराः, तीर्थंकरणं विनाऽन्यप्रकारेण तीर्थंकरनामकर्मणो वेदनस्यानुभवस्याभावो भवति. तीर्थंकरणाविनाभावि तीर्थंकरकर्म वेदनं भवति, तीर्थंकरपदघटकतीर्थं व्युत्पादयति. येन—तीर्थेन, इह—मनुष्यजगति, जीवा जन्मजरामरणनामकजलसमूहपूर्णं, मिथ्यादर्शनाविरतिभ्यां गम्भीरं—अगाधं; 'महाभीषणकषायपातालं इति' कषायनामक—महाभयङ्करविशिष्टपरिभाषित—महाप्रमाणपाताल—महाकलशविशिष्टं, अतिशयेन दुःखेन लङ्घ्य = सुदुर्लङ्घ्यमोहनामकावर्त्तन रौद्रं—भयंकरं, विचित्रनानाविधदुःखजालरूप-

दुष्टश्वापदं, रागद्वेषनामकपवनेन विक्षोभितं, संयोगवियोगनामकवीचीभिर्महातरङ्गैर्युक्तं, अत्यन्त-बलवती–मनोरथ–संकल्पविकल्पजन्यमनोराज्यनाम्निका या वेला–जलवृद्धिस्तयाऽऽकुलं, अत्यन्तदीर्घं संसारनामकं सागरं तरन्ति तत्तीर्थम् (तीर्थस्य व्युत्पत्तिलभ्योऽर्थो ज्ञेय एषः) अथ प्रवृत्तिनिमित्तभू-तमर्थं तीर्थस्य दर्शयति (प्रवृत्तिनिमित्तम्–पदशक्यताऽवच्छेदकम्। यथा घटत्वं घटपदस्य प्रवृत्तिनि-मित्तम्। एवं शुक्लादिपदस्य शुक्लत्वं। पाचकादेः पाकः, देवदत्तादेस्तत्तत्-पिण्डादि, प्रवृत्ति-निमित्तं भवति, प्रवृत्तिनिमित्तशब्दस्य व्युत्पत्तिः–शब्दानामर्थबोधनशक्तेः निमित्तं प्रयोजकमिति। तच्च शक्यताऽवच्छेदकं भवतीति ज्ञेयम् + तल्लक्षणं च प्रकारतया शक्तिग्रह–विषयत्वम् (चि.) अथवा वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति। (म.शक्ति.) एतच्च तीर्थं यथार्थ-समस्तजीवादि (आदिपदेनाजीवादि) पदार्थ–वस्तुतत्त्वप्ररूपकं, सर्वथा निरवद्यान्याविज्ञात–(अन्यैः कपिलादिभिरज्ञात)–चरणकरणनामकक्रियाया आधारं (सकलपदार्थविषयकप्ररूपणा, सर्वथा निरवद्यपराविज्ञातचरणकरणरूपविशिष्टक्रिया च विना तीर्थमशक्यैवेति.)

भुवनत्रयवर्तिनः, शुद्धधर्मसम्पत्–समन्विता महासत्त्वा एतेतस्य तीर्थस्याश्रयः कथ्यते. धर्मस्याधार-धर्मिवत्, न धर्मो धार्मिकैर्विनेत्यादि वाक्यानि धर्मधर्मिणोरभेदादिति. स्मरणीयान्यत्र, घृतपात्रं विना घृतं न तिष्ठतीतिवत् धर्मरूपाधेयम्, धर्मिरूपाधारं विना कथं तिष्ठेत्? इति.

कल्पनातीत–शक्तिसमन्वितमत एवाविसंवादि (पूर्वापरविरोधरूपविसंवादरहितं) परमबोहित्थ–परमप्रवहणसमानं प्रवचनं सङ्घो वा, निराधारस्य प्रवचनस्याऽसम्भवाद्, उक्तं च–"तीर्थं च श्रुतं संसारसागरोत्तरणाऽसाधारणकारणत्वात्, तदाधारत्वेन च सङ्घस्य तीर्थशब्दाऽभिधेयत्वात्, भ.२ श. ८ उ. टीकायां–तीर्थप्रस्तावादिदमाह–'तित्थं भंते' इत्यादि, 'तीर्थं' सङ्घरूपं, भदन्त! 'तित्थं' ति तीर्थशब्दवाच्यमुत तीर्थंकरः 'तीर्थं' तीर्थशब्दवाच्यम्? इति प्रश्नः, अत्रोत्तरं–'अर्हन्'–तीर्थंकरस्ता-वत् तीर्थङ्करः तीर्थप्रवर्त्तयिता, न तु तीर्थं, तीर्थं पुनः 'चाउवण्णाइन्ने समणसंघेति' चत्वारो वर्णा यत्र स चतुर्वर्णः, सचासावाकीर्णश्च क्षमादिगुणै व्याप्तश्चतुर्वर्णाकीर्णः क्वचित् 'चाउवण्णो समण-संघ' ति पठयते, तच्च व्यक्तमेव, प्रकर्षेणोच्यतेऽभिधेयमनेनेति प्रवचनं द्वादशाङ्गीरूपागमः."

ततश्चैतदुक्तं भवति–ज्ञानावरणदर्शनावरणमोहनीयान्तरायरूपाणि ज्ञानादिघातकत्वेन घातीनि पौद्गलिकादृष्टरूपाणि चतुष्टयकर्माणि तेषां प्रलये, (अतः (पुण्यानुबंधिपुण्यस्य) पुरुषसम्प्राप्ताद्वि-ज्ञेयं फलमुत्तमं। तीर्थंकृत्त्वं सदौचित्या प्रवृत्त्या मोक्षसाधकम् ॥१०॥ हृ.पं. अष्टके, यदुदयाज्जीवः सदेवमनुजासुरपूज्यमुत्तमोत्तमं परममुनिप्रणीतधर्म–तीर्थस्य प्रवर्त्तयितृपदमवाप्नोति तत्तीर्थंकरनाम-कर्मेत्यर्थः' क.प्र.टी.गा. ४६)

केवलज्ञानप्राप्त्यनन्तरं तीर्थंकरनामकर्मणो रसोदयरूपहेतुद्वारा तीर्थंकरत्वं!, आदित्यादिप्रकाश-दृष्टान्तः = यथा भास्करः स्वस्वभावत एव लोकं प्रकाशयति, एवं तीर्थंकरप्रभुः तीर्थस्य प्रवर्त्तन-मुद्दिश्य प्रवर्त्तते, आदिशब्दद्वारा चन्द्रकांतसूर्यकांतादिप्रकाशकमण्यादि–कस्य ग्रहणं कर्त्तव्यम्।

**शास्त्रार्थप्रणयनान्मुक्तकैवल्ये तदसम्भवेनागमानुपपत्तेः, भव्यजनधर्मप्रवर्त्तकत्वेन परम्परानुग्रहकरास्तीर्थंकरा इति तीर्थंकरत्वसिद्धिः ४ ।।**

पं०...'शास्त्रार्थप्रणयनात्' शास्त्रार्थस्य-मातृकापदत्रयलक्षणस्य प्रणयनाद्-उपदेशनात्, तीर्थंकरा इति वक्ष्यमाणेन सम्बन्धः, विपक्षे बाधकमाह-'मुक्तकैवल्ये' अपवर्गलक्षणे 'तदसम्भवेन' शास्त्रार्थप्रणयनाघटनेनाशरीरतया प्रणयनहेतुमुखाद्यभावाद् "आगमानुपपत्तेः" आगमस्य-परैरपि प्रतिपन्नस्यानुपपत्तेः-अयोगात्, नत्वसावकेवलिप्रणीतो, व्यभिचारसम्भवात्, नाप्यपौरुषेयस्तस्य निषेत्स्यमानत्वात्, कीदृशाः सन्त इत्याह-'भव्यजनधर्मप्रवर्त्तकत्वेन' योग्यजीवधर्मावतारकत्वेन 'परम्परानुग्रहकराः' परम्परया-व्यवधानेनानुग्रहकरा-उपकारकराः, कल्याणयोग्यतालक्षणो हि जीवानां स्वपरिणाम एव क्षायोपशमिकादिरनन्तरमनुग्रहहेतुः तद्धेतुतया च भगवन्तोऽथवा परम्परया-अनुबन्धेन स्वतीर्थानुवृत्तिकालं यावत् सुदेवत्वसुमानुषत्वादिकल्याणलाभलक्षणया वाऽनुग्रहकरा इति ।।

टी०...यथाऽऽदित्यः स्वभावतया पृथ्वीपटे प्रकाशं विस्तारयति तथा तीर्थंकरो भगवान्, सति घातिकर्मक्षये केवलज्ञानयोगेन तीर्थंकरनामकर्मणो रसोदयेन तीर्थंकरणस्वभावतया 'उव्वण्णेइ वा विगमेइ वा धुवेइ वेत्येतद्रूपमातृकापदत्रयलक्षण-त्रिपदीरूपशास्त्रार्थं प्रणयति, (भगवान् स्थापयति तीर्थमर्थाद् गणधरभगवन्तः श्री जिनेश्वरदेवमेकां प्रदक्षिणां दत्त्वा तारकं च नमस्कृत्य पृच्छन्ति भदन्त ! किं तत्त्वं ? इति प्रथमप्रश्नस्य प्रत्युत्तरे, भगवान् कथयति. 'उत्पद्यते' वेत्युत्तरद्वारा भगवान् द्रव्यनिष्ठपर्यायस्योत्पादसिद्धान्तं दर्शयति, गणधरभगवन्तः परमात्मना दत्तमुत्तरं श्रुत्वा परामृशन्ति, परामर्शाऽनन्तरमधिकपृच्छाया आवश्यकत्वमस्ति ततो भगवन्तं पुनः प्रदक्षिणां दत्त्वा पृच्छन्ति, भदन्त ! किं तत्त्वं ? अथ द्वितीयप्रश्नस्योत्तरं परमात्मा ज्ञापयति यथा 'विगमयती' त्युत्तर-द्वारा पदार्थनिष्ठपर्यायस्य विगमस्वभावरूपसिद्धान्तं व्यञ्जयति, परमात्मदत्त-प्रत्युत्तरं श्रुत्वा गणधरदेवाः सम्यग् विचारयन्ति. पूर्णविचारणानन्तरं सम्पूर्णतत्त्वजिज्ञासापूर्त्यर्थं, अद्यापि पृच्छाया आवश्यकताऽस्ति, केवलं पदार्था उत्पद्यन्त इति किं युक्तं भवेत् ? उत्पादानन्तरं विनष्टा भवेयुरिति किं युक्तं भवेत् ? एतस्मात् कारणाद्गणधरा भगवन्तः पुनः परमात्मानं तृतीयां प्रदक्षिणां दत्त्वा पृच्छन्ति-भदन्त ! किं तत्त्वं ? गणधरैः पृष्टं तृतीयसमये प्रश्नं प्रत्युत्तरयति परमात्मा यद् 'ध्रुवति' वेति प्रत्युत्तरद्वारा परमात्मा प्रज्ञापयति 'द्रव्यनिष्ठध्रौव्य-ध्रुवतास्वभावसिद्धान्तं' इत्येतत्तृतीयमुत्तरं भगवतः श्रीमुखतः श्रुत्वाऽनन्तरं गणधरैः 'उत्पादव्ययध्रौव्य युक्तं तत्त्वं (सत्) इति पूर्णतया तत्त्वरूपं ज्ञातमेव. गणधरकृता प्रश्नत्रयी' 'निषद्यात्रयी' जैनशासने प्रख्याताऽस्ति, भगवद्दत्तप्रत्युत्तरत्रयी 'त्रिपदी' तिरु पेण प्रख्याताऽस्ति.)

उपदेशदानरूपप्रणयनद्वारा तीर्थकरणशीलास्तीर्थंकरा भवन्ति,-

यदि केवलज्ञानाऽनन्तरमव्यवहितत्वेनार्हन्तो भगवन्तो मुक्ता भवन्तीति मते मुक्तकैवल्ये अर्थाद्, मुक्तौ त्रिपदीरूप शास्त्रार्थप्रणयनरूपरचनाया असम्भवोऽस्ति यतो मुक्ताः-सिद्धा अशरीरिण एवातो वचनरचनारूपप्रणयनहेतुभूतशरीरावयवरूपमुखादेरभावो वर्त्ततेऽत आगमस्याभावोऽस्ति, अर्थादर्थरूपा-

त्मागमवन्त एव शास्त्रार्थंप्रणेतारो भवन्ति, नाऽन्ये, एष शास्त्रार्थरूप आगमो नाकेवलिप्रणीतोऽस्ति यतश्चहठ छद्मस्थप्रणयने व्यभिचार-विसंवाद-पूर्वापरविरोधस्य सम्भवोऽस्ति. (अर्थापेक्षया श्रीतीर्थंकर-भगवतो ज्ञानं 'आत्मागमः' कथ्यते, श्रीतीर्थंकरसकाशात्–अनन्तररूपेण प्राप्तं श्रीगणधराणां ज्ञानं 'अनन्तरागमः' तदनन्तरं शिष्यप्रशिष्यरूपगुरुपर्वपरूपरम्परयोत्तरोत्तरमागच्छदाचार्यादिकस्य ज्ञानं 'परम्परागमः' कथ्यते परन्तु सूत्रापेक्षया गणधरज्ञानं 'आत्मागमः' तस्य शिष्यस्य ज्ञानं 'अनन्तरागमः' तस्य प्रशिष्यस्य ज्ञानं 'परम्परागमः' इत्यनुयोगद्वारे) अनंतरार्थाऽऽगमवन्तो गणधराः, परम्परार्थागमवन्तो गणधरशिष्याः त्रिपदीरूपशास्त्रार्थंप्रणयनं कर्त्तुमशक्ता एव, पारिशेष्यात्, केवलितीर्थंकरा भगवन्त एव धर्मतीर्थप्रवर्त्तकाः, किञ्चैष वचनरचनारूपः शास्त्रार्थः, अपौरुषेयो नास्ति, परन्तु परमपुरुषकर्तृकोऽस्ति, अपौरुषेयवचनस्य खंडनं पुरस्तात् भविष्यति (या या वचोरचनाऽस्ति सा सा कुमारसंभवादिवत् कालीदासादिपुरुषकर्त्तुका दृश्यते, एवं वचोरचनारूपागमोऽस्ति, सोऽपि केनचित् परमज्ञानिपुरुषेण कृतोऽस्ति, ततस्तात्वादिव्यापारवत् पुरुषस्य वचोरूप आगमः 'अपौरुषेयः' 'इति कथनमयुक्तमेव. 'ताल्वादिजन्मा ननु वर्णवर्गो, वर्णाऽऽत्मको वेद इति स्फुटं च। पुंसश्च ताल्वादिरतः कथं स्यादपौरुषेयोऽयमिति प्रतीतिः ॥)

योग्ये जीवे धर्मस्यावतारकारकत्वरूपाऽपेक्षया, परम्परा (कारणस्य कारणेन–व्यवधानेन) अनुग्रह–उपकारकरास्तीर्थंकरा भवन्ति.

कया रीत्या परम्परयाऽनुग्रहकरा भवन्ति ? इत्याह, कल्याणस्य योग्यतारूपं लक्षणं यस्य सः = कल्याणयोग्यतालक्षणो हि जीवानां स्वपरिणामः–स्वभाव एव क्षायोपशमिकादिः (क्षायोपशमिकौपशमिक क्षायिकादिः) अनंतरमव्यवहितत्वेनानुग्रह–उपकारहेतुः तद्धेतुतया च (स्वपरिणामरूपहेतोर्हेतुतया) व्यवहितत्वेन–कारणकारणत्वेन–परम्परया च भगवन्तोऽनुग्रहकरा भवन्ति न साक्षात्, इदमत्र हृदयम्–जीवनिष्ठकल्याणयोग्यतालक्षणक्षायोपशमिकादि–स्वपरिणाम एवोत्कृष्टकल्याणरूपकार्यं प्रति अव्यवहित कारणमस्ति, स्वपरिणामहेतुं प्रति अर्हन्तो भगवन्तः कारणमस्ति तस्मात्कारणात् जीवानामुत्कृष्टकल्याणं प्रति, अर्हन्तोभगवन्तः परम्परा–व्यवहितकारणमस्ति. अर्थादर्हतो भगवतो निमित्तकारणभूतान् विहाय स्वपरिणामः–क्षायोपशमिकादिभावो न भवति. स्वपरिणामं विना जीवानां कल्याणं न भवतीति.

(तीर्थंकरपदं परोपकारि–उत्कृष्टकल्याणकारि तथाहि तीर्थंकरोपदेशेन मोहतमो विनश्यति, सूक्ष्मा अतीन्द्रियाः पदार्थाः शीघ्रं ज्ञायन्ते, श्रद्धामृतास्वादो भवति, वचनादरस्ततोऽनर्थनाशः सुखोद्गमः, परोपकारेण विशेषसुखं, एवमुत्तरोत्तरविशेषसुखसंप्राप्त्याऽन्ते मोक्षो–महोदयो भवति.)

भव्यजीवनिष्ठधर्मप्रवृत्तिं वोत्कृष्टमहाकल्याणं प्रति कल्याणयोग्यतारूपक्षायोपशमिकादिरूपस्वपरिणामजननद्वारा, अर्हन्तो भगवन्त उपकारकारकं कारणं भवति. (व्यापारेण व्यापारिणो नाऽन्यथा सिद्धिः,

धर्मिव्यापारद्वारा व्यापारवद् दण्डस्य नान्यथा सिद्धिः, यथा घटं प्रति दण्डः कारणमस्ति परन्तु साक्षान्नहि परन्तु धर्मिव्यापारद्वारा तथा जीवकल्याणं प्रति अर्हन्तोभगवन्तः कारणमस्ति साक्षान्नहि परन्तु जीवनिष्ठस्वपरिणामव्यापारजननद्वारैव. तथाऽर्हन्तोभगवन्तः स्वात्मपरिणामं जनयित्वा जीवकल्याणं कुर्वन्त्येव, अर्हद्भगवत्कारणेन जनितस्वात्मपरिणामः जीवनिष्ठमहाकल्याणकार्य-जनकोऽस्ति, यतो जीवनिष्ठस्वपरिणामो व्यापारोऽस्ति, यत्र व्यापारिणः प्रमाणबोधितकारणतानि-र्वाहाय व्यापारस्य कारणत्वं कल्प्यते तत्रैव व्यापारेण व्यापारिणो नाऽन्यथासिद्धत्वम्.) अथवा परम्परया–अनुबन्धेन-अविच्छिन्नधारया, स्वतीर्थानुवृत्तिकालं तीर्थंकर–तीर्थस्यानुवृत्ति–(अधिकार–शासनगतिप्रगति)–कालं यावत् सुदेवत्वसुमानुषत्वादिकल्याणलाभलक्षणया परम्परया वाऽनुग्रह-करास्तीर्थंकरा इति. तीर्थंकरत्वसिद्धिः ४ । तथा च 'तीर्थंकरेभ्योऽर्हद्भ्यो भगवद्भ्यो नमोऽस्तु' इति शक्रस्तवघटित 'तीर्थंकरेभ्यः' रूपचतुर्थपदस्य व्याख्यानं द्वितीयसम्पद्वृत्तिद्वितीयपदस्य व्याख्यानं समाप्तम् ।

अथ शास्त्रकारो द्वितीयसम्पदः 'स्वयंसंबुद्धरूपस्य तृतीयपदस्यावतरणिकया सह व्याख्यानं विधत्ते.

**एतेऽप्यप्रत्ययानुग्रहबोधतन्त्रैः सदाशिववादिभिस्तदनुग्रहबोधवन्तोऽभ्युपगम्यन्ते 'महेशानुग्र-हाद् बोधनियमा' विति वचनात्, एतद्व्यपोहायाह–"स्वयंसम्बुद्धेभ्यः" तथाभव्यत्वादि-सामग्रीपरिपाकतः प्रथमसम्बोधेऽपि,**

पं०...'अप्रत्ययानुग्रहबोधतन्त्रैरिति' अप्रत्ययो–हेतुनिरपेक्षात्मलाभत्वेन महेशस्तस्यानुग्रहो–बोध-योग्यस्वरूपसम्पादनलक्षण उपकारस्तेन बोधः–सदसत्प्रवृत्तिनिवृत्तिहेतुज्ञानविशेषस्तत्प्रधानस्तन्त्रः–आगमो येषां ते तथा तैः 'सदाशिववादिभिः' ईश्वरकारणिकैः, तन्त्रमेव दर्शयति–'महेशानुग्रहाद्बोधनियमाविति' उक्तरूपो बोधो नियमश्च–सदसदाचारप्रवृत्तिनिवृत्तिलक्षणः, बोधनियमादिति तु पाठे बोधस्य नियमः–प्रतिनियतत्वं तस्मात् । 'तथेत्यादि' तथा–तेन प्रकारेण प्रतिविशिष्टं भव्यत्वमेव तथाभव्यत्वं, आदिशब्दात् तदन्यकालादिसहाकारिकारण-परिग्रहः, तेषां सामग्री–संहतिः तस्या यः परिपाको विपाकः, अध्याहृता स्वकार्यकरणशक्तिस्तस्मात् 'प्रथमसम्बोधेऽपि' प्रथमसम्यक्त्वादिलाभेऽपि किं पुनस्तीर्थंकरभवप्राप्तावपरोपदेशेनाप्रथमसम्बोध इत्यपिशब्दार्थः, स्वयंसंबुद्धा इति योगः । कुत इत्याह–

टी०...एतेऽपि–पूर्वोक्तविशेषणविशिष्टा अर्हन्तो भगवन्तः, अप्रत्ययो नाम हेतु–निमित्त-रूपानुग्राह्यापेक्षांविनाऽऽत्मलाभरूपबोधादिकारकत्वेन महेशस्तत्कृतोऽनुग्रहः–पूर्वं अनुग्राह्ये बोधस्य योग्यतां सम्पादयति, ततः सदसत्प्रवृत्तिनिवृत्तिहेतुभूत–ज्ञानविशेषबोधं जनयति, ततः सदसत्प्रवृत्ति-निवृत्तिरूपं नियमं सम्पादयति. तथा च तादृशबोधनियमरूपकार्यं प्रति महेशकृततादृशानुग्रह उपकारः कारणम्, तादृशकार्यकारणप्रधानागमानुयायिसदाशिववादिनः, बोधादावीश्वर एव कारणमिति मन्य-माना 'ईश्वरकारणिकाः' उच्यन्ते, पूर्वोक्तविशेषणविशिष्टा 'अर्हन्तो भगवन्तस्तीर्थंकराः महेशकृतानु-

महेशजन्यबोधादिमन्त एव' इति मन्यन्ते, यतो विषयेऽस्मिन् सदाशिववादिनामागमवचोऽस्ति. "महेशानुग्रहाद् बोधनियमो" इति, अथवा 'बोधनियमादि'ति पाठे तादृशबोधस्य नियमोऽस्ति, अर्थाद् यो यस्तादृशबोधो भवति स सोऽवश्यं महेशकृतानुग्रहकारणजन्योऽस्ति इति नियमोऽत्र ज्ञेयः, (बोधनिष्ठव्याप्यता (कार्यता) निरूपितव्यापकता (कारणता) महेशकृताऽनुग्रहे वर्त्तते इत्येवं बोध्यम्.) इत्येवमेकान्तवादिनां मतनिरसनायाह 'स्वयंसम्बुद्धेभ्यः' कस्यचिदप्यनुग्रहं विना स्वयोग्यताऽपेक्षया तथा तीर्थंकरनामकर्मयोगेन स्वयंसम्बोधिं प्राप्तेभ्यः 'स्वयंसम्बुद्धेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः' प्रथमद्वितीयस्वयंसम्बोधिसिद्धिः =

'तथेत्यादि' तथा—तेन प्रकारेण प्रतिविशिष्टं भव्यत्वमेव तथा भव्यत्वं (सर्वेतरभव्यत्वेभ्यो विलक्षणरूपं) भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादि—पारिणामिको भावः—आत्मसत्त्वमेव, तथाभव्यत्वं तु भव्यत्वमेव कालादिभेदेनात्मनां बीजसिद्धिभावान्नानारूपतामापन्नम्, 'तथा मुक्तत्वप्रयोजिका सामान्यतोऽभव्यव्यावृत्ता जातिर्भव्यत्वमिति गीयते, प्रत्यात्मतथा तथापरिणामितया समुपात्तविशेषात् तथाभव्यत्वमिति सिद्धम्,'

आदिशब्दात्—तथाभव्यत्वतोऽन्यकालनियतिपूर्वकर्मपुरुषादिसहकारिकारणपरिग्रहः, तेषां—तथाभव्यत्वादीनां सामग्री—संहतिः, (कार्यायोग्यव्यवच्छिन्नःकारणसमुदायः सामग्री, अत्र दण्डचक्रादिन्यायेन समुदित-मिलित-तथाभव्यत्वादि सामग्री, तस्याः प्रथमसम्बोधिं प्रति कारणता ज्ञेया, (सामग्री वै कार्यजनिका) समुदायं विनैकेन केनापि कारणेन न कार्यं भवतीति ज्ञेयम्, स्वभावकालनियतिपूर्वपुण्यकर्मपुरुषार्थपुरुषादिः स च सहकारि—कारणं ज्ञेयम्.) यस्या यः परिपाकः—विपाकः—अव्याहता स्वकार्य—करणशक्तिः, तस्मात्, (स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्मात्) 'प्रथमसम्बोधेऽपि' प्रथमसम्यक्त्वादिलाभेऽपि. (एवं च सम्यक्त्वस्योत्पत्तौ पारमार्थिक—कारणं तत्तदात्मनिष्ठतथाभव्यत्वरूपाऽनादिपारिणामिक—स्वभावविशेषोऽस्ति, यतो येन तत्तद्विवक्षितक्षेत्रे तत्तद्विवक्षितकाले तत्तत्प्रतिनियतार्हद्भगवतां बिम्बपूजादिदर्शनादिसहकारि कारणद्वारा सम्यक्त्वलाभो भवति, केषाञ्चित्तु तथाविधार्हद्भगवतां बिम्बस्य पूजादर्शनादिनिमित्तं विनाऽपि सम्यक्त्वलाभो भवति, तथाभव्यत्वमेतत्साध्यव्याधिसमानमस्ति, यथा कश्चिदेकः साध्यव्याधिः स्वयमेव शाम्यति, तथैतत्तथाभव्यत्वमपि किञ्चित्तु स्वयमेव परिपच्यते, येनार्हदादि—बिम्बस्य पूजादर्शनादिबाह्यालम्बनं विनाऽऽत्मनि सम्यक्त्वादिः समुत्पद्यते, किञ्चित्तथाभव्यत्वं, अर्हदादि—बिम्बस्य पूजादर्शनादि, विशिष्टतपोलक्ष्मीभूषितमुनीनां दर्शनं तथा जिनवचनश्रवणनिमित्तमपेक्ष्य परिपाकपूर्वकं सम्यक्त्वादि जायतेऽथवा चिरकालेन विना निमित्तं निसर्गतो जायते इति.) किं पुनस्तीर्थंकरभवप्राप्तावपरोपदेशेनाप्रथमसम्बोध इत्यपि शब्दार्थः, स्वयंसम्बुद्धा इति योगः ।।

**स्वयोग्यताप्राधान्यात्, त्रैलोक्याधिपत्यकारणाचिन्त्यप्रभावतीर्थंकरनामकर्म्मयोगे चापरोपदे-**

**शेन स्वयं–आत्मनैव सम्यग्वरबोधिप्राप्त्या बुद्धा मिथ्यात्वनिद्रापगमसम्बोधेन स्वयंसम्बुद्धाः, न वै कर्म्मणो योग्यताऽभावे तत्र क्रिया क्रिया, स्वफलाप्रसाधकत्वात्, अश्वमाषादौ शिक्षापक्त्याद्यपेक्षया ।**

पं०...'स्वयोग्यताप्राधान्यात्' स्वयोग्यताप्रकर्षो हि भगवतां प्रथमबोधे प्रधानो हेतुः, लूयते केदारः स्वयमेवेत्यादाविव केदारादेर्लवनतो, 'न वै इत्यादि' न वै–नैव कर्म्मणः-क्रियाविषयस्य कर्म्मकारकस्येत्यर्थो 'योग्यताऽभावे' क्रियां प्रति विषयतया परिणतिस्वभावाभावे 'तत्र' कर्मणि 'क्रिया' सदाशिवानुग्रहादिका क्रिया भवति, किन्तु ? क्रियाभासैव, कुत इत्याह–'स्वफलाप्रसाधकत्वाद्' अभिलषितबोधादिफलाप्रसाधकत्वाद् एतदपि कुत इत्याह–प्रयासमात्रत्वात् क्रियायाः, कथमेतत्सिद्धमित्याह–'अश्वमाषादौ' कर्म्मणि, आदिशब्दात् कर्प्पासादिपरिग्रहः, 'शिक्षापक्त्याद्यपेक्षया' शिक्षां पक्तिमादिशब्दाल्लाक्षारागादि वाऽपेक्ष्य ।

टी०...प्रथमसम्बोधिं प्रति अर्थात् वरबोधिं प्रति भगवतां स्वयोग्यताप्रकर्षं उत्कृष्टकोटिकयोग्यताया वशेन वर (तीर्थंकरपददायकत्वेन तथाविधोत्कृष्ट) बोधिलाभो भवति–प्रथमसम्बोधिः–स्वयं आत्मना कारणेन जन्यतेऽत उत्तमः–सर्वप्रथमो बोधो ज्ञेयः । लूयते केदारः स्वयमेवेत्यत्र–अतिसुकरत्वेन कर्तृव्यापारस्याविवक्षणमिवाप्रयासेन तत्त्वदर्शिभवनतया बोधदातृव्यापारस्य स्वल्पत्वात् स्वयंसम्बुद्धाः, ("क्रियमाणं तु यत्कर्म स्वयमेव प्रसिद्धयति । सुकरैः स्वैर्गुणैर्यस्मात् कर्मकर्त्तेति तद्विदुः" (व्या.का.) यत्कर्माऽपि गुणयोगात्–वस्तुमध्यस्थितसुकरत्वादिपादंवादि–गुणस्य संयोगात् कर्तृत्वेन विवक्ष्यते स कर्मकर्त्तेत्युच्यते 'कर्मवत् कर्मणा तुल्यक्रियः' कर्मस्था या क्रिया तया क्रियया तुल्यक्रियः कर्त्ता कर्मवद् भवति–कर्मणः कर्तृत्वेन विवक्षायां कर्त्ता कर्मवत् स्यादिति यावत्, (अत्र कर्तुरभिहितत्वात् प्रथमा) 'यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते, स्वव्यापारे स्वतंत्रत्वात्' यदा सौकर्यातिशयविवक्षया कर्तुः पुरुषस्य व्यापारः प्रयत्नो न विवक्ष्यते किन्तु कर्म्मादिगत एव व्यापारो विक्लित्त्यादिफलानुकूलत्वेन विवक्ष्यते तदा कर्म्मादिकारकाण्यपि कर्तृसंज्ञां लभन्ते इत्यर्थः)

तथा च स्वयोग्यताप्राधान्यात् प्रथमसम्बोधिं प्रतीत्य स्वयंसम्बुद्धा भगवन्तस्तथा त्रैलोक्यस्याधिपत्यस्य कारणस्य, अचिन्त्यप्रभावकतीर्थंकरनामकर्मणो योगे चापरोपदेशेन–परोपदेशं विना, अप्रथमसम्बोधिं (केवलज्ञानदर्शनादिसम्बोधिं) प्रतीत्य स्वयंसम्बुद्धा अर्थात् स्वयं–आत्मनैव सम्यग्वरबोधि–प्राप्त्या बुद्धा मिथ्यात्वनिद्राऽपगम (क्षय) सम्बोधेन स्वयंसम्बुद्धाः, (प्रधानभूतस्वयोग्यताजन्यप्रथमसम्बोधाऽभिन्न–स्वयोग्यताप्रकर्षजन्यत्रैलोक्याऽऽधिपत्यकारणभूताचिन्त्यप्रभावकतीर्थंकरनामकर्मसंयोगरूपसम्बन्धोत्तरकालीन–स्वयमात्मना–परोपदेशनिमित्तनिरपेक्षतया सम्यग्वरबोधिप्राप्तिकरणकमिथ्यात्वरूपभावनिद्राया अपगम–क्षयरूपसम्बोधाभिन्नस्वयंबोधशालिनः स्वयंसम्बुद्धा भगवन्तो भवन्ति.) अर्थान्महेशकृताऽनुग्रह–निरपेक्ष–स्वतंत्रविशिष्ट–स्वत उज्जागररूपतुर्यदशा–परमज्योतीरूपाः स्वयंसम्बुद्धा भगवन्तः सदा जयन्ति ।

क्रियाविषयभूतकर्मणो योग्यताया अभावे महेशकृता क्रिया, क्रिया न भवति–क्रियार्थो न भवति परन्तु क्रियाऽऽभासरूपैव, 'महेशो जीवाननुगृह्णाति बोधयति च' जीवकर्मकानुग्रहवान् महेशः, जीवकर्मकबोधदानवान् महेशः, अत्रानुग्रहादिरूप–क्रियाविषयजीवरूपकर्मकारकेऽनुग्रहादिक्रियां प्रति विषयतया परिणमनस्वभावाभावे सति जीवरूपकर्मकारके सदाशिवकर्तृकानुग्रहादिक्रिया भवति परन्तु सा क्रियावदाभासते, अर्थवती क्रिया न भवति, यतोऽनुग्रहादि–क्रियां प्रति विषयत्वेन परिणमनयोग्यताशून्येषु जीवेषु सदाशिवकर्तृकानुग्रहादि क्रिया, इष्टबोधादिरूपफलाऽप्रसाधिकाऽस्ति, अर्थात् प्रवृत्तावुद्देश्यभूतबोधादिरूपफलाप्रसाधकत्वेन निष्फलाऽस्ति, योग्यताया अभावे सदाशिवकर्तृकबोधजनकक्रिया, प्रयासमात्रफलदत्वेन निष्फला. । योग्यतासद्भावे क्रिया सफला, योग्यताया अभावे क्रिया निष्फला, एतद्विषये निदर्शनानि दीयन्ते, तथाहि = यथा 'अश्वान् शिक्षयति' इति प्रतीतिबलेन स्वयोग्यताप्रधानताऽपेक्षया, शिक्षारूपक्रियाविषयत्वेनाश्वा एव भवितुमर्हन्ति, एवं 'माषान् पचती'ति प्रतीतिबलेन पाकक्रियाविषयत्वेन माषा भवितुमर्हन्ति, यतस्तथाक्रियां प्रति विषयत्वेन परिणमयितुं अश्वादिषु स्वभाव–योग्यताऽस्ति, अन्यथा पाकक्रिया–विषया माषाः कथं ? अश्वाः किं नहि ? अथवा शिक्षणरूप क्रियाया विषया अश्वाः किं ? माषाः किं नहि ? अत्रैकमेवोत्तरमस्ति यथापाकयोग्यता माषेषु च शिक्षायोग्यताऽश्वेषु वर्त्ततेऽतः पाकक्रियां प्रति माषाणां, शिक्षाक्रियां प्रति, अश्वानां विषयत्वेन परिणमनयोग्यता–शक्तिर्विद्यते एव, अत्र प्रथमादिपदेन कर्पासादेर्ग्रहणम्, द्वितीयादिपदेन लाक्षारागादेर्ग्रहणम्, अर्थात् लाक्षारागं प्रति विषयत्वेन परिणमनयोग्यता कर्पासादावस्ति, तथा च तथाक्रियाया विषयस्तथायोग्यतावान् पदार्थो भवितुमर्हति, अयोग्यः पदार्थः कदाचिदपि कर्मरूपकारकं भवितुं नार्हति, तस्मात्कारणादयोग्ये पदार्थे कृता क्रिया निष्फला भवति.

**सकललोकसिद्धमेतदिति नाभव्ये सदाशिवानुग्रहः, सर्वत्र तत्प्रसंगाद्, अभव्यत्वाविशेषादिति भावनीयं, बोधिभेदोऽपि तीर्थंकरातीर्थंकरयोर्न्याय्य एव. ।**

पं०...'सकललोकसिद्धमेतत्' क्रियायाः प्रयासमात्रत्वं, भवतु नामापरकर्तृकायाः क्रियाया इत्थमक्रियात्वं, न पुनः सदाशिवकर्तृकायाः, तस्या अचिन्त्यशक्तित्वादित्याशङ्क्याह–'इति' एवं कर्म्मणो योग्यताभावे क्रियायाः क्रियात्वे एकान्तिके सार्वत्रिके च सकललोकसिद्धे 'न' नैव 'अभव्ये' निर्वाणायोग्ये प्राणिनि सदाशिवानुग्रहः, यदि हि स्वयोग्यतामन्तरेणापि सदाशिवानुग्रहः स्यात्, ततोऽसावभव्यमप्यनुगृह्णीयादिति, न चानुगृह्णाति, कुत इत्याह–'सर्वत्र' अभव्ये 'तत्प्रसंगात्' सदाशिवानुग्रहप्रसंगाद्, एतदपि कुत इत्याह–'अभव्यत्वाविशेषात्' को हि नामाभव्यत्वे समेऽपि विशेषो ? येनैकस्यानुग्रहो नान्यस्येति, एतत्परिभावनीयं यथा–स्वयोग्यतैव सर्वत्र फलहेतुरिति वरबोधिप्राप्त्येत्युक्तं, तत्सिद्ध्यर्थमाह–'बोधिभेदोऽपि' सम्यक्त्वादिमोक्षमार्गभेदोऽपि, आस्तां तदाश्रयस्य विभूत्यादेः, तीर्थंकरातीर्थंकरयोः 'न्याय्य एव' युक्तियुक्त एव, युक्तिमेवाह—

टी०...ननु, अयोग्ये विषये कृतक्रियाया निष्फलत्वेन प्रयासमात्रत्वं, अतः क्रिया, क्रिया-

ऽभासा, भवतु नाम सदाशिवभिन्नापरपुरुषकर्तृकाया: क्रियाया इत्थमक्रियात्वं, अचिन्त्यशक्तिमत्त्वेन सदाशिवकर्तृकाया: क्रियाया न पुनरक्रियात्वमिति चेदाह–'इति' एवं कर्म्मणो योग्यताभावे एव क्रियाया: क्रियात्वे (कर्मणो योग्यताया अभावे क्रियाया अक्रियात्वे) एकान्तिके (एकान्ततो निश्चयत:) सार्वत्रिके (सर्वदेशकालेषु व्यापके सकललोकसिद्धे, सति, नैव, अभव्ये (निर्वाणाऽयोग्ये) प्राणिनि सदाशिवाऽनुग्रहो भवति, यदि स्वयोग्यताया अपेक्षां विनाऽपि सदाशिवाऽनुग्रहक्रिया स्यात्तदाऽसावभव्यमप्यनुगृह्णीयाद्, न चाभव्येऽनुगृह्णाति, यत: सर्वत्र–अभव्यमात्रे सदाशिवकर्तृकानुग्रहक्रियाया: प्रसङ्गो (अनिष्टापत्तिरूपप्रसङ्गो) भवेत्, कथमिति चेदाह–अभव्यत्वजातेरविशेषात्, को हि नामाऽभव्यत्वे समेऽपि विशेषो ? येनैककस्याऽनुग्रहो नाऽन्यस्येति । 'इति भावनीयम्' एतत् परिभावनीयं यथा 'स्वयोग्यतैव सर्वत्र फलहेतु:' अर्थात् सर्वत्र–आत्मगुणप्राप्त्यादौ, स्वनिष्ठतादृशयोग्यतैव (न स्वयोग्यतां सर्वथा वर्जयित्वा) फलहेतु:–फलोपधायकहेतु:–अव्यवहितकारणं, सर्वात्मगुणप्राप्त्यादिकार्यं प्रति स्वनिष्ठयोग्यतैव–स्वनिष्ठतथाभव्यत्वरूपयोग्यतैव प्रधानत्वेन फलोपधायककारणमस्ति तथाऽपि तत्परिपाके यानि यानि कारणानि शास्त्रनिर्दिष्टानि तान्यवश्यमन्वेषितव्यानि, यत: स्वयोग्यताप्रकर्षेणान्ततो गत्वा फलप्राप्तिरिति.

यदुक्तं पूर्वं 'तीर्थकरत्वरूप–फलकारणवरबोधिप्राप्तिद्वारा स्वतो बोधिमन्त: स्वयंसम्बुद्धा भवन्ति' तद्वरबोधि–वैशिष्ट्यं साधयितुं ज्ञापयति 'बोधिभेदोऽपि' सम्यक्त्वादिमोक्षमार्गभेदरूपविशेषोऽस्ति, सहजतथाभव्यत्वादिमूलभेदेन सर्वत्र मोक्षमार्गे विशेषो वर्त्तते, अपिशब्देन, तीर्थकराश्रितविभूत्यादेर्भेदे तु क: प्रश्न:, अत: तीर्थंकररूपविशिष्टव्यक्ति–अतीर्थंकरसामान्यव्यक्तिगतसम्यक्त्वादिमोक्षमार्गभेदोऽपि युक्तियुक्त एव युक्तिमेवाह–

**विशिष्टेतरफलयो: परम्पराहेत्वोरपि भेदात्, एतदभावे तद्विशिष्टेतरत्वानुपपत्ते:, भगवद्बोधिलाभो हि परम्परया भगवद्भावनिर्वर्त्तनस्वभावो, न त्वन्तकृत्केवलिबोधिलाभवदतत्स्वभाव:, तद्वत्ततस्तद्भावासिद्धेरिति, तत्तत्कल्याणाक्षेपकान्नाऽवितथाभव्यताभावभाज एते इति स्वयंसम्बुद्धत्वसिद्धि: ५॥**

पं०...'विशिष्टेतरफलयो: परम्पराहेत्वोरपि' विशिष्टफलस्येतरफलस्य च परम्पराहेतो:–व्यवहितकारणस्य, किं पुनरनन्तरकारणस्येत्यपिशब्दार्थ: 'भेदात्' परस्परविशेषात्, कुत इत्याह–'एतदभावे' परम्पराहेत्वोर्भेदाभावे 'तद्विशिष्टेतरत्वानुपपत्ते:' तस्य-फलस्य यद्विशिष्टत्वमितरत्वं चाविशिष्टत्वं तयोरयोगाद्, एतदेव भावयति-भगवद्बोधिलाभो हि 'परम्परया' अनेकभवव्यवधानेन 'भगवद्भावनिर्वर्त्तनस्वभावो' भगवद्भाव:–तीर्थकरत्वं, व्यतिरेकमाह– 'न तु' न पुन: अन्तकृत्केवलिबोधिलाभवत्' अन्तकृतो–मरुदेव्यादिकेवलिनो बोधिलाभ इव 'अतत्स्वभावो' भगवद्भावानिर्वर्त्तनस्वभाव:, एतदपि कथमित्याह–'तद्वदिति' तस्मादिवान्तकृत्केवलिबोधिलाभादिवत् 'तत:' तीर्थंकरबोधिलाभात् 'तद्भावासिद्धे:' तीर्थंकरभावासिद्धेरिति 'स्वयंसम्बुद्धत्वसिद्धि:' ।

टी०...विशिष्टफलं (तीर्थंकरत्वविशिष्टकार्यं) प्रति परम्परा–व्यवहितकारणं वरबोधिरस्ति, इतरत्–सामान्यफलं (तीर्थंकरत्वरूपफलभिन्नान्तकृत्केवल्यादिकेवलिभावरूपफलं) प्रति परम्परा–व्यवहितकारणं (तीर्थंकरत्वफलाजनको) बोधिरस्ति, परम्परारूपहेतुद्वयस्य परस्परभेदरूपविशेषात्, तीर्थंकरातीर्थंकरनिष्ठबोधिभेदो न्याय्य एवेति सिद्धम् । यदि विशिष्टफलस्य सामान्यफलस्य च परम्पराहेत्वोः परस्परभेदो न मन्येत, तदाऽन्तकृत्केवलिवत् तीर्थंकरे तीर्थंकरत्वाभावापत्तिः, अर्थात् परम्पराहेत्वोरभेदकल्पनायां, तीर्थंकरत्वरूपविशिष्टफले वरबोधिजन्यतीर्थंकरत्वरूपविशिष्टतायाश्चान्तकृत्केवल्यादिरूपसामान्यफलेऽतीर्थंकरत्वरूपसामान्यस्याभावापत्तिरापद्येत्, इदमत्र हृदयम्–वरबोधितो विशिष्टफलं कथं ? सामान्यफलं कथं न ? च सामान्यबोधितः सामान्यफलं कथं ? विशिष्टफलं कथं न ? इति प्रश्न–चतुष्टयस्य समाधानं तदा भवेत् यदा बोधौ भेदप्रतिपत्तिर्भवेन्नान्यथेति, फलभेदेन कारणभूतबोधौ नितरां भेदः प्रतिपत्तव्य एवेति.

किञ्च भगवन्निष्ठवरबोधेरेतादृशः स्वभावोऽस्ति यत्परम्परातः–भवान्तरव्यवधानतस्तीर्थंकरपदवीलाभोऽवश्यं भाव्येव. व्यतिरेकापेक्षयाऽऽह–परन्तु, अन्तकृत्केवल्यादिनिष्ठ (मरुदेवाऽऽदिकेवलिनिष्ठ) बोधिलाभवत्, अतीर्थंकरस्वभावो बोधिलाभो नास्ति. यदि विशिष्टेतरफलयोः परम्पराहेत्वोः परस्परभेदो न कश्चित्तदा यथाऽन्तकृत्–केवलि–वृत्तिबोधिरूपपरम्पराकारणतः तीर्थंकरत्वसिद्धिर्न भवति, तथा वरबोधिलाभतस्तीर्थंकरत्वभावाभावापत्तिर्भवेदेवं कदाचिन्न भवत्यत एव तीर्थंकरवृत्तिवरबोधिर्भिन्नोऽतीर्थंकरवृत्तिबोधिर्भिन्न एवातएव विशिष्टफलसामान्यफलोपपत्तिर्यथार्था भवेदिति.

तत्तत्कल्याणस्य–तीर्थंकरत्वरूपफलकारणवरबोधिरूपविशिष्टकल्याणस्याथवा वरबोधिप्रयोज्य–तीर्थंकरत्वरूपकल्याणस्याक्षेपकः = आकर्षको योऽनादिकालीन (सहज) तथाभव्यतारूप–पारिणामिकभावविशेषोऽस्ति, तं भजन्ते इत्येवं शीला अर्थात् विशिष्टकल्याणप्रयोजक–सहजतथाभव्यता–भावभाजोऽर्हन्तो भगवन्तो भवन्ति, अत एव तत्र स्वयंसम्बुद्धत्वसिद्धिरिति ।

एवमेव शक्रस्तवस्य पञ्चमं पदं पूर्णं भवति–द्वितीयसम्पदश्च तृतीयं पदं पूर्णं भवति, तेन सह द्वितीयसम्पदश्च व्याख्यानं समाप्तं भवति.–

द्वितीयसम्पदः समुदितत्वेन सान्वर्थसमन्वयः–

**एवमादिकर्तॄणां तीर्थंकरत्वेनान्यासाधारणस्वयंसम्बोधेनेति स्तोतव्यसम्पद एव प्रधाना साधारणासाधारणरूपा हेतुसम्पदिति २ ।**

टी०...एवमादिकर्तॄणां (मोक्षावस्थातः प्राक् संसारावस्थायां जन्मादिप्रपञ्चकरणशीलानां) मध्ये तीर्थंकरत्वेन (तीर्थंकरव्यक्तिभिन्नसकलव्यक्तिषु, अविद्यमानत्वेनान्यासाधारणेन–तीर्थंकरव्यक्तिभिन्नव्यक्तिनिष्ठबोधिभिन्नतीर्थंकरपदप्रापकविशिष्टवरबोधितः) अन्यासाधारण–परोपदेशनिरपेक्षयथार्थं–हेयोपादेयोपेक्षणीयसकलवस्तुविषयकतत्त्वज्ञानरूपस्वयंसंबोधेन विशिष्टा

अर्हन्तो भगवन्तो भवन्ति, अत एव 'आइगराणं तित्थयराणं सयंसंबुद्धाणं' एषा पदत्रयवती द्वितीया सम्पत्, स्तोतव्यसम्पद एव प्रधाना साधारणासाधारणरूपा–हेतुसम्पद् विज्ञेया, अर्थात् स्तोतव्यस्यार्हतो भगवतः स्तुते हेतुभूता भवति, आदिकरत्वं (सर्वजीवसाधारणवृत्तिरूपादिकरत्वधर्मरूपस्वरूपं) प्रधानः साधारणधर्मविशिष्टो हेतुः, (साधारणधर्मो हि कथितस्वरूपस्तत्र अपि वर्तमानः) परन्तु तीर्थंकरत्वस्य-कारणासाधारणवृत्तिस्वयंसम्बोधकार्यमस्ति, तीर्थंकरत्वकारणसाधारणवृत्तिस्वयंसम्बोध एव प्रधानोऽसाधारणधर्मविशिष्टहेतुरस्ति,

अथवा पृथक् पृथग्रूपेण तीर्थंकरत्वं च तीर्थंकरत्वासाधारणस्वयंसंबोधिः, एतौ द्वौ हेतू स्वस्वरूपेण प्रधानासाधारणौ हेतू स्तः, 'आदिकरः' इति पदं प्रधानसाधारणहेतुप्रतिपादकं च 'तीर्थंकरस्वयंसम्बुद्धौ' इति पदद्वयं प्रधानासाधारणहेतुप्रतिपादकं वर्तते, ॥

अथ द्वितीयायाः सम्पदो निपुणनिरूपणानन्तरं केचिद् बुद्धमतानुयायिनः सर्वे जीवा एकसमानयोग्यतावन्तः सन्ति, न कोऽपि जीवः कस्मादपि जीवाद् विशिष्टयोग्यतां धारयतीति प्रतिपादयन्ति, तस्य मतस्य तृतीयायाः सम्पदः 'पुरुषोत्तमेभ्यः' इति प्रथमपदेन निराकरणम्–

**एते च सर्वसत्त्वैवंभाववादिभिर्बौद्धविशेषैः सामान्यगुणत्वेन न प्रधानतयाऽङ्गीक्रियन्ते, 'नास्तीह कश्चिदभाजनं सत्त्वः' इतिवचनात्, तदेतन्निराचिकीर्षयाऽऽह–**

पं०... सर्वसत्त्वेत्यादि' सर्वसत्त्वानां–निखिलजीवानामेवंभावं–विवक्षितैकप्रकारत्वं वदन्तीत्येवंवादिभिः–बौद्ध–विशेषैः–सौगतभेदैर्वैभाषिकैरिति सम्भाव्यते, तेषामेव निरुपचरितसर्वास्तित्वाभ्युपगमात्, सामान्याः–साधारणा गुणाः–परोपकरणादयो येषां ते तथा तद्भावस्तत्त्वं तेन, 'न' नैव 'प्रधानतया' अतिशायितया 'अङ्गीक्रियन्ते' इष्यन्ते, कुत इत्याह–'नास्ति' न विद्यते 'इह' लोके 'कश्चिद्' नरनारकादिः 'अभाजनो (नम्)' अपात्रम-योग्य इत्यर्थः, सत्त्वः–प्राणी 'इति वचनाद्' एवंरूपात्तोपदेशाद् ।

टी०...एते–पूर्वोक्तविशेषणविशिष्टा अर्हन्तो भगवन्तः, सर्वसत्त्व–सर्वजीवनिष्ठैवं भावरूपैकप्रकारत्वरूपसमानास्तित्ववादिभिः, बौद्धविशेषैः–सौगतभेदरूपैर्वादिभिः, कथमिति चेत् उच्यते तेषां–वैभाषिकाणामेवाविशिष्टत्वेन सर्वेषां सत्त्वानामस्तित्वाभ्युपगमात्, सामान्यगुणत्वेन–साधारणरूपेण परोपकरणादिरूपगुणाः सर्वेषु जीवेषु विद्यन्तेऽतः साधारणगुणवत्त्वेन, प्रधानतया– अतिशायितया–विशिष्टतया नैवाङ्गीक्रियन्ते, यतः 'नास्तीह कश्चिदभाजनं सत्त्वः' इति वचनात्, तेषां वैभाषिकाणां वचनं विद्यते हि, इह–लोके कश्चित्–नरनारकादिः प्राणी, अभाजनं अपात्रमयोग्यो नास्त्येवार्थाद्, लोकवर्त्ती सर्वजीव योग्यतावानस्ति–सर्वः समानोऽस्तीति.

तदेतद्बौद्धमतनिराकरणेच्छयाऽऽह–

**'पुरुषोत्तमेभ्यः' इति, पुरि शयनात् पुरुषाः–सत्त्वा एव, तेषां उत्तमाः–सहजतथाभव्यत्वादिभावतः प्रधानाः पुरुषोत्तमाः,**

टी०...पुरि शयनात् = शरीरान्तर्विनः (शरीरस्यावच्छेदकावच्छिन्नाः) पुरुषाः (पुर अग्रगमने, कुषन्, पुरि देहे शेते, शी.ड. पृषो. पुरुषः) सत्त्वाः (प्राणिनो जीवाः) तेषां मध्ये उत्तमाः (वटबीजे यथा वटोऽव्यक्तो वर्तते तथा) सहजतथाभव्यत्वादिभावतः (अनादितथाभव्यत्वादेः सकाशात्) प्रधानाः, अर्थात् संसारिणां मध्ये सर्वत्र सहजतथाभव्यत्वादिभावं प्रतीत्य सदा परोपकारादिगुणप्रगम-सम्बन्धवन्तः प्रधानाः, अनादिकालतः परमेश्वरास्समानुलनतादर्शकसदर्शाने निदर्शनम्. (स्वकल्पयो-ग्यतारूपेणापि फलोपधायकरूपेण नहि स्वकल्पयोग्यता नाम कारणसत्ता फलोपधायकता नाम कार्य-सत्ता, कारणरूपेणास्तित्वमनादिकालतो विद्यते एव, कार्यरूपेण सहकारिकारणेनास्तत्वेन, परन्तु प्रादुर्भाव-रूपेण—कार्यरूपेणास्तित्वं यदा सहकारि-सामग्री—मिलने सत्येव विद्यते, स्वरूपयोग्यत्वं तदवच्छेदक धर्मवत्त्वं जनकत्वादिकम् यथाऽरण्यस्थस्याऽपि दण्डस्य घटं प्रति जनकत्वं, स्वरूपयोग्यत्वं, फलोप-धायकत्वं फलनिष्पादकत्वं)

**तथाहि—आकालमेते परार्थव्यसनिनः उपसर्जनीकृतस्वार्था उचितक्रियावन्तः अदीनभावा, सफलारम्भिणः अदृढानुशयाः कृतज्ञतापतयः अनुपहतचित्ता देवगुरुबहुमानिनस्तथा गम्भी-राशया इति, न सर्व एव एवंविधाः, खलुङ्कानां व्यत्ययोपलब्धेः, अन्यथा खलुङ्काभाव इति।**

पं०...'पुरुषोत्तमेभ्य इति' 'अदृढानुशया इति' अदृढः—अनिबिडोऽपकारिष्वप्यनुशयः— अपकारबुद्धि-र्येषां ते तथा, 'न सर्वेत्यादि' 'न' नैव 'सर्व एव' सत्त्वा 'एवंविधा' भाविभगवद्भावकसत्त्वसमाः, कुत इत्याह— 'खुलुङ्कानां' सम्यक्शिक्षाऽनर्हाणां 'व्यत्ययोपलब्धेः' प्रकृतविपरीतगुणदर्शनात्, व्यतिरेकमाह—'अन्यथा' प्रकृतगुणवि-परीत्याभावे, खुलुङ्काभावः—खुलुङ्कानायुक्तलक्षणानामभावः—स्वलक्षणस्यैवाभावात्, न च न सन्ति ते, सर्वेषामपि मानात्। अस्तु तीर्थकरत्वहेतोर्योग्यताभावे समस्तसत्त्वानामसमता, इतरासत्त्वानां तु कथमित्याशङ्क्य प्रतिवस्तु-पमया साधयितुमाह—

टी०...तथाहि आकालं—अनादितः (आकालमपि, यावदपि कालस्तावदित्यर्थः, अनेकान्त-जयपताकायां विवरणे आकालमिति—'आङ्मर्यादायाम्' (सि. २/२/७०) इति पञ्चमी, आकालात्, ततः 'पर्यपाङ्बहिरच्पञ्चम्यो' (सि. ३/१/३२) अनेन समासः (अव्ययीभावः) आकालमिति कालम-भिव्याप्य मर्यादीकृत्य वा एतेऽर्हन्तो भगवन्तः परार्थव्यसनिन इत्यादि बोध्यम्.)

(१) परार्थव्यसनिनः = परो वा परेषां योऽर्थस्तस्य व्यसनिनः—नित्यकर्तव्यतया सदा पूर्णरसवन्तः— परार्थं विना कदाचिदपि न तिष्ठन्ति, परोपकार एव स्वप्राणा इति मन्यमानाः, विश्वहितकरण-परायणाः ('सन्तः स्वयं परहिते विहिताऽभियोगाः' 'एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये' इत्यादि भर्तृहरिवाक्यमपि स्मरणीयम्.)

(२) उपसर्जनीकृतस्वार्थाः—उपसर्जनीकृतः गौणीकृतः स्वार्थः—स्वप्रयोजनं—स्वकार्यं यैस्ते = उपस-र्जनीकृतस्वार्थाः, स्वस्य प्रयोजनमप्रधानं मत्वा, स्वार्थं महत्त्वशून्यं कृत्वा जीवन्तोऽर्हन्तः सन्ति,

(३) उचितक्रियावन्तः = विवेकनयनत उचिताऽनुचित-क्रियाणां मध्ये सर्वथोचितां-घटितां-युक्तियुक्तां क्रियां (कार्यं) कुर्वन्ति, अर्हदात्मानः, अर्थाल्लोकानां स्तुतिं निन्दांवाऽवगणय्य न्याय्यान् मार्गतो निर्गम्यान्याय्यं-उन्मार्गं प्रति पदमेकं न चलन्ति (न्याय्यात्पथः प्रविचलन्ति पदं न धीराः)

(४) अदीनभावाः = न दीनः, अदीनो भावः = मानसपर्यायो । येषां तेऽदीनभावाः, अर्हदात्मानो भवन्ति, अर्थाद् रङ्कतां-पामरतां निरुपाय्यतां कदाचिदपि स्वमनसि न कुर्वन्ति, पुरुषार्थवादिनः, स्वकर्मैकरणपूर्णशक्तिमन्तः, पराक्रम-केसरिणो लघुतादैन्यपराङ्मुखा अर्हन्तो भवन्ति,

(५) सफलारम्भिणः = सफल आरम्भोऽस्त्येषां = सफलारम्भिणः, प्रथमतः सफलकार्यं प्रति प्रयत्न-शीलाः पुरुषोत्तमा भवन्ति, अर्थान्निष्फलप्रवृत्तिं न स्वीकुर्वन्ति कुर्वन्ति च, अथवा निश्चित-प्रतिज्ञातार्थतः कार्यतो न विरमन्ति, फलपर्यन्तं कार्यरता भवन्ति पुरुषोत्तमाः ('न निश्चितार्थाद् विरमन्ति धीराः'' विघ्नै र्मुहु र्मुहुरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति' 'मनस्वी कार्यार्थी गणयति न दुःखं न च सुखं') इति परेषां वाक्यानि स्मरणीयानि.

(६) अदृढानुशयाः = अपकारिणं-अपराधिनं जीवं प्रत्यपि विनष्टापकारबुद्धिमन्तो भगवन्तो भवन्ति.(अपकारिषु यः साधुः स साधुः सद्भिरुच्यते, उपकारिषु यः साधुः, साधुत्वे तस्य को गुणः) अपकारिषूपकारकरणसाधुतारूपविशिष्टगुण-दिव्यसौरभतः सुरभिताः पुरुषोत्तमाः ।

(७) कृतज्ञतापतयः = कृतं परेण कृतमुपकारं जानाति यः स कृतज्ञः, तस्य भावः कृतज्ञता, तस्याः पतयः स्वामिनः, पुरुषोत्तमा भवन्ति, अर्थात् कृतोपकारं प्रति सर्वथा सेवाकरणतत्परता, पूर्णस्वरूपा भक्तिरेव कृतज्ञतानामको महान् गुणो दिव्यः कथ्यते, एतेन गुणेन मानवोऽपि देववद् भवति.

(८) अनुपहतचित्ताः = न-उपहतं-अनुपहतं, दुर्ध्यानतो दुष्टवृत्तितो दुर्विकल्पसंकल्परूपकल्पनाजालतः, चित्तं येषां तेऽनुपहतचित्ताः मानसिकतरङ्गैरप्रतिहतमानसराज्यस्य स्वामिनः पुरुषोत्तमा भवन्ति.

(९) देवगुरु-बहुमानिनः = देवं प्रति गुरुं प्रति बहुमानधारकाः(मानसप्रीतितोऽस्थिमज्जावदन्तरंग-रङ्गविशिष्टपरमभक्तिरूपबहुमानभाविताः) पुरुषोत्तमा भवन्ति ('यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते निखिला ह्यर्थाः प्रकाशन्ते महात्मनाम्')

(१०) तथा गम्भीराशयाः = यथा पूर्वोक्तगुणविशिष्टा नव-गुणवन्तो भवन्ति भगवन्तस्तथा 'गम्भी-राशयाः' गभीरमनसः-महामनसः-विशालमनसः, स्थिराध्यवसायाः पुरुषोत्तमा भवन्ति ('अयं निजः परो वेति गणना लघुचेतसां, उदारचरितानां तु वसुधैव कुटुम्बकम्')

एवं परमात्मानः, पूर्वोक्तगुणसत्कविशिष्ट-योग्यतामनादिकालतो बिभ्रति यथाहि, यद्यपि भव्यत्वं सर्वेषामात्मनां समानं तथापि प्रत्येकात्मनां भव्यभूतानां युगपन्मुक्तिः समानसामग्रीसत्त्वेऽपि न भवति. प्रत्येकभव्यानां 'तथाभव्यत्वं' भिन्नभिन्नजातीयं मन्तव्यं, किञ्च परमात्मनां 'सहजतथाभव्यत्वं' सकलभव्येभ्य उत्कृष्टकोटिकं, यथा यथा भगवतां 'सहजतथाभव्यत्वं तत्तत्सामग्रीयोगेन

परिपक्वं भवति तथा तथा तेषां श्रीमतामुत्तमता बहिराविर्भवति, वरबोधिलाभादनन्तरन्तु जिनेश्वरात्मानः सर्वथा परोपकारव्यसनिनः, उचितक्रियावन्तस्तथा जगज्जन्तूनामुद्धरायोदारचरितादयो भवन्ति, तथा तेषां सकला क्रिया, सफलारम्भवती तथा सर्वोत्कृष्टपरोपकारकारिणी भवति, अन्यच्चेह संसारे तीर्थंकरात्मनां चेतरभव्यात्मनां मध्ये, असमानता शाश्वती यतः सहजतथाभव्यत्वादि, भेदकं वर्त्तते, श्री परमात्मनां 'सहज तथाभव्यत्वं' सर्वेषामितरभव्यानां तथाभव्यत्वतो भिन्नजातीयमस्ति, अत एव श्री तीर्थंकरात्मानः सदाकालमितरसर्वभव्यात्मभ्य उत्तमा अतिशेरते, ते तु स्वकीय–सहजतथाभव्यत्वबलेन पुरुषेषु प्रधानत्वेन 'पुरुषोत्तमा' इति स्तूयन्ते, नरकनिगोदादिगता अपि ते स्वकीयसहजतथाभव्यत्वादिपारिणामिकभावबलेन सर्वदा सर्वद्योत्तमा एव निश्चीयते, तथाविधयोग्यताविशिष्टात्मानो यदा यदा तथाविधसामग्री, परिपक्वा, भवति तदा तदा तेषामुत्तमता कार्यरूपेण परिणता भवति, पूर्वोक्तविशिष्ट–योग्यतया ते–आत्मानः प्रादुर्भावेण परार्थव्यसनिन इत्यादि गुणसम्पत् समन्विता भवन्ति, तादृशालौकिकदशाप्रापकस्य कारणस्यानादिकालीनत्वाद्, श्री तीर्थंकरदेवात्मनां 'एतेऽर्हन्तो भगवन्तोऽनादिकालतः परार्थव्यसनिन इत्यादयो भवन्ति' इति कथनमतिशयोक्तिरहितं निर्बाधमेवेति. ।

० भाविनि–भविष्यत्काले भगवद्भावः–तीर्थंकरत्वं येषां ते भाविभगवद्भावा ये सत्त्वा–जीवा स्तेषां समाः–समानताभाजः, सर्वे एव सत्त्वा नैव भवन्ति, तीर्थंकरात्मनां तुल्यतायां तत्पङ्क्तौ तीर्थंकरभिन्ना अन्ये सर्वे सत्त्वा नैवागच्छन्ति, कुत इत्याह–

समीचीना या शिक्षा–सूत्रपाठादिविहितक्रियादिः तदुपदेशादिरूपा शिक्षा, तस्या अनर्हाणां–अयोग्यतावतां खुड्डकानां (मुद्गशैलवत् अभव्यानां, पात्रतारहितानां) आत्मविशेषाणां, व्यत्ययस्योपलब्धेः–प्रकृतविपरीतगुणदर्शनात्-प्रकृतपूर्वोक्ततीर्थंकरात्मनिष्ठ–परार्थव्यसनितादिगुणगणतो विपरीत-विरुद्धस्वार्थान्धताक्षुद्रतादि–दोषाणां दर्शनात्, सर्वे सत्त्वा एव तीर्थंकरसदृशा न भवन्तीत्यर्थः,

व्यतिरेकशैल्या विचारयति 'अन्यथा'–प्रकृतगुणवैपरीत्याभावे खुड्डकेषु पूर्वोक्तप्रकृतगुणविरुद्धस्वार्थान्धताक्षुद्रतादिदोषाणां मान्यताया अभावे, सति सम्यक्शिक्षाऽनर्हत्वस्वार्थपरायणतादिदोषरूपलक्षणानामभावः स्यात्, कथमिति चेदुच्यते, खुड्डकत्व–सम्यक्शिक्षाऽनर्हत्वरूपस्वलक्षणस्याभावो वर्त्तते, एतावदपि वक्तुं न युज्यते, ते खुड्डका न सन्तीति, यतः सर्वेषां दर्शनिनां वादिनां च खुड्डकानां प्रतिपत्तिरविगानेनाविरोधेन सम्मतैव. सम्यक्शिक्षाऽनर्हाः खुड्डकाः सन्त्येवान्यथा सर्वे सम्यक्शिक्षायोग्या एवेति मन्तव्यं स्यादिति.

(सम्यक्त्वादिप्राप्तेरनन्तरोत्तरावस्थायामसमानता भवतु, पूर्वावस्थासु त्वसमानत्वं केन प्रकारेण घटमानं भवतीति ?) अर्थात् तीर्थंकरपदरूपं फलं प्रति हेतुस्तु वरबोधिलाभोऽस्ति, तदनन्तरं तीर्थंकरभगवदात्मसु सर्वेषामन्येषां भव्यजीवेभ्यो वैशिष्ट्यं भेदश्च वरमस्तु, यतस्तद्भेदकारणं वरबोधिरेव, परन्तु वरबोधिप्राप्तितः प्रागवस्थायां तीर्थंकरात्मानोऽन्ये–च सर्वे भव्यात्मान एक–

समाना इति मन्तव्यत्वे का बाधा ? किञ्च वरबोधितः प्रागन्ये सर्वे भव्यात्मानश्च तीर्थंकरात्मानः सर्वथा भिन्नाः पृथग्रूपा एकसमा न सन्ति तत्र भेदकारकं किं कारणमस्तीति शङ्कासमाधानाय प्रतिवस्तूपमाद्वाराऽऽह–

**नाशुद्धमपि जात्यरत्नं समानमजात्यरत्नेन, न चेतरदितरेण, तथा संस्कारयोगे सत्युत्तर-कालमपि तद्भेदोपपत्तेः, न हि काचः पद्मरागीभवति, जात्यनुच्छेदेन गुणप्रकर्षाभावाद्, इत्थं चैतदेवं.**

पं०...'न' नैव 'अशुद्धमपि' समलमपि 'जात्यरत्नं' पद्मरागादि 'समानं' तुल्यम् 'अजात्यरत्नेन' काचादिना, शुद्धं तत्समानं न भवत्येवेत्यपिशब्दार्थः, 'न चेतरद्' अजात्यरत्नं 'इतरेण' जात्यरत्नेन, कुत इत्याह–'तथा' अशुद्धावस्थायामसमानतायां सत्यां, 'संस्कारयोगे' शुद्ध्युपायक्षारमृत्पुटपाकसंयोगे, उत्तरकालमपि, किं पुनः पूर्वकालमित्यपेरर्थः तद्भेदोपपत्तेः' तयोर्जात्याजात्यरत्नयोरसादृश्यघटनाद्भेदोपपत्तिः, तामेव भावयति–'नहि काचः पद्मरागीभवति' संस्कारयोगेपीति गम्यते हेतुमाह–'जात्यनुच्छेदेन' काचादिस्वभावानुल्लङ्घनेन 'गुणप्रकर्षा-भावात्' गुणानां–कान्त्यादीनां वृद्ध्यभावात्, इदमेव तन्त्रयुक्त्या साधयितुमाह–'इत्थं च' इत्थमेव जात्यनुच्छेदे-नैव, चकारस्यावधारणार्थत्वात् 'एतत्' गुणप्रकर्षभवनलक्षणं वस्तु, कुत इत्याह–'एवम् अनेन जात्यनुच्छेदेन गुणप्रकर्षाभावलक्षणप्रकारेण ।

टी०...प्रतिरूपं वस्तु प्रतिवस्तु, समानरूपधर्मगुणवद्वस्तु, तस्योपमया प्रकृतवस्तु सिद्ध्यति अथवा "प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः ॥४९॥ एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥५०॥ सा.द." वाक्ययोर्वाक्यार्थयोः गम्यसाम्ययोः प्रतीयमानोपमानोपमेयभावयोः एकोऽपि धर्मः सामान्यो यत्र पृथग् निर्दिश्यते सा प्रतिवस्तूपमा, प्रतिवस्तु–प्रत्यर्थमुपमा यस्यामिति प्रतिवस्तूपमा. दृ.–त्वन्मुख एवाहं रज्यामि चन्द्र एव चकोरो रज्यते इति प्रतिवस्तूपमा, तथा प्रकृतेऽपि 'अशुद्धं जात्यरत्नं, अजात्यरत्नेन समानं न भवत्येव' 'अव्यवहारव्यवहाराशिस्थितस्तीर्थंकरात्मा, सर्वान्य-भव्यजीवैः सह समानो न भवत्येव' जात्यरत्नं-श्रेष्ठरत्नरूपपद्मरागादि, अशुद्धमपि–मृत्तिकादिमलि-नवस्तु, सम्बन्धजनित–मलेन ग्रस्तमपि, काचादिरूपाजात्यरत्नेन सह समानं–समानतावन्न भवति, शुद्धं जात्यरत्नं, अजात्यरत्नसमानं न भवत्येवेत्यपि शब्दस्यार्थः, अजात्यरत्नं (अशुद्धं) जात्यरत्नेन सह समानं न भवति. यतः, तथा–अशुद्धावस्थायामसमानतायां सत्यां संस्कारयोगे–शुद्ध्युपायभूत–क्षारमृत्पुटपाकसंयोगे सत्यपि उत्तरकालमपि (किं पुनः पूर्वकालमित्यपेरर्थः,) तद्भेदोपपत्तेः–तयोर्जात्याजात्यरत्नयोः–जात्यरत्नस्याजात्यरत्नस्य च मिथोऽसमानता संगता भवति, अतो भेदस्योपपत्तिः,

तथा च जात्यरत्नाजात्यरत्नयोरशुद्धावस्थागताऽसमानताऽस्ति, अत एव, उत्तरकाले–शुद्धावस्थायाम-समानता वर्तते यद्यशुद्धावस्थायां समानतामते, तर्हि शुद्धावस्थायां प्रत्यक्षगोचराऽसमानता कथं ? अत एवेदमवश्यं प्रतिपत्तव्यमेव यद्, शुद्धावस्थायामसमानता–कार्यं प्रत्यक्षगोचरं भवत्यतोऽशुद्धावस्था-

गताऽसमानताऽनुमीयते प्रमीयते—यतः कार्यं दृष्ट्वा कारणमनुमीयते यथा धूमं दृष्ट्वाऽग्निरनुमीयते, फलं दृष्ट्वा मूलवत् यदि संस्कारसंयोगजन्योत्तरकालीनशुद्धावस्थागताऽसमानताऽस्ति, तर्हि पूर्व-पूर्वकालीनावस्थायामसमानतायां कः प्रश्नः ?

("न खल्वसमारचितमपि जात्यरत्नं समानमितरेण न च समारचितोऽपि काचादि जात्यरत्नी भवति")

तां भेदोपपत्तिमेव भावयति = संस्कारयोगेऽपि 'न हि काचः पद्मरागी भवति' (अपद्मरागः पद्मरागः सम्पद्यमानस्तथा भवति, 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः') तत्र हेतुमाह—काचादिस्वभावम-परित्यज्य कान्त्यादिगुणानां वृद्धेरभावात्, काचः, पद्मरागो मणिः संस्कारयोगे सत्यपि न भवति, यतः काचादिः स्वजाति—स्वस्वभावं न त्यजत्यत एव कान्त्यादिगुणानां प्रकर्षो वृद्धि र्न भवति. तथा चाजात्यरत्नकाचादिगतसंस्कारयोगेऽपि कान्त्यादिगुणानां प्रकर्षाभावे काचादिगतस्वभाव—जातेरनुल्लङ्घनमेव हेतुः—काचादेरनुल्लङ्घित—अनुच्छिन्न—स्वस्वभावरूपजातिरेव कारणमस्ति, एवं संस्कारयोगेऽपि जात्यरत्नगतकान्त्यादिगुणानां प्रकर्षसद्भावे, जात्यरत्नगत-स्वस्वभावरूपजातेरनु-ल्लङ्घनं हेतुरस्ति, पद्मरागादिगतानुच्छिन्नस्वस्वभाव एव जाति र्ज्ञेया ।

अशुद्धावस्थायां जात्यरत्न—पद्मरागादौ गुणप्रकर्षभावः प्रच्छन्नोऽस्ति, सति संस्कारे शुद्धावस्थायां जात्यरत्ने गुणानां प्रकर्षः प्रादुर्भवति. एष एव जातिस्वभावः,

अशुद्धावस्थायां अजात्यरत्नकाचादौ गुणप्रकर्षाऽभावः, प्रत्यक्षः तथा सति संस्कारेऽपि—अजात्यरत्न-काचादौ गुणप्रकर्षाऽत्यन्ताभावः, प्रत्यक्ष एव, एष एव जातिस्वभावः, जातिस्वभावोऽनुल्लङ्घनीयो-ऽनुच्छेद्यो वर्त्तते इति नियमः, अत एव जातिस्वभाव एवासमानतायाः कारणमस्ति. कस्यामप्य-वस्थायां काचमण्यो र्भेद एवाऽवधारणीयः (परीक्षककरप्राप्तः काचः काचोमणिर्मणिः)

—आगमरूप—शब्दवचनप्रामाण्येन भेदसिद्धिः—

**प्रत्येकबुद्धादिवचनप्रामाण्यात्, तद्भेदानुपपत्तेः, न तुल्यभाजनतायां तद्भेदो न्याय्य इति, न चात एव मुक्तावपि विशेषः, कृत्स्नकर्मक्षयकार्यत्वात्, तस्य चाविशिष्टत्वात् ।**

पं०...'प्रत्येकबुद्धादिवचनप्रामाण्यात्' प्रत्येकबुद्धबुद्धबोधितस्वयंबुद्धादीनां पृथग्भिन्नस्वरूपाणां वचनानि—निरूपिका ध्वनयस्तेषां प्रामाण्यं—आप्तोपदिष्टत्वेनाभिधेयार्थाव्यभिचारित्वात्तस्मात्, अस्यैव व्यतिरेकेण समर्थनार्थमाह—'तद्भेदानुपपत्तेः' इहान्यथाशब्दाध्यारोपाद् अन्यथा तद्भेदानुपपत्तेरिति योज्यं, तद्भेदानुपपत्तिमेव भावयति—'न' नैव 'तुल्यभाजनतायां' तुल्ययोग्यतायां 'तद्भेदः' प्रत्येकबुद्धादिभेदो 'न्याय्यो' युक्तिसंगतः, 'इति' एवं सत्त्वभेदसिद्धौ, मुक्तावपि तद्भेदप्रसंग इति पराशङ्कापरिहारायाह—'न च' नैव 'अत एव' इह सत्त्वभेदसिद्धे-रेव हेतुतो 'मुक्तावपि' मोक्षेऽपि न केवलमिह 'विशेषो' भेदस्तत्रापि सत्त्वभावाभावात्, कुत इत्याह—'कृत्स्नकर्म-क्षयकार्यत्वात्' ज्ञानावरणादिनिखिलकर्मक्षयानन्तरभावित्वान्मुक्तेः, एवमपि किमित्याह—'तस्य च' कृत्स्नकर्म-क्षयस्य 'अविशिष्टत्वात्' सर्वमुक्तानामेकादृशत्वात्, तदेवार्थान्तरदर्शनेन भावयति—

टी०...प्रत्येकबुद्धस्य पृथक्स्वरूपं = सन्ध्यासमयजनितमेघवार्दलसत्करूपरंगादीन्द्रधनुरादि-रूपान्तरनिष्ठपरिवर्तनादीनि दृष्ट्वा तथाविधपदार्थानां तादृशानि रूपान्तराणि वा दृष्ट्वा, निमित्तं प्राप्य वैराग्यभावनाप्रकटनानन्तरं केवलज्ञानं प्राप्य कैवल्यं गतः प्रत्येकबुद्ध उच्यते.

बुद्धबोधितस्य पृथग्स्वरूपं = बुद्धा आचार्यादिकगुरवः, तैः बोधिताः–बोधं प्रापिता अर्थाद् गुर्वादीनामुपदेशेन संसारस्य स्वरूपमसारत्वेन भासते तदा वैराग्यभावनाप्रकटनेन केवलज्ञानं प्राप्य कैवल्यं गतो यः स बुद्धबोधित उच्यते, स्वयंबुद्धस्य पृथक्स्वरूपं = गुर्वादीनामुपदेशं विना तथाविधकर्मणां लघुत्वेन–कृशत्वेन किमपि निमित्तं विना स्वयमेव स्वतः संसारस्वरूपं सर्वथा निःसारं भासमानं वर्तते ततो वैराग्यभावनाप्रकटनेन केवलज्ञानं प्राप्य कैवल्यं प्राप्तो यः स स्वयंबुद्ध उच्यते.

अर्थात् पृथक् पृथग् भिन्नस्वरूपाणां प्रत्येकबुद्ध-बुद्धबोधितस्वयंबुद्धादीनां वाचकशब्दविशेषाणां प्रामाण्येन–परस्पराऽविरोधि–संवादेन, अर्थात् तीर्थंकरव्यक्तिश्च तीर्थंकरभिन्नप्रत्येकबुद्धादयो व्यक्तिविशेषा भिन्ना इति जिनागमरूपं, शास्त्रसिद्धं, वस्तु, वर्ततेऽत एव जात्यरत्नसमाः पुरुषोत्तमा अर्हन्तो भगवन्तः सन्ति, अजात्यरत्नसमाः प्रत्येकबुद्धादयो व्यक्तयः, एवमनुच्छिन्न–जातिस्वभावरूपयोग्यताकृतो भेदोऽसमानता वर्तते, व्यतिरेकपद्धत्या ज्ञापयति–अन्यथा–जात्यरत्नतीर्थंकरस्य चाजात्यरत्नसमप्रत्येकबुद्धादे भेदाभावे–समानस्वभावतायां शास्त्रसिद्धप्रत्येकबुद्धादिभेदस्तथा लौकिकव्यवहार–सिद्धाजात्यरत्नादे भेदः, युक्तिव्यवहारागमद्वारा, सिद्धोऽपि न्याययुक्तो न भवेदित्यापत्तिः, अत एव जात्यरत्नसमानपुरुषोत्तमानामर्हतां भगवतां चाजात्यरत्नसमान–प्रत्येकबुद्धादीनां मध्ये सर्वथाऽन्तरं–भेदोऽसमानत्वं प्रतिपत्तव्यमेव, एवं सत्त्वभेदसिद्धौ, पराशङ्कोदेति–इह संसारे पुरुषोत्तम–प्रत्येकबुद्ध–बुद्धबोधित–स्वयंबुद्धादयः सर्वे मिथो भिन्नस्वरूपत्वेन भिन्ना एव तदा मुक्तावपि तेषु भेदप्रसङ्गः–आपत्तिः कथं न ? इति पराशङ्का

तत्समाधानं सावच्छ्रूयताम् = अत एव-इह संसारे सत्त्वभेद–सिद्धेरेव हेतुतः–मुक्तावपि (न केवलमिह) निर्विशेषण–सत्त्वमात्रभावतो नैव भेदः तत्रासमानता–वैषम्यं वा कुत इत्याह–

ज्ञानवरणीयादिसकलकर्मणःक्षयाऽनन्तर–अव्यवहित–क्षणभाविनी कार्यरूपा मुक्तिरस्ति, अर्थाद्-मुक्तिरेषा सकलकर्ममात्रस्यक्षयाऽनन्तरभाविकार्यमस्ति, किञ्च तत्, क्षीणकर्मसु सर्वेषु सिद्धेषु जीवेषु, एकसमानता वर्तते, ततो भेदः कथं ? भेदकाभावात् ? यतः यादृशं कारणं तादृशं कार्यं (तज्जातीयादेव हेतोस्तज्जातीयं कार्यमुत्पद्यते इति परमार्थः) हेतौ वैशिष्ट्याभावः स्यात्तदा, कार्येऽपि वैशिष्ट्याभावः, यदि सकलकर्मक्षयरूपे कारणे काऽपि विशेषता वर्तेत, तदा सकलकर्मक्षयजनित-मुक्तिरूपकार्ये भेदः समापतेदेवं नास्त्यतो न भेदः ।

कारणभेदप्रयुक्तकार्यभेदोऽस्ति कारणभेदाभावे कार्यभेदाभावस्तत्र विषये दृष्टान्तः कथ्यते–

**दृष्टश्च दरिद्रेश्वरयोरप्यविशिष्टो मृत्युः, आयुःक्षयाविशेषात्, न चैतावता तयोः प्रागप्य-विशेषः, तदन्यहेतुविशेषात्, निदर्शनमात्रमेतदिति पुरुषोत्तमाः ।६। एते च बाह्यार्थसंवा-दिसत्यवादिभिः.**

पं०...'दृष्टश्च' उपलब्धश्च 'दरिद्रेश्वरयोरपि' पुरुषविशेषयोरपि, किं पुनरन्ययोरविशिष्टयोरित्य-पिशब्दार्थः, 'अविशिष्टः' एकरूपो 'मृत्युः' प्राणोपरमः, कुत इत्याह–'आयुःक्षयाविशेषाद्' आयुःक्षयस्य–प्राणो-परमकारणस्य अविशेषात्–अभेदात्, कारणविशेषपूर्वकश्च कार्यविशेष इति, तर्हि तयोः प्रागप्यविशेषो भविष्यती-त्याह–'न चैतावता' मृत्योरविशेषेण 'तयोः' दरिद्रेश्वरयोः 'प्रागपि' मृत्युकालाद् 'अविशेषः' उक्तरूपः, कुत इत्याह–'तदन्यहेतुविशेषात' तस्माद्–आयुः क्षयादन्ये ये विभवसत्त्वासत्त्वादयो हेतवस्तैर्विशेषात्–विशिष्टीकरणात्, निदर्श-नमात्रमेतदिति' क्षीणसर्वकर्म्मणां मुक्तानां क्षीणायुः कर्म्मांशविशेषाभ्यां दरिद्रेश्वराभ्यां 'न किञ्चित्साम्यं परमार्थत इति दृष्टान्तमात्रमिदमिति पुरुषोत्तमत्वसिद्धिः ॥ 'बाह्येत्यादि' सम्यक्शुभभावप्रवर्तकमितरनिवर्तकं च वचनं सत्यमसत्यं वा निश्चयतः सत्यं, तत्प्रतिषेधेन 'बाह्यार्थसंवादेव' अभिधेयार्थाव्यभिचारेण सत्यवादिभिर्व्यवहाररूपं सत्यं वक्तव्यमिति वदितुं शीलं येषां ते तथा तैः ।

टी०...दरिद्रश्चेश्वरश्च = दरिद्रेश्वरौ तयो र्दरिद्रेश्वरयोः, दरिद्रत्वविशेषणविशिष्ट–दरिद्रे–निर्धने, चेश्वरत्वविशेषणविशिष्टेश्वरे–धनवति, अपि = किं पुनरन्ययोरविशिष्टयोरित्यपि-शब्दार्थः, अविशिष्टो मृत्युर्दृष्टः, एकरूपः प्राणोपरमरूपप्राणवियोगः प्रत्यक्षप्रमाणसिद्धः, (जैनदर्शने प्राणैः सह विप्रयोगो मरणमुच्यते नान्यदिति) मृत्युरस्ति, यतः प्राणवियोगकारणभूतस्यायुःक्षयस्या-ऽविशेषरूपाभेदोऽस्ति, नियमोऽस्ति, यत्कारणविशेषपूर्वकश्च कार्यविशेषः कार्यविशेषं प्रति कारण-विशेषः कारणम्, कारणनिष्ठविशेषताप्रयुक्तकार्यनिष्ठविशेषता ज्ञेया, प्राणवियोगरूपमरणकारणायुः क्षयनिष्ठविशेषताऽभावप्रयुक्तः, मिथोविरुद्ध–दरिद्रेश्वरनिष्ठमृत्युनिष्ठविशेषताऽभावः, प्रत्यक्षप्रमाण-विषय एव । अन्यच्च

मृत्युनिष्ठविशेषाभावप्रयोजक–प्रयुक्तो, मृत्युकालात् प्रागपि, दरिद्रेश्वरयोः, अविशेषः–अभेदो नास्ति, अपि तु विशेषो–भेदोऽस्त्येव, यतस्तदन्य–हेतुविशेषोऽस्ति = आयुः क्षयादन्ये ये विभवसत्त्वा-सत्त्वादिहेतुजन्यविशेषो–विशिष्टीकरणं विद्यत एव,

निदर्शनमात्रमेतदिति = क्षीणसर्वकर्मणां मुक्तानां, क्षीणायुःकर्मांशविशेषाभ्यां, दरिद्रेश्वराभ्यां सह न किञ्चित्साम्यं परमार्थतोऽपितु कारणाभेदप्रयुक्तकार्याभेद–मात्र–दर्शनं, पर्याप्तमस्तीति, अंशतो दृष्टान्त–मात्रमिदमिति पुरुषोत्तमत्वसिद्धिः । सम्यग् (सर्वथा) शुभभावप्रवर्त्तकत्व-विशिष्टाशुभभाव-निवर्तकं वचनं व्यवहारतो–द्रव्यतः सत्यमसत्यं वा, निश्चयनयापेक्षया भावप्रधानत्वेन सत्यमेवेति. तत्प्रतिषेधद्वारा बाह्यपदार्थनिष्ठवाच्यार्थेन सहाविरोधित्वेन सर्वथा समञ्जससङ्गतसंवादवदेव व्यवहाररूपं सत्यं वाच्यमिति वादिभिः साङ्कृतनामकप्रवादिनां शिष्यैः साङ्कृत्यैः, सिंहपुण्डरीका-

द्विविधोपमा—सादृश्यमसत्यमस्तीति हेतुना, सर्वसादृश्यस्याभावेनोपमां विनैव वर्णनयोग्या अर्हन्तो भगवन्त इष्यन्ते यतो हीनेनोपमेयार्थात्-भगवतः पदार्थान्तरेणेव पदार्थेन सह, तथोपमेयार्थात्-अधिकेनोत्कृष्टपदार्थेन सहोपमा—तुलना, मृषा—मिथ्येति शास्त्रागमवचनं साक्षिकं वर्त्तते, एतत्साङ्कृत्यमतस्य खण्डनार्थं, अन्ययोगव्यवच्छेदकविशेषणपद्धत्या कथ्यते 'पुरुषसिंहेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः' इति.

**साङ्कृत्यैरुपमावैतथ्येन निरुपमस्तवार्हा एवेष्यन्ते 'हीनाधिकाभ्यामुपमा मृषेति' वचनात्, एतद्व्यवच्छेदार्थमाह—'पुरुषसिंहेभ्य' इति, पुरुषाः प्राग्व्यावर्णितनिरुक्तास्ते सिंहा इव प्रधानशौर्यादिगुणभावेन ख्याताः पुरुषसिंहाः ख्याताश्च कर्म्मशत्रून् प्रति शूरतया तदुच्छेदनं प्रति क्रौर्येण, क्रोधादीन् प्रति असहनतया, रागादीन् प्रति वीर्ययोगेन, तपः कर्म्म प्रति वीरतया, अवज्ञैषां परीषहेषु, न भयमुपसर्गेषु, न चिन्ताऽप्यौन्द्रियवर्गे, न खेदः संयमाध्वनि, निष्प्रकम्पता सद्ध्यान इति, न चैवमुपमा मृषा, तद्द्वारेण तत्त्वतः,**

पं०...'साङ्कृत्यैः' साङ्कृताभिधानप्रवादिशिष्यैः, 'उपमावैतथ्येन' सिंहपुण्डरीकादिसादृश्यालीकत्वेन 'निरुपमस्तवार्हा एव' सर्वासादृश्येन वर्णनयोग्या इष्यन्ते, कुत इत्याह—'हीनाधिकाभ्यां' हीनेनोपमेयार्थापेक्षयाऽधिकेन चोत्कृष्टेनोपमेयार्थादेव, 'उपमा' सादृश्यं, मृषा असत्या 'इतिवचनाद्' एवंप्रकारागमात्, न चैवमित्यादि' 'न च—नैवम्—उक्तप्रकारेणोपमा—सिंहसादृश्यलक्षणा मृषा—अलीका, कुत इत्याह—'तद्द्वारेण' सिंहोपमाद्वारेण 'तत्त्वतः' परमार्थमाश्रित्य, न शाब्दव्यवहारतः.

टी०...'पुरुषसिंहेभ्यो नमः' अत्र पुरुषसिंह—वाक्ये, उपमारूपोऽर्थालङ्कारो ज्ञेयः यत्र पदार्थद्वयमध्ये चमत्कारि सादृश्यं वर्णितं, स उपमालङ्कार उच्यते, अर्हन्तः पुरुषेषु सिंहपुण्डरीकादि—सदृशाः सन्ति' अत्रार्हन्तो वर्ण्यपदार्थत्वेनोपमेयाः कथ्यन्ते, यत एते सिंहादिना सह तोलिताः, यैः सह वर्ण्यपदार्थास्तोल्यन्ते तान्युपमानानि, यथा सिंहपुण्डरीकादीन्युपमानानि, उपमायाः पूर्णोपमालुप्तोपमाभेदमध्येऽत्र लुप्तोपमा ज्ञेया, यतः उपमेयोपमान—समानधर्म—उपमावाचकादिषु चतुर्षु मध्ये एकमपि न दत्तं भवेत् सा लुप्तोपमा कथ्यते. पूर्वोक्तपरार्थव्यसनादिविशेषणविशिष्टाः प्रधानपुरुषाः—अर्हन्तोभगवन्तः, प्रधानभूतशौर्यादिगुणानां विद्यमानत्वेन प्रकर्षेण ख्याता अत एव सिंहसदृशत्वेन पुरुषसिंहा उच्यन्ते, 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' सि. ३/१/१०२, सूत्रेणोपमेयवाचकपदस्योपमानवाचकै व्याघ्रसिंहाद्यैः सह कर्मधारयसमासो भवति. यदि साधारण (उपमानोपमेयोभयगत) धर्मवाचकपदशूरादेरुल्लेखो न भवेत्, अत्रोपमेयवाचकपदं (यद् वस्तु तोल्यते तदुपमेयं यथा पुरुषपुङ्गवा अर्हन्तो भगवन्त उपमेयाः) पूर्व—पदं भवेच्चोपमानवाचकपदं (यैः सह तोल्यते यद् वस्तु, तदुपमानं यथाऽत्र सिंहादीनि, उपमानानि) उत्तरपदं भवेत्तर्हि तयो द्वयोः पदयोः समासो भवति स कर्मधारयत्वेनोच्यतेऽर्थात् सिंहा इव सिंहाः पुरुषाः, पुरुषाश्च ते सिंहाश्च 'पुरुषसिंहा' इति

विग्रहो ज्ञेयः ।

तथाचैते पुरुषोत्तमाः सिंहा इव प्रधानभूत–शौर्यादि–गुणानां विद्यमानत्वेन ख्यातिमन्तः पुरुषसिंहाः, कथमिति चेत्, ख्याताश्च–

(१) कर्म्मशत्रून् प्रति शूरतया = पौद्गलिकादृष्टविशेषाख्येभ्यः सद्रूपाणि कर्माण्येवात्मविशेष-गुणादिशातनापेक्षया शत्रवः–आत्मस्था वैरिणस्ते उदिता, उदीरणया वाऽऽहूता–शूरतयाऽक्रान्तबल-वत्तयाऽऽभ्यन्तरयुद्धभूमावागता एव सत्त्वाविक्रमभरतास्तत–

(२) तेषां क्षयं–उच्छेदनं प्रति क्रौर्येण–गुणेन ख्याताः अर्थात्, क्रौर्येण–सामर्थ्ययोगेनाहूताः कर्मशत्रवः, भीमतायोगेनोच्छिन्नाः–क्षयं नीताः,

("अचण्डवीरवृत्तिना शमिना शमवर्त्तिना, त्वया काममकुट्यन्त कुटिलाः कर्मकण्टकाः ॥ रागादिषु नृशंसेन सर्वात्मसु कृपालुना, भीमकान्तगुणेनोच्चैः साम्राज्यं साधितं त्वया ॥ वी.स्तो.")

(३) क्रोधादीन् प्रति असहनतया ख्याताः = भावरूपक्रोधमानमायालोभादिकषायाणां क्षयाय क्षमाया अकरण–द्वारा अर्थादनादित आत्मनो घोरापराधिनः कषायाः कथं क्षन्तव्या भवेयुः, ते त्वात्मनोऽ-हितकारित्वेनान्तरङ्गारय एवात एव सर्वथा दण्डनीयत्वेन मनागपि दयापात्रता–रहिताः कषाया असहनतया गुणशक्तितः स्वात्मप्रदेशेभ्यो निष्काशिता अर्हद्भिस्तः सिंहा इवार्हन्तः ख्यायन्ते.

(४) रागादीन् प्रति वीर्ययोगेन ख्याताः = रागद्वेषमोहादिभावरूपशत्रून् प्रति वीर्यस्य–वीर्यान्त-रायकर्मक्षयादिजातशक्तिरूपानन्तबलस्य योगेन–व्यापारेणोपयोगेन ख्याताः–प्रसिद्धाः पुरुषोत्तमाः सिंहोपमा एवार्थात् तादृशवीर्यस्योपयोगं विना भवबीजाङ्कुरजनका रागादयः कथं क्षयं नेतुं शक्याः? रागादिभावशत्रून् प्रति वीर्ययोगेन ख्याता अर्हन्तः सिंहोपमा एव.

(५) तपः कर्म प्रति वीरतया ख्याताः = सकलकर्मक्षयसमर्थबाह्याभ्यन्तररूपतपःकर्म–तपश्चर्यारूप-दुष्करकार्यं प्रति वीरतया, अर्थादर्हन्तस्तपोवीरा इति प्रख्यातिं प्राप्ताः सन्ति. आत्मनिष्ठानन्तवीरताया एव सत्त्वे दुष्करतपःकर्मशक्यम्, वीरताया असत्त्वे तपःकर्माशक्यमेव, तपःकर्म प्रति, आत्मनिष्ठ-वीरतैव कारणम्, न शरीरमात्रबलं कारणम्, वीरा एव तपःकर्मणि समर्था अत एव वीरतारूप–महागुणगरिष्ठा अर्हन्तः कथ्यन्ते,

(६) अवज्ञैषां परीषहेषु = एषामर्हतां परीषहान् प्रत्यवज्ञैव–तिरस्कार एव विद्यतेऽर्थात् परीषहा इति किं नाम वस्तु ? परीषहाणां का शक्तिरस्माकं शक्तेरग्रत इति परीषहान् प्रति तिरस्कार–कारकत्वेन, ख्याता अर्हन्तः सन्ति. तथा च अवज्ञायाः सत्तायामेव परिषहसहनद्वारा परिषहोपरि जयः प्राप्यतेऽन्यथाऽवज्ञाया अभावे परीषहा जयवन्तो भवन्ति. परिषहान् जेतुमवज्ञैवामोघं महत्त्वम् प्रहरणं प्रसिद्धं, परिषहान् प्रत्यवज्ञाविशिष्टपुरुषाः पुरुषसिंहा एव ।

(७) न भयमुपसर्गेषु = एषामर्हतां, देवमनुष्यतिर्यगादिकृतेषूपसर्गेषु सत्सु न भयमर्थादुपसर्गेभ्यो न बिभ्यत्यर्हन्तः, "बीहंति न चेव जओ उवसग्गपरीषहणघोराणं वियरंति असंकमणा भन्नंति ततो पुरुषसीहा" तथा च भयस्य = परिणामचञ्चलतारूपस्य शरीरमनः सत्कचञ्चलतारूपस्याभाव एवोपसर्गाणां क्षमापूर्वकं सहनं शक्यम्, भयसत्तायामुपसर्गाणां साम्यपूर्वकं सहनमशक्यम्, उपसर्गान् प्रति निर्भयतानामकापूर्वगुणविशिष्टपुरुषा एव निर्विवादं पुरुषसिंहाः कथ्यन्ते.

(८) न चिन्ताऽपीन्द्रियवर्गे = एषामर्हतां स्व–स्व–विषयग्राहकेन्द्रियवर्गस्य स्वकीयस्य किं भविष्यतीति चिन्ताया–व्यग्रताया अत्यन्ताभावविशिष्टा अर्हन्तो भवन्ति, इन्द्रियवर्गचिन्तासत्त्वे स्वात्मस्वस्थता न भवति, इन्द्रियवर्गचिन्ताया असत्त्व एव परमात्मस्वास्थ्यमव्यग्रं भवति.

(९) न खेदः संयमाध्वनि = एषामर्हतां, संयममार्गे–प्रव्रज्यामार्गे प्रगतानामेषां न खेदः = प्रवृत्तौ परिश्रमो (निराशा–प्रमादो) नार्थात् सर्वसंगत्यागरूपप्रव्रज्यां निरतिचारतया पालयतामेषां कदाचिदपि न श्रमः शोको वा ग्लानिः–शैथिल्यं न भवति. अतोऽखिन्नतया संयममार्गे स्थिताः–पूर्णतां प्राप्ता अर्हन्तः सिंहोपमा एव.

(१०) निष्प्रकम्पता सद्ध्याने = एषामर्हतां, धर्म्यशुक्लोभयरूप–सत्–प्रशस्तध्यानेऽथवोत्पादव्ययध्रौव्यात्मकसद्–रूपपदार्थविषयक–ध्याने, सद्विषये एकप्रत्ययसन्ततिरूपे ध्याने निष्प्रकम्पता–मेरुचूलासमाननिश्चलता वर्तते तादृश–सद्विषयकध्याने निष्प्रकम्पतानामकगुणविशिष्टा अर्हन्तः सिंहोपमा एव अत्रैका कल्पना मदीया =

महापुरुषाणामेकाऽविकृतप्रकृतिरस्ति, यत् सर्वत्र सर्वतो गुणानां ग्रहणं कर्त्तव्यम् यदा सिंहादिषु स्वेतरावृत्तित्वविशिष्टा असाधारणाः शौर्यादयो गुणा दृष्टाः श्रुता वा ततोऽपि मया शौर्यादयो गुणा ग्राह्या इति निश्चयः कृतः, सिंहस्या गुणा असाधारण–शौर्यादय आत्मना मनसा गृहीतास्ततः स्वात्मसात् कृत्वा, प्रशस्ततमरूपत्वेन परिणामिता कर्मादिरागादिकान् प्रति प्रयुक्ता उपयुञ्जाना गुणग्रहण–दृष्टि--द्वारा परस्थान् गुणान् गृहीत्वाऽत्मनि, आत्मसात् कृत्वा तद्रूपा इव भूत्वाऽर्हन्तः प्रशस्तपरिणामतया परिणामिनो जगति परोपकारं कृत्वा स्वयं तीर्णाः परतारका अजायन्त. तथा च पूर्वोक्तगुणधर्मरूपसमानधर्मैः सिंहेन सह भगवतां कृतसादृश्यं-उपमा न मृषा–असत्या–अयथार्थाऽपितु सत्या–यथार्थैव, यतः सिंहोपमाद्वारेण–मार्गेण, तत्त्वतः–परमार्थापेक्षया, न तु शाब्दव्यवहारतः–शब्दप्रयोगरूपव्यवहारापेक्षया–शाब्दिकालङ्कारापेक्षया परन्तु वस्तुतः सत्याऽस्ति.

**तदसाधारणगुणाभिधानात्, विनेयविशेषानुग्रहार्थमेतत्, इत्थमेव केषाञ्चिदुक्तगुणप्रतिपत्तिदर्शनात्, चित्रो हि सत्त्वानां क्षयोपशमः, ततः कस्यचित्कथञ्चिदाशयशुद्धिभावात् ।**

पं०...'तदसाधारणगुणाभिधानात्' तेषां–भगवतामसाधारणाः–सिंहादौ क्वचिदन्यत्राप्रवृत्ता ये

गुणाः–शौर्यादयस्तेषामभिधानात्–प्रत्यायनात्, ननु तदसाधारणगुणाभिधायिन्युपायान्तरे सत्यपि किमर्थमित्थमुपन्यासः कृत इत्याह–'विनेयविशेषानुग्रहार्थमेतत्' विनेयविशेषाननुग्रहीतुमिदमुपन्यस्तं, एतदेव भावयति–'इत्थमेव' प्रकृतोपमोपन्यासेनैव 'केषाञ्चिद्' विनेयविशेषाणां 'उक्तगुणप्रतिपत्तिदर्शनात्' उक्तगुणा–असाधारणाः शौर्यादयस्तेषां प्रतीतिदर्शनात्, कुत एतदेवमित्याह–'चित्रो' नैकरूपो 'हिः' यस्मात् 'सत्त्वानां' प्राणिनां 'क्षयोपशमः' ज्ञानावरणादिकर्म्मणां क्षयविशेषलक्षणः 'ततः' क्षयोपशमवैचित्र्यात् 'कस्यचिद्' विनेयस्य 'कथञ्चित्' प्रकृतोपमोपन्यासादिना प्रकारेण 'आशयशुद्धिभावात्' चित्तप्रसादभावान्नैवमुपमा मृषा इति योगः, यदि नाम हीनोपमयाऽपि सिंहादिरूपया कस्यचिद्भगवद्गुणप्रतिपत्तिर्भवति, तथापि सा न सुंदरेत्याह–

टी०...कथमिति चेत् कथ्यते–भगवदर्हन्निष्ठाः स्ववृत्तित्वविशिष्टस्वेतरावृत्तिरूपा शौर्यादिरूपासाधारणा गुणाः (उपमानोपमेयगताः) तेषां प्रतीतिकारकत्वेन–निर्णायकत्वेनार्थाद् यथा शौर्यादयोऽसाधारणगुणा बाह्यजगति सिंहादिषु स्थितास्तथाऽऽभ्यन्तर–भागवतजगति भगवत्सु प्रत्यक्षतया स्थिताः सन्तीति सत्यनिर्णयकारकत्वेनोपमा सत्यैव. भगवन्निष्ठ–शौर्यादिरूपासाधारणगुणप्रत्यायकोपमाभिन्नसाधनान्तर (अन्यथानुपपत्ति–अर्थापत्ति–आप्तवचनादिरूप) सम्भवे कथं, उपमा, तदसाधारणगुणप्रत्यायकत्वेनाऽभिमतेति चेत् कथ्यते येषामुपायान्तरैरसाधारणगुणानां प्रतीतिर्न सम्भवति, केवलोपमा–मात्रेणैव प्रतीति र्भवति तेषां केषाञ्चिद् विनेयजनानामुपरि महानुग्रहं (तादृशशिष्येषु प्रभोरसाधारणगुणानां सम्बोधो भवत्वित्याकारकं) महोपकारमुद्दिश्योपमोपन्यासः कृतः, इत्थं कथमिति चेत्, उच्यते प्राणिनां ज्ञानावरणादिकर्मणां क्षयविशेषलक्षणः क्षयोपशमः, चित्रः–नैकरूपः, क्षयोपशमवैचित्र्यहेतुना विनेयजनस्य कस्यचित् कथञ्चित्–प्रकृतोपमोपन्यासादिप्रकारद्वारैव, चित्तस्याऽत्यन्तप्रसन्नता–निर्मलता भवति, अतोऽत्यन्तविशुद्ध–चित्तादर्शे भगवतामसाधारणशौर्यादिगुणानां प्रतिबिम्बपतनरूपेण विशिष्टप्रतीति र्भवति. अर्थान्नैवमुपमा मृषाऽपितु यथार्थैव, तथाविधपरोपकारगुणकारिकैव. यद्यपि हीनोपमयाऽपि सिंहादिरूपया केषाञ्चिद्भगवद्गुणप्रतिपत्तिर्भवतीति सत्यं तथापि सा सुन्दरा न प्रतिभातीति चेत् उच्यते–

**यथाभव्यं व्यापकश्चानुग्रहविधिः, उपकार्यात्प्रत्युपकारलिप्साऽभावेन महतां प्रवर्त्तनात्, महापुरुषप्रणीतश्चाधिकृतदण्डकः, आदिमुनिभिरर्हद्भिर्गणधरैः प्रणीतत्वाद्, अत एवैष महागम्भीरः, सकलन्यायाकरः भव्यप्रमोदहेतुः परमार्थरूपो निदर्शनमन्येषामिति, न्याय्यमेतद् यदुत 'पुरुषसिंहा इति ।' एते चाविरुद्धधर्म्माध्यासितवस्तुवादिभिः सुचारुशिष्यैः, विरुद्धोपमाऽयोगेनाभिन्नजातीयोपमार्हा एवाभ्युपगम्यन्ते, 'विरुद्धोपमायोगे तद्धर्मापत्त्या तदवस्तुत्व' मितिवचनाद् एतद्व्यपोहायाह–'पुरुषवरपुण्डरीकेभ्यः' इति, पुरुषाः पूर्ववत् ते वरपुण्डरीकाणीव,**

पं०...'यथाभव्यं' यो यथा भव्योऽनुग्रहीतुं, योग्यो, यथाभव्यं–योग्यतानुसारस्तेन 'व्यापकश्च' सर्वानुयायी पुनः 'अनुग्रहविधिः उपकारकरणं, अत्र हेतुः 'उपकार्याद्' उपक्रियमाणात्' प्रत्युपकारलिप्साऽभावेन'

उपकार्यं प्रतीत्योपकर्तुरनुग्रहकरणं प्रत्युपकारस्तत्र लिप्साऽभावेन-अभिलाषनिवृत्त्या 'महतां' सतां, प्रवर्तनात्, अत इत्थमेव केचिदनुगृह्णन्ते इत्येवमप्युपमाप्रवृत्तिरदुष्टेति 'परमार्थरूप' इति, परम्-प्रमाणभूतं यदार्ष-ऋषिप्रणीतं तद्रूपः, 'इति' इत्येवं पुरुषसिंहा इत्येतदुपमानं 'न्याय्यं' युक्तियुक्तं 'एते चेत्यादि' एते च पूर्वसूत्रोक्तगुणभाजोऽप्यभिन्नजातीयोपमार्हा एवेष्यन्ते इति योगः, कैरित्याह–अविरुद्धैः–एकजातीयैर्धर्मैः–स्वभावैरध्यासितं–आक्रान्तं वस्तु–उपमेयादि वदितुं शीलं येषां ते तथा तैः 'सुचारुशिष्यैः' प्रवादिविशेषान्तेवासिभिः,

'विरुद्धोपमाऽयोगेन' विरुद्धया–उपमेयापेक्षया विजातीयया: पुण्डरीकादिकया उपमाया:–उपमाद्वयायोगेन–अघटनेन, किमित्याह–'अभिन्नेत्यादि' अभिन्नजातीयाया एव भगवत्तुल्यमनुष्यान्तररूपाया उपमाया अर्हा–योग्या इष्यन्ते–अभ्युपगम्यन्ते, कुत इत्याह–विरुद्धोपमाया:-पुण्डरीकादिरूपाया:, योगे–सम्बन्धे, 'तद्धर्मापत्त्या' विजातीयोपमाधर्मापत्त्या, तस्य–उपमेयस्य–अर्हदादिलक्षणस्यावस्तुत्वं, तादृशधर्म्मिणो वस्तुनोऽसम्भवाद्, 'इति वचनादि' ति प्राग्वत्, न च वक्तव्यं–पूर्वसूत्रेणैवैतत्सूत्रव्यवच्छेदाभिप्रायस्य सिंहोपमया अपि विजातीयत्वेन [illegible] किमर्थमस्योपन्यास इति, तस्य निरुपमस्तव इत्येतावन्मात्रव्यवच्छेदकत्वेन चरितार्थस्य विवक्षितत्वात्,

टी०...यः पुरुषो येन प्रकारेण योग्यता–विशिष्टोऽस्ति, तत्रोपकार्ये तेन प्रकारेण, योग्यतामनुलक्ष्योपकारः कार्य इति उपकारविधे व्यापकता वर्त्ततेऽर्थादनुग्राह्यस्य यत्प्रकारावच्छिन्न–योग्यतां परीक्ष्य सकलजनानुग्रहानुग्रहविधिरस्तीति महानियमानुसारेण परोपकारव्यसनिनो महापुरुषा नैकरूपप्रकारविशिष्टपात्रेषु, एकया रीत्या नोपकुर्वन्ति परन्तु सर्वेषां पात्रताभेदेन भिन्नभिन्न–प्रकारेणोपकुर्वन्ति, एवं सकलजीवव्यापकोऽनुग्रहो विधीयते, तथा च पात्रताया अनुसारेण [illegible] प्रति उपकर्तुः [illegible] प्रत्युपकार–प्रतिफलप्राप्तेरभिलाषः प्रतिबन्धकोऽस्ति, यत उपकारकरणक्रियापश्चात् प्रतिफलाभिलाषः स्थितश्चेत्तदा योग्यतापूर्वको व्यापकोऽनुग्रहविधि प्रति, उपकार्यमुद्दिश्य प्रत्युपकारफलेच्छाया अभावः, प्रतिबन्धकाभावरूपेण कारणं मन्तव्यं, एवंरीत्या महापुरुषाणां प्रवृत्तिरस्ति, तथैव केषाञ्चित्तथाविधानुग्राह्याणामुपमामार्गेण भगवतामसाधारणशौर्यादिगुणानां प्रतीतिजनकत्वेन प्रत्युपकारनिरपेक्षाः सन्तः पात्रतापूर्वकव्यापकानुग्रहविधिमत्त्वात् ते स्तोतव्या अतस्तेषामुपमा–प्रवृत्तिरदुष्टैव–सत्याऽत एव सफला, किञ्चैतस्याधिकृतदण्डकस्य (शक्रस्तवस्य) प्रणयनं महापुरुषकर्तृकं वर्त्ततेऽर्थाद् यथाभव्यव्यापकानुग्रहविधि–विशिष्टस्य प्रत्युपकारनिरपेक्षस्य महापुरुषस्य प्रवृत्ति–[illegible] प्रणयनमस्ति अथ एतस्य शक्रस्तवस्य प्रणेतारः प्रथममुनिरूपा अर्हतामन्तेवासिनः–शिष्या [illegible] एव सन्ति,

[illegible] प्रथममुनिभिः शिष्यैः गणधरैः [illegible] प्रणीतस्तेन एषोऽधिकृतदण्डकः, महा[illegible]–सूत्रार्थाभ्यामत्यन्तागाधरूपः, विशालतमः, सकलन्यायानां–सकलयुक्तीनां सक[illegible]–[illegible] [illegible] भव्यानां–[illegible] परमार्थरूपः = परमं–प्रमाणभूतं यदार्षं–ऋषिप्रणीतं तद्रूपः, 'इति' इत्येवं 'पुरुषसिंह' इति पदघटकं [illegible] [illegible]

प्रतिपादनं न्याय्यमेव–युक्तियुक्तमेवेति.

शक्रस्तवस्याष्टमपदस्य विवरणम्–

एकतः सांकृत्याः सर्वथा, उपमां निषेधयन्ति, अन्यतः सुचारुशिष्या विजातीयोपमां निषेधयन्ति, समान-जातीयामुपमां च स्थापयन्ति, तदा 'पुरुषसिंहा' इति पदस्य निरूपणेन निपुणेन सांकृत्यमतं पूर्वं खण्डितम्, अधुना 'पुरुषपुण्डरीकाः' इति पदनिरूपणेन विजातीयोपमानिषेधकसुचारुशिष्यमतं दर्श-यित्वा स्वपक्षमंडनपूर्वकपरपक्षखण्डनं, अन्ययोगव्यवच्छेदकविशेषणपदनिरूपणं प्रकरोति.

सुचारुशिष्यमतम् = सजातीयधर्मस्वभावावच्छिन्नं, उपमेयादिवस्तुनोऽस्तित्वमस्तीति [illegible] सुचारुशिष्यमतं वर्त्ततेऽतः पूर्वसूत्रोक्तगुणभाजोऽपि, एतेऽर्हन्तो भगवन्तः सजातीयोपमायोग्या एवेष्यन्ते यत उपमेयापेक्षया पुण्डरीकादिरूपविजातीयोपमा न घटतेऽतो [illegible]–मनुष्यान्तररूपसमान-जातीयोपमा–योग्यत्वेन घटते, कथमिति चेत् पुण्डरीकादिरूप–विजातीयोपमायाः सम्बन्धे सति विजातीयोपमा–निष्ठधर्म–स्वभावानामापत्त्या–प्राप्त्या, आपादनेन वा अर्थात् पुण्डरीकादि[illegible]-भावपरिवर्तनेन–अर्हदादिलक्षणोपमेयस्याऽवस्तुत्वं स्यात् विजातीयोपमानधर्मत्वे उपमेयवस्तुनो-ऽसम्भवोऽस्ति. सजातीयधर्माऽवच्छिन्नं वस्तु सदेवातः सजातीयोपमा युक्ता, विजातीयधर्माऽवच्छिन्नं वस्तु, असदेवातो विजातीयोपमा युक्तिशून्येति.

(अत्रेदं विज्ञेयं 'पुरुषसिंहेभ्यः' इति वाक्येन 'निरुपमस्तवाही एते' इत्यकः सर्वथोपमानुपपत्तिः खण्डितः अत्र प्रस्तुते विरुद्धधर्मावच्छिन्नोपमानमसदिति [illegible]) सुचारु-शिष्यमतमथ खण्डयति = 'पुरुषवरपुण्डरीकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः' इति ।

अथ संसाररूपजलेन सह (रागादिक्लेशवासितमनोरूपेण, विषयकषायादिरूपेण संसारजलेन सह) असंग–निर्लेपतादिरूप–धर्मसमुदायेन पुरुषोत्तमा वरपुण्डरीकोत्तमकोटिकश्वेतकमलसमाः सन्ति तथाहि =

**संसारजलासङ्गादिना धर्मकलापेन पुरुषवरपुण्डरीकाणि, यथा पुण्डरीकाणि पङ्के जातानि जले वर्धितानि तदुभयं विहाय वर्तन्ते, प्रकृतिसुन्दराणि च भवन्ति; निवासो भुवनलक्ष्म्याः, आयतनं चक्षुरानन्दस्य, प्रवरगुणयोगतो विशिष्टतिर्यङ्नरामरैः सेव्यन्ते, सुखहेतूनि भवन्ति च, तथैतेऽपि भगवन्तः कर्मपङ्के जाताः दिव्यभोगजलेन वर्धिताः उभयं विहाय वर्त्तन्ते, सुन्दराश्चातिशययोगेन, निवासो गुणसम्पदः, हेतवो दर्शनाद्यानन्दस्य केवलादिगुणभावेन भव्यसत्त्वैः सेव्यन्ते, निर्वाणनिबन्धनं च जायन्त इति नैव भिन्नजा-तीयोपमायोगेऽप्यर्थतो विरोधाभावेन यथोचितबोधसम्भव इति; एकान्तेकस्वभावं च वस्तु, अन्यथा तत्त्वासिद्धेः,**

पं०...एकानेकस्वभावं, भकारः प्रकृतोपमाऽविरोधभावनासूचनार्थः, द्रव्यपर्यायरूपत्वात्, वस्तु जीवादि इति पक्षः, अत्र हेतुः–अन्यथा-एकानेकस्वभावत्वमन्तरेण तस्य-वस्तुनः तत्वं-वस्तुत्वं तस्यासिद्धेः, एतद्भावनायैवाह—

टी०...(१) यथा पुण्डरीकाणि–सिताम्भोजानि पङ्के–कर्दमे जातानि, जले वर्द्धितानि तदुभयं–पङ्कजले विहायतत्सङ्गं त्यक्त्वा, अलिप्तानि वर्त्तन्ते–वृत्तिमन्ति भवन्ति,

(२) 'प्रकृतिसुन्दराणि च भवन्ति' = च-तथा पुण्डरीकाणि प्रकृतितो-निसर्गतः, सुन्दराणि–प्रतिक्षणं नवीनतादर्शकानि मनोहराणि भवन्ति,

(३) पुण्डरीकाणि, 'निवासो भुवन (भवन) लक्ष्म्याः' = भवनलक्ष्म्याः (भवनपतिरूपलक्ष्म्या अथवा विशिष्टदिव्यकमलस्थितभवनोपलक्षितायाः तादृशभवननिवासिन्या लक्ष्म्याः) निवासः–स्थानविशेषः,

(४) पुण्डरीकाणि, 'आयतनं चक्षुराद्यानन्दस्य' = चक्षुर्मन आदेः (सौरभ–रसमुग्धभ्रमरादेः) अत्यन्तानन्द–हर्ष–प्रमोद–प्रसन्नताया निकेतनं,

(५) पुण्डरीकाणि,–'प्रवरगुणयोगतो विशिष्टतिर्यङ्नरामरैः सेव्यन्ते' = सरसत्वसुरभित्वसुन्दरतारूपप्रवरगुणानां सम्बन्धतो विशिष्टैस्तिर्यग्भिः, आस्वादननिवासादिभिः सेव्यन्ते, विशिष्टैर्नरैः मस्तकादिधारणशोभानिमित्तादि–प्रभुचरणादिस्थापनादिहेतुभिः सेव्यन्ते–उपयुज्यन्ते विशिष्टैर्देवैर्मुकुटादिधारणद्वारा क्रीडादिनिमित्तादिना, निवासादिना सेव्यन्ते–उपयुज्यन्ते,

(६) पुण्डरीकाणि, 'सुखहेतूनि भवन्ति च' = शरीरमनसोरनुकूलानुभवप्राप्तिरूपस्य–सुखस्य प्राप्तेर्हेतूनि, अर्थात् कुशलमंगलकारकाणि पुण्डरीकाणि भवन्ति,

उपमानगताः षट् साधर्म्यद्योतक–धर्मा निरूपितास्ततोऽनन्तरमुपमेयगताः षड्धर्माः समानताद्योतका निरूप्यन्ते =

(१) यथा जलासङ्गादिना धर्मकलापकेन पुण्डरीकाणि तथैतेऽपि–अर्हन्तो भगवन्तः समानधर्मकलापेनोपमितास्तथाहि = कर्मपङ्के (कामपङ्के जाताः इति ग्रन्थान्तरे) कर्माख्ये कामाख्येवा कर्दमे जाताः–उत्पन्नाः, दिव्येन (देवादिकृतत्वेन, अलौकिकत्वेन) भोगरूपेण जलेन वर्द्धिताः–वृद्धिमन्तः सञ्जाता अप्युभयं कर्म (काम) भोगोभयं विहाय = तुच्छत्वबुद्ध्या–दोषदृष्ट्या–निर्गुणत्वज्ञानेन त्यक्त्वा निर्लेपाः–रागादिसङ्गरहिताः सन्तो वर्तन्ते–प्रवृत्तिवृत्तिमन्तो भवन्तीति.

(२) 'सुन्दराश्चातिशययोगेन' = एतेऽर्हन्तो भगवन्तोऽतिशयानां योगेन (महापुण्यजन्यसहजातिशयचतुष्टयेन, कर्मक्षयजन्यैकादशातिशययोगेन, देवकृतैकोनविंशत्यतिशययोगेन) जन्मत आरभ्य सर्वश्रेष्ठ–सहजसौन्दर्य–रूपलावण्य–सौष्ठवादिजङ्गममूर्तिरूपा भवन्त्येवातएव नयनमनःपरमरमणीया एवेति,

(३) 'निवासो गुणसम्पदः' = सर्वोत्तमविनयविवेकदेवगुरुबहुमानशीलारोग्यमोक्षमार्गसङ्गमादिगुण-लक्ष्म्या निवासरूपा अर्हन्तो भगवन्तो भवन्त्येव,

(४) 'हेतवो दर्शनाद्यानन्दस्य' = नयनमानसादि दर्शकानामानन्दयन्ति, भव्यानां सम्यग्दर्शनादि-रूपात्मस्वभावलाभं दत्वाऽभूतपूर्वमानन्दं जनयन्ति, तथा दर्शननिष्ठतत्त्वज्ञानसाधनभूतप्ररूपणा—द्वारा (अर्थापेक्षया) गुणधरगणधरादीन् प्रमोदयन्त्येतेऽर्हन्तो भगवन्तः,

(५) केवलादिगुणभावेन भव्यसत्त्वैः सेव्यन्ते' = एतेऽर्हन्तो भगवन्तः स्वात्मगतकेवलज्ञानदर्शनानंतचा-रित्रवीर्य—तीर्थंकरत्व-लोकनाथत्वादिगुणानां—स्वभावानां भावं-सत्तां दृष्ट्वैव भव्यैरधिकारिभिर्जीवैः सेव्यन्ते, आराधनाया—उपासनाया—आज्ञापालनरूपपूजाया विषयीक्रियन्ते, सुरनरतिर्यगादयो भव्याः समवसरणाश्रिताः शरणाश्रिता देशनाश्रवणेन, ध्यानेन मनसा, स्तवनेन वचसा, पूजया-सेवया कायेन सर्वथाऽर्हतो भगवतो भजन्ते,

(६) 'निर्वाणनिबन्धनं च जायन्ते' इति = अखंडानन्तपरमपूर्णनित्यनिरतिशयपरमपुरुषार्थरूपनि-र्वाणपदस्य परमासाधारणपुष्टालम्बनाभिन्न—निबन्धनभूता अर्हन्तो भगवन्त एव भवन्ति, साक्षाद्वा परम्परया मोक्षस्य मौलिककारणभूतान्, अर्हतो भगवतो विना नान्ये भवन्तीति,

एवं च विशिष्टशिष्यजनं प्रति प्रभो लोकोत्तरगुणगणविषयकज्ञानसम्पादनद्वारोपकारकारिणी विजा-तीयोपमाऽस्ति, तथा च विजातीय उपमेये वरपुण्डरीकरूपविजातीयोपमाया योगे सत्यप्यर्थतोऽर्था-ऽपेक्षया. परमार्थतो विरोधाभावतः-वस्तुत्वसद्भावतोऽथवाऽर्थे उपमेयादिवस्तुनि वस्तुत्वरूपार्थोऽ विरुद्धो निर्दोषः सिद्धो विद्यतेऽर्थात् पुण्डरीकादिरूप विजातीयोपमाया योगे विजातीय उपमेये विजातीयोपमागतधर्माणा-मापत्तिरापत्स्यति. अत उपमेयभूतार्हदादिवस्तु, अवस्तु भविष्यतीति पूर्वोक्त—दोषस्यात्रासम्भवोऽस्ति. अथ वस्तुतत्त्वमीमांसा =

वस्तु, एकानेकस्वभावं, (द्रव्यपर्यायधर्मकं, सामान्यविशेषलक्षणं, अनन्तधर्मात्मकं) वस्तुनि, एका-नेकस्वभावाः—धर्माः सन्ति, यदि वस्तुनि, अनन्तधर्मा न मन्यन्ते तदा वस्तुनिष्ठवस्तुत्वस्याऽत्यन्ताभावः स्यादनुमानप्रयोगश्चेत्थं = जीवादिवस्तु, (पक्षः—धर्मी) एकानेकस्वभावं, (एकानेकस्वभावत्वं साध्यं) वस्तुत्वाऽन्यथानुपपत्तेः (वस्तुत्वान्यथानुपपत्तिः हेतुः-एकानेकस्वभावत्वमन्तरेण वस्तु-त्वमनुपपन्नं भवति) वस्तुत्वप्रकारं विनाऽन्यप्रकारेणैकानेकस्वभावत्वरूपवस्तुतत्त्वस्योपपत्ति नं भवति अत्रेदं बोध्यम् = अत्रानुमानेऽन्तर्व्याप्तिद्वारा साध्यसिद्धि र्भवति. अतः पूर्वोक्तहेतौ दृष्टान्तस्य—सपक्ष-स्यावश्यकत्वं नास्ति. "अन्तः—पक्षमध्ये व्याप्तिः—साधनस्य साध्याक्रान्तत्वमन्तर्व्याप्तिः, तयैव साध्यस्य गम्यस्य सिद्धेः प्रतीतेः अयमर्थः, अन्तर्व्याप्तेः साध्यसंसिद्धिशक्तौ बाह्यव्याप्ते र्वर्णनंवन्ध्यमेव साध्य-संसिद्धयशक्तौ बाह्यव्याप्तेर्वर्णनं व्यर्थमेव" यत्र दृष्टांत विनैव साध्यहेत्वो व्याप्ते र्ज्ञानं भवति, साऽन्तर्व्याप्तिः कथ्यते. प्रस्तुतपक्षे वर्तमानो हेतुः साध्येन सहितोऽस्ति, दृष्टान्तमन्तरेण पक्षान्तः-स्थेन हेतुना साध्यसिद्धिर्भवति, ततोऽत्र पक्षादतिरिक्तदृष्टान्त-द्वारा न किंचित्प्रयोजनं सिद्धयति, यद्वस्तु एकानेकस्वभावं नास्ति, तद्वस्तु नास्ति यथाऽऽकाश- कुसुमं, आकाशकुसुमे, अनन्तधर्माः

न सन्ति, अतस्तद्वस्तु नास्ति, एष हेतुः केवलव्यतिरेकी, यत्र यत्र साध्याभावस्तत्र तत्र साधनाभाव इति व्यतिरेक–व्याप्ति र्दर्शिताऽत्र. यतो यद् यद् वस्तु, अस्ति, तत्तदेकानेकत्वभावं, अत्राऽन्वय-व्याप्तौ दीयमानाः प्रत्येकदृष्टान्ताः–साधर्म्यदृष्टान्ताः, पक्षान्तरैव गर्भिता भवन्ति. अतोऽन्वयव्याप्तिरत्र न दर्शिताऽस्तीति ।

वस्तुस्वरूपनिर्णयस्य निपुणन्यायमुद्रापूर्वकमीमांसा :–

**सत्त्वामूर्त्तत्वचेतनत्वादिधर्म्मरहितस्य जीवत्वाद्ययोग इति न्यायमुद्रा, न सत्त्वमेवामूर्त्तत्वादि सर्वत्र तत्प्रसंगात्,**

पं०...'सत्त्वामूर्त्तत्वचेतनत्वादिधर्म्मरहितस्य' सत्त्वं–सत्प्रत्ययाभिधानकारित्वं, अमूर्त्तत्वं-रूपादि-रहितत्वं, चेतनत्वं-चैतन्यवत्त्वम् आदिशब्दात् प्रमेयत्वप्रदेशवत्वादिचित्रधर्म्मग्रहः, तै-रहितस्य-अविशिष्टीकृतस्य वस्तुनो 'जीवत्वाद्ययोगः' परस्परविभिन्नजीवत्वादिचित्ररूपाभावः, 'इति' एषा 'न्यायमुद्रा' युक्तिमर्यादा वर्त्तते, प्रज्ञाधनैरपि परैरुल्लङ्घितुमशक्यत्वात्, ननु सत्त्वरूपानतिक्रमादमूर्त्तत्वादीनां कथं सति सत्त्वे जीवत्वाद्ययोग इत्याशङ्क्याह–'न' नैव 'सत्त्वमेव' शुद्धसङ्ग्रहनयाभिमतं सत्तामात्रमेव, 'अमूर्त्तत्वादि-अमूर्तं (त्व) चैतन्यादि, जीवादिगतं, कुत इत्याह- सर्वत्र' सत्त्वे घटादौ 'तत्प्रसङ्गाद्' अमूर्त्तत्वचैतन्यादिप्राप्तेः, सत्त्वैकरूपात्सर्वथाऽव्यतिरेकात्, यदि मामैवं ततः किमित्याह—

टी०...सत्त्वं (इदं सदिदं सदित्याकारकानुगत–प्रतीतिकारकधर्मः, सत्शब्दप्रवृत्ति-निमित्तं सत्त्वं) चामूर्त्तत्वं (रूपादिरहितत्वं) चेतनत्वं च (चैतन्यवत्त्वं) आदिशब्दतः प्रमेयत्व–प्रदेशवत्त्वादिनानाविधधर्म–प्रकार–विशेषणैरहिते = शून्ये वस्तुनि, परस्परविभिन्न–भेदधर्म–युक्त–अजीवत्वभिन्नजीवत्वमूर्त्तत्वभिन्नामूर्त्तत्वरूपजीवत्वादिनानाविधधर्माभाव इति न्यायमुद्रा –युक्तिमर्यादा वर्त्तते. सत्त्वादिरूपानन्तधर्मविशिष्टे वस्तुनि जीवत्वादिनानाविधधर्मसम्बन्धो वर्त्तते इत्यन्वयव्यतिरेक–व्याप्तिरूपयुक्तिमर्यादा ज्ञेया, एषाऽबाध्या न्यायमुद्रा प्रतिभाधनैः परैरप्युल्लङ्घितुमशक्या. प्रकृतेऽत्र यत्र यत्र सत्त्वादिनानाधर्मवैशिष्ट्यं तत्र तत्र वस्तुत्वमथवा यद्यन्नानाधर्म-विशिष्टं तत्तद्वस्तु, इत्यन्वय–व्याप्तिः, यत्र यत्र सत्त्वादिनानाधर्मवैशिष्ट्यं नास्ति, तत्र तत्र वस्तुत्वं नास्ति, अथवा यद्यन्नानाधर्मविशिष्टं नास्ति, तत्तद्वस्तु नास्ति, इति व्यतिरेकव्याप्तिः,

तथा च सत्त्वामूर्त्तत्वचेतनत्वादि–अनेकधर्मावच्छिन्ने जीवपदार्थे जीवत्वादिरूपं वस्तुतत्त्व घटितं वर्त्तते, यः पूर्वं स्वगतजीवत्वादीन् नानाधर्मान् जीवपदार्थे निश्चित्य, अजीवपदार्थगतेनाजीवत्वादिना भेदं साधयति. अथवाऽजीवपदार्थे जीवत्वादिना भेदं साधयति. स्वगतभेदका जीवत्वादयो धर्माः सन्तीति मतेनैव जीवोऽजीवाद् भिन्नः, तद्भेदकजीवत्वेनैवेति सिद्धं स्यादन्यथा पदार्थैक्यापत्तिः स्यात्, यदि नानाधर्मविशिष्टो जीवादिः पदार्थो नास्तीति मान्यतायां, केवल–अविशिष्ट–शुद्धजीवादिपदार्थे जीवत्वादिरूपस्य पदार्थस्वरूपस्याऽसम्भवः, यथा सत्त्वचेतनत्वादिनानाधर्मशून्ये केवलजीवपदार्थे, अजीवत्वभेदसाधकजीवत्वादिधर्माणां शून्यत्वेन, जीवत्वारूपपदार्थस्वरूपाभावापत्तिः कथं न ? यत्स्वस्वरूपं नास्ति, यत्पररूपमस्ति, अजीवत्वादिकं, तस्य पररूपस्यापत्तिः कथं न ? यतो न कश्चिद् भेदकोऽस्ति, अर्थान्नानाधर्मविशिष्टजीवादिवस्तुन्येव जीवत्वादिरूपं नानास्वस्वरूपं घटते

एव मान्यत्र, नानाधर्मशून्यवस्तुमते जीवत्वादिनाभावस्तुस्वरूपं बाधितं भवतीति.

न च 'एकस्वभावं—सामान्यात्मकं वस्तु, नानेकस्वभावं वस्तु, अर्थाद् वस्तुनः स्वरूपमेकमेव सत्त्वं (सत्तारूपमहासामान्यं) वर्त्तते सत्त्वाऽनतिक्रामकाः सत्त्वाऽभिन्नाः सत्त्वमहाकुक्षिस्थिता अमूर्त्तत्वचेतनत्वाद्या अनेके धर्माः सन्ति, जीवादिवस्तुनि केवलं सत्त्वं विद्यमानमस्ति, तादृशमते—अमूर्त्तत्वचेतनत्वादिरहिते केवल—अविशिष्ट-जीवादिवस्तुनि सत्त्वाऽभिन्नजीवत्वादिरूपवस्तुस्वरूपस्याभावः, कथं? इति वाच्यम्, सर्वत्र तत्प्रसङ्गात् = शुद्धसंग्रहनयाभिमतं सत्तामात्रमेव [यद् वस्तुनः स्वरूपं सामान्यमस्तीति ग्रहणतत्पराध्यवसायविशेषः संग्रहनयः, वेदान्तिमतम्—अथवा नैगमादिनयद्वारा ज्ञातार्थसंग्रहकुशलाध्यवसायः संग्रहनयः, तथा चाशेषविशेषेषूदासीनः सत्तामात्रमेव शुद्धद्रव्यं मन्यमानः 'परसंग्रहः' यथा विश्वं विश्वमेकं सत् सद्रूपतावेक्षयाऽखिलं निश्वमेकमिति मन्यते. एवं चैकान्तेन सत्ताऽद्वैतं प्रतिपद्यमानोऽशेषान् विशेषान् निरस्यन् 'परसंग्रहाभासः' कथ्यते, सत्तैव तत्त्वमस्ति, यतः सत्तातः पृथग्—भूतानां विशेषाणामदर्शनं] जीवादिगतममूर्त्तत्वचेतनत्वादिकं वर्त्तते इति मतं न प्रामाणिकं यतः केवलसत्तामेव जीवादिगतचेतनत्वादिधर्मभिन्नत्वेन, महासामान्यं, विशेषधर्माऽभिन्नत्वेन. सामान्यधर्मविशेषधर्मयोरेकत्वेन सर्वथा मान्यतायां, सर्वत्र घटादिसमस्तवस्तुनि, अमूर्त्तत्वचेतनत्वादेः प्राप्तिरापत्ति र्वा स्यात्, तथाहि घटादिमूर्त्तपदार्थे सत्ताया विद्यमानत्वेनामूर्त्तत्वचेतनत्वादिधर्माणां प्राप्तिरापत्ति र्वा स्याद् यतोऽमूर्त्तत्वचेतनत्वादिना सह सर्वथाऽभिन्नसत्त्वरूपं वस्तुस्वरूपमेकं ध्रुवं विद्यत एवेति. तथैवामूर्त्तजीवादौ मूर्त्तत्वाचेतनत्वादि धर्माणां प्राप्तिरापत्ति र्वा भवेत्, यतस्तत्रापि मूर्त्तत्वादिना सह सर्वथाऽभिन्नसत्त्वैकरूपस्य वस्तुस्वरूपस्य विद्यमानत्वं. किञ्च सर्वे पदार्थाः केवलाभेदसम्बन्धेन सत्त्वैकरूपा इति मान्यतायां मूर्त्तघटादिपदार्थेषु प्रत्यक्षतोऽनुभूयमानमूर्त्तत्वाचेतनत्वाद्यानां धर्माणामभावे सत्येव तत्प्रतिपक्षभूतामूर्त्तजीवादिपदार्थेषु, अमूर्त्तत्वचेतनत्वाद्याना धर्माणामप्यभावः प्रसजति, तथा च लोकप्रतीति—बाधा (प्रतीतिव्यवहाराभ्यामर्थसिद्धिरिति न्यायेन लोके लोकेषु वा प्रतीयमान—मूर्त्तामूर्त्तेषु मूर्त्तत्वामूर्त्तत्वाचेतनत्वचेतनत्वादीनां सत्त्वभिन्नानां, सत्त्वैकरूपत्वमते बाधा प्रसज्येताऽतो लोकप्रतीतिबाधा न स्यादित्येवंरीत्या वर्त्तने, नानाधर्मविशिष्टं वस्तु प्रतिपत्तव्यमेव) अर्थादविशिष्टंकेवलसत्त्वं पूर्वोक्तचिन्त्यायुक्तिमुद्रयाऽमूर्त्तत्वादिरूपं न भवति परन्तु सत्त्वादिना धर्मविशिष्टं वस्तु वर्त्तते इति साधितं.

**एवं च मूर्त्तत्वाद्ययोगः, सत्त्वविशिष्टताऽपि न, विशेषणमन्तरेणातिप्रसङ्गाद्, एवं नाभिन्ननिमित्तत्वावृत्ते विरोध इति पुरुषवरपुण्डरीकाणि, ८ ।**

पं०...'एवं च' सत्त्वमात्राभ्युपगमे च 'मूर्त्तत्वाद्ययोगो' मूर्त्तत्वाचैतन्याद्यभावः, तदभावे च तत्प्रतिपक्षरूपत्वादमूर्त्तत्वादीनामप्यभावः प्रसजति, तथा च लोकप्रतीतिबाधा। अत्रैव मतान्तरं निरस्यन्नाह-'सत्त्वविशिष्टताऽपि न' विशिष्टं स्वपरपक्षव्यावृत्तं सत्त्वमपि बौद्धाभिमतं न—नैवामूर्त्तत्वादिरयनुवर्त्तते, अविशिष्ट सत्त्वं प्रागुक्तयुक्तेरमूर्त्तत्वादि न भवत्येवेत्यपि शब्दार्थः, कुत इत्याह-विशेषणं-भेदकमन्तरेण--विना 'अतिप्रसङ्गाद्' अतिव्याप्तेः

विशिष्टतायाः सत्त्वैकरूपे जीवे भेदकरूपान्तराभावे चेतनादिविशिष्टरूपकल्पनायामजीवेऽपि तत्कल्पनाप्राप्तेरिति, 'एवम्' एकस्वभावे वस्तुन्यनेकदोषोपनिपातेन विचित्ररूपवस्तुसिद्धौ न 'विरोधो' विजातीयोपमार्पितधर्म्मपरस्पर-निराकरणलक्षणो, विजातीयोपमायोगेऽपि किं सर्वथा ? नेत्याह 'अभिन्ननिमित्तत्वादृते' अभिन्ननिमित्तत्वं विना, यदि ह्येकस्मिन्नेवोपमेयवस्तुगते धर्म्मे निमित्ते, उपमा सदृशी विसदृशी च प्रयुज्यते, ततः स्यादपि विरोधो, न तु विसदृशधर्म्म- निमित्तासूपमास्वनेकास्वपि, पुरुषवरपुण्डरीकेत्यनेन सदृशी विसदृशी चोपमा सिद्धेति ।

टी...'विशेषात्मकं वस्तु' इति बौद्धमतं ज्ञेयम्, विशिष्टं–स्वपरपक्षव्यावृत्तं,

(१) येन परस्य व्यावृत्तिर्भेदः क्रियते सोऽपोहः कथ्यते. बौद्धस्तु, अत्यन्तव्यावृत्तपरस्परविलक्षणस्वलक्षणेषु, अनुवृत्तिप्रत्ययकारकं सामान्यं नाऽभ्युपैति, बौद्धमतमिदमस्ति, यद् यदाऽस्माकं किमपि शब्दज्ञानं भवति तदा तस्य शब्दस्य पदार्थस्यास्तित्वेन नास्तित्वेन द्विरूपेण भवति यथा यदाऽस्माकं गोशब्दस्य ज्ञानं भवति तदा यौगपद्येन गोरस्तित्वेन, गोभिन्नान्यसर्वपदार्थानां नास्तित्वेन रूपेण ज्ञानं भवत्यतो बौद्धानां मतेऽसद्व्यावृत्तिरपोह एव शब्दार्थः ।

(२) अतद्व्यावृत्तः–अपोहः । यथा विज्ञानवादि–बौद्धमते नीलत्वादिर्धर्मः, अनीलव्यावृत्तिरूपः (दि. १)तन्मतेऽयं धर्मोऽपारमार्थिक एवेति सर्वस्याऽपि विज्ञानरूपत्वं क्षणिकत्वं चेति च ज्ञेयम् । सत्त्वादिर्धर्मः, असद्व्यावृत्तिरूपः । बौद्धमतमीदृशमस्ति यत्–विशेषं त्यक्त्वाऽतिरिक्तं सामान्यं किमपि वस्तु नास्ति, सर्वक्षणिकपदार्थानां ज्ञानं तत्पदार्थगतासाधारणरूपेण भवति, ततः सर्वे पदार्थाः स्वलक्षणाः, अर्थात् पदार्थानां सामान्यरूपेण ज्ञानं न भवति, यदा पंचाङ्गुली–ज्ञानसमये पंचाङ्गुलीरूपं विशेषं त्यक्त्वा, अंगुलिस्वरूपाऽतिरिक्ता काऽपि जाति नं ज्ञायते, एवं गोज्ञानसमये गोनिष्ठ वर्णाकारादिरूपं विशेषज्ञानं परित्यज्य गोत्वरूपं भिन्नं सामान्यज्ञानं न भवत्यतो विशेषातिरिक्तं सामान्यं भिन्नं न मन्तव्यं यतो विशेषेष्वेव वस्तुनो लक्षणमर्थक्रियाकारित्वं सम्यक्तया घटते.

स्वतः सतः, परपक्ष–असत्पक्षव्यावृत्तं–अतद्व्यावृत्ति–असद्व्यावृत्तिरूपमपोहरूपं सत्त्वमपि बौद्धाभिमतं नैव, अमूर्तत्वं चेतनत्वादिरूपं भवति. यथाऽविशिष्टं सत्त्वं पूर्वोक्तयुक्तेरमूर्तत्वादि न भवत्येव तथेदमपि विशिष्टं सत्त्वं ज्ञेयं–कथमिति चेत्. कथ्यते–विशेषणं (अत्र व्युत्पत्तिः–विशिष्यते भिद्यतेऽनेन (ल्युट्) इति विशेषणं–भेदकं व्यावर्तकम्) भेदकं, भेद–व्यावृत्तिकारकं विनाऽतिप्रसङ्गः–अतिव्याप्ति भवति तथाहि = विशिष्टतैव सत्त्वं, सत्त्वमेव विशिष्टता–विशेषः अर्थाद् विशेषाऽभिन्नसत्त्वैकरूपे सति व्यक्ति–जीवे शुद्धे भेदक–विशेषणरूपाऽन्तराऽभावे–अन्यभेदकमात्राभावे सति चेतनत्वादि–विशिष्टरूपा कल्पना–मान्यता, यथा वर्तत तथाऽजीवेऽपि भेदकान्तराभाव–प्रयुक्ता चेतनत्वादि–विशिष्टरूपा कल्पना–मान्यता आपतिष्यति, अर्थादेवमेष महानतिप्रसङ्गः दुर्निवारोपि महाऽनिष्टरूपोऽस्ति, अर्थाद् यथा चेतनादिविशिष्टो जीवोऽस्ति, तथा भेदकान्तराभावप्रयुक्तः चेतना–विशिष्टोऽजीवोऽपि, स्यादित्यापत्तिनदी महादुस्तरा भवेदिति. तथा च सर्वथा एकान्तेन वस्तुनः

स्वरूपं सामान्यमेकं सत्त्वं नास्ति, तथैकान्तेन विशेषव्यक्ति–विशिष्टतारूपमनेकं नास्ति, परन्तु, एकानेकस्वभावं वस्तु इति सिद्धमेव.

एवं–एकस्वभावे सामान्यात्मके वा विशेषात्मके वा वस्तुनि, अनेकदोषापत्तिसम्भवेन विचित्ररूपे –सामान्यविशेषात्मकेऽनन्तधर्मावच्छिन्ने वस्तुनि सिद्धे, विजातीययोपमया–पुंडरीकादिरूपविरुद्ध-जातीयोपमानेन, अर्पित–संक्रान्त–परस्परपरिवर्तित–धर्माणां परस्परनिराकरणरूपो = परस्परधर्म-परिवर्तनरूपनिराकरणरूपो, विरोधो न–अर्थात् पुंडरीकोपमानं, उपमेयभूतोऽर्हन्, एवं उपमानोप-मेयगतधर्माणां, उपमाद्वारा, परस्परसंक्रान्तिभवनेन, उपमानोपमेययो र्द्वयो र्नियतधर्माणां लोपः –अभावो भविष्यति, एवंरूपो यो विरोधो दर्शितः स नास्ति, यतोऽभिन्ननिमित्तत्वस्याभावो वर्त्तते, निमित्तमेकमभिन्नं नास्ति, परन्तु अनेकानि-भिन्नभिन्ननिमित्तानि वर्त्तन्ते तथाहि-यदि, उपमेयवस्तुगते, एकस्मिन्नेवाभिन्न एव धर्मे निमित्ते सति, सजातीयाया वा विजातीयाया वोपमायाः प्रयोगः कृतः स्यात्तदा ततः पूर्वोक्तो मिथो धर्मसङ्क्रांति–द्वारा परस्परधर्माभावरूपो विरोधः सञ्जायेत, परन्तु विसदृशा (उपमेयगतैकाभिन्नैकसमाना, नापितु) अनेके भिन्ना धर्मा यत्र निमित्तभूताः सन्ती-दृश्योऽनेका उपमाः (सजातीया वा विजातीया वा) सन्तु, तथापि पूर्वोक्तो मिथो धर्माभावरूप-विरोधलेशोऽपि न सम्भवतीति.

एवं शक्रस्तवस्याष्टमपदव्याख्यायाः समाप्तिः ॥

**एते च यथोत्तरं गुणक्रमाभिधानवादिभिः सुरगुरुविनेयैर्हीनगुणोपमायोग एवाधिकगुणोप-माहां इष्यन्ते,**

पं०...'यथोत्तरमित्यादि' यथोत्तरं गुणानां–पुरुषार्थोपयोगिजीवाजीवधर्म्माणां गुणस्थानकानामिव क्रम उत्तरोत्तरप्रकर्षलक्षणस्तेनाभिधानं–भणनं वदन्तीत्येवंशीलास्तैः 'सुरगुरुविनेयैः' बृहस्पतिशिष्यैः हीनगुणोपमा-योग एव' हीनगुणोपमयोपमित एव गुणे हीनगुण इत्यर्थः 'अधिकगुणोपमार्हा इष्यन्ते' अधिकगुणोपमोपन्यासेना-धिको गुण उपमातुं युक्त इत्यर्थः, तथाहि-गन्धगजोपमाया महाप्रभावशक्रादिपुरुषमात्रसाध्ये मारीतिदुर्भिक्षाद्युपद्रव-निवर्त्तकत्वे भगवद्विहारस्य साधिते पुण्डरीकोपमया भुवनाद्भुतभूता अतिशयसम्पत्–केवलज्ञानश्रीप्रभृतयो निर्वाण-प्राप्तिपर्यवसाना गुणा भगवतामुपमातुं युक्ता इति, कुत इत्याह–

टी०...किञ्चैते–अर्हन्तो भगवन्तो विशेष्यरूपाः, यथोत्तरं-उत्तरं–अग्रगमपेक्ष्य गुणानां-पुरुषार्थोपयोगित्वेन गुणरूपजीवाजीवधर्माणां गुणस्थानकानामिव हीनगुणानां पृष्ठगं स्थानं ततोऽधि-कगुणानामग्रगं स्थानमित्येवं पूर्वानुपूर्वीक्रमेण, (मिथ्यात्व–सास्वादन–मिश्र–विरति-देशविरति-प्रमत्त –अप्रमत्त–निवृत्ति–अनिवृत्ति–सूक्ष्मसम्पराय–उपशान्त–क्षीणमोह–सयोगिकेवलि–अयोगिकेवलि नामकचतुर्दशगुणस्थानकानां) यथाक्रमः–उत्तरोत्तर–प्रकर्षरूपो विद्यते तथा गुणानां क्रमिकवृद्धि-

रूपविकासस्य नियमोऽस्ति तर्हि तथा तन्निरूपणस्यापि तादृशः क्रमनियमः कर्त्तव्य इति वादिनो बृहस्पतिशिष्या मन्यन्ते, तै र्बृहस्पतिशिष्यैः, हीनगुणोपमायोग एवाधिकगुणोपमार्हा इष्यन्ते, अर्थात्, गुणापेक्षया हीनगुणवत्योपमया सह पूर्वं उपमेयं–उपमेयगतहीनगुण–धर्मं, उपमित्य–तोलयित्वा, पश्चात्–अधिकगुणवत्या उपमाया उपन्यासद्वारोपमेयगतोऽधिको गुण उपमातुं युक्त एवेदृशः क्रम-नियमोऽस्ति, तथाहि प्रकृते पूर्वं गन्धगजरूपया हीनगुणवत्योपमया, उपमेयगतं कथं हीनगुणवत्त्व ? इति चेत् कथ्यते महाप्रभावशालिना शक्रादिपुरुषमात्रेण मारीतिदुर्भिक्षाद्युपद्रवाणां निवृत्तिः साध्य-तेऽतो हीनगुणवतो भगवद्विहारस्य साधिते सति–सिद्धेरनन्तरमधिकगुणवत्या (शक्रादिपुरुषमात्रा साध्यया) पुण्डरीकोपमया सह-भुवनाद्भुतभूताः,–त्रिजगदाश्चर्यकल्पाऽतिशयसम्पत्-सर्वातिशयसमृद्धि –केवलज्ञानश्रीप्रभृतयो निर्वाणप्राप्तिपर्यवसानाः–मोक्षप्राप्तिपर्यन्ता गुणा भगवतामुपमातुं युक्ताः, तथा च बृहस्पतिशिष्याः, पूर्वमर्हतो भगवतो हीनगुणोपमया (गन्धहस्तिरूपोपमया) स्तुत्वा पश्चाद्, अधिकगुणवत्योपमया (पुण्डरीकादिरूपोपमया) अर्हन्तो भगवन्तः स्तोतव्या इति मन्यन्ते, यतः पूर्वानुपूर्वीवाच्यवाचकक्रमयुक्तं सदिति मते सति वाचकशब्दक्रमस्य–परिपाट्या व्यत्ययेन-वैपरीत्येन, वाच्यमपि (अर्थोऽपि) वाचकवत् परिपाटीशून्यं–क्रमरहितं भवेदित्यापत्तिः, एवं क्रमशून्यत्वेन वस्तु, असत्, पूर्वानुपूर्वी–विशिष्टवाच्यवाचकक्रमयुक्तं वस्तु सत्, पूर्वानुपूर्वी–विशिष्टवाच्यवाचक-क्रमरहितं वस्तु असत्, अत्र साक्षिकं वचोऽस्ति, यत्, 'अक्रमवदसत्' इति परिपाटिरहितं वस्तु अविद्यमानं, क्रमेण वृत्तं (भूतं–वृत्तिमत्) जन्मोत्पत्ति र्यस्य, तस्य–क्रमवृत्तजन्मनोऽर्थस्याक्रमोवतौ सत्यां क्रमरूपेणार्थस्य स्थितेरभावेन, अभिधेयत्वेनाभिधेयस्या–सत्त्वमापद्यतेति, पूर्वोक्तबृहस्पति-शिष्यमतस्य निरासायान्ययोगव्यवच्छेदक–विशेषणपद्धत्या कथयति 'पुरुषवरगन्धहस्तिभ्योऽर्हद्भ्यो भगवद्भ्यो नमः' पूर्वकथितस्वरूपाः–पुरुषोत्तमा वरगन्धहस्तिन इव गजेन्द्रा इव क्षुद्रगजनिराकरणा-दिरूपधर्मसमानतया अर्हन्तो भगवन्तः पुरुषवरगन्धहस्तिन उच्यन्ते उपमानोपमेयगतसमानधर्मस्य समन्वयः = यथा गन्धहस्तिनामक एकप्रकारक उत्तमो हस्ती वर्त्तते, यस्य कुम्भस्थलतः सुरभि-सुगन्धमयो मदः (दानं) क्षरति, हस्तिहस्तेभ्य एतादृशो हस्ती क्वचित् कश्चिल्लभ्यते, एष यत्र गच्छति तत्रैतस्य मदस्य तीव्रगन्धवासनाहेतुना प्रत्यभिज्ञायते, अन्यच्चात एव क्षुद्राः–सामान्य –कोटिका हस्तिनो गजेन्द्रागमनमात्रेण भज्यन्ते, स्थानान्तरे पलायन्ते, तत्र न तिष्ठन्ति, ।।

पञ्चविंशत्यधिके योजनशते, उपद्रवगजाः सर्व एव पलायन्ते तत्रोपद्रव–गजानां वर्णनं चेत्थम् =

(१) पूर्वोत्पन्ना रोगाः–व्याधयोऽञ्जसा भगवद्विहारपवनगन्धेन विलीयन्ते.

(२) भगवद्विहारभूमौ धान्यादिहानिकारका मूषकशलभशुकाद्या नाविर्भवन्तीतिनामक उपद्रवो विलीयते.

(३) यत्र भगवान् विहरति तत्र भूमौ स्त्री-क्षेत्र-ग्रामादिहेतुजन्यो वैराग्निः–विरोधानलः प्रशाम्यति. मिथो वैर–विरोधरूप उपद्रवो गच्छतीति.

(४) अशेषाशिवोच्छेदडिण्डिम–समे भगवतां प्रभावे भुवि भ्राम्यति सति दुष्टव्यन्तरशाकिनीप्रभृति-कारणजन्या भुवनारयो मारयो न सम्भवन्ति अर्थाज्जगतः कालसदृशा जीवितापहारिणो रोगोपद्रवा न प्रभवन्ति.

(५) विश्वैकवत्सले लोक–मनोवाञ्छितपूरके भगवति विहरति सति, अतिवृष्टिरवृष्टि र्वा (अनावृष्टिः) या जनतोपतापकारिणी सा न प्रभवति.

(६) भगवतां प्रभावात् स्वराष्ट्रपरराष्ट्रजन्या ये क्षुद्रोपद्रवास्ते द्रुतं विद्रवन्ति.

(७) सर्वाद्भुतप्रभावसम्पन्ने जङगमकल्पवृक्षसमाने भगवति पृथ्वीतले विहरति सति जगद्भयङकरदुःखदायकं दुर्भिक्षं क्षीयते एवेति.

एते सर्वे एवोपद्रवगजा अचिन्त्यतीर्थंकरनामकमहापुण्य–सम्पूर्णपुण्यानुबन्धिपुण्योदयप्रभावतो भगद्विहार–पवनगन्धमात्रेण भज्यन्ते–पलायन्ते, एषोऽपायापगमातिशयः कर्मघातजन्यैकादशातिशय–मध्ये गण्यतेऽर्थात् सर्वज्ञताप्राप्त्यनन्तरमेषोऽतिशयः प्रादुर्भवतीति. अत एषोपमा न हीनगुणा अपित्वधिक गुणा भासतेऽतः क्रमभङगः कथं ? हीनगुणत्वे उपमायां शक्रादिपुरुषमात्रसाध्योपद्रव–निवृत्तिः कथिता तदपि न, यतः शक्रादिषु शक्तिर्दर्शिता न तु कदाचिदुपयोगितेति ज्ञेयम्. अथवा वाचकशब्दक्रमव्यत्ययो नास्तीति वर्णनम् = एकानेकस्वभावं वस्तु, अर्थाद् द्रव्यतयैकोऽनेकःस्वपर्यायतया स्वभावः –रूपं यस्य तत्-एकानेकस्वभाववत् वस्तु कथ्यते, एतादृशवस्तुनः स्वभावत्वहेतुनाऽधिकगुणोपमायोगे हीनगुणोपन्यासेऽपि वाचकशब्दक्रमव्यत्ययरूपो भङगो नैव भवति कथमिति चेत् कथ्यते तथाहि = यथा स्वं–स्वपदार्थापेक्षया स्वस्वपदार्थवृत्तयः सर्वे स्वस्वपर्यायाः–गुणा वा स्वस्वपदार्थे संसर्गसम्बन्धेन मिथः संवलिताः–शबलिता–मिश्रिता भवन्ति, अर्थाज्जीवगताः सर्वे स्वगुणाः–पर्यायाः जीवरूपैकाधिकरणाऽवच्छेदेन संसर्गरूपेण मिथः संवलिताः सन्ति, तथाऽजीवगताः सर्वे स्वपर्यायाः, अजीवरूपस्वाधिकरणाऽवच्छेदेन मिथो मिश्रिता एव, एवं स्वस्वपदार्थरूपाऽधिकरणाऽवछेदेनाऽवच्छिन्ना मिथः संसर्गरूपसम्बन्धाऽवच्छिन्नाः सर्वे स्वपर्यायाः सन्ति । किञ्च तेषां स्वस्वपदार्थनिष्ठानां सर्वेषां गुणानां पर्यायाणां च स्वभावः, व्यवहारनयमतपूर्वानुपूर्वी–पश्चानुपूर्वी–अनानुपूर्वीक्रमतः (पद्धत्या –प्रणालिकया) सर्वपदार्थगतसर्वगुणपर्यायाणा वचनविषय–वाच्यभावे–वाच्यत्वे परिणमन–परिणतिमत्स्वभावो वर्ततेऽतो गुणानां पर्यायाणां वा मिथः संसृष्ट–संवलितरूपत्वे सत्येव निश्चित–पूर्वानुपूर्व्यादिरूपक्रमादे र्मध्यात्कस्यचिदेकस्याभावो वर्ततेऽन्यथा–पूर्वानुपूर्व्यादिक्रमादिभिः, अनभिधेय –अकथनीय स्वभाववन्तो गुणाः सन्तीति मते पूर्वानुपूर्व्यादिक्रमद्वारा, वाचकशब्दानां प्रवृत्तेरभावः

स्यात्, अतः पूर्वानुपूर्व्यादिक्रम–प्रणालिकामते, अभिधानक्रमाभावो (वाचकशब्दपरिपाटिव्यत्ययः) न भावी, परन्तु, अभिधानक्रमः (वाच्यवाचकक्रमः) समञ्जसरीत्या घटमानो भविष्यति, अत्रैतादृशो नियमोऽस्ति, तथाहि–अभिधानव्यवहारः (शब्दप्रयोगः–कथनप्रवृत्तिः) अभिधेयतया परिणत्यपेक्षावान् भवति, अर्थाद् यादृश्या यादृश्या, अभिधेयतया (कथनस्य शब्दस्य विषयतया) अभिधेयस्य (अभिधानविषयगुणपर्यायरूपवाच्यार्थस्य) परिणतिरस्ति, तादृशीं परिणतिमपेक्ष्य = एतद्वाचकं –(कथनं शब्दोवा) कस्मिन्नर्थे गुणपर्यायात्मके परिणतिः–शक्तिग्रहोऽस्ति, तादृशीं पदार्थपरिणतिं शक्तिग्रहमपेक्ष्य शब्दव्यवहारः प्रवर्त्तते (अर्थं बुद्ध्वा शब्दरचनेति न्यायोऽत्र घटनीयः)

**अभिधानक्रमाभावेऽभिधेयमपि तथा, 'अक्रमवदसदिति' वचनात्, एतन्निरासायाह–'पुरुषवरगन्धहस्तिभ्य इति', पुरुषाः पूर्ववदेव, ते वरगन्धहस्तिन इव गजेन्द्रा इव क्षुद्रगजनिराकरणादिना धर्म्मसाम्येन पुरुषवरगन्धहस्तिनः, यथा गन्धहस्तिनां गन्धेनैव तद्देशविहारिणः क्षुद्रशेषगजा भज्यन्ते, तद्वदेतेऽपि, परचक्रदुर्भिक्षमारिप्रभृतयः सर्व एवोपद्रवगजा –अचिन्त्यपुण्यानुभावतो भगवद्विहारपवनगन्धादेव भज्यन्त इति, न चैकानेकस्वभावत्वे वस्तुन एवमप्यभिधानक्रमाभावः, सर्वगुणानामन्योऽन्यसंवलितत्वात्, पूर्वानुपूर्व्याद्यभिधेयस्वभावत्वात्, अन्यथा तथाऽभिधानाप्रवृत्तेः, नैवमभिधेयमपि तथाऽक्रमवदसदित्युक्तवद्, अक्रमस्वासिद्धेः, क्रमाक्रमव्यवस्थाभ्युपगमाच्च, अन्यथा न वस्तुनिबन्धना, शब्दप्रवृत्तिरिति स्तवचौर्यर्थ्यमेव, ततश्चान्धकारनृत्तानुकारी प्रयास इति, पुरुषवरगन्धहस्तिन इति ६। एवं पुरुषोत्तमसिंहपुण्डरीकगन्धहस्तिधर्म्मातिशययोगत एव, एकान्तेनादिमध्यावसानेषु स्तोतव्यसम्पत्सिद्धिरिति स्तोतव्यसम्पद एवासाधारणरूपा हेतुसम्पदिति ३।**

पं०...'अभिधानक्रमाभावे' वाचकध्वनिपरिपाटिव्यत्यये 'अभिधेयमपि' वाच्यमपि 'तथा' अभिधानवद्, 'अक्रमवत्' परिपाटिरहितम् 'असत्' अविद्यमानं, क्रमवृत्तजन्मनोऽभिधेयस्याक्रमोक्तौ' तद्रूपेणास्थितत्वात् न चेत्यादि' न च–नैवैकानेकस्वभावत्वे–एको द्रव्यतयाऽनेकश्च पर्यायरूपतया स्वभावः–रूपं यस्य तत्तथा तद्भावस्तत्त्वं तस्मिन्, 'वस्तुनः' पदार्थस्य 'एवमपि' अधिकगुणोपमायोगे हीनगुणोपमोपन्यासेऽपि 'अभिधानक्रमाभावो' वाचकशब्दपरिपाटिव्यत्ययः, कुत इत्याह—

'सर्वगुणानां' यथास्वं जीवाजीवगतसर्वपर्यायाणाम् 'अन्योऽन्यं' परस्परं 'संवलितत्वात्' संसृष्टरूपत्वात्, किमित्याह –'पूर्वानुपूर्व्याद्यभिधेयस्वभावत्वात्' पूर्वानुपूर्व्यादिभिः–व्यवहारनयमतादिभिरादिशब्दात् पश्चानुपूर्व्यनानुपूर्वीग्रहः अभिधेयः-अभिधानविषयभावपरिणतिमान् स्वभावो येषां ते, तथास्तद्भावस्तत्त्वं तस्मात्, संवलितरूपत्वे हि गुणानां

निश्चितस्य क्रमादेरेकस्य कस्यचिदभावात्, व्यतिरेकमाह–'अन्यथा' पूर्व्वानुपूर्व्यादिभिरनभिधेयस्वभावतायां गुणानां 'तथा' पूर्व्वानुपूर्व्यादिक्रमेण 'अभिधानाप्रवृत्तेः' 'अभिधायकानां ध्वनीनामप्रवृत्तेर्नैवमप्यभिधानक्रमाभाव इति योगः, अभिधेयतया परिणत्यपेक्षो ह्यभिधानव्यवहारः, किं सिद्धमित्याह, न–नैवैवम्–अभिधानन्यायेनाभिधेयमपि तथा–अक्रमवदसदिति परोपन्यस्तं, कुत इत्याह–'उक्तवत्' प्रतिपादितनीत्या,

'अक्रमवत्त्वासिद्धेः' अभिधानक्रमाक्षिप्तस्य क्रमवतोऽभिधेयस्य क्रमोत्क्रमादिना प्रकारेणाभिधानार्हस्वभावपरिणतिमत्त्वात्सर्वथा क्रमरहितत्वासिद्धेः, एवमभिधेयपरिणतिमपेक्ष्याभिधानद्वारेण गुणानां क्रमाक्रमावुक्तौ, इदानीं स्वभावत एवाभिधातुमाह–'क्रमाक्रमव्यवस्थाभ्युपगमाच्च' क्रमेणाक्रमेण च सामान्येन हीनादिगुणानां गुणिनि जीवादौ व्यवस्थायाः–विशिष्टाया अवस्थायाः स्वरूपलाभलक्षणाया अभ्युपगमात्–अङ्गीकरणात्स्याद्वादिभिः, चकारः पूर्व्वयुक्त्यपेक्षया समुच्चयार्थः, नाभिधेयमपि तथाऽक्रमवदसदिति योगः, पुण्डरीकोपमोपनीतात्यन्तातिशायिगुणसिद्धौ गन्धगजोपमया विहारगुणार्प्पणं पराभिप्रेतहीनादिगुणक्रमापेक्षयाऽक्रमवदपि नासदिति भावः, अमुमेवार्थमनेनैवोपन्यासेन व्यतिरेकतः साधयितुमाह–'अन्यथा' क्रमाक्रमव्यवस्थायाः पूर्व्वानुपूर्व्याद्यभिधेयस्वभावस्य चाभावे 'न' नैव. 'शब्दप्रवृत्तिः' प्रस्तुतोपमोपन्यासरूपा 'वस्तुनिबन्धना' वाच्यगुणनिमित्ता, हीनादिक्रमेणैव हि गुणजन्मनियमे पूर्वानुपूर्व्व्यैवाभिधेयस्वभावत्वे च सति तन्निबन्धने च तथैव शब्दव्यवहारे कथमिव शब्दप्रवृत्तिरित्थं युज्यत इति भावः 'इति' अस्माद्धेतोर्वस्तुनिबन्धनशब्दप्रवृत्त्यभावलक्षणात् 'स्तववैयर्थ्यमेव' स्तवस्याधिकृतस्यैव वैयर्थ्यमेव –निष्फलत्वमेवासदर्थाभिधायितया स्तवधर्म्मातिक्रमेण स्तवकार्याकरणात् । 'ततश्च' स्तववैयर्थ्याच्च 'अन्धकारनृत्तानुकारी' सन्तमसविहितनर्त्तनसदृशः 'प्रयासः' स्तवलक्षण इति, न चैवमसौ, सफलारम्भिमहापुरुषप्रणीतत्वादस्येति, पुण्डरीकोपमेयकेवलज्ञानादिसिद्धौ गन्धगजोपमेयविहारगुणसिद्धिरदुष्टेति,

'एकान्तेनेत्यादि' एकान्तेन–अव्यभिचारेण 'आदिमध्यावसानेषु' आदौ–अनादौ भवेषु पुरुषोत्तमतया मध्ये–व्रतविधौ सिंहगन्धहस्तिधर्मभाक्त्वेन, अवसाने च-मोक्षे पुण्डरीकोपमानतया 'स्तोतव्यसम्परिसिद्धिः' स्तवनीयस्वभावसिद्धिरिति ॥

**टी०**...अभिधानन्यायेन–वाचकशब्दक्रमव्यत्ययेन वाच्यमपि, वाचकवत् परिपाटिक्रमरहितं असत्–अविद्यमानं 'अक्रमवदसदि' ति परेण–वादिना यदुपन्यस्तं तन्न युक्तं यतः पूर्वोक्त–प्रतिपादितनीतिरेव प्रमाणम,

तथाहि = अभिधान–वाचकक्रमापेक्षया मानितक्रमवदभिधेयमस्ति, तत् क्रमवद् वाच्यं, क्रमेण –उत्क्रमेणाक्रमादिना प्रकारेणाभिधानार्हस्वभावपरिणति–मदस्ति, अतः सर्वथा क्रमरहितं नास्ति, एवं वाच्यगतिपरिणतिमपेक्ष्य–कीदृशी वाच्य–परिणतिरस्ति ? किं क्रमप्रकारावच्छिन्ना ? किमुत्क्रमप्रकारावच्छिन्नाऽस्ति ? किमक्रमप्रधाना वाच्यपरिणतिरस्ति ? यादृशी–यत्प्रकारावच्छिन्नाऽस्ति वाच्यपरिणतिः, तादृशीं तत्प्रकारावच्छिन्नां वाच्यपरिणतिमपेक्ष्य–निमित्तीकृत्य वाचक–शब्दद्वारा गुणानां क्रमश्चाक्रमश्च–क्रमाक्रमौ कथितौ.

अधुना स्वभावतः क्रमाक्रमव्यवस्थावर्णनम् = स्याद्वादिनः, क्रमाक्रमाभ्यां (सामान्येन = क्रमाक्रमो-

भयसाधारण्येन--स्वभावरूपजातिद्वारा) केशवादौ गुणवति हीनाधिकां द--गुणानां व्यवस्थां (स्वरूप-लाभलक्षण--विशिष्टावस्थां) अभ्युपगच्छन्ति, अतस्तथा पूर्वयुक्त्यपेक्षया वाच्यमपि तथाऽक्रमवदसन्न परन्तु सदस्ति = पूर्वानुपूर्वी--पश्चानुपूर्वी--अनानुपूर्व्यादिअन्यतमद्वारा वाच्यवाचक--क्रमाक्रमादियुक्तं वस्तु सदित्यायातम्, यथा वाच्यं तथा वाचकमिति सिद्धान्तः स्मर्त्तव्यः,

इदमेवात्र सारं = पुण्डरीकनामकोपमया--उपनीतस्य (अभिव्यक्तस्य) अत्यन्तातिशायिनः केवल-ज्ञानादिगुणस्य सिद्धौ सत्यामेव गन्धगजोपमया विहारनामक-गुणस्याऽर्पणं (अभिव्यञ्जनम्) परवादिनाऽभिप्रेतहीनादिगुणक्रमापेक्षयाऽक्रमवदपि नासदपितु सदेवेति भावः, अस्यैवार्थस्यानेनैवो-पन्यासेन व्यतिरेकपद्धत्या सिद्धिः = अन्यथा = गुणिनिष्ठगुणानां क्रमाक्रमव्यवस्थायाश्च पूर्वानुपूर्वी --पश्चानुपूर्वी--अनानुपूर्वीद्वारा कथनार्ह--अभिधेयस्वभावस्य चाभावे सति, या वाच्यगुणनिमित्तजन्य --पुण्डरीकोपमोपन्यासरूप--शब्दप्रवृत्ति भवति सा न भवेत्, यतो हीनादिक्रमेणैव गुणोत्पत्तिनियमस्य मान्यतायां च पूर्वानुपूर्वीद्वारैव (न पश्चानुपूर्व्या अनानुपूर्व्या) गुणानां वाच्यत्वे मते, पूर्वानुपूर्वी क्रमविशिष्टाभिधेयगुणनिमित्त--प्रयोज्यशब्दव्यवहार--प्रयोगप्रणालिकायां कल्पितायां सत्यां 'पुरुषवर-पुण्डरीकेतिसूत्रकथनानन्तरं 'पुरुषवरगन्धहस्ति' इति स्तोत्ररूपशब्दप्रवृत्तिः कथं युक्तियुक्ता स्यात् ? अर्थान्न युक्ता भवेत्, इदमत्र हार्दं कथ्यते वस्तुनिबन्धना (पूर्वानुपूर्वी--पश्चानुपूर्वी--अनानुपूर्वीअन्यतम-क्रमाक्रमोत्क्रमादिविशिष्टवाच्यगुणनिमित्तवती) शब्दप्रवृत्तिः प्रत्यक्षा दृश्यते, तथा वस्तुनिबन्धन-प्रवृत्तेरभावे सति, अधिकृतस्तवस्य (शक्रस्तवगतपुरुषवरपुण्डरीक पुरुषवरगन्धहस्तिरूपोपमागर्भित-स्तुतिप्रतिपादकवाक्यस्य) निष्फलता भवेत्, यतः, असद्भूतार्थकथनद्वारा स्तवधर्ममतिक्रम्य स्तव-रूपकार्याकरणमायातं स्यात्, ततश्च स्तववैयर्थ्याच्च स्तवलक्षणः प्रयासः, अन्धकारविहितनर्त्तनतुल्यो भवेत्, स्तवप्रयासः सफलोऽस्ति यतः स स्तवः सफलारम्भि--गणधरमहापुरुषप्रणीतोऽस्ति.

वस्तुतस्तु पुण्डरीकोपमेयकेवलज्ञानादिसिद्धौ घातिकर्मक्षयजन्यत्वेनाधिक--रूपत्वेन गन्धगजोपमया-तिशयरूपविहारगुणरूपजनतागतापायापगमातिशयरूपविशिष्टगुणसिद्धिरदुष्टैवेति, नवमपदरूपं पुरुष-वरगन्धहस्तिरूपविशेषणं समाप्तम् (९)

एवं--अनेन प्रकारेणैव पुरुषोत्तमसिंहपुण्डरीकधर्मातिशय(अतिशायि--विशिष्ट धर्माणां) योगे--सम्बन्धे सत्येव, एकान्तेन (अविसंवादेन) नियमतः आद्यौ (आदिभूतावस्थायां मोक्षाऽवस्थातः प्राक्संसा-रावस्थायां) अनादिकालतः भवेयुः, शक्तिमपेक्ष्यापि परोपकारव्यसनादिजन्यपुरुषोत्तमत्वयोगतः, अर्हदात्मसु स्तोतव्यस्वभावसिद्धिः, मध्यमावस्थायां-व्रतविधिविषये, आचारप्रधान--महाव्रतक्रियादि-रूपविषये (शौर्यादिगुणापेक्षया चोपद्रव--अपायरूपक्षुद्रगज--निराकरणादिरूपगुणापेक्षया) सिंहगन्ध-गजधर्मभाजोऽर्हन्तो भगवन्तो भवन्ति, अतोऽर्हदात्मसु स्तोतव्यस्वभावसिद्धिः,

अवसाने = अन्तिममोक्षावस्थायां पुंडरीकोपमानताद्वारा–पुंडरीकगतनिर्लेपतादिगुणभाक्त्वेनार्हत्सु स्तोतव्यस्वभावसिद्धिरिति, एवं तिसृषु, अवस्थासु, अर्हतां भगवतां स्तोतव्यानां, स्तवनीयस्वभावगुणधर्मादिसिद्धौ पूर्वोक्तपदचतुष्टयवती, स्तोतव्यसम्पद एवासाधारणगुणरूपा हेतुसम्पत् कथिता, यतः पुरुषोत्तमानां सिंहपुण्डरीकगन्धहस्तिधर्मभाक्त्वेन स्तोतव्यतोपपत्तिर्भवतीति. (३) सम्पत् (विशेषहेतुसम्पदपि) समाप्ता.

**साम्प्रतं 'समुदायेऽवृपि प्रवृत्ताः शब्दा अनेकधाऽवयवेष्वपि प्रवर्त्तन्ते', स्तवेष्वप्येव वाचकप्रवृत्तिरिति न्यायसंदर्शनार्थमाह–'लोकोत्तमेभ्य इत्यादिसूत्रपञ्चकम्', इह यद्यपि लोकशब्देन तत्त्वतः पञ्चास्तिकाया उच्यन्ते,–धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत् क्षेत्रम् । तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्य ॥१॥ मितिवचनात्, तथाऽप्यत्र**

पं०...'अनेकधा' अनेकप्रकारेषु 'अवयवेष्वपि' न केवलं समुदाय इत्यपि शब्दार्थः, शब्दाः प्रवर्त्तन्ते, यथा सप्तर्षिशब्दः सप्तसु ऋषिषु लब्धप्रवृत्तिः सन्नेकः सप्तर्षिर्द्वौ सप्तर्षी त्रयः सप्तर्षय उद्गता इत्यादिप्रयोगे तदेकदेशेषु नानारूपेषु अविगानेन वर्त्तते, तथा प्रस्तुतस्तवे लोकशब्द इति भावः,

टी०...'साम्प्रतं' वर्त्तमानप्रस्तुतसूत्रे युक्तं वा समुदायेषु अपि प्रवृत्ताः–शक्ति–ग्रहवन्तो भवन्तः, समुदायवाचकाः शब्दा अनेकप्रकारवच्छेदेन समुदायाभिन्नैकभागरूपावयववाचकाः, (परन्तु केवलं समुदायवाचका न भवन्त्यपि शब्दार्थः) भवन्ति। यथा सप्तर्षिशब्दः समुदायवाचकः सप्तसु –ऋषिषु लब्धप्रवृत्तिः (शक्तिग्राहकः) अवयववाचकः सन्नेकः सप्तर्षिः द्वौ सप्तर्षी त्रयः सप्तर्षय उद्गता इत्यादिप्रयोगे तदेकदेशेषु (सप्तर्षिसत्कावयवेषु) नानारूपेषु, अविगानेन–अविरोधेन वर्त्तते, ('मरीचिप्रमुखाः सप्तर्षयश्चित्रशिखण्डिनः' अ.चि.द्वि.कां. श्लो–३८, 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजाः सप्तमः परिकीर्तितः' ॥ 'बृहस्पतिः सुराचार्यो जीवश्चित्रशिखण्डिजः' अ.चि.द्वि.कां.श्लो.३२, 'गीर्बृहत्योः पतिरुतथ्यानुजाऽङ्गिरसो गुरुः' अ.चि.द्वि.कां.श्लो.३३, सप्तसु ऋषिषु मध्ये अंगिरस्नामकसप्तर्षिपुत्रस्य यथाऽऽङ्गिरसत्वेन व्यवह्रियते तथा 'चित्रशिखण्डिजः–सप्तर्षिजातत्वेन व्यवह्रियते, यतः समुदाय–प्रवृत्तशब्दस्य व्यवहारस्तदवयवभूतेकदेशोऽपि प्रवर्त्तते इति नियमोऽत्र समञ्जसत्वेन घटते.) महाजलाशयरूपमहासरोवरस्यैकभागोऽपि सरस्त्वेनोच्यते, सेनाद्यानां समुदायशब्दानामप्येकमेवार्थस्तदेकभागेऽपि सेनादिरुच्यते ॥ एवमेव स्तवेषु-स्तोत्ररूप –सूत्रेष्वपि वाचकानां–शब्दानां प्रवृत्तिरिति न्यायसंदर्शनहेतवे 'लोकोत्तमेभ्य इत्यादिसूत्रपञ्चकं प्रवृत्तमस्ति, इह यद्यपि लोकशब्दः। तत्त्वतः (व्युत्पत्त्या, च परिभाषया–रूढ्या) पञ्चास्तिकाय वाचकोऽस्ति, यत आगमवचनमस्ति, यत्र क्षेत्रे धर्माधर्माकाशपुद्गलजीवरूपाणां पञ्चानामस्तिकायाख्यानां द्रव्याणां वृत्ति–विद्यमानत्वं भवति, तैः पञ्चभिरस्तिकायै र्द्रव्यैः सह तत्–क्षेत्रं लोक उच्यते,

तद्विपरीतं = धर्मादीनां पञ्चानामस्तिकायानां द्रव्याणामविद्यमानत्वं यत्र वर्त्तते तत् क्षेत्रम्-लोकनामकं कथ्यते इति. शास्त्रे लोकशब्देन पञ्चास्तिकायात्मकं क्षेत्रं लोकः कथ्यते तथाप्यत्र– 'लोकोत्तमेभ्योऽर्हद्भ्यो नमः' इत्यत्र वाक्यघटकलोकशब्देन सामान्येन भव्यसत्त्व--प्राणिलोक एव गृह्यते, अर्थादत्र लोकोत्तमनामके पदे वर्त्तमानो लोकशब्दः सामान्येन (भव्यत्वजात्या--समस्तभव्य-लोकसंग्रहद्वारा) पंचास्तिकायात्मकलोकस्य समुदायवाचकस्यैकदेशरूपसकलभव्यजीवरूपार्थवाचको लोकशब्दो भवतीति.

**लोकध्वनिना सामान्येन भव्यसत्त्वलोक एव गृह्यते, सजातीयोत्कर्ष एवोत्तमत्वोपपत्तेः, अन्यथाऽतिप्रसङ्गोऽभव्यापेक्षया सर्वभव्यानामेवोत्तमत्वात्, एवं च नैषामतिशय उक्तः स्यादिति परिभावनीयोऽयं न्यायः। ततश्च भव्यसत्त्वलोकस्य सकलकल्याणैकनिबन्धन-तया भव्यत्वभावेनोत्तमाः, भव्यत्वं नाम सिद्धिगमनयोग्यत्वम्, अनादिपारिणामिको भावः**

पं०...'भव्यत्वमित्यादौ' भविष्यति विवक्षितपर्यायेणेति भव्यस्तद्भावो भव्यत्वं, नामेति संज्ञायां, ततो भव्यत्वनामको जीवपर्यायः, सिध्यन्ति-निष्ठितार्था भवन्ति जीवा अस्यामिति सिद्धिः, सकलकर्मक्षयलक्षणा जीवावस्थैव, तत्र गमनं--तद्भावपरिणमनलक्षणं सिद्धिगमनं, तस्य योग्यत्वं नाम–योक्ष्यते सामग्रीसम्भवे स्वसाध्येनेति योग्यं, तद्भावो योग्यत्वम्, अनादिः--आदिरहितः स चासौ परीति--सर्वात्मना नामः–प्रह्वीभावः परिणामः, स एव पारिणामिकश्चानादिपारिणामिको भावो–जीवस्वभाव एव। एवं सामान्यतो भव्यत्वमभिधायाथ तदेव प्रतिविशिष्टं सत्तथाभव्यत्वमित्याह--

टी०...अत्र लोकनामकशब्देन भव्यसत्त्वलोको गृह्यते एव, यतः सजातीयोत्कर्षे एव = समानजातीयोत्कर्षे–वर्त्तमानमुत्तमत्वं उपपन्नं भवति, यदि सजातीयोत्कर्षवृत्ति, उत्तमत्वं न मन्यते च विजातीयोत्कर्षवृत्ति उत्तमत्वं मन्येत तदाऽतिप्रसङ्ग आयाति, तथाहि अभव्यापेक्षया = अभव्येभ्यः सर्वेषां भव्यानामेवोत्तमत्वं वर्त्तते, एवं च--विजातीयोत्कर्षवृत्त्युत्तमत्वं यदि मन्येत तदा चैषामर्हतां भगवतां अतिशयः (उत्कर्षः–उत्तमत्वं-विशिष्ट-वैशिष्टयं) कथितो न भवेदर्थाद् यः सजातीयेषूत्कृष्टः स एवोत्तमः यथा नरोत्तमदेवोत्तमादिः, यः सजातीयेषूत्कृष्टो न स नैवोत्तमः यथा नरोत्तमो देवोत्तमो न कथ्यते। एषोऽन्वयव्यतिरेकात्मको न्यायः-युक्तिविशेषः परिभावनीयः, सजातीयेषूत्कृष्टः स एवोत्तमोऽस्तीति न्यायापेक्षया, सजातीयभव्यसत्त्वलोकेषु सकलकल्याणं प्रति, अनन्यासाधारण-निबन्धन-(तीर्थंकरत्वादि-कारण) भूतमतएव विशिष्टतथाभव्यत्व (चित्रभव्यत्वं) तस्य भावेन = विद्यमानत्वेनोत्तमाः 'लोकोत्तमाः' इत्यर्थः, भव्यत्वार्थस्य अभिव्यक्तिः = भविष्यति सिद्धत्वरूपविव-क्षित–पर्यायात्मनेति भव्यस्तस्य भावो भव्यत्वं ततोभव्यत्वनामको जीवपर्यायः, भव्यत्व-मर्थात् सिद्धिगमनयोग्यत्वं, सिद्धिः = सिध्यन्ति–निष्ठितार्था भवन्ति, जीवा अस्यामिति सिद्धिः,

सकलकर्मक्षयलक्षणा, कृत्स्नकर्मक्षयद्वारा स्वस्वरूपावस्थानविशेषो जीवाऽवस्थैव, तत्र गमनं-तद्भाव-परिणमनरूपं सिद्धिगमनं, तस्य योग्यत्वमर्थाद् योक्ष्यते सामग्रीसम्भवे स्वसाध्येनेति योग्यं तद्भावो योग्यत्वम्, भविष्यत्कालीन-सिद्धिरूपसाध्यप्राप्तिविशिष्ट-योगकारकशक्तिविशेषो भव्यत्वम्, आदि-रहितकालतः सर्वात्मप्रदेशैः महाभिव्याप्तो जीवस्वभावः सोऽनादिपरिणामिको भावो भव्यत्वं, (जीवादीनां स्वरूपानुभवं प्रति प्रह्वीभावरूपत्वं पारिणामिकस्य लक्षणम्, परिणमनं-तेन तेन रूपेण वस्तूनां भवनं परिणामः, स एव तेन वा निर्वृत्तः पारिणामिकः.)

**तथाभव्यत्वमिति च विचित्रमतत्, कालादिभेदेनात्मनां बीजादिसिद्धिभावात्, सर्वथा योग्यताऽभेदे तदभावात्, तत्सहकारिणामपि, तुल्यत्वप्राप्तेः, अन्यथा योग्यताऽभेदायोगात्, तदुपनिपाताक्षेपस्यापि तन्निबन्धनत्वात्, निश्चयनयमतमेतदतिसूक्ष्मबुद्धिगम्यमिति लोकोत्तमाः १० ।**

पं०...'तथाभव्यत्वमिति च' तथा-तेनानियतप्रकारेण भव्यत्वम्-उक्तरूपमिति शब्दः-स्वरूपोपदर्शनार्थश्चकारोऽवधारणार्थो भिन्नक्रमः, ततश्च यदेतत्तथाभव्यत्वं तत्किमित्याह-'विचित्रं' नानारूपं सद् एतदेव भव्यत्वं तथाभव्यत्वमुच्यते, कुत इत्याह-'कालादिभेदेन' सहकारिकालक्षेत्रगुर्वादिद्रव्यवैचित्र्येण 'आत्मनां जीवानां 'बीजादिसिद्धिभावात्' बीजं धर्म्मप्रशंसादि आदिशब्दाद् धर्म्मचिन्ताश्रवणादिग्रहस्तेषां सिद्धिभावात्-सत्त्वात्, व्यतिरेकमाह-'सर्व्वथा योग्यताऽभेदे' सर्व्वैः प्रकारैरेकाकारायां योग्यतायां 'तदभावात्' कालादिभेदेन बीजादिसिद्ध्यभावात्, कारणभेदपूर्वकः कार्यभेद इति भावः । परिणामिकहेतोर्भव्यत्वस्याभेदेऽपि सहकारिभेदात् कार्यभेद इत्याशङ्कानिरासायाह-'तत्सहकारिणामपि' तस्य-भव्यत्वस्य सहकारिणः-अतिशयाधायकाः प्रतिविशिष्टद्रव्य-क्षेत्रादयस्तेषां, न केवलं भव्यत्वस्येत्यपिशब्दार्थः, किमित्याह-'तुल्यत्वप्राप्तेः' सादृश्यप्रसङ्गात् । अत्रापि व्यतिरेकमाह-'अन्यथा' सहकारिसादृश्याभावे 'योग्यताया' भव्यत्वस्य 'अभेदायोगाद्' एकरूपत्वाघटनाद्, एतदपि कुत इत्याह--'तदुपनिपाताक्षेपस्यापि' तेषां-सहकारिणामुपनिपातो-भव्यत्वस्य समीपप्रवृत्तिस्तस्याक्षेपो-निश्चितं स्वकालभवनं तस्य, न केवलं प्रकृतबीजादिसिद्धिभावस्येत्यपिशब्दार्थः, 'तन्निबन्धनत्वात्' योग्यताहेतुत्वात्, ततो योग्यताया अभेदे तत्सहकारिणामपि निश्चितमभेद इति युगपत्तदुपनिपातः प्राप्नोतीति, 'निश्चयनयमतं' परमार्थ-नयाभिप्राय एतदुक्त-भव्यत्वं चित्रमिति, व्यवहारनयाभिप्रायेण तु स्यादपि तुल्यत्वं, तस्य सादृश्यमात्राश्रयेणैव प्रवृत्तत्वात्,

टी०...तथाभव्यत्वपरिष्कारः = शब्दार्थः = अनियतप्रकारावच्छिन्नं तथाभव्यत्वं, विशिष्टार्थः, = एतद्विचित्रं = नानारूपं सदेतदेव भव्यत्वं तथाभव्यत्वं, यतः सहकारि (सहकार्यकारि) कालक्षेत्रगुर्वादि-द्रव्यवैचित्र्यप्रयुक्त-जीवनिष्ठधर्मप्रशंसादि-बीजधर्मचिन्ताश्रवणादिरूप-बीजादीनां सत्त्वमस्ति, विचित्र-तथाभव्यत्वसत्त्वे, कालादिभेदेनात्मनां बीजादिसत्त्वम्, विचित्रतथाभव्यत्वाभावे

कालादिभेदेनात्मनां बीजादिसत्त्वाभावः, अर्थात् सर्वप्रकारावच्छिन्न–भव्यताया भेदाभावे–सर्वप्रकारस-भावापेक्षया एकरूपायामेकाकारायां योग्यतायां–नियतैकप्रकारावच्छिन्ने भव्यत्वे सति, कालादि–भेदेन जीवानां बीजादिसत्ताऽभावः यतो विचित्रतथाभव्यत्वरूपकारणाभावे, कालादिभेदेनात्मनां बीजादिरूपकार्याभाव इति अन्वयव्यतिरेकरूपव्यवस्था ज्ञेया.

ननु पारिणामिकहेतुरूप–भव्यत्वस्य भेदा–(वैचित्र्या) भावेऽपि–एकरूपत्वेऽपि सहकारिणां भिन्न-त्वाद्बीजादिकार्यं भविष्यतीति चेत् कथ्यते तद्भव्यत्वेऽतिशयाधायक = वैशिष्ट्यकारक–विशिष्ट द्रव्यक्षेत्रादीनां सहकारिणामपि भव्यत्वतुल्यता–भव्यत्व–सादृश्यस्य प्राप्तिर्भवेदर्थाद् भव्यत्वसदृशाः सहकारिणो भवेयुः,

(यदि तथाभव्यत्वं विचित्रं न स्यात्तदा सहकारिणां भेदो न स्यात्, तथाभव्यत्वस्य वैचित्र्येणैव सहकारिकारणान्यपि भिन्नभिन्नावसरे लभ्यन्ते यतस्तथाभव्यत्वसापेक्षाः सहकारिभेदा भवन्ति, अर्थात् तथाभव्यत्वस्य तादृशस्वभावो न भवेत्तदा सहकारिणां तादृशी प्रवृत्ति नं भवेत्. एतादृशोऽने-कान्तवादोऽस्ति, स एव तात्त्विकोऽस्ति सोऽनेकान्तवादः, तथाभव्यत्वं विचित्रमिति मान्यतायां घटतेऽन्यथा सर्वथा भव्यत्वस्य तुल्यतायामेकान्तवादः प्रसरति, एकान्तवादे काऽपि व्यवस्था न सम्भ-वति, यतस्तथाभव्यत्वस्य भेदाभावे सहकारिणामपि भेदाभावः स्यात्, एवं च भव्यत्वसहकारिभूत –वैशिष्ट्याधायकविशिष्टद्रव्यक्षेत्राद्या स्तुल्या-एकरूपा भवेयुः, भव्यत्वमप्येकरूपं भवेत् यदि द्रव्याद्याः सहकारिण एकसमाना न स्युस्तदा भव्यत्वमप्येकसमानं न घटेत, तद्भव्यत्वस्यैकसमानत्वे सहकारि-द्रव्यादीनामेकसमानताऽऽपत्तिः, 'यदि भव्यत्वं विचित्रं' इति मताभावे युगपद्भव्यत्वतत्सहकारिणां द्रव्यादीनां नियमतोऽभेदतापत्तिः, ततः सर्वेषां भव्यानां यौगपद्येन मुक्तेरापत्तिः, तस्मान्निश्चयनयस्य –परमार्थनयस्यैतादृशोऽभिप्रायोऽस्ति यदुत 'भव्यत्वं चित्रं–तथा भव्यत्वं' अर्थाद् अनेकप्रकाराव-च्छिन्नं भव्यत्वं, भव्यत्ववैचित्र्यप्रयुक्त सहकारि–द्रव्यादिवैचित्र्यं सहकारिद्रव्यादिवैचित्र्येण युगपत्सर्वभव्यमुक्तिप्रसङ्गो न भवेदिति निश्चितं भवति)

भव्यत्वसदृशाः सहकारिणः। यदि सहकारिसदृशी योग्यता–भव्यता नेति मान्यतायां भव्यत्वनिष्ठ मेकरूपत्वं न घटते, कथमिति चेत् कथ्यते, सहकारिणां भव्यत्वसमीपवृत्तित्व, अतो भव्यत्वस्य निश्चितं स्वकालभवनं (परिपक्वत्वं–परिपाकदशावर्तित्वभव्यत्वस्य न केवलं प्रकृतबीजादि–सिद्धि-भावस्य परिपाकः परन्तु भव्यत्वस्य परिपाकः) तत्रापि–तस्याऽपि योग्यतैव–भव्यतैव हेतुरस्ति. ततो योग्यताया अभेदे–वैचित्र्यशून्यत्वे तत्सहकारिणामपि निश्चितमभेदः–भेदशून्यत्वमिति, योग्यता-सहकारिणोर्युगपदुपनिपातप्रयुक्ता युगपत्–सर्वभव्यजीवमुक्तिः प्राप्नोतीति–इदमत्र हृदयम् =

सहकारिणां भव्यत्वसमीपवर्त्तित्वेन भव्यत्वपरिपाकस्य विलम्बाभावः, केवल-प्रकृतबीजादि-सिद्धिभावस्य शीघ्रत्वं न परंतु भव्यत्वपरिपाकस्य शीघ्रत्वं यतो योग्यतारूपकारण–जन्यत्वं वर्त्तते न तु तथा –भव्यत्वहेतुजन्यत्वं वर्त्ततेऽतः सर्वभव्यजीवानां युगपन्मुक्तिप्रसङ्गो भविष्यतीति 'निश्चयनयमतं– एतदतिसूक्ष्मबुद्धिगम्यमिति परमार्थनयाऽभिप्राय एतद्यदुत 'भव्यत्व चित्रं' तथाभव्यत्वमिति. व्यवहारनयाऽभिप्रायेण तु स्यादपि तुल्यत्व, तस्य सादृश्यमात्राश्रयेणैव प्रवृत्तत्वात् । अत्रेदमित्थं बोध्यं 'स्यादपि तुल्यत्वं' भव्यत्वतुल्याः सहकारिणः सहकारितुल्यं भव्यत्वमिति द्वयो तुंल्यत्वं स्यादितिपक्षे कथंचिदपि भेदाभावेन सर्वभव्यजीवगतं द्वयं तुल्यमिति मतेन सर्वभव्यजीवेषु कारणकार्ययोस्तुल्यत्वेन युगपद्–एकसमयेन तुल्यत्वेन सर्वेषां भव्यानां मुक्तिप्रसङ्ग–आपत्तिरापतिता भवेदतः, सहकारिवैचित्र्यप्रयुक्तं भव्यत्ववैचित्र्यं, भव्यत्ववैचित्र्यप्रयुक्तं सहकारवैचित्र्यमिति मिथो वैचित्र्यमस्तीति मान्यतायां युगपत्सर्वभव्यानां मुक्तिप्रसङ्गो नापतिष्यत्यतः 'भव्यत्वमेव विचित्रं तथाभव्यत्व' मिति मन्तव्यमेवेति लोकोत्तमाः' इति दशमं पदं समाप्तम् ॥

**तथा 'लोकनाथेभ्यः' इति, इह तु लोकशब्देन तथेतरभेदाद्विशिष्ट एव तथा रागाद्युपद्रवरक्षणीयतया बीजाधानादिसंविभक्तो भव्यलोकः परिगृह्यते, अनीदृशि नाथत्वानुपपत्तेः, योगक्षेमकृदयमिति विद्वत्प्रवादः, न तदुभयत्यागाद्, आश्रयणीयोऽपि परमार्थेन तल्लक्षणायोगात्, इत्थमपि तदभ्युपगमेऽतिप्रसङ्गात्, महत्त्वमात्रस्येहाप्रयोजकत्वात्, विशिष्टोपकारकृत एव तत्त्वतो नाथत्वात्, औपचारिकवागवृत्तेश्च पारमार्थिकस्तत्त्वासिद्धिः, तदिह येषामेव बीजाधानोद्भेदपोषणैर्योगः क्षेमं च तत्तदुपद्रवाद्यभावेन, त एवेह भव्याः परिगृह्यन्ते,**

पं०...तथा 'तथेति' समुदायेष्वपि प्रवृत्ता इत्यादिसूत्रं वाच्यमिति तथाशब्दार्थः, एवमुत्तरसूत्रेष्वपि तथाशब्दार्थो वाच्य इति ।

'तथेतरभेदात्' तथा–तत्प्रकारो भव्यरूप एव य इतरभेदो–भव्यसामान्यस्य बीजाधानादिना संविभक्तिकर्त्तुमशक्तस्तस्माद् 'विशिष्ट एव' विभक्त एव 'तथा' तेन तेन प्रकारेण 'रागाद्युपद्रवरक्षणीयतया' रागादय एव तेभ्यो वा उपद्रवो रागाद्युपद्रवस्तस्माद् रक्षणीयता-तद्विषयभावाद् अपसारणता तथा 'बीजाधानादिसंविभक्तो 'धर्मबीजवपनचिन्तासत्क्र्यादिना कुशलाशयविशेषेण सर्वत्र स्वायत्तीकृतेन संविभक्तः–समयापेक्षया संपतविभागवान् कृतः, भगवत्प्रसादलभ्यत्वात् कुशलाशयस्य, 'भव्यलोकः' उक्तस्वरूपः 'परिगृह्यते' आश्रीयते, कुत इत्याह–'अनीदृशि' बीजाधानाद्यसंविभक्ते–अविषयभूते 'नाथत्वानुपपत्तेः' भगवतां नाथभावाघटनात कुतो ? यतः 'योगक्षेमकृत्' योगक्षेमयोः कर्त्ता 'अयमिति' नाथः 'इति' एवं,

'विद्वत्प्रवादः' प्राज्ञप्रसिद्धिः, योगक्षेमयोरन्यतरकृत्सर्वथा तदकर्त्ता वा नाथः स्यादित्याशङ्कानिरासायाह–'न' नैव-'तदुभयत्यागात्' तदुभयं–योगक्षेमोभयं सर्वथा तत्परिहारादनयोरेवान्यतराश्रयणाद्वा 'आश्रयणीयोऽपि' ग्राह्योऽपि अपित्वश्रमान्नाथः, किं पुनरनाश्रयणीय इत्यपिशब्दार्थः, कुत इत्याह–'परमार्थेन' निश्चयप्रवृत्त्या 'तल्लक्षणायोगात्' नाथलक्षणायोगात्, उभयकरत्वमेव तल्लक्षणमित्युक्तमेव. विपक्षे बाधकमाह–'इत्थमपि' तल्लक्षणायोगेऽपि, तल्लक्षणयोगे तु प्रसज्यत एवेत्यपिशब्दार्थः 'अतिप्रसङ्गाद्' अकिञ्चित्करस्य कुड्यादेरपि नाथत्वप्राप्तेः नहि गुणैश्वर्यविना महानेव नाथ इति नातिप्रसङ्ग इत्याशङ्क्याह'-महत्त्वमात्रस्य' योगक्षेमरहितस्य महत्त्वस्यैव केवलस्य 'इह' नाथत्वे 'अप्रयोजकत्वाद्' अहेतुत्वात्, कुत इत्याह–

'विशिष्टोपकारकृत एव' योगक्षेमलक्षणोपकारकृत एव, नान्यस्य, 'तत्त्वतो' निश्चयेन 'नाथत्वात्' नाथभावात्, उपचारतस्तर्हि महान्नाथो भविष्यतीत्याशङ्क्याह-'औपचारिकवाग्वृत्तेश्च' उपचारेणानाथे आधिक्यसाधर्म्यान्नाथधर्माध्यारोपेण भवा औपचारिकी सा चासौ वाग्वृत्तिश्च तस्याः, चः पुनरर्थे 'पारमार्थिकस्तवत्वासिद्धेः' सद्भूतार्थस्तवरूपासिद्धिरिति, अनीदृशि नाथत्वानुपपत्तेरिति पूर्वेण योगः 'तत्' तस्माद् 'इह' सूत्रे 'येषामेव' वक्ष्यमाणक्रियाविषयभूतानामेव नान्येषां 'बीजाधानोद्भेदपोषणैः' धर्मबीजस्याधानेन-प्रशंसादिनोद्भेदेन–चिन्ताङ्कुरकरणेन पोषणेन–सच्छ्रुत्यादिकाण्डनालादिसम्पादनेन योगः–अप्राप्तलाभलक्षणः, क्षेमं च–लब्धपालनलक्षणं 'तत्तदुपद्रवाद्यभावेन' तत्तदुपद्रवा चित्ररूपाणि नरकादिव्यसनानि आदिशब्दात्तन्निबन्धनभूतरागादिग्रहः तेषामभावेन–अत्यन्तमुच्छेदेन 'त एव' मान्ये 'भव्याः' उक्तरूपाः परिगृह्यन्ते,

टी०... यथा–'समुदायेष्वपि प्रवृत्ताः शब्दा अनेकधाऽवयवेष्वपि प्रवर्त्तन्ते' इति न्यायसन्दर्शनार्थमाह 'लोकनाथेभ्यः' इति इह तु लोकशब्देन भव्यत्वप्रकारावच्छिन्नभव्यरूप एवेतरभेदः = भव्यमात्रस्य बीजादिविषयीकर्तुमशक्तत्वेन, भव्यमात्रतो विशिष्ट एव–विभागविषयत्वेन भिन्न एवार्थाद् बीजाधानादिकुशलभाव–विषयीकर्त्तुं शक्तः–समर्थः–बीजाधानादिविषययोग्यतानामकसामर्थ्यवानत एव रागादिरूपो वा रागादिजन्यो य उपद्रवस्ततो रक्षणीयता–रागादिरूपोपद्रवविषयताया अपसारणता–दूरीकरणभावः, अर्थाद् रागाद्युपद्रवरक्षणविषयतया हेतुना सर्वथा स्वायत्तीकृत–धर्मबीजवपनचिन्तासच्छ्रुत्यादिविशिष्टशुभाशयद्वारा संविभक्तः = कालापेक्षया संगतविभागवान् कृतः–तथाभव्यत्वपरिपाकदशायोग्यः कृतः, यतः कुशलाशयो हि भगवतां प्रसादेन लभ्योऽस्ति, एतादृशो बीजाधानादिसंविभक्तो भव्यलोको ग्राह्यः, कथमिति चेदुच्यते बीजाधानादेरविषयभूते भव्यजीवमात्रे भगवतां नाथत्वं न घटते, यतो यथा विद्वत्प्रवादः योगक्षेमयोः कर्त्ता अयमर्हन् भगवान् नाथोऽस्ति, योगक्षेमकर्तृत्वं नाथस्य लक्षणम्–स्वरूपम् (वेदान्तिनस्तु अलभ्यलाभसहितं लब्धपरिरक्षणं योगक्षेमः, यथा अनन्याश्चिन्तयन्तो मां ये जना पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। गीता अ. ९ श्लो. २२) इत्यादौ इत्याहुः । अत्रार्थे

योगश्च क्षेमं च इति समाहारद्वन्द्वो ज्ञेयः । उपेयादीश्वरं चैव योगक्षेमार्थ-सिद्धये ।। याज्ञ. सं. आचाराध्यायः)

ननु योगक्षेमयो र्मध्यंशो योगकर्त्ताऽथवा क्षेमकर्त्ताऽर्थादुभयोरन्यतरकर्त्ताऽथवा सर्वथा योगक्षेमयोरकर्त्ता कथं नाथो न सम्भवेदिति चेदुच्यते, योगक्षेमयोरुभयोः सर्वथा त्यागात्, योगक्षेमयोरन्यतराश्रयणापेक्षया वा, आश्रयणीयो-ग्राह्यो ऽपि, अर्थित्वनाशान्नाथो न स्यात्, (किं पुनरनाश्रयणीय इत्यपि शब्दार्थः) योगक्षेमयाचकः, योगक्षेमग्रहणयोग्यः, यमाश्रित्य योगक्षेमं प्रवर्त्तते स आश्रयणीयोऽपि नाथो न स्यात्, (योगक्षेमकर्तृत्वं नाथस्य लक्षणं । तत्र योगक्षेमाभाववति गोशालकेऽतिव्याप्तिः, तदा स्याद् यदा योगक्षेमाभाववत्त्वं नाथस्य लक्षणं क्रियते, यदि योगाभाववत्त्वं वा क्षेमाभाववत्त्वं क्रियते क्षेमवति लक्षणं अतिव्याप्तं वा योगवति लक्षणमतिव्याप्तं) यतो योगक्षेमकर्तृत्वं विशिष्टभव्यलोके भगवतामस्त्येवार्थाद् योगक्षेमाभाववति अथवा योगक्षेमान्यतरस्थाने निश्चयप्रवृत्तिद्वारा नाथलक्षणस्य यौगाभावोऽस्ति, योगक्षेमकरत्वं नाथस्य लक्षण निर्दोषमेव ।

एवं नाथलक्षणाभावेऽपि नाथलक्षणयोगस्य मान्यतायामतिप्रसङ्गो दोष आयाति, कुत्रेति चेदुच्यते अकिञ्चित्करेऽचेतने कुडयादौ नाथलक्षणस्यातिव्याप्तिः स्याद्, यतस्तत्र योगक्षेमोभयाभावाऽन्यतराभावमात्रं विद्यते, यद्यपि गुणैश्वर्यादि-प्रयुक्ते महत्त्वे नाथस्य लक्षणे क्रियमाणे पूर्वोक्ताऽतिव्याप्ति र्न भवेत्तथापि योगक्षेमरहितस्य केवलस्य महत्त्वस्य नाथत्वलक्षणेऽप्रयोजकत्वं-हेतुशून्यत्वं वर्त्तते, मात्र महत्त्वस्य नाथलक्षणं, नाथलक्षणस्वरूप-रहितत्वम्, नाथस्य लक्षणे केवलं महत्त्वं न हेतुः, महत्त्वेन हेतुना नाथत्वस्य न सिद्धिः परन्तु योगक्षेमौ नाथत्वसिद्धौ हेतू स्तः, महत्त्वरहितस्यायोगक्षेमवतोऽनाथत्वं, महत्त्वेन नाथत्वेन न साध्यसाधनसिद्धिः, अय नाथः योगक्षेमकारित्वादत्र योगक्षेमकर्तृत्वेन हेतुना नाथत्वं साध्यते न महत्त्वेन. योगक्षेमरूपविशिष्टोपकारकृति भगवति नाथत्वं घटते नान्यत्र निश्चयनयेन नाथभावो योगक्षेमनामकविशिष्टोपकारकारक एव तिष्ठति. नान्यत्र पुरुषे एव किञ्च-

यदि उपचारत-आरोपतो नाथत्वाभाववान् महान् नाथः कथं नेतिचेदुच्यते, उपचारेण महत्त्वसमानधर्मापेक्षयाऽनाथमहति नाथधर्माऽध्यारोपेण भवा औपचारिकी (वस्तुतो यो नाथो नास्ति तत्र महत्त्वसाधर्म्येण नाथत्वधर्मारोपेण, अनाथानां महतां नाथत्वेन स्तुतिरूपवचनव्यवहाररूपौपचारिक-वचनवृत्ति-योगेन) या वाग्वृत्तिः, तयाऽर्थादौपचारिक-वाग्वृत्तिद्वारा सद्भूतार्थस्तवरूपपारमार्थिक-अनौपचारिकस्तवस्यासिद्धिः स्यात्, एतद्वस्तु, महदनिष्टं, महदसत्यं, अतएव बीजवपनादिरूपक्रियाया अविषयभूतभव्येषु भगवतां नाथत्वं योगक्षेमकारित्वं नास्त्येव परन्तु बीजवपनादिक्रियाविषयभूत-विशिष्टभव्यलोकेषु भगवतां नैयत्येन नाथत्वं-योगक्षेमकारित्वं वास्तविकं घटत एवेति.

तथा च विवक्षित-भव्यान् प्रत्येव भगवत्कृत-योगक्षेमोपकारः प्रकाश्यते—पूर्वोक्तप्रतिपादनतोऽत्र 'लोकनाथ' रूपसूत्रघटकलोकशब्देन 'बीजाधानादिविषयभूतभव्यलोक एव गृहीतोऽस्ति, अर्थाद् भव्य-लोकस्य स्वयोऽर्थः कथ्यते, यान् विशिष्टभव्यान् प्रत्येव बीजाधानाद्युपदेशेनोपकारद्वारा योगः, च क्षेमं तत्तदुपद्रवाभावेन, भवतः, त एवेह भव्याः परिगृह्यन्ते, अर्थाद् बीजाधानादिविधिविषयभूत-भव्यान् प्रत्येव धर्मप्रशंसादिरूप-धर्मबीजवपनरूपक्रियासंपादनद्वारा, धर्मचिन्तनादिरूपाङ्कुरकारण-रूपोद्भेदसम्पादनद्वारा, धर्मशास्त्रश्रवणरूपसद्भावनरूपकाण्ड—सम्पादनद्वारा, धर्मानुष्ठानरूपनाल काण्डसम्पादनद्वारा, देवमानुषसम्पत्ति—आदिरूपपुष्प-मोक्षफलसम्पादनरूपपोषणद्वारा, तथा भवति. मोक्षफलसम्पादनद्वारा (सम्यक्त्वादिकाण्डनालादिसम्पादनरूपपोषणद्वारा) योगात्मकोपकारो (तत्रेदमनुष्ठानं बीजादिक्रमतंमतं बीजतोऽङ्कुरं, अङ्कुरतः स्कन्धः, स्कन्धतो नालं, नालतः पुष्पं, पुष्पतः, फलं एवं प्रथमं तावत् बीजान्युप्यन्ते, ततोऽङ्कुराणि स्फुटन्ति, ततः स्कन्धः सञ्जायते, स्कन्धान न्तरं पत्रादिकं भवति, पत्रादितः पुष्पाण्याभान्ति, तदनु फलमुत्पद्यते एवं क्रमेण सर्वं भवति,)

(एकोऽवबुधकी पंडितः, अनुभवकूपं, तुम्बं तु वेत्तुमर्थायं आगन्तुकनवपण्डितविक्रेतारं, राजसमक्षं पृष्टो भवति तथाहि—भो मदमण्डित पंडित ! राजन्नपि शृणु तावत् प्रथमं तुम्बं तुम्बा न भवति परन्तु बोजंबोजा, बोजं बोजा, बीजं बीजा, वायं वाया, वर्षं वर्षा, वेलं वेला, तुम्ब तुम्बा इति क्रमेणानुक्रमस्तुम्बो भवति, तुंबं तु वामालकथको राजपंडितः पराजीयते, सर्वं क्रमेण भवति न युगपद्, कारणयोगेन कार्यसिद्धिः, यावन्ति पूर्व-पूर्व-कारणानि सेव्यन्ते तदनन्तरमन्त्यपर्यवसायि फलं निष्पद्यते इति.)योगस्तु अप्राप्तस्य गुणादिकस्य लाभरूपो योगः, क्षेमं लब्धस्य गुणादिकलाभस्य पालनरूपं क्षेमं च 'तत्तदुपद्रवाभावेन' = विघ्नरूपा नानाविधा विघ्नादयो नरकादिदुर्गति दुःखरूपा उपद्रवास्तथादि-शब्देन विघ्नादिभयंकरदुःखादिमूलकारणभूतरागादयोऽपि महोपद्रव-त्वेनोच्यन्ते, तेषां—तत्तदुपद्रवादीनां सर्वेषां, अत्यन्तोच्छेदकरणापेक्षया, येषां विवक्षितभव्यानां पूर्वोक्तो योगश्च पूर्वोक्तं क्षेमं च भवतस्ते एवेह भव्याः परिगृह्यन्ते.

**न चैते कस्यचित्सकलभव्यविषये, ततस्तत्प्राप्त्या सर्वेषामेव मुक्तिप्रसङ्गात्, तुल्यगुणा इति प्रायेण, ततश्च चिरतरकालातीतावस्थतरस्माद्भगवतो बीजाधानादिसिद्धेरल्पेनैव कालेन सकलभव्यमुक्तिः स्यात् बीजाधानमपि ह्यपुनर्बन्धकस्य, न चास्यापि, पुद्गलपरावर्तः संसार इति कृत्वा सम्यग् लोकनाथाः ११ ।**

पं०...स्वाम्यम्--अचिन्त्यशक्तयो भगवन्तः सर्वभव्यानुपकर्तुं क्षमाः, ततः कथमयं विशेष इत्याह

–'न च' नैव 'एते' योगक्षेमे 'कस्यचित्' तीर्थकृतः 'सकलभव्यविषये' सर्वभव्यकालानाश्रित्व प्रवृत्ते, विपक्षे बाधकमाह –'ततो' विशिष्टात्तीर्थकरात् तत्प्राप्त्या' योगक्षेमप्राप्त्या, सकलभव्यविषयत्वे योगक्षेमयोः, 'सकलभव्य' [illegible] 'मुक्तिप्रसङ्गात्' योगक्षेमसाध्यस्य मोक्षस्य प्राप्तेः, एतदेव भावयन्नाह–'तुल्यगुणाः' सदृशज्ञानादिशक्तयो 'हि' यस्मादमी 'एते' तीर्थंकराः 'प्रायेण' बाहुल्येन, शरीरजीवितादिना त्वन्यथात्वमपीति प्रायं (प्रायेणेति) ग्रहणं, 'ततः' तुल्यगुणत्वात् हेतोः 'चिरतरकालातीतात्' पुद्गलपरावर्तपरकालभूताद्, 'अन्यतरस्माद्' भरतादिकर्मभूमिवर्तिनो 'भगवतः' तीर्थकराद्, 'बीजाधानादिसिद्धेः' बीजाधानोद्भेदपोषणनिष्पत्तेरवन्ध्यत्वात्: 'अल्पेनैव कालेन' पुद्गलपरावर्तमध्यगतेनैव।

'सकलभव्यमुक्तिः, स्यात्' सर्वेऽपि भव्याः सिध्येयुः, ननु मादावपि काले बीजाधानादिसम्भवात् कथमल्पेनैव कालेन सर्वभव्यमुक्तिप्रसङ्ग इत्याशङ्क्याह–'बीजाधानमपि' धर्मप्रशंसादिकमपि, आस्तां सम्यक्त्वादीत्यपिशब्दार्थः, 'हि' यस्माद् 'अपुनर्बन्धकस्य' पापं न तीव्रभावात् करोतीत्यादिलक्षणस्य 'न च' नैव 'अस्यापि' अपुनर्बन्धकस्यास्तां सम्यग्दृष्ट्यादेः 'पुद्गलपरावर्तः' समयसिद्धः 'संसार इति' संसारकाल 'इतिकृत्वा' इतिहेतोः, अल्पेनैव कालेन सर्वभव्यमुक्तिः स्यादिति योगः॥

टी०...यदि अचिन्त्यशक्तिमन्तो भगवन्तः, सर्वभव्येषूपकारं कर्तुं क्षमाः स्युस्तदा कथमयं भेदो यदुत बीजाधानादिविषयेषु भव्येषु योगक्षेमात्मकमुपकारं कुर्वन्ति भगवन्तः, सर्वभव्येषु तादृशमुपकारं न कुर्वन्ति इति भेदविषयक–मान्यता न भवेत्तर्हि को दोषः ? पात्रभेदविवक्षाया अमन्तव्यत्वेऽर्थात् सर्वभव्यविषयक–योगक्षेमे कस्यचिदेकस्यापि तीर्थंकृतो न भवतः, अर्थादेकेनाऽपि केनचित्तीर्थकृता सर्वभव्यसापेक्षो योगक्षेमे कदाचिदपि न कृते, विवक्षितविशिष्टभव्येषु योगक्षेमे क्रियेते इति त्रिकालाबाधित–सिद्धान्तो वर्तते, यदि कस्मादेकस्मात् विशिष्टात्तीर्थंकराद् योगक्षेम-प्राप्तिद्वारा, योगक्षेमयोः सकलभव्यविषयत्वेन सर्वेषां भव्यानां योगक्षेमसाध्यस्य मोक्षस्याऽवाप्तिः–

–प्राप्तिः स्याद् यत एते तीर्थंकरास्तुल्यगुणाः–सदृशज्ञानादिशक्तिभाजो भवन्ति प्रायेण–बाहुल्येन (शरीरजीवितादिना बाह्याऽवस्थापेक्षया त्वन्यथात्वमपीति प्रायेण ग्रहणम्) अर्थाद्भगवतां तुल्यगुण-त्वहेतुद्वारा, चिरतरकालातीतात्–पुद्गलपरावर्तपरकाल–मध्यकाले जातात्, भरतादिपञ्चदशकर्म-भूमिवर्तमानात् भगवतः–तीर्थंकरात्, पूर्वकथितबीजाधानोद्भेदपोषणानां निष्पत्तेः–सिद्धेरुत्पत्तेः, अल्पेनैव कालेन–पुद्गलपरावर्तान्तर्गतेनैव कालेन, सर्वेऽपि भव्याः सिध्येयुः–सिद्धिमाप्नुयुरिति, असम्भवेन महत्यापत्तिः स्यात्, ननु अनादिकालावच्छेदेन बीजाधानादिसम्भवेन कथमल्पेनैव कालेन सर्वभव्यमुक्तिप्रसङ्ग इति चेदुच्यते धर्मप्रशंसादिकबीजाधानमपि (सम्यक्त्वादेस्तु का वार्तेत्यपि शब्दार्थः) अपुनर्बन्धकस्य (पापं न तीव्रभावात् करोतीत्यादिलक्षणवतोऽपुनर्बन्धकस्य विवक्षिताऽऽत्मनः) अपुनर्बन्धकस्याऽपि (सम्यग्दृष्ट्यादेस्तु का वार्तेत्यपिशब्दार्थः) नैव पुद्गलपरावर्तो (पुद्गलपरावर्तनामकजैनशास्त्रसिद्धः–प्रसिद्धः) पुद्गलपरावर्तनामककालविशेषः जैनागम-

सिद्धः, संसारकालो वर्णितः तदपेक्षया इति कारणेन, बुद्धवर्धमानस्वामिकालान्तर्वर्तिना, अल्पेनैव कालेन सर्वभव्यानां मुक्तिः स्यादिति, असम्भवेन भयकरी महाप्रसक्तिः स्यादेवेति ॥ लोकनाथेभ्य इत्येकादशं पदं समाप्तम् ॥

**तथा 'लोकहितेभ्यः' इह लोकशब्देन सकलसांव्यवहारिकादिभेदभिन्नः प्राणिलोको गृह्यते, पञ्चास्तिकायात्मको वा सकल एव, एवं चालोकस्यापि लोक एवान्तर्भावः, आकाशास्तिकायस्योभयात्मकत्वात्, लोकालोकव्यवस्थानिबन्धनं तूक्तमेव, तदेवंविधस्य लोकस्य हिताः,**

**यथावस्थितदर्शनपूर्वकं सम्यक्प्ररूपणाचेष्टया तदायत्यबाधनेनेति च, इह यो यं, याथात्म्येन पश्यति तदनुरूपं च चेष्टते भाव्यपायपरिहारसारं, स तस्मै तत्त्वतो हित इति हितार्थः, इत्थमेव तदिष्टोपपत्तेः, इष्टं च सपरिणामं हितं, स्वादुपथ्यान्नवदिति रोगिणः,**

पं०...'सांव्यवहारिकादिभेदभिन्नः' इति नरनारकादिर्लोकप्रसिद्धो व्यवहारः संव्यवहारस्तत्र भवाः सांव्यवहारिकाः, आदिशब्दात्तद्विपरीता नित्यनिगोदावस्थाः, असांव्यवहारिका जीवा गृह्यन्ते, त एव भेदौ प्रकारौ ताभ्यां भिन्न इति ।

'यथावस्थितेत्यादि' यथावस्थितम्—अविपरीतं दर्शनं—वस्तुबोधः पूर्वं—कारणं यत्र तद् यथावस्थितदर्शनपूर्वकं, क्रियाविशेषणमेतत्, 'सम्यक्प्ररूपणाचेष्टया' सम्यक्प्रज्ञापनाव्यापारेण 'तदायत्यबाधनेन' तस्य—सम्यग्दर्शनपूर्वकं प्रज्ञापितस्यायतौ—आगामिनि काले अबाधनेन—अपीडनेन 'इति च' अनेन च हेतुना हिता इति योगः, एतदेव भावयन्नाह—'इह' जगति 'यः' कर्त्ता 'यं' कर्मतारूपं 'याथात्म्येन' स्वस्वरूपानतिक्रमेण 'पश्यति' अवलोकते 'तदनुरूपं च' दर्शनानुरूपं च 'चेष्टते' व्यवहरति 'भाव्यपायपरिहारसारम्' अनुरूपचेष्टनेऽपि भाविनमपायं परिहरन्नित्यर्थः' न पुनः सत्यभाषिलौकिककौशिकमुनिवद् भाव्यपायहेतुः 'स' एवंरूपः 'तस्मै' याथात्म्यदर्शनादिविषयीकृताय 'हितः' अनुग्रहहेतुः 'इति' एष 'हितार्थो' हितशब्दार्थः, कुत इत्याह—

'इत्थमेव' अनेनैव याथात्म्यदर्शनादिप्रकारेण, तस्य—सद्भूतदर्शनादिक्रियाकर्तुः, इष्टोपपत्तेः—इष्टस्य—क्रियाफलस्य चेतनेष्वचेतनेषु वा विषये क्रियायां सत्यां स्वागतस्य, चेतनविशेषेषु तु स्वपरगतस्य वा घटनाद्, इष्टमेव व्याचष्टे, 'इष्टं पुनः सपरिणामम्' उत्तरोत्तरशुभफलानुबन्धि 'हितं' सुखकारि, प्रकृतहितयोगसाध्योऽनुग्रह इतिभावः, दृष्टान्तमाह-'स्वादुपथ्यान्नवत्' स्वादुश्च जिह्वेन्द्रियप्रीणकं पथ्यं इव पथ्याः-अततोल्लङ्घनीयत्वात् अविपत्कारकस्ततः स्वादु पथ्यं च स्वादुपथ्यं तदन्नं च तद्वद् 'अतिरोगिणः' अतीतप्रायरोगवतः, अभिनवे हि रोगे 'अहितं पथ्यमप्यातुरे' इति वचनात्पथ्यानधिकार एवेति, 'इति रोगिणः' इति पाठे 'इति' एवंप्रकारः स्वादुपथ्यान्नार्हो यो रोगस्तद्वत इति, स्वादुग्रहणं तत्कालेऽपि सुखहेतुत्वेन विवक्षितत्वाद्, अस्वादुत्वे च पथ्यस्याप्यतथाभूतत्वान्नैकान्तेनेष्टत्वमिति,

उपचारतश्च स्वादुपथ्यान्नस्येष्टत्वं, तज्जन्यानुग्रहस्यैवेष्टत्वाद्, यथोक्तम्–'कज्जं' इच्छंतेणं, अणंतरं कारणंपि इछ्ठंति जह आहारजतित्ति, इच्छंतेणेह आहारो ॥१॥' एवमिष्टहेतुत्वादियं क्रियाऽपि हितयोगलक्षणा इष्टा सिद्धेत्यत एव, एवं व्यतिरेकमाह–

**टी०**...तथा–समुदायेषु प्रवृत्ताः शब्दा अवयवेष्वपि प्रवर्त्तन्ते इति न्यायस्य सन्दर्शनार्थ-माह 'लोकहितेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः' इह लोकशब्देन लोकप्रसिद्धो नरनारकादि–व्यवहारः संव्यवहारस्तत्र भवा सांव्यवहारिकाः, आदिशब्दात्तद्विपरीता नित्यनिगोदाऽवस्था असांव्यवहारिका जीवा गृह्यन्तेऽर्थात् सकल सांव्यवहारिका–सांव्यवहारिकोभयभेदभिन्नः प्राणिलोको गृह्यते.

(ये जीवाः सूक्ष्मनिगोदतो निर्गत्य बादरनिगोदेऽथवा पृथ्वीकायादावागताः स्युस्ते व्यवहारराशिस्था जीवा उच्यन्ते. एकशो व्यवहारराशौ, आगत्यानन्तरं पुनः सूक्ष्मनिगोदे गतास्ते व्यवहारराशिस्थाः कथ्यन्ते. यावन्तो जीवा व्यवहारराशितो मोक्षं गता भवेयुस्तावन्तो जीवा अव्यवहारराशितो व्यव-हारराशावागच्छेयुरेतादृशी लोकस्थितिः,)

(अनन्तानां जीवानां मध्ये एकं शरीरं, एतादृशान्यसंख्यानि शरीराणि मिलितानि तथापि चर्मचक्षु-षाऽदृश्यानि स सूक्ष्मसाधारणवनस्पतिकायोऽथवा सूक्ष्मनिगोदः, एते सूक्ष्मनिगोदजीवाश्च चतुर्दश-रज्ज्वात्मकलोके सर्वत्र सर्वथाऽभिव्याप्य भरिताः सन्ति, सूक्ष्मत्वेन जगतो व्यवहारे नायान्ति, केन-चित् मारिता अपि न म्रियन्ते, अपि न दह्यन्ते, छेदिता अपि न छिद्यन्ते परन्तु स्वल्पायुष्कत्वेन वहूनि जन्ममरणानि कुर्वन्ति. अनादितो निगोदे जन्ममरणानि वर्त्तमानानि भवन्ति, ये जीवा निगोदमध्यतो निर्गता न जगतो व्यवहारे चागता न, तेऽव्यवहारराशिगता जीवाः कथ्यन्ते)

अथवा पंचास्तिकायात्मकः सकलो लोको ग्राह्यः, अलोकस्याऽपि लोकएवाऽन्तर्भावः–समावेशः, यतः, आकाशास्तिकायो लोकाऽलोकोभयात्मकोऽस्ति, लोकादिव्यवस्थाया निबन्धनं पूर्वोक्तमेव, अत एव सकलप्राणिलोकरूपायऽथवा सकलपंचास्तिकायात्मकाय लोकाय हिताः 'लोकहिताः' (अस्तिकायः –प्रदेशानां समुदायोऽस्तिकायः, धर्माधर्माऽऽकाशजीवपुद्गलाः पञ्चाऽस्तिकायाः,

(१) धर्मास्तिकायः = जीवपुद्गलानां गच्छतां गतिसहायकं द्रव्यं धर्माऽस्तिकायः, द्रव्यस्य निर्वि-भाज्यभागरूपाः प्रदेशाः, असङ्ख्यात–प्रदेशात्मको धर्मास्तिकायः, सर्वलोकव्यापी चलनक्रियाया-मत्यन्तोपकारि, तत्त्वम् ।

(२) अधर्मास्तिकायः = स्थितिमतां जीवपुद्गलानां स्थिति–सहायकं द्रव्यं, असंख्यातप्रदेशात्मकः, सर्वलोकव्यापी, सर्वस्थिरकार्येषूपयोगि तत्त्वम् ।

(३) आकाशास्तिकायः = धर्मादीनां सर्वेषां द्रव्याणामवकाशदमाकाशम्, अनंतप्रदेशात्मकम्,

लोकालोकभेदेन द्विविधं, यावदाकाशप्रदेशेषु धर्मादीनां सत्ता, तावदाकाशप्रदेशात्मकं लोकाकाशम् असंख्यातप्रदेशात्मकं, लोकाकाशादन्यदलोकाकाशं, अनंतप्रदेशात्मकं आकाशमेकं सर्वव्यापकं परन्तु धर्मास्तिकायादिद्रव्यपञ्चकसहस्थायित्वरूपोपाधिना लोकाकाशं तदुपाधिरहितमलोकाकाशमिति द्विधा भेदौ वर्त्तते.

(४)पुद्गलास्तिकायः = रूपरसगन्धस्पर्शवन्तः पुद्गलाः, पूरणगलनधर्माणः, अत्र परमाणव एवं पुद्गलत्वेन मुख्यवृत्त्या व्यह्रियन्ते यतः परमाणूनां मिलनेन स्कन्धरूपत्वं स्कन्धतो वियुक्तत्वेन-भेदेनार्थाद् मिलनभेदरूपधर्मवत्वेन परमाणूनां पुद्गलात्वम्. यदा परमाणवो मिथो मिलन्ति तदा स्कन्धदशामाप्नुवन्ति, यदा परमाणवो भिद्यन्ते तदा पुनः परमाणव एव, एवं परमाणवः पुनर्द्वित्रिप्रदेशिनो यावदनंत–प्रदेशिनः, स्युस्तदा स्कन्धपरिणामाः कथ्यन्ते च स्कन्धतो भिन्ना अपि पतन्ति, तत्र कोऽप्येकः परमाणुर्जघन्यत एक समयं, उत्कृष्टतोऽसख्यसमयं यावत् परमाणूरूपेण भिन्नस्तिष्ठति, तदनन्तरमवश्यं स्कन्धत्वेन परिणमति, पुनरेष परमाणुर्यदा स्कन्धे लगति तदा प्रदेशसंकेतेन कथ्यते, स्कन्धलग्नाः परमाणवः प्रदेशाः, पुनः परमाणुभिः सृष्टाः स्कन्ध–देशप्रदेशरूपा विकारा अपि पुद्गलभेदाः कथ्यन्ते, पुद्गले शब्दान्धकाराद्या दशविधाः परिणामरूपा धर्मास्तिष्ठन्ति ।

जीवाऽस्तिकायः = ज्ञानदर्शनरूपोपयोगः–चेतनालक्षणो जीवः, असख्यातप्रदेशात्मकः, "यः कर्ता-कर्मभेदानां भोक्ता कर्मफलस्य च, संसर्त्ता परिनिर्वाता, सह्यात्मा नान्यलक्षणः ।।"
हितकारिणोऽर्हन्तो भगवन्तो भवन्ति, तेभ्यो नमः ।

हित–पदार्थस्य परमार्थः = यथावस्थितदर्शनपूर्वकः = यत्प्रकारावच्छेदेन स्थितं–अविपरीतत्वेन दर्शन-रूपवस्तुबोधः पूर्वं–कारणं यत्र तद्, प्ररूपणाचेष्टारूपक्रियाया विशेषणं. अर्थाद् यथावस्थितवस्तुबोध-कारणजन्यसम्यक्–प्रज्ञापनानामक–व्यापारविषयीकृत–सम्यग्दर्शनपूर्वक–प्रज्ञापनाविषयस्य वस्तुन आगामिकालापेक्षया, अबाधन–अपीडन–अनुकूलत्वरूपेण हेतुना हिता अर्थाद् यः कर्त्ता यं विषयं (कर्मतापन्नं) स्वस्वरूपानुकूलेन याथार्थ्येन पश्यति, तद् दर्शनानुरूपं–यथादर्शनं व्यवहरति (व्याहरति) दर्शनानुरूप–प्रज्ञापनाव्यापाररूपक्रियायां सत्यामपि भविष्यत्कालीनमपायं (बाधनं–पीडन) परिहरन्नित्यर्थः (न पुनः सत्यवादिलौकिक–कौशिकविश्वामित्रनामक–मुनिवद् भाव्यपायहेतुः) स एवंरूपः, यथार्थदर्शनपूर्वक–भाव्यपायपरिहारपूर्वकयथार्थ–प्रज्ञापनाव्यापारविषयीकृताय वस्तुने तत्त्वतोऽनुग्रहहेतुर्हित इति हितार्थः ।

यो वस्तुमात्रं प्रति यथार्थद्रष्टा–ज्ञाता, तत्तद्दर्शनज्ञानपूर्वक–भाव्यपायपरिहारपूर्वक–सम्यक्प्ररूपणा-रूपक्रिया–कर्त्ता, स तत्त्वतो हितोऽनुग्रह–उपकारकर्त्ता समर्थ्यते नान्यः, यो वस्तुतत्त्वं प्रति न यथार्थ द्रष्टा–ज्ञाता, नास्ति तत्तद्दर्शनज्ञानवैशिष्ट्यावच्छेदेन भाविअपायपरिहर्त्ता, तद्भावपूर्वकसम्यक्-

प्ररूपको न, स तत्त्वतोऽहितोऽननुग्रह–अनुपकारकर्त्ताऽस्तीति, यथा माता वात्सल्याऽतिशयतो हितैषिण्यपि पुत्रं क्षीरमधिकं भोजयन्ती, ज्ञानाभावतो भाविनमपायमपरिहरन्ती, अधिकक्षीरभोजनादनन्तरमजीर्णादिभवनेन वमनादिकं कुर्वन्तं पुत्रं प्रेक्षमाणाऽनुतपन्ती लोकैर्दृश्यते इति,

अनेनैवाविपरीतदर्शनज्ञानपूर्वकसम्यक्प्रज्ञापनाविषयं प्रत्युत्तरकालावच्छेदेनाबाधनपूर्वक-व्यवहाररूप-क्रियाकर्त्तुः, इष्टं क्रियाफलं (स्वपरहितं) चेतनेषु वाऽचेतनेषु क्रियायां सत्यां स्वगतं क्रियाकर्त्तृरूप-चेतनगतं घटते, चेतनविशेषेषु विषये क्रियायां सत्यां तु स्वपरगतं घटतेऽर्थात् क्रियाकर्त्तृस्वचेतनगतं क्रियाविषयचेतनविशेषगतं घटते ॥

तत्तद्विषयं प्रति तत्तद्व्यवहाररूपा क्रिया, च तत्तद्व्यवहारकर्त्ता हितः–अनुग्रह–उपकारहेतुरस्ति, इति, सण्टङ्कः ।

इष्टपदार्थव्याख्या = 'इष्टं च सपरिणामं हितं' उत्तरोत्तरं–अग्रतोऽग्रतो भाविकालीन–शुभफलेन –पुण्यानुबन्धिपुण्यरूप–शुभफलेन सहाविच्छिन्नप्रवाहरूपसम्बन्धनामकानुबन्धसहितं हितं–सुखकारि यत्तदिष्टं, अर्थात् प्रकृतहितयोगसाध्योऽनुग्रह–उपकारो वस्तुत इष्ट-इष्टत्वेन परिभाष्यते–यथास्थित-स्वरूपदर्शनपूर्वकप्ररूपणाजन्योपकार एवेष्टत्वेन व्याख्यातः ।

यथा = दृष्टान्तोपन्यासः क्रियते = स्वादुपथ्यान्नवद् = रसनेन्द्रियप्रीणनकारणत्वेन स्वादु च सततोल्लङ्घनीयत्वापेक्षया पन्था इव पन्थाः–भविष्यत् कालस्तत्र पथि साधु पथ्यं च स्वादुपथ्यं तदन्नं च तद्वत्, अतीतप्रायरोगवतः प्राणिनः, (अभिनवे हि रोगे 'अहितं पथ्यमप्यातुरे' इतिवचनात् पथ्यानधिकार एवेति इति रोगिण' इति पाठे एवं प्रकारः स्वादुपथ्यान्नार्हो यो रोगस्तद्वत इति) स्वादुपथ्यान्नवदत्र स्वादुत्वेन पथ्यत्वेनान्नमेकान्तेनेष्टं वर्तमानकालीनसुखहेतुभूतस्वादुत्वाभावे सति पथ्यस्य सुखहेतुरेकान्तेन न भवतीतीष्टत्वाभावः, स्वादुत्वसहचरितस्य पथ्यस्य सुखहेतुत्वेनैकान्तेनैवेष्टम् ।

वर्त्तमानकालावच्छेदेन सुखकारणत्वेन स्वादु, भविष्यत्कालावच्छेदेन सुखकारणत्वेन पथ्यम्, वर्त्तमानभविष्यदुभयकालापेक्षया स्वादुपथ्यान्न–ग्रहणम्, अन्नेष्टत्वमुपचारतः–कारणे कार्योपचारतः, यतः स्वादुपथ्यान्नजन्यतृप्तिरूपानुग्रहरूपोपकारस्यैवेष्टत्वात् 'कार्यमिच्छता पुरुषेणानन्तरं–पूर्वं कारणमपीष्टमिति, यथाऽऽहारजतृप्तिमिच्छतेहाहारः' ॥

अर्थाद् वस्तुतो यथास्थितस्वरूपदर्शनपूर्वकं भाव्यपायपरिहारपूर्वकप्ररूपणाजन्योपकार एव इष्टरूप-कार्यमस्ति, तथापि, अव्यवहितत्वेन कारणत्वेन, एषा यथावस्थितस्वरूपदर्शनपूर्वकभाव्यपायपरिहार-पूर्वकप्ररूपणारूपहितयोगलक्षणक्रियाऽपीष्टरूपाऽस्त्येव, विशिष्टानुग्रहकार्यरूपेष्टं प्रति यथावस्थित

स्वरूपदर्शनादिपूर्वकप्ररूपणारूपहितयोगलक्षण–क्रिया कारणमिति कार्यकारणभावो ज्ञेयः ।।

**अतोऽन्यथा तदनिष्टत्वसिद्धिः तत्कर्तुरनिष्टाप्तिहेतुत्वेन,**

पं०...'अतः' उक्तरूपात् 'यो यं याथात्म्येन पश्यतीत्यादिकात् प्रकाराद्' "अन्यथा" प्रकारान्तरेण चेष्टायां 'तदनिष्टत्वसिद्धिः' तस्याः–चेष्टाया, अनिष्टत्वम्–असुखकारित्वं तस्य सिद्धिः–निष्पत्तिः, कथमित्याह –'तत्कर्त्तुः' प्रकारान्तरेण चेष्टाकर्त्तुः, 'अनिष्टाप्तिहेतुत्वेन अनिष्टं चेहाशुभं कर्म तत्प्राप्तिः–बन्धस्तस्य हेतुत्वेन प्रकारान्तरचेष्टायाः, अयमभिप्रायो–विपर्यस्तबोधो विपरीतप्रज्ञापनादिना चेतनेष्वचेतनेषु वाऽननुरूपं चेष्टमानोऽनुरूपचेष्टनेऽपि भाविनमपायमपरिहरन्नियमतोऽशुभकर्म्मणा बध्यते, परेषु त्वनिष्टाप्तिहेतुः स स्यान्नवेत्यनेकान्तः, अचेतनेषु न स्याच्चेतनेषु तु स्यादपीतिभावः । ननु परेष्वहितयोगस्यानैकान्तिकत्वे कथं तत्कर्त्तुरनिष्टाप्तिहेतुत्वमैकान्तिकं प्रकारान्तरचेष्टनस्येत्याशङ्कयाह–

टी०...दर्शनबोधादिविपर्यासप्रयुक्तमिथ्याप्रज्ञापनादि–हेतुपूर्वायां चेतनाऽचेतनान्यतरविषयकविपरीतचेष्टायां सत्यां, अनुरूपचेष्टायामपि भाव्यपायाऽपरिहारात् तत्तद्विपरीतचेष्टावानवश्यमशुभपापकर्मणा बध्यते परविषयान् (कार्यरूपान्) प्रति त्वशुभकर्मबन्धहेतुमान् भवति, स (विपर्यस्तबोधादिमान्) अनिष्टाप्तिहेतुमान् स्यान्नवेत्यनेकान्तः, अचेतनेषु विषयेषु न स्याच्चेतनेषु विषयेषु स्यादपीति भावः ।

ननु विपरीतबोध–विषयभूत–चेतनाचेतनपदार्थेषु, अहितयोगः–अशुभकर्मबन्धः, अनैकान्तिकः–अनियतोऽस्ति, अर्थाच्चेतने स्यादचेतने न स्यादित्यनैयत्यं, ततो विपरीतप्ररूपणादिक्रियाकर्तुर्विपरीतक्रिया, अहितयोगं प्रत्येकान्तेन–नियतत्वेन हेतुः कथं ? विपरीतबोधविषयगताऽनिष्टप्राप्तिर्नियता नास्ति, तदा तादृशपदार्थविषयक विपरीत–बोधादिक्रिया, विपरीत-क्रियाकारके, कर्तरि कथमनिष्टप्राप्तौ जनकत्वेन नियता स्यादिति चेत् कथ्यते, आगमस्य (अपवादरूप–जिनवचनस्याथवा यथार्थबोधरूपस्य) आदेशं विना, विपरीतदर्शनादिरूपाशुभकर्मकारणादर्थादशुभकर्मबन्ध प्रति (कार्यं प्रति) विपरीतदर्शनप्ररूपणादि–क्रिया कारणमिति कार्यकारणभावे निश्चितेऽर्थात् पापहेतोरपि, अशुभकर्मबन्धो जायते (पापहेतुद्वारा परेषु विषयेषु, अपायादनिष्टात् पुनः परेषु विषयेषु पापकर्मभवनमेवेत्यपिशब्दार्थः)

अत्रेदं हार्दम् = आगमस्यादेशं गृहीत्वा क्वचिद्, अपवादे (कारणिके पदे) पापस्य हेतुष्वपि जीवहिंसादिषु प्रवृत्तिं कुर्वन् पापकर्मणा न लिप्यते, अन्यथा = आगमादेशं वर्जयित्वा, पापहेतुषु प्रवृत्तौ अथवा विपरीतदर्शनप्ररूपणादिक्रियारूपायां प्रवृत्तौ सत्यां परेषु–विषयेषु प्रत्यपायस्य (महानिष्ट–अशुभस्य) अभावेऽपि स्वप्रमाद–विपरीतदर्शनप्ररूपणादिरूपस्वप्रमाद (आत्मविषयकाज्ञानता–अन-

वधानता) नामकदोषस्य सत्त्वात्, एकान्तेन' पापस्य भवनं—बन्धनं इति तत्कर्त्तु:—विपरीतदर्शन-प्ररूपणादिकर्त्तु रनिष्टप्राप्तिहेतुत्वमैकान्तिकमेवेति.

**अनागमं पापहेतोरपि पापभावात्, इतरेतरापेक्षः कर्तृकर्म्मप्रकारः, नाचेतनाहितयोग उपचरितः,**

पं०...'अनागमम्' आगमादेशमन्तरेण 'पापहेतोरपि' अयथावस्थितदर्शनादेरकुशलकर्म्मकारणात् 'पापभावाद्' अकुशलकर्म्मभावात् पापहेतुकृतात्पुनः परेष्वपायात्पापभाव एवेत्यपिशब्दार्थः, अयमभिप्रायः—आगमादेशेन क्वचिदपवादे जीववधादिषु पापहेतुष्वपि प्रवृत्तस्य न पापभावः स्याद्, अन्यथा तु प्रवृत्तौ परेषु प्रत्यपायाभावेऽपि स्वप्रमाददोषभावान्नियमतः पापभाव इति तत्कर्त्तु रनिष्टाप्तिहेतुत्वमैकान्तिकमिति ।। ननु चेदमपि कथं निश्चितं ? यदुत—अनागमं पापहेतोरप्यवश्यं पापभाव इत्याशङ्क्याह—'इतरेतरापेक्षः' परस्पराश्रितः 'कर्त्तृकर्म्म-प्रकारः' कारकभेदलक्षणः, कर्त्ता कर्म्मापेक्ष्य व्यापारवान् कर्म्म च कर्त्तारमिति भावः, यथा प्रकाश्यं घटादिकमपेक्ष्य प्रकाशकः प्रदीपादिः, तस्मिंश्च प्रकाशके सति प्रकाश्यमिति, तथा विपर्यस्तबोधादिपापहेतुमान् पापकर्त्ता पुमानवश्यं तथाविधकार्यरूपपापभाव एव स्यात्, पापभावोऽपि तस्मिन् पापकर्त्तरीत्यतः स्थितमेतद् यदुत—प्रकारान्तरचेष्टनस्यानिष्टत्वसिद्धिः, हितयोगविपरीतत्वात्, विषयं प्रत्यहितयोगत्वं चेति । नन्वेवं कथमचेतनेष्वहितयोगः, तत्साध्यस्य क्रियाफलस्यापायस्य तेषु कदाचिदप्यभावात्, यदि परमुपचरितः, तस्य चोपचरितत्वे हितयोगोऽपि तेषु तादृश एव प्रसजति, नच स्तवे तादृशस्य प्रयोगः, सद्भूतार्थविषयत्वात् स्तवस्य, ततः कथं सर्वलोकहिता भगवन्त इत्याशङ्क्याह—"न" नैव "अचेतनाहितयोगः" अचेतनेषु—धर्मास्तिकायादिष्वहितयोगः-अपायहेतुर्व्यापारो मिथ्यादर्शनादिरुपचरितः—अध्यारोपितोऽग्निर्माणवक इत्यादाविवाग्नित्वम्, अत्र हेतुमाह—

टी०...ननु आगमादेशं विना विपरीतदर्शनादिरूपाशुभकारणादपीति—नियमतस्तत्कर्त्तुः पापकर्मबन्ध इति निश्चये किं प्रमाणभूतं कारणमिति चेदुच्यते, कारकविशेषरूपकर्तृकर्म-नामकप्रकारः, परस्परापेक्षः सन् परस्पराश्रितोऽस्ति, (नाम्नः क्रियापदेन सह साक्षात्सम्बन्धः कारकम्—क्रियया सहान्वयित्वं कारकस्य लक्षणं, षष्ठीं विभक्तिं विमुच्य सर्वा विभक्तयः क्रियापदेन सह साक्षात्सम्बन्धं कुर्वन्ति ततस्ताः कारकविभक्तयः कथ्यन्ते, कारकं क्रियाया विशेषणमस्ति, षोढा कारकविभक्तयः कर्त्तृकर्मकरणसम्प्रदानापादानाधिकरणरूपाः सन्ति.) कर्त्ता, कर्मापेक्ष्य व्यापारवान् भवति, कर्म्म च कर्त्तारमपेक्ष्य व्यापार—क्रियाविषयो भवति, यथा प्रकाश्य—प्रकाशक्रियाविषयं घटादिकमपेक्ष्य, प्रदीपादि—प्रकाशकः—प्रकाशक्रियाकर्त्ता भवति, प्रकाशके—प्रकाशकर्त्तरि, प्रदीपादौ सत्येव, प्रकाश्यं प्रकाशविषयरूपं घटादिकं कर्म भवतीति, परस्पराश्रयसम्बन्धेन कर्त्तृकर्मप्रकारआश्रितोऽस्ति. कर्त्ता कर्मापेक्षतेऽर्थात् किं करोत्येष इति प्रश्ने एष कर्त्ता, इदं करोति. कर्त्ता निराश्रयो न भवति. किमाश्रित्य करोतीति प्रश्ने, इदमाश्रित्य एष करोति.

तथा–एवमत्र, विपरीतबोधादिपापहेतुमान् पापकर्त्ता पुरुषोऽवश्यं भवति तदा, यथा तथाविधकार्यरूपपापभाव एव स्यात्,

पापकर्त्तरि सत्येव तथाविधकार्यरूप (कर्म) पापबन्धः स्यात्, तथाविध कार्यरूप (कर्म) पापबन्धसत्तायां, विपरीतबोधादिहेतुमान् पापकर्त्ता पुरुषोऽवश्यं भवति, एवं कर्त्ता कर्मापेक्षते, कर्म कर्त्तारमपेक्षते, कर्त्ता, कर्म विना न भवति. (कस्य कर्त्तेति प्रश्नो भवति) कर्म, कर्त्तारं विना न भवति (केन तत् क्रियते इति प्रश्नो भवति) (कर्तृकर्मणोरविनाभावः सम्बन्धः सुतरामागच्छत्येव.) अत्र–इदं स्थितं भवति, विपरीतबोधादिचेष्टा, अनिष्टा सापाया, हितयोगविपरीतत्वात् (हेतुः) यत्र यत्र हितयोगविपरीतत्वं तत्र तत्र विपरीतबोधादिचेष्टायां सत्यां अनिष्टत्वं–प्रत्यपायजनकत्वं सिद्धं, किञ्च विषयं प्रति, अहितयोगत्वं, विपरीतबोधादिचेष्टागतंप्रत्यपायजनकत्वेन भाव्यपायपरिहारभावसहितविपरीतबोध–दर्शनप्ररूपणादिचेष्टाकर्त्तरि, सिद्धमेव.

ननु विपरीतविशिष्टनिरुक्त–चेष्टाया विषयभूतेष्वचेतनपदार्थेषु विपरीत–विशिष्टचेष्टाद्वारा, अहितयोगत्वां कथं ? यतोऽहितयोगसाध्यस्य क्रियाफलरूपापायस्यानिष्टस्य अचेतनपदार्थेषु कदाचिदपि सम्भवो नास्त्येव, यदि, अचेतनपदार्थगतोऽहितयोग उपचार-आरोविषयः कथ्यते तदाऽचेतनपदार्थगतहितयोगोऽपि, उपचरितः-आरोपितः–कल्पितो भवेदित्यापत्तिः, अतिप्रसङ्ग आगच्छेत्। अन्यच्च भगवतामर्हतां स्तवे (स्तोत्रे–स्तुतौ उपचरितत्वाद्विशिष्टस्य प्रयोगो (शब्दरचनाविशेषो) न भवति, यतो भगवदर्हत्स्तवः, सद्भूतार्थ (अनुपचरित–वास्तविक–सत्यार्थ) विषयको भवति, अचेतनगतहितयोगस्य सत्यस्याभावात् कथं सर्वलोकहिता अर्हन्तो भगवन्त इति चेदुच्यते धर्मास्तिकायादिरूपेष्वचेतनपदार्थेषु, अपाय (अनिष्ट–अनर्थ) स्य हेतुभूतो मिथ्या (विपरीत) दर्शनप्ररूपणादिरूपव्यापारः (विशिष्टचेष्टारूपक्रिया) उपचरित आरोपितो नास्त्येव परन्तु अनुपचरितः–सद्भूतः–सत्य एव तदाऽचेतनविषयं प्रति हितयोगस्तु सुतरां सत्यत्वेनाऽनुपचरितत्वेन सिद्ध एव. (यथाग्निर्माणवकः (विदूषकः) इत्यादिप्रयोगेषु 'अग्नित्व' मुपचरितं वर्त्तते, अत्रापि न तथैव ('अग्निर्माणवकः' इत्यत्राग्निपदशक्यार्थस्याग्निनिष्ठशुचित्वकान्त्यादि–सजातीय–शुचित्वकान्त्यादि विशिष्टे लक्षणा, शक्यार्थत्यागेन लक्षणयाऽन्यार्थ–बोधनमुपचारः, यथा मञ्चाः क्रोशन्ति, अग्निर्माणवक इत्यादौ, अत्र तु अन्वयाऽनुपपत्तिरेवोपचारबीजम् ।)

**पुनरागमकर्म्मकत्वेन सचेतनस्यापि एवंविधस्यैव नायमिति दर्शनार्थः ।। कर्तृव्यापाराऽपेक्षमेव तत्र कर्म्मत्वं, न पुनः स्वविकारापेक्षं,**

**कङ्कटुकपक्तावित्थमपि दर्शनादिति लोकहिताः १२ ।।**

पं०"पुनरागमकर्म्मकत्वेन" पुनरागमनं-प्रत्यावृत्य–कर्त्तर्येव क्रियाफलभूतापायभाजनीकरणेन कर्म्म यस्य स पुनरागमकर्म्मकोऽचेतनाहितयोगस्तस्य भावस्तत्त्वं तेन, उपचरितोऽहितभावो न मुख्यभावकार्यकारी, माणवकाग्नित्ववत्, अचेतनाहितयोगस्तु प्रत्यावृत्य स्वकर्त्तर्येव क्रियाफलमपायमुपरचयन्परवधाय, दुःशिक्षितस्य शस्त्रव्यापार इव तमेव घ्नन् कथमुपचरितः स्याद् ?, एवं तर्हि सचेतनेष्वप्यहितयोगः पुनरागमकर्म्मक एव प्राप्त इति परवचनावकाशमाशङ्क्याह–"सचेतनस्यापि" जीवास्तिकायस्येत्यर्थोऽहितयोग इति गम्यते, अचेतनस्य त्वस्त्येवेत्यापिशब्दार्थः, "एवंविधस्यैव" अचेतनसमस्यैव क्रियाफलभूतेनापायेन रहितस्यैवेत्यर्थो, "न" नैव 'अयं" प्रकृतोऽचेतनाहितयोग "इति" एतस्य पूर्वोक्तस्यार्थस्य दर्शनार्थः, व्यापक इति भावः अहितयोगात् सचेतने कस्मिंश्चित्क्रियाफलस्यापायस्यापि भावात्, ननु यद्यचेतनेषु क्रियाफलमपायो न समस्ति, कथं तथालम्बनप्रवृत्ताहितयोगाक्षिप्तं तेषां कर्म्मत्वमित्याह–

"कर्तृव्यापारापेक्षमेव" मिथ्यादर्शनादिक्रियाकृतमेव "तत्र" अचेतनेषु कर्म्मत्वम्, अवधारणफलमाह–"न पुनः स्वविकारापेक्षं" न स्वगतापायापेक्षं, ननु कथमित्थं कर्म्मभाव इत्याशङ्क्याह-"कङ्कटुकपक्तावित्थमपि दर्शनादिति" कङ्कटुकानां–पाकानर्हाणां मुद्गादीनां पक्तौ–पचने इत्थमपि–स्वविकाराभावेऽपि दर्शनात्–कर्म्मत्वस्य कङ्कटुकान्पचतीति प्रयोगप्रामाण्यादिति, एवं चाचेतनेषु हितयोगोऽपि मुख्य एव कर्तृव्यापारापेक्षयेति न तत्कारणिकत्वेन स्तवविरोध इति ।

टी०...तथाहि = अचेतन–पदार्थगताहितयोगः (मिथ्यादर्शनप्ररूपणादिरूपोऽपायहेतुर्व्यापारः) असत्यः–उपचरितो नास्ति, कथमिति चेदुच्यते, आवृत्तिप्रक्रियाऽत्रोपयुज्यते, अचेतनाऽहितयोगः, प्रथमं तावत् अचेतनं प्रति तादृशचेष्टाद्वारा गत्वा, अचेतनेऽपायरूपं फलमकृत्वा, पुनरागमनं –प्रत्यावृत्य (प्रत्यावृत्त्या) पश्चादागत्य, पुनरेतादृशचेष्टां द्वितीयसमयेन (वारेण) कृत्वा तादृशचेष्टाकर्तरि एव. तादृशक्रियाफलरूपायभाजनीकरणद्वारा, अर्थात् तादृशक्रियाकर्त्तारं तादृशक्रियाफलरूपाश्रयं कृत्वा कर्त्तारमेव कर्म, कर्तृकर्म, यत्र स पुनरागमकर्मकोऽचेतनाहित-योग उच्यते, एतादृशविशिष्टाहितयोगत्वेनार्थ–क्रियाफलाश्रयरूप कर्मतापन्नः कर्त्ता भवति तादृशक्रियाऽपि कर्त्तरि, तादृशक्रियाफलापायोऽपि कर्त्तरि, तादृशावृत्तिप्रक्रियाद्वारा फलाश्रयत्वे सिद्धे, तादृशाचेतनगताऽहितयोगो नोपचरितोऽपितु, मुख्यभावकार्यकारी–तादृशाहितयोगः–स्वार्थशक्तिमान् जातः–शक्यार्थत्वेन सिद्ध एव, अचेतनाहितयोगसिद्धये दृष्टान्तः कथ्यते, अचेतनाहितयोगस्तु प्रत्यावृत्य (पुनरागत्य) स्वकर्त्तरि (अचेतनाहितकर्त्तरि) एव (नान्यत्र) क्रियाफलमुपरचयति–करोति यथा दुःशिक्षितस्य परवधायरचितः शस्त्रव्यापारः (शस्त्रक्रिया) तमेव दुःशिक्षितमेव घ्नन् कथमुपचरितो–निष्फलः, अत्र शस्त्रव्यापार–कर्त्तृक एव परवधमुद्दिश्य कृतोऽपि शस्त्रव्यापारः, दुःशिक्षाकारणेन स्वकर्त्तर्येवापायफलमायातम्, कर्त्ता कर्म भवति, क्रियाफलयोः सामानाधिकरण्यं जातमेव, कथायां श्रीपालहत्या हेतवे गतो धवलः, स्वशस्त्रव्यापारः, सचेतनं श्रीपालमहत्वैव दुर्बुद्धिकारणेन स्वात्मानं हतवान् अत्र कर्तृकर्मणोरैक्यं जात ।

(यद्यदहितं परस्मै चेष्टते, विचारयति च तत्तदहितं फलरूपेण स्वस्मै भवति, स्वं प्रति अहितमायातीत्यप्यर्थः समीचीनतया चिन्तनीयः) ननु यथाऽचेतनगतोऽहितयोगः पुनरागम-कर्मकः तथा समसचेतनेषु अप्यहितयोगः पुनरागमकर्मकः कथं नेति चेदुच्यते,

तादृशक्रियाफलभूतापायसहित-सचेतन (जीवाऽस्तिकाय) गताहितयोगे पुनरागमकर्मकत्वं नास्त्येवात उपचरितोऽहितयोगो न परन्तु सत्य एव, तथाऽचेतनेऽहितयोगे च क्रियाफलभूतापायरहिते अचेतनसम-सूक्ष्मनिगोद-नित्यनिगोदादौ सचेतन एवाहितयोगे पुनरागमकर्मकत्वमस्ति परन्तु अचेतन (अचेतन-समसचेतनेऽपि) पुनरागमकर्मपद्धत्या प्रकृतकृताऽचेतनाहितयोग उपचरितो नैवाऽपितु अनुपचरितः सत्य एव,

अर्थात् सचेतनेऽचेतने विपरीतक्रियादिजन्याऽहितयोग उपचरितो न सत्य एवेवं सचेतनेऽचेतने यथार्थ-क्रियादिजन्यो हितयोगः सत्य एवेति,

ननु सचेतने कस्मिंश्चित् अहितयोगात् क्रियाफलभूतापायस्य सम्भवेन, फलाश्रयत्वरूपकर्मता घटते परन्तु अचेतन-पदार्थेषु क्रियाफलापायाभावोऽस्ति मिथ्यादर्शनबोधप्ररूपणादिकमाश्रित्य प्रवृत्ताहित योगाक्षिप्त-सामर्थ्यगत-सम्प्राप्तं कर्मत्वं कथं घटमानं स्यादिति चेत्कथ्यते-अचेतनपदार्थगतं कर्मत्वं-(विषयतानामकं) मिथ्यादर्शनादिक्रियारूपकर्तृव्यापारापेक्षया कृतमेव परन्तु अचेतन-गतापायरूपफलविशेषापेक्षया कर्मत्वं नास्ति, अर्थाद्, अचेतनगतं कर्म, विकार्यं नास्ति, घटं पश्यतीतिवत् प्राप्यं कर्म वर्त्तते,

(ईप्सितं कर्म त्रिधा, निर्वर्त्य[1]-विकार्य[2]-प्राप्य[3]भेदात्-(१) योऽविद्यमानः पदार्थः कर्तुः क्रियया जायतेऽथवा यो विद्यमानः पदार्थो जन्मना प्रकाशते तन्निर्वर्त्यं कर्म, यथा शकटं करोति, सा पुत्रं प्रसूते, तत्र कटपुत्रयोरेतन्निर्वर्त्यं कर्म,

(२) विकार्यं कर्म द्विधा, एकं प्रकृते विनाशेन यदुत्पद्यते, द्वितीयं तु प्रकृतावीषत् परावृत्त्या-गुणान्त-रोत्पादनेन भवति,यथा काष्ठं भस्मीकरोति, अत्र भस्म, एतत् काष्ठरूपप्रकृतेरुच्छेदेन जातं कर्म, सुवर्णं कुण्डलं करोति, अत्र अत्र सुवर्णं प्रकृतिमीषत् परावृत्त्या गुणान्तरमाधाय कुण्डलेति, विकारं -अवस्थान्तरं करोतीति द्वितीयप्रकाररूपं विकार्यं कर्म,

(३) प्राप्यं कर्म = कर्त्ता, स्वक्रियया यत्कर्म, नोत्पादयति न परावर्त्तयति, केवलं स्वक्रियया यमाप्तुमिच्छति तत्प्राप्यं कर्म, यथा स घटं पश्यति,
अत्र घटेति प्राप्याकर्माऽस्ति, भर्तृहरिराह =

यत्रकर्मणि क्रियाकृतविकारः प्रत्यक्षेण न दृश्यते वानुमीयते, तत्प्राप्यं कर्म 'स घटं करोती' त्यत्र निर्वर्त्यं कर्म, घटकर्मणि, कुम्भकारक्रियाकृतो विकारः प्रत्यक्षः, यतो घटः स्वस्वरूपं प्राप्नोति, एवं स्वरूपलाभः क्रियाकृतो विशेषः, सुवर्णं कुण्डलं करोतीत्यत्र विकार्यं कर्म, यतः कुण्डलकर्मणि स्वर्णकृत्क्रियया कश्चिद् विकारो जातश्च सुवर्णस्य स्थाने गुणान्तरवद्वस्तु जातं तत्प्रत्यक्षम् 'स पुत्रः सुखमनुभवती' त्यत्र तद्वदनोपरि प्रसन्नतालक्षणेन सुखमनुमीयते, प्राप्यकर्मणि, कर्तृकृतक्रियाविशेषः प्रत्यक्षेणानुमानेन च नोपलभ्यते न्यायसिद्धान्तदीपिकायां तु करणव्यापारविषयकारणत्वं कर्मत्वम् यथा व्रीहीन् प्रोक्षतीत्यादौ व्रीहेः कर्मत्वम् तेन व्रीहेः प्रोक्षणफलीभूतातिशयाऽनाश्रयत्वेऽपि न कर्मत्वाऽनुपपत्तिः (न्या.सि.दी.पृ.१६) एवमात्मनाऽऽत्मानं जानातीत्यादावप्यूहयम् ।

ननु एतादृशं-कर्तृव्यापारापेक्षं कर्मकारकत्वं कथं घटेत ? तत्र व्यवहारप्रतीतिरूपेण कः साक्षीति चेदुच्यते, कङ्कटुकाः—पाकानर्हा मुद्गादय उच्यन्ते, तान् 'कङ्कटुकान् पचतीति प्रयोगे, पाकायायोग्यभूतानां 'कङ्कटुकानां पचने—रन्धने, स्व—कङ्कटुकगतविक्लित्तिरूपविकाराभावेऽपि कर्मत्वं दृश्यतेऽतस्तादृशप्रयोगप्रामाण्येन, तत्र यथा कर्मत्वं प्रमाणं तथाऽत्रापि प्रमाणं क्रियतामिति, अर्थाद् एवं चाचेतनेषु हितयोगोऽपि (अपिनाऽहितयोगः) मुख्य एव कर्तृव्यापारापेक्षया—यथार्थदर्शन, बोधप्ररूपणादिरूपकर्तृक्रियाऽपेक्षया, न तु गौणः न तूपचरितो न कारणिकः—कारणजन्यत्वेनापवादरूपः, अपितूत्सर्गरूप एवातो न स्तव—विरोधः, स्तवस्तु संवादित्वेन परमप्रामाणिक एवेति । 'भगवन्तोऽर्हन्तः पञ्चास्तिकायात्मकं सकललोकं याथात्म्येन पश्यन्ति तदनुरूपं च चेष्टन्ते भाव्यपायपरिहारसारं तस्मात्ते सकललोकाय हिताः—हितकारिणः, अत्र हितयोगस्य मुख्यत्वेन सद्भूतार्थ—विषयके प्रस्तुते स्तवे न कोऽपि विसंवादो वा विरोधः ।
इति द्वादशपदं समाप्तम् ।

**तथा 'लोकप्रदीपेभ्यः' अत्र लोकशब्देन विशिष्ट एव तद्देशनाद्यंशुभिर्मिथ्यात्वतमोऽपनयनेन यथार्हं प्रकाशितज्ञेयभावः संज्ञिलोकः परिगृह्यते, यस्तु नैवंभूतः तत्र तत्त्वतः प्रदीपत्वायोगाद्, अन्धप्रदीपदृष्टान्तेन, यथा ह्यन्धस्य प्रदीपस्तत्त्वतः अप्रदीप एव, तं प्रति स्वकार्याकरणात्, तत्कार्यकृत एव च प्रदीपत्वोपपत्तेः, अन्यथाऽतिप्रसंगात्, अन्धकल्पश्च यथोदितलोकव्यतिरिक्तस्तदन्यलोकः, तद्देशनाद्यंशुभ्योऽपि तत्त्वोपलम्भाभावात्, समवसरणेऽपि सर्वेषां प्रबोधाश्रवणात् इदानीमपि तद्वचनतः प्रबोधादर्शनात्, तदभ्युपगमवतामपि तथाविधलोकदृष्ट्यनुसारप्राधान्याद्, अनपेक्षितगुरुलाघवं तत्त्वोपलम्भशून्यप्रवृत्तिसिद्धेरिति । तदेवंभूतं लोकं प्रति भगवन्तोऽपि अप्रदीपा एव, तत्कार्याकरणादित्युक्तमेतत्, न चैवमपि भगवतां भगवत्त्वायोगः, वस्तुस्वभावविषयत्वादस्य, तदन्यथाकरणे तत्त्वायोगात्, स्वो**

**भावः स्वभावः अस्मदीया सत्ता, स चान्यथा चेति व्याहतमेतत्, किंच—एवमचेतनानामपि चेतनाऽकरणे समानमेतदित्येवमेव भगवत्त्वायोगः, इतरेतरकरणेऽपि स्वात्मन्यपि तदन्या-विधानात्, यत्किञ्चिदेतदिति, यथोदितलोकापेक्षयैव लोकप्रदीपाः १३ ॥**

पं०..."तदभ्युपगमेत्यादि," तदभ्युपगमवतामपि सर्वप्रदीपा भगवन्तो न पुनर्विवक्षितसंज्ञिमात्रस्यै-वेत्यंगीकारवतामपि, न केवलं प्रागुक्तान्धकल्पलोकस्येत्यपिशब्दार्थः, तत्त्वोपलम्भशून्यप्रवृत्तिसिद्धेरित्युत्तरेण योगः कुत इत्याह–'तथाविधलोकदृष्ट्यनुसारप्राधान्यात्" तथाविधः–परमार्थतोऽसत्यपि तथारूपे वस्तुनि बहुरूढव्यवहार-प्रवृत्तः स चासौ लोकश्च तथाविधलोकस्तस्य दृष्टिः–अभिप्रायो व्यवहारनय इत्यर्थः, तस्यानुसार.–अनुवृत्तिस्तस्य प्राधान्याद्, इदमुक्तं भवति–सर्वप्रदीपत्वाभ्युपगमे भगवता लोकव्यवहार एव प्राधान्येनाभ्युपगतो भवति, न वस्तुतत्त्वमिति, लोकव्यवहारेण हि यथा प्रदीपः प्रदीप एव, नाप्रदीपोऽपि, कटकुट्यादीनामेवाप्रदीपत्वेन रूढत्वात्, तथा भगवन्तोऽपि सर्वप्रदीपा एव, नतु केषाञ्चिदनुपयोगादप्रदीपा अपि, ऋजुसूत्रादिनिश्चयनयमतेन तु यद् यत्र नोपयुज्यते तत्तदपेक्षया न किञ्चिदेव, यथाऽऽह मंगलमुद्दिश्य भाष्यकारः–'उज्जुसूयस्स सयं संपयं च जं मंगलं तयं एक्कं। नाईयमणुप्पन्नं, मंगलमिट्ठं परक्कं वा ॥१॥ नाईयमणुप्पन्नं,परकीयं वा पयोयणाभावो। दिठ्ठंतो खरसिंगं, परधणमहवा जहा विहलं ॥२॥" ति, ततो भगवन्तोऽपि संज्ञिविशेषव्यतिरेकेणान्यत्रानुपयुज्य-माना अप्रदीपा एवेति, कथमित्याह–"अनपेक्षितगुरुलाघवं" गुरुर्निश्चयनयस्तदितरो लघुस्तयोर्भावो गुरुलाघवं सद्भूतार्थविषयः सम्यग्भावग्राहकः ततो गुरुपक्षः समाश्रयितुं युक्तो नेतर इति तत्त्वपक्षोपेक्षणात्, अनपेक्षितं यत्र तद्यथा भवतीति क्रियाविशेषणमेतत्, यद्वा गुणदोषविषयं गुरुलाघवमपेक्ष्य प्रेक्षावतोऽपि क्वचिद्व्यवहारतस्त-त्त्वोपलम्भशून्या प्रवृत्तिः स्यात् न चासावत्र न्यायोऽस्तीत्यतस्तन्निषेधार्थमाह–"अनपेक्षितगुरुलाघवमिति" ततः किमित्याह–'तत्त्वोपलम्भशून्यप्रवृत्तिसिद्धेः' तत्त्वोपलम्भशून्या–व्यवहारमात्राश्रयत्वेन न स्तवनीयस्वभाव-संवित्तिमती प्रवृत्तिः–प्रस्तुतस्तवलक्षणा तस्याः सिद्धेः–निष्पत्तेः, तद्देशनांशुभ्योऽपि तत्त्वोपलम्भाभावादिति पूर्वेण सम्बन्ध इति ।

"तदन्यथाकरणे तत्तत्त्वायोगादिति" तस्य–जीवादिवस्तुस्वभावस्यान्यथाकरणे–अस्वभावकरणे भगवद्भिः "तत्त-त्त्वायोगात्" तस्य–वस्तुस्वभावस्य स्वभावत्वायोगात् "किञ्चेत्यादि" किञ्चेत्यभ्युच्चये, एवमनेनैव, असामर्थ्य-नाभगवत्त्वप्रसञ्जनेऽचेतनानामपि धर्माधर्मास्तिकायादीनां, किं पुनः प्रागुक्तविपरीतलोकस्याप्रदीपत्वे इत्यपिशब्दार्थः, चेतनाऽकरणे–चैतन्यवतामविधाने समानं–तुल्य प्राक्प्रसञ्जनेन, एतद्–अभगवत्त्वप्रसञ्जनम् "इति" अस्माद्धेतोः "एवमेव" अप्रदीपत्वप्रकारेणैव "भगवत्त्वायोग" उक्तरूपः । अभ्युपगमेऽपि दूषणमाह–"इतरेतरकरणेऽपि" इत-रस्य–जीवादेरितरकरणेऽपि–अजीवादिकरणे, अपिः–अभ्युपगमार्थे स्वात्मन्यपि–स्वस्मिन्नपि तदन्यस्य–व्यतिरिक्तस्य महामिथ्यादृष्ट्यादेः विधानात्–करणात्, नचैतदस्त्यतः "यत्किञ्चिदेतद्" अभगवत्त्वप्रसञ्जनमिति ।

टी०...यथा "समुदायेषु प्रवृत्तशब्दा अवयवेष्वपि प्रकाशन्तेऽनेकधेति न्यायसन्दर्शनार्थमाह" –'लोकप्रदीपेभ्यो नमः', अत्र लोकप्रदीपपदघटकलोकशब्दद्वारा विशिष्ट एव = तेषां तीर्थंकराणां लोकप्रदीपानां देशनादि (प्रभावादि) रूपांशुभिः–किरणैः (द्वारा) मिथ्यात्वनामकान्धकारस्याप-नयनेन–दूरीकरणेन यथायोग्यं प्रकाशिता ज्ञेयरूपभावाः यस्य यस्मिन् वा स संज्ञिलोको गृह्यते

(सम्यग्दर्शनसम्पन्नोऽथवा दीर्घकालिकीसंज्ञाद्वारा सुदीर्घातीतार्थस्मरणशीलत्वे सति 'कथं नु नाम कर्तव्यं' इत्यागाम्यर्थचिन्तनप्रयोजकसंज्ञित्वविशिष्टः संज्ञी-समनस्कः) यस्तु' विशिष्टसंज्ञिलोको नास्ति, तत्र विशिष्टसंज्ञित्वरहिते लोके तत्त्वतः-निश्चयनयतः प्रदीपत्वयोगाभावो भगवतां ज्ञेयः अन्धप्रदीपदृष्टान्तद्वारा विज्ञेयः, तथाहि = अन्धस्य चक्षूरहितस्य प्रदीपो वस्तुतोऽप्रदीप एव, यतस्तमन्धं प्रति स्व-प्रदीपकार्यरूप-प्रकाशाकरणं वर्तते, (लोचनाभ्यां विहीनस्य प्रदीपः किं करिष्यति.) किं च तत्-प्रदीपकार्यं, प्रकाशकर्तृत्वेनैव. प्रदीपत्वमुपपन्नं युक्तं भवति, तथा च यं प्रति प्रदीपः स्वकार्यप्रकाशं करोति, तं प्रति स प्रदीपः कथ्यते तत्त्वतः, अन्यं प्रति अप्रदीपः कथ्यते इति नियमः, यदि यं प्रति स्वप्रकाशकार्यमकुर्वन् प्रदीपो मन्येत, तदाऽतिप्रसङ्ग आगच्छेद् अर्थाद् ये ये प्रकाशकार्यं न कुर्वते ते सर्वे प्रदीपा एव कथ्यन्ते, इत्यापत्तिः स्यात्,

किञ्च-यथोदितलोकव्यतिरिक्त-पूर्वोक्तविशिष्टसंज्ञिलोकतो व्यतिरेकवान् स विशिष्ट-संज्ञिलोकतोऽन्योऽन्धकल्पः-चक्षूरहित-तुल्यो ज्ञेयः, कथमिति चेदुच्यते, तेषां तीर्थंकराणां लोकप्रदीपानां देशनादिरूपकिरणेभ्योऽपि, अन्धकल्पविशिष्टसंज्ञिलोकभिन्नलोके तत्त्वोपलम्भतत्त्वानुभवरूप-प्रकाशस्याभावो वर्त्तते, यतः समवसरणेऽपि (दिव्याद्भुतभगवद्देशनास्थानविशेषेऽपि) सर्वेषां-नृदेवतिर्यग्जनकोटिकोटिसङ्ख्याकानां सभासदां प्रबोधप्राप्तिरूपतत्त्वोपलम्भो न श्रूयते,

केषांचिद् विशिष्टसंज्ञिलोकानां प्रबोधः-तत्त्वोपलम्भो भवत्येव, इदानीमपि-वर्त्तमानकालेऽपि तेषां लोकप्रदीपानां तीर्थंकराणां वाणीस्वरूपासमापेक्षया, केषाञ्चित् स भवति, परन्तु सर्वेषां जैनेन्द्रवचनतः, तत्त्वोपलम्भप्रकाशरूपप्रबोधो न दृश्यते (श्रीमतां हरिभद्रसूरीश्वराणां स्वानुभवसिद्धमिदं वाक्यम्, तेन वाक्येन वर्त्तमानकाले जैनेन्द्रवाण्या अस्तित्वमाविष्कृतं, पञ्चमारपर्यन्तं यावज्जिनवाणी विद्यमानैव, अधुनाऽपि जैनवाणीरूपकिरण-द्वारा केषाञ्चित्प्रबोधः, तत्त्वज्ञान-प्राप्ति-प्रकाशो भवति, केषाञ्चिन्न भवति, यतस् तत्र योग्यता बलीयसी.)

व्यवहारनयवादी = 'सर्वलोकान् प्रति प्रदीपा भगवन्तः' अर्थाद् विशिष्टसंज्ञिलोकं च विशिष्टसंज्ञिलोकभिन्न-सर्व-संज्ञिलोकं प्रति भगवन्तः प्रदीपा एवेति मते व्यवहारस्य प्राधान्यं प्रतिपन्नमेव न पुनर्वस्तुतत्त्वं, यतो यथा प्रदीपा एव प्रदीपा उच्यन्ते, नाप्रदीपाः, प्रदीपोऽप्रदीपो भवितुं नार्हति, कटकुट्यादयोऽप्रदीपत्वे रूढा एव, अतः कटकुट्यादयोऽप्रदीपत्वेन व्यवह्रियन्ते, प्रदीपाश्च प्रदीपत्वेन व्यवह्रियन्ते. इति व्यवहारो वदति, तथा च भगवन्तोऽपि सर्वलोकप्रदीपा एव, केषाञ्चित् प्रदीपत्वेनानुपयोगादप्रदीपा अपि, अर्थाद् विशिष्टसंज्ञिलोकभिन्नान्यसंज्ञिलोकं प्रति तत्त्वज्ञानरूपप्रकाशाकार्याकरणमात्रेणा-प्रदीपाः कथं कथ्यन्ते ? प्रदीपास्तु प्रदीपा एव स्वकार्यं कुर्वन्तु वा न कुर्वन्तु परन्तु प्रदीपा अप्रदीपा न भवन्ति, अप्रदीपाः प्रदीपा न भवन्तीति.

ऋजुसूत्रादिनिश्चयनयवादी = यद् यत्र (यं ति) नोपयुज्यते (नोपयोगि भवति) तत्तदपेक्षया (तत्तत्र–तं ति) न किञ्चिदेवार्थादकिञ्चित्करमन्यथासिद्धमेवेति नियमतो भगवन्तोऽपि, विशिष्टसंज्ञिलोकं विमुच्य, अन्यत्र–अविशिष्टसंज्ञिलोकोऽकादिसर्वलोकेऽन्धकल्पेऽनुपयुज्यमानास्तत्त्वज्ञानरूपप्रकाशकार्याऽकरणद्वारा, अनुपयोगिनो भवन्तः, अप्रदीपा एवेति, कथमिति चेदुच्यते–अनपेक्षितगुरुलाघवं = गरिष्ठभावदर्शित्वहेतुना गुरुः = निश्चयनयः, तद्भिन्नो लघुः–व्यवहारनयः, तयो र्भावः, गुरुलाघवं, अत्र सद्भूतार्थ–विषयग्राहित्वेन सत्यभावनिश्चायकत्वेन गुरुपक्ष आश्रयणीयः परन्तु व्यवहारनयो न ग्राह्य इति निश्चयनय–मतापेक्षा–सहितत्वेन कथ्यते, 'अनपेक्षितं गुरुलाघवं' यथा स्यात्तदा क्रियाविशेषणं, गुरुलघुपक्षोभयानाश्रयणेनार्थस्यास्वारस्येन कथ्यते 'यद्वेति' गुणदोषविषयं गुरुलाघवं (स्वल्पदोषत्यागपूर्वकानल्प–गुणकपक्षग्रहणरूपं) अपेक्ष्य, प्रेक्षावतोऽपि क्वचिद् व्यवहारापेक्षया तत्त्वोपलम्भ–तत्त्वानुभवरूपज्ञानसम्प्राप्तिशून्या प्रवृत्तिः स्यात्, एष न्यायोऽत्र नास्तीति, तस्य निषेधाय कथ्यते, अनपेक्षितगुरुलाघवं' अर्थाद् गुरुलाघवस्यापेक्षणेन तत्त्वज्ञानशून्यप्रवृत्तिर्भवतीति गुरुलाघवंसापेक्षा, व्यवहारमात्राश्रयत्वेन, तत्त्वोपलम्भशून्या = न स्तवनीयस्वभावसंवित्तिमती प्रवृत्तिः–प्रस्तुतस्तवलक्षणा, तस्याः सिद्धिः–निष्पत्तिः, अर्थाद् गुरुलाघवमनपेक्ष्य, व्यवहारमात्रपक्षमपेक्ष्य स्तोतव्यार्हद्भगवत्स्वभावसंवित्तिरूपतत्त्वोपलम्भशून्या या प्रस्तुतस्तत्ररूपप्रवृत्तिसिद्धि र्न भवति, एवं स्थिते तीर्थंकराणां देशनादिकिरणेभ्योऽपि तत्त्वोपलम्भप्रकाशाभाववान् विशिष्टसंज्ञिलोकभिन्नसंज्ञिलोकोऽन्धकल्पोऽस्ति, तमन्धलोकं प्रत्यर्हन्तो भगवन्तोऽप्रदीपा एव, यतः, तमन्धं प्रति तत्त्वोपलम्भप्रकाशकार्यं न करोति भगवान् इति पूर्वं कथितमेवेति।

सर्वप्रदीपा भगवन्तः' इति मतं खण्डितमेवेति.

ननु यदि भगवन्तो विशिष्टसंज्ञिलोकं प्रति स्वकार्यकरण–द्वारा प्रदीपा एव तद्भिन्नसंज्ञिलोकमन्धकल्पं प्रति स्वकार्याकरणद्वारा, अप्रदीपा एवेति मते भगवत्सु भगवत्ताया (पूर्णप्रकाशकारिताया) क्षति र्न्यूनत्वं कथं नेति चेदुच्यते, भगवन्तो विशिष्टसंज्ञिलोकं प्रति प्रदीपा एव तद्भिन्नसंज्ञिलोकमन्धं प्रति अप्रदीपा एवेति कथनतो भगवत्सु भगवत्ताया अभावो न भवति प्रत्युत, एतत्प्रकृतस्तवस्य भगवतां लोकप्रदीपत्वरूपस्तोत्रस्य विषयो वस्तुस्वभावोऽस्ति, अर्थाद् भगवद्वस्तुनिष्ठस्वभावविषयकप्रकृतवस्तुस्तवस्य प्रवृत्तिरस्ति, स्वभावगर्भितस्तुतिद्वारा भगवत्स्वभावपरिचयोऽर्थाद् यादृशः स्वभावस्तादृशी स्तुतिरिति परिज्ञानेन, सत्यस्वीकारेण भगवतां शुद्धा सत्वा भगवत्ता, भक्तहृद्ये शाश्वती प्रतिष्ठिता भवति.

यदि जीवादिवस्तुस्वभावस्य विपरीत–करणं–अस्वभावकरणं–परद्रव्यस्वभावस्य करणं भगवतां स्यात्तदा वस्तुनिष्ठस्वभावस्य स्वभावत्वस्याभावः सञ्जायेत, (अमुक व्यक्ति प्रति प्रदीपरूपा अमुकव्यक्ति च प्रति, अप्रदीपरूपा इत्यप्येको वस्तुस्वभावः, यं प्रति, अप्रदीपरूपा भगवन्तः स्युस्तं प्रति

प्रदीपत्वधारणरूपान्यथाकरणे भगवत्सु तादृशी भगवत्ता–ईश्वरता, नास्त्यर्थाद् भगवतां तादृशी भगवत्ता नास्ति यत्–पदार्था यत्स्वभावेऽवतिष्ठमानाः सन्ति, तान् पदार्थान् स्वस्वभावतोऽपसार्य परभावे परिवर्त्तयितुं न शक्नोति, ईश्वरो द्रव्यस्वभावमन्यथाकर्त्तुं नेष्टे, परे तु वदन्ति, "कर्त्तुमकर्त्तुमन्यथाकर्त्तुमीष्टे स ईश्वरः" परन्तु, ईश्वरे तादृशी भगवत्ता न वर्त्तते, यत् पदार्थगतस्वस्वभावमन्यथाकर्त्तुं समर्था स्यादिति जैनी दृष्टिः,)

कः स्वभाव ? इति प्रश्ने कथ्यते तावत् स्वो भावः स्वभावः' आत्मीया सत्ता (स्वात्मवृत्तियावद्गुणधर्माणामस्तितता) स चान्यथेत्युक्ते = स्वभावः–आत्मीया सत्तैव, परभावः–परकीयसत्तेत्युक्ते 'मे माता वन्ध्य' ति वद् वदतो व्याघात आगतोऽर्थात् परोक्तं वचनं परस्परं व्याहतं–व्याघातवद्–विरुद्धं, पदार्थगतस्वभावान्यथाकरणे–परभावीकरणे द्वितीयापत्तिर्दर्श्यते, किञ्चेति = एवं अविषये (तथाविधायोग्यगतासामर्थ्यप्रयुक्ता भगवत्ता (अनीश्वरता) रूपप्रसंग आगच्छेत्तदा 'अचेतनरूपधर्मास्तिकायादीनामपि (किं पुनः प्रागुक्तविपरीतलोकस्याप्रदीपत्वे इत्यपि शब्दार्थः) चेतनाकरणे–विपरीताकरणे–चैतन्यवत्त्वेनाविधाने पूर्व–प्रसञ्जनेन समानं, अभगवत्ता–प्रसञ्जनमिति, तथाहि यदा विशिष्टसञ्ज्ञिलोकभिन्नभव्यलोकं प्रति भगवन्तोऽप्रदीपाः स्युरिति कथिते तदा वादिना कथित 'स भगवानीश्वरः कथं ? इति कथयित्वा भगवत्सु, अभगवत्ता–प्रसञ्जनं दत्तम्, अधुना प्रत्युत्तरे वदामो वयम्, अचेतनस्य चेतनत्वाकरणे अभगवत्ताप्रसङ्गः, पूर्वप्रसङ्ग–तुल्य एव यत उभयत्राविषयगत–सामर्थ्याभावोऽस्ति, अत एवाविषयगताऽसामर्थ्यप्रयुक्ताऽभगवत्तैव प्रसङ्गः प्रसङ्गो न मन्यते, यत ईदृश एव वस्तुस्वभावोऽस्ति, स्वभावस्तु पर्यनुयोगानर्हं एवेति यदि भगवत्सु चेतनस्यानेतनकरणविषयकमीश्वरत्वं भाव्यमिति मान्यतायां स्वात्मन्यपि चेतनत्वभिन्ना–चेतनत्वकरणे सम्यग्दर्शनादिभिन्नमहामिथ्यादृष्टयादेः करणं स्यादित्यापत्तिः,

नैतत्कदाचिद् भव्यत्यर्थाच्चेतनोऽचेतनरूपश्चा–चेतनश्चेतनरूप इति भवितुं न शक्यते, कालत्रयेऽपि जीवो जीव एव नाजीवः, अजीवोऽजीव एवेति स्वभावः, अन्यथा जगति चेतना–चेतनयो र्भेदोऽनादितोऽस्ति, पदार्थस्थिते र्व्यवस्थाया अभावोऽथवाऽनवस्थाप्रसङ्ग आगच्छेदिति,

अभगवत्ताप्रसञ्जनमप्रमाणं तथा स्वभावत इति ज्ञेयम् तथा च विशिष्टसंज्ञिलोकं (तथाविधयोग्यलोकं) अपेक्ष्यैव 'लोकप्रदीपा भगवन्तो ज्ञेयाः, नान्यथेति शक्रस्तवस्य त्रयोदशपदं व्याख्यातं समाप्तम् ।

**तथा 'लोक-प्रद्योतकरेभ्यः' इह यद्यपि लोकशब्देन प्रक्रमाद्भव्यलोक उच्यते, भव्यानामालोको वचनांशुभ्योऽपि दर्शनं यस्मात् । तथा एतेषां भवति तदभावे ऽयथं आलोकः॥१॥ इति वचनात्, तथाऽप्यत्र लोकध्वनिनोत्कृष्टमतिः**

**भव्यसत्त्वलोक एव गृह्यते, तत्रैव तत्त्वतः प्रद्योतकरणशीलत्वोपपत्तेः, अस्ति च चतुर्दशपूर्वविदामपि स्वस्थाने महान् दर्शनभेदः,**

**तेषामपि परस्परं षट्स्थानपतितत्वश्रवणात्, न चायं सर्वथा प्रकाशाभेदे, अभिन्नो ह्येकान्तेनैकस्वभावः, तन्नास्य दर्शनभेदहेतुतेति, स हि येन स्वभावेनैकस्य**

**सहकारी तत्तुल्यमेव दर्शनमकुर्वंश्च तेनैवापरस्य, तत्त्वविरोधादिति, भावनीयं, इतरेतरापेक्षो हि वस्तुस्वभावः, तदायत्ता च फलसिद्धिरिति, उत्कृष्टचतुर्दशपूर्वविल्लोकमेवाधिकृत्य प्रद्योतकरा इति लोकप्रद्योतकराः ।।१४।।**

पं०..."प्रक्रमादिति" आलोकशब्दवाच्यप्रद्योतोपन्यासान्यथानुपपत्तेरिति "भव्यानामित्यादि" भव्यानां नाभव्यानामपि "आलोकः" प्रकाशः सद्दर्शनहेतुः श्रुतावरणक्षयोपशमः, इदमेवान्वयव्यतिरेकाभ्यां भावयन्नाह–"वचनांशुभ्योऽपि" प्रकाशप्रधानहेतुभ्यः, किं पुनस्तदन्यहेतुभ्य इत्यपिशब्दार्थः, "दर्शनं" प्रकाश्यावलोकनं "यस्माद्" इति हेतावेतेषां–भव्यानां "भवति" वर्त्तते "तथेति" यथा दृश्यं वस्तु स्थितं, ननु कथमित्थं नियमो ! भव्यानामप्यालोकमात्रस्य वचनांशुभ्योऽभावादित्याह–"तदभावे" तथादर्शनाभावे "व्यर्थः" अकिञ्चित्करस्तेषामालोकः स आलोक एव न भवति, स्वकार्यकारिण एव वस्तुत्वात् "इतिवचनात्" एवंभूतश्रुतप्रामाण्यात्, "तथापि" एवमपि "अत्र" सूत्रे "लोकध्वनिना" लोकशब्देन "उत्कृष्टमतिः" औत्पत्तिक्यादिविशिष्टबुद्धिमान् गणधरपदप्रायोग्य इत्यर्थः

"भव्यसत्त्वलोक एव" न पुनरन्यो, यो हि प्रथमसमवसरण एव भगवदुपन्यस्तमातृकापदत्रयश्रवणात प्रद्योतप्रवृत्तौ दृष्टसमस्ताभिलाप्यरूपप्रद्योत्यजीवादिसप्ततत्त्वो रचितसकलश्रुतग्रन्थः सपदि सञ्जायते स इह गृह्यते इति । कुत एतदेवमित्याह–"तत्रैव" उत्कृष्टमतावेव भव्यलोके, "तत्त्वतो" निश्चयवृत्त्या "प्रद्योतकरणशीलत्वोपपत्तेः" उप्पन्नेइ वा १ विगमेइ वा २ धुवेइ वा ३ इतिपदत्रयोपन्यासेन प्रद्योतस्य–प्रकृष्टप्रकाशरूपस्य तच्छीलतया विधानघटनात्, भगवतां प्रद्योतकशक्तेस्तत्रैव भव्यलोके कार्त्स्न्येनोपयोग इतिकृत्वा, अमुमेवार्थं समर्थयन्नाह–"अस्ति" वर्त्तते, चकारः पूर्वोक्तार्थभावनार्थः, चतुर्दशपूर्वविदामपि, आस्तां तदितरेषामित्यपिशब्दार्थः, "स्वस्थाने" चतुर्दशपूर्वलब्धिलक्षणे "महान्" बृहन् "दर्शनभेदो" दृश्यप्रतीतिविशेषः, कुत इत्याह–

"तेषामपि" चतुर्दशपूर्वविदामपि, किं पुनरन्येषामसकलश्रुतग्रन्थानामित्यपिशब्दार्थः, "परस्परम्" अन्योऽन्यं "षट्स्थानश्रवणात्" षण्णां वृद्धिस्थानानां हानिस्थानानां चानन्तभागासंख्येयभागसंख्येयभागसंख्येयगुणासंख्येयगुणानन्तगुणलक्षणानां शास्त्र उपलम्भात्, यद्येवं ततः किमित्याह–"न चायं" महान्दर्शनभेदः "सर्वथा प्रकाशाभेदे" एकाकार एव श्रुतावरणादिक्षयोपशमलक्षणे प्रकाशे इत्यर्थः, एतदेव भावयति–"अभिन्नो" अनानारूपो "हिः" यस्माद्, एकान्तेन" नियमवृत्त्या "एकस्वभावः" एकरूपः प्रकाश इति प्रकृतं, एकान्तेनैकस्वभावे हि प्रकाशे द्वितीयादिस्वभावाभाव इति भावः' प्रयोजनमाह-"तत्" तस्मादेकस्वभावत्वात् न "अस्य" प्रकाशस्य "दर्शनभेदहेतुता" दृश्यवस्तुप्रतीतिविशेषनिबन्धनता, एतदेव भावयति–स हि प्रकाशो येन "स्वभावेन" आत्मगतेन "एकस्य" द्रष्टुः "सहकारी" सहायो दर्शनक्रियायां साध्यायां "तत्तुल्यमेव" प्रथमद्रष्टृसममेव "दर्शनं" वस्तुबोधम् "अकुर्वन्"

अविदधानो, न "तेनैव" प्रथमद्रष्टृसहकारिस्वभावेन "अपरस्य" द्वितीयस्य द्रष्टुः सहकारीति गम्यते । कुत इत्याह "तत्त्वविरोधात्" अतुल्यदर्शनकरणे तस्य-एकस्वभावस्यापरद्रष्टृसहकारिणस्तत्त्वं–प्रथमद्रष्टृसहकारित्वं पराभ्युपगतं तस्य विरोधाद्–अपरद्रष्टृसहकारित्वेनैव निराकृतेः इति" एतत्, "भावनीयम्" अस्य भावना कार्या, कारणभेदपूर्वको हि निश्चयतः कार्यभेदः, ततोऽविशिष्टादपि हेतोर्विशिष्टकार्योत्पत्त्यभ्युपगमे जगत्प्रतीतं कारणवैचित्र्यं व्यर्थमेव स्यात्, कार्यकारणनियमो वाऽव्यवस्थितः स्यात्, तथा चोक्तम् "नाकारणं भवेत्कार्यं, नान्यकारणकारणम् । अन्यथा न व्यवस्था स्यात्कार्यकारणयोः क्वचित् ॥१॥" भावनिकां स्वयमप्याह-"इतरेतरापेक्षो" "हिः" यस्मादयं, इतरः–कारणवस्तुस्वभाव इतरं कार्यवस्तुस्वभावश्च कारणवस्तुस्वभावमपेक्षते–आश्रयते इतरेतरापेक्षः'

"वस्तुस्वभावः" कार्यकारणरूपपदार्थस्वतत्त्वं, ततः किमित्याह–"तदायत्ता च" कार्यापेक्षकारणस्वभावायत्ता च "फलसिद्धिः" कार्यनिष्पत्तिः, यादृक् प्रकाशरूपः कारणस्वभावस्तादृग् दर्शनरूपं कार्यमुत्पद्यते इतिभावः, "इति" अस्मात्प्रकाशभेदेन दर्शनभेदाद्धेतोः "उत्कृष्टचतुर्दशपूर्वविल्लोकमेव" नान्यान् षट्स्थानहीनश्रुतलब्धीनधिकृत्य –आश्रित्य प्रद्योतकरा इति । एवं चेदमापन्नं यदुत–भगवत्प्रज्ञापनाद्योतप्रतिपन्ननिखिलाभिलाप्यभावकलापा गणधरा एवोत्कृष्टचतुर्दशपूर्वविदः, भवन्ति, गणधराणामेव भगवतः, प्रज्ञापनाया एव, उत्कृष्टप्रकाशलक्षणप्रद्योतसम्पादनसामर्थ्याद् एवं तर्हि गणधरव्यतिरेकेणान्येषां भगवद्वचनादप्रकाशः प्राप्नोतीति चेत्, न, भगवद्वचनसाध्यप्रद्योतैकदेशस्यैतेषु भावाद्दिग्दर्शनप्रकाशस्येव पृथक् पूर्वादिदिक्ष्विति । एवं प्रद्योतकरसिद्धौ प्रद्योतनीयनिर्द्धारणायाह–

**टी०**...लोकप्रद्योतकररूपं शक्रस्तवस्य चतुर्दशं पदं विव्रियते = तथा 'समुदायेषु अपि प्रवृत्ताः शब्दा अवयवेष्वपि प्रवर्त्तन्ते' इति पूर्वोक्तन्यायस्य सन्दर्शनार्थं कथ्यते 'लोकप्रद्योतकरेभ्यः' लोकं प्रति प्रद्योतकरेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः । इह यद्यपि लोकशब्देन प्रक्रमाद् (आलोकशब्दवाच्यप्रद्योतोपन्यासान्यथाऽनुपपत्तेः = भव्यलोक-शब्दोपस्थितेरभावेसति, आलोकशब्दवाच्यप्रद्योतोपन्यासो न भवेद, भव्यलोकशब्दोपस्थितौ सत्यां, आलोकशब्दवाच्यप्रद्योतोपन्यासो भवेत्, यतो हेतुप्रयोगो द्विधा — सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः, असति साध्ये हेतोरनुपपत्तिरेवाऽन्यथाऽनुपपत्तिः' प्रक्रमः— उपक्रमः = तात्पर्यनिर्णायको हेतुविशेषः यथा वेदान्तिनां मते 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् अर्थवादोपपत्ती च हेतुस्तात्पर्य निर्णये ॥ इत्यादौ (वाच.) तथा चेतिश्लोकोक्तान्युपक्रमादीनि ग्रन्थतात्पर्यग्राहकाणि ॥ प्रद्योतरूपप्रक्रम–उपक्रमः, तात्पर्यग्राहकत्वेन प्रक्रमेण भव्यलोकरूपतात्पर्यं गृह्यते,)

भव्यलोक उच्यते यतः 'भव्यान् प्रत्येव सम्यग्दर्शनहेतुरूपश्रुतावरणक्षयोपशमनामकप्रकाशापरपर्याय आलोकः कथ्यते, कथमिति चेदुच्यते प्रकाशप्रधानहेतुरूप–जिनवचन–चन्द्रिकात एव भव्यानां दर्शनं –प्रकाश्यज्ञेयविषयकाऽवलोकन भवति, यथा दृश्यं वस्तु स्थितं भवति तथा दर्शनं भवति, तथादर्शनाभावे सति तान् प्रति व्यर्थोऽकिञ्चित्कर आलोको भवति, तानभव्यान् प्रति आलोकः स आलोको न भवति, यतः स्वकार्यकारित्वं वस्तुत्वं कथ्यते' इति एवंभूतनामक–श्रुतनयवचनस्य प्रामाण्यं वर्त्तते ततो भव्यलोको लोकशब्देनोच्यते तथाप्यत्र लोकप्रद्योतकरनामकपदे लोकशब्देन, उत्कृष्टमतिः–

औत्पत्तिक्यादिविशिष्टबुद्धिमान् गणधरपद-प्रायोग्यो भव्यजीवलोक एव गृह्यतेऽर्थाद् विशिष्टतम-भव्यलोक एवात्रैवकारेणाऽन्यलोकस्य निषेधः सम्पद्यते, यः खलु प्रथमसमवसरण एवार्हद्भगवद्भिः संस्थापित-मातृका (जैनशासनस्य मातेव माता, मूलाक्षररूपा मातृका) रूपत्रिपदी श्रवणहेतुजन्य-प्रद्योत (प्रकृष्टप्रकाशप्रवृत्तौ = सर्ववस्तुबोधे प्रथमाने सति सकलाऽभिलाप्यरूपप्रद्योतविषयजीवादि-सप्त (नव) तत्त्वविषयकप्रत्यक्षद्रष्टा, सकलश्रुतग्रन्थरूपद्वादशांगीप्रणेता तत्क्षण एव सञ्जायते सोऽत्र गृह्यते, कथमेतदिति चेदुच्यते. उत्कृष्टबुद्धिसम्पन्न एव भव्यलोके, जघन्यादि भेदभिन्नमतिभव्यलोक वर्जयित्वा, यतो निश्चयनयतः. उत्पन्ने इ वा (उत्पद्यते वा) विगमे-इ वा (विगमयति वा) ध्रुवेइ वा (ध्रुवति) (उत्पादव्ययध्रौव्ययुक्तं सत्) इति त्रिपदीसमुच्चारणोपन्यासद्वारा, प्रकृष्टप्रकाशरूप-प्रद्योत-स्वभावत्वेन विधान घटते, अर्थाद् भगवन्निष्ठप्रद्योतकरशक्तिविशेषस्योत्कृष्टमतिविशि-ष्टभव्यलोके साकल्येन सर्वात्मना, उपयोगरूपोपकारो घटते ।

सर्वोत्कृष्टमतिवैभव-सम्पन्नगणधरपदप्रायोग्य-भव्यलोकं प्रति प्रद्योतकरणशक्तिस्वभाववन्तः 'लोक-प्रद्योतकराः' उच्यन्ते, नान्यत्र-नान्यं प्रत्येव. ननु. उत्कृष्टमतिसम्पन्नचतुर्दशपूर्ववेत्तृणामपि (आस्तां तदितरेषामित्यपिशब्दार्थः) चतुर्दशपूर्वलब्धिनामक (शक्तिविशेषलब्धिः) स्वस्थाने-आत्मगतमूल-स्थाने महान् (महत्त्वशाली विस्तारवान्) दर्शनभेदः-दृश्यपदार्थविषयप्रतीतौ-निर्णयात्मकज्ञाने तारतम्यरूपभेदोऽस्ति-वर्त्तते, यतः-तेषामपि चतुर्दशपूर्वज्ञातृणामपि (किं पुनरन्येषां विकल श्रुतग्रन्थानां इत्यपि शब्दार्थः) परस्परं (अन्योऽन्यं) एकोऽन्येन सह, अन्यो-द्वितीयस्तृतीयेन सहैवं सर्वत्र चतुर्दशपूर्ववित्सु परस्परं षट्स्थानेपतितत्वं-वर्तमानत्वं श्रूयते, यतः षण्णां वृद्धिस्थानानां हानि-स्थानानां चानन्तभागासंख्येयभागसंख्येकभाग-संख्येयगुणा-सख्येयगुणानन्तगुणलक्षणानां शास्त्रे, उपलम्भ-उपलब्धि भंवति (चतुर्दशपूर्वविदः परस्परं क्षयोपशमवैचित्र्येणाक्षरलाभापेक्षया सदृशा अपि भावापेक्षया (पदार्थदर्शनापेक्षया) भिन्नाः, षट्सु स्थानेषु वर्त्तमानाः सन्ति) अत एव चतुर्दश-पूर्वविदां स्वस्थाने महान् दर्शनभेदः सिद्धः किञ्च =

सर्वात्मना एकरूपात्मके श्रुतावरणादिक्षयोपशमहेतुजन्ये प्रकाशे सति महान् दर्शनभेदो (स्वल्पोऽपि-दर्शनभेदो) न, यतोऽप्रकाशः एकान्तेनैकरूपः प्रकाश इति प्रकृतमतमर्थाद्. अनानारूप एकान्तेनैक-स्वभावे (अभिन्ने) हि प्रकाशे द्वितीयादिस्वभावानामभावः, तत एकस्वभावत्ववति (अभिन्ने) प्रकाशे दृश्यवस्तुप्रतीतिविशेषमूलकारणता नास्ति. सोऽभिन्न एकरूपः प्रकाशः, आत्मगतेन येन स्व-भावेन एक-प्रथमद्रष्टुः दर्शनक्रियाकर्त्तुः, साध्यरूपदर्शनक्रियायां सहकारी-सहायको भवति.

प्रथमद्रष्टुः-दर्शनकर्त्तुः समानं वस्तुबोधनामक दर्शनं, अविदधानः-अकुर्व्वन् सन् सोऽभिन्नप्रकाशः, तेनैव प्रथमद्रष्टृरूपसहकारिस्वभावद्वारैव द्वितीयस्य-प्रथमभिन्नस्यापरस्य द्रष्टुः-दर्शन कर्त्तुः सह-कारी न भवति.

कथमिति चेदुच्यते = असमानदर्शनकरणे सति, एकस्वभावापन्नप्रकाशोऽपरद्रष्टृटसहकारिभूतः परा-न्मुखगा–प्रथमद्रष्ट्टसहकारिणं प्रति प्रतिबन्धको भवति. प्रथमद्रष्ट्टसहकारित्वं, अपरद्रष्ट्ट सहकारिणा प्रतिबध्यतेऽत एवासमानदर्शनक्रिया भवति. अर्थात्, स प्रकाशः, येन स्वभावेन कस्यचिच्चतुर्दशपूर्ववेत्तः दर्शनक्रियां प्रति सहकारी भवति, तत्समानं दर्शनमकुर्वन् प्रकाशो द्वितीय चतुर्दशपूर्वविदं प्रति तेनैव स्वभावेन सहकारी न भवति. यतो दर्शनभेदं प्रति, अभिन्न–एकरूप-प्रकाशस्याभावः कारणं भवति. अर्थात् प्रकाशभेदेन दर्शनभेदः सिद्धः, कार्यभेदद्वारा निर्णीयते सर्वद्रष्ट्टचतुर्दशपूर्ववित्सु दर्शनभेदरूपकार्यं भिन्नं भिन्नं दृश्यते, ततस्तद्दर्शनभेदप्रयोजक–प्रकाश-भेदो मन्तव्य एव, ततः प्रथमद्रष्ट्टनिष्ठदृश्यदर्शनसहकारिकारणभूतः प्रकाशो भिन्न–स्वभावः अपरद्रष्ट्टसमवेतदृश्यदर्शनसहकारिभूतः प्रकाशो भिन्न–स्वभाव इति मतेनैव सर्वव्यवस्था सुचार्वी रक्षिता भवेन्नान्यथा तथाहि कारणभेदपूर्वको हि निश्चयतः कार्यभेदः, यदि, अविशिष्ट–सामान्य-कारणप्रयुक्तविशिष्टकार्योत्पत्तिप्रतिपत्तौ जगत्प्रसिद्ध कारणवैचित्र्यं–कारणनानाविधत्वं निरर्थकं स्यात् अथवा कार्यकारणविषयकव्याप्तिरूपो नियमोऽव्यवस्थो भूत्वा भङ्गशीलः स्यात्, नियमः = 'कारणं विना कार्यं न भवेत्–नोत्पद्येत, स्वकार्यकारणं, अन्यकार्यकारणं न भवेत् (पटकारणतन्तुः, घटस्य कारणं न भवति यथा) अन्यथा–विपरीतत्वेन तु कारणं विना कार्योत्पत्तिः, अन्यस्य कारणं स्वकार्यकारणं स्यात्तदा क्वचिदपि कार्यकारणनियमरूपा व्यवस्था न भवेत्," नियमस्य समन्वयः = इतरेतरापेक्षो हि वस्तुस्वभावः' कारणरूपवस्तुस्वभावः कार्यरूपवस्तुस्वभाव-मपेक्षते तथैव कार्यरूपवस्तुस्वभावः' कारणरूपवस्तुस्वभावमपेक्षते इति इतरेतरापेक्षो वस्तुस्वभावः कार्यकारणरूपवस्तुस्वतत्त्वं अत एव कार्यस्वभावापेक्षकारण–स्वभावाधीना कार्यसिद्धिर्भवति, यादृशः प्रकाश–रूपःकारणस्वभावस्तादृश दर्शनरूपं कार्यमुत्पद्यते इत्यर्थः।

प्रकाशभेदरूपकारणभेद योज्यो दर्शनभेदरूप–कार्यभेदो भावयतः 'उत्कृष्टचतुर्दशपूर्वविल्लोकमेव = भगवतां प्रज्ञापना (देशनासूर्यप्रकाशरूप) नामकप्रद्योतेन प्रतिपन्नसमस्ताऽभिलाप्यभावकलापा गणधरा एवोत्कृष्टचतुर्दशपूर्वविदः कथ्यन्तेऽर्थादनन्तगुणवृद्धिरूपोत्कृष्टवृद्धि–स्थानगतचतुर्दश–पूर्व-लब्धिद्वारोत्कृष्ट–चतुर्दशपूर्वविल्लोकमधिकृत्यैव (नान्यान्षट्स्थानहीनश्रुतलब्धीन् पुरुषानधिकृत्य यतो हीनश्रुतलब्धीन् प्रति भगवतां प्रदीपत्वं ज्ञेयं प्रद्योतकरत्वं न) प्रद्योतकरा अर्हन्तो भगवन्तो भवन्ति.

(प्रज्ञापनीय (अभिलाप्य) भावास्तु, अनभिलाप्यभावानामनंतभागे वर्तन्ते, तेष्वपि च प्रज्ञापनीय-भावानामनन्तो भाग एव श्रुते नियोजित एव, यावन्तोऽभिलाप्यभावाः सर्वे श्रुते नियोजयितुं शक्या भवेयुस्तर्हि तज्ज्ञातृणां सर्वेषां ज्ञानं समानं कथितं भवेत्, अर्थाद् यद्यपि सर्वे चतुर्दशपूर्वविदश्चतु-

र्दशपूर्वगताक्षरलाभेन समाना—अक्षरश्रुतापेक्षया सर्वे चतुर्दशपूर्वधराः सदृशाः, तथापि श्रुतविशेषेण, क्षयोपशमस्य वैचित्र्येण ते हीनाधिका ज्ञेयाः, अत एव चतुर्दशपूर्वधरा हानिवृद्धिरूपषट्स्थानपतिताः, अतः कोऽपि, उत्कृष्टचतुर्दशपूर्ववित्, सर्वानभिलाप्यान् भावान् यो जानाति, (ततोऽन्येऽल्पान् स्वल्पान् भावान् जानन्ति यः सर्वेभ्यो भावेभ्योऽल्पीयसोऽभिलाप्यभावान् जानाति स जघन्यचतुर्दशपूर्वधरो ज्ञेयः) तमपेक्ष्य प्रद्योतकरा भगवन्तः ।

इदमत्र हृदयम् = भगवतां प्रज्ञापना—देशनाजन्यं, उत्कृष्टप्रकाशरूपं त्रिपदीनामकं प्रद्योतं प्राप्य, उत्कृष्टश्रुतावरणक्षयोपशमद्वारा समस्ताभिलाप्यभावकलापस्य वेत्तारो गणधरा एवोत्कृष्टचतुर्दशविदो भवन्ति, यतो गणधरेषु योग्याधिकारिषु भगवतां प्रज्ञापनाया एव उत्कृष्टप्रकाशरूपप्रद्योतसम्पादनसामर्थ्यं वर्त्ततेऽर्थाद् भगवान् त्रिपदीप्रज्ञापनाद्वारा सकलाऽभिलाप्यपदार्थविषयक श्रुतावरणादिक्षयोपशमजन्यं, उत्कृष्टप्रकाशनामकप्रद्योतं गणधरेष्वेव विनिदधाति यतो भगवतस्तादृशप्रज्ञापनं, ईदृशमेवापूर्वं सामर्थ्यं समस्ति ।

ननु एवं तर्हि गणधरान् विमुच्यान्येषां भगवद्वचनात्प्रकाशाभावः किं प्राप्नोतीति चेदुच्यते, भगवद्वचनसाध्य—गणधरनिहितप्रद्योतस्यैकदेश एतेषु भवति, यथा दिग्दर्शक-प्रकाशकादित्यप्रकाशः पृथक्पृथग्भागेन पूर्वादिदिक्षु विद्यते । इति प्रद्योतकरसिद्धिः ।

**प्रद्योत्यं तु सप्तप्रकारं जीवादितत्त्वं, सामर्थ्यगम्यमेतत्, तथाशाब्दन्यायात्, अन्यथा अचेतनेषु प्रद्योतनायोगः, प्रद्योतनं प्रद्योत इति भावसाधनस्यासम्भवात्,**

पं०...'प्रद्योत्यं तु'' प्रद्योतविषयः पुनः ''सप्तप्रकारं'' सप्तभेदं ''जीवादितत्त्वं जीवाजीवाश्रवबन्धसंवरनिर्ज्जरामोक्षलक्षणं वस्तु ''सामर्थ्यगम्यमेतत्'' सूत्रानुपात्तमपि, कुत इत्याह—''तथाशाब्दन्यायात्'' क्रियाकर्त्तृसिद्धौ सकर्म्मसु धातुषु नियमतस्तत्प्रकारकर्म्मभावात्, आह—जीवादितत्त्वं प्रद्योतधर्म्मकमपि कस्मान्न भवति, येन सम्पूर्णस्यैव लोकस्य भगवता प्रद्योतकरत्वसिद्धिः स्यादित्याशङ्कय व्यतिरेकमाह—''अन्यथा'' प्रद्योत्यत्वं विमुच्य ''अचेतनेषु'' धर्म्मास्तिकायादिषु, प्रद्योतनायोगः, कथमित्याह—''प्रद्योतनं प्रद्योत इति भावसाधनस्यासम्भवात्'' आप्तवचनसाध्यः श्रुतावरणक्षयोपशमो भावः, साधनं तु प्रद्योतः, कथमिवासावचेतनेषु स्याद् ? अत एवाह—

**अतो ज्ञानयोग्यतैवेह प्रद्योतनमन्यापेक्षयेति, तदेवं स्तवेष्वपि एवमेव वाचकप्रवृत्तिरिति-स्थितम् , एतेन ''स्तवेऽपुष्कलशब्दः प्रत्यवायाय'' इति प्रत्युक्तं, तत्त्वेनेदृशस्यापुष्कलत्वायोगादिति लोकप्रद्योतकराः १४ । एवं लोकोत्तमतया लोकनाथभावतो लोकहितत्वसिद्धेर्लोकप्रदीपभावात्, लोकप्रद्योतकरत्वेन परार्थकरणात् स्तोतव्यसम्पद एव सामान्येनोपयोगसम्पदिति ४ ॥**

**पं०...**"अतो भावसाधनप्रद्योतासम्भवादचेतनेषु धर्मास्तिकायादिषु 'ज्ञानयोग्यतैव' श्रुतज्ञानज्ञातृव्यापाररूपं ज्ञानं प्रति विषयभावपरिणतिरेव "इह" अचेतनेषु "प्रद्योतनं" प्रकाशः, अन्यापेक्षया तत्त्वस्वरूपप्रकाशकमाप्तवचनमपेक्ष्येति, यथा किल प्रदीपप्रभादिकं प्रकाशकमपेक्ष्य चक्षुष्मतो द्रष्टुर्घटादेर्दृश्यस्य दर्शनविषयभावपरिणतिरेव प्रकाशस्तथेहापि योज्यमिति, न तु श्रुतावरणक्षयोपशमलक्षण इति। "एतेनेति" एतेन लोकोत्तमादिपदपञ्चकेन "अपुष्कलशब्द इति" सम्पूर्णलोकरूढस्वार्थानभिधायकः, "तत्त्वेनेत्यादि", तत्त्वेन–वास्तवीं स्तवनवृत्तिमाश्रित्य "ईदृशस्य" विभागेन प्रवृत्तस्य लोकशब्दस्य सम्पूर्णस्वार्थानभिधानेऽपि "अपुष्कलत्वायोगात्" न्यूनत्वाघटनात्, लोकरूढस्वार्थापेक्षया तु युज्येताप्यपुष्कलत्वमिति तत्त्वग्रहणम् ॥

**टी०...**'प्रद्योत्यं तु' = प्रद्योतनामकक्रियाया विषयः, पुनः सप्त प्रकारा भेदा यस्य तत्–सप्तप्रकारं, जीवाजीवाश्रवबन्धसंवरनिर्ज्जरामोक्षलक्षणं जीवबदितत्त्वं (१–चैतन्यलक्षणं जीववस्तु, २–चैतन्यरहित अजीवतत्त्वं, ३–जीवो येन सुखं भुङ्क्ते तत्कर्म पुण्यतत्त्वं, ४–जीवो येन दुःखं संवेदयति तत्कर्म पापतत्त्वं, ५–जीवाजीवावपेक्ष्य जाता शुभाशुभप्रवृत्तिः सा आश्रवतत्त्वं, जीवेषु कर्मागमनं, अत्र पुण्यपापयोः समावेशो भवति, ६ जीवप्रदेशैः सह कर्मणां मिथः संश्लेषो बन्धतत्त्वं, तदाश्रवजन्य भवति, ७–संवरतत्त्वं तु बन्धप्रतिपक्षरूपं प्रवृत्ति–निरोधरूपं, जीव प्रत्यागच्छतां कर्मणां विष्कम्भनं, ८–निर्जरातत्त्वं–पूर्वबन्धस्य देशक्षयो निर्जरातत्त्वं, ९–बन्धजातीयसकलकर्मक्षयो मोक्षः॥) एतत्प्रद्योत्यं सूत्रे, अक्षररूपेणाऽगृहीतमपि, सामर्थ्यगम्यं (प्रद्योतरूपशब्दशक्तिद्वारा गम्यं–ज्ञेयं) यतः, 'तथा' 'शाब्दन्यायात्' शब्दशास्त्रप्रसिद्धनियमविशेषरूप–शाब्दन्यायोऽस्ति, तथाहि = प्रद्योतनामक–क्रियायाः कर्त्तुः सिद्धौ = प्रद्योतकरस्य सिद्धौ सत्यां 'सकर्मका धातवो नियमतः प्रकारभूतं कर्म, गृह्णन्ति' अत्र 'प्र+द्युत्' नामक धातुः प्रेरके णि–प्रत्ययार्थः, तेषु सकर्मक–धातुषु कर्मणा सहिताः सकर्मकाः,) सकर्मकोऽस्ति, अवश्यं कर्म नयति, तत्कर्म क्रियाविषयत्वेन फलाश्रयरूपं भवति, तथा च प्रद्योत्यरूपकर्मणोऽभावे प्रद्योतकरत्वस्याभावोऽतः सामर्थ्यतः–शब्दार्थोभयगतशक्तिद्वारा प्रद्योत्यस्य गम्यमानत्वं ज्ञेयम्, अर्थाद् यथाऽर्हन्तः प्रद्योतयन्ति–प्रकाशयन्ति, इति वाक्ये सति, कान् विषयान् प्रद्योतयन्ति ? इत्याकारकाकाङ्क्षाशमनाय 'प्रद्योत्य' रूपकमपदस्याध्याहारः कर्त्तव्य इति युक्तः, (शब्दाध्याहारः = आकाङ्क्षितशब्दानुसन्धानम् (नील. ४ पृ. ३१) यथा 'पिधेहि' इत्युक्ते द्वारमिति द्वितीयान्तपदाध्याहारः, अध्याहियते ज्ञानायानुसन्धीयते, अश्रुतपदस्योपरितोऽनुसन्धानम्) ननु जीवादितत्त्वं प्रद्योतधर्म्म–स्वभावकमपि कस्मात् कारणान्न भवति येन सम्पूर्णस्यैव लोकस्य भगवतां प्रद्योतकरत्वसिद्धिः स्यादिति चेदुच्यते, अन्यथा = प्रद्योत्यत्वाभाववत्सु चेतनभिन्नेषु धर्मास्तिकायादिषु प्रद्योतनरूपप्रद्योतस्याभावो यतः प्रद्योतनं प्रद्योत इति भावसाधनस्याऽसम्भवोऽस्ति = अर्थाद्, आप्त–सर्वज्ञवचन (त्रिपदीरूपवचन) साध्यः श्रुतावरणक्षयोपशमो भावः, साधनं तु प्रकाशव्यापाररूपः प्रद्योतः, तस्य भाव–साधनरूप प्रद्योतन–

प्रद्योतस्याऽत्रासम्भवोऽस्ति, ननु कथमित्रासौ–प्रद्योतोऽचेतनेषु स्यादिति चेदुच्यते अतः चेतनभिन्नेषु धर्मास्तिकायादिषु अचेतनेषु पूर्वोक्तभावसाधनरूपस्य प्रद्योतस्याऽसम्भवे सति, अतो 'ज्ञानयोग्यतैवेह प्रद्योतनमन्यापेक्षयेति' = अतो, अचेतनमात्रधर्मास्तिकायादिपदार्थेषु पूर्वकथित–परिभाषितभाव-साधनरूप–प्रद्योतस्याऽसम्भवोऽस्ति, अतो भावसाधनतोऽन्य–भिन्नापेक्षया = अचेतनादिस्वरूपस्य प्रकाशकं, आप्त–सर्वज्ञस्य वचनमपेक्ष्य, इह-अचेतनेषु ज्ञानयोग्यतैव' श्रुतज्ञानेन ज्ञातुर्व्यापाररूप ज्ञानं प्रति विषयभावेन–विषयतया परिणतिः परिणमनमेव,

ज्ञातुर्ज्ञानरूपव्यापारे सति तं प्रति सम्मुखीनतया विषयाणां विषयत्वेन परिणतिः स्वभावेन विषय-परिणाम एष ईदृशः कथ्यते ।

तथाहि = यथा प्रदीपप्रभादिकं प्रकाशकमपेक्ष्य चक्षुष्मतो द्रष्टुः द्रष्टृव्यापाररूपदर्शनं प्रति घटादि-रूपदृश्यविषयनिष्ठा, दर्शनक्रियाविषय–भावेन विषयत्वेन परिणमनरूपपरिणतिरेव प्रकाशस्तथाऽचे-तनादिस्वरूपप्रकाशकवीतरागवचनमपेक्ष्य श्रुतज्ञानज्ञातुः ज्ञानरूपव्यापारं प्रति विषयभावे परिणति-रेवाचेतनादिगतः प्रकाशो ज्ञेयः, परन्तु श्रुतावरणक्षयोपशमरूपः प्रकाशो न हि ज्ञय इति.

ततः–पूर्वकथित–प्रतिपादनेन प्रतीयत एव, यत् स्तवेषु–स्तुति स्तोत्रस्तवनादिषु 'समुदायेष्वपि अने-कधा प्रवृत्ताः शब्दा अवयवेष्वपि प्रवर्त्तन्ते' इति न्यायत एवमेव वाचक-शब्दस्य प्रवृत्तिरिति स्थिते केचिदत्र वदन्ति 'स्तवेषु-मङ्गलकारकेषु विघ्न-विध्वंसकेषु, अपुष्कल शब्दः प्रत्यवायः' सम्पूर्ण–लोकरूढस्वार्थानभिधायकः शब्दः प्रत्यवायो विघ्नरूपो भवतीति मतं लोकोत्तमादिपदपञ्चकेन निराकृतं कृतं यतस्तत्त्वतः–वास्तवीं स्तवनवृत्तिमपेक्ष्य विभागशः–विभाजनतः -प्रवृत्तस्य–लोका-वयवेषु, अपि प्रवृत्ति–विषयस्य लोकशब्दस्य सम्पूर्णस्वार्थस्याऽकथनेऽपि अपुष्कलता न्यूनता न घटते परन्तु लोकरूढसम्पूर्णलोकस्वार्थस्यापेक्षया तु न्यूनत्वं युज्येत तथापि वस्तु--तत्त्वतत्त्व–वास्तवस्या-पेक्षया न्यूनत्वं सर्वथा न घटते, वस्तुशब्दतो वस्तुतत्त्वं महत्, शब्दज्ञानतो तत्त्वज्ञानं महदिति ।

एवं च लोकोत्तमत्वेन लोकोत्तमाः सन्त्यत एव लोकनाथत्वेन लोकनाथा भवन्त्यत एव ते, लोकहित-त्वसिद्धिद्वारा लोकहिता भवन्त्यत एते लोकप्रदीपत्वेन लोकप्रदीपा भवन्त्यत एव ते लोकप्रद्योत-करत्वेन लोकप्रद्योतकरा भवन्ति, तथा च पूर्वं पूर्वं कारणं परं परं कार्यमिति न्यायेन पूर्व-पूर्व-पद-निष्ठा कारणता, क्रमशः परपरनिष्ठा कार्यता सङ्कलनीया, अर्थात् समस्तभव्यलोकं प्रति उत्तम-त्वेन (लोकोत्तमाः), अतः विशिष्ट-बीजाधानादिसंविभक्त भव्यलोकं प्रति नाथत्वेन (लोकनाथाः), अतः सकलप्राणिलोकं अथवा पञ्चास्तिकायात्मकलोकं प्रति हितकारित्वेन (लोकहिताः) अतः सम्यग्दर्शननयनसपन्न-संज्ञि-लोकं प्रति प्रदीपत्वेन (लोकप्रदीपाः), अतः, उत्कृष्टचतुर्दशपूर्वधर गणधरलोकं प्रति प्रद्योतकरत्वेन (लोकप्रद्योतकराः), भिन्नभिन्नरूपेषु भिन्नभिन्नक्षेत्रेषु, अर्हन्तो भगवन्तः परार्थकरणतत्परा भवन्ति, अर्थादर्हन्तो भगवन्तः सामान्येन--सर्वलोकव्यापकत्वे । भिन्न-भिन्नार्थकसर्वलोकोपकारकत्वे । पञ्च लोकोत्तमादीनि विशेषणपदानि, एतेषु पञ्चसु पदेषु परार्थकरणरूपोपयोगसत्त्वेन, पञ्चसु पदेषु प्रथमस्तोतव्यसम्पद एव सामान्येन (व्यापकत्वेन) उपयोगवत्त्वेन, तत्पदपञ्चकवती 'सामान्येनोपयोगसम्पत्' कथ्यते, इति चतुर्थीसम्पदः समाप्तितः, चतुर्दशपदानि सहैव समाप्तानीति,

**साम्प्रतं भवनिर्वेदद्वारेणार्थतो भगवद्बहुमानादेव विशिष्टकर्म्मक्षयोपशमभावाद्, अभयादि-धर्म्मसिद्धिस्तद्व्यतिरेकेण नैःश्रेयसधर्म्मासम्भवाद् भगवन्त एव तथा तथा सत्त्वकल्याणहेतव इति प्रतिपादयन्नाह-अभयदयाणमित्यादिसूत्रपञ्चकं, इह भयं सप्तधा-इहपरलोकाऽऽदाना-कस्मादाजीवमरणाश्लाघाभेदेन, एतत्प्रतिपक्षतोऽभयमिति**

**विशिष्टमात्मनः स्वास्थ्यं, निःश्रेयसधर्म्मभूमिकानिबन्धनभूता धृतिरित्यर्थः, न ह्यस्मिन्नसति यथोदितधर्म्मसिद्धिः, सन्निहितभयोपद्रवैः प्रकामं चेतसोऽभिभवात्,**

**चेतःस्वास्थ्यसाध्यश्चाधिकृतो धर्म्मः, तत्स्वभावत्वात्, विरुद्धश्च भयपरिणामेन, तस्य तथाऽस्वास्थ्यकारित्वात्, अतोऽस्य गुणप्रकर्षरूपत्वात्,**

**अचिन्त्यशक्तियुक्तत्वात्, तथाभावेनावस्थितेः सर्वथा परार्थकरणात्, भगवद्भ्य एव सिद्धिरिति। तदित्थंभूतमभयं ददतीत्यभयदाः १५ ॥**

**पं०**–''भवनिर्वेदेत्यादि'' भवनिर्वेदः–संसारोद्वेगो यथा–''कायः संनिहितापायः, सम्पदः पदमापदाम्। समागमाः सापगमाः, सर्व्वमुत्पादि भङ्गुरम् ॥ १ ॥'' एवंचिन्तालक्षणः स एव द्वारम्–उपायस्तेन भगवन्तस्तथा तथा सत्त्वकल्याणहेतवः इत्युत्तरेण सम्बन्धः, कथमित्याह–''अर्थतः'' तत्त्ववृत्त्या ''भगवद्बहुमानादेव'' अर्हत्पक्षपातादेव, भवनिर्वेदस्यैव भगवद्बहुमानत्वात्, ततः किमित्याह–''विशिष्टकर्म्मक्षयोपशमभावाद्'' विशिष्टस्य–मिथ्यात्वमोहादेः कर्म्मणः क्षयोपशमः––उक्तरूपस्तद्भावात्, ततोऽपि किमित्याह––''अभयादिधर्म्मसिद्धेः'' अभयचक्षुर्मार्गशरणादिधर्म्मभावात्, व्यतिरेकमाह––तद्व्यतिरेकेण'' अभयादिधर्म्मसिद्ध्यभावेन ''नैःश्रेयसधर्मा-सम्भवात्'' निःश्रेयसफलानां सम्यग्दर्शनादिधर्म्माणामघटनात् ''भगवन्त एव'' अर्हल्लक्षणाः ''तथा तथा'' अभयदानादिप्रकारेण ''सत्त्वकल्याणहेतवः'' सम्यक्त्वादिकुशलपरम्पराकारणमिति

''इहेत्यादि'' इहपरलोकादानाकस्मादाजीवमरणाश्लाघाभेदेन––इहपरलोकादिभिरुपाधिभिर्भेदो––विशेषस्तेन, तत्र मनुष्यादिकस्य सजातीयादेरन्यस्मान्मनुष्यादेरेव सकाशाद्यद्भयं तदिहलोकभयं, इहाधिकृत–भीतिमतो भावलोक इहलोकः, ततो भयमिति व्युत्पत्तिः, तथा विजातीयात्तिर्यग्देवादेः सकाशान्मनुष्यादीनां यद्भयं तत्परलोकभयं, आदीयत इत्यादानं, तदर्थं चौरादिभ्यो यद्भयं तदादानभयं, अकस्मादेव–बाह्यनिमित्तानपेक्षं गृहादिष्वेव स्थितस्य रात्र्यादौ भयमकस्माद्भयं, आजीवो–वर्त्तनोपायस्तस्मिन् अन्येनोपरुध्यमाने भयमाजीवभयं, मरणभयं प्रतीतं, अश्लाघाभयम्––अकीर्तिभयं, एवं हि क्रियमाणे महदयशो भवतीति तद्भयान्न प्रवर्त्तते इति, ''एतत्प्रतिपक्षतः'' एतस्य––उक्तभयस्य प्रतिपक्षतः––परिहारेणाभयं–भयाभावरूपं ''इति'' इत्येवंलक्षणं, पर्यायतोऽप्याह––

''विशिष्टं'' वक्ष्यमाणगुणनिबन्धनत्वेन प्रतिनियतम् ''आत्मनो'' जीवस्य ''स्वास्थ्यं'' स्वरूपावस्थानं, तात्पर्यतोऽप्याह––''निःश्रेयसधर्म्मभूमिकानिबन्धनभूता धृतिरित्यर्थ इति'' निःश्रेयसाय—मोक्षाय धर्म्मो निःश्रेयसधर्म्मः—सम्यग्दर्शनादिस्तस्य भूमिका–बीजभूतो मार्गबहुमानादिगुणस्तस्य निबन्धनभूता–कारणभूता

धृतिः–आत्मनः स्वरूपावधारणम् "इत्यर्थः" इति–एषः अर्थः–परमार्थः, एतदेव भावयति "न हीति" "न" नैव "हि" यस्माद् "अस्मिन्" स्वास्थ्ये "असति" अविद्यमाने "यथोदितधर्मसिद्धिः" निःश्रेयसधर्मनिष्पत्ति, कुत इत्याह—"सन्निहितभयोपद्रवैः" सन्निहितैः—चेतसि वर्त्तमानैर्भयान्येवोक्तरूपाण्युपद्रवा भयोपद्रवाः--व्यसनानि, तैः प्रकामम्--अत्यर्थं चेतसो--मनसोऽभिभवात्-पीडनात्, प्रकामग्रहणं च भयोपद्रवाणामन्तरङ्गत्वेनात्यन्तिकाभिभवहेतुत्वख्यापनार्थमिति । यदि नामैवं ततः किमित्याह—

"चेतःस्वास्थ्यसाध्यश्चाधिकृतो धर्म्मः" चित्तसमाधानहेतुश्चाधिकृतो धर्म्मः-सम्यग्दर्शनादिः कुत इत्याह-"तत्स्वभावत्वात्", स्वभावो ह्यसौ धर्म्मस्य यच्चेतःस्वास्थ्यसाध्योऽसाविति । ननु भयपरिणामेऽप्यस्य सम्भवात् कथमभय-हेतुकत्वमित्याह—"विरुद्धश्च" निराकृतश्च, भयपरिणामेन, कुत इत्याह-- "तस्य" भयपरिणामस्य "तथा" धर्मसाधकेन चेतःस्वास्थ्येन विरुद्धस्य–अस्वास्थ्यस्य विधायकत्वात् "अतो" निःश्रेयसधर्म्मभूमिकानिबन्धनभूतधृतिरूपत्वाद् "अस्य" अभयस्य भगवद्भ्य एव सिद्धिरिदमुत्तरेण सम्बन्धः, गुणप्रकर्षरूपत्वा"दित्यादि" अत्र चत्वारः परम्पराफलभूता हेतवो गुणप्रकर्षरूपत्वाचिन्त्यशक्तियुक्तत्वतथाभावावस्थितिसर्वथापरार्थकरणलक्षणाः, तथा हि–भगवतां गुणप्रकर्षपूर्वकमचिन्त्यशक्तियुक्तत्वं, गुणप्रकर्षाभावेऽचिन्त्यशक्तियुक्तत्वाभावाद्, अचिन्त्यशक्तियुक्तत्वे च तथाभावेन–अभयभावेनावस्थितिः, अचिन्त्यशक्तियुक्तत्वमन्तरेण तथाभावेनावस्थातुमशक्यत्वात्, तथाभावेनावस्थितौ च सर्वथा–सर्वप्रकारैर्बी-जाधानादिभिः "परार्थकरणं" परहितविधानं' स्वयं तथारूपगुणशून्येन परेषु गुणाधानस्याशक्यत्वात् "भगवद्भ्य एव"

टी०–साम्प्रतमधुना भवनिर्वेदद्वारेण = संसारादुद्वेगः–खेदः यथा सापायः कायः, सम्पद्, विपद्रूपान्तरं, संयोगा वियोगान्तराः, सर्वं यदुत्पन्नं तद् विपद्यते इत्याकारक–बुद्धि–विशेषः, स एव द्वारभूतस्तेन, अर्थतः–तत्त्ववृत्त्या भगवद्बहुमानाद्–अर्हत्पक्षपातादेकार्थाद् भगवद्बहुमानरूप एव भवनिर्वेदोऽस्ति, भवनिर्वेदाभिन्नं भगवद्बहुमानं, भगवत्पक्षपाताभावप्रयुक्तो भवनिर्वेदाभावोऽस्ति, अथापेक्षया भगवद्भक्तिः– भवनिर्वेद इति द्वयमेकार्थकं कथमिति चेद् भगवान् भवनिर्वेदमयोऽस्ति. तदाराधनस्य भवनिर्वेद एव फलं (जय वीतराग ! जगद्गुरो ! भवतु मम तव प्रभावतो भगवन् ! भवनिर्वेद इत्यादि वचनं साक्षिरूपं ज्ञेयं) भवनिर्वेदरूपभगवद्बहुमान–प्रयुक्तो मिथ्यात्वमोहादि–कर्मविषयक–क्षयोपशमो भवति तथा विशिष्टकर्मक्षयोपशमप्रयुक्ता–अभयचक्षुर्मार्गशरणादिभाव-धर्मसिद्धिर्भवति,

यत्राभयादिधर्मसिद्धिस्तत्र, आत्मस्वास्थ्यरूप–मोक्षफलकसम्यग्–दर्शनादिधर्माणां सत्ता, यत्राभयादिधर्मसिद्धेरभावस्तत्र नैःश्रेयसधर्माणामसम्भव इति, अन्वयव्यतिरेकाभ्यां पूर्वोक्तकार्यकारण भावसिद्धिर्ज्ञेया,

अत एव अर्हत्स्वरूपा भगवन्त एव, तेन तेन प्रकारेण-अभयदानादि–प्रकारावच्छेदेन सत्त्वरूपसम्यक्त्वादि कुशलपरम्परायाः कारणमिति. अर्थादर्हन्तो भगवन्त एव भवनिर्वेदादिद्वारा योग्यात्मसु अभयादि धर्मजननद्वारा सम्यक्त्वादिमंगलमालाया विधायका इति प्रतिपादनकरणाय कथयन्ति—

'अभयदयाणमित्यादिसूत्र पञ्चक' इह भयं सप्तधा–इहपरलोकादानाकस्मादाजीवमरणऽश्लाघाभेदेन, एतत्प्रतिपक्षतोऽभयमिति. अर्थात् अभयदेभ्यः, चक्षुर्देभ्यो, मार्गदेभ्यः, शरणदेभ्यः, बोधिदेभ्यः, अर्हद्भ्यो भगवद्भ्यो नमः, एतानि पञ्चसूत्राणि सन्ति. ततस्तत्प्रथमं सूत्रं व्याख्यायते, अभय–सप्तभयानामभावोऽभयम्, सप्तधाभयमिह—:

(१) इहलोकभयं = समानजातीयादे र्मनुष्यादिकस्यान्यस्मान्मनुष्यादेः सकाशाद् भयं–चित्तविह्वलता–चिन्तादिकं,

(२) परलोकभयं = विजातीयात् तिर्यग्देवादेः सकाशात् मनुष्यादीनां भयं,

(३) आदानभयं = धनादिकमादानं, तदर्थं चौरादिभ्यो यद्भयं तदाऽऽदानभयं,

(४) अकस्माद्भयं = बाह्यनिमित्तस्यापेक्षां विना गृहादिष्वेव स्थितस्य रात्र्यादौ जलाग्निभ्यो भयं,

(५) आजीवभयं = निर्वाहस्योपायेऽन्येनोपरुध्यमाने भयं, निर्वाहसाधनभङ्गजन्यं भयं

(६) मरणभयं = प्राणवियोगरूपमरणतो भयं,

(७) अश्लाघाभयं = एवमुभयलोकविरुद्धे कार्ये क्रियमाणे महती, अपकीर्तिर्भविष्यतीति तद्भयान्न प्रवर्तते तदश्लाघाभयं ।

एतदुक्तसप्तभय-परिहारतोऽभयं भयाभावरूपं ज्ञेयम् । अथ शब्दान्तरपर्यायापेक्षया अभयं निरूपयति. विशिष्टं = वक्ष्यमाण–सम्यग्दर्शनादि–मोक्षमार्गरूपगुणमूलकारणत्वेन नियतं व्यापकं, 'तादात्म्य-सम्बन्धावच्छेदेनात्मस्वरूपावस्थानरूपं स्वास्थ्यमभयं, अन्ततो गत्वा मोक्षफलकसम्यग्दर्शनादि–बीजभूता (मार्गबहुमानप्रवेशप्रवर्त्तनादिषु प्रेमरूपो यो गुणस्तस्य) निबन्धनभूता धृतिः (आत्म-सम्बन्धिकस्वरूपावधारणम्) इत्यर्थः—

एषोऽर्थः परमार्थः, अर्थात् सकलभय–चञ्चलतारूपपरिणामेभ्यः पृथक् पृथक् निर्धारणम्, स्वरूपेणाभयमयोऽहमिति निर्णयः, साङ्ख्यपरिभाषायां धृतिः कथ्यते भगवता गोपेन्द्रपरिव्राजकेनाभयं धृतिरुच्यते ।

अत्राभयत्वधर्मसम्यग्दर्शनादि–धर्मयोरन्वयव्यतिरेकाभ्याम्, कार्यकारणभावः । एतद् विशिष्टात्मीय-स्वास्थ्येऽसति निःश्रेयसधर्मसिद्धि र्न विद्यते यतः, एतत्—सन्निधानेन चेतसि वर्त्तमान–भयरूपोपद्रव-दुःखैः, आत्यन्तिकत्वेन मनसः पीडितत्वं वर्त्तते, चित्तवर्त्तिसप्तभयरूपसन्तापाः मानसं भृशं सन्तापयन्ति, चित्तस्य भयग्रस्तदशायां, अभयाभावप्रयुक्तः सम्यग्दर्शनादिमोक्षमार्गाभावः । सम्यग्दर्शनादि-रूपाश्रिकृतधर्मः (कार्यं) चित्तसमाधिना साध्यः–चेतः स्वास्थ्यरूपसाधनजन्यः, यतः सम्यग्दर्शनादि-रूपधर्म–कार्यस्यैष स्वभावः यच्चेतःस्वास्थ्येन साध्यो भवति नान्यथेति ।

ननु चित्तचाञ्चल्यरूपभयपरिणामे सत्यपि सम्यग्दर्शनादिसम्भवेन सम्यग्दर्शनादिरूपमोक्षधर्मं प्रति चित्तस्वास्थ्यरूपाभयधर्मस्य कथं कारणता ? यतः कारणाभावप्रयुक्तकार्योत्पत्तिरूपव्यतिरेकव्यभिचारदोषः कथं वार्यः ? इति चेदुच्यते भयपरिणामेन सम्यग्दर्शनादिरूपो मोक्षधर्मः प्रतिबद्धः, (विरुद्धः–खण्डितः) यावद्भयपरिणामरूपप्रतिबन्धकस्तिष्ठति तावत् स्थिरतारूपाभयाभावेन मोक्ष–धर्मः प्रतिबध्यते, भयपरिणामरूपप्रतिबन्धकाभावप्रयुक्तचित्तस्थिरतारूपाभयधर्मद्वारा मोक्षधर्मः साध्यो भवति. अतो व्यतिरेकव्यभिचाराभावो यथा, अभयसत्त्वे मोक्षधर्मसत्ता, अभयाभावे मोक्ष-धर्मस्यासत्तेति अन्वयव्यतिरेकौ निश्चेतव्यौ । मोक्षधर्मसाधकेन चित्त–स्वास्थ्येन विरुद्धस्य, अस्वास्थ्यस्य विधायको भयपरिणामो भवतीत्यर्थः ।

धृतिरूपाभयनामकमौलिकगुणस्य भगवद्भ्यः (भगवद्गुणबहुमानाहितकर्मक्षयोपशमजन्यत्वात्) एव सिद्धि र्भवति. एतद्विषये परम्परकारणभूताः, पूर्वपूर्वहेतवश्चत्वारो दर्श्यन्ते तथाहि

(१) एतेऽर्हन्तः प्रकृष्टगुणवन्तः सन्ति अर्थाद् भगवत्सु गुणानां प्रकर्षो विद्यतेऽतः.

(२) भगवन्निष्ठगुणप्रकर्षजन्यमचिन्त्यशक्तियुक्तत्वं (प्रकृत्यर्थे प्रकारीभूतधर्मो भावप्रत्ययार्थ इति न्यायेन तद्वत्त्वं–तद्विशिष्टत्वं तद्युक्तत्वं तदेव यथा गन्धविशिष्टत्वं गन्धयुक्तत्वं च गन्ध एव, तथाऽत्रापि अचिन्त्यशक्तियुक्तत्वं–अचिन्त्यशक्तिरेवेति बोध्यम् ।।) अचिन्त्यशक्तिरेव, गुणप्रकर्ष-कारणाभावेऽचिन्त्यशक्तिरूपकार्याभावः,

(३) भगवत्सु, अचिन्त्यशक्तिसत्त्व एव भगवतामेवाभयभावेन (आत्मनिष्ठविशिष्टस्वस्वत्वेन स्वरूपावस्थानरूपेण) स्थितिरेव, यतो विनाऽचिन्त्यशक्ति, अभयभावेनाऽवस्थानमशक्यम् अभयभावा-वच्छिन्नावस्थितिरूपकार्यं प्रति, अचिन्त्यशक्तिः कारणम् ।

(४) यदा भगवन्तोऽचिन्त्यशक्तिप्रयुक्ताभयभावेन वर्तन्ते, तदा सर्वथा बीजाधानं (भव्यभूमिकायां सम्यक्त्वबीजवपनादिभिः परहितविधानं) यतः, स्वयं तथारूपगुणशून्यस्य परेषु गुणाधानस्याशक्यत्वं यथा स्वयमतीर्णः–निर्गुणः परांस्तारयितु–गुणवतः कर्तुं, अनीश एव, भगवद्भ्य एवाभयस्य सिद्धिः (धृतिरूपाभयस्य सिद्धि र्भगवद्भ्य एव, तत्कारणानि निरूप्यन्ते)

(१) स्वास्थ्यरूपत्वेनाभयं प्रकृष्टगुणरूपं (२) मोक्षहेतुत्वेनाभयं अचिन्त्यशक्तियुतं (३) धर्म-हेतुत्वेनाभयवत्त्वावच्छिन्नं, अभयं (४) भगवत्स्वभाववत्त्वेन सर्वथा परार्थकरणरूपं, अभयं ।

एवं विशिष्टमभयं ददतीत्यभयदा अर्हन्तो भगवन्तो भवन्ति. एवं शक्रस्तवस्य पञ्चदशरूपाभयद-पदस्य व्याख्या समाप्ता.

**तथा 'चक्खुदयाणं' इह चक्षुः चक्षुरिन्द्रियं, तच्च द्विधा,**

**द्रव्यतो भावतश्च, द्रव्येन्द्रियं–बाह्यनिर्वृत्तिसाधकतमकरणरूपं**

**"निर्वृत्त्युपकरणे द्रव्येन्द्रिय" (तत्त्वार्थे अ० २ सू० १७) मितिवचनात्, भावेन्द्रियं तु क्षयोपशम उपयोगश्च, "लब्ध्युपयोगौ भावेन्द्रिय" (तत्त्वार्थे अ० २ सू०१८) मिति वचनात्, तदत्र चक्षुः–विशिष्टमेवात्मधर्म्मरूपं**

**तत्त्वावबोधनिबन्धनश्रद्धास्वभावं गृह्यते, श्रद्धाविहीनस्याचक्षुष्मत इव रूपमिव तत्त्वदर्शनायोगात्, न चेयं मार्ग्गानुसारिणी सुखमवाप्यते, सत्यां चास्यां भवत्येतन्नियोगतः,**

**कल्याणचक्षुषीव सद्रूपदर्शनं, न ह्यत्र प्रतिबन्धो नियमेन ऋते कालादिति निपुणसमयविदः, अयं चाप्रतिबन्ध एव, तथा तद्भवनोपयोगित्वात्, तमन्तरेण तत्सिद्ध्यसिद्धेः, विशिष्टस्योपादानहेतोरेव तथापरिणतिस्वभावत्वात्, तदेषाऽवन्ध्यबीजभूता धर्म्मकल्पद्रुमस्येति परिभावनीयं । इदं चेह चक्षुरिन्द्रियं चोक्तवद्भगवद्भ्य इति चक्षुर्ददतीति चक्षुर्दाः १६ ॥**

पं०—चक्षुः "बाह्यनिर्वृत्तिसाधकतमकरणरूपमिति" बाह्या–बहिर्वर्त्तिन्युपलक्षणत्वाच्चास्या अभ्यन्तरा च निर्वृत्तिः–वक्ष्यमाणरूपा साधकतमं करणं च–उपकरणेन्द्रियं ततस्ते रूपं यस्य तत्तथा "निर्वृत्त्युपकरणेत्यादि" सूत्रद्वयाभिप्रायोऽयं–इदेन्दनादिन्द्रो-जीवः, सर्व्वविषयोपलब्धिभोगलक्षणपरमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियं श्रोत्रादि, तच्चतुर्विधं–नामादिभेदात्, तत्र नामस्थापने सुज्ञाने, निर्वृत्त्युपकरणे द्रव्येन्द्रियं, लब्ध्युपयोगौ भावेन्द्रियं, तत्र निर्वृत्तिराकारः, सा च बाह्या अभ्यन्तरा च, तत्र बाह्या अनेकप्रकारा, अभ्यन्तरा पुनः क्रमेण श्रोत्रादीनां कदम्बपुष्प १ धान्यमसूरा २ अतिमुक्तकपुष्पचन्द्रिका ३ क्षुरप्र ४ नानाकारसंस्थाना ५, उपकरणेन्द्रियं–विषयग्रहणे समर्थं, छेद्यच्छेदने खड्गस्येव धारा, यस्मिन्नुपहते निर्वृत्तिसद्भावेपि विषयं न गृह्णातीति, लब्धीन्द्रियं–यस्तदावरणक्षयोपशमः, उपयोगेन्द्रियं–यः स्वविषये ज्ञानव्यापार इति, "तदित्यादि" यत इन्द्रियत्वेन सामान्यत इत्थं चक्षुः, तत्–तस्माद् "अत्र" सूत्रे चक्षुर्विशिष्टमेव, न सामान्यम्, "आत्मधर्म्मरूपम्" उपयोगविशेषतया जीवस्वभावभूतं, विशेष्यमेवाह–

तत्त्वावबोधनिबन्धनं–जीवादिपदार्थप्रतीतिकारणं या श्रद्धा–रुचिः–धर्म्मप्रशंसादिरूपा, सा स्वभावो लक्षणं यस्य तत्तथा "गृह्यते" अङ्गीक्रियते । ननु ज्ञानावरणादिक्षयोपशम एव चक्षुष्टया वक्तुं युक्तः, तस्यैव दर्शनहेतुत्वात्, न तु मिथ्यात्वमोहक्षयोपशमसाध्या तत्त्वरुचिरूपा श्रद्धेत्याशङ्क्याह–"श्रद्धाविहीनस्य" तत्त्वरुचिरहितस्य "अचक्षुष्मत इव" अन्धस्येव "रूपमिव" नीलादिवर्णं इव यत्तत्त्वं–जीवादिलक्षणं तस्य दर्शनम्–अवलोकनं तस्यायोगाद्–अनुपपत्तेः, भवत्वेवं तथाऽप्यसावन्यहेतुसाध्या स्यान्न भगवत्प्रसादसाध्येत्याह–"न च" नैव "इयं" तत्त्वरुचिरूपा श्रद्धा, मार्ग्गं–सम्यग्दर्शनादिकं मुक्तिपथमनुकूलतया सरति–गच्छतीत्येवंशीला मार्ग्गानुसारिणी, "सुखम्" अपरिक्लेशं यथा कथञ्चिदवाप्यते इत्यर्थः, भवतु भगवत्प्रसादसाध्येयं, परं स्वसाध्यं प्रति न नियतो हेतुभावोऽस्याः स्यादित्याह–"सत्यां च" विद्यमानायां च "अस्याम्" उक्तरूपश्रद्धायां "भवति" जायते "एतत्" तत्त्वदर्शनं "नियोगतः" अवश्यंभावेन, विदर्शनमाह–

"कल्याणचक्षुषीव" निरुपहतायामिव दृष्टौ "सद्रूपदर्शनं" सतः–सद्भूतस्य रूपस्य दर्शनम्–अवलोकनं,

ननु काचकामलाद्युपहत इव चक्षुषि अन्यथेति, एतदेव भावयति–"नहि" नैव "अत्र" मार्गानुसारिश्रद्धासाध्यदर्शने "प्रतिबन्धो" विष्कम्भो "नियमेन" अवश्यंभावेन कुतश्चिदिति गम्यते, किं सर्वथा ? नेत्याह–"ऋते" विना, कालात्, काल एव ह्यत्र प्रतिबन्धक इति भाव: "इति" एवं "निपुणसमयविदो" निश्चयनयव्यवहारिणो ब्रुवते, ननु कालेऽपि प्रतिबन्धके कथमुच्यते–'न ह्यत्र प्रतिबन्धो नियमेने'त्याह–"अयं च" कालप्रतिबन्ध: अप्रतिबन्ध एव, कुत इत्याह–"तथेति" दर्शनरूपतया तस्या:–श्रद्धाया भवनं–परिणमनं तद्भवनं तत्रोपयोगित्वात्–व्यापारवत्त्वात् कालस्य, व्यतिरेकमाह–"तं" कालम् "अन्तरेण" विना "तत्सिद्ध्यसिद्धे:" तस्य–दर्शनस्य स्वभावलाभानिष्पत्ते:, कुत इत्याह–"विशिष्टस्य" विचित्रसहकारिकारणाहितस्वभावातिशयस्य, 'उपादानहेतोरेव" परिणामिकारणस्यैव

"तथापरिणतिस्वभावत्वात्" तथापरिणति:–कार्याभिमुखपरिणाम: सैव स्वभावो यस्य कालस्य तत्तथा, तद्भावस्तत्त्वं तस्माद्द्रव्यपर्यायत्वात्कालस्य "उक्तवदिति" प्राक्सूत्राभिहितार्थवत् ।

**टीका**–अथ–भगवत्सु अभयदत्वं साधितम्, जगति सत्यमेवाऽस्ति यदभयदा स्तीर्थंकरा एव सन्ति नान्ये, यथैतेऽर्हन्तो भव्येभ्योऽभयदास्तथैव सत्यदर्शनरूपनयनदा अपि सन्त्येतद्विषयगर्भितस्य शक्रस्तवान्तर्गतषोडशपदस्य–चक्षुर्देति पदस्य विशिष्टं विवरणं = अत्र चक्षुर्देति पदघटकं, चक्षु: = चक्षुरिन्द्रियं सामान्यत:, तच्च द्रव्यतो भावतश्च द्विधा,

(१) बाह्याभ्यन्तरसाधकतमकरणरूपोपकरणेन्द्रियं द्रव्येन्द्रियं यत: "निर्वृत्ति उपकरणे द्रव्येन्द्रिय" (त० अ० २ सू०–२७) भावेन्द्रियं तु क्षयोपशम उपयोगश्च "लब्ध्युपयोगौ भावेन्द्रियं" (त० अ० २ सू० १८) अत्र निर्वृत्तिपदेनाकारो गृह्यन्ते, उपकरणं–इन्द्रियाभ्यन्तराकृतिस्वविषयग्राहकशक्ति लब्धि: ज्ञानाद्यावरण–क्षयोपशमविशेष:, उपयोग:–लब्ध्यनुसारेण विषय–व्यापि–आत्मनो ज्ञानादि–व्यापारविशेष:, एवं चेन्द्रियत्वेन प्रसिद्धं सामान्य चक्षुर्न गृह्यते परन्तु अत्र सूत्रघटितं चक्षुर्विशिष्टमेव न सामान्यं, अत्र वैशिष्टय च, उपयोगविशेषजीवस्वभाव–विशिष्टजीवादितत्त्वनिर्णय-कारणभूतश्रद्धा (रुचिधर्मप्रशंसादिरूप) रूपस्वभावविशिष्टात्मधर्मवत्त्वं । न च दर्शनहेतुभूतज्ञानावरणादिक्षयोपशम एव चक्षुष्टवं कथं न कथितं ? मिथ्यात्वमोहक्षयोपशमसाध्यतत्त्वरुचिरूपश्रद्धा चक्षुष्टवेन कथं कथितं ? वाच्यम्, अन्धस्य रूपमिव तत्त्वरुचिविहीनस्य तत्त्वदर्शनानुपपन्नत्वमिति. इय प्रकृतश्रद्धा भगवत्प्रसादसाध्यत्वेन प्रसिद्धा, सम्यग्दर्शनादिरूप–मोक्षमार्गानुकूलत्वेन मार्गानुसारिणी, सुखत्वेन–क्लेशरहितत्वेनाऽवाप्यते, निरुक्तश्रद्धायां सत्यामेव नियमतस्तत्त्वदर्शनं भवति, यथा कल्याणचक्षुषि सत्येव सद्भूतरूपस्य दर्शनम्. काचकमलाद्युपहते चक्षुषि सद्भूतरूपदर्शनं न भवति मार्गानुसारिश्रद्धासाध्यदर्शनं प्रति काल विना सर्वथा प्रतिबन्धकाभाव:, काल एवात्र प्रतिबन्धक इति निश्चयनयव्यवहारिणो ब्रुवते. न च काले प्रतिबन्धके नियमेनात्र प्रतिबन्धो नेति वाच्यम् कालप्रतिबन्धोऽप्यप्रतिबन्धरूप उत्तेजक एव, (यथा दाहं कार्यं प्रति मणिविशेषस्य प्रतिबन्धकता लोकसिद्धा, परन्तु मणिविशेषान्तरसत्तायां दाहोत्पत्ति र्भवति, मणिविशेषान्तराभावविशिष्टमणिविशेषस्य प्रतिबन्धकताऽवश्य–वक्तव्यताऽस्ति, अतो मणिविशेषांतरस्य, उत्तेजकता उपपन्नाऽस्ति, तथा दर्शन-

रूपकार्यं प्रति कालविशेषस्य प्रतिबन्धकता सिद्धाऽस्ति, परन्तु कालविशेषांतरस्याऽथवा तत्त्वरुचिनामकश्रद्धाकारणस्य सत्तायां दर्शनरूपकार्यमुत्पद्यते, कालविशेषांतरस्याऽथवा श्रद्धाया अभाव विशिष्टकालविशेषस्य प्रतिबन्धकताया अवश्यवक्तव्यत्वेन कालविशेषांतरस्याऽथवा श्रद्धाया उत्तेजकता–कार्यजनकता, अर्थात् प्रतिबन्धशक्तिं निरुध्य कार्यजनकतारूपोत्तेजकता मन्तव्यैव, युक्तियुक्तमिति.) दर्शनरूपेण विशिष्टश्रद्धायाः परिणमने व्यापारवत्त्वेन कालः कारणम्, यतः कालं विना दर्शने स्वभावलाभस्य सिद्धिर्न भवति, विचित्रसहकारिकारणकृतस्वभावातिशयरूपविशिष्टस्य परिणामिकारणस्यैव तथापरिणामस्वभावोऽस्ति,

तेन प्रकारेण पूर्वोक्तेन विशिष्टेन परिणमनरूपस्वभावोऽस्ति, तथा च कालकारणसहकृततत्त्वरुचिरूपश्रद्धा, तत्त्वदर्शनपरिणतिकार्यं प्रति कारणम्,

ततः पूर्वोक्तविवेचनत एषा–तत्त्वरुचिरूपमार्गानुसारिश्रद्धा, सम्यग्–दर्शनादि–मोक्षधर्मरूपकल्पवृक्षं प्रति, अवन्ध्यबीज (नियत–अव्यवहित फलजनक) भूताऽस्तीति परिभावनीयमेवेति । इयं–विशिष्टश्रद्धा–मार्गानुसारितत्त्वरुचिरूपं लोकोत्तरं चक्षुरिन्द्रियं पूर्वोक्ताऽर्हद्भ्यो भगवद्भ्य इति. तथा च यथाऽभयनामकोऽद्भुतधर्मो निरुक्तविशेषणविशिष्टाऽर्हद्भगवद्भ्यः प्राप्यते तथा विशिष्टश्रद्धारूपं नयनं भगवद्भ्य एवेति. एवं च मार्गानुसारितत्त्वरुचिश्रद्धाभावचक्षुर्दभ्योऽर्हद्भ्यो भगवद्भ्योनमः । इति शक्रस्तवस्य 'चक्षुर्दंति' रूपं षोडशपदस्य विवरणं समाप्तम् ।

**तथा 'मग्गदयाणं' इह मार्गः–चेतसोऽवक्रगमनं,**

**भुजङ्गमनलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषः, हेतुस्वरूपफलशुद्धा सुखेत्यर्थः, नास्मिन्नसत्यन्तरेऽसति यथोदितगुणस्थानावाप्तिर्मार्गविषमतया चेतः– स्खलनेन प्रतिबन्धोपपत्तेः, सानुबन्धक्षयोपशमतो यथोदितगुणस्थानावाप्तिः, अन्यथा तदयोगात्**

**क्लिष्टदुःखस्य तत्र तत्त्वतो बाधकत्वात्, सानुबन्धं क्लिष्टमेतदिति तन्त्रगर्भः, तद्बाधितस्यास्य तथागमनाभावात्, भूयस्तदनुभवोपपत्तेः, न चासौ तथाऽतिसङ्क्लिष्टस्तत्प्राप्ताविति प्रवचनपरमगुह्यं**

**न खलु भिन्नग्रन्थेर्भूयस्तद्बन्ध इति तन्त्रयुक्त्युपपत्तेः, एवमन्यनिवृत्तिगमनेनास्य भेदः, सिद्धं चैतत्त्वत्र्यादिशब्दवाच्यतया योगाचार्याणां, प्रवृत्तिपराक्रमजयानन्दऋतम्भरभेदः कर्मयोग इत्यादिविचित्रवचनश्रवणादिति, न चेदं यथोदितमार्गाभावे, स चोक्तवद्भगवद्भ्य इति मार्गं ददति मार्गदाः १७ ॥**

पं०–"भगवदयार्ण", "मार्गः इहेत्यादि" "इह" सूत्रे "मार्गः" पन्थाः, स किंलक्षण इत्याह–"चेतसो" मनसोऽवक्रगमनम्–अकुटिला प्रवृत्तिः, कीदृश इत्याह–भुजंगमस्य–सर्पस्य गमननलिका–शुषिरवंशादिलक्षणा यथाऽसावन्तः प्रविष्टो गन्तुं शक्नोति, तस्या आयामो–दैर्घ्यं तेन तुल्यः क्षयोपशमविशेष इति योगः, किंभूत इत्याह–"विशिष्टगुणस्थानावाप्तिप्रगुणः" इति, वक्ष्यमाणविशिष्टगुणस्थानावाप्तिहेतुः, "स्वरसवाही" निजाभिलाषप्रवृत्तः "क्षयोपशमो" दुःखहेतुदर्शनमोहादिक्षयविशेषः, तथाहि–यथा भुजंगमस्य नलिकान्तःप्रवृत्तस्य गमनेऽवक्र एव नलिकायामः समीहितस्थानावाप्तिहेतुः, वक्रे तत्र गन्तुमशक्यत्वाद्, "एवमसावपि" मिथ्यात्वमोहनीयादिक्षयोपशमविशेष इति । तात्पर्यमाह–

"हेतुस्वरूपफलशुद्धा" हेतुना–पूर्वोक्तश्रद्धालक्षणेन स्वरूपेण–स्वगतेनैव फलेन–विविदिषादिना शुद्धा–निर्दोषा सुखा–उपशमसुखरूपा सुखासिकेत्यर्थः, एष मार्गस्वरूपनिश्चयो, व्यतिरेकतो भावमाह–"न" नैव "अस्मिन्" क्षयोपशमरूपमार्गे "आन्तरे" अन्तरंगहेतौ बहिरंगगुर्वादिसहकारिसद्भावेऽपि "यथोचितगुणस्थानावाप्तिः" सम्यग्दर्शनादिगुणलाभः, कुत इत्याह–"मार्गविषमतया" क्षयोपशमविसंस्थुलतया "चेतःस्खलनेन" मनोव्याघातेन "प्रतिबन्धोपपत्तेः" यथोचितगुणस्थानावाप्तेर्विघ्नसंभवात्, कुतो ? यतः "सानुबन्धक्षयोपशमात्" उत्तरोत्तरानुबन्धप्रभूतक्षयोपशमात् "गुणस्थानावाप्तिः" पूर्वोक्ता जायत इति, व्यतिरेकमाह–"अन्यथा" सानुबन्धक्षयोपशमाभावे "तदयोगात्" यथोचितगुणस्थानावाप्तेरभावात्, कुत इत्याह–

क्लिष्टं दुःखमस्तीति दुःखं–कर्म ततः क्लिष्टकर्मणः "तत्र" निरनुबन्धक्षयोपशमे "तत्त्वतः" अन्तरंगवृत्त्या "बाधकत्वात्" प्रकृतगुणस्थानस्येति, क्लिष्टस्वरूपमेव व्याचष्टे–"सानुबन्धं" परम्परानुबन्धवद्, क्लिष्टं-क्लेशकारि, एतत्–कर्म, न पुनस्तत्कालमेव परमक्लेशकार्यपि स्कन्दकाचार्यशिष्यककर्मवन्महावीरकर्मवद्वा "इति तन्त्रगर्भः" एष प्रवचनपरमार्थः, कुत एतदित्याह–"तद्बाधितस्य" क्लिष्टकर्माभिभूतस्य "अस्य" चेतसः "तथागमनाभावात्" अवक्रतया विशिष्टगुणस्थानगमनाभावात्, कुत इत्याह–"पुनस्तदनुभवोपपत्तेः" तस्य–क्लिष्टदुःखस्यानुभव एवोपपत्तिस्तस्याः, अवश्यमनुभवनीये हि तत्र कथमवक्रं चित्तगमनं स्यादिति भावः । ननु सम्यग्दर्शनावाप्तावपि कस्यचिन्मिथ्यात्वगमनात् कथमत्र क्लिष्टदुःखाभाव इत्याह–"नच" नैव "असौ" प्रकृतजीवः "तथा" प्रागिव "अतिसङ्क्लिष्टः" अतीव सानुबन्धक्लेशवान् "तत्प्राप्तौ" मार्गप्राप्तौ "इति" एतत् "प्रवचनपरमगुह्यं" शासनहृदयम्, अत्र हेतुः–

"न खलु" नैव "निवृत्तः" सम्यक्त्ववतो "भूयः" पुनः "तद्बन्धो" ग्रन्थिबन्धः "इति" एवं "तन्त्रयुक्त्युपपत्तेः" पुनस्तद्बन्धेन न व्यवस्थीयते कदाचिदित्यादिशास्त्रीययुक्तियोगात्, ततः किं सिद्धमित्याह–"एवं" सानुबन्धतया "अनिवृत्तिगमनेन" अनिवृत्तिकरणप्राप्त्या "अस्य" मार्गरूपक्षयोपशमस्य "भेदो" विशेषः, शेषक्षयोपशमेभ्यः परतन्त्रेणापीदं साधयन्नाह–"सिद्धं च" प्रतीतं" च "एतत्" सानुबन्धक्षयोपशमवतो ग्रन्थिभेदादिलक्षणं वस्तु "प्रवृत्त्यादिशब्दवाच्यतया" शास्त्रान्तरेष्वित्यर्थः, "योगाचार्याणां" पतञ्जलिप्रभृतीनां, कथमित्याह–"प्रवृत्तिपराक्रमजयानन्दऋतम्भरभेदः कर्मयोग" प्रवृत्तिः–चरमयथाप्रवृत्तिकरणशुद्धिलक्षणा, प्रकृतो मार्ग इत्यर्थः, पराक्रमेण–वीर्यविशेषवृद्ध्या अपूर्वकरणेनेत्यर्थो, जयो–विघ्नकाभिभवो विघ्नजयोऽनिवृत्तिकरणमित्यर्थः, आनन्दः–सम्यग्दर्शनलाभरूपः'तमोग्रन्थिभेदादानन्दः' इति वक्ष्यमाणवचनात्, ऋतम्भरः सम्यग्दर्शनपूर्वको देवतापूजनादिर्व्यापारः, ऋतस्य–सत्यस्य भरणात्, ततश्च ते प्रवृत्त्यादयो भेदा यस्य स तथा

कर्म्मयोग:—क्रियालक्षण:, कर्म्मग्रहणं इच्छालक्षणस्य प्रणिधानयोगस्य व्यवच्छेदार्थं, सामान्येन ह्यन्यत्र योग: पंचधा, यदुक्तम्—'प्रणिधिप्रवृत्तिविघ्नजयसिद्धिविनियोगभेदत: प्राय:। धर्म्मज्ञैराख्यात: शुभाशय: पंचधाऽत्र विधौ ।।१।। (इति षोडशके ३ आर्या ६) शुभाशयश्च योग:, "इत्यादीति" आदिशब्दादिच्छायोगादिवचनग्रह:,

**टीका**—अथ शक्रस्तवस्य 'मार्गदेतिरूपस्य सप्तदशपदस्य व्याख्यानम्-यथाऽर्हन्तो भगवन्तो, अभयदा:, चक्षुर्दा: तथा मार्गदा भवन्ति, अतो मार्गदेभ्योऽर्हद्भ्यो भगवद्भ्यो नम: । मार्गदेतिपदघटकमार्गपदार्थस्य विवरणम् । मार्ग इत्युक्तेऽयमर्थो विव्रियते—मार्ग:—मनस: सरलत्वेन गमनम् यथा भुजङ्गमस्य गमननलिका (शुषिरवंशलक्षणा ययाऽसावन्त: प्रविष्टो गन्तुं शक्नोति) अस्ति तस्या आयाम:—दीर्घता, तत्तुल्य: क्षयोपशमविशेषो मार्ग:,

विशिष्टगुणस्थानलाभहेतु:, स्वरसवाही, क्षयोपशमविशेष: (दु:खहेतुदर्शन-मोहादिक्षयविशेष:) तथाहि यथा भुजङ्गमस्य नलिकान्त: प्रवृत्तस्य गमनेऽवक्र एव नलिकायाम: समीहितस्थानप्राप्तिहेतु: वक्रे तत्र गन्तुमशक्यत्वात्, एवं मिथ्यात्वमोहनीयादिक्षयोपशमश्चेतसोऽसौ ।

तात्पर्यमिदं = (१) हेतुशुद्धमार्ग:—पूर्वकथितमार्गनुसारितत्त्वरुचिश्रद्धारूपहेतुना, चेतसो विशिष्टक्षयोपशम:,

(२) स्वरूपशुद्धमार्ग: = स्वगत—विमल—विमलतर—विमलतमस्वरूपेण शुद्धमार्ग:,

(३) विविदिषाऽऽदिफलेन शुद्धमार्ग: फलरूपशुद्धमार्गोऽत एव हेतुस्वरूपफलत: शुद्ध एष प्रकृतमार्ग:, उपशमरूपत्वेन सांख्यदर्शने 'सुखा' 'सुखासिका' रूपत्वेन सम्बोध्यते,

मिथ्यात्वमोहनीयादिक्षयोपशमरूपकारणसत्त्वे सम्यग्दर्शनादिगुणस्थानप्राप्तिरूपं कार्यं भवतीत्यन्वय:, मिथ्यात्वमोहनीयादिक्षयोपशमरूपमार्गाभावे सम्यग्दर्शनादिगुण-स्थान—प्राप्तेरभाव इति व्यतिरेक: ।

तथा चास्मिन् क्षयोपशममार्गरूपेऽन्तरङ्गहेतौ, असति, बहिरङ्गगुर्वादिसहकारि-सद्भावेऽपि सम्यग्दर्शनादिगुणलाभो न, यत: मार्गस्य विषमतया क्षयोपशमविसंस्थुलतया (निरनुबन्धतया व्याकुलतया निम्नतोन्नतया) मनोव्याघातेन पूर्वोक्तगुणस्थानप्राप्ते: प्रतिबन्धसम्भवोऽस्ति, सानुबन्धक्षयोपशम—उत्तरोत्तरानुबन्धप्रभूतक्षयोपशमाद् गुणस्थान प्राप्ति र्जायते, सानुबंधक्षयोपशमाभावे पूर्वोक्तगुणस्थानप्राप्तेरभाव: ।।

तथा च प्रकृतगुणस्थानं प्रति, अनुबन्धशून्यक्षयोपशमे सत्यपि, अन्तरङ्गवृत्त्या

क्लिष्टं कर्म प्रतिबन्धकं, क्लिष्टं तावत् परम्परानुबन्धवत् क्लेशकारि कर्म भवति, तत्कालमेव परमक्लेशकार्यपि, स्कन्दकाचार्यशिष्यकर्मवन्महावीरकर्मवद् वा न पुनर्गणनीयं इत्येष तन्त्रगर्भः । एवं च क्लिष्टकर्माभिभूतस्य चेतसः, वक्रत्वेन विशिष्टगुणस्थानं प्रति गमनाभावः, कथमिति चेत्, उच्यते पुनः क्लिष्टकर्मोदयस्यैवोपपत्तिरस्त्यतोऽवश्यमनुभवयोग्ये क्लिष्टकर्मणि सति कथमवक्रं चित्तगमनं स्यादिति ?

न च सम्यग्दर्शनाऽवाप्तावपि कस्यचिन्मिथ्यात्वगमनात् कथमत्र क्लिष्टकर्माऽभावः ? इति वाच्यम् असौ प्रकृतजीवः पूर्ववन्मार्गस्य प्राप्तौ सत्यां, अतीवसानुबन्धक्लेशवान् न भवति, इत्येतत् प्रवचनपरमहृदयम् ।

यतो भिन्नग्रन्थेः–सम्यक्त्ववतः पुनः, ग्रन्थिबन्धो निश्चयेन न भवति, एवं पुनः पुनर्ग्रन्थिबंधेन ग्रन्थि र्न विलीयते कदाचिदित्यादिशास्त्रीययुक्तियोगः, एवं, अनिवृत्तिकरणप्राप्त्या मार्गरूपक्षयोपशमस्य विशेषः, शेषक्षयोपशमेभ्यः, तथा च सानुबन्धक्षयोपशमवतो ग्रन्थिभेदादिरूपवस्तु, पतंजलिप्रभृति–योगाचार्याणां नामान्तरेणार्थात् प्रवृत्यादिशब्दवाच्यतया परतन्त्रेऽपि प्रतीतमेव

(१) प्रवृत्तिः–चरमयथाप्रवृत्तिकरणशुद्धिरूपा, प्रकृतो मार्गः प्रतीत इत्यर्थः,

(२) पराक्रमेण–वीर्यविशेषवृद्धया अपूर्वकरणेन प्रतीतः, इत्यर्थः,

(३) जयः–प्रतिबन्धकतिरस्कारो विघ्नजयोऽनिवृत्तिकरणमित्यर्थः प्रतीतः,

(४) आनन्दः–सम्यग्दर्शनलाभरूपः, 'तमोग्रन्थिभेदादानन्दः' इति प्रतीतः,

(५) ऋतम्भरः–सम्यग्दर्शनपूर्वको देवतापूजनादिर्व्यापारः, ऋतस्य सत्यस्य भरणादिति प्रतीतः ।

अत्र कर्मयोगः–क्रियारूपो योगो ज्ञेयः, कर्मग्रहणं न, इच्छारूपप्रणिधानयोगो व्यवच्छेद्योऽस्ति, अन्यत्र शुभाशयरूपो योगः, प्रणिधिप्रवृत्तिविघ्नजयसिद्धिविनियोगभेदात् पंचधा कथितो वर्त्तते, आदिना इच्छायोगादिवचनग्रहः, अत एव विचित्रवचनश्रवणमित्युल्लेखः ।

यथोदितमार्गस्याभावे–मिथ्यात्वमोहनीयादिक्षयोपशमरूप–मार्गस्य सुखेत्यपरनामकस्याभावे, सम्यग्दर्शनादिगुणानां लाभो न जायते, मिथ्यात्वमोहनीयादिक्षयोपशमविशेषमार्गस्य सद्भाव एव सम्यग्दर्शनादिगुणलाभो भवति, किंचाभय-चक्षुर्वद् भगवद्भ्य एव पूर्वोक्तविशिष्टमार्गो लभ्यते नान्यतोऽतः 'मार्गदेभ्यो भगवद्भ्योऽर्हद्भ्यो नमः ।

| योगाचार्याः | जैनाः |
| --- | --- |
| (१) प्रवृत्तिः | चरमयथाप्रवृत्तिकरणशुद्धिरूपः प्रकृतमार्गः |
| (२) पराक्रमेण प्राप्तः | वीर्यविशेषस्य वृद्ध्या, अपूर्वकरणेन प्राप्तः |
| (३) जयः (प्रतिबन्धकाय दत्तः पराभवः) विघ्नविजयः | अनिवृत्तिकरणम् |
| (४) आनन्दः (तमोग्रन्थिभेदादानन्दः) | सम्यग्दर्शनस्य लाभः |
| (५) ऋतम्भरः (ऋतस्य सत्यस्य भरणाद्) | सम्यग्दर्शनपूर्वको देवतापूजनादि–व्यापारः |

इति—'मार्गदे' ति नामकस्य शक्रस्तवस्य सप्तदशपदस्य व्याख्या समाप्ता.

**तथा "सरणदयाणं" इह शरणं—भयार्त्तत्राणं, तच्च संसारकान्तारगतानां अतिप्रबलरागादिपीडितानां दुःखपरम्परासङ्क्लेशविक्षोभतः समास्वा(श्वा)सनस्थानकल्पं, तत्त्वचिन्तारूपमध्यवसानं विविदिषेत्यर्थः, सत्यां चास्यां तत्त्वगोचराः**

**शुश्रूषाश्रवणग्रहणधारणाविज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः, प्रतिगुणमनन्तपापपरमाण्वपगमेनैते इति समयवृद्धाः ।**

**तदन्येभ्यस्तत्त्वज्ञानायोगात्, तदाभासतयैतेषां भिन्नजातीयत्वात्, बाह्याकृतिसाम्येऽपि फलभेदोपपत्तेः, सम्भवन्ति तु वस्त्वन्तरोपायतया,**

**तद्विविदिषामन्तरेण न पुनः स्वार्थसाधकत्वेन भावसाराः, अन्येषां प्रबोधविप्रकर्षेण प्रबलमोहनिद्रोपेतत्वाद्, उक्तं चैतदन्यैरप्यध्यात्मचिन्तकैः, यदाहावधूताचार्यः— "नाप्रत्ययानुग्रहमन्तरेण तत्त्वशुश्रूषादयः उदकपयोऽमृतकल्पज्ञानाजनकत्वात्, लोकसिद्धास्तु सुप्तनृपाख्यानकगोचरा इवान्यार्था एवेति" विषयतृडपहार्येव हि ज्ञानं विशिष्टकर्म्मक्षयोपशमजं, नान्यद्,**

**—अभक्ष्यास्पर्शनीयन्यायेनाज्ञानत्वात्, न चेदं यथोदितशरणाभावे,**

**तच्च पूर्ववद्भगवद्भ्य इति शरणं ददतीति शरणदाः १८ ।।**

पं.–"दुःखपरम्परासङ्क्लेशविक्षोभतः" इति, दुःखपरम्परायाः–नरकादिभवरूपायाः सङ्क्लेशस्य च–क्रोधादिलक्षणस्य विक्षोभतः—स्वरूपह्रासलक्षणचलनादिति ।

"शुश्रूषेत्यादि" शुश्रूषा–श्रोतुमिच्छा, श्रवणं–श्रोत्रोपयोगो, ग्रहणं—शास्त्रार्थमात्रोपादानं, धारणम–अविस्मरण, मोहसन्देहविपर्ययव्युदासेन ज्ञानं विज्ञानं, विज्ञातमर्थमवलम्ब्यान्येषु व्याप्त्या तथाविधवितर्कणमूहः उक्तियुक्तिभ्यां विरुद्धादर्थात्प्रत्यपायसम्भावनया व्यावर्त्तनमपोहः, अथवा सामान्यज्ञानमूहो विशेषज्ञानमपोहः, विज्ञानाहापोहानुगमविशुद्धमित्थमेवेति निश्चयस्तत्त्वाभिनिवेशः, पश्चात्पदाष्टकस्य द्वन्द्वः समासः, "प्रज्ञागुणाः" बुद्धेरुपकारिण इत्यर्थः, किंविशिष्टा इत्याह—"प्रतिगुणम्' एकैकं शुश्रूषादिकं गुणमपेक्ष्योत्तरोत्तरे "अनन्तपापपरमाण्वपगमेन" अनन्तानाम्—अतिबहूनां पापपरमाणूनां–ज्ञानावरणादिक्लिष्टकर्म्मांशलक्षणानामपगमेन–प्रलयेनैते–तत्त्वगोचराः शुश्रूषादयः, "इति" एतत् "समयवृद्धाः" बहुश्रुता ब्रुवते, कुत एतदित्याह--

"तदन्येभ्यः" उक्तविलक्षणहेतुप्रभवेभ्यः "तत्त्वज्ञानायोगाद्" भवनैर्गुण्यादिपरमार्थपरिज्ञानाद्, एतदपि कुत इत्याह—"तदाभासतया" तत्त्वगोचरशुश्रूषादिसदृशतया "एतेषां" प्रतिगुणमनन्तपापपरमाण्वपगममन्तरेण जातानां "भिन्नजातीयत्वाद्" अन्यजातिस्वभावत्वात्, नन्वाकारसमतायामपि कुत एतदित्याह—"बाह्याकृतिसाम्येऽपि" तत्त्वगोचराणामितरेषां च शुश्रूषादीनां "फलभेदोपपत्तेः" फलस्य–भवानुरागस्य तद्विरागस्य च यो भेदः–आत्यन्तिकं वैलक्षण्यं स एवोपपत्तिः—युक्तिस्तस्याः, कथं नाम एकस्वभावेषु द्वयेष्वपि शुश्रूषादिषु बहिराकारसमतायामित्थं फलभेदो युज्यत इति भावः,

तर्हि न सम्भविष्यन्त्येव तत्त्वगोचरतामन्तरेण शुश्रूषादय इत्याशङ्क्याह—"सम्भवन्ति, तु" न न सम्भवन्ति तुः–पूर्वेभ्य एषां विशेषणार्थः, तदेव दर्शयति–"वस्त्वन्तरोपायतया" वस्त्वन्तरं–तत्त्वविविदिषापेक्षया पूजाभिलाषादि, तदुपायः–कारणं एषां ते तथा तद्भावस्तत्ता तया, अत एवाह—

"तद्विविदिषामन्तरेण" तत्त्वजिज्ञासां विना, व्यवच्छेद्यमाह—"न पुनः" न तु "स्वार्थसाधकत्वेन" "भावसाराः" परमार्थरूपाः, ननु कथं न स्वार्थसाधका एत इत्याह—"अन्येषां" वस्त्वन्तरोपायतया प्रवृत्तानां 'प्रबाधविप्रकर्षेण" तत्त्वपरिज्ञानदूरभावेन हेतुना "प्रबलमोहनिद्रापेतत्वात्' बलिष्ठमिथ्यात्वमोहस्वापावष्टब्धत्वात्, परमतेनाप्येतत्समर्थयन्नाह—"उक्तं च" निरूपितं च "एतत" तदन्यभ्यस्तत्त्वज्ञानाभावलक्षणं वस्तु "अन्यैरपि" अस्मदपेक्षया भिन्नजातीयैरपि, किं पुनरस्माभिः ?, कैरित्याह—"अध्यात्मचिन्तकैः" आत्मतत्त्वगवेषकैः, कुत इत्याह—"यद्" यस्मात्कारणात् "आह" उक्तवान् "अवधूताचार्यो" योगिमार्गप्रणायकः, उक्तमेव दर्शयति—"न" नैव "अप्रत्ययानुग्रहं" सदाशिवकृतोपकारम् "अन्तरेण" विना "तत्त्वशुश्रूषादयः" उक्तरूपाः, कुत इत्याह—

"उदकपयोऽमृतकल्पज्ञानाजनकत्वात्", उदकं–जलं पयः–क्षीरं अमृतं–सुधा तत्कल्पानि विषयतृष्णापहारित्वेन श्रुतचिन्ताभावनारूपाणि ज्ञानानि तदजनकत्वात्, तत्त्वगोचरा एव हि शुश्रूषादया मृदुमध्याधिमात्रावस्था एवंरूपज्ञानजनका इति, स एव इतरानवजानन्नाह—"लोकसिद्धास्तु" सामान्येन लोकप्रतिष्ठिताः "तुः" पुनः शुश्रूषादयः "सुप्तनृपाख्यानकगोचरा इव" यथा सुप्तस्य--शय्यागतस्य नृपस्य–राज्ञो निद्रालाभार्थमाख्यानविषयाः शुश्रूषादयोऽन्यार्था एव भवन्ति, तत्त्वाख्यानपरि-

ज्ञानार्थाः "इति" अवधूताचार्योक्तिसमाप्त्यर्थः, सर्वतात्पर्यमाह—"विषयतृडपहार्येव हि ज्ञानं" विषयाभिलाषनिवर्त्तकमेव हि:-यस्मात्कारणात् ज्ञानं–तत्त्वबोधः, कीदृशमित्याह—"विशिष्टकर्म्मक्षयोपशमजं" विशिष्टात्–मिथ्यात्वमोहविषयात् क्षयोपशमाज्जातम्, अनभिमतप्रतिषेधमाह–"न" नैवान्यद्–विषयतृष्णानपहारि, ज्ञानमिति गम्यते, कुत इत्याह—

"अभक्ष्यास्पर्शनीयन्यायेन" प्राग्व्याख्यातेन "अज्ञानत्वात्" तत्त्वचिन्तायां ज्ञानाभावरूपत्वात्, यदि नामैवं ततः किमित्याह—"न च" नैव "इदं" ज्ञानं "यथोदितशरणाभावे" प्रागुदितविविदिषाविरहलक्षणे, एवमपि किमित्याह—"तच्च" शरणं "पूर्ववद" अभयादिधर्म्मवद्, "भगवद्भ्य" इति ।

**टीका**—अथ 'शरणदे'ति नामकस्य शक्रस्तवीयाष्टादशपदस्य विशिष्टं विवरणम्—

यथाऽर्हन्तो भगवन्तः 'अभयदाः, चक्षुर्दाः, मार्गदाः सन्ति तथा शरणदाः सन्ति, अत एव 'शरणदेभ्योऽर्हद्भ्यो भगवद्भ्यो नमः, इह शरणदेतिसूत्रघटक–शरणपदस्य विवेचनम् = शरणं—भयार्त्तत्राणं भयेन पीडितानां त्राणं–रक्षणमित्यर्थः, तद्–शरणं हि संसाररूपभयानकवनगतानां, अतिप्रबलरागादिरूपभावशत्रुभिर्हतप्रहतानां, नरकादिभवरूपदुःखपरम्परायाः क्रोधादिकषायलक्षणसङ्क्लेशस्य, अपुनर्भवरूपेण विक्षोभतः–स्वरुपह्रासलक्षणचलनात् सम्यक्तया आश्वासन (परमधैर्य) स्य स्थानसदृशं, अर्थात् तत्त्वचिन्तारूपमध्यवसानं (निर्णयः) विविदिषेत्यर्थः, किंच विविदिषायां सत्यां तत्त्वविषयकाः शुश्रूषाश्रवणग्रहणधारणा-विज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणा भवन्ति ।

(१) शुश्रूषा = ज्ञानावरणादिक्लिष्टकर्मांशरूपाणामनन्तानां पापपरमाणूनां क्षयजन्य-तत्त्वविषयकश्रवणेच्छा-तत्त्वविषयं श्रोतुमिच्छा, तत्त्वरूपाशुश्रूषावा.

(२) श्रवणम् = शुश्रूषामपेक्ष्य पूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपानन्तपापपरमाणुक्षयजन्यतत्त्वविषयकं श्रवण-श्रोत्रेन्द्रियेन सोपयोग-उपयोगपूर्वं ध्यानं दत्वा श्रवणम् ।

(३) ग्रहणम् = श्रवणसापेक्षं पूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपानन्तपापपरमाणुक्षयजन्यं तत्त्वविषयकं शास्त्रार्थमात्रग्रहणम् ।

(४) धारणम् = ग्रहणमपेक्ष्य पूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपान्तपापपरमाणुविषयकक्षयजन्यस्य श्रुतस्य गृहीतस्य च तत्त्वस्याविस्मरणम् ।

(५) विज्ञानम् = धारणमपेक्ष्य पूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपानन्त-

पापपरमाणुक्षयजन्यं, अज्ञान-संशय-विपर्यासरूपमिथ्याज्ञान त्रितयस्य ध्वंसपूर्वकं तत्त्वविषयकज्ञानं विज्ञानम् ।

(६) ऊहः—विज्ञातमपेक्ष्यपूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपानन्तपापपरमाणुक्षयजन्यं तथाप्रकारेषु, अन्येषु पदार्थेषु व्याप्त्या = अर्थात् समान पदार्थं दृष्ट्वा वा श्रुत्वा यथा दूराद् धूमं दृष्ट्वा तर्को भवति, धूमोऽस्त्यतो वह्निना भाव्यमिति, एवमन्यतत्त्वभूतपदार्थविषयकव्याप्तिपूर्वकं विज्ञाततत्त्वविषयकवितर्कः, स तत्त्वविषयक ऊहः तर्कापरपर्यायः ।

(७) तत्त्वगोचरापोहः = ऊहमपेक्ष्य पूर्वतो विशिष्टज्ञानावरणादिक्लिष्टकर्मांशरूपानन्तपापपरमाणुक्षयजन्यं, आगमयुक्ति (न्याय) भ्यां विरुद्धादर्थात् प्रत्यपायसम्भावनाया (उभयलोकविरुद्धजीवहिंसादिदुष्कृत्यादिना, इहलोके, परलोके नारकादिदुर्गति-आदि प्रत्यपायसम्भावनया) बलवदनिष्टानुबन्धित्वं विज्ञाय दुर्गुणदुष्कृतादितो दूरीभवनरूपं रक्षणं अपोहः, तत्त्वविषयकविशेषज्ञानं-अपोहः ।

(८) तत्त्वाऽभिनिवेशः = अपोहादिकमपेक्ष्य पूर्वतो विशेषज्ञानावरणादिक्लिष्टकर्मांशरूपानन्तपापपरमाणुक्षयजन्यः, विज्ञानोहापोहत्रयस्यानुगमनेन विशुद्धः, अर्थात् विज्ञानोहापोहात्मकनिकषत्रयेण, निर्मलः, इत्थमेवेति निश्चयः 'तत्त्वाभिनिवेशः तथा च तत्त्वविषयकचिन्तालक्षणविविदिषारूपशरणस्य सत्तायामेव बुद्धेरष्टगुणाः (उपकारिणः) तत्त्वगोचराः—तत्त्वरूपविषयविषयका भवन्ति, नान्यथा तत्त्वगोचर—शुश्रूषादिरूपप्रज्ञागुणाष्टकं प्रति तत्त्वचिन्ताऽऽत्मकविविदिषा रुपं शरणं कारणम्, विशिष्टशरणसत्तायां तत्त्वगोचरप्रज्ञागुणाष्टकस्य सत्ता विशिष्टशरणरुपकारणाभावे तत्त्वगोचरप्रज्ञागुणाष्टकस्याभावः, इत्यन्वयव्यतिरेकाभ्यां तत्त्वगोचरप्रज्ञागुणाष्टक-तत्त्वचिन्तात्मक विविदिषाशरणयोः कार्यकारणभावविनिश्चयो ज्ञेयः । इति बहुश्रुताः समयवृद्धा वदन्ति ।

तथा च विविदिषाविशिष्टः प्रतिगुणमनन्तपापपरमाणुक्षयरूपकारणभिन्नान्यकारणेभ्यो जन्य--शुश्रूषादिभिस्तत्त्वज्ञानस्यासम्भवो भवति,

अत एव विविदिषाविशिष्टः प्रतिगुणमनन्तपापपरमाणुक्षयकारणजन्यतत्त्वशुश्रूषादिभिस्तत्त्वज्ञानं (भवनिर्गुणतादि परमार्थज्ञानं) भवति, तस्मादेव विविदिषाविशिष्टः

प्रतिगुणमनन्तपापपरमाणुक्षयजन्यस्तत्त्वशुश्रूषादिः, तत्वगोचरः कथ्यते । विविदिषाविशिष्टः प्रतिगुणमनन्तपापपरमाणुक्षयरूप-कारणभिन्नान्यकारणजन्य-शुश्रूषादिः, तत्वज्ञान-रूपं फलं न जनयति, यतः विविदिषाविशिष्टः प्रतिगुण-मनन्तपापपरमाणुक्षयरूपकारणं विनाऽन्यकारणजन्यशुश्रूषादिः, तत्वज्ञानस्वभावभिन्नान्यजातीयत्वेन बाह्यदर्शनतः-शब्द-शरीरतः, तत्वगोचरशुश्रूषादिसमानशुश्रूषादिः, आभासतया कथ्यते,

ननु शब्दरूपबाह्याकारत्वेन समानत्वेऽपि, एको भेदस्तत्वगोचरशुश्रूषादिः, द्वितीयो भेद आभासरूपशुश्रूषादिरिति भेदद्वये किं कारणम् ?

अत्रोत्तरम् = इह भेदद्वये फलभेद एव प्रधानं कारणम्,

(१) भवानुरागरूपफलं प्रति तत्वगोचरभिन्नान्यशुश्रूषादिः कारणम्, अत एव तत्वगोचरभिन्नान्यशुश्रूषादिः, आभासत्वेन वर्ण्यते,

(२) भवविरागादिफलं प्रति तत्वगोचरशुश्रूषादिः कारणमस्ति, अतस्तत्वगोचरत्वविशिष्टशुश्रूषारूपेणोच्यते, अर्थादाभासभूतशुश्रूषादिरूपकारणजन्यं फलं 'भवरागो' ऽस्ति तत्वभूतशुश्रूषादिरूपकारणजन्यं फलं 'भववैराग्य' मस्ति, इत्येवं तत्वातत्वशुश्रूषादिकार्यं भिन्नं भिन्नं भवत्यतः एकः शुश्रूषादिः आभासमात्रः, द्वितीयः शुश्रूषादिः, तत्वगोचरत्वेन प्रसिद्ध्यतीति । ननु शुश्रूषात्वादिरूपैकस्वभाववतोस्तत्वातत्वशुश्रूषयोर्बाह्याकारः, एकसमानोऽस्ति, तत एवं फलभेदः कथं युक्तः ? बाह्याकारसमतायामपि तत्वगोचररुपशुश्रूषादिरस्तु, मास्तु, आभासरूपशुश्रूषादिः, यत्सत्यं तदुच्यताम्-अत्रोत्तरम् = आभासरूपशुश्रूषादेः सम्भवोऽस्ति, कथमिति चेदुच्यते तत्वविविदिषां विना वस्त्वन्तरं (पूजाऽभिलाषादिरूपान्यवस्तु) उद्दिश्य शुश्रूषादिर्भवति, स आभास-शुश्रूषादिर्भवति, अत एव कथ्यते तत्वविषयकविविदिषां विना भवनिर्गुणतादि-परमार्थज्ञानरुप-स्वार्थस्य (अथवा प्रतिगुणमनन्तपापपरमाणुक्षयरूपफलस्य) असाधकत्वेन तत्वागोचर शुश्रूषादिः, तत्वरूपो नास्ति, अर्थादाभासरूपोऽस्ति (यः स्वार्थं साधयति स एव परमार्थरूपोऽस्ति) ननु आभासरूपशुश्रूषादिः स्वार्थस्य (भवनिर्गुणताऽऽदिपरमार्थज्ञानस्वफलस्याऽथवा विशिष्टपापपरमाणुक्षयरूपस्वफलस्य) कथं न साधकः ?

अत्रोत्तरम्-अतिप्रबल-मिथ्यात्वमोहनिद्राक्रान्तत्वेनाभासरूपशुश्रूषादितः परमजागृति-रूपतत्वज्ञानं दूरसुदूरं भवति, पूजाभिलाषरूपवस्त्वन्तरमुद्दिश्य प्रवृत्तो विविदिषाविरहितः

शुश्रूषादिः, भवनिर्गुणतादिपरमार्थज्ञानरूपस्वार्थस्य (अथवा विशिष्टपापपरमाणुक्षयरूप-स्वफलस्य) साधको नास्त्येवा-परमतेनाऽप्येतत्समर्थनम् = अस्मदपेक्षया भिन्नजातीयैरपि किं पुनरस्माभिः ?—

अध्यात्मचिन्तकैरेतन्निरूपितम् तथाहि = योगिमार्गप्रणायकः (प्रणेता वा प्रकृष्टनायकः) अवधूताचार्यः कथयति "सदाशिवकृतोपकारं विना" उक्तरुपाः—तत्त्वशुश्रूषादयः न भवन्ति, यतो जलक्षीरसुधासमानानि विषयतृष्णाऽपहारित्वेन श्रुतचिन्ताभावनारूपाणि ज्ञानानि न जनयन्त्येव, तत्त्वगोचरा एव हि शुश्रूषादयो जघन्यमध्यमोत्कृष्टावस्थावन्तः, श्रुतादित्रयज्ञानजनका इति.

तत्त्वागोचराः शुश्रूषादयस्तु सामान्येन लोकप्रतिष्ठिताः, यथा शय्यागतस्य नृपस्य निद्रालाभार्थं कथादिविषयाः शुश्रूषादयोऽन्यार्था एव भवन्ति, नत्वाख्यानपरिज्ञानार्थाः अर्थाद् यथा राजा शय्यागतः सुप्तः सन् गाथकानां कथागीतादि शृणोति, तथाऽपि विषयादिषु ग्रस्तत्वेन कथादौ न ध्यानं दत्ते, अत एतद्-शुश्रूषादयःस्वफलजनका न भवन्ति तथा विविदिषामन्तरेण शुश्रूषादयस्तत्त्वज्ञानरूपस्वफलजनका न भवन्ति अतः तत्त्वगोचरशुश्रूषादयो न कथ्यन्ते, आभासरूपा एवेति,

शरणपदार्थस्य सर्वाङ्गीणं तात्पर्यं तथा शरणदपदस्योपसंहरणम्—

मिथ्यात्वमोहरूपविशिष्टकर्मक्षयोपशम-जातं ज्ञानं, अर्थाद् ग्रन्थिभेदसहकृत-मिथ्यात्वमोहादिरूपविशिष्टकर्मक्षयोपशमजन्यं विषय-विषयक-तृष्णाऽपहारकमेव ज्ञानं-तत्त्व-बोधः कथ्यते, नान्यत्, तदतिरिक्तं, यज्ज्ञानं विशिष्टकर्मक्षयोपशमजं विषयतृष्णाऽपहारि न भवति तज्ज्ञानं तत्त्वज्ञानं न कथ्यतेऽपितु अज्ञानं-मिथ्याज्ञानं-विपरीतज्ञानं, संशयज्ञानं, सम्यग्ज्ञानकोटिरहितं, कथमिति चेत्कथ्यते, अभक्ष्यास्पर्शनीयन्यायेन वाङ्मात्रज्ञानमज्ञानं भवति (यथा गोमांसादिकं भक्षणनामकक्रियाविषयत्वेऽपि भाविन्युत्तरकाले पाप-दुर्गत्यादिबलवदनिष्टपरिणामनिष्पादकत्वेनाभक्ष्यं कथ्यते, तथान्त्यजरजस्वलानार्यादेः स्पर्शनक्रियाविषयत्वेऽपि, उत्तरकालीन बलवदनिवार्यानिष्टपरिणामसर्जकत्वेनाऽस्पर्शनीयं, अनीतिचौर्यादेः कृतिविषयत्वेऽपि ऐहिकपारलौकिकानिष्टफल साधकत्वेनाऽकर्त्तव्यत्वमाधुनिकन्यायशासनेऽपि विद्यते) प्रस्तुतेऽपि ज्ञानमपि कामभोगविषयकतृष्णानाशकत्वाभावे, ज्ञानक्रियामात्रसत्त्वेऽपि दुर्गत्यादिबलवदनिष्टपरिणामाऽनुबन्धित्वेनाऽज्ञानमेवेति । अर्थात्

अर्थात् तत्वचिन्तायां सु ज्ञानाभावरूपं ज्ञानं, एवं च पूर्वोक्त विविदिषाया अभावे विषयविष-तृष्णाभंजकं तत्त्वज्ञानं न भवति, विषयतृष्णानाशकत्वेन तत्त्वज्ञान-जनकत्वेन तत्त्वगोचरशुश्रूषादिप्रज्ञागुणाष्टकजनकत्वेन विविदिषापर्यायिकं तच्च शरणं, अभयचक्षुर्मार्गवद् भगवद्भ्य एव भवतीति ।

'शरणं ददतीति शरणदाः' भगवन्तो भवन्तीत्यष्टादशपदं समाप्तमिति ।

**तथा 'बोहिदयाणं,' इह बोधिः—जिनप्रणीतधर्म्मप्राप्तिः, इयं पुनर्यथाप्रवृत्तापूर्वानिवृत्तिकरणत्रयव्यापाराभिव्यङ्ग्यमभिन्नपूर्व्वग्रन्थिभेदतः पश्चानुपूर्व्या प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं, विज्ञप्तिरित्यर्थः,**

**पञ्चकमप्येतदपुनर्बन्धकस्य यथोदितस्य, अस्य पुनर्बन्धके स्वरूपेणाभावात् ।**

**इतरेतरफलमेतदिति नियमः, अनीदृशस्य तत्त्वायोगात्, न ह्यचक्षुष्फलमभयं, चक्षुर्वाऽमार्गफलमित्यादि, एवं चोत्कृष्टस्थितेरा ग्रन्थिप्राप्तिमेते भवन्तोऽप्यसकृन्न तद्रूपतामासादयन्ति, विवक्षितफलयोग्यतावैकल्यात् ।**

**योग्यता चाफलप्राप्तेस्तथाक्षयोपशमवृद्धिः, लोकोत्तरभावामृतास्वादरूपा वैमुख्यकारिणी विषयविषाभिलाषस्य, न चेयमपुनर्बन्धकमन्तरेणेति भावनीयं, इष्यते चैतदपरैरपि मुमुक्षुभिः, यथोक्तं भगवद्गोपेन्द्रेण—"निवृत्ताधिकारायां प्रकृतौ धृतिः श्रद्धा सुखा विविदिषा विज्ञप्तिरिति तत्त्वधर्म्मयोनयः, नानिवृत्ताधिकारायां, भवन्तीनामपि तद्रूपताऽयोगादिति" विज्ञप्तिश्च बोधिः, ॥१९॥**

**एवमभयदानचक्षुर्दानमार्गदानशरणदानबोधिदानेभ्य एव यथोदितोपयोगसिद्धेरुपयोगसम्पद एव हेतुसम्पदिति ॥ ५ ॥**

**प्रशमादिलक्षणाभेदात्, एतत्प्राप्तिश्च यथोक्तप्रपंचतो भगवद्भ्य एवेति बोधिं ददतीति बोधिदाः ।**

पं.—"बोहिदयाणं" पंचकमप्यभयचक्षुरादिरूपम्, आस्तां प्रस्तुतो बोधिः, "एतद्" अनन्तरोक्तम् "अपुनर्बन्धकस्य" उक्तलक्षणस्य, कुत इत्याह—"यथोदितस्य" उक्तनिर्वचनस्य "अस्य" पंचकस्य "पुनर्बन्धके" विलक्षणे "स्वरूपेण" स्वस्वभावेन "अभावाद्" । अस्यैव हेतोः सिद्धयर्थमाह—

"इतरेतरफलं" इतरस्य—पूर्वपूर्वस्य इतरद्—उत्तरोत्तरं फलं-कार्यम् "एतत्" पंचकम् "इति" एष "नियमो" व्यवस्था,

कुत एतदित्याह—"अनीदृशस्य" इतरेतराफलस्य पंचकस्य "तत्त्वायोगात्" तत्त्वस्य अभयादिभावस्य—अयोगाद्–अघटनात् । एतदेव भावयति–"नहि" नैव "अचक्षुष्फलं" नास्ति चक्षुः फलमस्य तत्तथाऽभयं "चक्षुः" पूर्वोक्तरूपम् "अमार्गफलं" मार्गलक्षणफलरहितमिति, आदिशब्दान्मार्गोऽशरणफलः, शरणं चाधिफलमिति । यदि नामैवं ततः किमित्याह—"एवं च" इतरेतरफलतायां च सत्याम् "उत्कृष्टस्थिते." मिथ्यात्वादिगताया "आ" इति प्रारभ्य "ग्रन्थिप्राप्ति समयसिद्धग्रन्थिस्थानं यावद् "एते" अभयादयो "भवन्तोऽपि" जायमाना अपि "असकृद्" अनेकशो "न" नैव "तद्रूपतां" भावरूपाभयादिरूपताम् "आसादयन्ति" लभन्ते, कुत इत्याह—"विवक्षितफलयोग्यतावैकल्यात्" विवक्षितं फलमभयस्य चक्षुः, चक्षुषो मार्गं इत्यादिरूपं तज्जननस्वभावाभावात्, योग्यतामेवाह—

"योग्यता च" प्रागुपन्यस्ता अभयादीनाम् "आफलप्राप्तेः" चक्षुरादिफलप्राप्ति यावत् "तथा" फलानुकूला "क्षयोपशमवृद्धिः" स्वावारककर्म्मक्षयविशेषवृद्धिः "लोकोत्तरभावामृतास्वादरूपा" लोकोत्तरभावाः विहितौदार्य्यदाक्षिण्यादय स्त एवामृतं–सुधा तदास्वादरूपा, अत एव "वैमुख्यकारिणी" विमुखताहेतुः, विषयविषाभिलाषस्य" विषाकारविषयवांछारूपस्येति, ततः किमित्याह—"नच" नैव "इयम्" उक्तरूपा क्षयोपशमवृद्धिः "अपुनर्बन्धक" 'पापं न तीव्रभावात्करोती'त्यादिलक्षणम् "अन्तरेण" विनाऽन्यस्य भवबहुमानित्वात्, ततः किमित्याह—"इति" एतद् "भावनीयं" यदुत पंचकमप्येतदपुनर्बन्धकस्येति हेतु स्वरूप फलं चापेक्ष्य विचारणीयं, परमतसंवादेनाप्याह "इष्यते चैतद्" अभयादिकम् "अपरैरपि" जैनव्यतिरिक्तैर्मुमुक्षुभिः, कथमित्याह—"यथोक्त" यस्मादुक्तं

"भगवद्गोपेन्द्रेण" भगवता परिव्राजकेन गोपेन्द्रनाम्ना, उक्तमेव दर्शयति—"निवृत्ताधिकारायां"-व्यावृत्तपुरुषाभिभवलक्षणस्वव्यापारायां "प्रकृतौ" सत्त्वरजस्तमोलक्षणायां ज्ञानावरणादिकम्मणीत्यर्थः, धृतिः श्रद्धा सुखा विविदिषा विज्ञप्तिरित्येता यथाक्रममभयाद्यपरनामानस्तत्त्वधर्मयोनयः–पारमार्थिककुशलोत्पत्तिस्थानानि भवन्तीति, व्यवच्छेद्यमाह—"नानिवृत्ताधिकारायां" प्रकृताविति गम्यते, कुत इत्याह–"भवन्तीनामपि" धृत्यादिधर्म्मयोनीनां कुतोऽपि हेतोः, प्रकृतेरनिवृत्ताधिकारत्वेन "तद्रूपताऽयोगात्" तात्त्विकधृत्यादिस्वभावाभावाद् "इतिः" परोक्तसमाप्त्यर्थः, एवमपि किमित्याह—"विज्ञप्तिश्च" पंचमी धर्म्मयोनिः "बोधिः" जिनोक्तधर्म्मप्राप्तिः, कुत इत्याह—

"प्रशमादिलक्षणाभेदात्" प्रशमसंवेगादिभ्यो लक्षणेभ्योऽभेदाद्—अव्यतिरेकाद्विज्ञप्तेः ।

**टीका**–अथ शक्रस्तवस्य 'बोधिद' रूपैकोनविंशतितमपदस्य व्याख्यानम् ।

यथाऽर्हन्तो भगवन्तः 'अभयद–चक्षुर्द–मार्गद-शरणदा' भवन्ति तथा 'बोधिदा' भवन्त्येव, बोधिदपदघटितबोधिं विवेचयति तथाहि—

को बोधिरित्युक्ते कथयति. जिनप्रणीतधर्म्मप्राप्तिरेव बोधिः,

सर्वज्ञप्ररूपितधर्मलाभः. यथाप्रवृत्तापूर्वाऽनिवृत्तिकरणत्रयरूपव्यापारेण (पुरुषार्थ-वीर्य-अध्यवसायविशेषेण) अभिव्यंजकेनाभिव्यङग्य-गम्य अभिन्नपूर्वो (पूर्वमभिन्नो) यो

ग्रन्थिस्तस्य भेदतः पश्चानुपूर्व्या (प्रशमादिगुणानां लाभक्रमः—उत्पत्तिक्रमः, एषामुपन्यासः प्राधान्यतः) प्रशमसंवेगानुकम्पाऽऽस्तिक्य — अभिव्यक्ति-प्राकट्यलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं, विज्ञप्तिरित्यर्थः ।

(लाभक्रमः— (१) प्रथमं तावदास्तिक्यमुत्पद्यते, (२) ततः, अनुकम्पा भवति, (३) ततो निर्वेदः प्राप्यते, (४) ततः संवेगो लभ्यते, (५) ततः प्रशमो भवति, इत्येवं पश्चानुपूर्व्या प्रशमादिगुणानां लाभक्रमः ,)

प्राधान्यतः प्रशमादिगुणानामुपन्यासः ।

(१) प्रशमः = सापराधे पुरुषेऽपि मनसा सर्वदाऽशुभचिन्तनाभावः, क्रोधादि-कण्डूयनस्य विषयतृष्णायाश्च शमनम्, अतत्त्वाभिनिवेशशान्तिः ।

(२) संवेग := देवमानवसत्कं पौद्गलिकसुखमात्रं दुःखत्वेन गणनीयं यतस्तत् क्षणिकं पराधीनं, असारं दारुणदुःखानुबन्धि वर्त्तते, मोक्षस्यैकमात्रं सौख्यं अक्षय्यत्वेने-च्छनीयं, अनन्तं स्वाधीनं वर्त्तते ।

(३) निर्वेदः = संसारिपरिवारं प्रति निर्वेदः (अरुचिः) कर्त्तव्यः, यतः स्वार्थ-गतत्वेन सुखदुःखयो र्मध्ये भागं ते न गृह्णन्ति, तेषु सुखदान—दुःखविदारण—शक्तिर्नास्त्येव, जन्मजरामरणगर्भावासाद्यानेकवेदनाप्राचुर्यत्वेन संसारः, आत्मपक्षे न कमपि गुणं करोति ततस्तं निर्गुणं निश्चित्य संसारचारकान्मुक्त्यर्थमुत्कटोत्कण्ठा धारणयीयैव ।

(४) अनुकम्पा = दीनदुःखिरोगाक्रान्तादिषु जीवेषु तन्निवारणाय परमेच्छा कार्येति द्रव्यदया, भावदया तु धर्मरहितजीवस्तु धर्मस्यासाधनात् दुर्गतौ गमिष्यन्तीति चिन्तया धर्मरहिते धर्मयोजनस्थिरीकरणादि कार्यम् ।

(५) आस्तिक्यं = यज्जिनैर्भगवद्भिः कथितं तदेव परमं चरमं सत्यं, नान्यथा कदाचिद्भवतीति, अस्थिमज्जावद् श्रद्धारङ्गोऽत्यन्त—दृढतमो धार्यः ।

अभयादिपञ्चकस्याधिकारिणश्चानधिकारणो वर्णनम्—

एतद् आत्मधर्मविशेषरूपाभयादिपंचकमपि (आस्तां प्रस्तुतो बोधिः, पंचकम-पीत्यपीत्यर्थः) पूर्वोदितस्यापुनर्बन्धकस्य भवति, अर्थात्, अभयादिपंचकस्य अधिकारी

अपुनर्बन्धक एव नान्यः पुनर्बन्धकः (यस्तीव्रभावेन पापं न करोति, चरमावर्त्तवर्त्ती भव्यो जीवः, भवाभिनंदिदोषरहितः, अतः एव शुक्लपाक्षिकः, अतः परं कदाचिदपि मिथ्यात्वमोहनीयकर्मादिरुत्कृष्ट—स्थितिं वा रसं न भंत्स्यति तादृशात्म—विशुद्धिमान् जीवः अपुनर्बन्धक उच्यते, चरमावर्त्तादधिकपुद्गलावर्त्तवर्त्ती जीवः पुनर्बन्धकः कथ्यतेऽपुनर्बन्धकतो विपरीतः) यतः पुनर्बन्धके स्वरूप—स्व स्वभावाच्छेदेन, अभयादिपंचकस्याभावः, तात्त्विक-भावरूपाभयादिपंचकस्य तादृशस्वभावोऽस्ति, यदपुनर्बन्धकात्मन्येव प्रादुर्भवति न पुनर्बन्धकात्मनि, तादृशशुद्ध्यशुद्ध्योः सामर्थ्यमेव नान्यत्कारणमिति.

इतरेतरफलमेतदिति नियमः = पूर्वपूर्वस्य कारणता, उत्तरोत्तरस्य कार्यताबलेनेदं हार्दं सिद्ध्यति—(१) अभयरूपकारणसत्त्व एव चक्षूरूपकार्यसत्ता, अभयरूपकारणाभावे चक्षूरूपकार्यसत्ताऽभावः, चक्षुष्कार्यं प्रति अभयं कारणमिति, कार्यकारणभावः । (२) चक्षूरूपकारणसत्त्व एव मार्गरूपकार्यसत्ता, चक्षूरूपकारणाभावे मार्गरूप-कार्याऽभावः, मार्गरूपफलं प्रति चक्षूष्कारणम्, इति अन्वयव्यतिरेकभावप्रयुक्तः कार्यकारणभावो ज्ञेयः । (३) मार्गरूपकारणसत्त्व एव शरणरूपकार्यसत्ता, मार्गरूपकारणाभावे शरणरूपकार्याभावः, शरणरूपकार्यं प्रति मार्गः कारणमिति कार्य-कारणभावो ज्ञेयः । (४) शरणरूपकारणसत्त्व एव बोधिरूपकार्यसत्ता, शरणरूपकारणा-भावे बोधिरूपकार्याभावः, बोधिकार्यंप्रति शरणं कारणमिति कार्यकारणभावो ज्ञेयः । योऽपुनर्बंधको नास्त्यर्थादनीदृशस्तस्य-इतरेतराफलस्य-परस्परकार्यकारणभावरहितेऽभयादि-पंचके तत्त्वरूपाभयादिभावस्य घटनाभाव (भाव—सत्यरूपाभयादिधर्माणां अभाव एव) एवं च पूर्वपूर्वस्योत्तरोत्तरफलरूपस्वभावः, तत्त्वभूताभयादिपंचकस्याऽस्ति, अत एव मिथ्यात्वादिगतोत्कृष्टस्थितेः 'आ'—इति प्रारभ्य शास्त्रप्रसिद्ध—ग्रन्थिस्थानपर्यन्तं बहुशो जायमाना एतेऽभयादयोऽपि, भावरूपाऽभयादिरूपतां नैव लभन्ते, कथमिति चेत्कथ्यते विवक्षितफलस्य योग्यताया अभावो वर्त्ततेऽर्थात् सर्वथा, अतत्त्वभूत-द्रव्यरूपाऽभयादिपंचके विवक्षितफलरूपकार्यजननशक्तियोग्यताया अभावोऽस्ति, विवक्षितं फलमभयस्य चक्षुः, मार्गस्य शरणं, शरणस्य बोधिरितिरूपं तज्जननस्वभावाऽभावोऽस्ति.

तत्त्वरूपाऽभयादिपंचकगतचक्षुरादिविवक्षितफलजनकस्वभावरूपयोग्यता का ?

तत्कथ्यते—चक्षुरादिविवक्षितफलजननस्वभावरूपयोग्यताऽर्थात् (१) विषसदृश-

ब्दादिविषयविषयकेच्छायाः पराङ्मुखताकारिणी (२) लोकोत्तरभावरूपौदार्यादिरूपामृत-स्यास्वादनरूपा (३) पूर्वपूर्वभूताभयादिकार्य जन्यचक्षुरादिफलप्राप्तिपर्यन्तं फलानुकूला (जनक) क्षयोपशमवृद्धिः (चक्षुरादिरूप स्वफलावारककर्मक्षयविशेषवृद्धिः) एव विवक्षित-फलयोग्यता, योग्यतेयं क्षयोपशमवृद्धिरूपा, अपुनर्बन्धकं (पापं न तीव्रभावात् करोतीत्या-दिलक्षणं) विना (विमुच्य) न भवति कथमिति चेत् अपुनर्बन्धकव्यक्तिभिन्नपुनर्बन्धको भवं बहुमन्यते, अतएवाभयादिपंचकं हेतुं स्वरूपं फलं चापेक्ष्य भावनीयमर्थात्, अभयादि-पंचकमर्हद्भ्यो भगवद्भ्य एव प्राप्यतेऽभयादिपंचकप्राप्तिं प्रत्यर्हन्तो भगवन्त एव हेतुभूता नान्ये, अभयादिपंचकरूपं चेतसोऽवक्रगमनादि स्वरूपं, फलन्तु अभयादिकस्य चक्षुरादिकं विचारणीयमिति ।

लोकोत्तरभावरूपौदार्यादेर्वर्णनम् =

(१) औदार्यम् = दानादिपरिणामे सङ्कोचरूपकृपणतां सन्त्यज्य, चित्तस्य विशालता, मातापितृकलाचार्यज्ञातिवृद्धधर्मोपदेशकदीननिराधारादौ तथा दानादिविषयरूप-कर्त्तव्ये, उचितप्रवृत्तौ आत्यन्तिकचित्तस्य विशालता, हृदयस्योदारता ।

(२) दाक्षिण्यं = परेषां कर्त्तव्यरूपकार्यकरणे, उत्साहसभरशुभाशयः, गाम्भीर्य-धैर्यसाहाय्यविशिष्टं, मात्सर्यनाशक उत्तमोत्तम एष परिणामः ।

(३) पापजुगुप्सा = पापनिषेधकमुखहस्ताद्याकाराभिनयतोऽभिव्यङ्ग्या, यथार्थ-निर्मलचेतसा निरन्तरं भूतकालीनपापस्य निन्दारूपा, भविष्यत्कालीनपापचिन्तनाभावरूपा, अथवा कायप्रवृत्त्या पापपरीहाररूपा, वचसा पापवचनपरीहाररूपा, मानसपापचिन्तना-भावरूपा ज्ञेया ।

(४) निर्मलबोध := शुश्रूषाभावजन्यशान्तरसप्रधानशास्त्राभ्यासादेः, परिचयेन श्रुतमय :– चिन्तामयो भावनामयो यो बोधः स 'निर्मलो बोधः' ।

(५) जनप्रियत्वं = जनतायाः प्रेमपात्रता, तत्सद्भावतो जनेषु धर्मप्रशंसा प्रेरणादितो धर्मवृद्धिर्भवति. इत्यादिलोकोत्तरभावोऽर्थादलौकिकाद्भुतजागृतिविशेषः कथ्यते । परमतसंवादेनाऽपि कथ्यतेऽभयादिपंचकं जैनव्यतिरिक्तं मुमुक्षुभिरिष्यते चैतद्, कथमित्याह–यथोक्तं–भगवता परिव्राजकेन गोपेन्द्रनाम्ना, तथाहि–

अतिव्यामोहकारिक्लिष्टकर्मरसे नष्टे सति व्यावृत्त–पुरुषात्मविषयकपराजयरूप-स्वव्यापारवत्यां (सत्त्वरजस्तमसां त्रयाणां गुणानां साम्यावस्था, प्रकृतिः, सा जडा, सत्त्वगुणः प्रकाशादिकस्य साधनरूपः, रजोगुणः–जगतः कारणे या दुःखात्मता सा, तमोगुणः –या मोहात्मकता सा,) सत्त्वरजस्तमोरूपायां प्रकृतौ ज्ञानावरणादिकर्मप्रकृतौ वा धृतिः–श्रद्धा, सुखा–विविदिषा–विज्ञप्तिरित्येता यथाक्रममभयाद्यपरनामानस्तत्त्वधर्मयोनयः पारमार्थिक–कुशलोत्पत्तिस्थानानि न भवन्ति, ततो धृत्यादिधर्मयोनीनां भवन्तीनामपि कुतोऽपि हेतोः प्रकृतेरनिवृत्ताधिकारत्वेन तात्त्विकधृत्यादिस्वभावाभावो वर्त्तते, इति एवमपि विज्ञप्तिश्च पंचमी धर्म्मयोनिः शब्दान्तरतो जिनोक्तधर्मप्राप्तिरूपो बोधि र्ज्ञेयो, बोधे र्विज्ञप्त्या कथमैक्यमिति चेत् कथ्यते प्रशमसंवेगादिभ्यो लक्षणेभ्योऽभेदः स्थानद्वये वर्त्तते, शब्दभेदो वर्त्तते परन्त्वर्थभेदो न, बोध्यभिन्नविज्ञप्तिप्राप्तिश्च पूर्वोक्तप्रपंचतो भगवद् भ्य एवेति बोधिं ददतीति बोधिदाः ॥

| सांख्यपरिभाषा | जैनपरिभाषा |
|---|---|
| सांख्यदर्शनानुगत भगवान् परिव्राजकगोपेन्द्रः | जैनाः |
| (१) अनिवृत्ताधिकारप्रकृतिकः पुरुषः, | अचरमपुद्गलपरावर्त्तवर्त्तिपुनर्बन्धकाद्या जीवाः, |
| (२) निवृत्ताधिकारप्रकृतिकः पुरुषः, | चरमपुद्गलपरावर्त्तवर्त्यपुनर्बन्धकाद्या आत्मानः, |
| (३) धृतिः | अभयम् |
| (४) श्रद्धा | चक्षुः |
| (५) सुखा | मार्गः |
| (६) विविदिषा | शरणम् |
| (७) विज्ञप्तिः | बोधिः |
| (८) पुरुषः | चेतनो जीवः |
| (९) प्रकृतिः | ज्ञानावरणादिकं कर्म |

एवमर्हन्तो भगवन्तो केवलापेक्षया व्यापकत्वेन सर्वलोके उपकारिण उपयोगिनो भवन्त्यतः 'लोकोत्तम–लोकनाथ–लोकहित–लोकप्रदीप–लोकप्रद्योतकररूप विशेषणरूपपद-

पंचकेनार्हतां भगवतां स्तुतिः कृताऽस्ति, तेषामर्हतामेवं 'अभयदान–चक्षुर्दान–मार्गदान–शरणदान–बोधिदानरूपैः प्रकारैः (हेतुभिः) पूर्वोक्तकथितपरमार्थकरणरूपोपयोगस्य सिद्धे-रुपयोगसम्पद एव 'लोकोत्तमपदतो लोकप्रद्योतकरपर्यन्तानां पंचानां पदानां उपयोग-सम्पद एव' हेतुसम्पद् = उपयोगसम्पदो हेतवः 'अभयदपदतो बोधिदपर्यन्तेषु पंचसु पदेषु' दर्शिता अतः, एषा पदपंचकवती पंचमी 'सामान्योपयोगसम्पदो हेतुसम्पद्' ज्ञेया,

परमार्थसम्पादनरूपोपयोगः, यं हेतुभिर्व्यक्तं सिद्धयति, तेषां हेतूनां नाम अभय-दानादिकमस्ति, अर्थात् प्रथममभयदानादिकर्त्तारः सन्ति, तत एव भिन्नभिन्नेषु अधि-कारेषु स्थितानां सर्वेषां भव्यजीवादीनां सर्वरीत्या, उपकारिणो भवन्ति, अर्थात् अभया-दिदानद्वारैव लोकोत्तमत्वादिरूपोपयोगः–परमार्थकरणरूप उपयोगोऽस्ति, तथा चाभय-दाद्याः सन्त्यत एव 'लोकोत्तम–लोकनाथ–लोकहित–लोकप्रदीप–लोकप्रद्योतकरा अर्हन्तः सन्ति,

लोकोत्तमत्वादिरूपोपयोगरूपपरोपकारकारिणो भवन्ति, नान्यथा अत एव स्तोतव्या एव कथ्यन्ते,

इति पंचमीसम्पत्समाप्तिं सूचयति.

अथ स्तोतव्यसम्पदः सविशेषोपयोगसम्पदः प्रौढतया प्ररूपणम्—

**सद्देशनायोग्यताविधाय्यनुग्रहसम्पादनादिना तात्त्विकधर्म्मदातृ–त्वादिप्रकारेण परमशास्तृत्वसम्पत्समन्विता भगवन्त इति न्यायतः प्रतिपादयन्नाह–**

**'धम्मदयाणमित्यादिसूत्रपंचकं' इह धर्म्मः, चारित्रधर्मः परिगृह्यते, स च श्रावक-साधुधर्म्मभेदेन द्विधा श्रावकधर्म्मोऽणुव्रताद्युपासकप्रतिमागतक्रियासाध्यः साधुधर्म्माभिला-षाशयरूपः, आत्मपरिणामः, साधुधर्म्मः पुनः सामायिकादिगतविशुद्धक्रियाभिव्यङ्ग्यसकल-सत्त्वहिताशयाऽमृतलक्षणः स्वपरिणाम एव, क्षायोपशमिकादिभावस्वरूपत्वाद्धर्म्मस्य, नायं भगवदनुग्रहमन्तरेण, विचित्रहेतुप्रभवत्वेऽपि महानुभावतयाऽस्यैव प्राधान्यात्, भवत्येवैत-दासन्नस्य भगवति बहुमानः, ततो हि सद्देशनायोग्यता, ततः पुनरयं नियोगतः इत्युभय-तत्स्वभावतया तदाधिपत्यसिद्धेः, कारणे कार्योपचाराद्धर्म्मं ददतीति धर्मदाः २० ॥**

पं.–"सद्देशनेत्यादि," इदमत्र हृदयम्–सद्देशनाया योग्यताविधायिनोऽनुग्रहस्य–स्वविषयबहुमान-लक्षणस्य प्राक् सम्पादनेन, आदिशब्दात् तदनु सद्देशनाया यत्तात्त्विकधर्म्मस्य दातृत्वम्, आदिशब्दात्

परिपालनं तेन, परमया–भावरूपया शास्तृत्वसम्पदा–धर्म्मचक्रवर्तित्वरूपया समन्विता:–सङ्गता युक्ता भगवन्त इति यथाक्रमं सूत्रपंचकेन प्रतिपादयन्नाह–

"नायमित्यादि" न–नैवायम्–उक्तरूपो धर्म्मो भगवदनुग्रहं सहकारिणमन्तरेण–विना, कुत इत्याह–"विचित्रहेतुप्रभवत्वेऽपि" विचित्रा:–स्वयोग्यतागुरुसंयोगादयो हेतव: प्रभवो–जन्मस्थानं यस्य तद्भावस्तत्त्वं तस्मिन्नपि धर्म्मस्य "महानुभावतया" अचिन्त्यशक्तितया "अस्यैव" भगवदनुग्रहस्य हेतुषु "प्राधान्यात्" ज्येष्ठतया, तदेव भावयति–"भवत्येव" न न भवति, "एतदासन्नस्य" धर्म्मासन्नस्य "भगवति" परमगुरौ "बहुमानो" भवनिर्वेदरूप: "ततो" भगवद्बहुमानात् "हि:" स्फुटं "सद्देशनायोग्यता" सद्देशनाया–वक्ष्यमाणरूपाया योग्यता–उचितत्वं

"तत:" सद्देशनायोग्यताया: "पुनरयं" धर्म्मो "नियोगत:" अवश्यंतया "इति" एवं परम्परया "उभयतत्स्वभावतया" उभयस्य–भगवद्बहुमानप्रकृतधर्म्मलक्षणस्य तत्स्वभावतया–कार्यकारणस्वभावतया "तदाधिपत्यसिद्धे:" तस्य भगवद्बहुमानस्य महानुभावतयाऽधिकृतधर्म्महेतुषु प्रधानभावसिद्धे:, "कारणे" सद्देशनायोग्यतायां "कार्यस्य" धर्म्मस्य "उपचाराद्" अध्यारोपाद्धर्म्मं ददतीति धर्म्मदा: ॥

**टीका**–(श्रीमतामर्हतां भगवतामुपयोगिता यैर्विशिष्टै: कारणैर्मन्यते तेषां सन्दर्शनं सविशेषोपयोगसम्पद्द्वारा कार्यते, तेऽर्हन्तो धर्मदा–धर्मदेशका:–धर्मनायका:–धर्मसारथय:–धर्मवरचातुरन्तचक्रवर्त्तिन: इति तेषां विशिष्ट–प्रकाराऽवच्छिन्नोपयोगिता, सर्वेषां मुमुक्षूणां आत्यन्तिककल्याणकारिणी, अस्ति अत: सर्वजनमात्रस्तुतियोग्या अर्हन्तो भवन्ति) तथाहि–

सम्यग्देशनाविषयकयोग्यताकारकत्व (भगवद्देशना) विषयबहुमानरूपानुग्रहस्य पूर्वं सम्पादनेन सद्देशनाया यत्तात्त्विक–धर्मस्य दानं, आदिपदत:–आदिपदतश्च तात्त्विकधर्मस्योपदेश:, धर्मनायकत्वधर्मसारथित्वादि–प्रकारावच्छिन्नतया, परिपालनं तदादिप्रकारविशिष्टया, भावरूपपरमया, धर्मचक्रवर्त्तित्वरूपशास्तृत्वसम्पदा समन्विता:-सङ्गता (युक्ता) भगवन्त इति न्यायत: क्रमश: 'धम्मदयाणं' इत्यादि सूत्र–पंचकं प्रतिपादयति.

इह–धम्मदयाणमित्यादिसूत्रपंचकघटकधर्म्मपदेन चारित्ररूपधर्मस्य परिग्रह:, श्रावकधर्मसाधुधर्मौ इति द्विधा चारित्रधर्मो भवति, अणुव्रताद्युपासकप्रतिमागत–क्रियासाध्य:, साधुधर्मविषयकाभिलाषाशय आत्मधर्मविशेष श्रावकधर्म:, साधुधर्मस्तु सामायिकादिगत-

विशुद्धक्रियाप्राकट्ययोग्यः, सकलसत्त्वविषयकहिताशयरूपामृतलक्षणसम्पन्नः, स्वपरिणाम एव, कथमिति चेत् कथ्यते क्षायोपशमिकादिभावस्वरूपो धर्म्मो भवति,

पूर्वोक्तस्वरूपो धर्मः भगवदनुग्रहरूपसहकारिणं (सहकारित्वम् = सहकार्यकरणरूपमथवा 'स्वभिन्नत्वे सति स्वकार्यकारित्वम्' यथा दण्डस्य मृत्तिकाकार्यघटकारित्वम् तथा भगवदनुग्रहस्य सद्देशनायोग्यताकार्यचारित्रधर्मकारित्वात् सहकारित्वं बोध्यम्,

यथा मृत्तिकाकार्यरूपघटं प्रति दण्डः सहकारी, यतो मृत्तिकाभिन्नत्वे सति, मृत्तिकाकार्यरूपं घटं करोति, तथा सद्देशनायोग्यताजन्यकार्यरूपचारित्रधर्मस्य कारणं भगवदनुग्रहः सहकारित्वेन मन्यते यतः सद्देशनायोग्यताया भिन्नत्वे सति, सद्देशनायोग्यताजन्यकार्यरूप चारित्रधर्मं जनयति.) विना नैव भवति,

भगवदनुग्रहरूपसहकारिसत्तायामेव चारित्रधर्मसत्ता वर्त्तते यतो धर्मस्य स्वयोग्यतागुरुसंयोगादिरूपकारणकूटजन्यत्वेऽपि महानुभावतया (अचिन्त्यशक्तिमत्त्वेन) सर्वहेतुषु भगवदनुग्रहस्य प्राधान्यं (अविनाभावित्वेन ज्येष्ठत्वं) (तुज करुणा सहु ऊपरे रे सरखो छे महाराय, पण अविराधक जीवने रे कारण सफलुं थाय)

भगवदनुग्रह एव अविसंवादि निमित्तं, पुष्टालंबनं, प्रभावकनिमित्तं वर्त्तते, अर्थाद् भगवदनुग्रहं विहाय चारित्रधर्मो न भवति, मोक्षाय च न प्रभवति. अत एव धर्मप्राप्तिसामीप्यवर्त्तिनो भव्यस्य, भगवति–परमगुरौ बहुमानो न भवतीति न, अपितु भवत्येव, मह्यं तु भगवानेव भगवदाज्ञैव रोचते नान्यत् किमपि भवीयं भौतिकमिति भगवद् बहुमानभवनिर्वेदयोरेकपर्यायत्वं बोध्यम् ततो भगवद्बहुमानादवश्यं (वक्ष्यमाणरूप) सद्देशनायोग्यता (उचितत्व) रूपं कार्यं भवतीति. तथा च सद्देशनायोग्यता द्वारा, पुनरयं चारित्रधर्मः, अवश्यंतया भवति, एवं परम्परया भगवद्बहुमानप्रकृत चारित्रधर्मरूपस्योभयस्य कार्यकारणभावस्वभावतया भगवद्बहुमानस्य महानुभावतयाऽधिकृतधर्महेतुषु प्रधानभावसिद्धिर्भवति, सद्देशनायोग्यतारूपकारणे चारित्ररूपधर्मरूपकार्यस्योपचारादध्यारोपाद् धर्म्म ददतीति धर्मदास्तेभ्यो धर्म्मदेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः । (कारणस्य यत् कारणम् तस्य प्रयोजकत्वमिति कारणस्य यत्कारणं तत् परंपराकारणं–व्यवहितकारणं प्रयोजककारणं गण्यतेऽत एव चारित्रधर्मस्य कारणं सद्देशना

योग्यताऽस्ति, सद्देशनायोग्यतायाः कारणं भगवद्बहुमानं भवति, भगवद्बहुमानं चारित्र-धर्मं प्रति परंपराकारणं, 'भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः' कारणत्वेन कार्य-त्वेन रूपेण भिन्नत्वेन प्रतीयमानयोः सद्देशनायोग्यताधर्मरूपकारणकार्ययोरैक्यारोपणम-त्रोपचारो ज्ञेयः, चारित्ररूपधर्मकारणत्वात् सद्देशनायोग्यतायां चारित्ररूपधर्मत्वारो-पोऽत्र बोध्यः, यथा प्राणसाधनत्वादन्ने प्राणत्वारोपः ।)

इत्येवं 'धर्मद' नामकस्य शक्रस्तवस्य विंशतितमपदस्य व्याख्या समाप्ता,

अथ 'धर्मदेशक' नामकस्य शक्रस्तवीयैकविंशतितमपदस्य व्याख्याऽऽरम्भः —

**तथा 'धम्मदेसयाणं,' तत्र धर्म्मः—प्रस्तुत एव तं यथाभव्यमभिवर्धति, तद्यथा—प्रदीप्तगृहोदरकल्पोऽयं भवो, निवासः शारीरादिदुःखानां न युक्त इह विदुषः प्रमादः, यतः अतिदुर्लभेयं मानुष्यावस्था, प्रधानं परलोकसाधनं, परिणामकटवो विषयाः, विप्रयो-गान्तानि सत्सङ्गतानि पातभयातुरमविज्ञातपातमायुः, तदेवं व्यवस्थिते विध्यापनेऽस्य यतितव्यं, एतच्च सिद्धान्तवासनासारो धर्म्ममेघो यदि परं विध्यापयति, अतः स्वीक-र्त्तव्यः सिद्धान्तः, सम्यक् सेवितव्यास्तदभिज्ञाः, भावनीयं**

**मुण्डमालालुकाज्ञातं, त्यक्तव्या खल्वसदपेक्षा, भवितव्यमाज्ञाप्रधानेन उपादेयं प्रणिधानं, पोषणीयं साधुसेवया धर्म्मशरीरं, रक्षणीयं प्रवचनमालिन्यम्, एतच्च विधि-प्रवृत्तः सम्पादयति, अतः सर्वत्र विधिना प्रवर्त्तितव्यं, सूत्रात्, ज्ञातव्य आत्मभावः, प्रवृत्तावपेक्षितव्यानि निमित्तानि, यतितव्यमसम्पन्नयोगेषु लक्षयितव्या विस्रोतसिका प्रतिविधेयमनागतमस्याः भयशरणाद्युदाहरणेन, भवत्येवं सोपक्रमकर्म्मनाशः निरुपक्रमानु-बन्धव्यवच्छित्तिरित्येवं धर्म्मं देशयन्तीति धर्म्मदेशकाः २१ ॥**

पं.— "मुण्डमालालुकाज्ञातमिति" मुण्डमाला—शिरःस्रग्, आलुका—मृन्मयी वार्घटिका ते एव ज्ञातं—दृष्टान्तो, यथा "अनित्यताकृतबुद्धिर्म्लानमाल्यो न शोचति । नित्यताकृतबुद्धिस्तु, भग्नभाण्डोऽपि शोचति ॥ १ ॥" "सूत्रेत्यादि" सूत्राद्—अरक्तद्विष्टादिलक्षणनिरूपकादागमात् "ज्ञातव्यो" बोद्धव्यः "आत्मभावः" रागादिरूप आत्मपरिणामो, यथोक्तं "भावणसुयपाठो तित्थसेवण समयं तयत्थ-जाणमि । तत्तो य आयपेहणमइनिउण गुणदोसविक्खाए ॥ १ ॥" इति, "निमित्तानीति" इष्टानिष्ट-सूचकानि शकुनादीनि सहकारिकारणानि वा "भयशरणाद्युदाहरणेनेति" । "सरणं भए उवाओ रोगे किरियाविसंमि मंतोत्ति" इत्युदाहरणं ॥

**टी.:—** तथा 'धम्मदेसयाणं' धर्मदेशकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः ।

तत्र प्रस्तुतचारित्रधर्म एव गृह्यते, तं चारित्रधर्मं भव्यताऽनुसारेण कथयन्ति सर्वज्ञा:, अर्हन्त इति तद् यथा. –

(१) एष संसार:, वह्निप्राचुर्येण प्रदीप्तोऽतिशयदग्धो गृहस्योदर:–मध्यभाग:, तत्समानोऽस्ति, ज्वलन्मध्यभागेन सर्वत्र दाहो व्याप्नोतीत्यर्थ:, जाज्वल्यमाने सर्वत: संसारे (दु:ख) दाहं विना किमपि नास्ति,

(२) एष संसार: पुन:, आधिव्याधिउपाधिरूपतापत्रिपुटी-गर्भावास-जन्मजरामरणादिविविध-विचित्रवेदनानां (दु:खानां) निवासस्थानं-स्वगृहमिव,

(३) अस्मिन् भवोदधौ विदुष:-कर्त्तव्यशीलविशिष्टज्ञानिन: प्रमादो (मोह-विषय रसोन्माद-धर्मशुष्कता-धर्मविषयकमन्दता (आलस्य) रूपप्रमादो) न युक्त: विवेकिनो न समंजस -न न्याययुक्त:, यत: प्रमादलवस्यापि परिणामो बलवदनिष्टानुबन्धी भवति, किंच

(४) मानुष्यावस्थाऽतिदुर्लभा-कोटाकोटिभवशतेनाप्यत्यन्तदुष्प्रापा,

(५) परलोकविषयकसाधनं (साधना) प्रधानं मुख्य मतम्,

(६) विषया: परिणामे-फलान्तेऽत्यन्तदारुणा: कटुका: किंपाकफलवत्,

(७) विद्यमाना वा शुभा इष्टा मनोवल्लभा-मनोहरा येऽत्यन्तप्रियसंयोगा: (समागमा:) सन्ति ते सर्वे संयोगा:, अन्ते-नियमतो वियोगस्वभावा:,

(८) पतनशीलमायु:, कदा पतिष्यतीति ज्ञानरहितमायु:, अत: पतनस्य भयं अन्त:करणे सदा वर्त्तते एव, मनुष्यस्यायु: कदा कुत्र किंनिमित्तात्, नङ्क्ष्यति, वर्त्तमानभवलीलाविलास: क्षयं प्राप्स्यतीति न ज्ञायते, काय: पतनप्रकृतिक:, पतननिश्चयाभावेन, मरणं मस्तकेऽवतिष्ठते (लंबते)

(९) तदेवमेतादृश्यां परिस्थितौ वा व्यवस्थायां सत्यां जाज्वल्यमानसंसारदावानलस्य विध्यापने यतितव्यम्-प्रयत्नविशेष: कर्त्तव्य:,

(१०) एतत्-संसारदावानलविध्यापनं सिद्धान्तविषयकदृढसंस्काररूपवासनारूपजलसारप्रधानो मेघो यदि परं विध्यापयति-विध्यापने समर्थो भवति नान्योऽत: सिद्धान्त: स्वीकर्त्तव्य:-सिद्धान्तस्वीकार: प्राक्कर्त्तव्य:,

(११) ततः, तत् सिद्धान्तमर्माभिज्ञा गीतार्थमूर्धन्याः समीचीनरूपेण सेवितव्याः, अतो गुरुतः सिद्धान्तज्ञानं समर्थमुपकारकमायाति,

(१२) मुण्डमालाया-शिरः स्रजो ज्ञातं च मृन्मयी जलघटिकायां भावनीयम्, भौतिकपदार्थान् प्रति अनित्यताकृतबुद्धिर्जनः मालाया म्लानत्वेन शोचति न, नित्यताकृतबुद्धिस्तु भाण्डस्य भग्नत्वमात्रेणाऽपि भृशं शोचति.

सुखश्रीमत्यां दशायां मा सन्तुष्टः प्रीतः प्रसन्नो भवतु दुःखदरिद्रदशायां, उदासीनो दीनो मा भवतु यतः कर्ममयसंसारस्य सामर्थ्यमस्ति यत् क्षणं जीवो जलघटीवत्, हीनकक्षावान् भवति, क्षणं जीवः पुष्पमालावत् महामूल्यवत्कक्षावान्, सर्वशिरोधार्यः, महान्, राजा, महाराजः श्रीमान् भगवान् भवतीति,

(१३) असतः (असत्यस्याशाश्वतस्याविद्यमानस्य दुर्जनस्य) अपेक्षायाः (आशायाः-शरणालंबनस्य-विश्वासस्य) त्यागः (विसर्जनं-अनवकाशः) नियमतः कर्त्तव्य एव अर्थात् सतः (सत्यस्य-शाश्वतस्य-विद्यमानस्य-सज्जनस्य) अपेक्षा (आशा-आलंबनं-विश्वासः) कर्त्तव्यो यतो, फलाऽविसंवादि, सत् भवति, फलविसंवादि, असद् भवति,

(१४) आज्ञैव प्रधाना जीवने यस्य सः, आज्ञाप्रधानः, तेन भाव्यम्, विनाऽऽज्ञां सर्वं गौणं कृत्वा, प्रागेवाज्ञा समाराध्या न विराध्या कदाचिदपि, जिनाज्ञा

(१५) सर्वत्र क्रियासु वा कार्येषु प्रणिधानं-चित्तस्यैकाग्रता कार्या, प्रणिधानकृतं कृतं, अप्रणिधानेन कृतमकृतमुच्यते, कृतस्य फलप्राप्तौ प्रणिधानं प्रधानम्,

(१६) साधूनां सेवया (प्रासुकाहारजलवस्त्रपात्रग्लानस्यौषधादिदानप्रयुक्तया) दानशीलतपोभावरूपं श्रावकधर्मरूपं धर्मशरीरं पोषणीयम्, दृढपुष्टं कर्त्तव्यम्,

(१७) प्रवचनस्य-जैनशासनस्य ज्ञात्वाऽज्ञात्वा किंजातीयमपि मालिन्यं न कर्त्तव्यमपि तु रक्षणीयं—केनचिदपि कृतस्य मालिन्यस्य शुद्धये रक्षा कर्त्तव्या, सत्यां शक्तौ मालिन्यस्य (अवहेलनाया—अपभ्राजनाया वा निन्दायाः) विनाशो यथास्यात्तथा कर्त्तव्यः, प्रवचनमालिन्याऽकरणरक्षणतः सद्गतितीर्थंकरपदप्राप्तिपर्यन्तं जीवो गच्छति,

(१८) शास्त्रनिर्दिष्टविधिना यः प्रवर्त्तते स 'विधिप्रवृत्तः' अथवा योग्यगुरोः पार्श्वे विधिना गृहीतदीक्षो 'विधिप्रवृत्तः' कथ्यते, एतच्च विधिप्रवृत आत्मा, प्रकृतचा-

रित्रधर्ममथवा पूर्वोक्तसर्वसत्कार्याणि सम्पादयति–लभते अर्थात् सर्वकृत्येषु सर्व शास्त्र-विहितविधिमनुसृत्य प्रवर्त्तन्ताम्, विधिप्रवृत्ता भवन्तु इत्यर्थः,

(१९) सूत्रात्–आगमात्, आत्मभावः–स्वस्वरूपं गुणपर्यायात्मकं ज्ञातव्यम् अथवा–अरक्तार्द्विष्टादिलक्षणनिरूपकागमबलतो रागादिरूपात्मपरिणामोऽपि बोद्धव्योऽर्थात् आगमद्वारा को विभावभावः ? कः स्वभावभाव ? इति ज्ञात्वा हंसवत् विवेकमुपयुज्य स्वभावभावप्रादुर्भावे–आग्रहो दृढतापूर्वकप्रयत्नादिः कर्त्तव्यः,

(अत्रैका गाथा स्मर्त्तव्या 'भावना सूत्रपाठः तीर्थसेवनमसकृत् तदर्थज्ञातरि, ततश्च-आत्मप्रेक्षणमतिनिपुणं गुणदोषवीक्षाया'मिति)

(२०) प्रवृत्तौ–क्रियादौ, इष्टानिष्टसूचकानि शकुनानि–(पक्षिरुतानि) अपेक्षणीयानि अथवा कार्यादौ निमित्तानि–सहकारिकारणान्यपि, अपेक्षितव्यानि,

(२१) असम्पन्न–अप्राप्तसम्यग्दर्शनज्ञानचारित्ररूपेषु मोक्षमार्गरूपेषु योगेषु विशिष्टप्रयत्नवन्तो भवन्तु,

(२२) विस्रोतसिका–प्रमादजन्यस्खलना न भवेदेतदर्थे सर्वथा सावधानता-लक्ष्यता रक्षणीया, प्रमादागमनात् पूर्वमेव सावधानीभूय प्रमादनाशका उपाया योजनीयाः, स्खलनां प्रति दत्तलक्ष्या भवन्तु,

(२३) 'प्रक्षालनाद्धि पङ्कस्य दूराद स्पर्शनं वरं' इति न्यायात् पापं कृत्वा पापप्रक्षालनात् पापाकरणं–प्रमादाकरणं वरं श्रेयस्करम्, तथा च भयागमनात् पूर्वं शरणं शोध्यते, तथा भविष्यत्कालीनाः प्रमादप्रकाराः प्रतिकरणीयाः–तत्तदुपायद्वारा (यथा भये शरणं, रोगे उपायद्वारा प्रतिकार-क्रिया, विषे मंत्रक्रिया तथा भविष्यत् काले प्रमादो माऽभूदिति विचारद्वारा, प्रमादकारणप्रतिबन्धक्रिया कर्त्तव्येति)

एवं यो जीवो विशिष्टक्रिया द्वारा प्रवर्त्तते वा वर्त्तते तस्याऽऽत्मनः सोपक्रम-कर्मनाशः धर्मशास्त्रनिर्दिष्टोपाय–साधन–प्रायश्चित्तादिद्वारा प्रतिकार्य–सोपक्रमस्य कर्मणो नाशो भवति एवं निरुपक्रमस्य–निकाचितस्य कर्मणोऽनुबन्धः–बीजशक्तिर्नष्टा भवति, अर्थात् नवीनः कर्मबन्धो न भवति, प्रत्युत कर्मणां शृङ्खलाबन्धवदविच्छिन्नप्रवाह-सम्बन्धस्य प्रतिबन्धो भवतीत्येवं धर्मं देशयन्ति–प्ररूपयन्तीति धर्मदेशकाः ।

इति—शक्रस्तवस्य 'धर्मदेशक' रूपैकविंशतितमपदस्य व्याख्या समाप्ता ।

यथा 'धर्मदाः, धर्मदेशका अर्हन्तोभवन्ति तथा धर्मनायका अर्हन्तः सन्ति । अर्थाद् धर्मनायकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः ।

**तथा 'धम्मनायगाणं इह धर्मः—अधिकृत एव, तस्य स्वामिनः, तल्लक्षणयोगेन, तद्यथा—तद्वशीकरणभावात् तदुत्तमावाप्तेस्तत्फलपरिभोगात्तद्विघातानुपपत्तेः, तथा हि—एतद्वशिनो भगवन्तः**

**विधिसमासादनेन १ विधिनाऽयमाप्तो भगवद्भिः, तथा निरतिचारपरिपालनतया २ पालितश्चातिचारविरहेण, एवं यथोचितदानतो ३ दत्तश्च यथाभव्यं, तथा तत्रापेक्षाभावेन ४ नामीषां दाने वचनापेक्षा १, एवं च तदुत्तमावाप्तयश्च भगवन्तः प्रधानक्षायिकधर्म्मावाप्त्या १ तीर्थकरत्वात्प्रधानोऽयं भगवतां, तथा परार्थसम्पादनेन २ सत्त्वार्थकरणशीलतया, एवं हीनेऽपि प्रवृत्तेः ३**

**तथा तथाभव्यत्वयोगात् अत्युदारमेतदेतेषाम् २ । एवं तत्फलपरिभोगयुक्ताः सकलसौन्दर्येण निरुपमं रूपादि भगवतां, यथा प्रातिहार्ययोगात्, नान्येषामेतत्, एवं उदारद्धर्यनुभूतेः समग्रपुण्यसम्भारजेयं, तथा तदाधिपत्यतो भावात्, न देवानां स्वातन्त्र्येण ३, एवं तद्विघातरहिताः, अवन्ध्यपुण्यबीजत्वात् एतेषां स्वाश्रयपुष्टमेतत्, तथा अधिकानुपपत्तेः नातोऽधिकं पुण्यं, एवं पापक्षयभावात्, निर्द्दग्धमेतत्, तथाऽहेतुकविघातासिद्धेः सदा सत्त्वादिभावेन ४ । एवं धर्म्मस्य नायका धर्म्मनायका इति २२ ।।**

पं.—धर्म्मस्य नायकत्वे भगवतां साध्ये तद्वशीकरणादयश्चत्वारो मूलहेतवः, प्रत्येकं स्वप्रतिष्ठापकैः सभावनिकैश्चान्यैश्चतुर्भिरेव हेतुभिरनुगता व्याख्येयाः, तत्र तद्वशीकरणभावस्य मूलहेतोर्विधिसमासादनं १ निरतिचारपालनं २ यथोचितदानं ३ तत्रापेक्षाभाव ४ श्चैते सभावनिकाश्चत्वारः प्रतिहेतवो, द्वितीयस्य च तदुत्तमावाप्तिरूपस्य प्रधानक्षायिकधर्म्मावाप्तिः १ परार्थसम्पादनं २ हीनेऽपि प्रवृत्ति ३ स्तथाभव्यत्वयोग ४ श्चेत्येवंलक्षणाः, तृतीयस्य पुनस्तत्फलपरिभोगलक्षणस्य सफलसौन्दर्यं १ प्रातिहार्ययोग २ उदारद्धर्यनुभूति ३ स्तदाधिपत्यभावश्चेत्येवंरूपाः ४, चतुर्थस्य तु तद्विघातानुपपत्तिरूपस्यावन्ध्यपुण्यबीजत्वं १ अधिकानुपपत्तिः २ पापक्षयभावो ३ ऽहेतुकविघातासिद्धि ४ श्चेत्येवंस्वभावाः सभावनिकाश्चत्वार एव प्रतिहेतवः, एते च भावनाग्रन्थेनैव व्याख्याता इति न पुनः प्रयासः, परं "एतद्वशिनः" इति एषः—अधिकृतो धर्म्मो वशी—वश्यो येषां ते एतद्वशिन इति ।

"विधिसमासादनेनेति" विधिसमासादितो ह्यर्थोऽव्यभिचारितया वश्यो भवति, न्यायोपात्तवि-

त्तवत् "तत्रेति" दाने "वचनापेक्षेति" न हि भगवन्तो धर्म्मदाने अन्यमुनय इव पराज्ञामपेक्षन्ते, क्षमाश्रमणानां हस्तेन सम्यक्त्वसामायिकमारोपयामीत्याद्यनुच्चारणात् ।।

## अश्वबोधाय गमनाकर्णनात् ।

"अश्वबोधाय गमनाकर्णनादिति," अश्वस्य-तुरङ्गमस्य बोधाय-सम्बोधाय भगवतः श्रीमतो मुनिसुव्रतस्वामिनो भृगुकच्छे गमनश्रवणात्, तथाहि—किल भगवान् भुवनजनानन्दनो द्विषद्:सह-प्रतापपरिभूतसमस्तामित्रसुमित्राभिधानभूपालकुलकमलखण्डमण्डनामलराजहंसो भुवनत्रयाभिनन्दितपद्मापदपद्मावतीदेवीदिव्योदरशुक्तिमुक्ताफलाकारः श्रीमुनिसुव्रततीर्थनाथो मगधमण्डलमण्डनराजगृहपुर-परिपालितप्राज्यराज्यः सारस्वतादिवृन्दारकवृन्दाभिनन्दितदीक्षावसरः तत्कालमिलितसमग्रवासवविसरविरचितोदारपूजोपचारः चारकाकारसंसारनिःसारसज्यां प्रव्रज्यां जग्राह, तदनु पवनवदप्रतिबद्धतया निजचलनकमलपांशुपातपूतं भूतलं कुर्वन् कियन्तमति कालं छद्मस्थतया विहृत्य निशातशुक्लध्यानकुठारधाराव्यापारविलूनदुरन्तमोहतरुमूलजालः सकलकालभाविभावस्वभावावभासनपटिष्ठं केवलज्ञानमुत्पादयामास, समुत्पन्नज्ञानं च भगवन्तमासनचलनानन्तरं विज्ञाय भक्तिभरनिर्भरा निखिलसुरपतयो विहितसमवसरणादिरमणीयसपर्याः पर्यायेण यथास्थानमुपविश्य भगवन्तं पर्युपासयामासुः, भगवांश्च सनीरनीरद इव भव्यजन्तुसन्तानशिखिमण्डलोल्लासनस्वभावो भासुराभिनवांजनपुंजसङ्काशकायः कषायग्रीष्मसमयसंतप्तप्राणिसन्तापापनोददक्षो विक्षिप्तान्धकारभामण्डलतडिल्लतालङ्कृतः स्फुरद्धर्म्मचक्रकान्तिकलापोत्पादितनभोभूषणाऽऽखण्डलकोदण्डाडम्बरः सौधर्म्मेशानसुरपतिपाणिपल्लव-प्रेर्यमाणधवलचामरोपनिपातप्राप्तबलाकापङ्क्तिप्रभवशोभः सकलसत्त्वसाधारणाभिः सद्धर्म्मदेशनानीरधाराभिः स्वस्थीचकार निःशेषप्राणिहृदयभूप्रदेशानिति । ततः प्रवृत्ते तीर्थेऽन्यदा भानुमानिव भगवान् प्रबोधयन् भव्यपद्माकरान् दक्षिणापथमुखमण्डनं जगाम भृगुकच्छाभिधानं नगरमिति, समवससार च तत्र पूर्वोत्तरदिग्भागभाजि कोरिण्टकनामन्युद्याने । अत्रान्तरे निशम्य निजपरिजनाद् जिनागमनमानन्दनिर्भरमानसः समारुह्य जात्यतुरङ्गममनुगम्यमानो मनुजव्रजेनाजगामजगद्गुरुचरणारविन्दवन्दनाय तन्नगरनायको जितशत्रुनामा नरपतिः, प्रणिपत्य सकलकमलानिकेतनं जिनपतिपदकमलमुपविष्टो घटितकरकुड्मलो भगवच्चरणमूले, समाकर्णितवान् कर्णामृतभूतां भगवद्देशनां, तदनु जानन्नपि जनबोधनाय विनयपूर्वं प्रणम्य पप्रच्छ परमगुरुगणधरो, यथा—भगवन्नमुष्यां मनुष्यामरतिर्यक्कुलसङ्कुलायां पर्षदि कियद्भिर्भव्यजन्तुभिरपूर्वैरभ्युपगतं सम्यक्त्वं, परीतः कृतः संसारसागरः, पात्रीकृतो/निर्वृतिसुखानामात्मेति ?, ततः कुन्दकान्तदन्तदीप्तिभिरुद्योतयन्नभोऽङ्गणं जगाद जगन्नाथो, यथा—सौम्य ! समाकर्णय न केनचित्तुरङ्गरत्नमपहायापरेणेति, ततः श्रुत्वा सर्वज्ञवचनमवोचज्जितशत्रुभूपतिः—भगवन् ! कौतुकाकलितचित्तो जिज्ञासामि तुरगवृत्तान्तमहं । अन्यच्चभगवन्नहमस्मिन्नश्वरत्ने समारुह्य चलितस्ते चलननलिनमभिवन्दितुं, विलोक्य त्रिलोकीतिलकतुल्यं समवसरणमवतीर्णस्तुरङ्गमात्, प्रवृत्तः पद्भ्यामेवागन्तुं, तावत्सकलजन्तुजातचित्तानन्ददायिनीं सजलजलदनादगम्भीरां गम्भीरभवपयोधिपोतोपमां समाकर्ण्य भगवद्देशनामानन्दपयःप्लावितपवित्रनेत्रपात्रो निश्चलीकृतकर्णयुगलः समुल्लसितरोमकूपो मुकुलिताक्षः क्षणमात्रमवस्थितोऽसावश्वः, तदनु पुनर्द्धर्म्मश्रवण-

विश्राणितश्रवणोपयोगः समागतः समवसरणतोरणान्तिकं, तत्र चापूर्वं प्रमोदरसमनुभवन् भूमिन्यस्त-जानुयुगलो गलन्निखिलाशुद्धकलिमलः कथयन्निव निजमानसविशदवासनां शिरसाऽभिवन्द्य भगवन्तं तथास्थित एवासितुमारब्धवान्, ततस्तदेवंविधमश्वविलसितं विलोक्य विस्मितोऽहं कदाचिददृष्टपूर्वा-श्चर्यपूर्यमाणमानसः समागतो भगवत्समीपमिति, ततः कथयतु मथितमिथ्यात्वो भगवान् किमेतदिति, भगवता भणितं-सौम्य ! समाकर्णय-समस्ति समस्तमेदिनोपद्मासद्मभूतं पद्मिनीखेटं नाम नगरं, तत्राभ्यस्तजिनधर्म्मो जिनधर्म्मनामधेयः श्रेष्ठः श्रीसंचयसमाश्रयः श्रेष्ठी वसति स्म, तथाऽपरः सागर-दत्ताभिधानः प्रभूतधननिधानं निखिलजनप्रधानं जिनधर्म्मश्रावकपरममित्रं दीनानाथादिदयादानपरा-यणस्तस्मिन्नेव पुरे श्रेष्ठी तिष्ठति स्म; स च प्रतिदिनं जिनधर्म्मश्रावकसमेतो याति जिनालयं, पर्युपास्ते पंचप्रकाराचारधारिणः श्रमणान् । अन्यदा तच्चरणान्तिके धर्म्ममाकर्णयन्निमां गाथामा-कर्णयांचकार, यथा— "जो कारवेइ पडिमं जिणाण जियरागदोसमोहाणं । सो पावइ अन्नभवे, भवमहणं धम्मवररयणं ।। १ ।।" अवगतश्चानेनास्या भावार्थो, भवितव्यतानियोगतः समारोपित-श्चेतसि, गृहीतः परमार्थबुद्धया, निवेदितः स्वाभिप्रायः श्रावकाय, कृता तेनापि तदभिप्रायपुष्टिः, तदनु कारितवानसौ सकलकल्याणकारिणीं कल्याणमयीं जिनपतिप्रतिमां, प्रतिष्ठापयामास स महता विभवेन । तेन च सागरदत्तश्रेष्ठिना पूर्वमेव नगरबहिष्कारितं रुद्रायतनम्, अन्यदा तत्र पवित्रकारो-पणदिने जटाधारिणः प्रव्रजिताः पशुपतिलिङ्गपूरणनिमित्तं शठप्रकृतयो मठेभ्यो घृतादिपूर्णकुम्भान्नि-ष्कासयामासुः, तदधोभागे च भूयस्यो घृतपिपीलिकाः पिण्डीभूता भूतवत्यः, तेषु च निष्कास्यमानेषु भूतले ता निपेतुः, ते च ताः पथि पतिता निर्दयतया मर्दयन्तः संचरन्ति स्म, सोऽपि करुणार्द्रचेता-स्तच्चरणचूर्यमाणा वस्त्रप्रान्तेनोत्सारयांचकार, तं चोत्सारयन्तं दृष्ट्वा एकेन जटाधारिणा धर्म्ममत्स-रिणा घृतपिपीलिकापुंजं पादेनाक्रम्योपहसितः सागरदत्तः श्रेष्ठी—अहो श्रेष्ठिन् ! श्वेताम्बर इव दयापरः संवृत्तोऽसि ततोऽसौ वणिक् विलक्षीभूतः किमयमेवमाहेत्यभिधाय तदाचार्यमुखमवालोकत, तेनापि तद्वचनमपकर्णितं, ततश्चिन्तितं चतुरचेतसा सागरदत्तेन—न खल्वमीषां मूर्खचक्रवर्तिनां मनसि जीवदया, न प्रशस्ता चेतोवृत्तिः, नापि सुन्दरं धर्म्मानुष्ठानमिति परिभाव्योपरोधविहिततत्कार्यो विशिष्टवीर्यविरहादनुपार्जितसम्यक्त्वरत्नः प्रवर्तितमहारम्भः समुपार्जितवित्तरक्षणाक्षणिको गृहपुत्रक-लत्रादिकृतममत्वः प्रकृत्यैव दानरुचिः प्रचुरद्रविणवांछया कदा व्रजति सार्थः ? क्व किं क्रयाणकं क्रीणाति—लोकः ? कस्मिन्मण्डले कियती भूमिः ? कः क्रयविक्रयकालः ? किं वा वस्तु प्राचुर्येणो-पयुज्यते ? इत्याद्यहर्निशं चिन्तयन्नुपार्जिततिर्यग्गतियोग्यकर्म्मा मृत्वा समुत्पन्नस्तव तुरङ्गतया, स्थापितः स्ववाहनतया । अद्य तु मदीयवचनमाकर्ण्य पूर्वजन्मनिर्म्मापितार्हत्प्रतिमाप्रभावप्राप्तावन्ध्य-बोधिबीजोद्भेदादवाप्तं सम्यक्त्वं, भाजनीकृतः खल्वात्मा शिवसुखानामिति । एतत्सम्बोधनार्थं चाहमत्रागतवानिति च भगवानुवाचेति । ततः प्रभृति चाश्वावबोध इति नाम तीर्थं भरुकच्छे रूढमिति ।।

"तदाधिपत्यतो भावान्न देवानां स्वातन्त्र्येणेति" भगवत्स्वेवाधिपतिषु इयमुदारर्द्धिरुत्पद्यते, न देवेषु कर्तृष्वपि, "अधिकानुपपत्तेरिति" अधिकपुण्यसम्भवे हि इतरर्द्धिर्हन्यते "सदा सत्त्वादिभावेनेति" "नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्, अपेक्षातो हि भावानां, कादाचित्कत्वसम्भवः ।। १ ।।" इति । अत्र तथाशब्दा एवंशब्दाश्चानन्तरहेतुना उत्तरहेतोस्तुल्यसाध्यसूचनार्थाः ।।

टी.–इह धर्म्मनायकपदघटकधर्मपदेन, अधिकृत–क्षायोपशमिकादिभावरूपचारित्र-धर्म्म एव ग्राह्यः, तस्य धर्मस्य स्वामिनः–पतयः कथमिति चेत्कथ्यते स्वामिलक्षणयोगवन्तोऽर्हन्त एव नान्ये,

अर्हन्तो (पक्षः) धर्मनायकाः (धर्मनायकत्वं साध्यं) धर्मनायकत्वरूपसाध्यस्य साधका हेतवश्चत्वारः सन्ति मूलहेतवस्ते कथ्यन्ते प्रत्येकं (एकैकस्य) स्वप्रतिष्ठापकैः (मूलहेतुप्रतिष्ठाकारकैः) सभावनिकै (आत्मजागृत्यर्थे भावनासहितैः) श्चान्यैश्चतुर्भिरेव हेतुभि प्रतिहेतुभिरनुगता (व्याप्ता) ज्ञेयाः,

धर्मनायकत्वरूपसाध्यसाधकः प्रथमो मूलहेतुः, 'तद्वशीकरणभावरूपः' स्वप्रतिष्ठापकैः सभावनिकैः (मूलहेतुस्वरूपस्पष्टतादर्शकस्वभावैः) मूलहेतुसाधकहेतुभिः, चतुर्भिरवान्तरभेदरूपै, वंर्ण्यते,

मूलहेतुसाधकावान्तरभेदरूपहेतुः (१) विधिसमासादनं = येषां वश्य एष धर्मोऽस्ति ते धर्मवशिनो भवन्तोऽर्हन्त एवेति. अर्थात्–प्रकृतचारित्रधर्मो भगवद्भिः स्ववशः स्वाधीनः–स्वात्मसात् कृतोऽस्ति, धर्मस्य स्ववशीकरणभावः साध्योऽस्ति, यतः, तत्र विधिसमासादनं हेतुरस्ति = विधिनैवैष धर्मं समासादितोऽस्ति तथा च यथा न्यायेनाऽऽसादितं धनं स्ववशं भवति, तथा भगवद्भिः, विधिनैव सम्पादित एष धर्मोऽवश्यं स्ववश्यो भवति, धर्मस्य स्ववशीकरणे कारणं विधिसमासादनं, अर्थाद् धर्मस्य स्ववशीकरणभावरूपसाध्यसिद्धौ प्रथमो हेतुरस्ति,

(२) यथा प्रथमं साधनं धर्मस्य स्ववशीकरणं 'विधिसमासादन' मस्ति तथा धर्मस्य स्वाधीनकरणे द्वितीयं साधनं धर्मस्य 'निरतिचारपालन' तथाहि = भगवद्भिः, अतिचारं (अतिक्रम–व्यतिक्रम–अतिचारादिरूपं दोषं) विना धर्मः पालितो भवति, अत एव धर्मः स्वाधीनो भवति, धर्मस्य स्वायत्तीकरणे द्वितीयं साधनं सर्वथा निरतिचारतया धर्मस्य पालनमर्थाद् धर्मस्य स्ववशीकरणभावरूपसाध्यसिद्धौ द्वितीय एष हेतुर्ज्ञेयः,

(३) यथा धर्मस्य स्ववशीकरणे 'विधिसमासादननिरतिचारपालने' द्वे कारणे स्तः, तथा धर्मस्य स्ववशीकरणे तृतीयं कारणं धर्मस्य 'यथोचितदानं' अस्ति, तथाहि =

भगवद्भिर्योग्यताऽनुसारेण यथाभव्यं धर्मस्य दानं दत्तमस्ति, अर्थाद् यद्वस्तुनो यः स्वामी भवेत्, तेनैव तस्य दानं जगति सुप्रसिद्धं वर्त्तते, तत्त्वतः धर्मस्य यथोचितदानेनैव 'धर्मः स्ववशो' वर्त्तते इति सिद्धं, अर्थात् प्रकृतधर्मस्य वशीकरणभावरूपसाध्यसिद्धौ 'धर्मस्य यथोचितदानं' एष तृतीयो हेतुः,

(४) दत्तश्च यथाभव्यं, तथा तत्रापेक्षाऽभावेन नामीषां दाने वचनाऽपेक्षा = यथा 'विधिसमासादन–निरतिचारतया पालन–यथोचितदानानि त्रीणि धर्मस्य स्ववशीकरणे कारणानि सन्ति, तथा 'धर्मस्य स्वात्मसात्करणे' चतुर्थं कारणं, धर्मस्य दानविषये भगवतोऽन्येषां वचनस्य, अपेक्षा (आज्ञा) या अभावो वर्त्तते, तथाहि = अन्ये मुनयो धर्मदाने गुरुप्रभृतीनामन्येषां वचनरूपाज्ञाया अपेक्षां रक्षन्ति, तथा भगवन्तो यथाभव्यं योग्यताऽनुसारेण धर्मस्य दानेऽन्येषां वचनरूपामाज्ञां नाऽपेक्षन्ते, तथा च धर्मस्य दानेऽन्येषां वचनरूपाज्ञाऽपेक्षाया अभावेन भगवन्तो धर्मदाने स्वतन्त्राः सन्ति स्वतन्त्रतया धर्मदानेनैव 'धर्मं स्ववशः' इति सिद्धिर्भवति, अर्थात् प्रकृतधर्मस्ववशीकरणभावरूपसाध्यसिद्धौ 'यथोचितधर्मदानविषये वचनरूपाज्ञाऽपेक्षाऽभावरूपस्वातन्त्र्यमस्ति' इति चतुर्थो हेतुर्ज्ञेयः,

प्रतिहेतुचतुष्टयपूर्वकं 'धर्मोत्तमाऽवाप्ति' रूप द्वितीयमूलहेतो र्विवेचनम्– यथा भगवन्तो धर्मवशीकारका, अतो धर्मनायका एवं धर्मोत्तमस्य (उत्तमधर्मस्य) अवाप्तिमन्तो 'धर्मनायकाः' तथाहि भगवन्तो (पक्षः) धर्मोत्तमावाप्तिमन्तः सन्ति (उत्तमधर्मावाप्तिरत्र साध्यं) यतः —

(१) प्रधानक्षायिकधर्माऽवाप्त्या तीर्थकरत्वात प्रधानोऽयं भगवतां, अर्थात् तीर्थंकरत्वहेतुनाऽस्य क्षायिकधर्मस्य प्राधान्यं–(स्वातन्त्र्यं) नान्येषां अन्ये केवलिनः तीर्थंकराणां वचनमालम्ब्य क्षायिकधर्मप्राप्तिमन्तो भवन्ति, तीर्थंकरत्वहेतुना, तीर्थंकरीयक्षायिकधर्मः, अन्येषां क्षायिकधर्मप्राप्तौ परमालम्बनभूतोऽस्ति. आकाशवत्, यथाऽऽकाशं सर्वेषामाधारो भवति, आकाशस्य कोऽप्याश्रयो न, तथाऽत्र ज्ञेयम् ।

(२) यथा भगवतां धर्मोत्तमरूपसाध्यं प्रति 'प्रधानक्षायिकधर्माऽवाप्तिः, हेतुरस्ति, तथा परार्थसम्पादनेन सत्त्वार्थकरणशीलतया,' परार्थसम्पादनरूपो हेतुरस्ति, तथाहि = भगवन्तोऽर्हन्तः परोपकारव्यसनिनः, अतः सत्त्वमात्रहितकरणप्रकृतयोऽस्तः परार्थं

सम्पादयन्ति, अर्थात् परोपकारसम्पादनहेतुना 'धर्मोत्तमाऽवाप्तिरूपसाध्यस्याश्रयभूता अर्हन्तो भवन्तीति सिद्धम्, ये धर्मोत्तमाऽवाप्तिसम्पन्नास्तेऽवश्यं परार्थघटका एव' अस्मात् कारणात् परार्थसम्पादनमुद्रया धर्मोत्तमाऽवाप्तिसम्पन्नता निश्चीयते ।

(३) एवं हीनेऽपि प्रवृत्तेः, अश्वबोधाय गमनाकर्णनात् ।

यथा भगवतां धर्मोत्तमाऽवाप्तिरूपसाध्यं प्रति प्रधानक्षायिकधर्मावाप्तिः परार्थ-सम्पादनं च हेतू भवतस्तथा हीनेऽपि (मनुष्यादिभिन्नतिर्यगादावपि) भगवतां परार्थ-संपादानरूपप्रवृत्तेः, हीनं प्रत्यपि मनुष्यादिभिन्नजातिमन्तं प्रत्यपि परार्थसंपादनप्रवृत्तिरूप-हेतुना धर्मोत्तमाऽवाप्तिरूपसाध्यस्याधिकरणभूता भगवन्तः सन्ति एवं सिद्धमेव, यथा शास्त्रे श्रूयते चाश्वस्य प्रतिबोधाय श्रीमान् भगवान् मुनिसुव्रतस्वामी भृगुकच्छपुरे समाजगाम, ।

(४) तथा तथाभव्यत्वयोगात्, अत्युदारमेतेषाम् =

यथा भगवतां धर्मोत्तमाऽवाप्तिरूपसाध्यं प्रति 'प्रधानभूतक्षायिकधर्मप्राप्तिः, परार्थ-संपादनं, हीनेऽपि परार्थसंपादनार्थकप्रवृत्तिः,' साधनानि सन्ति तथा 'तथाभव्यत्वयोगः' साधनं तथाहि = एतेषामर्हतामत्यन्तमुदारं (सत्त्वमात्रं प्रति हिताशय–दान-परोपकारवि-शिष्टं) तथाभव्यत्वं विद्यते (भव्यत्वं सर्वात्मसमानं परन्तु प्रत्येकभव्यात्मनां मुक्तिः समान-सामग्रीतो न भवति ततः प्रत्येकात्मनां ' 'तथाभव्यत्वं' भिन्नभिन्नप्रकारकं मन्तव्यं तथापि श्रीमदर्हतां 'सहजतथाभव्यत्वं' सर्वेभ्योऽत्यन्तमुदारमस्ति) तद्योगरूपहेतुना धर्मोत्तमावाप्तिसाध्याधिकरणा भगवन्तो भवन्तीति सिद्धम् ।

प्रतिहेतुचतुष्कनिरूपणपूर्वकस्य 'धर्मफलपरिभोग' रूपतृतीयमूलहेतो र्भव्यमीमांसा—

यथा भगवन्तो धर्मवशकारा अतो धर्मनायकाः, धर्मोत्तमावाप्तिमन्तोऽतो धर्मनायकाः तथा 'तत्फलपरिभोगयुक्ता'—धर्मस्य सर्वोत्कृष्टं फलं तीर्थंकरपदादि, तत्परि-भोगयुक्ता अतोऽर्हन्तो धर्मनायका भवन्ति, तथाहि = भगवन्तो (पक्षः) धर्मफलपरिभोग-युक्ता (धर्मफलपरिभोगोऽत्र साध्यम्) यतः

~~(१)~~ सकलसौन्दर्यं (साकल्येन रमणीयता 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' 'अनुपमलावण्यमनोहरता' 'मुक्ताफलेषु छायायास्तरलत्वमिवाऽन्तरा, प्रति-भाति यदङ्गेषु तल्लावण्यमिहोच्यते' अपूर्वानिमेषत्वेन नयनाऽतृप्तिकारकत्वेन दर्शनरुच्यता,

अलौकिककमनीयकान्तिविशिष्टता) एतत् प्रथमं साधनं, एवमेतत्साधनद्वारा भगवन्तः, धर्मफलपरिभोगरूपसाध्यावच्छिन्ना इति सिद्धं भवति ।

(२) यथा भगवन्तो धर्मफलपरिभोगसाध्यं प्रति सकलसौन्दर्यं हेतुस्तथा प्रातिहार्ययोगरूपो द्वितीयो हेतुः, एततसाधनं-प्रातिहार्ययोगसाधनं, अर्हतामेव नान्येषामर्थाद्, अर्हद्भिन्नेष्वन्येषु प्रातिहार्ययोगस्य सर्वथाऽयोगः, प्रातिहार्ययोगरूपसाधनेनाऽर्हन्तो भगवन्तो धर्मफलपरिभोगरूपसाध्याश्रयभूता इति सिद्धं ।

"अशोकवृक्षः सुरपुष्पवृष्टि र्दिव्यध्वनिश्चामरमासनं च ।
भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम् ।।"

(३) यथा भगवतां 'धर्मफलपरिभोग'रूपसाध्यं प्रति 'सकलसौन्दर्यं' प्रातिहार्ययोगः साधनं' तथा तृतीयं–उदार–ऋद्धि (समृद्धि) संपदामनुभूतिः साधनं ज्ञेयं तथाहि = संपूर्णपुण्यपुंजजन्येयमुदारसमृद्धेरनुभूतिः (सहजातिशयचतुष्टयं घातिकर्मक्षयजन्या एकादशातिशया, देवकृता एकोनविंशतिरतिशया एवं चतुस्त्रिंशदतिशयरूपमहोदारसमृद्धिपरिभोगविशिष्टास्तीर्थंकराः समग्रपुण्यपुंजमूर्त्तयो भवन्ति) अर्थादुदारसमृद्धेरनुभवरूपसाधनेन, अर्हन्तः परात्मानः 'धर्मफलपरिभोग' रूपसाध्याधारभूता इति सिद्धम् ।

(४) तथा तदाधिपत्यतो भावात्, न देवानां स्वातन्त्र्येण ।

यथा भगवतां धर्मफलपरिभोगरूपसाध्यं प्रति "सकलसौन्दर्यं, प्रातिहार्ययोगः, उदारर्द्धि–समृद्धिरनुभूतिः साधनानि सन्ति तथा तदाधिपत्यभावः साधनमस्ति, तथाहि = भगवन्त एव उदारर्द्धिजनकसंपूर्णपुण्यरूपधर्मस्य वोदारर्द्धि–समृद्धे–रधिपतयः सन्ति, भगवत्स्वेवाधिपतिषु, इयमुदारर्द्धिरुत्पद्यते, अतिशयरूपसमृद्धिकर्त्तृषु, अपि देवेषूदारर्द्धिर्नोत्पद्यते-देवानां स्वातन्त्र्येणोदारर्द्धेराधिपत्याभावः कथ्यते तथा च तीर्थंकरेषु, एवोदारर्द्धेराधिपत्यमुत्पद्यतेऽतस्तदाधिपत्यभावसाधनेनैव भगवन्तो धर्मफलपरिभोगरूपसाध्यसंपन्ना इति सिद्धम् ।

प्रतिहेतुचतुष्टयप्ररूपणापूर्वकं 'धर्मविघातरहितत्वरूपचतुर्थेन मूलहेतुना 'धर्मनायकत्व' रूपं मौलिकं साध्यं साधयति —

एव–भगवान् धर्मवशकारकोऽतो धर्मनायकः, धर्मोत्तमाऽवाप्तिमान् अतो धर्म-

नायक:, धर्मफलपरिभोगकारी अतो धर्मनायक:, तथा 'धर्मविघातरहित:' अतः धर्मनायकोऽस्ति तथाहि =

(१) भगवन्त: (पक्षः) धर्मविघातरहिता: (अत्र धर्मविघात(का)भावः साध्य धर्मध्वंसाऽप्रतियोगित्वं) यतो भगवन्तो, अवन्ध्य (अमोघ) पुण्यनामकधर्मबीज-(मूल—आदिकारण) रूपा: कथमितिचेत्कथ्यते, एतेषां भगवतां स्वाश्रयद्वारा—स्वरूपाधारेण पुष्ट (वृद्ध) मेतत्पुण्यमस्ति, अर्थाद-(स्वाश्रयरूपपोषकपुष्टत्वेन, तीर्थंकरत्वफलत्वेनावन्ध्य) वन्ध्यपुण्यबीजत्वरूपहेतुना धर्मविघात—विध्वंसस्य (धर्मप्रतिबन्धकतत्त्वस्य वा)आत्यन्तिकाभावरूपसाध्यविशिष्टा अर्हन्त इति सिद्धम् ।

(२) यथा धर्मविघाताऽत्यन्ताभावरूपसाध्यसाधकावन्ध्यपुण्यबीजत्वं हेतुरस्ति तथा अधिकानुपपत्तिरूपहेतुरस्ति' अधिकपुण्यस्य योगाभावोऽस्ति, तथाहि = (अधिकपुण्यसंभवे हि इतरर्द्धिर्हन्यते, अधिकपुण्याऽसंभवत: प्रभुरूपेत्तरर्द्धिर्न हन्यते, इत्यर्थ:) तीर्थंकरगत-पुण्यलक्षणो धर्मो तदैवाऽभिभूत: स्याद् यदा तीर्थंकरगतपुण्यतोऽधिकं (अतिशायि) पुण्यं, अन्यव्यक्तौ भवेत् परन्तु अन्यसर्वव्यक्तिषु तीर्थंकरस्य पुण्यतोऽधिकं पुण्यं नास्त्येव, अर्थात् तीर्थंकरगतपुण्यलक्षणो धर्म, केनचिदपि कदाचिदपि कुत्रचिदपि न विहन्यते, तथाचाधिकपुण्यानुपपत्तिरूपसाधनेन धर्मविघाताऽभावरूपसाध्यं सिद्धयति, एवं च तीर्थंकरनामकर्मनामकमहापुण्यतोऽधिकपुण्यस्याऽन्यत्र सर्वत्राऽभावेन, तीर्थंकरेषु सद्भावेन, धर्म- विघाताऽभाववन्तो भगवन्तो विद्यन्त एव इति सिद्धम् ।

(३) यथा 'धर्मविघाताऽत्यन्ताभावरूपसाध्यं प्रति 'अवन्ध्यबीजत्वं, अधिकानुपपत्तिः' तथा 'पापक्षयभावात्' निर्दग्धमेतत्, पापक्षयभावस्तृतीयं साधनमस्ति, तथाहि = धर्मविघातकपापपुञ्ज: सर्वथा भगवद्भिः निर्दग्धोऽस्ति, अत एव पापक्षयभावरूपसाधनेन भगवन्त: धर्मविघात (क)—प्रतिबन्धकशून्यताविशिष्टा इति प्रमाणितमेव ।

(४) यथा धर्मविघाताभावरूपसाध्यं प्रति 'अवन्ध्यपुण्यबीजत्वं, अधिकानुपपत्ति:, पापक्षयभावः साधनानि सन्ति' तथाऽहेतुकविघातासिद्धिः चतुर्थो हेतुरस्ति. तथाहि = धर्मविघात (क) हेतूनां सर्वथा योगाऽभावोऽस्ति. अर्थाद् धर्मविघातकारकहेतूनामात्यन्तिकासिद्धि (सर्वथाऽभावः) भवति, अतो नित्यसत्त्वादिभावेन नित्यधर्मविघातरहिताः सन्ति भगवन्त:,

(विघातं प्रति न कोऽपि हेतुरस्ति अतो विघाताऽसम्भवेन सहजत्वेन स्वतः सदा—नित्यधर्मसत्तावन्तोऽर्हन्तः)

("नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥" यस्य वस्तुनः किंचिदपि कारणं नास्ति, तस्य स्थितिद्वयम् ,एकस्थितिः—नित्यमस्तित्वं तस्य, यथाऽस्माकमेष आत्मा, अनादितोऽस्ति, अनन्तं कालं यावदस्तित्वं तस्य. अथवा निर्हेतुकवस्तुनो नित्यमसत्त्वं, यथाऽऽकाशपुष्पं, शशशृङ्गं, एतदर्थे किमपि कारणं नास्ति, जगति तादृशवस्तु कुत्रचिन्न लभ्यते. एवं च यद्वस्तु, कदाचिदपि भवति, कदाचिन्न भवति तद्वस्तु, कारणजन्यं (कादाचित्कं) यथा घटः कदाचिद् भवति, कदाचिन्न भवति, ततः कारणजन्यं (सहेतुकं) कथ्यते, यन्निर्हेतुकं वस्तु भवति, तेन तु नित्येन भवनीयं, यतस्तस्य स्वाऽस्तित्वे कस्याऽपि वस्तुनोऽपेक्षा नास्ति, अथवा यस्याऽभावे तद्वस्तुनिवृत्तिः, अथवा, एतस्य निष्कारणस्य कदाचिदपि, अस्तित्वं न भवेत्. इदमत्र हृदयम् = तीर्थंकरगतधर्मं प्रति कश्चिदपि विघातको हेतु र्नास्ति, अर्थाद् विघातककारणमात्रशून्यता, अत एव विघातककारणमात्रशून्यो जिनेश्वरगतधर्मः, सदाऽस्तित्ववान्, नित्यसत्त्वमते न कोऽपि बोधः, अथवा, आदिपदेन हेतुशून्यविघातः सर्वथाऽसिद्धः—नित्यअसत्त्ववान् = नित्याऽसन्निति विज्ञेयम्) तथा च निर्हेतुकविघातासिद्धिरूपसाधनेन भगवन्तो धर्मविघातरहिता एवैवं निश्चितं मन्यते, एवं च धर्मवशकारका अतः, धर्मोत्तमाऽवाप्तिमन्तः, अतः, धर्मफलपरिभोगयुक्ता अतः, धर्मविघातरहिता अतोऽर्हन्तो भगवन्तो धर्मनायकाः — धर्मस्य स्वामिन—उच्यन्ते,

इति—एवं शक्रस्तवस्य 'धर्मनायक'रूपस्य द्वाविंशतितमपदस्य व्याख्या समाप्ता ।

अथ शक्रस्तवस्य 'धर्मसारथि' रूपस्य त्रयोविंशतितमपदस्य विशिष्ट व्याख्यानारम्भः—

**तथा—'धम्मसारहीणं' इहापि धर्मोऽधिकृत एव, तस्य स्वपरापेक्षया सम्यक् प्रवर्त्तनपालनदमनयोगतः सारथित्वं, तद्यथा—सम्यक्प्रवर्त्तनयोगेन परिपाकापेक्षणात् प्रवर्त्तकज्ञानसिद्धेः १ ।**

**अपुनर्बन्धकत्वात् प्रकृत्याभिमुख्योपपत्तेस्तथा गाम्भीर्ययोगात् साधुसहकारिप्राप्तेरनुबन्धप्रधानत्वात् अतीचारभीरुत्वोपपत्तेः २ ।**

**एतेन पालनाऽयोगः प्रत्युक्तः, सम्यक्प्रवर्त्तनस्य निर्वहणफलत्वात्, नान्यथा सम्यक्त्वमिति समयविदः । एवं दमनयोगेन, दान्तो ह्येवं धर्म्मः कर्म्मवशितया कृतोऽव्यभिचारी, अनिवर्त्तकभावेन–नियुक्तस्वकार्ये स्वाङ्गोपचयकारितया नीतः स्वात्मीभावं, तत्प्रकर्षस्यात्मरूपत्वेन । भावधर्म्माप्तौ हि भवत्येवैतदेवं, तदाद्यस्थानस्याप्येवंप्रवृत्तेरवन्ध्यबीजत्वात्,**

**सुसंवृतकांचनरत्नकरण्डकप्राप्तितुल्या हि प्रथमधर्मस्थानप्राप्तिरित्यन्यैरप्यभ्युपगमात्, तदेवं धर्म्मस्य सारथयो धर्म्मसारथयः २३ ॥**

पं. – "इहापीत्यादि" इहापि न केवलं पूर्वसूत्रे, "धर्मोऽधिकृत एव" चारित्रधर्म्म इत्यर्थः, "तस्य" रथस्येव "स्वपरापेक्षया" स्वस्मिन्परस्मिंश्चेत्यर्थः, "प्रवर्त्तनपालनदमनयोगतः" हेतुत्रितयतया साधयिष्यमाणात्, "सारथित्वं" रथप्रवर्त्तकत्वं, तदेव तद्यथेत्यादिना भावयति, तत्सारथित्वं यथा भवति तथा प्रतिपाद्यत इत्यर्थः, "सम्यक्प्रवर्त्तनयोगेन" अवन्ध्यमूलारम्भव्यापारेण धर्म्मसारथित्वमिति संटङ्कः, एषोऽपि कुत इत्याह–"परिपाकापेक्षणात्" परिपाकस्य–प्रकर्षपर्यन्तलक्षणस्यापेक्षणात्-साध्यत्वेनाऽऽश्रयणात्, एतदपि कुत इत्याह–"प्रवर्त्तकज्ञानसिद्धेः" अर्थित्वगर्भप्रवृत्तिफलस्य ज्ञानस्य भावात्, प्रदर्शकाद्यन्यज्ञानेन प्रवृत्तेरयोगात्, साऽपि कथमित्याह—

"अपुनर्बन्धकत्वात्" पापं न तीव्रभावात्करोतीत्यादिलक्षणोऽपुनर्बन्धकस्तद्भावात्, तदपि कथमित्याह–"प्रकृत्याभिमुख्योपपत्तेः" प्रकृत्या-तथाभव्यत्वपरिपाकेन स्वभावभूतया धर्म्मं प्रति प्रशंसादिनाऽनुकूलभावघटनात्, तथाशब्दः सम्यक्प्रवर्त्तनयोगस्यैव प्रथमहेतोः सिद्धये परस्परापेक्षवक्ष्यमाणहेत्वन्तरचतुष्टयसमुच्चयार्थः, "तथागाम्भीर्ययोगाच्च" सम्यक् (प्र) वर्त्तनयोगो गाम्भीर्यं चास्याचिन्त्यत्रिभुवनातिशायिकल्याणहेतुशक्तिसम्पन्नता, एतदपि कुत इत्याह—"साधुसहकारिप्राप्तेः" फलाव्यभिचारिचारुगुर्वादिसहकारिलाभात्, इयमपि कथमित्याह—"अनुबन्धप्रधानत्वात्" निरनुबन्धस्योक्तसहकारिप्राप्त्यभावात्, तदपि कथमित्याह—"अतिचारभीरुत्वोपपत्तेः" अतिचारोपहतस्यानुबन्धाभावात् । इत्थं प्रथमहेतुसिद्धिमभिधाय द्वितीयसिद्ध्यर्थमाह—

"एतेन" सम्यक्प्रवर्त्तनयोगसाधनेन, किमित्याह—"पालनायोगः" पालनस्यायोगः—अघटनं "प्रत्युक्तो" निराकृतः, कुत इत्याह—"सम्यक्प्रवर्त्तनस्य" उक्तरूपस्य "निर्वहणफलत्वात्" पालनफलत्वाद्, अथ कथमयं नियमो यदुत-पालनफलमेव सम्यक्प्रवर्तनमित्याह–"न" नैव "अन्यथा" पालनाभावे "सम्यक्त्वं" सम्यग्भावः प्रवर्त्तनस्य, "इति" एवं "समयविदः" प्रवचनवेदिनो वदन्ति । अथ तृतीयहेतुसिद्धिमाह–"एवमिति" यथा सम्यक्प्रवर्त्तनपालनाख्यहेतुद्वयाद्धर्म्मसारथित्वं तथा दमनयोगेनापीत्यर्थो, "दमनयोगेन" सर्वथा स्वायत्तीकरणेन । अमुमेव साधयन्नाह—"दान्तो" वशीकृतो "हिः" स्फुटम् "एवं" वक्ष्यमाणेन, अव्यभिचारीकरणस्वकार्यनियोगस्वात्मीभावनयनरूपप्रकारत्रयेण, धर्म्मः कयेत्याह—"कर्म्मवशितया" कर्म्म–चारित्रमोहादि, वशि–वश्यमबाधकत्वेन येषां ते तथा तद्भावस्तत्ता तया,

तदेव प्रकारत्रममाह—"कृतो" विहितः "अव्यभिचारी" अविसंवादकः, कथमित्याह—"अनिवर्त्तक-भावेन" आफलप्राप्तेरनुपरमस्वभावेन "नियुक्तो" व्यापारितः

"स्वकार्ये" कृत्स्नकर्म्मक्षयलक्षणे, कयेत्याह—"स्वाङ्गोपचयकारितया" स्वाङ्गानां–मनुजत्वार्यदेशोत्पन्नत्वादीनामधिकृतधर्म्मलाभहेतूनामुपचयः–प्रकर्षः तत्कारितया "नीतः" प्रापित : "स्वात्मीभावं" निजस्वभावरूपं, कथमित्याह—"तत्प्रकर्षस्य" धर्म्मप्रकर्षस्य यथाख्यातचारित्रतया "आत्मरूपत्वेन" जीवस्वभावत्वेन । आह–इत्थं धर्म्मसारथित्वभवने को हेतुरित्याह—"भावधर्म्माप्तौ" क्षायोपशमिकादिधर्म्मलाभे "हिः" स्फुटं "भवत्येव" न न भवति, "एतत्" धर्म्मसारथित्वम् "एवं" सम्यक्प्रवर्त्तनयोगादिप्रकारेण, कुत इत्याह—"तदाद्यस्थानस्यापि" धर्म्मप्रशंसादिकालभाविनो धर्म्मविशेषस्यापि, किं पुनर्वरबोधेः प्राप्तौ ? "एवंप्रवृत्तः" धर्म्मस्यस्वीकरणेन भगवतां प्रवृत्तेः, कुत इत्याह—"अवन्ध्यबीजत्वाद्" अनुपहतशक्तिकारणत्वाद्धर्म्मसारथित्वं प्रति, न हि सर्वथा कारणेऽसत्कार्यमुत्पद्यत इति वस्तुव्यवस्था, परमतेनापि समर्थयन्नाह—

"सुसंवृतेत्यादि" सुसंवृतः–सर्वथाऽनुद्घाटितः कांचनस्य रत्नानां च यः करण्डको-भाजनविशेषः तत्प्राप्तितुल्या हिः—यस्मात्प्रथमधर्म्मस्थानप्राप्तिः–धर्म्मप्रशंसादिरूपा, यथा हि कश्चित्क्वचिदनुद्घाटितं कांचनरत्नकरण्डकमवाप्नुवंस्तदन्तर्गतं कांचनादि वस्तु विशेषतोऽनवबुध्यमानोऽपि लभते, एवं भगवन्तोऽपि प्रथमधर्म्मस्थानावाप्तौ मोक्षावसानां कल्याणसम्पदं तदाऽनवबोधेऽपि लभन्ते एव, तदवन्ध्यहेतुकत्वात्तस्याः, "इति" इत्येवम् "अन्यैरपि" बौद्धैरभ्युपगमात्,

**टी. :–** यथा भगवन्तः 'धर्मदा–धर्मदेशका–धर्मनायकास्तथा धर्मसारथयो भवन्ति,' अर्थाद् धर्मसारथिभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः ।

अत्र 'धर्मसारथि' पदघटितधर्मपदेन, पूर्वसूत्रवद् अधिकृतचारित्रधर्म एव ग्राह्यः ।

तथा च चारित्रधर्मरूपरथस्य स्वपरापेक्षया सम्यक्प्रवर्त्तन–पालन–दमन–योगतः सारथित्वं । (यथा सुकुशलः सारथी रथं च रथवाहकानश्वान् तथा प्रवर्त्तयति, यथा तुरङ्गाणां रथस्याऽपि नापायो (हानिः) भवति. एवं जिनोत्तमैरपि उत्सर्गापवाद-प्रमुखयुक्तिभिः, धर्मस्य धर्मिणामेकान्तहितो धर्म उपदिष्टः, अत्र धर्मस्थाने रथः, तुरंगमस्थाने तस्य रथस्य धारकाः पुरुषा ज्ञेयाः, उभयहितं–रथरथधारकोभयहितमुपदिशन्तो जिननाथा धर्मसारथयो ज्ञेयाः । श्री. दे. चैत्य. श्री. धर्म. संघाचारविधितोऽर्थो गृहीतः) चारित्ररूपधर्मस्य स्व–आत्मनः, परस्य स्वभिन्नस्याऽऽत्मनः, अर्थात् स्वपरापेक्षया–स्वं परं चापेक्ष्य सम्यक् प्रवर्त्तनं–सम्यक्पालनं, सम्यग्दमनं तस्य सम्बन्धतः सारथित्वमित्यर्थः ।

(सम्यक्प्रवर्त्तनं–'प्रवृत्त्युत्पत्तावयं क्रमः– प्रथमतः फलज्ञानं, ततः फलेच्छा, तत इष्टसाधनताज्ञानं । तत उपायेच्छा, ततः प्रवृत्तिरुत्पद्यते इति' प्रवर्त्तनं = प्रवृत्ति-

हेतुत्वम्, प्रवृत्त्यनुकूलव्यापारविशेषप्रवर्त्तयितुः, यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं तत् । अत्र यत्पदार्थइष्टसाधनत्वम् । तथा च इष्टसाधनत्वस्य ज्ञानं प्रवृत्तिं जनयतीष्टसाधनत्वं प्रवर्त्तनं भवतीति ज्ञेयम् )

— क्रमशो भगवत्सु धर्मरूपरथस्य सारथित्वसिद्धौ हेतुत्रयी दर्श्यते —

(१) सम्यक्प्रवर्त्तनयोगरूपहेतुना धर्मसारथित्वरूपसाध्यस्य सिद्धिः, तद्यथा सम्यक्प्रवर्त्तनयोगेन परिपाकापेक्षणात् प्रवर्त्तकज्ञाने सिद्धे, अपुनर्बन्धकत्वात् प्रकृत्याभिमुख्योपपत्तेः ।

(१) सम्यक्प्रवर्त्तनयोगेनेति = अवन्ध्यमूलारम्भव्यापारेण— प्रकृतधर्मसम्बन्धकावन्ध्यया—सफलयाऽऽद्योद्यमोत्पादनक्रियया धर्मसारथित्वं स्वपरनिष्ठधर्मापेक्षया सम्यक्प्रवर्त्तनयोगेन धर्मसारथित्वं ।

सम्यक्प्रवर्त्तनयोगः— स्वपरापेक्षया—सफलारम्भव्यापारः कुतः ? इति चेत् कथ्यते ।

(तथाभव्यत्वपरिपाकाऽभिन्नस्वभावभूत—प्रकृति—जन्य- धर्मविषयक—प्रशंसाऽऽदिरूप धर्मबीजकारणस्य सत्ताऽस्ति, अतोऽपुनर्बन्धकेषु, अपुनर्बन्धकत्वसत्ता घटते, पुनर्बन्धकेषु तु तथाभव्यत्वपरिपाकाभावात्, धर्मप्रशंसादिरूपधर्मबीजस्य सत्ता नास्ति,)

प्रकर्षपर्यन्तलक्षणस्य परिपाकस्यापेक्षणात् साध्यत्वेनाऽऽश्रयणात्,

(२) अत एव—अपुनर्बन्धकेषु, अपुनर्बन्धकत्वं—पापं न तीव्रभावात् करोतीत्यादिकलक्षणं कथितमस्ति.

(३) परिपाकापेक्षणं कुत ? इति चेत्कथ्यते अर्थित्वगर्भप्रवृत्तिफलस्य ज्ञानस्य भावात्—(उत्पादनात् संपादनात्) प्रदर्शकाद्यन्यज्ञानेन प्रवृत्तेरयोगात् ।

अर्थात् तदिच्छामूलकप्रवृत्तिरूपफलजनकस्य ज्ञानस्योत्पादनं (संपादनं) प्रवर्त्तकज्ञान—सिद्धिं प्रति यथाख्यातचारित्ररूप—धर्मप्रकर्षपर्यन्तरूपपरिपाकस्यापेक्षासाध्यत्वेनाश्रयणरूपापेक्षा (साध्यविषयकेच्छा) कारणं भवति, अर्थात् परिपाकापेक्षारूपकार्यं, प्रवर्त्तकज्ञानसिद्धिकारणेन भवति, (प्रवर्त्तकज्ञानभिन्नदीपकसम्यक्त्ववत् प्रदर्शकादि-रूपान्यज्ञानं प्रवृत्ति—प्रतिबन्धकं भवति प्रवर्त्तक—ज्ञानमेव, अर्थित्वमूलकप्रवृत्तिरूपं फलं जनयत्येव)

परिपाकापेक्षारूपकारणेन, सम्यक्प्रवर्त्तनयोगः—सफलाऽऽद्योद्यमोत्पादन—क्रियारूपाऽवन्ध्यमूलारम्भव्यापाररूपसम्यक्प्रवर्त्तनयोगरूपं कार्यं भवति. अर्थात् सम्यक्प्रवर्त्तनयोग—रूपं कार्यं प्रति परिपाकाऽपेक्षा कारणम्, परिपाकापेक्षारूपकार्यं प्रति प्रवर्त्तकज्ञान सिद्धिः कारणमिति कार्यकारणभावो विज्ञेयः । (सम्यक्प्रवर्त्तनयोगिनि भगवति) सा, प्रवर्त्तकज्ञान—सिद्धिस्तु तथाभव्यत्वपरिपाकजन्यस्वभावभूतप्रकृतिद्वारा धर्म्मं प्रति धर्मप्रशंसादि—बीजाधानादि—हेतो र्जनकत्वं घटतेऽतः, अपुनर्बन्धकत्वमर्थात् पापं न तीव्रभावात् करोतीत्यादिलक्षणोऽपुनर्बन्धकः, तस्य भावोऽपुनर्बन्धकत्वं तत्राऽस्ति, तस्मात्कारणात् प्रवर्त्तकज्ञानसिद्धिः, तथाशब्दः—सम्यक्प्रवर्तनयोगस्यैव धर्मसारथित्वसाध्यसाधकस्य प्रथमहेतोः सिद्धये परस्परापेक्षवक्ष्यमाण—हेत्वन्तर—चतुष्टयसमुच्चयार्थ :—

सम्यक्प्रवर्त्तनयोगस्य प्रथमहेतोः साधकाश्चत्वारो हेतवः —

(१) गाम्भीर्ययोगहेतुजन्यः सम्यक्प्रवर्त्तनयोगस्तथाहि सम्यक्प्रवर्त्तनयोग-(गि)स्य(नः) गाम्भीर्यमर्थाद्, अचिन्त्य (कल्पनाऽतीत) त्रिभुवनातिशायि (महिमशालि) यत् कल्याणं तत्कारकरूपहेतुशक्तिसंपन्नता (शक्तिरेव),

(२) शक्तिविशेषगाम्भीर्ययोगः, साधुसहकारिलाभतो भवति—तथाहि फलाव्यभिचारि (फलाऽविसंवादि—फलावंचक) स्वविशिष्टा ये चारवो गुरवः—सुगुरवः, आदि र्येषां ते सहकारिणः—निमित्तकारणविशेषाः (आदिपदेनाऽत्र, शुभगुरुवचनागमाराधनादि ज्ञेयः) गाम्भीर्ययोगकार्यं प्रति फलावंचकसुसाधुसहकारिलाभः कारणम् ।

साधुसहकारिप्राप्तिस्तु, अनुबन्धप्रधानत्वविशिष्टा (जन्या)—तथाहि साधुसहकारिप्राप्तिरनुबन्धप्रधानत्वेन भवति,

(३)अनुबन्धप्रधानत्वमत्र-चारित्रविषयकधर्मसाधना (धर्म-पुण्यादिविषयकसाधना) या, एवं च तथाभव्यत्वपरिपाकरूपप्रकृतिजन्य—धर्मप्रशंसादिधर्मबीजरूपकारणस्य सत्ताऽस्ति, अतोऽपुनर्बन्धकत्वमस्ति, अतः प्रवर्त्तक — स्वपरापेक्षया प्रवृत्ति—प्रथमान्तिमपर्यन्तप्रवृत्तिकारकज्ञानस्य सिद्धिरस्ति, अत एव यथाख्यातचारित्र रूपोत्कृष्टसाध्यस्यापेक्षाऽस्ति, अत एव चारित्रधर्मे स्वयं प्रवर्त्तते, परांश्च प्रवर्त्तयति, अर्थात् तेषां सम्यग्प्रवर्त्तने—आदिमारम्भतः प्रकर्षपर्यन्तसंनयनरूपधर्मव्यापारे पुष्टालम्बनभूता भगवन्त एवातो धर्मसारथित्वं भगवतां घटते ।

उत्तरोत्तरपरंपरापूर्वकाविच्छिन्नप्रवाहरूपानुबन्धप्रधानत्वविशिष्टसातत्यसाकल्यविशिष्टत्वेन साधुसहकारिलाभो भवति नान्यस्य निरनुबन्धस्याऽनुबन्धरहितस्य तु साधुसहकारिलाभो भवति,

कदाचिद् चारित्रादिधर्मो न भवेत्, कदाचिद् धर्मो न भवेत्, कादाचित्को धर्मो व्यवहितत्वेन खण्डितत्वेन साधुबन्धो न भवति, मध्ये मध्येखण्डितव्यवहितधर्मस्य पुरुषस्य शुभगुरुयोगो प्रगतिकरणे न भवति, अधुनातन काले दुर्लभता सुगुरो दृश्यते, तद्द्वारा लाभस्तु दूरे ।

अर्थात्, चारित्रादिधर्मस्यानुबन्धाभाववतः—निरनुबन्धचारित्रादिधर्मवतः, आत्मनः अवश्यफलजनकसुगुर्वादिसहकारिणां लाभो न संपद्यते, तथा च सानुबन्धचारित्रादिधर्मवत आत्मनोऽवश्यफलजनकसुगुर्वादीनां सहकारिकारणानां लाभः संपद्यते । साधुसहकारिप्राप्तिं प्रति अनुबन्धप्रधानचारित्रादिधर्मः कारणमस्ति ।

(४) अनुबन्धप्रधानता सानुबन्धचारित्रादिधर्मवत्ता तदा प्राप्यते यदा अतिचारभीरुतायाः प्राप्तिः स्यात्, अतिचारचारित्रधर्मादिविषयक-अतिक्रम–व्यतिक्रम–अतिचार नामकदोषतो मालिन्यतो रहितत्वं, सातिचारो धर्मो माऽभूदिति—परिणामकटुकताया विचारतो दोषो-मालिन्य जानतोऽजानतो माऽभूदिति भय—कंपः प्रकटं स्यात्तदाऽतिचारभयसिद्धिः, अतिचारभीरौ—निरतिचारचारित्रादिसंपन्ने महापुरुषेऽप्रमत्ते सानुबन्धचारित्रादिधर्मसंपन्नता गण्यते,

अतिचारैरुपहते प्रमादिनि निर्दय-निध्वंसपरिणामिनि निरनुबन्धता चारित्रादिधर्मादिविषयिणी मन्यतेऽतः साधुसहकारि-प्राप्तेरसंभवस्ततो गाम्भीर्ययोगाभाव एव अत एवैतत् सम्यक्प्रवर्त्तनयोगरूपप्रथमहेतुना धर्मसारथित्वरूपं साध्यं निश्चीयते ।

धर्मसारथित्वरूपसाध्यसाधकस्य सम्यक्पालनरूप-द्वितीयहेतो र्निरूपणम् —

एतत् सम्यक्प्रवर्त्तनयोगरूपसाधनस्य विशिष्टनिरूपणद्वारा पालनस्यायोगः—योगाभावः, प्रत्युक्तः-खण्डितः, अर्थात् पालनस्य योगाभावाभावः—पालनत्वं सिद्धमेव, यतः सम्यक्प्रवर्त्तन (सफलाद्यारम्भरूपव्यापार) स्यैकान्तिक-फलं पालनमस्ति, तथा च सम्यक्पालनरूपं "तथोपाये प्रवृत्तस्त्वं क्रियासमभिहारतः । यथाऽनिच्छन्नुपेयस्य

परां श्रियमशिश्रियः ।। वी. तृ. प्र. श्लो. १४" फलं प्रति सम्यक्प्रवर्त्तनं, फलोपधायकं-साक्षात्कारणमस्ति ।

अथ कथमयं नियमो यदुत—पालनफलमेव सम्यक्प्रवर्त्तनम् अर्थात् सम्यक-प्रवर्त्तनरूपकारणसत्तायां पालनरूपकार्यसत्तेति कथमिति चेत् कथ्यते पालनरूपफला-भावे—पालननिष्फलत्वे, प्रवर्त्तननिष्ठसम्यग्भावः (सफलजनकता) प्रवर्त्तनस्य न भवति. निष्फलपालनत्वेन प्रवर्त्तननिष्ठफलजनकत्वाभाव एवैवं प्रवचनवेदिनो वदन्ति. अथ च स्वपरापेक्षित—चारित्रधर्मविषयक—सम्यक्प्रवर्त्तनजन्यसम्यक्पालनरूपेण साधनेन भगवत्सु धर्मसारथित्वरूपं साध्यं प्रमाणितं भवति.

दमनयोगरूपेण तृतीयेन साधनेन भगवत्सु धर्मसारथित्वरूपसाध्यस्य सिद्धिः—

यथा धर्मसारथित्वरुपं साध्यं प्रति सम्यक्प्रवर्त्तनसम्यक्पालने द्वौ हेतू स्तः, तथा तृतीयो हेतुः सर्वथा स्वायत्तीकरणरुपदमनयोगो ज्ञेयः, तथाहि सत्यमिदं हि स्वायत्तीकरण (वशीकरणक्रिया) विषयभूतो धर्मः (चारित्रादिधर्मः) तदावरणीय—मोहादिकर्मणः स्वायत्तीकरणेन, अव्यभिचारीकरणं (फलसंवादः) स्वकार्यनियोगः (सकलकर्मक्षयरुप स्वकार्ये योजना) स्वात्मीभावनयनं (स्वस्वभावं प्रति नयनमित्येतत्) प्रकारत्रयावच्छिन्नत्वं ज्ञेयम्) तथाहि —

(१) कर्मवशितया—चारित्रमोहादिकं कर्म वश्यमबाधकत्वेन येषां ते कर्मवशिनः, तद्भावः कर्मवशिता, तया, भगवतां चारित्रमोहादिकर्मोपरि सत्ताङ्कुशरुपास्ति, भगवतामुपरि—चारित्रमोहादिकर्मसत्तायाः किंचिदपि न चलति, भगवतां पुरतश्चारित्रमोहादि-कर्माणि हतमर्माणि संजातानि यदा चारित्रमोहादिकर्माणि, अबाधकत्वेनायत्तानि (अधीनानि) भगवतां सन्ति, अत एव चारित्रादिधर्मः—कृतिविषयभूतः—विधानविषयभूतो धर्मः, नियताविसंवादि (अव्यभिचारि) फलजनकः, कथमिति चेत् कथ्यते —

फलप्राप्तिपर्यन्तं—यथाख्यातचारित्रप्राप्ति वा वीतरागताप्राप्तिपर्यन्तं,
निर्वृति—विराममप्राप्य दमनव्यापार—क्रियाविषयो धर्मो दान्तो भवति.

(२) स्वकार्ये स्वाङ्गोपचयकारितया नीतः स्वात्मीभावं = स्वरूपधर्मस्य सकल-कर्मक्षयकार्यविषये, अधिकृत (चारित्रादिधर्म) धर्मलाभं प्रति हेतुभूतानां स्वस्य

(धर्मस्य) अङ्गरूपाणां–मनुजत्वार्य देशोत्पन्नत्वादीनां य उपचय:–प्रकर्ष: (उत्कृष्टकोटि-कत्वं) तत्कारितया–तत्संपादकत्वेन रूपेण निजस्वभावरूपं–स्वात्मीभावं नीत:–प्रापित:, स्वात्मीभावे गमितोऽयं दान्तो धर्म:, कथमिति चेत् धर्मप्रकर्षस्य यथाख्यातचारित्रस्य-स्य (स्थिरतारूपेणात्मरमणतया) आत्मरूपत्वं कथ्यते ।

(३) ननु भगवतामित्थं धर्मसारथित्वभवने को हेतु: ? इति चेत्कथ्यते, क्षायो-पशमिकादि–आदिपदेन क्षायिकादिरूपभावधर्मलाभे स्पष्टं भवत्येव न भवतीति नाऽपितु भवत्येव, किमिति चेदुच्यते 'एतत्' धर्मसारथित्वं 'एवं' सम्यक्प्रवर्त्तनयोगादिप्रकारेण, कस्मात्कारणादिति निगद्यते 'तदाद्यस्थानस्याऽपि' धर्मप्रशंसादिकालभावि–धर्माद्यस्थानरूप धर्मविशेषस्यापि, वरबोधे: प्राप्तौ तु किं पुन: ? 'एवं प्रवृत्ते:' यत: धर्मसारथीभवनेन (करणेन) भगवतां प्रवृत्ति र्भवति, कुत इत्याह–'अवन्ध्यबीजत्वाद्' धर्मसारथित्वरूप-कार्यं प्रति अनुपहतशक्तिरेव कारणम्, न-हि सर्वथा कारणे बीजरूपेणाऽप्यसत् कार्य-मुत्पद्यते इति वस्तुव्यवस्था.

(निश्चयनयस्याऽभिप्रायेण 'कारणे सदेव कार्यमुत्पद्यते' कारणे–उपादान–कारणे शक्तिरूपेण (बीजरूपेण-सत्तारूपेण-तिरोभावरूपेण) कार्यं सदुत्पद्यते, अत एव कारणे सर्वथाऽसत् (अविद्यमानं) कार्यमुत्पद्यते नेति सर्वथा तादृशो नियमो वा वस्तुव्यवस्था वर्त्तते,–तथा च धर्मसारथित्वरूपफलोपधायककारण (अनुपहत–शक्तिककारण) रुप धर्म-प्रशंसादिकालीनधर्मविशेषरुपधर्मस्याद्यस्थाने निश्चयनयेन धर्मसारथित्वमते न काचिद्-बाधा. स्वरुपयोग्यतारुपेणापि न तु फलोपधायकतारुपेण. स्वरुपयोग्यताऽर्थात् कारण सत्ता च फलोपधायकताऽर्थात् कार्यसत्ता, कारणरुपेण–तिरोभावरुपेणास्तित्वमनादिका-लतो भवति च कार्यरुपेणाऽस्तित्वं (प्रादुर्भावेण) यदा सहकारिसामग्रीप्राप्ति र्भवेत् तदाऽऽगच्छति (स्वरुपयोग्यत्वं-तदवच्छेदक-धर्मवत्त्व–जनकत्वादिकं यथा, अरण्यस्थस्याऽपि दण्डस्य घटं प्रति जनकत्वं स्वरुपयोग्यत्वं, फलोपधायकत्वं, फलनिषादकत्वम्) सांख्या-स्तु सत्कार्यवादिन:, नैयायिकाद्या असत्कार्यवादिन:, जैनास्तु अनेकान्तवादित्वेन, कार्यं हि उपादानकारणे सर्वथा सत् न, सर्वथाऽसन्न परन्तु सदसदुभयात्मकं, अर्थात् कथंचि-त्सदेवोत्पद्यते, कथंचिदसदेवोत्पद्यते, अपेक्षया सच्चापेक्षयाऽसत्, शक्तिरुपेण सत्, कार्या-प्रादुर्भावेणाऽसत्) परमतस्य-बौद्धमतस्य साक्षिपूर्वकं पूर्वोक्तविषयविषयकं समर्थनम् —

'सुसंवृतः' (सर्वथाऽनुद्घाटित-अप्रकटितः-सुस्थगितः) कांचनै रत्नैः सुसंभृतः करण्डकोऽस्ति तस्य प्राप्ति र्लाभः तत्समाना हि:- यस्मात्प्रथमधर्मस्थानप्राप्तिः-धर्मप्रशंसादिरूपा प्रथमधर्मस्थानप्राप्तिः, तथाहि = कश्चित् क्वचिदनुद्घाटितं कांचनरत्नकरण्डकमवाप्नुवंस्तदन्तर्गतं कांचनादि वस्तु विशेषतोऽनवबुध्यमानोऽपि लभते एवं भगवन्तोऽपि प्रथम धर्मस्थानाऽवाप्तौ मोक्षावसानां कल्याणसंपदं तदाऽनवबोधेऽपि लभन्ते एव, तदवन्ध्यहेतुकत्वात्तस्याः, अर्थाद् भगवन्तोऽपि प्रथमधर्मस्थानप्राप्तौ, तत्रस्थकांचनादिवत् सुफलादिकमजानन्तोऽपि धर्मसारथित्वादिसत्फलगर्भितमोक्षपर्यन्तां कल्याणसंपदं वरमालां वृणते, यत आद्यस्थानप्राप्तिरवन्ध्यबीजरूपहेतुरूपाऽस्ति, मोक्षपर्यन्तकल्याणसंपत्प्राप्तिरूपकार्यं प्रति अवश्यफल - संपादन - समर्थाऽऽद्यस्थानप्राप्तिर्हेतुरेवेति । तदेवं धर्म्मस्यसारथयो धर्मसारथयः ।

इति—एवं शक्रस्तवस्य धर्मसारथिरूपस्य त्रयोविंशतितमपदस्य व्याख्या समाप्ता ।

शक्रस्तवस्य धर्मवरचातुरन्तचक्रवर्तिरूपस्य चतुर्विंशतितमस्य पदस्य प्रकृष्ट व्याख्यानम् —

**तथा 'धम्मवरचाउरंतचक्कवट्टीणं' धर्म्मोऽधिकृत एव, स एव वरं—प्रधानं, चतुरन्तहेतुत्वात् चतुरन्तं, चक्रमिव चक्रं, तेन वर्त्तितुं शीलं येषां ते तथाविधाः, इदमत्र हृदयम्—यथोदितधर्म्म एव वरं—प्रधानं चक्रवर्तिचक्रापेक्षया लोकद्वयोपकारित्वेन कपिलादिप्रणीतधर्म्मचक्रापेक्षया वा त्रिकोटिपरिशुद्धतया चत्वारो-गतिविशेषाः, नारकतिर्यग्नरामरलक्षणाः तदुच्छेदेन तदन्तहेतुत्वाच्चतुरन्तं, चतुर्भिर्वाऽन्तो यस्मिंस्तच्चतुरन्तं, कैश्चतुर्भिः ? दानशीलतपोभावनाख्यैर्द्धर्म्मैः, अन्तः प्रक्रमाद्भवान्तोऽभिगृह्यते, चक्रमिव चक्रमतिरौद्रमहामिथ्यात्वादिलक्षणभावशत्रुलवनात्, तथा च लूयन्त एवानेन भावशत्रवो मिथ्यात्वादय इति प्रतीतं, दानाद्यभ्यासादाग्रहनिवृत्त्यादिसिद्धेः, महात्मनां स्वानुभवसिद्धमेतत् । एतेन च वर्त्तन्ते भगवन्तः तथाभव्यत्वनियोगतो वरबोधिलाभादारभ्य तथातथौचित्येन आसिद्धिप्राप्तेः, एवमेव वर्त्तनादिति ।**

**तदेवमेतेन वर्त्तितुं शीला धर्म्मवरचतुरन्तचक्रवर्तिनः २४ ।। एवं धर्म्मदत्व—धर्म्मदेशकत्व—धर्म्मनायकत्व—धर्म्मसारथित्व—धर्म्मवरचतुरन्तचक्रवर्त्तित्वैर्विशेषोपयोगसिद्धेः स्तोतव्यसम्पद एव विशेषेणोपयोगसम्पद् इति ६ ।।**

पं. :– "त्रिकोटिपरिशुद्धतयेति" तिसृभिरादिमध्यान्तादिसंवादलक्षणाभिः कषच्छेदतापरूपाभिर्वा कोटिभिः– विभागैः परिशुद्धो-निर्दोषो यः स तथा तद्भावस्तत्ता तया, कषादिलक्षणं चेदम्– पाणवहाईयाणं, पावट्ठाणाण जो उ पडिसेहो । झाणज्झयणाईणं, जो उ विही एस धम्मकसो ।।१।। बज्झाणुट्ठाणाणं, जेण न बाहिज्जए तयं नियमा । संभवइ य परिसुद्धं, सो पुण धम्मंमि छेओत्ति ।।२।। जीवाइभाववाओ, बंधाइपसाहगो इहं तावो । एएहिं सुपरिसुद्धो, धम्मो धम्मत्तण-मुवेइ ।।३।। "आग्रहनिवृत्त्यादिसिद्धेरिति" आग्रहो मूर्च्छा लुब्धिरिति पर्यायाः, ततो विहितदान-शीलतपोभावनाभ्यासपरायणस्य पुंसः आग्रहस्य–मूर्च्छाया निवृत्तिः–उपरमः, आदिशब्दाद्यथासम्भवं शेषदोषनिवृत्तिग्रहस्तस्याः "सिद्धेः" भावात् ।।

टी. :— यथा धर्मदा—धर्मदेशका—धर्मनायका—धर्मसारथयः, अर्हन्तो भगवन्तः सन्ति तथा धर्मवरचतुरन्तचक्रवर्तिनः सन्ति, अर्थाद् धर्मवरचतुरन्तचक्रवर्तिभ्योऽर्हद्भ्यो भगवद्भ्यो नमोऽस्तु, एतत्पदरूपसूत्रघटितधर्मपदेनाऽधिकृतचारित्रादिधर्मो ग्राह्यः, अर्थात् पूर्वोक्तचारित्रादिधर्म एव वरं-प्रधानं यतो यथा चक्रिणश्चक्ररत्नं लोकेऽस्मिन् बाह्यशत्रु-चक्रोपरि विजयसंपादनद्वारोपकारि, तथा धर्मचक्रं चकवर्त्तिचक्रापेक्षया लोकद्वयोपकारि, तद्धेतुना धर्मस्य प्रधानताऽथवा कपिलादिप्रणीतधर्मचक्रापेक्षया-कपिलादिभिः स्वस्वदर्शन कारै रचित (स्थापित) स्वस्वदर्शनरूपधर्मचक्रापेक्षया धर्मचक्रमिदं प्रधानं, अथवा, धर्मवरचक्रेऽस्मिन् त्रिकोटिपरिशुद्धतया प्रधानता वर्त्तते ।

(धर्मचक्रे त्रिकोटिपरिशुद्धिरत्रादिमध्याऽवसानेषु संवादस्वरूपत्रिकोटि ज्ञेया ऽत्र संवादस्तु पूर्वापराविरोधित्वरूपसत्यसंभाषणमविरुद्धार्थज्ञानं, नियतफलप्राप्तिजनक-त्वादि ज्ञेयम्, अथवा कषच्छेदतापरूपत्रिकोटिनिकषोत्तीर्णं - वीतरागशासनरूपधर्मचक्रं, तथाहि =

(१) कषशुद्धो धर्मः = प्राणिवधादिपापस्थानानां त्यागरूपो निषेधः, च ध्याना-ध्ययनादिधर्मस्थानानां विधानरूपविधिः, यत्र धर्मे स्यात् स धर्मो निगद्यते कषशुद्धः,

(२) छेदशुद्धो धर्मः = विधिमार्ग-प्रतिषेधमार्गयोरनुकूला या बाह्यक्रिया यत्र स धर्मः छेदशुद्धः, तया बाह्यशुद्धक्रिययाऽतिचारानाचाररहितत्वे विधिनिषेधमार्गे, उत्ते-जनं क्रियते, यस्मिन् धर्मे पूर्वोक्तविधिप्रतिषेध-साहय्यकारि-शुद्धधार्मिकक्रियाया वर्णनं यथार्थतया कृतं स्यात्स धर्मश्छेदशुद्धः,

(३) तापशुद्धधर्मः = कषच्छेदयोराधारस्तापे स्थितोऽस्ति, यदि सुवर्णवर्णस्तापेन

विवर्णो भवेत्तदा तत्सुवर्णमशुद्धं, धर्मस्य तापपरीक्षायां, धर्मः शुद्ध उत्तीर्णो न स्यात्तदा कषच्छेदौ निरर्थकौ, वस्तुषु प्रतिक्षणं परिवर्त्तन–चक्रं चलति, यत्सुवर्णं कुण्डलाकारे परिवर्तितं, तत्कुण्डलं स्तोकवेलानन्तरं कण्ठिकाकारे परिवर्त्तितं, तदा पर्यायाः परिवर्त्तन्ते तथापि सुवर्णद्रव्यं द्रव्यत्वेन नित्यत्वेन, अखण्डितमपरिवर्त्तितं तिष्ठति, तथा यस्मिन्नागमे द्रव्यार्थिकनयापेक्षया नित्यं, पर्यायार्थिकनयापेक्षयाऽनित्यं चेति जीवादिपदार्थमात्रस्य वर्णनं कृतं स्यात् स धर्मस्तापशुद्धो निगद्यते, तादृशे धर्मे च विधिनिषेधमार्गसा चि व्यकारिण्यो धार्मिकक्रिया घटन्ते नाऽन्यथेति,

(अथवा क्रयणहननपचनादिरूपत्रिकोट्याऽपि धर्मचक्रमिदं विशुद्धमिति)

नारकतिर्यग्नरामरस्वरूपगति–विशेष–चतुष्टयस्योच्छेदेन गति–चतुष्टयस्यान्तहेतुत्वाच्चतुरन्तं; चतुर्भि र्वा दानशीलतपोभावनानामकैर्धर्मैः (संज्ञाचतुष्टयविरोधिभिः) श्रोतृगणापेक्षया प्रक्रमात–प्रकरणवशात् भवान्त–भवस्यान्तो यस्मिंस्तत् धर्मवरचक्रं चतुरन्तत्वेन प्रख्यायते, यथा चक्रि-चक्रं भयङ्करबाह्यशत्रूनामुच्छेदात् कथ्यते, चक्रमिव चक्रं अतिरौद्रमहा-मिथ्यात्वादिरूपभाव (आभ्यन्तर) शत्रूणां लवनादुच्छेदात्, तथाचानेन धर्मवरचतुरन्त-चक्रेण मिथ्यात्वादिरूपा भावशत्रवः लूयन्ते–उच्छिद्यन्ते इति प्रतीतमेव ।

तथा च भगवन्तो वा भगवद्भक्ता धर्मवरचक्रेण मिथ्यात्वाद्यान्तरारीणां समूलमून्मूलनं कुर्वन्त्येव, कथमिति चेत् कथ्यते दानादीनां पुनःपुनरभ्यासतः–सतत–क्रियासमभिहारतः, न ददाति सद्धनं, न त्यजेत्लब्धान् कामानिति रूप आग्रहः (परिग्रहः–मूर्च्छा-लोभादिपर्यायरूपः) ततो विहितदानशीलतपोभावनाऽभ्यासपरायणस्य पुंसः आग्रहस्य (परिग्रहसंज्ञारूपायाः) मूर्च्छाया निवृत्तिः-उपरमः, (मैथुनसंज्ञायाः निवृत्तिः, आहारसंज्ञा-निवृत्तिः, भयसंज्ञा-निवृत्तिः) यथासंभवं शेषदोषनिवृत्ति-आदेः सिद्धिर्भवति इत्येतन्महात्मनां स्वानुभवसिद्धमेवेति ।

(आहारभयमैथुनपरिग्रहसंज्ञकसंज्ञाचतुष्टयं, अनादितो जीवेन सह संलग्नं वर्त्तते, जीवः संज्ञाभिः सहैकतां गतः, स एवं जानाति मदीया सहजा गुणा इति, तासु प्रवर्त्तते । संज्ञाचतुष्के या या प्रवृत्तिः सा सा बहिरात्मभाव एव, एवं जीवस्य स्वस्य न भासते, औदयिकभावे वर्त्तमानां, जीवस्येमां–अनाद्यशुद्धां प्रवृत्तिं, क्षायोपशमिकादिरूपे परावर्त्य शुद्धाचारमयं कारकश्चतुर्धा धर्मो जिनेश्वरैः कथितोऽस्ति, दानादिचतुर्विध

धर्माराधनत आत्मधर्मः प्रादुर्भवति, एतावानपि नापितु (प्रत्युत) परंपरया मोक्षो भवति. परिग्रहसंज्ञाव्याघाताय दानं समर्थं, मैथुन–संज्ञा–मथनाय शीलगुणः समर्थः, आहारसंज्ञा परिहाराय तपोधर्मः समर्थः, भयसंज्ञा भङ्गाय मैत्र्यादिभावनाप्रधानो भावधर्मः)

चारित्रादिधर्मवरचतुरन्तचक्रेणैतेन, भगवन्तो वर्त्तन्तेऽर्थात् पूर्वे कथितवर्णित-विशिष्टधर्मवरचक्रेण वर्त्तन्तेऽतः 'धर्मवरचतुरन्तचक्रवर्तिनः' भगवन्तः कथ्यन्ते, तथाभव्य-त्वनियोगतो ("योग्यता चेह विज्ञेया, बीजसिद्धयाद्यपेक्षया, आत्मनः सहजा चित्रा, तथा-भव्यत्वमित्यतः" यो. वि. २७८। 'भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपारिणामिको भावः, तथा–भव्यत्वं चैतदेव कालनैयत्यादिना प्रकारेण वैचित्र्यमापन्नं) तथा (तीर्थंक-रत्वसंपादकत्वेन) भव्यत्वस्य नियोगतः (आज्ञातः) वरबोधिलाभादारभ्य सिद्धिप्राप्तिपर्यन्तं यावत् तथा तथा (तत्तत्प्रकारावच्छिन्न–अन्यान्यप्रकारावच्छिन्न) औचित्येन–उचिततापू-र्वकप्रवृत्तिकारकत्वेन, एवमेव वर्त्तनात्–वरबोधावपि धर्मचक्रावच्छिन्नवर्त्तनं तत आरभ्य सर्वत्र धर्मलाभे तथातथौचित्येनाविच्छेदेन सिद्धिप्राप्तिपर्यन्ते धर्मचक्रावच्छिन्न–र्वातत्वं–वर्त्तनं वर्त्तते इति. तथा च यद्यपि सर्वभव्यात्मनां भव्यत्वं समानं तथापि प्रत्येकभव्या-त्मनां मोक्षः समानकाले समानसामग्रीतो न भवति. अर्थात् प्रत्येकभव्यानां 'तथाभव्यत्वं' भिन्नं भिन्नं वर्त्तते, परन्तु श्रीमज्जिनेश्वराणामात्मनां सहजतथाभव्यत्वं सर्वभव्येभ्यो विशिष्टकोटिकं, यथा यथा श्रीमतां सहजतथाभव्यत्वं तत्तत्सामग्रीवशतः परिपक्वं भवत्, तथा तथा श्रीमतां वैशिष्टयं बहिराविर्भवति, तीर्थंकरपदहेतुभूतवरबोधिलाभानन्तरं जिनात्मानः प्रादुर्भावापेक्षया सर्वथा परोपकार–व्यसनिन उचितक्रियाकारकाः विश्वो-द्धारकाः सफलारम्भिन इत्यादिपूर्वोक्तगुणगणसंपन्नाः सन्तोऽपि 'सर्वजीवान् जिनशासन-रसिकान् संपादयामीति भावदयान्तरहसोल्लसितमानसमहोदधयः', विशिष्टभावदयाया वर्धमानरसेन तीर्थंकरनामकर्म निकाचयन्ति, एवं तथा तथौचित्यावच्छिन्नाचारे वर्तनेन सिद्धिप्राप्तिपर्यन्त भगवन्तो 'धर्मवरचातुरन्तचक्रवर्तिन उच्यन्ते, तदेवमेतेन–धर्मवरचतुरन्त-चक्रेण वर्तितुं शीला धर्मवरचतुरन्तचक्रवर्तिनः ।। (त्रयः समुद्राश्चतुर्थो हिमवानिति चत्वारोऽन्ता (लवणसमुद्रंप्राप्ताः) स्तेषु प्रभुतया भवाश्चातुरन्ताः चतुरन्तस्वामिन एवं विधाये चक्रवर्तिनस्ते चातुरन्तचक्रवर्तिनः, धर्मस्य वराः–श्रेष्ठाः चतुरन्तचक्रवर्तिनः, धर्मनायका इत्यर्थः, तेभ्यः, इति कल्पसूत्रसुबोधिकायाम् ।। अत्र 'समुद्ध्यादा वा' इति हैम.

८/१/५/० प्राकृतसूत्रवशादात्वं, अथवा चतुर्दिग्धार चतुरन्तं चक्रमुच्यत दानतपः शील-भावना–चतुर्धारं धर्म्मं चक्रमिदं ।। श्री धर्मसंधाचार–विधितो भावोऽत्र गृहीत ,)

यथा स्तोतव्यसम्पदः, सामान्यहेतुरूपा द्वितीया संपद्, विशेषहेतुरूपा तृतीया सम्पत्, सामान्योपयोगरूपा चतुर्थी संपत्, पंचमी उपयोगसंपद एव हेतुसंपत् तथा विशेषोपयोगरूपा षष्ठी संपत्, तथा च प्रथम–स्तोतव्यसंपद एव विशेषोपयोग–प्रयोजनरूपा 'धम्मदयाणं' पदत आरभ्य 'धम्मवरचाउरंतचक्कवट्टीणं' पर्यन्त–पंचपदवती षष्ठी विशेषोपयोग सम्पदस्ति, अर्थात्, अर्हतां धर्मदत्व–धर्मदेशकत्व–धर्मनायकत्व–धर्मसारथित्व–धर्मवरचतुरन्तचक्रवर्तित्वरूपप्रकारैर्विशेषत उपयोगो भवत्यत एषा संपद् विशेषणोपयोग-संपद्रूपेण कथ्यतेऽर्थात् तीर्थंकरदेवा धर्मक्षेत्रे किं किं कार्यं कुर्वते, तत्सन्दर्शनार्थं,

अस्यां सम्पदि पंचभिः पदैः वर्णनं कृतं, अर्हतां, उपयोगिता विशिष्टकारणान्यपेक्ष्य मता, श्री अर्हन्तः सर्वविरति- देशविरत्यादिरूपचारित्र–धर्मस्य दातृत्व–देशकत्व–स्वामित्व–सारथित्व–वरचतुरन्तचक्रवर्ति- त्वावच्छिन्नैः प्रकारै विशिष्टोपयोगिता, सकलमुमुक्षूणां मनुष्याणामात्यन्तिकैकांतिककल्याणमालाकारिणी वर्त्ततेऽतः स्तोतव्या अर्हन्तो भगवन्तो भवन्ति.

—शक्रस्तवस्य पंचविंशतितमस्य 'अप्पडिहयवरनाणदंसणधराणं' पदस्य विवरणम्—

**एते च कैश्चिविष्टतत्त्वदर्शनवादिभिर्बौद्धभेदैरन्यत्र प्रतिहतवरज्ञानदर्शनधरा एवेष्यन्ते "तत्त्वमिष्टं तु पश्यतु" इतिवचनाद्, एतन्निराचिकीर्षयाऽऽह–"अप्रतिहतवरज्ञान-दर्शनधरेभ्यः"अप्रतिहते–सर्वत्राप्रतिस्खलिते क्षायिकत्वाद्वरे–प्रधाने ज्ञानदर्शने–विशेष-सामान्यावबोधरूपे धारयन्तीति समासः, सर्वज्ञानदर्शनस्वभावत्वे निरावरणत्वेन,**

**अन्यथा तत्त्वायोगात्, सर्वज्ञस्वभावत्वं च सामान्येन सर्वावबोधसिद्धेः,**

**विशेषाणामपि ज्ञेयत्वेन ज्ञानगम्यत्वात्, न चैते साक्षात्कारमन्तरेण गम्यन्ते, सामान्यरूपानतिक्रमात्, निरावरणत्वं चावरणक्षयात्, क्षयो च प्रतिपक्षसेवनया,**

**तत्तानवोपलब्धेः, तत्क्षये च सर्वज्ञानं, तत्स्वभावत्वेन, दृश्यते चावरणहानिसमुत्थो ज्ञानातिशयः**

**न चास्य कश्चिदविषय इति स्वार्थानतिलङ्घनमेव, इत्थं चैतद्, अन्यथा अविकलपरार्थसम्पादनासम्भवः, तदन्याशयाद्यपरिच्छेदादिति सूक्ष्मधिया भावनीयं, ज्ञानग्रहणं चादौ सर्वा लब्धयः साकारोपयोगोपयुक्तस्येति ज्ञापनार्थमिति, अप्रतिहतवरज्ञानदर्शनधराः २५ ।। एतेऽप्याजीविकनयमतानुसारिभिर्गोशालशिष्यैस्तत्त्वतः खल्वव्यावृत्तच्छद्मान एवेष्यन्ते, "तीर्थनिकारदर्शनादागच्छन्तीति" वचनाद्, एतन्निवृत्त्यर्थमाह—**

पं. "तत्त्वमिष्टं तु पश्यत्विति—" सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु । प्रमाणं दूरदर्शि चेदेते गृध्रानुपास्महे ।।१।। इति सम्पूर्णश्लोकपाठः, "सर्व्वज्ञानेत्यादि" सर्व्वज्ञानदर्शनस्वभावत्वेन नयान्तराभिप्रायेण सार्वदिके सर्वज्ञसर्वदर्शित्वरूपे सति "निरावरणत्वेन" घातिक्षयात्, अप्रतिहतवरज्ञानदर्शनधरा भगवन्तः, व्यतिरेकमाह—

"अन्यथा" उक्तप्रकारव्यतिरेकेण "तत्त्वायोगात्" अप्रतिहतज्ञानदर्शनधरत्वायोगात्, यतो न निरावरणा अपि धर्म्मास्तिकायादय उक्तरूपविकलाः सन्त एकेन्द्रियादयो वा उक्तरूपयोगेऽप्यनिरावरणाः प्रकृतसूत्रार्थभाज इति, हेतुविशेषणसिद्धयर्थमाह—"सर्वज्ञस्वभावत्वं च" हेतुविशेषणतयोपन्यस्तं "सामान्येन" महासामान्यनाम्ना सत्तालक्षणेन "सर्वावबोधसिद्धेः" सर्वेषां–धर्म्मास्तिकायादिज्ञेयानामवबोधसिद्धेः–परिच्छेदसद्भावादिति, ज्ञेयवस्तुप्रतिबिम्बसङ्क्रमस्य तु तदाकारत्वे ज्ञानस्याभ्युपगम्यमाने अनेकदोषप्रसङ्गात् व्याप्त्यनुपपत्तेः, धर्म्मास्तिकायादिष्वमूर्त्तत्वेनाकाराभावे प्रतिबिम्बायोगात्, तस्य मूर्त्तधर्म्मत्वात्, तथा तत्प्रतिबद्धवस्तुसङ्क्रमाभावेऽभावात्, न ह्यङ्गनावदनच्छायाणुसङ्क्रमातिरेकेणाऽऽदर्शके तत्प्रतिबिम्बसम्भवोऽस्ति, अम्भसि, वा निशाकरबिम्बस्येति, अन्यथाऽतिप्रसङ्गात्, उक्तं च परममुनिभिः—"सामा तु दिया छाया, अभासुरगया निसं तु कालाभा । सच्चेव भासुरगया, सदेहवण्णा मुणेयव्वा ।।१।। जे आयरसस्संतो देहावयवा हवंति संकंता । तेसिं तत्थुवलद्धो पगासजोगा न इयरेसिं ।।२।। इत्यादि, चित्रास्तरणाद्यनेकवस्तुग्रहणावसरे चैकत्रानेकप्रतिबिम्बोदयासम्भवात्, सम्भवे वा प्रतिबिम्बसाङ्कर्योपपत्तेः, तदनुसारेण परस्परसङ्कीर्णवस्तुप्रतिपत्तिप्रसङ्गादिति, एकस्मिन्नपि घटादौ सद्रूपे परिच्छिन्ने तद्रूपानतिक्रमात् शुद्धसङ्ग्रहनयाभिप्रायेण सर्वसत्तापरिच्छेदः सिध्यति । आह—सत्तामात्रपरिच्छेदेऽपि विशेषाणामनवबोधात् कथं सर्व्वावबोधसिद्धिरित्याशङ्क्याह—

"विशेषाणामपि" न केवलं सामान्यस्य "ज्ञेयत्वेन" ज्ञानविषयत्वेन "ज्ञानगम्यत्वात्" ज्ञानेन–अवबोधरूपेणावबोधनीयरूपत्वात्, यद्येवं ततः किमित्याह—"न च" नैव "एते" विशेषाः "साक्षात्कारं" दर्शनोपयोगम् "अन्तरेण" विना, तेनासाक्षात्कृता इत्यर्थो "गम्यन्ते" बुध्यन्ते, कथमित्याह—"सामान्यरूपानतिक्रमात्" सामान्यरूपातिक्रमे ह्यसद्रूपतया खरविषाणादिवदसन्त एव विशेषाः स्युरिति, इदमुक्तं भवति–दर्शनोपयोगेन सामान्यमात्रावबोधेऽपि तत्स्वरूपानतिक्रमात् सङ्ग्रहनयाभिप्रायेण विशेषाणामपि ग्रहणाच्छद्मस्थोऽपि सर्वदा सर्वज्ञस्वभावः स्यात्, घातिकर्म्मक्षये तु सर्वनयसंमत्या निरुपचरितैव सर्वज्ञस्वभावता, ज्ञानक्रियायौगपद्यस्यैव मोक्षमार्गतेति, सर्वदर्शनस्वभावता तु सामान्यावबोधत एव सिद्धेति न तत्सिद्धये यत्नः कृत इति । इत्थं विशेषणसिद्धिमभिधाय विशेष्य-

सिद्धयर्थमाह—"निरावरणत्वं च" प्रागृहेतुतयोपन्यस्तम् "आवरणक्षयाद्" आवरणस्य-ज्ञानावरणादेः क्षयात्-निर्मूलप्रलयात् । ननु जोवाविभागीभूतस्यावरणस्य क्षय एव दुरुपपाद इत्याशङ्क्याह—क्षयश्च उक्तरूप: "प्रतिपक्षसेवनया" मिथ्यादर्शनादीनां सामान्यबन्धहेतूनां ज्ञान-प्रत्यनीकान्तरायोपघातादीनां च विशेषहेतूनां प्रतिपक्षस्य—विरोधिनः सम्यग्दर्शनादेर्ज्ञानबहुमानादेश्च सेवनया—अभ्यासेन प्रयोगोऽत्र—यद्यस्य कारणेन सह विरुध्यते तत्तद्विरुध्यमानसेवने क्षीयते, यथा रोमोद्धषणादिकारणे शीतेन विरुध्यमानस्याग्नेरासेवने रोमोद्धषणादिविकारः, विरुध्यते चावरणहेतुभिर्मिथ्यात्वदर्शनादिभिः सह सम्यग्दर्शनादिगुणकलाप इति कारणविरुद्धोपलब्धिः । नन्वतीन्द्रियत्वादावरणक्षयस्य कथं तेन हेतोः प्रतिबन्धसिद्धिरित्याशङ्क्याह—

"तत्तानवोपलब्धेः" तस्य—आवरणस्य "तानवं" तुच्छभावो देशक्षयलक्षणप्रत्ययेन प्रतिपक्षसेवनया तस्योपलब्धेः, स्वानुभवादिसिद्धज्ञानादिवृद्धयन्यथानुपपत्तेः प्रतिबन्धसिद्धिः, नच वक्तव्यं—प्रतिपक्ष-सेवनया तानवमात्रोपलब्धेः कथं सर्वावरणक्षयनिश्चय इति ?, ये यतो देशतः क्षीयमाणा दृश्यन्ते ते ततः प्रकृष्टावस्थात् सम्भवत्सर्वक्षया अपि, चिकित्सासमीरणादिभ्य इव रोगजलधरादय इति, एवं च जीवाविभागीभूतस्यापि चिकित्सातो रोगस्येवावरणस्य प्रतिपक्षसेवनया क्षयोऽदुष्ट इति यत्किंचिदेतत—यदुतावरणक्षय एव दुरुपपाद इति । अथ प्रकृतसिद्धिमाह—"तत्क्षये च" आवरणक्षये च सर्वज्ञानं—सर्वज्ञयावबोधः, कुत इत्याह—"तत्स्वभावत्वेन" स्वभावो ह्यसौ जीवस्य यदावरणक्षये सर्वज्ञानं प्रतीयते, एतदेव भावयति—"दृश्यते च" स्वानुभवानुमानादिभिः "आवरणहानिसमुत्थो" निद्राद्यावरणक्षयविशेषप्रभवो "ज्ञानातिशयो" ज्ञानप्रकर्षः, ततः किमित्याह—

न चास्य—ज्ञानातिशयस्य प्रकृष्टरूपस्य 'कश्चित्' ज्ञेयविशेषः 'अविषयः' अगोचरः, सर्वस्य सतो ज्ञेयस्वभावानतिक्रमात्, केवलस्य निरावरणत्वेनाप्रतिस्खलितत्वात्, 'इति' एवमुक्तयुक्त्या 'स्वार्थानतिलङ्घनमेव' स्वार्थः—प्रकृतसूत्रस्याप्रतिहतवरज्ञानदर्शनधरत्वं तस्यानतिलङ्घनमेव—अनतिक्रमणमेव, प्रतिहतवरज्ञानदर्शनधरत्वे हि भगवतां वितथार्थतया सूत्रस्य स्वार्थातिलङ्घनं प्रसजतीति, "इत्थं चैतद्" इत्थमेवाप्रतिहतवरज्ञानदर्शनप्रकारमेव "एतद्" अर्हल्लक्षणं वस्तु, विपक्षे बाधामाह—"अन्यथा" उक्तप्रकाराभावे "अविकलपरार्थसम्पादनाऽसम्भवः" अविकलस्य—परिपूर्णस्य परार्थस्य—परोपकारस्य भगवतां घटनाऽयोगः, कुत इत्याह—"तदन्याशयाद्यपरिच्छेदात्" तदन्येषां पुरुषार्थोपयोगीष्टतत्त्वविलक्षणानामाशयादीनाम्—अभिप्रायद्रव्यक्षेत्रकालभावानामपरिच्छेदाद्—अनव-बोधात्, सकलहेयपरिज्ञाने ह्यविकलमुपादेयमवबोद्धुं शक्यं, परस्परापेक्षात्मलाभत्वाद्धेयोपादेययोः, ह्रस्वदीर्घयोरिव पितृपुत्रयोरिव वेति सर्वमनवबुध्यमानाः कथमिवाविकलं परार्थं सम्पादयेयुरिति.

**टीका** : अवतरणिका = यथा जैना तीर्थंकरान् धर्मदधर्मदेशकादिरूपेण मन्यन्ते तथा केचिद् बौद्धा अपि स्वेष्टदेवं मन्यन्ते, परन्तु सर्वपदार्थविषयक—ज्ञातृत्वेन रूपेण न मन्यन्ते, एनं विषयं सप्रमाणं स्पष्टयन्ति—

एते तीर्थङ्कराश्च कैश्चिदिष्टतत्त्वदर्शनवादिभि बौद्धभेदैरन्यत्र प्रतिहतवरज्ञान-दर्शनधरा एवेष्यन्ते "तत्त्वमिष्टं तु पश्यतु" इति वचनाद्,

इष्ट (ईश्वरोपयोगि) तत्त्वविषयकदर्शनवादिनः केचित् बौद्धा इष्टेश्वरमथवा तीर्थंकरान् इष्टतत्त्वभिन्न–अन्यतत्त्वे प्रतिहतज्ञानदर्शनधरत्वेन मन्यन्तेऽर्थात्, इष्टतत्त्वभिन्न–अन्यतत्त्वविषयाणां अज्ञातृत्वेन–अद्रष्टृत्वेनैव मन्यन्ते,

एतेषां प्रमाणभूतं वचनं दर्शयति 'तत्त्वमिष्टं तु पश्यतु' (सर्वं पश्यतु वा मावा तत्त्वमिष्टं तु पश्यतु । प्रमाणं दूरदर्शी चेदेते गृध्रानुपास्महे ।। सम्पूर्णश्लोकपाठः) अर्थादीश्वरः सर्वभावान् पश्यतु वा न वा, तथापीष्टं तत्त्वं पश्यतु इत्येतावदेव पर्याप्तं यदि दूरदर्शी प्रमाणभूतः स्यात्तदा गृध्रानुपास्महे, एवं रहस्यमीदृशं यत् केचिद्बौद्धा ईश्वरं धर्मनायकतीर्थंकरत्वादिरूपेण मन्यन्ते, सकलद्रव्यपर्यायविषयद्रष्टृज्ञातृत्वादिरूपेण न मन्यन्ते ।

(बौद्धभेदानां संक्षिप्तरूपरेखा = (१) वैभाषिकाः–घटपटादिबाह्यरूपं च ज्ञानाऽभ्यान्तररूपं वस्तुतत्त्वं सत्यमिति मन्यन्ते (२) सौत्रान्तिकाः–यद्यप्येते बाह्याभ्यन्तररूपं द्विधा तत्त्वं मन्यन्ते तथापि बाह्यपदार्थानां प्रत्यक्षं न मन्यन्ते, अनुमानेन बाह्यपदार्थेज्ञानमस्तीति वदन्ति, घटपटादिनानाऽऽकारवज्ज्ञानमस्ति, च ज्ञानेनाऽनेन बाह्यपदार्थाः सन्ति, एवमनुमाय मन्यन्ते (३) योगाचाराः–बाह्यपदार्थान् सर्वथाऽपलपन्ति, अर्थाद् बाह्यपदार्था न सन्ति, एवं मन्यन्ते, केवलमान्तररूपज्ञाननामकं तत्त्वमेवाऽस्तीति मन्यन्ते, ग्राह्यग्राहकरूपज्ञानमात्रं प्रतिभासन्ते वस्तुतस्तु बाह्यपदार्था न सन्तीति सिद्धान्तयन्ति, (४) माध्यमिकास्तु सर्वं शून्यमस्तीति वदन्ति.

सर्वं शून्यमिति वादं स्वीकुर्वंते, सर्वथा प्रमाणाभावेन प्रमेयस्याभावः, अतः सर्वं शून्यं–अभावरूपं)

"ईश्वरइष्टतत्त्वविषयकज्ञानदर्शनवानस्ति, सर्वपदार्थविषयक – ज्ञानदर्शनवान् नास्ति" एवं विधस्य बौद्धविशेषमतस्य खण्डनेच्छया क्रियमाणं प्रकृतपदस्यार्थनिरूपणम्—

"अप्रतिहतवरज्ञानदर्शनधरेभ्यो" नमः । अप्रतिहते–सर्वत्राऽस्खलिते (क्षायिकत्वाद्) वरे–प्रधानज्ञानदर्शने–विशेषसामान्याऽवबोधरूपे धारयन्तीति समासः । तथा च पूर्वोक्तपूर्वपक्षस्य खण्डनेच्छया सूत्रकारः कथयति = 'अप्रतिहतवरज्ञानदर्शनधरेभ्यो नमः' अर्थात् सर्वत्रव्यापकज्ञानं–(प्रधानविशेषमुपसर्जनीकृतसामान्यमर्थग्रहणं ज्ञानं) दर्शनं

(सामान्यप्रधानमुपसर्जनीकृतविशेषमर्थग्रहणं दर्शनं) क्षायिकत्वात् ज्ञानदर्शने वरे, अप्रतिहतवरज्ञानदर्शनधरा अर्हन्तो भगवन्तः परमेश्वराः प्रोच्यन्ते.

सर्वज्ञानदर्शनस्वभावत्वे सति निरावरणत्वं, अप्रतिहतवरज्ञानदर्शनधरत्वं, अप्रतिहतवरज्ञानदर्शनधरस्य लक्षणं,

अर्थात् सर्वज्ञानदर्शने आत्मनः स्वभावरूपे नयान्तरस्याऽभिप्रायेण (शुद्धसंग्रहनयापेक्षया) जीवमात्रं सदा सर्वज्ञानदर्शनस्वभावं वर्त्तते, तथापि तत्राऽतिव्याप्तिवारणाय निरावरणत्वरूपं विशेष्यं देयं, अतएव निरावरण (क्षायिक) अप्रतिहतवरज्ञानदर्शनधराभगवन्त इति बोधो भवति.

लक्षणमीमांसा = यद्येवं कथयेत् यदुत 'ये ये निरावरणास्ते, अप्रतिहतवरज्ञानदर्शनधराः' इत्युक्ते धर्मास्तिकायादिषु आवरणशून्यत्वेन—लक्ष्यभिन्नधर्मास्तिकायादौ लक्षणस्याऽतिव्याप्तिरागच्छेत्तदाऽतिव्याप्तिदोषवारणाय 'सर्वविषयकज्ञानदर्शन' स्वभावतो सतीति विशेषणं देयं,

यद्येवं कथयेत् यदुत ये ये 'सर्वविषयकज्ञानदर्शनस्वभावास्ते, अप्रतिहतवरज्ञानदर्शनधरा' इत्युच्यमाने शुद्धसंग्रहनयाभिप्रायेण सार्वदिक—सर्वविषयक—ज्ञानदर्शनस्वभावास्तु एकेन्द्रियाद्या जीवा अपि—लक्ष्यभिन्नैकेन्द्रियादि—जीवा अप्रतिहतवरज्ञानदर्शनधरा भवेयुरर्थात् तत्रातिव्याप्तिः स्यात्,

तदिष्टं सर्वनयसंमतं नास्त्यर्थात्, अप्रतिहतवरज्ञानदर्शनधरत्वाभाववत्सु लक्ष्यभिन्नैकेन्द्रियादि—जीवेषु नयान्तराभिप्रायेण सर्वविषयकज्ञानदर्शनस्वभावत्वलक्षणस्यातिव्याप्तिरस्ति, अत एवैतद्दोषनिवारणाय—

'निरावरण' त्वरूपं विशेष्यपदं निहितमस्ति, अर्थात्, नयान्तराभिप्रायेणैकेन्द्रियादौ सर्वविषयकज्ञानदर्शनस्वभावत्वस्य सत्त्वेऽपि 'निरावरणत्वं' नास्त्येव, सावरणत्वं विद्यतेऽत एव लक्षणं निर्दुष्टमेव.

अनुमानप्रयोगश्चेत्थं = भगवन्तः (पक्षः) अप्रतिहतवरज्ञानदर्शनधराः (अत्राप्रतिहतवरज्ञानदर्शनधरत्वं साध्यं), नयान्तराऽभिप्रायेण सार्वदिक—सर्वज्ञ—सर्वदर्शित्वे सति निरावरणत्वं (हेतुः) (१) अत्राऽनुमाने हेतुप्रयोगो द्विधा भवति—सत्येव साध्ये हेतोरूप-

पत्तिस्तथोपपत्तिः यथाऽत्राप्रतिहतवरज्ञानदर्शनधरत्वरूपे साध्ये सत्येव सर्वज्ञसर्वदर्शित्व-विशिष्ट–निरावरणत्वं तथोपपत्तिः । असति साध्ये हेतोरनुपपत्तिरेवाऽन्यथानुपपत्तिः, यथाऽत्राप्रतिहतवरज्ञानदर्शनधरत्वरूप–साध्याभावे, सर्वज्ञसर्वदर्शित्वविशिष्ट–निरावरणत्व हेतोरभावः ।

(२) 'पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः' तथा च प्रकृतेऽर्हद्भगवन्मात्रस्य पक्षत्वाद् दृष्टान्ताभावात् पक्षीकृत एव भगवद्विषये नयान्तराभिप्रेत सार्वदिक–सर्वज्ञसर्वदर्शित्वविशिष्ट–निरावरणत्वरूप–साधनस्य, अप्रतिहतवरज्ञानदर्शन-धरत्वरूपसाध्येन सह व्याप्ति वर्तते, अत इयमन्तर्व्याप्तिशब्देनोच्यते, किंच–अप्रतिहत-वरज्ञानदर्शनधरत्वरूपकार्यं प्रति सर्वज्ञसर्वदर्शित्वस्वभावत्वविशिष्ट–घातिकर्मावरणक्षयः कारणम्, तथा च सर्वज्ञानदर्शन–स्वभावत्व–विशिष्टावरणक्षयरूपकारणसत्त्वेऽप्रतिहतवर-ज्ञानदर्शन–धरत्वरूपकार्यस्य सत्त्वमन्वयः,–सर्वज्ञानदर्शन स्वभावत्वविशिष्टावरण क्षयरूप-कारणाऽसत्त्वे, अप्रतिहतवरज्ञानदर्शनधरत्वरूपकार्यस्याभावः–व्यतिरेक एवमन्वयव्यतिरेक-सहकृत–पूर्वोक्त–कार्यकारणभावनिश्चयः कार्यः ।

तथा च सर्वज्ञानदर्शनस्वभावत्वाभावे, अप्रतिहतज्ञानदर्शनधरत्वाभावः, यतो निरावरणा अपि धर्माऽस्तिकायादयः सर्वज्ञानदर्शनस्वभावरहिताः सन्तः, अथवा एकेन्द्रि-यादयः, अपेक्षया सर्वज्ञानदर्शनस्वभावा अपि निरावरणत्वरहिताः–सावरणत्वसहिताः अप्रतिहतवरज्ञानदर्शनधरा न भवन्ति, हेतुविशेषतयोपन्यस्तं सर्वज्ञस्वभावत्वं साधयति (उपपादयति) सार्वदिकसर्वज्ञसर्वदर्शित्वरूप–सर्वज्ञस्वभावत्वं भावयति च महासामान्य-नामकसत्तालक्षणेन, सामान्येन सर्वधर्मास्तिकायादिज्ञेयानां, अवबोध–सिद्धिर्भवति (सामान्यहेतुक–सर्वज्ञेयविषयबोधसिद्धिः- सामान्यज्ञानज्ञाप्यसर्वज्ञेय–विषयक–बोधसिद्धिः ) एकस्मिन्, अपि घटादौ सद्रूपे परिच्छिन्ने तद्रूपानतिक्रमात्, शुद्धसंग्रहनयाऽभिप्रायेण सर्वसत्तापरिच्छेदः सिद्धयति. (घटादावेकस्मिन् सद्रूपेण घटादिः सन् सन् सन्, अस्ति,) ज्ञानस्य विषये सति, 'घटादिः सत्त्वधर्मविशिष्टोऽस्ति' इति ज्ञानभवनेन सद्रूपाऽभेदद्वारा शुद्धसंग्रहनयाऽभिप्रायेण, तथा च विशेषं गौणीकृत्य केवलं सामान्यमेव प्रधानीकृत्य, सामान्यधर्मेण यो नयः सर्ववस्तूनि एकस्मिन्वस्तुनि संगृह्णाति, स संग्रहनयो, यथा कोऽपि सद्गृहस्थो जेमनाय स्थितः सूदं कथयति 'भोजनमानय' अर्थात्सूदः भोजनाय कृतानि

वस्तूनि ददाति (पुरस्करोति) तत्र भोजने भोज्यानि वस्तूनि सर्वाणि संगृह्यन्ते तानि संग्रहनयापेक्षया तथा सत्त्वनामकधर्मेण सर्ववस्तूनि सद् रूपे समाविशति संग्रहनयः। एवं च सामान्यं जातिः तज्ज्ञानं वा लक्षणं स्वरूपं विषयो वा यस्या इति व्युत्पत्तिमती सामान्यलक्षणा, सत्त्वादिरूपा वा सज्ज्ञानरूपा वा। सा चाश्रयाणां सत्त्वविशिष्टसकल-पदार्थानामलौकिक-प्रत्यक्षे उपयुज्यते। अर्थात् सामान्यलक्षणाप्रत्यासत्त्या-घटे सत्त्वरूप-सन्निकर्षेण 'सर्वे भावा सन्तः' इत्याकारक सकलसद् विषयकज्ञानमुत्पद्यते, अस्या इदमेव फलं 'एकस्मिन् पदार्थे सत्वविषयकज्ञानजननेन सत्वरूपेण सकलपदार्थ ज्ञानं-भवतीति.

ननु पूर्वोक्तविवेचनतो दृश्यत्वरूपकेवलसत्ताया एव-सामान्यस्यैव बोधसिद्धत्वेन ज्ञेयरूपविशेषाणामवबोधोऽपूर्ण एव स्यात् तर्हि सर्वावबोधः कथमिति चेत् कथ्यते, 'तस्य विषयः सामान्यविशेषाद्यनेकान्तात्मकं वस्तु'

प्रमाणस्य विषयः सामान्यं (एकाकारमेकशब्दवाच्यमिति प्रतीतिकारकं सामान्यं) विशेषश्च (विजातीयपदार्थेभ्यः सर्वथा भिन्नत्वभानं कारयति यः स विशेषः) एवमुभयात्मकं वस्तु, अस्तीति वचनेनावबोध-उपयोगस्य विषयः सामान्य-विशेषात्मकः। तथा च साक्षात्काररूपदर्शनोपयोगेन, सामान्यमात्रविषयकबोधसत्वेऽपि सामान्यस्वरूपेण सहाभिन्नत्वेऽपि शुद्धसंग्रहनयाऽभिप्रायेण विशेषाणामपि बोधो भवति छद्मस्थोऽपि (एकनयापेक्षया) सर्वदा सर्वज्ञस्वभावविशिष्टो वरमस्तु, परन्तु सर्वनयसम्मत्या (संवादेन) तु घातिकर्मचतुष्टयक्षयो यदा भवेत्तदैव निरुपचरित-पारमार्थिक-यथार्थसर्वज्ञस्वभावता सिद्धा भवेत्, यतः ज्ञानक्रिययो र्यौगपद्यं (एककालवृत्तित्वं-एककालोपत्तिकत्वम् घाति-कर्मक्षयरूपक्रिया-केवलज्ञानयोरेककालवृत्तिकत्वं-उत्पत्तिकत्वं) तदेव मोक्षस्य महान् मार्गः सामान्य-विषयकावबोधेनैव सर्वदर्शनस्वभावता सिद्धाऽर्थात् तदर्थं न प्रयत्नः कृतः।

— पूर्वोक्त-हेतुगत-सर्वज्ञानदर्शनस्वभावतारूपविशेषणस्य सिद्धि-दर्शनाऽनन्तरं 'निरावरणत्व'रूपं विशेष्यस्य विचारणा—

अनुमानप्रयोगश्चेत्थं अप्रतिहतवरज्ञानदर्शनधराः, सर्वज्ञानदर्शनस्वभावत्वे सति निरावरणत्वादित्यत्र विशेषणस्य सिद्ध्यनन्तरं निरावरणत्वरूपविशेष्यसिद्ध्यर्थं कथयति. निरावरणत्वं च ज्ञानावरणादि-घातिकर्मरूपस्यावरणस्य क्षयान्निर्मूलप्रलयात्-सत्ताया-

मपि न तिष्ठेत्—प्राक्कर्मणः सत्ता—विद्यमानताऽऽसीन्न वेत्यपि न भासेत, तथाऽवरण-प्रलयोऽभूत्, पश्चादपि मूलाभावेन न कर्मणो भाविसत्ता, अपुनर्भवेन कर्माऽत्यन्तध्वंसः क्षयः। न च जीवप्रदेशैः सह निर्विभागतया बद्धस्याऽऽवरणभूतकर्मणः क्षय एव कथमुपपादयितुं शक्य इति वाच्यम्, पूर्वोक्तस्वरूपावरणकर्मणः — पौद्गलिकावरणरूपकर्मणः क्षयश्च प्रतिपक्षसेवनया।

आवरण—बन्धतद्विरोधिहेतवः—

मिथ्यात्वाविरतिकषाययोगप्रमादान् प्रति सम्यक्त्व—विरति—क्षमादि—योगनिरोध-व्रतादि—स्मरणपुण्यानुबन्धि—पुण्यकार्येषु समादरयोगसुप्रणिधानाप्रमादाः प्रतिपक्षिणः।

ज्ञानावरणीय—दर्शनावरणीय—कर्मबंधहेतवः—

ज्ञान—ज्ञानि—ज्ञानोपकरणदर्शनदर्शनिदर्शनसाधनप्रत्यनीकता, गुरुनिह्नवता, ज्ञान-दर्शनादिसाधनानां मूलनाशः, (उपघातः) ज्ञानादि प्रति हार्दिकारुचिरूपद्वेषः, ज्ञानार्थि-दर्शनार्थिनां भणनादौ विघ्नकरणं, ज्ञानिदर्शनिनां निन्दादिकरणमित्यादयः ज्ञानावरणीय-दर्शनावरणीयबन्धहेतवो ज्ञेयाः।

तद्विरोधिहेतू ज्ञानाचारदर्शनाचारौ—

ज्ञानाचारः— काले विनये बहुमाने उपधाने अनिह्नत्वे व्यंजनार्थतदुभय इत्यष्टधा ज्ञानाचारः, निशङ्कितता निष्काङ्क्षता निर्विचिकित्सता—अमूढदृष्टिकता, उपबृंहण-स्थिरीकरणवात्सल्यप्रभावनादिकोऽष्टधा दर्शनाचारः।

दर्शन—मोहनीयकर्मबन्धहेतवः—

उन्मार्गदेशना—मार्गनाशना—देवद्रव्यहरणैः,जिन-मुनि-चैत्यसंघादि-प्रत्यनीकतादिभिः, दर्शनमोहः।

तद्विरोधिहेतवो दर्शनाचारे दर्शिताः।

चारित्रमोहनीयकर्मबन्धहेतवः कषायादयः। तद्विरोधिनः—चारित्राचारे दर्शिता हेतवः तद्यथा पंचसमितिगुप्तित्रयरूपश्चारित्राचारो ज्ञेयः,

आवरणक्षयस्य हेतुषु वीर्याचारतपआचारभावनादि विज्ञेयः।

आवरणक्षयसाधकानुमान—प्रयोग: = अस्मिन्नात्मनि, आवरणं नास्ति, सम्यग्दर्शनादिगुणगणोपलब्धिहेतो:, अस्मिन्ननुमाने, आवरणं प्रतिषेध्यमस्ति, तस्य कारणं मिथ्यादर्शनादि, अस्ति, तस्य च प्रतिपक्षरूपसम्यग्दर्शनादिगुणकलापोपलब्धिरूपहेतुत्वेनैष प्रकृतहेतु: 'कारणविरुद्धोपलब्धिरूपेण प्रख्याप्यते'—ऽर्थादावरणनिषेधः प्रतीयतेऽर्थात्, 'यत्कारणं यत्कार्यकरणेन सह विरोधि भवति, तत्कार्यं, तत्कार्यस्य कारणस्य विरोधिरूपकारणस्य सेवनेन (पुन:-पुनरभ्यासेन) क्षयं प्राप्नोति, अत्रैतादृशी व्याप्तिर्ज्ञेया,

दृष्टांतं दार्ष्टान्तिके घटयित्वा व्याप्तिसमन्वयः— यथाऽग्निरूपकारणं, रोमोद्गमादिरूपकार्यस्य कारणेन शीतेन सह विरोधि भवति, अत एव शीतविरोधिरूपाग्नि कारणस्य सेवनेन रोमोद्गमादिरूपकार्यं नश्यति, तथैतत् सम्यग्दर्शनादिगुणकलापरूपकारणं, आवरणरूपकार्यस्य कारणभूत—मिथ्यादर्शनादिविरोधि भवति अर्थादावरणकारणमिथ्यादर्शनादिप्रतिपक्षरूपसम्यग्दर्शनादिगुणकलापरूपकारणस्य सेवनया, आवरणरूपकार्यं विलीयतेऽत एव प्रतिपक्षसेवनयाऽऽवरणक्षय: सूपपाद एव न चावरणक्षयस्यातीन्द्रियत्वात् (अतीन्द्रियत्वं—इन्द्रियजन्यलौकिकप्रत्यक्षाविषयत्वम् यथा कालस्याऽतीन्द्रियत्वम्) आवरणक्षयरूपसाध्येन सह प्रतिपक्षसेवनारूपहेतुनिष्ठ—अविनाभावसम्बन्धस्य—हेतुसंबंधज्ञानस्य सिद्धिरिति वाच्यम् कथमिति चेदुच्यते—

तत्तानवोपलब्धे: = आवरणरूपकर्मणां यो देशत: (अल्पांशेन) क्षय: स 'निर्जरा' कथ्यते, तन्निर्जरायाः कारणं प्रतिपक्षसेवनाऽस्ति, तत्प्रतिपक्षसेवनया चावरणरूपकर्मणां तनुता—तुच्छता—या उपलब्धित आवरणक्षयविशेष: प्रत्यक्षगोचरोऽस्ति, अत एव प्रतिपक्षसेवनारूपहेतुनिष्ठव्याप्तिरूप—प्रतिबन्धस्य सिद्धिरस्ति, स्वानुभवादित: सिद्धज्ञानादे र्वृद्धेरन्यथाऽनुपपत्तेः प्रतिबंधरूप—व्याप्ते: सिद्धिरस्ति, तथा च प्रतिपक्षसेवनायां सत्यां (आवरणक्षयजननद्वारा) स्वानुभवादिसिद्धज्ञानादे: (तारतम्येनाऽपि) वृद्धिरुत्कर्षः सिद्धयति, प्रतिपक्षसेवनायामसत्यां स्वानुभवादिसिद्धज्ञानादिवृद्धिरूपोत्कर्षस्याऽभाव एव—मन्वयव्यतिरेकाभ्यां स्वानुभवादिसिद्धज्ञानादिवृद्धौ (आवरणक्षयजननद्वारा) प्रतिपक्षसेवना कारणम् । ननु प्रतिपक्षसेवनया केवलमावरणकर्मणां तनुतोपलब्धि र्भवति कथं सर्वथाऽऽवरणकर्मणां क्षयो निश्चीयते ? इति चेदुच्यते, यै र्हेतुभिः प्रतिपक्षसेवनाहेतुभि: अल्पांशतः क्षयस्य (निर्जरायाः) विषयभूतानि यानि कर्मावरणानि भवन्ति । तानि

कर्मावरणानि प्रकृष्टावस्थावद्भिस्तैस्तै र्हेतुभिः सर्वथा क्षय–विषयाणि भवन्ति. एतादृशी विशिष्टा व्याप्तिरत्र विज्ञेया.

दार्ष्टान्तिके दृष्टान्तसमन्वयपूर्वं वर्त्तमानव्याप्तिसमन्वयः—

यथा यद्रोगस्य यया चिकित्सया स्वल्पांशतो विनाशो भवति, यथा चाभ्राणि येन मरुता स्वल्पानि निरस्यन्ति, तान्येवाऽभ्राणि जवनेन पवनेन सर्वथा विलीयन्ते तथा जीवात्मप्रदेशैः सहाविभागीभूतकर्मावरणनामकाऽभ्राणि प्रचण्डमतेन प्रतिपक्षेण पवनेन तथा प्रचण्ड–प्रतिपक्षसेवनया सर्वथा क्षीयन्ते इति परमं सत्यमेवात एव कर्मावरणक्षयः सूपपादः (सुबोधः– सम्यक्प्रतीतिविषयएव) अर्थात्केवलं श्रद्धेयं नाऽपितु युक्तिगम्यः ।

प्रकृतवस्तुसिद्धिः– आत्मन एषा प्रकृतिरस्ति यद् यदा सर्वज्ञानादिप्रतिबन्धकावरणस्य चक्षुः पट्टकबन्धेन यथा किंचिद्वस्तु न दृश्यते, तथाऽऽत्मज्ञानरूपनयन–ज्ञानावरणकर्मरूपपट्टकान्तराऽनयनाऽनन्तरं, आत्मना किंचिन्न ज्ञायते, तथा च केवलज्ञानावरणक्षयेण जातमात्मज्योतीरूपं ज्ञानं केवलज्ञानं, एतज्ज्ञानावरणं 'केवलज्ञानावरणं' कथ्यते, एतदावरण–सर्वघाति–क्षये सर्वज्ञानं प्रतीयते, दृश्यते च स्वानुभवानुमानादिभिः, निद्राद्यावरण-क्षयविशेषजन्यो ज्ञानप्रकर्षः सर्वथा प्रतीत एव ।

अर्थात् प्रकृष्टज्ञानरूपकेवलज्ञानस्य न कश्चित् ज्ञेयविशेषः (ज्ञेयव्यक्तिः) विषयो—गोचरो न भवतीति नाऽपितु भवत्येव परन्तु सकलं ज्ञेयवस्तुमात्रं विषयरूपमस्ति, यतः सर्वे सद्रूपपदार्थाः ज्ञेयस्वभाव (ज्ञेयत्व) रूप स्वार्थस्यातिलङ्घनं (अतिक्रमणं) न कुर्वन्त्येवार्थात् सर्वे उत्पादव्ययध्रौव्यात्मकसत्-पदार्थाः ज्ञानविषयता—ज्ञेयत्वरूपज्ञेयस्वभावाऽभिन्नाः सन्ति यतः केवलज्ञानस्य आवरणरहितत्वेनाप्रतिस्खलितत्वं सर्वव्यापकत्वं —लोकालोके निर्व्याघातकत्वं विद्यते,

पूर्वोक्तन्यायेन प्रकृतसूत्रस्याप्रतिहतवरज्ञानदर्शनधरत्वरूपस्वार्थस्याऽतिक्रमणस्यैकान्तेनाऽभावः सिद्धयति, अर्थादर्हत्सु भगवत्सु, अप्रतिहतवरज्ञानदर्शनधरत्वरूप-प्रकृतसूत्रस्य स्वार्थः संपूर्णतया व्याप्तोऽस्ति, यदि भगवत्सु प्रतिहतज्ञानदर्शनधरत्वमते तु असत्यार्थकसूत्रस्य-सम्भवेन, प्रकृतसूत्रे अप्रतिहतवरज्ञानदर्शनधरत्वरूपस्वार्थरूपसत्यार्थस्यातिलङ्घनरूपापत्ति—प्रसङ्ग आयातो—यदत्यन्तमनिष्टापत्तिः,

तथा चाप्रतिहतवरज्ञानदर्शनधरत्वरूपप्र–कार (वैशिष्टय) विशिष्टमर्हद्रूपं वस्तु, एवमेव वर्त्तते, अन्यथा–यदि, अर्हत्सु अप्रतिहतवरज्ञानदर्शनप्रकाराभावे, परिपूर्णत्वेन साकल्येन परोपकार–सम्पादनं न घटते, कथमिति चेदुच्यते, पुरुषार्थोपयोगीष्टतत्त्वतो-भिन्नानामन्येषां–आशयादीनां – अभिप्राय – द्रव्यक्षेत्रकालभावरूपविषयविषयकावबोधस्या-भावो विद्यते, सकलहेयविषयविषयकपरिज्ञाने सत्येवाविकलं–सकलमुपादेयमवबोद्धुं शक्यम् यतः परस्परापेक्षाऽऽत्मलाभत्वाद् हेयोपादेययोः, हेयस्वरूपलाभः उपादेयस्वरूपमपेक्षते, उपादेयस्वरूपलाभः, हेयस्वरूपमपेक्षते, ह्रस्वदीर्घयोरिव पितृपुत्रयोरिव वा सर्वमनवबुध्य-मानाः कथमिवाऽविकलं–सकलं परार्थं सम्पादयेयुरिति,

अर्थात्–सकलपुरुषार्थोपयोगीष्टतत्त्वतो भिन्नाऽभिप्रायद्रव्यक्षेत्रकालभाव–समस्त-हेयोपादेयरूपसकलविषयविषयकज्ञानप्रकर्षशालित्वेनाऽर्हतोऽविकल—(साकल्येन) सर्वांशतः परार्थसम्पादनसमर्थाः (अतः कथ्यतेऽनन्तज्ञानिनोऽनन्तोपकारिणोऽर्हन्तः अनन्तोपकारं प्रति अनन्तज्ञानं कारणं, यथा ज्ञानं तथोपकारः) इति सूक्ष्मधिया भावनीयं, ज्ञानग्रहणं चादौ (केवलज्ञानादौ) सर्वा लब्धयः साकारोपयोगोपयुक्तस्येति ज्ञापनार्थमिति अप्रतिहतवरज्ञानदर्शनधराः ।। (अनुत्तरे ज्ञानदर्शने युगपदुपयोगाऽभावेऽपि लब्धिरूपतया धारयतीत्यनुत्तरज्ञानदर्शनधराः, पूर्वविशेषणाभ्यां हि ज्ञानदर्शनयोरुपयोगस्य भिन्नकाल-तोक्ता, ततश्चोपयोगवल्लब्धिद्वयमपि भिन्नकालभावीति व्यामोहः, कस्यचिन्नाऽभूदत उक्तमनुत्तरज्ञानदर्शनधरा इति न पौनरुक्त्यं । उत्त. अ. ६, गा. १६) (ज्ञानदर्शन-योर्मध्ये ज्ञानं प्रधानं, ज्ञानोपयोगे वर्त्तमानस्य जीवस्य सर्वा लब्धयो भवन्ति, एतद्वस्तु, दर्शनोपयोगे वर्त्तमानस्य जीवस्य सम्बन्धे न घटते, उक्तं च "सव्वाओ लद्धीओ सागारोपओगोवउत्तस्स, नो अणागारोवओ गोवउत्तस्स" सर्वज्ञानां प्रथमसमये ज्ञानं ततो द्वितीयसमये दर्शनं, छद्मस्थानां प्रथमसमये दर्शनं ततो द्वितीय समये ज्ञानं भवतीति स्वभावः)

इति शक्रस्तवस्य पंचविंशतितमपदं समाप्तं ।

अथ शक्रस्तवस्य षड्विंशतितमपदस्य प्रारंभः 'व्यावृत्तच्छद्मभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः—

"वियट्टच्छउमाणं" व्यावृत्तच्छद्मभ्यः, छादयतीति छद्म-घातिकर्म्माभिधीयते ज्ञानावरणादि, तद्बन्धयोग्यतालक्षणश्च भवाधिकार इति, असत्यस्मिन्कर्म्मयोगाभावात्, अत एवाहुरपरे—

"असहजाऽविद्ये"ति, व्यावृत्तं छद्म येषां ते तथाविधा इति विग्रहः, नाक्षीणे संसारेऽपवर्गः क्षीणे च न जन्मपरिग्रह इत्यसत्, हेत्वभावेन सदा तदापत्तेः, न तीर्थनिकारो हेतुः, अविद्याऽभावेन तत्संभवाभावात्, तद्भावे च छद्मस्थास्ते, कुतस्तेषां केवलमपवर्गो वेति ?, भावनीयमेतत्, न चान्यथा भव्योच्छेदेन संसारशून्यतेत्यसदालम्बनं ग्राह्यम् आनन्त्येन भव्योच्छेदासिद्धेः, अनन्तानन्तकस्यानुच्छेदरूपत्वाद्, अन्यथा सकलमुक्तिभावेनेष्टसंसारिवदुपचरितसंसारभाजः सर्वसंसारिण इति बलादापद्यते, अनिष्टं चैतदिति, व्यावृत्तच्छद्मान इति २६ ।। एवमप्रतिहतवरज्ञानदर्शनधरत्वेन व्यावृत्तच्छद्मतया चैतद्रूपत्वात् स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पदिति ७ ।

पं.— "तद्बन्धेत्यादि" तस्य – ज्ञानावरणादिकर्म्मणो बन्धयोग्यता — कषाययोगप्रवृत्तिरूपा लक्षणं—स्वभावो यस्य स तथा, चकारः समुच्चये भिन्नक्रमश्च, ततो भवाधिकारश्च छद्मकारणत्वाच्छद्मोच्यते, कुत इत्याह—"असतीत्यादि" सुगमं चैतद् "अत एव" भवाधिकाराभावे कर्म्मयोगाभावादेवाहुः—ब्रुवते अपरे—तीर्थ्याः

"असहजा" जीवेनासहभाविनी जीवस्वभावो न भवतीत्यर्थः "अविद्या" कर्म्मकृतो बुद्धिविपर्यासः, कर्म्मव्यावृत्तौ तद्व्यावृत्तेः "इति" एवं कार्यकारणरूपं "व्यावृत्तं छद्म येषामित्यादि" सुगमं चैतत्, नवरं "न चान्यथेति" न च—नैवान्यथा मोक्षात्पुनरिहागमनाभावे "इष्टसंसारिवदिति" मोक्षव्यावृत्तविवक्षितगोशालकादिसंसारिवत् ।।

टी.—'एते'—तीर्थंकरा अर्हन्तो भगवन्तोऽपि आजीविकनयमतानुसारिभिर्गोशालाकशिष्यैस्तत्त्वतः खलु 'अव्यावृत्तच्छद्मान' एवेष्यन्ते, 'तीर्थनिकारदर्शनादागच्छन्तीति'-वचनाद्, एतन्निवृत्त्यर्थमाह—"वियट्टच्छउमाणं"

आजीविकनयमताऽनुयायिनः (तथाचाहुराजीविकनयानुसारिणः, "ज्ञानिनो-धर्मतीर्थस्य कर्तारः परमं पदम् । गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः" स्या. मं. अन्य. यो. व्य.)

(केचिदन्येऽपि वदन्ति "परित्राणाय साधूनां, विनाशाय च दुष्कृतां धर्म-संस्थापनार्थाय सम्भवामि युगे युगे") गोशालकशिष्याः, एनं तीर्थंकरं, अप्रतिहतवरज्ञानदर्शनधरत्वेन

मन्यन्ते, परन्तु तत्त्वतो दोषशून्यं–घातिकर्मक्षयवन्तं न मन्यन्ते यतः "तीर्थंकराः परमं पदं प्राप्याऽपि धर्मतीर्थ-तिरस्कारं दृष्ट्वा भूयोऽपि भवमागच्छन्ति" इति तेषां वचनमस्ति ।

व्यावृत्तच्छद्मभ्यः = आत्मनो ज्ञानदर्शनादिगुणान् छादयतीति छद्म–घातिकर्म (ज्ञानावरणीयदर्शनावरणीयमोहनीयान्तरायरूपकर्मचतुष्टयं घातिकर्मोच्यते) ज्ञानावरणादिरूप घातिकर्मबन्ध–योग्यतास्वरूपश्च भवाधिकार इति द्वयं छद्मत्वेन परिभाष्यते ।

पुरुषस्य प्रकृतिविकारान् द्रष्टुमिच्छादिदृक्षा सांख्यानां, भवबीजं शैवानां, भ्रांतिरूपा विद्या वेदान्तिकानां, अनादिक्लेशरूपावासना, सौगतानां, एषा घातिकर्मजनक कर्मबन्धयोग्यतारूपभवाधिकारो जैनानां, भिन्न–भिन्न–मताभिमतैकार्थकभवाधिकार परिभाषा:) यतो घातिकर्मणः कारणं भवाधिकारोऽस्ति ।

(आत्मना सह संलग्ना कार्मणवर्गणा कर्मत्वेन व्यवह्रियते–कार्मणवर्गणाया आत्मना सह सम्मिश्रणं 'बन्धः' । आत्मनः कर्मस्कन्धैः सह वेष्टनयोग्यत्वं, कर्मस्कन्धानां आत्मनि वेष्टनयोग्यत्वं अतो द्वयोर्मिथो वेष्टनयोग्यताऽनादिकालीना वर्त्तते, आकाशादौ तादृशीयोग्यताया अभावेन तादृशवेष्टनं न भवति. निरुक्तद्रव्य–द्वयेऽन्ययोग्यताभिः सह तादृशवेष्टनयोग्यताऽपि वर्त्तते, तादृशयोग्यता–कारणेन जीवपुद्गलयोः सृष्टे वैविध्यं दृश्यते । "सहजं तु मलं विद्यात्, कर्मसंबन्धयोग्यतां । आत्मनोऽनादिमत्त्वेऽपि नाऽयमेनां विना यतः ।। यो. विं. श्लो. १६४")

तथा च घातिकर्मरूपकार्यं प्रति घातिकर्मबन्धयोग्यतारूपभवाधिकारः कारणम्, घातिकर्मबन्धयोग्यतारूपभवाधिकारकारणसत्त्वे घातिकर्मणः सत्ता, घातिकर्मबन्धयोग्यतारूपभवाधिकारकारणाभावे घातिकर्मरूपच्छद्मनोऽभावः, अत एव, अन्वयव्यतिरेकशालिनि कार्यकारणभावस्य घटनेन, घातिकर्म प्रति तदबन्धयोग्यतारूपभवाधिकारः कारणं वर्त्तते ।

अत एव–भवाधिकाराभावे कर्मयोगस्याभावादेवाऽन्यमतानुयायिनो वदन्ति 'असहजाऽविद्ये'ति सहभाविनो गुणाः इति न्यायेन जीवेन सहासहभाविनी अर्थात् जीवस्वभावरूपा न भवतीत्यर्थः । 'अविद्या'– कर्मकृतो बुद्धिविपर्यासः तथाहि– "अनित्याशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ।" (पातं. यो. सू. २–५) अर्थात्, अविद्यायाः कारणं कर्म, यदाऽविद्याकारणं कर्म निवृत्तं स्यात्तदाऽविद्या कार्यं निवृत्तमपि

स्याद्, तथा च घातिकर्मरूपच्छद्म, घातिकर्मबन्धयोग्यतारूपभवाधिकारश्च छद्मोच्यते, अर्थात् कारणरूपच्छद्म च कार्यरूपं छद्मैवं द्विप्रकारावच्छिन्नं छद्म येषां व्यावृत्तं ते व्यावृत्तच्छद्मानः, अर्हन्तो भगवन्तो भवन्तीति विग्रहः (समासस्यार्थः पृथक्कृत्वा दर्शनीयः स समासविग्रहः कथ्यते)

छद्मव्यावृत्तिचर्चा = यावत्कर्मरूपसंसारस्य क्षयो न भवेत्तावत् सकलकर्मक्षयरूपोऽपवर्गो (मोक्षः) न भवेत्, कर्मरूपसंसारस्य क्षयो यदा भवेत्, तदा जन्मनो (अवतारस्य) परिग्रहो न भवेद्, यदीदृशीव्याप्ते र्न मान्यतायां वा असदिति प्रतिपत्तौ (क्षीणे च जन्मप्ररिग्रहः इति पाठान्तरं अत्र कश्चिन्मन्यते, परन्तु पाठान्तरस्य प्रमाणं न दर्शितम्) अर्थात् क्षीणेऽपि कर्मणि, अवतारधारणस्य मते हेतोरभावेन सदा (सर्वकालं) अवतार–जन्मनः प्राप्ति र्भवेत्,

यदि धर्मध्वंसं दृष्ट्वा धर्मतीर्थस्य पुनः संस्थापनार्थं, जन्मिनां जन्मतो निस्तारार्थं करुणाबुद्धितोऽवतरति भवेत् इति धर्मतीर्थनिकारो हेतुरस्तीति वर्णनं न यौक्तिकं यतः कर्मकृतबुद्धिविपर्यासरूपाऽविद्यारूपस्य भवाधिकाररूपस्य च हेतोरभावेन जन्मनोऽवतारस्य सम्भवोऽपि न, ('दग्धे बीजे प्रादुर्भवति नाऽङ्कुरः' इति न्यायेन छद्मरूपबीजे दग्धे सति पुनर्भवरूपाङ्कुरो नोत्पद्यते एव,) यदीश्वरे भवाधिकारोऽविद्या वा तिष्ठतीति मते, भवाधिकारघातिकर्मच्छद्मवत्त्वेनेश्वरश्छद्मस्थो भवेत्, तत्र केवलज्ञानं कुतः सम्भवेत् ? अथवा सकलकर्मक्षयरूपोऽपवर्गः कुतः सम्भवेत् ? न सम्भवेदेव, तल्लक्षणाभावादेव.

ननु मुक्तात्मनां पुनरिहागमनस्य अभावे सत्यमेव भव्यानां (मुक्तिगमनयोग्यानां) उच्छेदेन–सर्वथा विनाशेन संसारशून्यता–संसारो भव्यजीवशून्यो भविष्यतीत्येतदसदालंबनं कथं न ग्राह्यमिति चेदुच्यते भव्यानामानन्त्येन (मध्यमानंतानंत–प्रमाणसंख्यावत्त्वेन) उच्छेदस्य–सर्वथा विनाशस्याऽसिद्धिरसम्भवोऽस्ति, यतः,अनन्ताऽनन्तकस्याऽनुच्छेदरूपत्वमस्ति अभावाभावस्य भावात्मकत्वमिव तथा च यावन्तो जीवा व्यवहारराशितो निर्गत्य मोक्षं यान्ति, तावन्तो जीवा अनादिनिगोदतः (अव्यवहारराशितः) निर्गत्य व्यवहारराशावागच्छन्ति, तस्मादेष संसारः भव्यजीवैरिक्तो न भावी, यथा निगोदराशिरक्षयानन्तरूपः, तथा भव्यराशिरप्यक्षयानन्तनित्यरूपोऽस्ति.

(अनंताऽनंतकालस्य स्पर्धां करोति एकैकस्मिन् निगोदे एतावन्तोऽनंता जीवाः सन्ति, भविष्यति कदाचिदपि निगोदस्य संख्याऽनादितो मुक्तिं गतेभ्यः सर्वं जीवेभ्यः अनंतगुणाऽवतिष्ठमाना वर्त्तते)

(यथा चोक्तं वार्तिककारेण–"अत एव च विद्वत्सु मुच्यमानेषु संततम्, ब्रह्माण्ड-लोकजीवानामनन्तत्वादशून्यता ॥१॥ अत्यन्यूनातिरिक्तत्वैर्युज्यते परिमाणवत् । वस्तुन्यपरिमेये तु नूनं तेषामसम्भवः ॥२॥" अन्यथा = यदि भव्यानामनन्तानन्तस्योच्छेदरूपस्य मान्यतायां सर्वभव्यानां मुक्तिभावेन युष्माकं मते तीर्थनिकारं दृष्ट्वा संसारे पुनरावृत्तिं प्राप्तस्येष्टमुक्तभगवद्गोशालक (विशिष्टगोशालकादि) संसारिवद् उपचरित–संसारभाजः—सर्वे संसारिण (मिथ्या) असत्य–संसारिण इति बलादापद्यते अनिष्टं चैतत्, मिथ्यात्वेनानिष्टमेव, जीवानां परिमेयत्वे मुक्ता संसारे पुनर्निवर्त्तन्तामित्येकापत्तिः. संसारः कदाचित् संसारिजीवशून्यो भवेदिति द्वितीयापत्तिः। एता आपत्तयः इष्टा भवितुं नार्हन्ति यतः, उपदेश्योपदेशकत्वाभावेनानिष्टापत्तय इति,)

अत एव वदामो वयं–येषां घातिकर्मरूपच्छद्म तत्कारणभूतघातिकर्मबन्धयोग्यतारूप भवाधिकाररूपंच्छद्म। एवमुभयरूपच्छद्मनो व्यावृत्तिरूपक्षयकारकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः इति = षड्विंशतितमपदस्य व्याख्या समाप्तिसूचयति.

शक्रस्तवस्य सप्तमीसंपद उपसंहारः—

तथाचार्हतां भगवतां कीदृशं स्वरूपमस्ति यतस्ते सततं नियतं स्तोतव्या एव सन्ति ? इति प्रश्ने, समाधानमीदृशं ज्ञेयम्–अर्हन्तो भगवन्तोऽनन्तज्ञानं अनन्तदर्शनं च पूर्वोक्त घातिकर्मतत्कारणभवाधिकाररूपच्छद्मक्षयरूपं विशिष्टं स्वरूपमत एवाप्रतिहतवरज्ञानदर्शनधरत्व–व्यावृत्तच्छद्मत्वरूपं स्वरूपं 'अप्पडिहयत आरभ्य वियट्टछउमाणं' यावत् पदद्वयेर्दर्शितमस्ति, तस्मात्, एषा द्विपदी सप्तमी स्वरूपसम्पद्, स्तोतव्यसम्पदः सकारणातत्स्वरूपवर्णनकारणसहिता वर्तते, कथ्यते च ॥

अथ पदचतुष्टयपदवती, आत्मतुल्यपरफलकर्त्तृत्वनामिकाया अथवा निजसमफलदनामिकाया अष्टमीसंपदो विवरणात् पूर्वं प्रथमपदस्य व्याख्यादौ शास्त्रकारेण क्रियमाणा अवतरणिका—

अथ शक्रस्तवस्य सप्तविंशतितमपदस्य व्याख्यारंभ—

एतेऽपि कल्पिताविद्यावादिभिस्तत्त्वान्तवादिभिः परमार्थेनाजिनादय एवेष्यन्ते "भ्रान्तिमात्रमसदविद्येति" वचनाद्, एतद्व्यपोहायाह—

"जिणाणं जावयाणं" जिनेभ्यो जापकेभ्यः, तत्र रागद्वेषकषायेन्द्रियपरीषहोपसर्ग-घातिकर्म्मजेतृत्वाज्जिनाः, न खल्वेषामसतां जयः, असत्त्वादेव हि सकलव्यवहारगोचरातीतत्वेन जयविषयताऽयोगात् भ्रान्तिमात्रकल्पनाऽप्येषामसङ्गतैव, निमित्तमन्तरेण भ्रान्तेरयोगात्, न चासदेव निमित्तम्, अतिप्रसङ्गात्,

चितिमात्रादेव तु तदभ्युपगमेऽनुपरम इत्यनिर्मोक्षप्रसङ्गः, तथापि तदसत्त्वेऽनुभवबाधा, न हि मृगतृष्णिकादावपि जलाद्यनुभवोऽनुभवात्मनाऽप्यसन्नेव,

आविद्वदङ्गनादिसिद्धमेतत्, न चायं पुरुषमात्रनिमित्त, सर्वत्र सदाऽभावानुपपत्ते, नैवं चितिमात्रनिबन्धना रागादय इति भावनीयम्, एवं च तथाभव्यत्वादिसामग्रीसमुद्भूतचरणपरिणामतो रागादिजेतृत्वादिना तात्त्विकजिनादिसिद्धि २७ ॥

पं.—"तत्त्वान्तवादिभिरिति" तत्त्वान्तं–तत्त्वनिष्ठारूपं निराकारं स्वच्छसंवेदनमेव वस्तुतया वदितुं शीलं येषां ते तथा तैः, एते च सुगतशिष्यचतुर्थप्रस्थानवर्त्तिनो माध्यमिका इति सम्भाव्यते, तेषामेव निराकारं स्वच्छसंवेदनमात्रमन्तरेण संवेदनान्तराणां भ्रान्तिमात्रतया एकान्तत एवासत्त्वाभ्युपगमात्, तथा च सौगतप्रस्थानचतुष्टयलक्षणमिदं, यथा–अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते, प्रत्यक्षो नहि बाह्यवस्तुविसरः सूत्रान्तिकैराश्रितः । योगाचारमतानुगैरभिहिता साकारबुद्धिः परा, मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम् ॥ १ ॥" इति । "प्रत्यक्षो नहि बाह्यवस्तुविसर इति यतोऽसावालम्बनप्रत्ययत्वेन स्वजन्यप्रत्यक्षज्ञानकाले क्षणिकत्वेन व्यावृत्तत्वात्तज्ज्ञानगतनीलाद्याकारान्यथाऽनुपपत्तिवशेन पश्चादनुमेय एव, प्रत्यक्षस्तु तद्ज्ञानस्य स्वात्मैव, स्वसंवदेनरूपत्वादिति, तथा तैरपि बुद्धो जिनत्वेनाभ्युपगम्यते, तदुक्तम्–"शौद्धोदनिर्दशबलो, बुद्धः शाक्यः पाह मितः गतसूः । मारजिदद्वयवादी, समन्तभद्रो जिनश्च सिद्धार्थः ॥ १ ॥" इति ॥

"नेत्यादि" न खलु–नैवैषां–रागादीनामसताम्–अविद्यमानानां जयो–निग्रहः, कुत इत्याह— "असत्त्वादेव" अविद्यमानत्वादेव "हि" स्फुटं "सकलव्यवहारगोचरातीतत्वेन" अनुग्रहनिग्रहादिनिखिललोकव्यवहारयोग्यतापेतत्वेन वान्ध्येयादिवत्, "जयविषयताऽयोगात्" जयक्रियां प्रति विषयभावायोगाद्, अभ्युच्चयमाह—"भ्रान्तिमात्रकल्पनाऽपि" 'भ्रान्तिमात्रमसदविद्यमान'मिति वचनात्, न केवलं जय इत्यपि शब्दार्थः "एषां" रागादीनां "असङ्गतैव" अघटमाना, कुत इत्याह— "निमित्तं"

जीवात्पृथक्कर्म्मरूपम् "अन्तरेण" विना, भ्रान्तेरयोगात्, पराशङ्कापरिहारायाह— "न च" नैव "असदेव" न किंचिदेवेत्यर्थो, निमित्तं प्रकृतभ्रान्तेः, हेतुमाह— "अतिप्रसङ्गात्" नित्यं सत्त्वमसत्त्वं वाऽहेतोरिति प्राप्तेरिति, पुनरप्याशङ्काह—

"चितिमात्रादेव" चैतन्यमात्रादेव पुनः स्वव्यतिरिक्तकर्म्मलक्षणसहकारिरहितात् "तदभ्युपगमे" भ्रान्तिमात्राभ्युपगमे "अनुपरमो" भ्रान्तिमात्रस्यानुच्छेदोऽभ्रान्तज्ञानेष्वपि भ्रान्तिनिमित्ततया परिकल्पितस्य चितिमात्रस्य भावात्, तत किमित्याह—"इति" एवम् "अनिर्मोक्षप्रसङ्गः" संसारानुच्छेदापत्तिः, मोक्षेऽपि भावात्, अभ्युपगम्यापि दूषणमाह—"तथापी" तिचितिमात्रादेव भ्रातिमात्राभ्युपगमेऽपि "तदसत्वं" भ्रान्तिमात्रासत्त्वे "अनुभवबाधा" तस्य स्वयं संवेदनं न प्राप्नोति. न ह्यसच्छशशृङ्गाद्यनुभूयत इति, एनामेव व्यतिरेकतः प्रतिवस्तूपन्यासेन भावयन्नाह—"न हि मृगतृष्णिकादावपि" मरुमरीचिकाद्विचन्द्रादावपि मिथ्यारूपे विषये, आस्तां सत्याभिमते जलादौ "अनुभवः" तज्ज्ञानवृत्तिः "अनुभवात्मना" ज्ञानात्मनाऽप्यसन्नेव, सविषयतया तु स्यादप्यसन्नित्यपिशब्दार्थः ॥

"आविद्वदङ्गनादिसिद्धमेतत्" सर्वजनप्रतीतमित्यर्थः, अत्रैव विशेषमाह—"न चायं" मृगतृष्णिकाद्यनुभवः "पुरुषमात्रनिमित्तः" पुरुषमात्रं—पुरुष एव तदनुभववान् स्वव्यतिरिक्तरविकरादिकारणनिरपेक्षो निमित्तं—हेतुर्यस्य स तथा, कुत इत्याह—"सर्वत्र" क्षेत्रे द्रष्टरि वा "सदा" सर्वकालम् "अभावाऽनुपपत्तेः" अनुपरमप्राप्तेः, प्रस्तुतयोजनामाह—"न" नैव "एवं" मृगतृष्णिकाद्यनुभववत् चितिमात्रनिबन्धना रागादयः, किन्तु चैतन्यव्यतिरिक्तपौद्गलिककर्म्मसहकारिनिमित्ता "इति भावनीयं प्राग्वदस्य भावना कार्या।

**टी.**—एतेऽपि–कल्पिताविद्यावादिभिः (वेदान्तपक्षे प्रपञ्चकारणरूपमाया–(अविद्या) या अनिर्वाच्यत्वेऽपि असद्– अविद्या–मायावादिभिः–अद्वैतवादिभिः) अथवा कल्पिताऽविद्याऽस्तीति वादिभिः,

"नाऽन्योऽनुभाव्यो बुद्धयाऽस्ति, तस्या नाऽनुभवोऽपरः। ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥ बाह्यो न विद्यते ह्यर्थो, यथा बालै विकल्प्यते। वासनालुठितं चित्तमर्थाभासे प्रवर्त्तते ॥" इति कस्मिंश्चिद् बौद्धग्रन्थे,

तत्त्वान्तवादिभिः (स्वस्वरूपावच्छिन्न— पूर्णाऽवस्था—ज्ञानमात्ररूप—तत्त्वान्न तत्त्वनिष्ठारूपं निराकारं स्वच्छसंवेदनमेव वस्तुतया वदितुं शीलं येषां ते तथा तत्त्वान्तवादिभिः—सुगतशिष्यचतुर्थप्रस्थानवर्तिभि र्माध्यमिकैः) माध्यमिकानामेव निराकारं—निर्विषयाकारं स्वच्छसंवेदनमेव स्वच्छ—संवेदनमात्रमन्तरेण संवेदनान्तराणां भ्रान्तिमात्रतया एकान्तत एवासत्त्वाभ्युपगमवादिभिः, (तथा च सौगतप्रस्थानचतुष्टयलक्षणमिदं यथा = "अर्थो ज्ञानसमन्वितो मतिमता वैभाष्यिकेणोच्यते, प्रत्यक्षो नहि बाह्यवस्तुविसरः

सूत्रान्तिकैराश्रितः । योगाचारमताऽनुगैरभिहिता साकारबुद्धिःपरा, मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम् ।।)

एतेऽर्हन्तो भगवन्तः परमार्थेनाजिनादय एवेष्यन्ते 'भ्रान्तिमात्रमसदविद्येति' वचनात्, अर्थात्–निराकारस्वच्छसंवेदनरूपं ज्ञानं विना सर्वज्ञानानि भ्रान्तिरूपमात्राणीति मत्वा एकान्तेनाऽसदविद्येति मतेन मध्यमा अजिनादय एवेष्यन्ते, तथा बुद्धं जिनत्वेन पर्याय-वाचकशब्दत्वेन 'बुद्धो जिनः' इति मन्यन्ते बौद्धाः, तन्मतनिरासायाह–

'जिनेभ्यो: जापकेभ्यो नमो नमः'

तत्र–जिनजापक–सूत्रघटकजिनशब्दस्वार्थः = रागस्य, द्वेषस्य, कषायाणां, इन्द्रियाणां (तद्विषयाणां) परीषहाणां, उपसर्गाणां घातिकर्मणो जेतृत्वात् (जयात्) जिना उच्यन्ते, यद्येते रागाद्याऽभावशत्रवः, असत्त्वविशिष्टाः–अविद्यमानाः सन्ति, असतां भावारीणां जयो–निग्रहोऽसन्–असंभवितो यतो रागादीनामस्तित्वाभावेन, अभावरूपत्वं, अत एवासत्त्व-कारणादेव सकलव्यवहारगोचरातीतत्वेन, अनुग्रहनिग्रहादिनिखिललोक–व्यवहारयोग्यता-रहितत्वेन वन्ध्यापुत्रादिवत्, जय (अभिभव) क्रियां प्रति रागादिनिष्ठविषयताया अभाव इति, अत एव 'भ्रान्तिमात्रकल्पनाऽपि भ्रान्तिमात्रमसदविद्यमान' मिति वचनात्, न केवलं जय इत्यपिशब्दार्थः एषां रागादीनां–रागादिविषयक–भ्रान्तिमात्र (भ्रान्ति हि मुख्येऽर्थे क्वचिद्दृष्टे सति करणापाटवादिनाऽन्यत्र विपर्ययस्य ग्रहणे प्रसिद्धा यथा शुक्तौ रजतभ्रान्तिः,) कल्पनाऽपि, अघटमाना, कथमिति चेदुच्यते, जीवाद्भिन्नं पृथक् कर्मरूपं निमित्तं विना भ्रान्तेरभावः,

(स्फटिको रक्तोऽस्तीति भ्रमात्मकज्ञानेऽस्मिन् जपाकुसुमादेः सान्निध्यरूपोपाधिरूपो दोषो निमित्तं तथा जीवाद् भिन्नं कर्तृरूपोपाधिदोषरूपनिमित्तमन्तरेण रागादौ भ्रान्ति-कल्पना असत्–मिथ्याचास्ति,)

तथा च रागादिरूपप्रकृतभ्रान्तिं प्रति असद् (न किञ्चिदेव) निमित्तं न मन्त-व्यमेव. कथमति चेदुच्यते–अतिप्रसङ्गनामको दोषो भवति, नित्यं सत्त्वमसत्त्वं वाऽहेतोरिति प्राप्तितो दोषः पूर्वोक्तो भवति. अर्थादसन्निमित्तजन्यभ्रान्तिः सदा सद्रूपाऽथवा सदाऽसद्रूपा भवेत् यत आकस्मिकं कार्यं नित्यसदथवा नित्यासद्रूपो भवतीति नियमोऽस्त्यतः पूर्वोक्तोऽतिप्रसंगो दोष आयाति.

किञ्च–चैतन्यमात्रादेव, अर्थात्, चैतन्यमात्रभिन्नकर्मरूपसहकारि (निमित्त) रहितात्–चितिमात्रजन्यभ्रान्तिमात्रस्य स्वीकारे, भ्रान्तिमात्रस्योच्छेदाभावोऽस्तित्वनित्यनियमो लगेद्, अभ्रान्तज्ञानेषु अपि, (निमित्ते सति नैमित्तिकेनावश्यं भवितव्यं, अन्यथा तत्तस्य निमित्तमपि न स्यादनलमिवाऽङ्कुरोत्पत्तेरनुच्छेद एव चितिभावे भ्रान्तेः) तथा च जीवाद्भिन्नकर्मरूपसहकारिरहितकेवलचितिमात्ररूपनिमित्तेन भ्रान्तिकार्यं भवति, अर्थाद् रागादिरूपप्रकृत–भ्रान्तिरूपकार्यं प्रति केवलचितिमात्रमेव निमित्तम्, यदि चितित्वेन भ्रान्तित्वेन कार्यकारणभावस्य त्मान्यता स्यात्, भ्रान्तिं प्रति चितिः कारणमस्तीति प्रतिपत्तौ, भ्रान्तिमात्रस्योच्छेदाभावप्रयुक्तः भ्रान्तिरविनाशिनी स्यात्, यतोऽभ्रान्तज्ञानेष्वपि भ्रान्तेर्निमित्तत्वेन कल्पितचितिमात्रस्य सत्ता वर्त्तते, तथा च चितिमात्ररूपकारणसत्त्वे भ्रान्तिरूपकार्यस्य सत्ता, ('निमित्तसत्त्वे कार्येणावश्यं भाव्यम्' इति नियमोऽस्ति, यदि एतन्नियमस्यास्वीकारे तत्कार्यस्य तन्निमित्तं न तिष्ठेत्, यथाङ्कुरोत्पत्ति प्रत्यग्निः अत एव चितिसद्भावे भ्रान्तेरुच्छेदाभावः शाश्वती भ्रान्तिर्भवेत्) अर्थान्मोक्षेऽपि चिति मात्रस्य सद्भावेन भ्रान्तेः शाश्वतत्वेन संसारोच्छेद (मोक्ष) स्याभावस्य (जिनत्वाभावस्य) प्रसङ्ग आपतेत्, अतएव कस्यचिदपि मोक्षस्य संभवो न, संसारः शाश्वतो भवेदित्यापत्तिरापत्तिष्यति.

भ्रान्तिमात्रं प्रति चितिमात्रकारणसत्तेति नियमस्वीकारे दोषदर्शनम् :– तथापि–भ्रान्तिमात्रस्य निमित्तं चितिमात्रमस्ति तथापि भ्रान्तिमात्रमसत्–किंचिन्नास्तीति मान्यतायां अनुभव–बाधारूपापत्तिर्भविष्यति, यतो, असद् भ्रान्तिमात्रं स्वयं अनुभवं–संवेदनं न प्राप्नोति, नहि असत्, शशशृङ्गादि, अनुभूयते.

भ्रान्तिमेव व्यतिरेकतः (असत् प्रतियोगि सत् इति प्रतियोगिपद्धत्या) प्रतिवस्तुनः (तादृशान्यवस्तुनः) उपन्यासेन भावना—

तथा च मिथ्यारूपविषय–मरुमरीचिका चन्द्रद्वयादिरूपविषयविषयक–ज्ञाननिष्ठ–अनुभवः अनुभवरूपेण–ज्ञानरूपेण–सद्रूपोऽस्ति, अर्थात्, मृगजलविषयक–ज्ञानस्याऽनुभवः (तज्ज्ञानवृत्तिः अनुभवः) ज्ञानरूपेण सन्नेवाऽस्ति, एवं च ज्ञानानामनुभवो वा ज्ञानरूपोऽनुभवः ज्ञानरूपेण सद्रूप एव, विषयास्तु सत्या मिथ्या वा भवेयुः, तन्नैवनिरीक्षणीयम्, परन्तु ज्ञानानामनुभवः वा ज्ञानरूपोऽनुभवः ज्ञानरूपेण सद्रूप एव नाऽसद्रूप एवेति विचा-

रणीयमत्र, अत एव भ्रान्तिरूपं ज्ञानं, अनुभव (वृत्तित्वेन) विषयत्वेनाथवाऽनुभवरूपेण सद्रूपोऽस्ति, असद्रूपो नास्ति, अन्यथा भ्रान्तिरूपं ज्ञानं, अनुभवे—संवेदने नायात्येव, अथवा-ऽनुभवरूपेण नानुभवो भवेत् ।

मौलिक—विषयस्य स्पष्टीकरणम् :— मृगजलादौ जलादिज्ञानं ज्ञानरूपेण सदस्ति, एतदाविद्वदङ्गनासिद्धमर्थात् सर्वजनप्रतीतमेव, एतस्मिन् मृगजलाद्यनुभवे चैतन्य—पुरुषाद् भिन्नसूर्यकिरणाद्यपेक्षाशून्यः केवलपुरुष एव (मृगजलादि—ज्ञानवान् पुरुष एव) निमित्तं नास्ति, यदि मृगजलादि ज्ञाने केवलपुरुष एव निमित्तमिति मान्यतायां सर्वत्र (सर्वक्षेत्रे वा सर्वद्रष्टरि पुरुषे) सदा मृगजलादौ जलज्ञानस्य सर्वथा अभावो न भविष्यति, एतावन्मात्रमपि न परन्तु प्रत्युत पुरुषनिमित्तस्य नित्यत्वेन तज्जन्यं मृगजलज्ञानं नित्यं भविष्यतीत्यापत्तिः । तथा च यथा मृगजलादिविषयकोऽनुभवः, चिति (चैतन्य—पुरुष) मात्र निमित्तजन्यो नास्ति, तथा रागादयः,चितिमात्रनिमित्तजन्या न, यथा मृगजलादिगतजलादिविषयकानुभवं प्रति पुरुषभिन्न—सैकतभूमिपतितरविकिरणाः कारणानि तथाऽत्र रागादिं प्रति पुरुषभिन्न पौद्गलिक—कर्माणि निबन्धनानि.

— कोष्ठकम् —

| | — प्रतिवस्तु — | — वस्तु — |
|---|---|---|
| (१) | मृगजलादि अनुभवः | रागादिः |
| (२) | पुरुषभिन्न सूर्यकिरणादि सहकारि जन्योऽस्ति. | पुरुषभिन्न पौद्गलिककर्म सहकारि कारण जन्योऽस्ति |
| (३) | अनुभवरूपेण सद्रूपोऽस्ति. | अनुभवरूपेण सद्रूपोस्ति. |

एवं च पौद्गलिककर्मरूपोपाधिजन्यरागादीनां विद्यमानत्वेन—सत्त्वेन तेषां नयोऽपि तत्त्वरूपेण— सद्रूपेण सिद्धो जात एवं ज्ञेयम् ।

तथा च तथाभव्यत्व—आदि (आदिपदेन सम्यक्त्वविशुद्धि—भावना—शुभ—शुद्धध्यान चारित्रमोहनीयक्षयादि ज्ञेयः) सामग्रीजन्यचरण (चारित्र—विरति—स्वस्वरूप-स्थिरता) रूप-परिणामेन रागादीनां जेतृत्व—जयादितः (आदिपदेन देशनादिद्वारा भव्यजीवजापक-

त्वादितः) तात्त्विकजिन (जापक) आदेः सिद्धिर्ज्ञेया. एवं शक्रस्तवस्य सप्तविंशतितम पदस्य व्याख्या समाप्ता.

अथ शक्रस्तवस्याष्टाविंशतितमपदस्य व्याख्याऽऽरम्भात्पूर्वं तत्पदस्याऽवतरणिकाऽवतार्यते—:

**एते चावर्त्तकालकारणवादिभिरनन्तशिष्यैर्भावतोऽतीर्णादय एवेष्यन्ते "काल एव कृत्स्नं जगदावर्त्तयती" तिवचनाद्, एतन्निरासायाह—"तीर्णेभ्यस्तारकेभ्यः" ज्ञानदर्शन-चारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः**

**नैतेषां जीवितावर्त्तवद्भवावर्त्तो, निबन्धनाभावात्, न ह्यस्यायुष्कान्तरवद्भवाधि-कारान्तरं, तद्भावेऽत्यन्तमरणवन्मुक्त्यसिद्धेः, तत्सिद्धौ च तद्भावेन भवनाभावः, हेत्व-भावात्, न हि मृतः**

**तद्भावेन भवति, मरणभावविरोधात्, एतेन ऋत्वावर्त्तनिदर्शनं प्रत्युक्तं, न्याया-नुपपत्तेः, तदावृत्तौ तदवस्थाभावेन परिणामान्तरायोगात्, अन्यथा तस्यावृत्तिरित्ययुक्तं, तस्य तदवस्थानिबन्धनत्वात् ॥**

**अन्यथा तदहेतुकत्वोपपत्तेः, एवं न मुक्तः पुनर्भवे भवति, मुक्तत्वविरोधात्, सर्वथा भवाधिकारनिवृत्तिरेव मुक्तिरिति, तद्भावेन भावतस्तीर्णादिसिद्धिः ॥ २८ ॥**

पं.—"एते च आवर्त्तकालकारणवादिभिरिति" आवर्त्तस्य–नरनारकादिपर्यायपरिवर्त्तरूपस्य काल एव कारणं–निमित्तमिति वावदूकैः, तीर्णाः ॥

"नैतेषांमित्यादि" न–नैव एतेषां–तीर्णानां "जीवितावर्त्तवत्" जीवितस्य–प्रागनुभूतस्यावर्त्तवत् –पुनर्भवनमिव "भवावर्त्तो" भवस्य–कर्माष्टकोदयलक्षणस्या–क्षीणस्यावर्त्त–उक्तरूपः कुत इत्याह—"निबन्धनाभावात्" निबन्धनस्य–हेतोर्वक्ष्यमाणस्याभावात्, इदमेव भावयति–"न" नैव "हि" यस्माद् "अस्य" तीर्णस्य "आयुष्कान्तरवत्" नारकाद्यायुष्कविशेषवद् "भवाधिकारान्तरं" क्षीणतद्भवाधिकारा-दन्यो भवाधिकारो येनासाविह पुनरावर्त्तते, विपक्षे बाधामाह—"तद्भावे"–तस्य आयुष्कान्तरस्य भवा-धिकारान्तरस्य च भावे–सत्तायाम् "अत्यन्तमरणवत्" सप्रकारजीवितक्षयेण मरणस्येव "मुक्त्य-सिद्धेः" मुक्तेः–तीर्णताया असिद्धेः–अयोगाद्, व्यतिरेकमाह—"तत्सिद्धौ च" तस्य–अत्यन्तमरणस्य मुक्ते र्वा सिद्धावभ्युपगतायां "तद्भावेन" आयुष्कान्तरसाध्येन भवाधिकारान्तरसाध्येन च भावेन "भवना-भावः" परिणतेरभावः कुत इत्याह—"हेत्वभावात्" हेतोः–आयुष्कान्तरस्य भवाधिकारान्तरस्य चाभा-वात्, पुनस्तदेव प्रतिवस्तूपमया भावयति– "नहि "मृतः" परासुः "तद्भावेन" अतीतामृतभावेन भवति,

**कथमित्याह—"मरणभावविरोधात्" मरणामरणयोरात्यन्तिको विरोध इतिकृत्वा "एतेन" मृतस्यामृतभावप्रतिषेधेन "ऋत्वावर्त्तनिदर्शनं" "ऋतुर्व्यतीतः परिवर्ततेपुन'रिति दृष्टान्तम्, "प्रत्युक्तं" निराकृतं, कुत इत्याह "न्यायानुपपत्तेः" तामेव दर्शयति "तदावृत्तौ" तस्य–ऋतोर्वसन्तादेरावृत्तौ–पुनर्भवने "तदवस्थाभावेन" तस्या–अतीतवसन्तादिऋतुहेतुकायाश्चूतादेरङ्कुरादिकायाः पुरुषस्य च बालकुमारादिकाया अवस्थाया भावेन–प्राप्त्या, परिणामान्तराभावात् स एव प्राक्परिणामः प्राप्नोति नापर इति भावः विपक्षे बाधामाह—"अन्यथा" परिणामान्तरे "तदावृत्तिः" तस्य ऋतोः आवृत्तिः—पुनर्भवनम् "इति" एतद् "अयुक्तम्" असाम्प्रतं, कुत इत्याह—"तस्य" ऋतोः "तदवस्थानिबन्धनत्वात्" तस्याः चूतादेरङ्कुरादिकाया अवस्थाया निबन्धनत्वात्, तदवस्थाजननस्वभावो ह्यसौ ऋतुः कथमिवासौ अवस्था तत्सन्निधौ न स्याद् ?, एतदेव व्यतिकरेत आह—**

**"अन्यथा" तत्सन्निधानेऽप्यभवने "तदहेतुकत्वोपपत्तेः" सः–अतीतऋतुलक्षणोऽहेतुर्यस्याः सा तथा तद्भावस्तत्त्वं तदुपपत्तेः" तद्धेतुकाऽसौ न प्राप्नोतीति भावः,**

**टी.**—एते च—आवर्त्तस्य—नरनारकादिपर्यायपरिवर्त्त (परिवर्तन) रूपस्य काल एव कारणं निमित्तमिति वादिभिरनंतस्य शिष्यैः भावतः (भावाऽपेक्षया) पूर्वोक्तविशेषण-विशिष्टा अर्हन्तो भगवन्त एतेऽतीर्णादय (स्वयं न तीर्णाश्च वस्तुतः न परतारका) एवेति इष्यन्ते, "काल एव कृत्स्नं जगदावर्त्तयती"ति वचनं तेषां वर्त्तते. अर्थात्कालः सकलं विश्वं परिवर्तयति— (कर्त्तुं अकर्त्तुं अन्यथाकर्त्तुं समर्थ ईशवत् सामर्थ्यवान् कालः, परिवर्त्तयितुमपरिवर्त्तयितुमन्यथापरिवर्त्तयितुमीष्टे स कालः) सर्वजगत्परिवर्त्तककाल एव नाऽन्य इति, तथाचाऽर्हन्तो भवावर्त्तवन्त एव यतः काल एष भवावर्तस्य कारणं विद्यत एव, तीर्णास्तदैव स्युर्यदा यत्र भवावर्त्तकारणकालस्याभावः स्यात्, कालस्यास्तित्वेन भवावर्त्तो वर्त्तते, भवावर्त्तस्य विद्यमानत्वेन ते—एतेऽर्हन्तोऽतीर्णादय एव कथ्यन्ते,

एतादृशावर्त्तकालकारणवादिनामनन्तनामक— गुरुशिष्याणां मत—निरसनायाह— 'तीर्णेभ्यस्तारकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमोनमः ।

अर्थात्, ज्ञानदर्शनचारित्ररूपनौकया भवार्णवं—संसारसागरं तीर्णवन्तस्तीर्णाः, तथा चैतद् विश्वमंडले पूर्वोक्तरत्नत्रयीरूपयोगपोतेन भवोदधिं स्वयं तीर्णाश्च परेषां तारका अर्हन्तो भगवन्तो भवन्ति, एवं च भवार्णवं तीर्णेषु अर्हत्सु भगवत्सु यथा अनुभूतपूर्व-द्रव्यप्राणधारणरूपजीवनस्य पुनर्भवनं असम्भवितं तथा क्षयभावं प्राप्तस्य कर्माष्टकस्योदय रूपभवस्य पुनर्भवनमसंभवितं अर्थाद् यथा तीर्णा—मुक्ता पुनर्द्रव्यप्राणधारणरूपजीवनधारका

न भवन्ति तथा पुनर्भवावतारधारका न भवन्ति यतो वक्ष्यमाणभवावर्त्तस्य निबन्धनाभावो वर्त्तते.

—पुनर्जीवनस्य वा पुनर्भवावतारस्य कारणानि प्रदर्श्य कारणाभावप्रयुक्तकार्याभावरूपविषयस्य पुष्टचर्चा—

तथा च जीवितावर्त्तरूपकार्य (पूर्वानुभूत जीवनस्य पुनः प्राप्तिं) प्रति आयुष्कान्तरं (नारकाद्यायुष्यविशेषः) कारणमस्ति, भवावर्तं (पुन र्भवावतारं) प्रति भवाधिकारान्तरं कारणमस्ति, यथा—आयुष्कान्तरकारणाभावप्रयुक्तः, जीवितावर्त्तरूपकार्यस्याभावो वर्त्तते। तथा भवाधिकारान्तरकारणाभावप्रयुक्तभवावर्त्तकार्यस्याभावो वर्त्तते। यथा नारकादिरूपायुष्कान्तरं (विशेषः) भवेत्तदा पूर्ववत् पुनर्जीवनधारको भवेत्, तथा क्षीणस्य (क्षयभावं प्राप्तस्य) भवावर्त्तकारणरूप (कषाययोगपरिणतिरूपकर्मबन्धयोग्यतारूप)—भवाधिकारादन्यो भवाधिकारो (भवाधिकारान्तरं) भवेत्तदाभवाधिकारान्तरेण संसारेऽस्मिन्, तीर्णा—मुक्ताः—सिद्धाः पुनरावृत्तिं कुर्युः। तथा च सर्वप्रकाराणामायुष्कविशेषाणामभावकूटेन जीवितावर्त्तस्य—पुनर्जीवनसामान्यस्याभावो यथा वर्त्तते तथा ज्ञानावरणीयदर्शनावरणीयादिकर्माष्टकोदयरूप—भवजनक कषाययोगपरिणतिरूपकर्मबन्धयोग्यतारूपभवाधिकारान्तरस्य (विशेषस्य) सर्वथाऽभावेन भवावर्त्तस्य—संसारे पुनरावृत्तेः सामान्याभावोऽस्ति, यदि नारकादिआयुष्कविशेषरूपायुष्कांतरस्य सत्ता भवेत्तदा सर्वप्रकारक जीवनविशेषक्षयजन्य जीवनसामान्याभावरूपाऽत्यन्तमरणवदसिद्धि र्भवेत्, तथा भवाधिकारान्तरस्य सत्तायां सकलकर्मविशेषाणां क्षयजन्यमुक्ति—तीर्णताया असिद्धि र्भवेत्, परंतु एतेषु तीर्णत्मिसु सर्वप्रकारकजीवनविशेषक्षयजन्यअत्यंतमरणस्य सिद्धिरस्ति, अर्थात्, आयुष्कान्तर—साध्यभावरूपेण (जीवनभावेन) जीवनपरिणाम—अवस्था—दशाया अभावोऽस्ति, तथा सकलकर्मविशेषाणां क्षयजन्यमुक्तिः सिद्धिरस्ति, अर्थाद् भवाधिकारान्तर—साध्यभावरूपेण (संसारिभावेन) संसार—भवपरिणति—दशाया अभावोऽस्ति, यतः आद्ये अत्यन्तमरणे आयुष्कान्तरकारणस्याऽभावोऽस्ति,

द्वितीये मुक्तौ भवाधिकारांतररूपकारणस्याऽभावोऽस्ति.

—तदेव वस्तु प्रतिवस्तुनः (तादृशान्यवस्तुनः) उपमया विचार्यते—

नहि मृतः तद्भावेन भवति, मरणभावविरोधात्,

अर्थात्–मृतः–द्रव्यप्राणैर्वियुक्तः, व्यतीतः, (अतीतः)अमृतभावेन–जीवनभावेन न भवतीति नियमो वर्त्तते यतः मरणभावस्य विरोधोऽस्ति, मरणामरणयोरात्यन्तिको विरोधोऽस्ति, यत्र मरणं तत्रामरणं नास्ति, यत्राऽमरणं तत्र मरणं नास्त्येव, परस्परं मरणामरणयोरात्यन्तिकविरोधः, यत्र मरणमस्ति तत्र पूर्वकालीनजीवनरूपममरणं नास्ति, पूर्वकालीनमरणामरणयो र्मध्ये विरोधः, मृतःसन् पूर्वकालीनामृतजीवनभावेन पुनर्जीवितवान् न भवति.

एतेन–मृतेऽमृतभावस्य प्रतिषेधेन, 'ऋत्वावर्त्तनिदर्शनं' प्रत्युक्तं–निराकृतं, ऋतु र्व्यतीतः परिवर्त्तते पुनः, इति दृष्टान्तः खण्डितः, यतः तत्र न्यायः युक्तिः, अनुपपन्नः–अयुक्तो भवति,

**ऋत्वावर्त्तदृष्टान्ते न्यायस्याघटमानत्वं दर्श्यते–**

व्यतीतस्य वसन्तादेः ऋतोरावृत्तौ–पुनर्भवने अर्थात्, एत एवर्तवः पुनः पुनः परिवर्त्तन्ते इति मान्यतायां, अतीतवसन्तादिऋतुरूपकारणजन्येन सहकारिवृक्षविशेषाणां, अङ्कुरादिरूपावस्थाभावेन च पुरुषस्य बालकुमारादिरूपाऽवस्थाभावेन (प्राप्त्या) परिणामान्तरस्य–अवस्थाऽन्तरस्याभावात् स एव प्राक्परिणामः (पूर्वावस्था) प्राप्नोति नाऽपरः (अतीत–वर्त्तमान–भविष्यत्कालीनेषु, ऋतुषु यदा भेदो नास्ति तदा वृक्षा दौवा पुरुषादौ दृश्यमाना, भिन्नभिन्नावस्था अथवा अनुभूयमानाः परिणामाः भासन्ते, एते, न प्रतिभासनीयाः, भूतकालीनर्तुना निर्मितवृक्षादौ अङ्कुरादिकावस्था तथा पुरुषे बालकुमारावस्थाऽसीत्, तेषां साऽवस्था, वर्त्तमानकालीनेन वा भविष्यत्कालीनेन, ऋतुना प्राप्ता भवेद्वा भविष्यति, यत ऋतौ, अर्थात्, कारणे भेदो नास्ति, तर्हि भिन्नभिन्नावस्थायां, अर्थात् कार्ये भेदः कथं ? एवं चैकऋतौ वा एतस्या एषैवेति ऋतोः कल्पनायां, ऋतुः वृक्षादौ वा पुरुषादौ एकैव दशा–एतस्या एषैव दशेति स्रष्टुं न शक्नोति, भिन्नभिन्नदशां न सृजेत्, परन्तु दशानां भेदोऽनुभूयते.

तस्माद् भिन्नाःसर्वे ऋतवः सन्ति, भूतवर्त्तमानभविष्यत्कालीना ऋतवो भिन्ना आसन्, सन्ति, भविष्यन्ति, एतस्या एषा नास्त्येवमिति न्यायम् )

यदि भिन्नभिन्नाः परिणामा 'भवन्ति एवं मान्यतायां 'व्यतीता ऋतव एत एव एते पुनः पुनरायान्ति' एवं_कथनं न्यायरहितं भवति अर्थात्, एकैव दशा एषैवैषा दशा नित्यत्वरहिताऽतः भिन्ना ऋतवः सन्ति, ते च भिन्नभिन्नदशायां निमित्तभूताः सन्ति. (अत्र कालत्रयनियतसहकारादिवृक्षादेरङ्कुरादि–अवस्थाया जनकत्वत्वसाजात्य–सादृश्यमवलम्ब्यैष दृष्टान्तः प्रसिद्धः, एत एवैते एवर्तवः पुनरागता इति प्रतीतिः सादृश्याऽऽलम्बनकारक-

२७

प्रत्यभिज्ञारूपाऽस्ति, त एव ते ऋतवः पुनरागताइति सिद्धं न भवति, परन्तु केवलं सादृश्यस्यैव भानं भवतीति )

**पूर्वोक्तप्रतिवस्तूपमारूपदृष्टान्तेन सह दार्ष्टान्तिकयोजना–**

यथा मृतः सन्, अमृतभावसम्पन्नो न मन्यते—जीवनभावसम्पन्नो न कथ्यते यतः मरण-भावेन सहामृतभावस्य विरोधो वर्त्तते, तथा मुक्ताः (सर्वथा सर्वकर्मरहिता आत्मानः) पुनर्भवे न जायन्ते (नावतरन्ति) यतो मुक्तत्वेन सहपुनर्भवाऽवतारस्य विरोधोऽस्ति, मुक्तत्वाऽमुक्तत्वयो मिथोऽत्यन्तविरोधभावोऽस्ति, किञ्च मुक्तिः सैव कथ्यते, यत् सर्वथा ( सर्वप्रकारावच्छेदेन ) कषाययोगपरिणतिरूपकर्मबन्धयोग्यतारूपभवाधिकारस्य निवृत्तिः (आत्यन्तिको ध्वंसः) एषैव सत्या मुक्तिरस्ति, मुक्ता एतत्मुक्तिभावेन युक्ता अतो भावतः (वस्तुतः–निश्चयतः) अर्हन्तो भगवन्त-स्तीर्णतारकाः सन्तीति सिद्धं—युक्तियुक्तमेवेवं शक्रस्तवस्याष्टाविंशतितमपदस्य व्याख्या समाप्ता ।

शक्रस्तवस्यैकोनत्रिंशत्तमपदस्य व्याख्यारम्भतः पूर्वं क्रियमाणाऽवतरणिकाया अवतारः—

**एतेऽपि परोक्षज्ञानवादिभिर्मीमांसकभेदैर्नीत्या अबुद्धादय एवेष्यन्ते, "अप्रत्यक्षा च नो बुद्धिः, प्रत्यक्षोऽर्थः" इति वचनाद्, एतद्व्यवच्छेदार्थमाह–" बुद्धेभ्यः बोधकेभ्यः " अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवाजीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः, स्व-संविदितेन ज्ञानेन, अन्यथा बोधायोगात्, नास्वसंविदिताया बुद्धेरवगमे कश्चिदुपायः.**

**अनुमानादिबुद्धेरविषयत्वात्, न ज्ञानव्यक्तिर्विषयः, तदा तदसत्त्वात्, न तत्सामान्यं, तदात्मकत्वात्, न च व्यक्त्यग्रहे तद्ग्रह इत्यपि चिन्त्यं,**

**नार्थप्रत्यक्षता लिङ्गं, यत्प्रत्यक्षपरिच्छेद्योऽर्थ एवार्थप्रत्य-क्षता, प्रत्यक्षकर्मरूपतामापन्नोऽर्थ एव, न चेयमस्य विशिष्टावस्था विशेषणाप्रतीतौ प्रतीयत इति परिभावनीयम् ॥**

**एवं चेन्द्रियवदज्ञातस्वरूपैवेयं स्वकार्यकारिणीत्यप्ययुक्त-**

## मेव, तत्कार्यप्रत्यक्षत्वेन वैधर्म्म्याद्, अतोऽर्थप्रत्यक्षताऽर्थपरिच्छेद एवेति नीत्या बुद्धादिसिद्धिः ॥ २९ ॥

पं०...."अन्यथा बोधेत्यादि" अन्यथा–अस्वसंविदितत्वे बुध्धेर्बोधायोगात्–जीवादितत्त्वस्य संवेदनायोगात्, स्याद्वक्तव्यं–बुद्ध्यन्तरेण बुद्धिसंवेदने प्रकृतसिद्धिर्भविष्यतीत्याशङ्क्याह–"नास्वसंविदिताया बुद्धेः–प्रत्यक्षादिरूपाया अवगमे कश्चिदुपायो–बुद्ध्यन्तरलक्षणः, कुत इत्याह–

"अनुमानादिबुद्धेरविषयत्वाद्" अनुमानागमादिबुद्ध्यन्तरस्य तत्राप्रवृत्तेः, एतदेव भावयति–"न ज्ञानव्यक्तिः" प्रतिनियतबहिरर्थग्राहिका प्रत्यक्षादिरूपाऽनुमानादिबुद्धेः "विषयो" ग्राह्यः, कुत इत्याह–"तदा" अनुमानादिबुद्धिकाले "तदसत्त्वात्" तस्या–ज्ञानव्यक्तेर्ग्राह्यरूपाया असत्त्वात्, यौगपद्येन ज्ञानद्वयस्यानभ्युपगमात्, तर्हि तत्सामान्यं विषयो भविष्यतीत्याह–"न तत्सामान्यं" न प्रत्यक्षादिवस्तुसामान्यं, विषय इत्यनुवर्त्तते, कुत इत्याह–तदात्मकत्वात्" व्यक्तिरूपज्ञानस्वभावत्वात्. सामान्यस्य व्यक्त्यभावे तदभावाद्, अभ्युच्चयमाह–"न च" नैव "व्यक्त्यग्रहे" व्यक्तौ तदाधारभूतायामपरिच्छिद्यमानायां "तद्ग्रहः" सामान्यग्रहः किञ्चिद्व्यक्तिभ्यो भेदाभ्युपगमे "इत्यपि" एतदपि, न केवलव्यक्त्यभावे सामान्याभाव इत्यपि शब्दार्थः "चिन्त्यं" परिभाव्यं, वृक्षादिशेषप्रमेयेषु इत्थमेव दर्शनात्, किञ्च–साध्याविनाभुवो लिङ्गान्निश्चितात्साध्यनिश्चायकमनुमानं, न चात्र तथाविधं लिङ्गमस्ति, तथा चाह–

"न" नैव "अर्थप्रत्यक्षता" लिङ्गान्तरासम्भवेनापरैर्लिङ्गतया कल्पिता वक्ष्यमाणरूपा "लिङ्गं" हेतुर्बुद्धिग्राहकानुमानस्य, कुत इत्याह–"यद्" यस्मात् "प्रत्यक्षपरिच्छेद्योऽर्थ एव न तु तत्परिच्छेदोऽपि "अर्थप्रत्यक्षता" लिङ्गाभिमता एतदेव स्पष्टयति–"प्रत्यक्षकर्म्मरूपतां" प्रत्यक्षस्य–इन्द्रियज्ञानस्य कर्म्मरूपतां–विषयतामापन्नोऽर्थ एव, न तु तद्व्यतिरिक्तं किञ्चिद्, यदि नामैवं ततः किमित्याह–"न चेयं प्रत्यक्षता "अस्य" अर्थस्य "विशिष्टावस्था" प्रत्यक्षज्ञानविषयभावपरिणतिरूपा "विशेषणाप्रतीतौ" विशेषणस्य–प्रत्यक्षज्ञानस्याप्रतीतौ–असंवेदने "प्रतीयते" निश्चीयत इति परिभावनीयं, नहि प्रदीपादिप्रकाशाप्रतीतौ तत्प्रकाशितघटादिप्रतीतिरुपलभ्यते, न चान्वयव्यतिरेकाभ्यामनिश्चिताद्धेतोः साध्यप्रतीतिरिति स्याद्वक्तव्यं–यथेन्द्रियं स्वरूपमप्रतीतमपि ज्ञानं प्रत्यक्षं जनयति, तथा तद्भवा बुद्धिरपि स्वयमप्रतीताऽप्यर्थप्रत्ययं करिष्यतीत्याशङ्कां परिहरन्नाह–

टी....एतेऽपीति–ज्ञानं परोक्षं (अतीन्द्रियं) अस्ति, (ज्ञानं प्रत्यक्षं–स्वसंविदितं नास्ति) इत्येवं वादिभि र्मीमांसकभेदैः (कुमारिलभट्टानुयायिभिः) ज्ञानं, स्वयं स्वं न जानाति–स्वसंविदितं नास्ति, यतो ज्ञाने क्रियाया असंभवः, यथाऽत्यन्तनिपुणो नटोऽपि स्वयं स्वं स्कन्धं नारोहति, तथा ज्ञाने क्रियाया असम्भवः, अतो ज्ञानमतीन्द्रियमस्ति–परोक्षमस्ति, (१) किञ्चार्थैः सहेन्द्रियबुद्धिद्वयस्य सम्बन्धे जाते सति, इन्द्रियबुद्धिभ्यां ज्ञानं जायते ततः (२) पदार्थानां प्राकट्यं अर्थप्राकट्यं) जायते ततः जायते ततः (३) एवमीदृशं ज्ञानं भवति

'मम पदार्थज्ञानं जातं' यथा घटेन सहेन्द्रियबुद्धयोः सम्बन्धाद् घटज्ञानं ततः ईदृशं ज्ञानं भवति 'मया घटो ज्ञातोऽस्ति' ततो घटज्ञानानन्तरं घटप्राकट्यं (ज्ञातत्वं) जायते, इदं घटप्राकट्यं ज्ञानात् पूर्वं न भवति, ज्ञानोत्पत्त्यनन्तरं भवति, अस्मादेतत् 'घटप्राकट्यं' ज्ञानेन जायते, अत एव वयं अर्थप्राकट्यान्यथानुपपत्तिहेतुना ज्ञानं जानीमः, ज्ञानस्य ज्ञानं कुर्मः इति परोक्षज्ञानवादिभिः मीमांसकभेदैः ( कुमारिलभट्टानुयायिभिः ) नीत्या—न्यायेनेतेऽर्हन्तो भगवन्तः अबुद्धा ( स्वसंविदितज्ञानरहिता, आदिपदेनाबोधका एवेष्यन्ते, )

तेषां वचनमिदं 'नो—अस्माकं बुद्धिः अप्रत्यक्षा—परोक्षरूपा, अर्थः प्रत्यक्षोऽ'स्तीति, इति प्रतिपादयतां मीमांसकविशेषाणां मतखण्डनायाह—

''बुद्धेभ्यो बोधकेभ्यो नमो नमः''। अर्थात् (मिथ्यात्वसहितज्ञान) रूप निद्रारूपभावनिद्रायां प्रसुप्ते जगति (विश्वे) परोपदेशं विना जीवाऽजीवादिरूपं तत्त्वं ( स्वप्रकाशकप्रत्यक्षज्ञानद्वारा ) बुद्धवन्तो बुद्धाः स्वसंविदितेन ज्ञानेन, अन्यथा बोधायोगात्,

स्वपरप्रकाशकज्ञानस्य चर्चा=यथा दीपकः स्वयं स्वं तथा घटादिपरपदार्थान् प्रकाशयति, तथा ज्ञानं ( जीवस्वभावः ) स्वयं स्वं ( स्वस्वरूपं ) तथा परपदार्थान्, जानाति, तथा च स्वसंविदित (स्वप्रकाशक—ज्ञानविषयकज्ञानरूप) ज्ञाने सत्येव जीवाजीवादितत्त्वविषयक बोध सत्त्वे सत्ताऽस्ति, स्वसंविदित (स्वप्रकाशक) ज्ञानस्याभावे सति जीवाजीवादितत्त्वविषयक—बोधरूपज्ञानस्याभावः,एतादृशान्वयव्यतिरेकसहचारज्ञानेनेदं सिद्धं भवति, स्वसंविदितज्ञानं कारणमस्ति, यदा जीवाजीवादितत्त्वविषयकबोधरूपं ज्ञानं कार्यं, यदि ज्ञानं स्वसंविदितं न मन्येत, तदा स्व (बुद्धि) ज्ञानं कर्तुं द्वितीयादिज्ञानापेक्षातः प्रकृतसिद्धिर्भविष्यतीति चेदुच्यते, अस्वसंविदिताया बुद्धेः—प्रत्यक्षादिरूप बुद्धेरवगमे (यज्ज्ञानं स्वरूपज्ञानेऽसमर्थं तज्ज्ञानान्तरेणाऽपि ज्ञातुमशक्यं तच्च स्वपरभाववेदनाऽर्हे) कश्चिदुपायः—बुद्ध्यन्तर (बुद्धिभिन्न बुद्ध्यन्तरमनुमानादि) रूप उपायो न, अर्थात् परप्रकाशकानुमानागमादिरूप—सर्वज्ञानस्य विषयः प्रत्यक्षादिरूप बुद्धिर्न, परप्रकाशकप्रत्यक्षादिरूपबुद्धेरवगमकमनुमानादिरूपं ज्ञानान्तरं नास्ति, प्रत्यक्षादिरूपबुद्धेरवगमे अनुमानादिरूपभिन्नबुद्धि र्न प्रवर्त्तते, विषयत्वात्, अर्थात् प्रत्यक्षबुद्धेर्विषयः योग्यसम्मुखस्थः पदार्थः, तदाऽनुपलभ्यमानपदार्थः, अनुमानज्ञानविषयः, प्रत्यक्षाऽनुमानाभ्यामनुपलभ्यमान पदार्थः, परलोकात्मादिः, आगमस्य विषयो भवति, एवं प्रत्यक्षादिप्रमाणानां विषयो नियतोऽस्ति,

इदमेव हार्दं=स्वसंविदितादन्यज्ञानं, प्रत्यक्षादिरूपज्ञानं विषयत्वेन न गृह्णाति यतः सर्वज्ञानं भिन्नभिन्नविषयकं वर्त्तते तदा स्वसंविदितं ज्ञानं स्वयं ( प्रत्यक्षादिरूपं ज्ञानं ) स्वं विषयत्वेन ग्रहीतुं समर्थमस्ति, यतः स्वविषयकं स्वसंविदितं ज्ञानं भवति यतो ज्ञानं सविषयकं कथ्यते.

अनुमानादिबुद्धिगतविषयस्य चर्चा=प्रतिनियतबाह्य (पर) पदार्थरूपविषयग्राहकप्रत्यक्षादि-रूपज्ञानव्यक्ति', (विशेषः) अनुमानादिज्ञाने विषयत्वेन न भासते, अर्थात्, अनुमानादिज्ञानं प्रतिनियतपरपदार्थग्राहकप्रत्यक्षादिज्ञानं विषयत्वेन न गृह्णाति, यतः तदा–अनुमानादिबुद्धिकाले ग्राह्यविषयरूपप्रत्यक्षादिज्ञानव्यक्ते (विशेषस्य) असत्त्वमस्ति–(अभावोऽस्ति) यतो यौगपद्येनैक-समयाऽवच्छेदेन ज्ञानद्वयस्यास्वीकारः तथा चानुमानादिबुद्धेः प्रत्यक्षादिवस्तुगत–सामान्यं विषयो न, यतः प्रत्यक्षादिरूपज्ञानव्यक्त्या सह प्रत्यक्षादिज्ञान–सामान्यं तदात्मकं–तदभिन्नं वर्त्तते, ज्ञानव्यक्तिसत्त्वे ज्ञानसामान्यस्य सत्ताऽस्ति, ज्ञानव्यक्तेरभावे ज्ञानसामान्याभावः।

किञ्चिद् विशेषेभ्यो सामान्यं भिन्नमस्तीति स्वीकारे सामान्यज्ञानाधारभूत–प्रत्यक्षादिव्यक्ते ग्रहणं यदा नास्ति तदाधेयभूत–ज्ञानसामान्यस्य ग्रहणं कुतः सम्भवेत्? (यदा प्रत्यक्षादि-ज्ञानविशेषाणां कूटः, अनुमानादि बुद्धेर्विषयो नास्ति तदा ज्ञानसामान्यमपि विषयत्वेन कुतः सम्भवेत्?) केवलं व्यक्तेरभावे सामान्याभावमात्रं नास्ति, अपितु ज्ञानरूपव्यक्तेरग्रहणे ज्ञानसामान्यग्रहणमविचिन्त्यं–नास्ति, यथा वृक्षादिव्यक्तेरभावे वृक्षादिसामान्याभावस्तथा वृक्षा-दिव्यक्तेरग्रहणे वृक्षादिसामान्यस्याग्रहणमस्ति. एवं विचारणीयम्।

भाट्टसिद्धान्तः=पदार्थस्य प्राकट्येन (ज्ञातता–अर्थप्रत्यक्षताद्वारा) ज्ञानस्य संवेदनं (अहं ज्ञानं जानामीति ज्ञानं–अनुव्यवसायात्मकं) भवति, अर्थाद् घटज्ञानाऽनन्तरं (अर्थ-विषयकप्रत्यक्षज्ञानाऽनन्तरं) घटस्य (अर्थस्य) प्राकट्यं (अर्थप्रत्यक्षता–ज्ञातता) भवति, इदं घटप्राकट्यं, घटज्ञानात् पूर्वं नोत्पद्यते, घटज्ञानानन्तरमुत्पद्यतेऽतएव घटप्राकट्यमिदं घटज्ञाना-दुत्पद्यते, अनेन अर्थप्राकट्येन ज्ञानस्य स्वसंवेदनं (ज्ञानविषयकज्ञानं) उत्पद्यते, अर्थप्राकट्यरूपं कार्यं दृष्ट्वा, अर्थज्ञानरूपकारणज्ञानं अनुमीयते, यथा धूमकार्यं दृष्ट्वा, अग्निज्ञानमनुमीयते, तथा च घटज्ञानं विना घटप्राकट्यस्यानुपलब्धिः अर्थाद्, घटप्राकट्याऽन्यथानुपपत्त्या घटज्ञानमनुमीयते, साध्येन सह अविनाभावसंबंधयुक्तः (साध्यनिरूपितव्याप्तिविशिष्टः) निश्चितं यत् तल्लिङ्गेन यज्ज्ञानं साध्यं निर्णयति तज्ज्ञानमनुमानं।

यथाहि–'प्रत्यक्षादिबुद्धि गृह्यते' अर्थप्रत्यक्षतावत्त्वात्, अत्र अनुमानप्रयोगे ज्ञानविषयत्वं साध्यं, अर्थप्रत्यक्षता हेतुरस्ति अर्थात् प्रत्यक्षादिबुद्धिविषयक–ग्रहणरूप–साध्यं प्रति अर्थप्रत्यक्षता (ज्ञातता) हेतुरस्ति, अर्थप्रत्यक्षतारूपहेतुना प्रत्यक्षादिबुद्धिविषयकग्रहणं साध्यतेऽथवा प्रत्यक्षादि-बुद्धिमध्ये प्रत्यक्षादिज्ञानविषयत्वरूपं साध्यं अर्थप्रत्यक्षतारूपहेतुना साध्येत।

बुद्धिग्राहकानुमानस्य (बुद्धिविषयकज्ञान (स्वसंविदित) साधकानुमानस्य) लिङ्गान्तरा-सम्भवेनान्यै लिङ्गतया कल्पिता वक्ष्यमाणरूपा 'अर्थप्रत्यक्षता' लिङ्ग–हेतु न, कथमिति

चेदुच्यते यस्मात् प्रत्यक्षपरिच्छेद्योऽर्थ एव प्रत्यक्षज्ञानज्ञेयभूत एवार्थ एव 'अर्थ–प्रत्यक्षता' लिङ्गत्वेनाभिमता (परन्तु अर्थविषयकप्रत्यक्षज्ञानमपि न, अर्थ–प्रत्यक्षतां) अर्थात् 'अर्थ-प्रत्यक्षीकरोमी' ति प्रतीतिसिद्धा, इन्द्रियज्ञानरूपप्रत्यक्षस्य कर्मरूपतां–विषयतां प्राप्तोऽर्थ एव– इन्द्रियज्ञानरूपप्रत्यक्ष–ज्ञानविषयीभूतोऽर्थ एव अर्थप्रत्यक्षतायाः स्वरूपं, न तु तद्व्यतिरिक्तं किञ्चित्, (इन्द्रियज्ञानरूपप्रत्यक्षज्ञाननिरूपितविषयताविशिष्टोऽर्थ एवार्थ–प्रत्यक्षताऽस्ति.)

तथा च प्रत्यक्षज्ञानरूपविशेषणस्याप्रतीतौ–असंवेदने सति, इयं प्रत्यक्षता अर्थस्य–अर्थ-निष्ठैषा, 'विशिष्टाऽवस्था'–प्रत्यक्षज्ञानविषयभावपरिणतिरूपा विशिष्टावस्था (रूपा प्रत्यक्षता) न प्रतीयते–निर्श्चीयते इति परिभावनीयम्, (यतः विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वमिति न्यायोऽत्र विचार्यः) एवं च यथा प्रदीपादेः प्रकाशः, स्वयमप्रकाशितत्वेन, प्रदीप–प्रकाशेन प्रकाशितघटादे र्निश्चयो न भवति तथा प्रत्यक्षज्ञानरूपविशेषणेऽज्ञाते सति अर्थस्य प्रत्यक्षज्ञान-विषयभावपरिणतिरूपप्रत्यक्षतारूपविशिष्टावस्थाया निश्चयो न भवति, अत एवान्वयव्यतिरेकाभ्याम-निश्चित–अर्थप्रत्यक्षतारूपलिङ्गेन बुद्धिविषयकज्ञानरूपसाध्यस्य निश्चयो न भवति.

स्याद्वक्तव्यं–यथेन्द्रियं स्वयमप्रतीतमपि ज्ञानं प्रत्यक्षं जनयति तथा तद्भवा बुद्धिरपि स्वयमप्रतीताऽऽप्यर्थं प्रत्ययं करिष्यति, अर्थाद् यथेन्द्रियं स्वयमज्ञातं (स्वयं स्वमजानत्–अस्व-प्रकाशकं सत्) अपि प्रत्यक्षज्ञानमुत्पादयति तथेन्द्रियजन्यबुद्धिः (प्रत्यक्षादिबुद्धिः) अपि स्वयमज्ञाता (स्वयं स्वं अजानती) जीवाजीवादितत्त्वनिर्णयं करिष्यतीति शङ्कापरिहारायाह 'एवं चे' ति.

वादी कथयति–इन्द्रियवदज्ञातस्वरूपा (स्वयं स्वं स्वमजानती) प्रत्यक्षबुद्धिरियं स्वकार्यं (अर्थरूपविषयविषयकज्ञानरूपकार्यं) करोतीत्यपि कथनं यथा प्रत्यक्षबुद्धौ अनुमानादिज्ञान-विषयताया निरूपणं युक्तिबाह्यम्, तथैतदपि पूर्वकथनं युक्तियुक्तं न, यतः इन्द्रियजन्यज्ञाननिष्ठ (निरूपित) प्रत्यक्षतया सह बुद्धिजन्य (कृत) अर्थप्रत्यक्षताया वैधर्म्यमस्ति–समानधर्मता नास्ति, अर्थात्, अर्थप्रत्यक्षं विजातीयं च बुद्धिकृतार्थप्रत्यक्षं विजातीयं–विषममस्ति, अत एवेन्द्रियवत् स्वयमज्ञातस्वरूपा प्रत्यक्षबुद्धिरर्थज्ञानं करिष्यतीति वर्णनमयुक्तं यतः दृष्टान्तस्य वैषम्यमस्ति,

(१) बुद्धिजन्यार्थप्रत्यक्षता=अर्थविषयकज्ञानमेव स्वबुद्धावेव (स्वज्ञान एव) अर्थस्फुराय-माणस्वभावा (विषयप्रतीतिरेव) बुद्धिप्रत्यक्षता–बुद्धिजन्यार्थप्रत्यक्षता यथा मया घटो दृष्टः,

(२) इन्द्रियजन्यार्थप्रत्यक्षता=इन्द्रियेण सहार्थसन्निकर्षे (संयोगादिसंबन्धे) सति अर्थ-विषयकप्रतीति (ज्ञान) रूप प्रत्यक्षता, अत्रैषेन्द्रियजन्यार्थप्रत्यक्षता यथाऽयं घट इति.

एवमुभयकोटिकार्थघटनेनाऽर्थात्—स्वसंविदितार्थपरिच्छेदरूपकारणेन बाह्यार्थपरिच्छेदरूपकार्येणाऽत एव ( बुद्धिकृतेन्द्रियकृत ) कार्यकारणरूपार्थपरिच्छेद एवार्थ प्रत्यक्षता ज्ञेयेति नीत्या—न्यायेन—युक्तितः, बुद्ध—बोधकपदस्य सिद्धि र्ज्ञेया. इति शक्रस्तवस्य एकोनत्रिंशत्तमपदस्य व्याख्या स ।२९।।

अथ शक्रस्तवस्य त्रिंशत्तमपदस्य व्याख्यातः पूर्वं तस्याऽवतरणिकाऽवतारः—

**एतेऽपि जगत्कर्तृलीनमुक्तवादिभिः सन्तपनविनेयैस्तत्त्वतोऽमुक्तादय एवेष्यन्ते, "ब्रह्मवद्ब्रह्मसङ्गतानां स्थिति" रिति वचनाद्, एतन्निराचिकीर्षयाऽऽह—**

**"मुत्ताणं मोयगाणं" "मुक्तेभ्यो मोचकेभ्यः, चतुर्गतिविपाकचित्रकर्म्मबन्धमुक्तत्वान्मुक्ताः कृतकृत्या निष्ठितार्था इति योऽर्थः, न जगत्कर्त्तरि लये निष्ठितार्थत्वं, तत्करणेन कृतकृत्यत्वायोगात्, हीनादिकरणे चेच्छाद्वेषादिप्रसङ्गः, तद्व्यतिरेकेण तथाप्रवृत्त्यसिद्धेः, एवं सामान्यसंसारिणोऽविशिष्टतरं मुक्तत्वमिति चिन्तनीयं, निमित्तकर्तृत्वाभ्युपगमे तु,**

**तत्त्वतोऽकर्तृत्वं, स्वातन्त्र्यासिद्धेः, न च द्वयोरेकीभावोऽन्यतराभावप्रसङ्गात्, न सत्तायाः सत्तान्तरप्रवेशोऽनुपचयः, उपचये च सैव सेत्ययुक्तं, तदन्तरमासन्नः स इति नीतिः।**

**नैवमन्यस्यान्यत्र लय इति मोहविषप्रसरकटकबन्धः, तदेवं निमित्तकर्तृत्वपरभावनिवृत्तिभ्यां तत्त्वतो मुक्तादिसिद्धिः ॥३०॥ एवं जिनजापकतीर्णतारकबुद्धबोधकमुक्तमोचकभावेन स्वपरहितसिद्धेरात्मतुल्यपरफलकर्तृत्वसम्पदिति ॥८॥**

पं०..."एवं च" अनेन प्रकारेणानुमानादिविषयताऽघटनेन प्रत्यक्षबुद्धिः इन्द्रियवदज्ञाता—स्वयमप्रतीतैव प्रत्यक्षबुद्धिः "स्वकार्यकारिणी" स्वकार्यं विषयस्य परिच्छेद्यत्वं तत्कारिणी "इत्यपि" एतदपि, न केवलमस्यानुमानादिविषयत्वमयुक्तमेव, कुत इत्याह—"तत्कार्यप्रत्यक्षत्वेन" तस्य—इन्द्रियस्य कार्यं—विज्ञानं तस्य प्रत्यक्षत्वं तेन "वैधर्म्यात्" वैसदृश्याद्बुद्धिकृतार्थप्रत्यक्ष-

तायाः, अन्यादृशं हीन्द्रियप्रत्यक्षमन्यादृशं बुद्धेः, इदमेवाह–"अतः" इन्द्रियाद् अर्थप्रत्यक्षता–अर्थपरिच्छेद एव विषयप्रतीतिरेवो पलब्धव्यापाररूपा, बुद्धेस्तु विषयस्यो पलभ्यमानतैवार्थप्रत्यक्षता, साधर्म्यसिद्धौ च दृष्टान्तसिद्धिरिति ॥

"नेत्यादि," न नैव जगत्कर्त्तरि–ब्रह्मलक्षण आधारभूते लये–अभिन्नरूपावस्थाने मुक्तानं निष्ठितार्थत्वं, कुत इत्याह–"तत्करणेन" तस्य–जगतः करणेन–ब्रह्मसाङ्गत्येन युक्तानां, अतः कृतकृत्वायोगाद्, अत्रैवाभ्युच्चयमाह–"हीनादिकरणे च" हीनमध्यमोत्कृष्टजगत्करणे मुक्तानाम् "इच्छाद्वेषादिप्रसङ्गः" सङ्कल्पमत्सराभिष्वङ्गप्राप्तिः, कुत इत्याह–"तद्व्यतिरेकेण" इच्छाद्यन्तरेण "तथाप्रवृत्त्यसिद्धेः" वैचित्र्येण प्रवृत्त्ययोगाद्, एवं जगत्करणे "सामान्यसंसारिणो" मनुष्यादेरन्यतरस्माद्, "अविशिष्टतरम्" अतिजघन्यं "मुक्तत्वमिति चिन्तनीयम्" अस्य भावना कार्या, अन्यस्य जगत्कर्तृमशक्तत्वेन परिमितेच्छादिदोषत्वाद्, अथ कर्म्मादिकृतं जगद्वैचित्र्यं, पुरुषस्तु निमित्तमात्रत्वेन कर्त्तेत्यपि निरस्यन्नाह–"निमित्तकर्तृत्वाभ्युपगमे तु" निमित्तं सन्नसौ कर्त्ता, इच्छादिदोषपरिजिहीर्षयेत्येवमङ्गीकरणे–

"तत्त्वतो" निरुपचरिततया अकर्तृत्वं पुरुषस्य. हेतुमाह–"स्वातन्त्र्यासिद्धेः" स्वतन्त्रः कर्त्तेति कर्तृलक्षणानुपपत्तेः, तथाऽन्यस्यान्यत्र लयोऽप्यनुपपन्न इति दर्शयन्नाह–"न च" द्वयोः" मुक्तपरमपुरुषयोः "एकीभावो" लयलक्षणः, कुत इत्याह–"अन्यतराभावप्रसङ्गाद्, अन्यतरस्य–मुक्तस्य परमपुरुषस्य वाऽसत्त्वप्राप्तेरन्यतरस्येतरस्वरूपपरिणतौ तत्र लीनत्वोपपत्तेः, एतदनभ्युपगमे दूषणान्तरमाह–"न" "सत्तायाः" परमपुरुषलक्षणायाः "सत्तान्तरे" मुक्तलक्षणे प्रविष्टे सतीत्यर्थोऽनुपचयः किन्तूपचय एव वृद्धिरूपः, घृतादिपलस्य पलान्तरप्रवेश इव, यद्येवं ततः किमित्याह–उपचये च–सत्तायाः "सैव" प्राक्तनी पुरुषस्य मुक्तस्य वा "सा" सत्तेति "अयुक्तम्" असङ्गतं, कुतो? यतः "तदन्तरं" सत्तान्तरं पृथक् तत्सत्तापेक्षया पन्नआः–प्राप्तः, स इत्युपचयः, क्वचिच्चासन्नमिति पाठस्तत्र तदन्तरमिति योज्यमिति, "नीतिः" एषा न्यायमुद्रा ॥

अथ प्रकृतसिद्धिमाह–"न" नैव "एवं" द्वयोरेकीभावेऽन्यतराभावप्रसङ्गेनोपचये तदन्तरापत्त्या वा "अन्यस्य सामान्येन मुक्तादेः "अन्यत्र" पुरुषाकाशादौ लय इति, एष लयनिषेधो मोहविषप्रसरकटकबन्धः, एवं निषेधे हि कटकबन्ध इव विषं न मोहः प्रसरतीति, "तत्" तस्माद् "एवम्" उक्तनीत्या "निमित्तकर्तृत्वपरभावनिवृत्तिभ्यां" निमित्तकर्तृत्वं च मुख्यकर्तृत्वायोगेन भव्यानां परिशुद्धप्रणिधानादिप्रवृत्त्यालम्बनतया परभावनिवृत्तिश्च लयायोगलक्षणा, ताभ्यां "तत्त्वतो" मुख्यवृत्त्या "मुक्तादिसिद्धिः" मुक्तमोचकसिद्धिः ॥

**टी०....** एतेऽपीति=जगतःकर्त्तरि ( उपादानभूते वानिमित्तकारणभूते ) ईश्वरे परमपुरुषे ब्रह्मणि लीनाः ( अभिन्नाः एकभूताः ) मुक्ता एवेति वादिभिः 'सन्तपनस्य शिष्यैः' तत्त्वतः ( निश्चयतः ) एतेऽपि–अर्हन्तो भगवन्तः अमुक्तादय एवेष्यन्ते.

तेषां वचनमस्ति, यद् 'ब्रह्मवद्ब्रह्मसंगतानां स्थिति' रिति, यथा ब्रह्म तथा ब्रह्मसंगतानां—ब्रह्मणि लीनानां—एकीभूतानां मुक्ताऽऽत्मनां स्थितिः—अवस्थानमिति.

**एतादृस्य सन्तपनशिष्याणां मतस्य निराकरणायाऽऽह—**
**'मुक्तेभ्यो मोचकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः'।**

मुक्ताः—चतसृणां गतीनामनुभवरूपविपाकतः, तद्विपाककारणभूतनानाविधज्ञानावरणीयादिरूपाष्टविधकर्मणो बन्धतो मुक्ताः—कृतकृत्या ( परमार्थतो निष्ठितार्थाः संसारे किमपि कार्यमपूर्णं नास्ति, सर्वथा निष्ठितार्थाः ) निष्ठितार्था इति.

ननु आश्रयरूपे ब्रह्मरूपे जगत्कर्त्तरि, अभिन्नरूपेण एकस्थित्याऽवस्थानरूपे लये स्थितानां मुक्तानां ब्रह्मकार्यकरणेन सर्वथा निष्ठितार्थता कथं घटमाना स्यात् ? इति चेदुच्यते,

जगतः करणेन—रचनेन कृतकृत्यत्वाभावो वर्तते तथा च हीनकरणेन (नारकादिकरणेन) तिर्यङ्मनुष्यादिरूपमध्यमकरणेन उत्कृष्ट—देवादिसृष्टिकरणेनापरिमितेच्छाद्वेषरागादिप्रसङ्ग—प्राप्तिः स्यात्, अर्थाद् ब्रह्मणि वा तदभिन्नमुक्तेषु पूर्वोक्तापत्तिः स्यात्, कथमिति चेत् कथ्यते, अपरिमितेच्छाद्वेषरागादिदोषान् विना जघन्यमध्यमोत्कृष्टसृष्टिरूपविचित्ररचनाघटनाभावः, एतादृश्येव स्थिति र्यदा विचित्रसृष्टिसर्जनेऽस्ति तदा सामान्यमनुष्यस्य तिरश्चो वा कक्षातोऽतिहीनकक्षायां मुक्ताः कथं ना पतेयुः, अर्थाद् हीनाऽतिहीनस्थितिषु मुक्तेषु कीदृशी मुक्तत्ववार्त्ता ? इच्छाद्यन्तरेण वैचित्र्येण प्रवृत्त्ययोगाद् विचित्रजगत्करणे मुक्तानां रागद्वेषादिप्रसङ्गः ।

अर्थाद् युष्माकं मते परिमितेच्छाद्वेषादिदोषवन्तोऽन्ये, आत्मानः सृष्टिस्रष्टावसमर्थाः किञ्च, सृष्टिकर्तृत्वेन ब्रह्मा च तदभिन्नमुक्तात्मानोऽभिमताः परन्तु एवं मते ब्रह्मा वा तदभिन्ना मुक्तात्मानोऽपरिमितेच्छाद्वेषरागादिदोषसम्पन्ना अभिमता भवेयुरिति मन्तव्यत्वे सामान्यसंसारितोऽप्यतिहीनकक्षासम्पन्नतास्वीकारे महादोष आपतिष्यति-एवं सामान्यसंसारिणोऽविशिष्टतरं मुक्तत्वमिति चिन्तनीयम् ननु दृश्यमानैषा जगतो विचित्रलीला कर्मनिर्मिता, तथापि विचित्रसृष्टेः संचालका ब्रह्मा वा तदभिन्नाः मुक्ता निमित्तकारणं कथं न ? इति चेदुच्यते. निमित्तकर्तृत्वेति—रागद्वेषेच्छादिदूरीकरणाय वादिना यत्कथितं निमित्तकर्तृत्वं ब्रह्मणो वा मुक्तानामिति, एतद्विषयखण्डनायाह—ब्रह्मणो—मुक्तानां च प्रतिपन्नं कर्तृत्वमर्थान्निमित्तकारणेन स्वीकृतं पुरुषे कर्तृत्वं, तत्त्वतोऽकर्तृत्वमेव, यतः, निमित्तकारणरूपे कर्त्तरि पुरुषे 'स्वतंत्रः कर्त्तेति यत् कर्तृलक्षणं तन्न घटेत (स्वातन्त्र्यं इतरव्यापारानधीनव्यापारवत्वं—(एवं च वैयाकरणभूषणसारे) स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्त्वमपि स्वातन्त्र्यं' लघुमञ्जूषायां)

२८

तथाहि परापेक्षो यो न प्रवर्त्तते वा निवर्त्तते परंतु स्वेच्छानुसारेण यः प्रवर्त्तते वा निवर्तते स वस्तुतः स्वातंत्र्यलक्षणलक्षितः कर्त्ताऽस्ति, यः परमपेक्ष्य पारतन्त्र्येण प्रवर्त्तते वा निवर्तते स स्वतंत्रकर्त्ता नार्थादकर्त्ता कथ्यते.

तथाऽन्यस्याऽन्यत्र लयोऽप्यनुपपन्नः=तथा च मुक्तपरमपुरुषयोर्लयलक्षणभूतमेकीभवनं–अभेदेन भवनं न, कथमिति चेत् कथ्यते, अन्यतरस्य–मुक्तस्य वा परमपुरुषस्याभावप्रसङ्गः मुक्तस्तिष्ठेन्न तिष्ठेद्वा परमपुरुषस्तिष्ठेन्न तिष्ठेत्, द्वयो–र्मुक्तपरपुरुषयो र्मध्ये, एको मुक्तो वा परमपुरुषः कस्तिष्ठेत् को न तिष्ठेदिति निर्णयो न, कथमिति चेत् कथ्यते–अन्यतरस्येतरस्वरूपपरिणतौ तत्र लीनत्वोपपत्तिर्भवति परमपुरुषे मुक्तानां परमपुरुषस्वरूपपरिणतिरूपलयत्वोपपत्तिर्ज्ञेया, अतो मुक्तानामभावः, मुक्तेषु परमपुरुषस्य मुक्तस्वरूपपरिणतिरूपलयत्वोपपत्त्या, परमपुरुषस्याभावः,

यदि लयेऽस्मिन् मुक्तस्य वा परमपुरुषस्य सत्तायाः, अभावस्वीकारो न स्यात्तदा दूषणान्तरमाह=तथाहि=परमपुरुषलक्षणसत्तायाः, मुक्तलक्षणे सत्तान्तरे प्रविष्टे सति अर्थात् प्रवेशे सति (एकीभवने प्रवेशे सति) न, अनुपचयः किन्तूपचय एव वृद्धिरूपः स्कन्धान्तरे प्रविष्टस्कन्धवत्, घृतादिपलस्य पलान्तरप्रवेश इव, अर्थाद् वृद्धिरूपोपचये सत्येव, सत्तायाः 'सैव' प्राक्तनी पुरुषस्य मुक्तस्य वा 'सा' सत्तेति एवं च वृद्धेः प्राक् सत्ता परमपुरुषसत्ता, वृद्धिरहितत्वेन विजातीया, यदा 'वृद्धिसहिता स्यात्तदा परमपुरुषसत्ता वृद्धिमत्त्वेन सैवं सैवं न कथयितुं शक्यते अर्थाद् विलक्षणसत्ता (सत्तान्तरं) भवतीत्यापत्तिः प्रसज्येतेतीदृशी नीतिः–न्यायमुद्रास्ति. प्रकृतसिद्धिः=एवं–द्वयोरेकीभावे लयेऽन्यतराभावप्रसङ्गेन, उपचये तदन्तरापत्त्या वा अन्यस्य–सामान्येन मुक्तादेः 'अन्यत्र'–पुरुषाकाशादौ लयो नैव मुक्तिर्नैव एष लयरूपमुक्ति निषेधो, मोहविषप्रसरकटकबन्धः ( मन्त्रितरक्षासूत्रबन्धः ) एवं निषेधो हि कटकबन्ध इव द्रव्य विषं, तथा न मोहः, भावविषरूपो प्रसरतीति. तदेवं निमित्तकर्तृत्वपरभावनिवृत्तिभ्यां तत्त्वतो मुक्तादिसिद्धिः=तदेवं न्यायमुद्रया एतत् फलितं भवति यत्, उपादानकर्तृत्वमान्यतायां रागाद्यापत्तिसम्भवेन, मुख्य–स्वतंत्रकर्तृत्वाभावोऽस्त्यर्थात्, भव्यानां परिशुद्धप्रणिधानादिप्रवृत्त्यालम्बनतया=यत्र भावना–चित्ताशयो विशुद्धोऽस्ति, यत्र मनस्तदर्थेऽर्पितमस्ति, यथा तत्र क्रिया यथाशक्ति विद्यते, एतादृशस्वरूपावच्छिन्न–परिशुद्धप्रणिधानादिप्रवृत्तिक्रियायां भव्यानां, अर्हन्तं भगवन्तं, आलम्बनभूतत्वेन, अर्हद्भगवत्सु निमित्तकर्तृत्वं घटत एव, लयायोगलक्षणं, परभावनिवृत्तिश्च ( अथवा द्रव्यकर्मभावकर्मरूपपरभावतो निवृत्तिः ) घटते एवं च निमित्तकर्तृत्वेन (अन्येषां संसारबन्धनतो मोचकेभ्यः) परभावतो निवृत्तितः 'मुक्तेभ्यः' ) परभावनिवृत्तत्व-

यावत्स्वरूपस्थितेभ्यो मुक्तेभ्यः) तत्त्वतः मुख्यवृत्तितः, अर्हन्तो भगवन्तो भवन्ति, अर्थाद् मुक्तेभ्यो मोचकेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः ।

**शक्रस्तवस्य आत्मतुल्यपरफलकर्तृत्वरूपाऽष्टमीसम्पद उपसंहारः–**

एवं जिनजापकतीर्णतारकबुद्धबोधकमुक्तमोचकभावेन स्वपरहितसिद्धेरात्मतुल्यपरफलकर्तृत्व-सम्पदिति, अर्थाज्जिनजापकभावेन तीर्णतारकभावेन–बुद्धबोधकभावेन तथा मुक्तमोचकभावेन स्वपरहित (स्वपरकल्याण) स्य सिद्धि र्भवति. 'जिणाणं पदतो मुत्ताणं मोयगाणं' पदपर्यन्ता चतुष्पदी सम्पत् 'स्वतुल्यपरफलकर्तृत्व' सम्पत् कथ्यते, यत एतच्चतुष्पद्यां सम्पदि अर्हतां यादृशं स्वस्वरूपं तादृशं स्वरूपरूपं फलं पर–अन्यभक्तभव्यजीवानामर्हन्तो भवन्तः कुर्वन्ति, तेभ्यो ददति ते, एतत्सम्पदः 'निजसमफलदे'ति द्वितीयं नामोच्यते, ( एवं चात्र पठनीयः श्लोकः "नात्यद्भुतं भुवनभूषणभूत ! नाथ !, भूतैर्गुणै र्भुवि भवन्तमभिष्टुवन्तः । तुल्या भवन्ति भवतो ननु तेन किं वा, भूत्याश्रितं य इह नात्मसमं करोति " भ. स्तो. श्लो. १० )

इति शक्रस्तवस्य त्रिंशत्तमपदस्य व्याख्या समाप्ता ।

अथ शक्रस्तवस्य एकत्रिंशत्तमपदस्य व्याख्यारम्भः—

अथ त्रिभिः पदैः क्रमेण भगवतां प्रधानगुण—अक्षयस्थिति–प्रधानफलाऽवाप्त्यभय-नामकमोक्षनामिका–नवमी–सम्पदो विवेचनात्पूर्वं प्रथमपदस्य व्याख्यातः पूर्वं प्रथमपदस्याव-तरणिकाया अवतारः—

**एतेऽपि बुद्धियोगज्ञानवादिभिः कापिलैरसर्वज्ञा असर्व-दर्शिनश्चेष्यन्ते, "बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते" इति वचनाद्, एतन्निराकरणायाह–**

**" सर्व्वज्ञेभ्यः सर्व्वदर्शिभ्यः " सर्वं जानन्तीति सर्वज्ञाः सर्व्वं पश्यन्तीति सर्व्वदर्शिनः, तत्स्वभावत्वे सति निरावरणत्वात्, मत्तोऽन्ये मदर्थाश्च गुणा इत्यतस्तत्तत्स्वभावत्वसिद्धिः, उक्तं च–**

**" स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्ध्या ।**
**चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवद् ॥१॥" इत्यादि,**
**न करणाभावे कर्ता तत्फलसाधक इत्यनैकान्तिकं, परि-**

निष्ठितप्लवकस्य तरण्डकाभावे प्लवनसंदर्शनादिति, न चौदयिक-क्रियाभावरहितस्य ज्ञानमात्राद् दुःखादयः,

तथानुभवतस्तत्स्वभावत्वोपपत्तेः । अन्यस्त्वाह—ज्ञानस्य विशेषविषयत्वाद्दर्शनस्य च सामान्यविषयत्वात्तयोः सर्वार्थविषयत्वमयुक्तं,तदुभयस्य सर्वार्थविषयत्वादिति, उच्यते, नहि सामान्य-विशेषयोर्भेद एव, किन्तु त एव पदार्थाः समविषमतया सम्प्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते, तत्तश्च त एव ज्ञायन्ते त एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति । आह—एवमपि ज्ञानेन विषमताधर्म्मविशिष्टा एव गम्यन्ते, न समताधर्म्मविशिष्टा अपि, तथा दर्शनेन च समताधर्म्मविशिष्टा एव गम्यन्ते, न विषमताधर्म्मविशिष्टा अपि, ततश्च ज्ञानेन समताख्यधर्म्माग्रहणाद्दर्शनेन विषमताख्य-धर्माग्रहणाद् धर्म्मिणामपि चार्थत्वादयुक्तमेव तयोः सर्वार्थ-विषयत्वमिति, न, धर्म्मधर्मिणोः सर्वथा भेदानभ्युपगमात्, ततश्चाभ्यन्तरीकृतसमताख्यधर्म्माण एव विषमताधर्म्मविशिष्टा ज्ञानेन गम्यन्ते, तथा अभ्यन्तरीकृतविषमताख्यधर्म्माण एव च समताधर्म्मविशिष्टा दर्शनेन गम्यन्ते इत्यतो न दोषः, एतदुक्तं भवति—जीवस्वाभाव्यात्सामान्यप्रधानं उपसर्जनीकृत-विशेषमर्थग्रहणं दर्शनमुच्यते, तथा प्रधानविशेषमुपसर्जनीकृत-सामान्यं च ज्ञानमिति कृतं विस्तरेण । अपर आह—मुक्ता-त्मनोऽमूर्त्तत्वात् ज्ञानस्यापि तद्धर्म्मत्वेन तत्त्वात् विषयाकारतया-ऽयोगतस्तत्त्वतो ज्ञानाभावः, निस्तरङ्गमहोदधिकल्पो ह्यसौ तत्तरङ्गतुल्याश्च महदादिपवनयोगतो वृत्तय इति तदभावात्तदभावः,

एवं सर्वज्ञत्वानुपपत्तिरेवेति, एतदप्यसत्, विषयग्रहणपरिणामस्याकारत्वात्, तस्य चामूर्त्तेऽप्यविरोधात्, अनेकविषयस्यापि चास्य सम्भवात्, चित्रास्तरणादौ तथोपलब्धेरिति ॥

एतेन विषयाकाराप्रतिसङ्क्रमादिना ज्ञानस्य प्रतिबिम्बाकारताप्रतिक्षेपः प्रत्युक्तः, विषयग्रहणपरिणामस्यैव प्रतिबिम्बत्वेनाभ्युपगमात्, एवं साकारं ज्ञानमनाकारं च दर्शनमित्यपि सिद्धं भवति, ततश्च सर्वज्ञाः सर्वदर्शिनस्तेभ्यो नम इति क्रियायोगः ३१॥

पं०...."बुद्ध्यध्यसितमर्थं पुरुषश्चेतयते" इति अत्र हि सांख्यप्रक्रियासत्त्वरजस्तमोलक्षणास्त्रयो गुणाः, तत्साम्यावस्था प्रकृतिः, सैव च प्रधानमित्युच्यते प्रकृतेर्महान्, महदिति बुद्धेराख्या महतोऽहङ्कारःआत्माभिमानः, ततः पञ्च बुद्धीन्द्रियाणि श्रोत्रादीनि, वाक्पाणिपादपायूपस्थलक्षणानि पञ्चैव कर्म्मेन्द्रियाणि एकादशमिच्छारूपं मनः, तथा पञ्च तन्मात्राणि, गन्धरसरूपस्पर्शशब्दस्वभावानि, तन्मात्रेभ्यश्च यथाक्रमं भूप्रभृतीनि पञ्च महाभूतानि प्रवर्त्तन्ते इति, अत्र च प्रकृतिविकारत्वेनाचेतनापि बुद्धिश्चैतन्यस्वतत्त्वपुरुषोपगमात् सचेतनेवावभासते, तदुक्तं–

" पुरुषोऽविकृतात्मैव, स्वनिर्भासमचेतनम् ।
मनः करोति साम्निध्यादुपाधिः स्फटिकं यथा ॥ १ ॥"

अस्य व्याख्या–"पुरुषः" आत्मा "अविकृतात्मैव" नित्य एव "स्वनिर्भासं" स्वाकारम् "अचेतनं" चैतन्यशून्यं सत् "मनः" अन्तःकरणं "करोति" विदधाति "सान्निध्यात्" सानिध्यमात्रेण, निदर्शनमाह–"उपाधिः" पद्मरागादिः "स्फटिकम्" उपलविशेषं यथा स्वनिर्भासं करोति, तत्परिणामान्तरापत्तेः, भोगोऽप्यस्य मनोद्वारक एव, अत्राप्युक्तम्–

विभक्तेदृक्परिणतौ, बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे, यथा चन्द्रमसोऽम्भसि ॥ १ ॥

अस्य व्याख्या–विभक्ता चासौ आत्मन ईदृक्परिणतिश्च प्रतिबिम्बोदयरूपेति विग्रहः, तस्यां सत्यां, सैव भोग इत्यर्थः, क या परिणतिरित्याह–"बुद्धौ" अन्तः–करणलक्षणायां "भोगो" विषयग्रहणरूपः, अस्य–आत्मनः "कथ्यते" आसुरिप्रभृतिभिः, किंवदित्याह– "प्रतिबिम्बोदयः" प्रतिबिम्बपरिणामः "स्वच्छे" निर्म्मले यथा चन्द्रमसो वास्तवस्य "अम्भसि" उदके तद्वदिति । अथ प्रकृतं व्याख्यायते–बुद्ध्या–अनन्तरोक्तया अध्यवसितं–प्रतिपन्नं "अर्थं" शब्दादिविषयं "पुरुषः" आत्मा "चेतयते" जानाति, अर्थचेतने बुद्धेरन्तरङ्गकरणत्वात् ।

"मत्तोऽन्ये मदर्थाश्चेत्यादि" इह किलैकदा भगवानर्हन् द्रव्यान् (णि) पर्यायान् भिन्नानभिन्नांश्च स्वशिष्येभ्य आचिख्यासुरात्मानमेवातिसन्निहिततयोद्दिश्याह–मत्तो–मत्सकाशादन्ये–पृथक् गुणा–ज्ञानदर्शनोपयोगादयः, लक्षणसङ्ख्याप्रयोजनसंज्ञाभेदात्, तथाहि–" गुणपर्यायवद्द्रव्यमिति " (तत्त्वा० अ० ५ सू० ३७) लक्षणोऽहं, "द्रव्याश्रया निर्गुणा गुणाः" (तत्त्वा० अ० ५ सू० ४०) इतिलक्षणाश्च गुणाः, एकोऽहमनेकेगुणाःबन्धमोक्षादिक्रियाफलवानहं विषयावगमादिफलाश्चगुणाः, अर्हत्तीर्थकरपारगतादिशब्दवाच्योऽहं, धर्म्मपर्यायादिशब्दवाच्याश्च गुणाः, मदर्थाश्चेति–अहमर्थः–साध्यं येषां ते तथा, न हि गुणवृत्तिविलक्षणा काचिदैकान्तिकी ममापि प्रवृत्तिरस्ति, तथाप्रतिभासाद् " इतिः " वाक्यपरिसमाप्तौ "अतः" एतद्वाक्यात्, "तत्तत्स्वभावत्वसिद्धिः" तेषां गुणानां तत्स्वभावत्वसिद्धिः–द्रव्यस्वभावत्वसिद्धिः, अर्थचेतने पुरुषस्य किल बुद्धिः करणं, प्रकृतिवियोगे च मुक्तावस्थायां करणाभावान्न सर्वज्ञत्वं सर्वदर्शित्वं वा सम्भवतीति पराकूतनिराकरणायोवाच–"न करणेत्यादि" सुगमं चैतत्, ननु नीलपीतादय इव बहिरर्थधर्मा दुःखद्वेषशोकवैषयिकसुखादयः, ततो मुक्तावस्थायां सर्व्वज्ञत्वसर्व्वदर्शित्वाभ्युपगमे बहिरर्थवेदनवेलायां सर्व्वदुःखाद्यनुभवस्तस्य प्राप्नोतीत्याशङ्कापरिहारायाह–" न चौदयिकेत्यादि " न च–नैवौदयिकक्रियाभावरहितस्य–असद्वेद्यादिकर्म्मपाकप्रभवस्वपरिणामरहितस्य " ज्ञानमात्रात् " परिज्ञानादेव " दुःखादयो " दुःखद्वेषादयो, हेतुमाह–

" तथानुभवतो " ज्ञानमात्रादेव दुःखाद्यनुभवतः " तत्स्वभावत्वोपपत्तेः " दुःखादीनामौदयिकक्रियाभावस्वभावत्वोपपत्तेरिति। " अपरेत्यादि " अपरः–साङ्ख्यः आह–प्रेरयति, मुक्तात्मनः–क्षीणकर्म्मणः अमूर्त्तत्वाद्–रूपादिरहितत्वात्, किमित्याह–" ज्ञानस्यापि " न केवल मुक्तात्मनः " तद्धर्म्मत्वेन " मुक्तात्मधर्म्मत्वेन " तत्त्वाद् " अमूर्त्तत्वात्, ततः किमित्याह–"विषयाकारताऽयोगतः" विषयस्येव–गोचरस्येवाकारः–स्वभावो यस्य तत्तथा तद्भावस्तत्ता तस्याः अयोगतः–अघटनात् "तत्त्वतो" निरुक्तवृत्त्या ज्ञायतेऽनेनेति करणसाधनज्ञानाभाव एव, तदेव भावयति–निस्तरङ्गमहोदधिकल्पो ह्यसौ–मुक्तात्मा, "तत्तरङ्गतुल्याश्च महदादिपवनयोगतो वृत्तय इति" बुद्ध्यहङ्कारादिप्रकृतिविकारपवनसम्बन्धात्, वृत्तयो–विषयज्ञानादिकाः प्रवृत्तयः, "इति" एवं " तदभावात् " महदादिपवनयोगाभावात् " तदभावः " तरङ्गतुल्यवृत्त्यभावः, ततः किमित्याह–

" एवं " वृत्त्यभावात् " सर्वज्ञत्वानुपपत्तिरेव " मुक्त्यवस्थायां, निराकारेण तु विज्ञानेन ग्रहणाभ्युपगमे विषयप्रतिनियमस्याघटनात् "इतिः" परवक्तव्यतासमाप्तौ, "एतदपि"साङ्ख्योक्तम् "असद्" असुन्दरं, कुत इत्याह–" विषयग्रहणपरिणामस्य " विषयग्राहकत्वेन जीवपरिणतेरेव आकारत्वात्, तस्य च–उक्तरूपस्याकारस्य "अमूर्त्तेऽपि मुक्तात्मन्यपि, न केवलं मूर्त्ते इत्यपेरर्थः, " अविरोधात् " केनाप्यबाध्यमानत्वात्, अभ्युच्चयमाह–" अनेकविषयस्यापि च " युगपदनेक विषयमाश्रित्य प्रवृत्तस्यापि च, किं पुनरेकविषयस्य"अस्य" उक्तरूपाकारस्य "सम्भवात्" घटनात्,

एतदपि कुत इत्याह–" चित्रास्तरणादौ " चित्रे–प्रतीते आस्तरणे च–वर्णकम्बले आदिशब्दादन्य-बहुवर्णविषयग्रहः " तथोपलब्धेः " युगपद्बहुविषयाकारोपलब्धेः स्वसंवेदनेनैव ॥

अथ प्रसङ्गसिद्धिमाह–" एतेन " विषयग्रहणपरिणामस्यैवाकारत्वेन, " विषयाकाराप्रति-सङ्क्रमादिना " विषयाकारस्यग्राह्यसंनिवेशस्याप्रतिसङ्क्रमः–स्वग्राहिणि ज्ञानेऽप्रतिबिम्बनं विषयाकाराप्रतिसङ्क्रमः, विषयाकारप्रतिसङ्क्रमे हि एकत्वं वा ज्ञानज्ञेययोरेकाकारीभूतत्वात् , विषयो वा निराकारः स्यात , तदाकारस्य ज्ञाने प्रतिसङ्क्रान्तत्वाद्, यदाह धर्म्मसङ्ग्रहणीकारः–

"तदभिन्नाकारत्ते, दोण्हं एगत्तमो कहं न भवे ? ।
नाणे व तदाकारे, तस्साणागारभावोत्ति ॥ १ ॥ "

आदिशब्दात् प्रतिनियतप्रतिपत्तिहेतोर्ज्ञेयेन तुल्याकारतायां ज्ञानस्य प्रतिषेधो द्रष्टव्यः, क्रम-वृत्तिनोर्ज्ञेयज्ञानयोः क्षणिकयोः क्षणस्थायिना ज्ञानेन उभयाश्रितायास्तस्या एव प्रतिपत्तुमशक्य-त्वात , किञ्च–तुल्यत्वं नाम सामान्यं, तच्चैकमनेकव्यक्त्याश्रितमिति कथं न तदाश्रितदोष-प्रसङ्गः ? , अत्राप्याह–

"सिय तत्तुल्लागारं, जं तं भणिमो ततो तदागारं ।
अत्रोत्तरं– तग्गहणाभावे णणु, तुल्लत्तं गम्मई कह णु ? ॥ १ ॥
तुल्लत्तं सामन्नं; एगमणेगासियं अजुत्ततरं ।
तम्हा घडादिकज्जं, दीसइ मोहाभिहाणमिदं ॥ २ ॥ "

ततस्तेन विषयाकाराप्रतिसङ्क्रमादिना कारणेन विज्ञानस्य विषयग्राहिणः प्रतिबिम्बा-कारताप्रतिक्षेपो–ज्ञानवादिप्रतिज्ञातो विषयप्रतिबिम्बाकारविज्ञानं न घटते, किन्तु बाह्याकारमेव सत्स्वभावमात्रप्रतिभासीत्येवंरूपः " प्रत्युक्तो " निराकृतः । " विषयग्रहणेत्यादि " हेतुश्च प्रतीत एव, मुक्तरूपपरिणामस्याकारत्वे सामा (म)यिकविवक्षया साकारं विशेषग्रहणपरिणामवत् ज्ञान-मुपयोगविशेषोऽनाकारं च सामान्यग्रहणपरिणामवद्दर्शनमुपयोगभेद एवेत्यपि सिद्धं भवति ॥

टी०....' एतेऽपीति '–बुद्धेः ( महत्तत्त्वं यस्य द्वितीयं नाम तादृशी–बुद्धेः ) योगे सति–बुद्धियोगजन्यं आत्मनि ज्ञानमुत्पद्यते, अर्थाद् बुद्धेः सम्बन्धेनोत्पद्यमानं ज्ञानं मन्यते, इति वादिभिःकापिलैः (सांख्यदर्शनाद्यप्रणेता, 'कपिलः' परमर्षिः कथ्यते ) कपिलानुयायिभिः, अर्हन्तो भगवन्तोऽप्येते असर्वज्ञा असर्वदर्शिनश्चेष्यन्ते, " बुद्धयध्यवसितमर्थं पुरुषश्चेतयते" अर्थाद् बुद्धौ प्रतिबिम्बितमर्थं पुरुषः–आत्मा जानाति. अर्थचेतने बुद्धेरन्तरङ्गकारणमस्ति, ( सांख्यमतम्=तत्त्वानां मूलकारणं प्रकृतिः ( अव्यक्तं प्रधानं, सत्त्वरजस्तमसां साम्यावस्था ) स्वयं कस्यचिद्विकृति र्नास्ति, अतः अविकृतिः कथ्यते, महत् ( बुद्धिः ) अहंकारः, शब्दादि पञ्चतन्मात्राः (७) प्रकृतिविकृतिरूपा, महत्, अहंकारस्य प्रकृतिः मूलप्रकृतेर्विकृतिः, अहंकारः इन्द्रियाणां प्रकृतिः, बुद्धेः विकृतिः, पञ्चतन्मात्राः पञ्चभूतानां प्रकृतिः, अहंकारस्य विकृति

(११) इन्द्रियाणि (५) पञ्चमहाभूतानि (१६) षोडशतत्त्वानि केवलविकृतिरूपाणि, पुरुषः, नो विकृतिः, नो प्रकृतिः, अपितु चिद्रूपोऽस्तिः

मूलप्रकृतिविकारत्वे बुद्धिः स्वयं अचेतनाऽस्ति, तथाऽपि चैतन्यरूपस्वतत्त्ववतः पुरुषस्य संनिधानादेव जाने चेतनावतीव भासते यथा भिन्नभिन्नरूपाणां संयोगतो निर्मलस्फटिकमणिः, कालपीतरक्तत्वादिरूपवान् दृश्यते, तथाऽविकृतो नित्यपुरुषआत्मा, बुद्धेः सन्निधानवशात्, अचेतनं मनः स्वसमानं चेतनं कारयति, तदाऽस्मिन् पुरुषे भोक्तृत्वाभिमानो भवति, वस्तुतो विकारित्वेन मनश्चेतनं न कथ्यते, सांख्यानां वचनमेवमस्ति, यत् ' मूलप्रकृते र्विकारभूतो-भयमुखी दर्पणाकारा या बुद्धिरस्ति, तस्यां प्रतिबिम्बितशब्दादिविषयान्—पदार्थान्, स्वस्वच्छ-स्वरूपे प्रतिबिम्बनेन, ' पुरुषश्चेतयते ' अर्थात् शब्दादिअर्थ—विषयविषयक ज्ञानं प्रति बुद्धिः, उपादानकारणमस्ति (चिद्रूपशक्तितः (पुरुषस्य चैतन्यशक्तितः) पदार्थविषयक—ज्ञानं न भवति, परंतु अचेतनबुद्धित एव पदार्थज्ञानं भवति, एषा बुद्धिः पुरुषस्य नास्ति धर्मः, केवलप्रकृतेरेव विकारः, अस्यामचेतनबुद्धौ चिद्रूपशक्तेः प्रतिबिम्बनात् स्वयं (चिद्रूपशक्तिः) स्वतो बुद्धितोऽ-भिन्नामेकां मन्यते, अत एव पुरुषे ' सुख्यहं—दुःख्यह 'मिति जानाति, चिद्रूपशक्तेः प्रति-बिम्बनादेषाऽचेतनबुद्धिः चेतनवद् भासते )

पूर्वोक्तस्य साङ्ख्यमतस्य खण्डनाय कथयति ' सर्वज्ञेभ्यः सर्वदर्शिभ्यो नमो नमः ' सर्वं जानन्तीति सर्वज्ञाः, सर्वं पश्यन्तीति सर्वदर्शिनः, तत्स्वभावत्वे सति निरावरणत्वात्, (सर्वज्ञान् विना छद्मस्थजीवानां प्रथमं दर्शनमुत्पद्यते, तदन्तर्मुहूर्तान्तरं ज्ञानमुत्पद्यते, सर्वज्ञानां तु प्रथमसमये ज्ञानं, ततः द्वितीये—चतुर्थे—षष्ठे समये द्व्यङ्की—द्विगुणसमये दर्शनं जायते, अनेन हेतुना भगवत्यादिसूत्रेऽपि ' सवन्नूणं सव्वदरिसीणं ' इत्यनुक्रमोऽस्ति. )

सर्वज्ञपदार्थः—द्रव्यापेक्षया रूपिचारूपि च द्रव्यं—सर्वं द्रव्यं जानाति, ( केवलज्ञानेन ), क्षेत्रापेक्षया सर्वक्षेत्रं, 'कालापेक्षया सर्वकालं च भावापेक्षया प्रत्येक द्रव्यस्य भूतभाविवर्त्तमान सर्वानन्तपर्यायान् सम्यक् प्रकारेण जानाति स सर्वज्ञः '

सर्वदर्शिपदार्थः—द्रव्यतः रूप्यरूपिसर्वद्रव्यं पश्यति ( केवलदर्शनेन ) क्षेत्रतः सर्वक्षेत्राणि, कालतः सर्वकालं, भावतश्च प्रत्येकद्रव्यस्य भूतभाविवर्त्तमानकालीन—सर्वानन्तपर्यायान् सम्यक्-प्रकारेण पश्यति (अनन्तदर्शनेन) स सर्वदर्शी.

सर्वज्ञसर्वदर्शित्वसिद्धिः—अर्हन्तो भगवन्तः ( पक्षः ) सर्वज्ञाः सर्वदर्शिनः सन्तिः (अत्र सर्वज्ञत्वं सर्वदर्शित्वं साध्यम् ) यतः आत्मनः (केवल) ज्ञानं च केवलदर्शनं च स्वभावोऽस्ति, तत्प्रतिबन्धककेवलज्ञानावरणीयकेवलदर्शनावरणीययोः कर्मणोः क्षयोऽस्ति, अर्थात् ' तत्स्वभाव-त्वविशिष्टनिरावरणत्वं' अत्र हेतुर्ज्ञेयः, पदकृत्यं पूर्वं कथितमस्ति,

तथा च तत्स्वभावत्वविशिष्टनिरावरणत्वरूपनिर्दुष्टहेतुनाऽर्हत्सु भगवत्सु सर्वज्ञत्वसर्वदर्शित्वरूपसाध्यस्य सिद्धिः।

प्रकृतहेतुआदिघटना=अर्हतां भगवतां केवलज्ञानं केवलदर्शनं च स्वभावोऽस्ति, तत्र स्वभावे स्वभावत्वमस्ति, तथा केवलज्ञानदर्शनयोः, तदावरणरूपप्रतिबन्धकस्य सर्वथा राहित्यमस्ति, ततस्तत् केवलज्ञानदर्शनरूपस्वभाववन्तोऽर्हन्तो भगवन्तः सर्वज्ञाः सर्वदर्शिन उच्यन्ते।

केवलज्ञानकेवलदर्शनयोः आत्मद्रव्यस्य स्वभावताऽस्ति 'मत्तोऽन्ये' इत्यादिवाक्येनोच्यते।

तत्तत्स्वभावत्वसिद्धिः=एकदाऽस्मिन्नार्यावर्त्ते, स्याद्वादिनाऽर्हता भगवता, द्रव्याणि च पर्यायाश्च मिथो भिन्ना अपि चाभिन्ना अपि सन्त्येवं प्रवचनं चिकीर्षया, स्वशिष्याणामग्रतोऽत्यन्तसमीप—वर्तित्वेन, स्वयं स्वं (स्वात्मानं) उद्दिश्य प्ररूपितं यत् लक्षण—सङ्ख्या—प्रयोजन—संज्ञाभेदापेक्षया, मत्तः—मत्सकाशात् ( स्वात्मद्रव्यतः ) गुणाः—ज्ञानदर्शनोपयोगाद्या गुणा भिन्नाः सन्ति, यथाहि—

(१) लक्षणभेदापेक्षया=द्रव्यपर्याय (गुण) भेदः='गुणपर्यायवद् द्रव्यम्' (तत्त्वा. अ. ५. सू. ३७) गुणपर्यायविशिष्टं द्रव्यं कथ्यते (पदार्थेषु द्विधा धर्माः सन्ति, एकःसहभावी धर्मः, द्वितीयस्तु क्रमभावी धर्मः, सहभाविनो धर्मा 'गुणाः' इति कथ्यन्ते, क्रमभाविनो धर्माः 'पर्याया' इति कथ्यन्ते, अत एवैकस्मिन् द्रव्ये द्वित्राद्या धर्माः सहस्थितिका गुणाः यथाहि—आत्मनि यत्किञ्चिज्ज्ञानरूपविज्ञानव्यक्तिः उत्तरज्ञानाकारपरिणाम—योग्यतारूपविज्ञानशक्तिः सुखं, यौवनं ज्ञानं योग्यताद्या धर्माः युगपत् तिष्ठन्ति ते 'गुणाः' किञ्चात्मनि यथा सुखसमये दुःखं न भवेत, यौवनकाले वृद्धावस्था न भवेत्, हर्षकाले शोको न भवेत्, अर्थादात्मनि युगपद् ये न तिष्ठन्ति ते धर्माः क्रमभावित्वेन 'पर्यायाः' कथ्यन्ते यथा नारकमनुष्यसुखदुःख—हर्षशोक-वृद्धत्वयौवनाद्याः पर्यायाः कथ्यन्ते. )

आत्मगुणाः=ये धर्मा आत्मनि युगपत् स्थातुं समर्था भवन्ति ते 'गुणाः'

आत्मपर्यायाः=ये धर्मा आत्मनि युगपन्न तिष्ठन्ति च क्रमेण तिष्ठन्ति ते 'पर्यायाः' एतादृशसूत्रप्रमाणेनाहं गुणपर्यायवत्स्वरूपलक्षणवानस्मि, अर्थात् 'आत्मद्रव्यमेवाहं' यतो द्रव्यं तदेव कथ्यते यत्र गुणपर्यायाः सन्ति, मयि गुणपर्यायाः सन्ति, तस्मादहं द्रव्यमेव, द्रव्यस्य यथालक्षणं भिन्नं तथा गुणस्य लक्षणमपि भिन्नमस्ति. तथाहि—'द्रव्याश्रया निर्गुणा गुणाः' (तत्त्वा. अ. ५ सू. ४०) द्रव्याश्रिता गुणरहिता धर्मा गुणाः कथ्यन्ते, अर्थाद् द्रव्यमाश्रित्य

२९

तिष्ठन्ति ये स्वयं गुणरहितास्ते गुणाः, ईदृशलक्षणवन्तो मम गुणा ज्ञानाद्या ज्ञेयाः, तथा चोभयो र्लक्षणभेदेनाहं च मम गुणा भिन्ना एव स्मः,

(यद्यपि पर्याया अपि द्रव्याश्रिता निर्गुणा एव सन्ति, तथापि ते–उत्पादविनाशशालित्वेन न द्रव्य एव सदा तिष्ठन्ति परन्तु गुणास्तु ध्रौव्यवत्त्वेन नित्यत्वेन सदा द्रव्याश्रिताः सन्ति, एवं गुणपर्याययोर्मध्ये विशेषः, द्रव्ये सदा वर्त्तमाना याः शक्तयस्ताः पर्यायजनकत्वेन सम्मताः सन्ति ताः शक्तयो गुणत्वेन परिभाषिताः, द्रव्यनिष्ठ गुणजनकशक्तिरूपगुणा अनवस्थानिवारणाय निर्गुणा मताः, आत्मगुणाः=चेतना–सम्यक्त्व–चारित्रानन्दवीर्यादिरूपाः)

(२) संख्याभेदापेक्षया द्रव्यगुणयोर्भेदः=अहमात्मद्रव्यमेकं (एकत्वसंख्याविशिष्टं) मम च गुणा अनेके (अनेकत्व–बहुत्वानन्तरूपसंख्याविशिष्टाः) एवमुभयोः संख्याभेदेन, अहं च मम गुणा भिन्ना भिन्नाः ।

(३) प्रयोजन (फल) भेदापेक्षया द्रव्यगुणयोर्भेदः=अहमात्मद्रव्यं बन्धमोक्षादिक्रिया-फलवानहं (या या क्रिया सा सा फलवती) इति नियमानुसारेण बन्धजनकक्रियाद्वारा संसारफलं, मोक्षजनकसंवरादिक्रियाद्वारा मोक्षफलं भवति, अन्यथा नहि, अर्थात् संसार-मोक्षरूप विभावस्वभावरूपा आत्मीया अवस्थाः संसारमोक्षजनकक्रियाप्राधान्यवत्यः अत एव भगवान् कथयति बन्धजनकक्रियाजन्यभवोपग्राहि (अघाति) रूपकर्मरूपसंसारफलवांस्तथा मोक्ष-जनकक्रियाजन्यघातिकर्ममुक्तिरूपमुक्तिफलवानहं ।

मम ज्ञानादिगुणाश्च विषय (पदार्थसार्थ) विषयकावगम–ग्रहणादिफलवन्तः, अत एव वयं–अहं च मम गुणाः भिन्नभिन्नफलवत्त्वेन भिन्नाः स्मः ।

(४) संज्ञाभेदापेक्षया द्रव्यगुणयोर्भेदः=अर्हन्–जिन–तीर्थंकरः–पारगत आदिपर्याय-वाचकरूपसंज्ञाशब्दतो वाच्योऽहं, अर्थान्मां अर्हन्नादिनामभिराह्वयति–संबोधयति, मम च गुणान्, धर्म–पर्याय–स्वरूप–लक्षण–स्वभावादिसंज्ञाशब्दैः संबोधयति। तथा च मम संज्ञा भिन्नाऽस्ति, मम च गुणानां संज्ञा (संकेत शब्दः) भिन्नाऽस्ति, अर्थादहं च मम गुणा भिन्नाःस्मः ।

अत्र द्रव्यार्थिकनयस्य गौणत्वेन, पर्यायार्थिकनयस्य प्राधान्येन भेदो ज्ञेयः। द्रव्यगुण (पर्याय) योरभेदस्य निरूपणम्=' मदर्थाश्च गुणाः' अहमर्थः आधारः येषां ते मदर्था गुणाः कथ्यन्तेऽर्थान्मम गुणा मदाधारे तिष्ठन्ति (अहमित्यात्मद्रव्यनिष्ठाधिकरणतानिरूपकाधेयता–विशिष्टा गुणाः, अथवा गुणनिष्ठाधेयतानिरूपिताधिकरणतावदात्मद्रव्यमहमिति शाब्दबोधः) तथा च

पर्यायार्थिकनयं गौणीकृत्य द्रव्यार्थिकनयस्य प्रधानतया द्रव्येण सहैकाधारवृत्तित्वरूपाऽपेक्षया सकलधर्माणामभेदस्थितिः (य एव चाधारोऽर्थो द्रव्याख्योऽस्तित्वस्य स एवाऽन्यपर्यायाणामित्यर्थेनाऽभेदवृत्तिः, अतोऽत्रार्थ–आधारापेक्षया गुणा अभिन्नाःसन्ति, कालाद्यंतर्गताऽर्थेन, धर्मधर्मिणोरभेदस्य प्राधान्यमङ्गीक्रियते तदा तेनाऽर्थेन समस्तधर्माणां तादात्म्येनाऽस्थितत्वात्, य एव च घटद्रव्यरूपोऽर्थोऽस्तित्वस्याऽऽधारः स एवान्यधर्माणामप्याधारः इत्येकाधारवृत्तित्वमर्थेनाऽभेदवृत्तिः)

मदर्थाश्चेति=अहमर्थः साध्यं (अर्थः–प्रयोजनं–लक्ष्यं–उपयोगश्च) येषां ते मम गुणाः सन्ति, (अथवा मम अर्थरूपा–उपयोग–कार्य–समृद्धि–रमणतास्थानरूपा गुणाःसन्ति) यतो गुणेषु वृत्ति (वर्त्तनं–रमणत्वं) विनाऽन्या काचित् ऐकान्तिकी प्रवृत्तिर्ममापि नास्ति, अर्थात्, अहमपि गुणेषु रमे, मदीया वृत्तिरूपा प्रवृत्तिर्गुणेष्वेव नान्यत्र (श्रीभगवान् स्वमुखेन कथयति, अहं च मदीया गुणाः, न भिन्नाः, अहमित्युक्ते गुणाः, गुणा इत्युक्तेऽहमित्येवं वयमभिन्नाः स्मोः यतो यथा मयि गुणाःसन्ति, तथाऽहमपि गुणेषु रमे, आवयोर्न भेदोऽस्ति, वयं अहं च गुणा अभिन्नाः स्मः, मदीयाः सत्याः सनातन–शाश्वती–अनन्तद्धिरतिरमणीयक्रीडायाश्च स्थानं मदीया गुणा एव, अहं गुणान् विमुच्य कुत्रचिदपि न गच्छामि, तिष्ठामि, रमेऽपि मम वास्तव्यभव्यभवनमुच्यतां वा मम रमणाय रमणीयमुपवनं कथ्यतां वा मम स्थिरतायाः स्थिरं स्थानं गद्यतां वा मदीया सनातनविश्रामभूमिरुद्घोष्यतां, एते मम गुणा एव मन्तव्याः)

तथा च द्रव्यतः कथंचिद्भिन्नस्वरूपाः कथंचिदभिन्नस्वरूपा गुणा भवन्ति, इत्येवं निरूपणात् "तत्तत्स्वभावत्वसिद्धिः"=तेषां गुणानां द्रव्यस्वभावत्वसिद्धिः (आत्मद्रव्यस्वभावास्तत्स्वरूपा एव गुणा ज्ञानादय इति सिद्धम्)

उक्तं च–"स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया ।
चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवद् ॥ १ ॥"

**अर्थात्**–यथा शीतांशुश्चन्द्रः भावशुद्धया प्रकृत्या–स्वभावेन स्थितोऽस्ति तथा भावतो निर्मलस्वभावतो जीवः स्थितोऽस्ति, अनादितः, यथा चन्द्रे चन्द्रिका तथा जीवे विज्ञानं (विशिष्टज्ञानं केवलज्ञानं) स्थितमेव, (अभ्रवद्–वादलवत्) चन्द्रचन्द्रिकोपरि, आगन्तुकमभ्रं तथा जीवविज्ञानोपरि ज्ञानावरणादिकर्मरूपमावरणमागन्तुकमत एव कारणसत्त्वे विनाश्यमेव (विनष्टं भवति) इत्यादि विचारणीयम् ।

तथा च घातिकर्मचतुष्टयरूपाभ्राणि, क्षपकश्रेण्यारूढ आत्मा, श्रेणिसमाप्तौ क्षपयति, श्रीमानात्माऽऽत्मिकसामर्थ्ययोगेन ज्ञानकेवली–सर्वज्ञः–सर्वदर्शी भवति.

तथा च पदार्थविषयकज्ञानं (अर्थचेतनं) प्रति प्रकृतिजन्यबुद्धिःकरणं (असाधारणं कारणं) प्रकृतेर्वियोगे (ध्वंसे) च मुक्तावस्थायां बुद्धिरूपकरणस्याऽभावे (कारणाभावप्रयुक्त कार्याभावनियमेन) मुक्तेषु सर्वज्ञत्वं सर्वदर्शित्वं वा न सम्भवति, यतः करणं विना कर्त्ता करणसाध्यफलसाधकः कथं भवेदिति चेदुच्यते, एकान्तोऽत्र नास्ति, करणाभावेऽपि कश्चित् किञ्चित्करोति, सुनिपुणनिर्यामकादेर्नौकाऽभावेऽपि सन्तरणं दृश्यते, तथाहि–क्षायोपशमिकज्ञानं प्रति स्पर्शनादीनि करणानि भवन्त्येवेति सुशोभनं अर्थात् स्पर्शनादिकरणजन्यं छाद्मस्थिकं ज्ञानमस्ति, क्षायिकज्ञानं प्रति स्वस्यैव करणताऽस्ति, स्वरूपकरणजन्यं स्वभाव–क्षायिकज्ञानमस्ति, अत्र स्वं विहाय परस्पर्शनादिकरणाभावत्वेन कथ्यते अत्रैकांतो–नियमो नास्ति, 'करणाभावे कर्ता, करणसाध्यफलसाधको न भवेत्' यतः तरणकलापारंगतो विना नौकां सागरसन्तरणं दृश्यते (एवं च ज्ञानात्मनोरभेदे, यथा सर्प आत्मानमात्मना वेष्टयतीत्यत्राभेदे कर्तृकरणभावस्तथाऽत्रापि) अर्थात् छाद्मस्थिकज्ञानं प्रति स्पर्शनादि भिन्नं करणमस्ति, क्षायिक–स्वभावज्ञाने स्वस्यैव करणात्वमस्ति, स्वयमेव करणम्,

ननु—यथानीलपीतादि धर्मा बाह्यपदार्थस्य–प्रकृतेरेव सन्ति, तथा दुःख–द्वेष शोक वैषयिकसुखाद्या धर्मा बाह्यपदार्थस्य–प्रकृतेरेव सन्ति, किञ्च यदि मुक्तावस्थायां सर्वविषयविषयक–ज्ञानरूपसर्वज्ञता, सर्वद्रव्यपर्यायविषयक–साक्षात्काररूप सर्वदर्शितेति मान्यतायां बाह्यपदार्थस्य वेदनसमये (अनुभव–ज्ञानकाले) सर्वदुःखाद्यवेदनं अनुभवः–भोगो मुक्तेषु कथं न प्राप्येतेति चेदुच्यते,

एवं च—दुःखाद्यनुभवं (विपाकं–भोगं) कार्यं प्रति असातवेदनीयादि, कर्म कारणमस्ति, वा सातावेदनीयादिकर्मपुद्गलरूपद्रव्यकर्म प्रति आत्मन औदयिक (कर्मोदयजन्य) वैभाविकरागद्वेषमोहादिरूपस्वपरिणामः कारणमर्थाद्रागद्वेषमोहादिरूपौदयिकभावाऽभावेऽसातवेदनीयादि द्रव्यकर्म नास्ति, यदाऽसातवेदनीयादिजन्यदुःखाद्यनुभवः कुतो भवेत्? इति एवं च दुःखाद्यनुभवं प्रति दुःखादिविषयकज्ञानं कारणं नास्ति,

(वयं जैना ज्ञानमप्राप्यकारीति मन्यामहे, अर्थात् ज्ञानमात्मनि स्थित्वैव पदार्थान् जानाति ज्ञेयपदार्थान् प्राप्य (संयुज्य) गत्वा नहि जानाति, तस्मान्नरकादिदुःखानां

स्वरूपज्ञानतो दुःखस्याऽनुभवो नास्ति, यदि ज्ञानमात्रादेव सुखदुःखाद्यनुभवमान्यतायां पुष्प-माला—चन्दन—स्त्री—कर्णशष्कुली— मिष्टान्न—पक्वान्न— स्वादिष्टपदार्थविषयकचिंतन ( ज्ञान ) मात्रादेव तृप्तिर्भाव्यैव, यद्येवं तृप्तिर्भवेत्तदा मालादिप्राप्तये प्रयत्नमात्रस्य निष्फलतां प्राप्नुयादिति. )

परन्तु, असातवेदनीयादिकर्म कारणमस्ति, चासातवेदनीयादिकर्मणः कारणं, रागद्वेष-मोहादिरूपस्वपरिणामरूप औदयिक—भावोऽस्ति, किञ्चौदयिकभावरहित आत्मनि ( असातवेद-नीयादिकर्मविपाकजन्य—स्वपरिणामरूपौदयिक—क्रियाभावशून्य आत्मनि ज्ञानमात्राद् दुःखा-द्यनुभवस्य सर्वथाऽभावोऽस्ति, यतः केवलज्ञानेनैव दुःखाद्यनुभवस्य मान्यतायां, दुःखादौ, औदयिक—क्रियाभावस्य स्वभावता स्वीकरणीया स्यात्, परन्तु दुःखाद्यं तु, असातवेदनीयादि कर्मणः फलमस्ति, औदयिक—क्रियाभावस्य स्वभावता तु संसारवर्तिन्यात्मन्यस्ति, औदयिक—क्रियाभावशून्ये मुक्तात्मनि नास्ति, एवं च सर्वज्ञता च सर्वदर्शितेति द्वयमात्मनः स्वभावोऽस्ति, सिद्धमिति ।

केवलज्ञानं सर्वविषयान् जानाति, केवलदर्शनं सर्वविषयान् पश्यतीत्येतद्विषय-कालोचना—

वादी ( पूर्वपक्षः ) ज्ञानस्य विषयो विशेषा न सामान्यं, ज्ञानं विशेषरूपविषयविषयकं न तु सामान्यरूपविषयविषयकं, दर्शनं सामान्यरूपविषयविषयकं न तु विशेषरूपविषयविषयकं, तर्हि केवलज्ञानस्य विषयः, सामान्यविशेषौ, सर्वेऽर्थाः कथं ? अर्थात् केवलज्ञानदर्शनयोः सामान्यविशेषोभयरूपं सर्वार्थविषयकत्वमयुक्तं, यतः केवलज्ञानदर्शनोभयं सामान्य विशेषोभयरूप सर्वार्थविषयविषयकमस्ति, किञ्च केवलज्ञानदर्शनोभयं, नैतत् केवलज्ञानरूपं तथैकं केवल-दर्शनरूपं नास्ति, यत 'उभयं नैकं' उभयं तूभयमेव न त्वेकं इति न्यायोऽस्ति केवलज्ञान-दर्शनोभयनिष्ठोभयत्वविशिष्टं केवलज्ञानदर्शनोभयमस्ति, एतदुभयस्य विषयः विशेषसामान्य सर्वार्थोऽस्ति, तथा च केवलज्ञान—दर्शनाभ्यां भिन्नं—विलक्षणं केवलज्ञानदर्शनोभयरूपं ज्ञाना-तरन्तु युष्माभिर्न मतमस्ति, यतः सर्वार्थविषयकं ज्ञानं भवेदिति.

अतो मुक्तावस्थायां केवलज्ञानदर्शनोभयरूपस्य सर्वार्थविषयकज्ञानान्तरस्याभावत्वेन सर्वज्ञ-तायां वा सर्वदर्शितायां अभावः कथं न ?

समाधानं ( उत्तरपक्षः ) सामान्यस्य विशेषस्य भेदो नास्ति ( आश्रय—भेदाभावात् )

केवलज्ञानस्य विषयः ( प्राधान्येन ) विशेषोऽस्ति, गौणरूपेण सामान्यमप्यस्ति, केवलदर्शनस्य विषयः प्राधान्येन सामान्यमस्ति, गौणरूपेण विशेषोऽप्यस्ति, अर्थात् केवलज्ञानस्य विषयः विशेषश्च सामान्यं चैवमुभयमस्त्यतः विशेषसामान्योभयरूपसर्वार्थविषयविषयकता केवलज्ञाने वर्त्तते किञ्च केवलदर्शनस्य विषयः सामान्यं विशेषश्चेत्युभयमस्त्यतः सामान्य–विशेषोभयरूपसर्वार्थ विषयविषयकता, केवलदर्शने वर्त्तते, तथा चोभयम् , स्वतन्त्रतया सामान्यविशेषावगाहित्वेन, केवलज्ञानदर्शनोभयरूपं ज्ञानान्तरं न कल्पनीयं, केवलज्ञानमेकमेव विशेष–सामान्योभयावगाहकं, केवलदर्शनमेवैकं सामान्यविशेषोभयावगाहकमस्ति.

पारिभाषिक–सामान्यविशेषव्याख्या=यदा सामान्यविशेषयोर्भेदो नास्ति तदा सामान्य-विशेषरूप–संज्ञाशब्द–भेदे को गर्भितार्थोऽस्ति ? एतादृशशंकासमाधानाय कथयति—

पदार्था एव सामान्यविशेषरूपेण संकेतिताः क्रियन्ते, तथाहि त एव पदार्थाः समत्वेन ( समत्वधर्मावच्छेदेन ) विषमत्वेन ( विषमत्वधर्मावच्छेदेन ) समताधर्मविशिष्टविषमताधर्माऽवच्छिन्ना पदार्था यदा सम्प्रज्ञान–( अवबोध–उपयोग ) विषयभूता भवन्ति, तदा बोधरूप उपयोग ( सम्प्रज्ञान ) विषयभूताः समताधर्म–विशिष्ट–पदार्था सामान्यशब्दवाच्या भवन्ति. तथा च बोधरूपोपयोग ( सम्प्रज्ञान ) विषयभूताः—विषमताधर्मविशिष्ट पदार्था विशेषशब्दवाच्या भवन्ति. अत एते, त एव ज्ञायन्ते त एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति,

**पूर्वपक्षः**=पदार्थाः सासान्यविशेषात्मका भवन्तु, परन्तु ज्ञानद्वारा विषमताधर्मविशिष्टा एव गम्यन्ते ( ज्ञायन्ते ) न तु समताधर्मविशिष्टा अपि, तथा दर्शनद्वारा समताधर्मविशिष्टा एव गम्यन्ते ( दृश्यन्ते ) न विषमताधर्म–विशिष्टा अपि, ततश्च ज्ञानेन समताख्यधर्मस्याग्रहणाद् दर्शनेन विषमताख्यस्य धर्मस्याग्रहणाद् , अर्थात् केवलज्ञानं, विशेषधर्मविशिष्टपदार्थविषयकं परन्तु सामान्यधर्माग्राहकं, ( सामान्यविशिष्टपदार्थमपि न गृह्णाति ) अतः सर्वार्थविषयकं कथं ? तथा केवलदर्शनं, सामान्यधर्मविशिष्टान् पदार्थान् पश्यति, परन्तु विशेषनामकधर्म ( विशेषविशिष्टपदार्थान् ) न पश्यति, ततः सर्वार्थविषयकं कथं ? किञ्च धर्मा अपि अर्था–विषयाः ( ग्राह्यत्वेन ) सन्ति, अत एव केवलज्ञाने सामान्यधर्मरूपविषयस्य, केवलदर्शने च विशेषधर्मविषयस्य ग्रहणरूपेणाभावोऽस्ति, अतः केवलज्ञानस्य च केवलदर्शनस्य सर्वार्थविषयकत्वमयुक्तं कथं न ?

( **उत्तरपक्षः** ) हे वादिन् ! धर्मिणो ग्रहणे धर्माणां ग्रहणं न भवतीति मा वद, यतो ज्ञानद्वारा विषमताविशिष्टपदार्थानां ग्रहणेन सह विषमतारूपधर्मस्य ग्रहणं च समतारूपधर्मस्य ग्रहणं भवति, तथा दर्शनद्वारा समताविशिष्टपदार्थानां ग्रहणेन सह समतानामकधर्मस्य विषमतानामकधर्मस्य ग्रहणं भवति यतो जैनशासने धर्मिभिः सह धर्माणां सर्वथा भेदो न स्वीकृतः ( धर्मधर्मिणोः सर्वथा भेदाऽभ्युपगमे, तयो विशेषणविशेष्यसम्बन्धो न भवितुं शक्नोति, यथा करभरासभयोः सर्वथा भिन्नत्वे सति धर्मधर्मिसम्बन्धो न भवितुं शक्यते, यदि धर्मितो धर्मस्य सर्वथा भिन्नपदार्थत्वे एकस्मिन्नेव वस्तुनि पदार्थानन्त्यप्रसङ्ग आपतेत् ! यतो वस्तु अनन्तधर्मात्मकमस्ति, किञ्च सामान्यविशेषयोः प्रतीतिः पदार्थानां धर्म (गुण) रूपेणैव भवति, पदार्थेषु सामान्यविशेषौ अविष्वग्भावे ( अभेदभावे ) न वर्त्तमानौ स्तः, सामान्यविशेषयोः सर्वथा भिन्नत्वे, एकस्मिन् वस्तुनि सामान्यविशेषसम्बन्धो न भवति, यतः सामान्यविशेषयोः पदार्था एकान्तेन भिन्ना मता अतः पदार्थसामान्यविशेषयोः सम्बन्ध एव न भवति. )

(१) यैः समताख्यो धर्मः गौणीकृतः ( स्वकुक्षिकृतः—अभ्यन्तरीकृतः ) ईदृशा विषमतानामकधर्मविशिष्टाः पदार्था एव ज्ञानेन गम्यन्ते ( ज्ञायन्ते ),

(२) तथा ये विषमतानामको धर्म उपसर्जनीकृतः ( अभ्यन्तरीकृतः—स्वकुक्षिरक्षितः ) ईदृशाः समताधर्मविशिष्टाः पदार्था दर्शनेन गम्यन्ते ( दृश्यन्ते ) यतो जैनमते धर्मिभिः धर्मस्य सर्वथा भेदो न मतः, इत्यतो न दोषः। तथा च ज्ञानदर्शनरूपग्रहणस्य भेदस्य बीजकं गौणमुख्यभावोऽस्ति, अर्थात् विशेषं प्रधानं कृत्वा, सामान्यं च गौणं कृत्वा पदार्थविषयकं बोधरूपग्रहणं तज्ज्ञानं तथा सामान्यं प्रधानं कृत्वा विशेषं च गौणं कृत्वा ( अभ्यन्तरं कृत्वा ) पदार्थविषयक—बोधरूपं ग्रहणं दर्शनं एवं च भिन्न—भिन्न—शैल्या बोधरूपग्रहणं नाम ज्ञानं च दर्शनम्, शैल्या भेदे गौणमुख्यभावो महत्त्वपूर्णं भागं भजते,

अर्थात् धर्मिणां ग्रहणेन सहैव धर्माणां ग्रहणतः केवलज्ञानं धर्मधर्मिरूप—सर्वार्थविषयविषयकं तथा केवलदर्शनं च धर्मधर्मिरूपसर्वार्थविषयविषयकं, अर्थाद् अर्हत्सु भगवत्सु ( मुक्तेषु ) सर्वज्ञता च सर्वदर्शिता प्रमाण—सिद्धैव ।

पूर्वोक्तस्य निष्कर्षः=जीवस्य स्वाभाव्यतः सामान्यस्य प्रधानतावत्, उपसर्जनीकृतविशेषतावत्—अर्थस्य ग्रहणं दर्शनमुच्यते, तथा विशेषप्रधानतावत्, उपसर्जनीकृत—सामान्यतावत्, अर्थस्य ग्रहणं ज्ञानमुच्यते,

(१) दर्शनरूप—जीवस्वभावः=स्वस्वभावतः सामान्यं मुख्यं कृत्वा विशेषं गौणं कृत्वा पदार्थविषयकं बोधरूपग्रहणं, दर्शननामकजीवस्वभावः।

(२) ज्ञानरूप—जीव-स्वभावः=जीवस्वभावतः सामान्यं गौणं कृत्वा, विशेषं मुख्यं कृत्वा पदार्थविषयकबोधरूपग्रहणं, ज्ञाननामकजीवस्वभावः।

(अत्र दर्शनं प्राग्ग्रहणं छद्मस्थजीवापेक्षया, आदौ निर्विकल्पकज्ञानमुत्पद्यते केवलिनां तु प्राग् ज्ञानं भवति.)

तथा च यत्र प्रधानत्वेन सर्वे विशेषाः सन्ति, गौणरूपेण च सर्वसामान्यं वर्त्तते ईदृशं यत्प्रधानसकलविशेषकं गुणभूतसकल-सामान्यकज्ञानं, केवलज्ञानं अत एव सर्वार्थविषयकं ज्ञानं अत एव तद्वान् 'सर्वज्ञः'

यत्र प्रधानरूपेण सर्वं सामान्यं गौणरूपेण सर्वे विशेषा एतादृशं यद्ग्रहणं, प्रधान सकलसामान्यकं गुणभूतसकलविशेषकं, एतादृशं यद्ग्रहणं प्रधान-सकलसामान्यकं गुणभूत-सकलविशेषकं तदनन्तदर्शनं-केवलदर्शनं कथ्यते, अत एव सर्वार्थविषयकं केवलदर्शनमतस्तद्वान् 'सर्वदर्शी कथ्यते.

**पूर्वपक्षः**=अपरः-साङ्ख्य आह-कथयति=मुक्तात्मनः=क्षीणकर्मणः, अमूर्त्तत्वात्—रूपादिरहितत्वात्, ज्ञानस्यापि—न केवलं मुक्तात्मनः, मुक्तात्मधर्मत्वेन ज्ञानस्यापि अमूर्त्तत्वं आकाशधर्माकाशत्ववत् वर्त्तते, अमूर्त्तस्य धर्मोऽमूर्त्तः, अर्थात् मुक्तात्मनश्च ज्ञानस्य, मुक्तात्मज्ञान-रूपयोरुभयोरमूर्त्तत्वेन, 'विषयाकारताऽयोगतः'=विषयस्य तुल्यो य आकारः (स्वभावः आकृतिः प्रतिबिम्बं) तस्या भावतो, (निरुक्तवृत्त्या ज्ञायतेऽनेनेति) करणसाधनरूपज्ञानाभाव एव, निराकार-त्वेन साकारज्ञानाभावः कथं न?

तद्भावना=असौ खलु मुक्तात्मा, निस्तरङ्गमहासागरसदृशः, तत्समुद्रतरङ्गतुल्याश्च महदादिपवन-बुद्ध्यहङ्कारादिप्रकृतिविकारपवनयोगतः-सम्बन्धतः वृत्तयो-विषयज्ञानादिकाः प्रवृत्तयः, अर्थात् तरङ्गतुल्यपवनयोगस्याभावात्, तरङ्गतुल्यवृत्त्यभावः।

तथा च प्रकृतिविकाररूप-बुद्धिआदिरूपकारणस्याभावे विषयज्ञानादिक-वृत्ति-प्रवृत्तिरूप-कार्यस्याभावः, अत एव मुक्तात्मनि साकारज्ञानस्याभावत्वेन सर्वार्थविषयक-ज्ञानस्याभावः, अतो मुक्तात्मनि सर्वज्ञताया अभावेन मुक्तात्मानोऽसर्वज्ञा इति वादिना सिद्धिःकृता,

निराकारेण तु विज्ञानेन ग्रहणाऽभ्युपगमे विषयप्रतिनियमः (नैयत्यं) न घटते—विषयस्येवाकारशून्येन निराकारेण विज्ञानेन पदार्थग्रहणमस्तीति मते (साकार) विषयाणां नियमःकथं घटत इत्यर्थः ?

(उत्तरपक्षः) एतदपि—साङ्ख्योक्तमेतदप्यसत्—असुन्दरं कथमिति चेदुच्यते विषयग्राहकत्वेन जीवपरिणतेरेवाकारत्वात् (विज्ञानघनो—ज्ञानदर्शनोपयोगात्मकं विज्ञानं तन्मयत्वादात्माऽपि विज्ञानघनः, प्रतिप्रदेशं अनन्त—ज्ञानदर्शनपर्यायात्मकत्वात् स च विज्ञानघनः उपयोगात्मक आत्मा, ज्ञेयेभ्यः—कथंचिद्भूतेभ्यस्तद्विकारेभ्यो वा घटादिभ्यः समुत्तिष्ठते—उत्पद्यते इत्यर्थः घटादिज्ञानपरिणतो हि जीवो घटादिभ्य एव हेतुभूतेभ्यो भवति. घटादिज्ञान (उपयोग) परिणामस्य घटादि—वस्तुसापेक्षत्वात् )

आकार इत्युक्ते कोऽर्थः ? विषयग्रहणकारकजीवपरिणति (उपयोगस्वभावः) रेवाकारतया परिभाष्यते । विषयग्राहकोपयोगरूपजीवपरिणामरूपाकारस्य, अमूर्त्तेऽपि मुक्तात्मनि अपि, न केवलं मूर्त्ते इति अपेरर्थः । केनाऽप्यबाध्यमानत्वात्, अनेकविषयस्यापि—युगपदनेकं विषयमाश्रित्य प्रवृत्त—स्याऽपि च किं पुनरेकविषयस्य, अनेकविषयस्यैकविषयस्य विषयग्राहको—पयोगरूपजीवपरिणतिरूपाकारस्यैव घटमानता (सम्भवः) वर्त्तते चित्रे—प्रतीते, आस्तरणे च—वर्णकम्बले आदिशब्दादन्यबहुवर्णविषयग्रहः, युगपद्बहुविषयकग्रहणपरिणाम—आकारोपलब्धेः स्वसंवेदनेनैव । *विषयविषयकग्रहणरूप (ज्ञानोपयोगरूप) जीवपरिणामस्यैवाकारत्व—कथनेन* योऽर्थः फलितो भवति तस्य दर्शनम् —

तथा च दर्पणसमानबुद्धौ पदार्थानां प्रतिबिम्बरूपाकारो यदा पतति तदा तद्—विषयकज्ञानवान् आत्मा भवति, परन्तु मुक्तात्मनि दर्पणसमान—बुद्धेरभावेन पदार्थानां प्रतिबिम्बरूपाकारपतनेन सर्वपदार्थविषयकज्ञानरूपकेवलज्ञानवान् (सर्वज्ञः) मुक्तात्मा नास्ति, अर्थात् विषयाकारप्रतिसंक्रमरूपप्रतिबिम्बस्याभावरूपः प्रतिबिम्बाकारता प्रतिक्षेपः, कथितस्तस्य प्रतिक्षेपो भवति. तथाहि—अत्र घटादिपदार्थस्याकारः, आकारत्वेन न परिभाष्यते परन्तु विषयग्रहण (ज्ञानोपयोग)—रूप जीवपरिणाम (स्वभाव) स्यैव प्रतिबिम्बत्वेनाऽभ्युपगमोऽस्ति. एतादृश—विशिष्ट (परिभाषित)—आकारस्य निरूपणेन, घटादिरूपविषय (ग्राह्य) स्याकारस्य, विषयग्राहकज्ञाने प्रतिसंक्रम—प्रतिबिंबस्यापतनेन, ज्ञाने विषयाकारस्य प्रतिबिम्बं पतेत् तदैव तद्विषयकज्ञानवानात्मा भवेत्, मुक्ताऽवस्थायां अरूपिणि ज्ञाने विषयाकारप्रतिबिम्बपतनाभावेनार्थात् सर्वार्थविषयक—ज्ञानवान् मुक्ताऽऽत्मा नास्तीति वर्णनमसत्—अत एव खण्डितं भवति.

३०

यदि विषयाकारप्रतिसंक्रमो ज्ञाने पततीति मान्यतायां ज्ञेयज्ञानयोरभेद एव, एकीभावो भवेत्, अभेदतो विषयो वाऽकार-शून्यो भवेद्, यतो विषयस्याकारः ज्ञाने प्रविष्टः स्यात्। प्रतिबिम्ब-रूपाकारस्य परिभाषास्फोटः-जैनदर्शने विषयग्रहणपरिणाम एव (विषयग्रहण-ज्ञानोपयोग रूपजीवपरिणामः) प्रतिबिम्बत्वेनाऽकारत्वेन परिभाष्यते-संकेत्यते, विषयग्रहणोपयोगरूपजीवपरिण-तिरेव प्रतिबिम्बाकाररूपताऽस्ति।

तथा च विषयग्रहणजीवपरिणामस्यैवाकारत्वेन सामयिकविवक्षया (एकस्मिन् समये ज्ञानं, दर्शनं चापरक्षणे। सर्वज्ञस्योपयोगौ द्वौ समयान्तरितौ सदा) समयान्तरापेक्षया, साकारं-विशेषग्रहणजीवपरिणामवज्ज्ञानं कथ्यतेऽर्थाद्, उपयोगविशेषरूपं विशेषग्रहणजीवपरिणामवद् यत्तज्ज्ञानं साकारत्वेन सम्बोध्यते, उपयोगविशेषरूपं सामान्यग्रहणजीवपरिणामवद् यत् तद् दर्शनं 'निराकारं' कथ्यते.

अत एव सकलविशेषग्रहणजीवपरिणामवत् साकारोपयोगविशेषरूप-केवलज्ञानवद्भ्यः सर्वज्ञेभ्यो भगवद्भ्यो नमो नमः,

तथा सकल-सामान्यग्रहण (ग्राहक) जीवपरिणामवदनाकारदर्शनरूप-उपयोगविशेष-केवलदर्शनवद्भ्यः सर्वदर्शिभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः। इति शक्रस्तवस्य एकत्रिंशत्तमपदस्य व्याख्या समाप्ता.।

**अथ शक्रस्तवस्य द्वात्रिंशत्तमपदस्य व्याख्याऽऽरम्भतः पूर्वमवतरणिकाया अवतारः-**

**एते च सर्वेऽपि सर्वगतात्मवादिभिर्द्रव्यादिवादिभिस्तत्त्वेन सदा लोकान्तशिवादिस्थानस्था एवेष्यन्ते, "विभुर्नित्य आत्मे" ति वचनाद्, एतदपोहायाह-"शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्तिसिद्धिगतिनामधेयं स्थानं सम्प्राप्तेभ्यः" इह तिष्ठन्त्यस्मिन्निति स्थानं, व्यवहारतः सिद्धिक्षेत्रं, "इह बोदिं चइत्ता णं, तत्थ गंतूण सिज्झइ" त्तिवचनात्, निश्चयतस्तु तत्स्वरूपमेव, "सर्वे भावा आत्मभावे तिष्ठन्ती" तिवचनात्, एतदेव विशेष्यते, तत्र "शिवम्" इति सर्वोपद्रवरहितत्वाच्छिवं,**

तथा स्वाभाविकप्रायोगिकचलनक्रियापोहान्न चलमचलं, तथा रुजाशब्देन व्याधिवेदनाभिधानं ततश्चाविद्यमानरुजमरुजं, तन्निबन्धनयोः शरीरमनसोरभावात्, तथा नास्यान्तो विद्यत इत्यनन्तं, केवलात्मनोऽनन्तत्वात्, तथा नास्य क्षयो विद्यत इत्यक्षयं, विनाशकारणाभावात्, सततमनश्वरमित्यर्थः, तथा अविद्यमानव्याबाधमव्याबाधं, अमूर्त्तत्वात्, तत्स्वभावत्वादिति भावना तथा न पुनरावृत्ति. आवर्त्तनमावृत्तिर्भवार्णवे तथा तथाऽऽवर्त्तनमित्यर्थः तथा सिध्यन्ति–निष्ठितार्था भवन्त्यस्यां प्राणिन इति सिद्धिः–लोकान्तक्षेत्रलक्षणा, सैव च गम्यमानत्वाद्गतिः, सिद्धिगतिरेव नामधेयं यस्य तत्तथाविधमिति, स्थानं प्रागुक्तमेव, इह च स्थानस्थानिनोरभेदोपचारादेवमाहेति, "सम्प्राप्ताः" इति सम्यग्–अशेषकर्म्मविच्युत्या स्वरूपगमनेन परिणामान्तरापत्त्या प्राप्ताः। न विभूनां नित्यानां चैवं प्राप्तिसम्भवः, सर्वगतत्वे सति सदैकस्वभावत्वात्, विभूनां सदा सर्वत्र भावः, नित्यानां चैकरूपतयाऽवस्थानं, तद्भावाव्ययस्य नित्यत्वाद्, अतः क्षेत्रासर्वगतपरिणामिनामेवैवंप्राप्तिसम्भव इति भावनीयं, तत्तेभ्यो नम इति क्रियायोगः ॥ इति ३२ ॥

पं०–"द्रव्यादिवादिभिरिति" द्रव्यगुणकर्म्मसामान्यविशेषसमवायवादिभिर्वैशेषिकैरित्यर्थो, "विभुरिति" सर्व्वाकाशव्यापी।

टी०...एते च सर्वेऽपि–एते प्रस्तुता अर्हन्तो भगवन्तश्च सर्वे–जीवात्मानः संसारिणश्च मुक्ताश्च सर्वे जीवाः, सर्वगत–(जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्चेति तर्कसङ्ग्रहे, 'कालखात्मदिशां सर्वगतत्वं (सिज्झंति–ऋजुसूत्रस्य व्यवहारतामपेक्ष्य, तिष्ठन्तीति समभिरूढः। इति टीप्पनिकायां) परमं महत्' कारिकावल्याम्) आत्मवादिभिः, द्रव्यादिवादिभिः ('द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट् पदार्थाः' एवं वदनशीलैर्वादिभिः वैशेषिकैः, षड्लुक-

मतानुयायिभिर्लोकैः) सर्वज्ञ–सर्वदर्शिनोऽर्हन्तो भगवन्तस्तथाऽन्ये सर्वे आत्मानः तत्त्वतः सदा ( सर्वकालावच्छेदेन ) लोकान्तशिवादिस्थानस्था एवेष्यन्ते 'विभुर्नित्य आत्मेति' वचनाद्,

एतदपोहायाह="शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्ति–सिद्धिगतिनामधेयं स्थानं सम्प्राप्तेभ्यः" एतत् सूत्रघटकविशेष्यपद–वाचकस्थानस्य व्युत्पत्तिलभ्योऽर्थः=इह सूत्रे–तिष्ठन्त्य-स्मिन्निति स्थानं, यत्र गतिनिवृत्तिरूपस्थितितस्तिष्ठन्ति तत्स्थानं ( आश्रयविशेषः )

व्यवहारनयतस्तत्स्थानपरिचयः=व्यवहारनयतः सिद्धिक्षेत्रं, कथमिति चेदुच्यते 'इह-बोंदिचइत्ताणं, तत्थ गंतूण सिज्झइ'ति इह शरीरं त्यक्त्वा तत्र गत्वा सिध्यतीति वचनं वर्त्तते (लोकान्त–आकाशक्षेत्ररूपलोकाग्रभागः सिद्धिक्षेत्रं)निश्चयनयापेक्षया तु सिद्धात्मस्वरूपमेव, कथमिति चेदुच्यते–सर्वे भावा आत्मभावे तिष्ठन्तीति वचनं वर्त्तते,

(१) अत्र ऋजुसूत्रं व्यवहारनयत्वेन गणयित्वेदं कथनं ज्ञेयं,

(२) निश्चयनयतः–अर्थात् समभिरूढ–नयस्याऽभिप्रायेण, सिद्धात्मस्वरूपमेव ( केवल-ज्ञानादिसिद्धस्वरूपमेव ) स्थानत्वेन कथ्यते,

व्यवहारनयाऽभिप्रेतसिद्धिक्षेत्रस्वरूपस्थानं, निश्चयनयाऽभिप्रेत–सिद्धात्मस्वरूपरूप–स्थानं विशेष्यपदं कृत्वा शिवादिविशेषणपदै र्विशेष्यते, तत्र

(१) 'शिव'मिति स्थानं शिवं (मंगल–निरूपद्रवरूपं) यतः सर्वे च ये, उपद्रवा=आध्या-त्मिक–आधिभौतिक–आधिदैविका उपद्रवास्तेषामात्यन्तिकाभावाच्छिवं–मंगलमुपद्रवनामरहितं,

(२) यथा शिवं स्थानं तथा–तेन प्रकारेणाचलं–स्वाभाविकचलनक्रियाऽपोह रूपहेतुना च प्रायोगिकचलनक्रियाऽपोहतोऽर्थाच्चलनक्रियामात्रापोहतो न स्वभावतो न प्रयोगतो गमनाभाव इत्यर्थः, न चलमचलम् .

(३) यथा स्थानं शिवमचलं तथा–अरुजं स्थानं=रुजाशब्देन व्याधिश्च वेदना च कथ्यते, ततश्च विद्यमानरुजमरुजं, तन्निबन्धनयोः–व्याधिवेदनयो र्मूल–कारणभूतयोः शरीरं च मनश्च, तयोः व्याधिकारणस्य शरीरस्य, वेदना–दुःखानुभवस्य कारणस्य मनसोऽभावात् कारणाभावे–शरीर–मनसोरभावे तत्कार्यभूतव्याधिवेदनयोरभावः,

(४) यथा स्थानं शिवमचलमरुजं तथाऽनन्तं स्थानं, नास्याऽन्तो विद्यते इत्यनन्तं केवलाऽऽत्मनोऽनन्तत्वात्, अनन्तत्वं स्थानस्य कथमिति चेदुच्यते केवल (केवलज्ञानं, शुद्धा-त्मा) केवलज्ञानस्य च शुद्ध–सिद्धात्मनोऽनन्तत्वं अर्थात् निश्चयनयसम्मतस्व–स्वरूपमेव स्थान–

मनन्तं—अन्तशून्यं, यतः केवलज्ञानादिरूपकेवलस्वभावस्यानन्तत्वं, व्यवहारनयसम्मतसिद्धिक्षेत्र-रूपस्थानमनन्तं यत: केवल—शुद्ध—सिद्धात्मनोऽनन्तत्वं (स्थानस्थानिनोरभेदोपचारात्).

(यत्र स्थाने एको जीवो मोक्षं गतः, तत्र स्थानेऽन्येऽपि बहवो जीवा मोक्षं गता भवन्ति, ते च सर्वानन्तसिद्धा निश्चयतो लोकस्योर्ध्वान्तस्पर्शिनो भवन्ति अर्थात् सम्पूर्णैकसिद्ध-स्यावगाढक्षेत्रेऽन्येऽनन्तसिद्धा (तावत्याऽवगाहनया) अवगाढाः सन्ति.)

(५) यथा स्थानं शिवमचलमरुजमनंतमस्ति तथाऽक्षयं—नास्य क्षयो विद्यत इत्यक्षयं, विनाशकारणाभावात् सततमनश्वरमित्यर्थः नैरन्तर्येणानश्वरमित्यर्थः,

(६) यथा यत्स्थानमक्षयं तथाऽव्याबाधं, अविद्यमानव्याबाधं=पीडामात्रस्य सर्वथाऽ-भाव इत्यर्थः (स्वाभाविकानन्तसुखमयं यतः स्वस्वरूपमात्मस्वभावत्वेन अमूर्त—अरूपित्वेनामूर्त्ते पीडाया अभावः, स्वभावे च व्याबाधाया अभावः) दुःखमसातवेदनीयकर्मजन्यमस्ति, सांसा-रिकसुखं सातवेदनीयकर्मजन्यमस्ति, जन्यत्वेन सान्तं दुःखरूपं दुःखजनकं पररूपं तथा चात्मिकमनन्तानन्दरूपं, अनन्तसुखं प्रतिबन्धकवेदनीयकर्मणः सर्वथा क्षयभावेन, स्वाभाविका-नन्तसुखमयमव्याबाधं स्थानं)

(७) अपुनरावृत्ति=यथा स्थानं शिवाद्यव्याबाधरूपमस्ति तथा—अपुनरावृत्ति अस्ति—यस्मात्पुनर्भवार्णवावताररूपावृत्ति नास्तीति अर्थात् तथा तथा तेन तेन प्रकारेण (संसारा-वस्थावत्) संसारसागरे पुनरावृत्तिरावर्त्तनं करणं गमनागमनं पुनरावृत्तिः कथ्यते यत्स्थानात् स्वशासन—तीर्थस्य ध्वंसे सत्यपि सर्वथा संसार—बीजकर्मलेपरहितानां सिद्धानां संसारसागरे पुन-रवतार—जन्मग्रहण—पुनरावृत्ति नास्ति, अर्थादपुनरावृत्ति कथ्यते.

(८) यथेदं प्रस्तुतं स्थानं शिवादिरूपं तथा सिद्धिगतिनामधेयं वर्त्तते, तथा—सिद्धिः—यत्र सिद्धौ प्राणिनः (केवलज्ञानादिभावप्राणवन्तः प्राणिनः) सिध्यन्ति—निष्ठितार्थाः (कृतार्थाः समाप्तकृत्या) भवन्ति, सा लोकान्तक्षेत्रलक्षणा सिद्धिः, सैव (प्राणिभिः) गम्यमानत्वाद्गतिः, (सकल—कर्मक्षयानन्तरं सिद्धत्वपर्यायं प्राप्य, सनातनः परमेश्वरः परमात्मा भवेत्, तदनन्तरं अयोगिना भगवता चतुर्दशरज्जुलोकान्तभागो गम्यते, अत एव गम्यमानत्वात् सिद्धिगतिः कथ्यते.) सिद्धिगतिरेवं नामधेयं (प्रशस्तं नाम नामैव वा) यस्य तत्तथाविधं, स्थानं पूर्वोक्तमेव। तत्स्थानं व्यवहारतः सिद्धक्षेत्रं निश्चयतश्च सिद्धात्मस्वरूपं ज्ञेयं, एवं चात्र शिवादीनि विशेषणानि स्थानस्य कथितानि तानि मुक्तात्मनां वस्तुतो विज्ञेयानि यतः स्थानं (सिद्धिक्षेत्रं वा स्वस्वरूपं) स्थानी च स्थानं 'सम्' सम्यग्—अशेषकर्मविच्युत्या स्वरूपगमनेन परिणामान्तरापत्त्या—सिद्धत्व-

रूपपरिणामान्तरगमनेन (समस्तलोकव्याप्तसूक्ष्मनिगोदादिव्यवच्छेदाय० 'सम्यग्' शब्दस्योपयोग:, यत: सकललोक–व्यापकत्वेन सूक्ष्मनिगोदादि विवक्षितक्षेत्रेऽपि प्राप्ता: सन्ति, तस्मात् तद्व्यवच्छेदाय 'संप्राप्ता: इति कथ्यते) प्राप्ता:–संप्राप्ता:, (परिणाम इत्युक्ते कोऽर्थ: ? उच्यते–अर्थान्तर–धर्मान्तर–प्राप्ति:, परन्तु एकान्ते, एकधर्मावस्थानं–अथवा तद्धर्मस्य सर्वथा विनाशाभाव:, स विद्भि: परिणाम: कथित:, यथा संसारिजीवस्य देवत्वं परित्यज्य मनुष्यत्वं, अजीवस्य परिणाम: स्थिरत्वादिधर्मतो गत्यादिधर्मे गमनं अर्थात्, एकावस्थां त्यक्त्वाऽवस्थान्तरे गमनं परिणाम: ।।) न विभूनां–सर्वाकाशव्यापिनां नित्यानां (कूटस्थनित्यानां–अप्रच्युतानुत्पन्नस्थिरैक स्वभावानां) चैवं प्राप्तिसम्भव: ।

यद्यात्मनां विभुत्वेन (सकलाकाशव्यापित्वेन) नित्यत्वेन मान्यतायां सिद्धिगतिनामकस्थानस्य सम्प्राप्ते:–कृत्स्नकर्मक्षयपूर्वकस्वस्वरूपावस्थानरूप सिद्धत्वपर्यायान्तर–प्राप्तिरूप–सम्प्राप्ते: असम्भव: ।

एतद्विषयकं विवरणं क्रियते='न विभूना' मित्यादि=वैशेषिकाश्च नैयायिका:, प्रत्येकात्मा विभु:=सर्वाकाशव्यापी यत्र यत्राकाशं तत्र तत्र सर्वत्र स्थाने प्रत्येकात्मा व्याप्तोऽस्ति, नित्य:–अप्रच्युतानुत्पन्नस्थिरैकस्वभाववान् अस्ति, एवं प्रतिपादयन्ति,

जैनास्तु यत्र देशे (यद्देशावच्छेदेन) यस्य गुणानां वा धर्माणां प्रत्यक्षादि–प्रमाणैरनुभवो जातो भवेत्, तत्र विवक्षित–देशे (तद्देशावच्छेदेन) तस्य पदार्थस्योपलब्धि भवति, अन्याऽविवक्षितदेशे नहि. ईदृशोऽबाध्य: सिद्धान्तो (व्याप्ति:) अस्ति, अत: शरीरे (शरीरदेशावच्छेदेनैव) आत्मनश्चैतन्याद्या गुणा अनुभूयन्ते, शरीराद्बहि: प्रदेशे नहि अत एव शरीरपरिमाण आत्माऽस्ति, (विवक्षितशरीररूपदेशावच्छिन्न आत्मा प्रतीयते मन्यते च)

अन्यच्च यदप्रच्युतानुत्पन्नैकस्थिरस्वभाववान् नित्योऽस्तीति. नैयायिकवैशेषिकमतमस्ति तदयुक्तम्, यत एतादृश: कश्चित्पदार्थो नास्ति, य: पर्यायाऽपेक्षया, उत्पत्तिविनाशरहितोऽस्ति च सदैकरूपो भवेत्, अत: (द्रव्यापेक्षया) पदार्थस्वरूपाऽव्ययत्वं नित्यत्वं (तद्भावाऽव्ययं नित्यं, तत्त्वा. सू. अ. ५ सू. ३०) एतज्जैनमतं समञ्जसं यद् उत्पादविनाशसत्त्वे, स्वस्वरूपं अजहत् पदार्थो नित्य:, अत: श्रीहरिभद्रसूरीश्वरमहाराजो वैशेषिकादि ज्ञापयति यद् विभुनित्यात्मनां सिद्धिगतिनामकस्थानप्राप्ते:–सकलकर्मक्षयपूर्वकस्वस्वरूपाऽवस्थानरूप – सिद्धत्वपर्यायान्तरपरिणामान्तर–प्राप्ते: असम्भव:, यत: सर्वात्मनां सर्वगतत्वेन–सर्वाकाशव्यापित्वेन सदास्थिरैकस्वभावत्वेन–नित्यत्वेन व्याप्ति: सर्वत्राऽस्ति. तथा चोत्पादव्ययसत्त्वेऽपि स्वस्वरूपाऽपरित्यागरूप-

नित्यत्वस्य जैनशासने विहितत्वेन, संसारपर्यायपरित्यागरूपव्ययस्य, च सिद्धत्वपर्यायान्तरप्राप्तिरूपोत्पादस्य सत्त्वेऽपि, आत्मनि केवलज्ञानादिरूप—परमचैतन्यस्वरूप-ध्रौव्यं सदा वर्तत एवात एवात्मा, क्षेत्ररूपाकाशस्य सर्वत्र भागेऽव्यापकत्वेन 'क्षेत्रासर्वगतः' कथ्यते, किञ्चैकाऽवस्थां त्वक्त्वावस्थाऽन्तरगामित्वेन परिणामी कथ्यतेऽतः शिवाचलादिविशेषणविशिष्टलोकान्तक्षेत्रलक्षण-सिद्धिगतिनामकस्थान—संप्राप्तेः सकलकर्मक्षयपूर्वक—स्वस्वरूपाऽवस्थानरूपसिद्धत्व—परिणामान्तर प्राप्तेः सम्भव एवेति भावनीयम्.

'शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्तिसिद्धिगतिनामधेयं स्थानं सम्प्राप्तेभ्योऽर्हद्भ्यो भगवद्भ्यो नमो नमः'

**एवंभूता एव प्रेक्षावतां नमस्कारार्हाः, आद्यन्तसङ्गतश्च नमस्कारो मध्यव्यापीति भावना, जितभया अप्येत एव नान्ये इति प्रतिपादयन्नाह—"नमो जिनेभ्यः जितभयेभ्यः" नम इति पूर्ववत्, जिना इति च, जितभयाः—भवप्रपञ्चनिवृत्तेः क्षपितभया इत्युक्तं भवति, अनेनाद्वैतमुक्तव्यवच्छेदः, तत्र हि क्षेत्रज्ञाः परमब्रह्मविस्फुलिङ्गकल्पाः, तेषां च ततः पृथग्भावेन ब्रह्मसत्तात एव कश्चिदपरो हेतुरिति,**

पं०..."अनेनेत्यादि" अनेन भावतो जितभयत्वनिर्देशेनाद्वैते—परमब्रह्मलक्षणे सति मुक्ताः—क्षीणभवास्तेषां व्यवच्छेदो निरासः, कुत इति गम्यं, कुत इत्याह—"तत्र" अद्वैते "हिः" यस्मात् "क्षेत्रज्ञाः" संसारिणः "परमब्रह्मविस्फुलिङ्गकल्पाः" परमब्रह्मणः—परमपुरुषस्यावयवा एवेति भावः, यदि नामैवं ततः किमित्याह—"तेषां च" क्षेत्रज्ञानां "ततः" परमब्रह्मणः "पृथग्भावेन" विघटनेन "ब्रह्मसत्तात एव" ब्रह्मसत्ताया एव सकाशात् "कश्चित्" कालादिः "अपर" अन्यो "हेतुः" निमित्तम् "इति" एवं

**सा तल्लयेपि तथाविधैव, तद्वदेव भूयः पृथक्त्वापत्तिः, एवं हि भूयो भवभावेन न सर्वथा जितभयत्वं, सहजभवभावव्यवच्छित्तौ तु तत्तत्स्वभावतया भवत्युक्तवत् शक्तिरूपेणापि सर्वथा**

पं०..."सा" ब्रह्मसत्ता "तल्लयेऽपि" तस्मिन्-ब्रह्मणि मुक्तात्मनो लयेऽपि "तथाविधैव" विघटनहेतुरेव "तद्वदेव" एकवारमिव "भूयः" पुनः "पृथक्त्वापत्तिः" विघटनप्रसङ्गः इति,

ततः किमित्याह—"एवं" भूयः पृथक्त्वापत्त्या हिः" यस्माद् "भूयो भवभावेन" पुनः संसारापत्त्या "न" नैव "सर्वथा" शक्तिक्षयेणापि "जितभयत्वम्" उक्तरूपं, यथा स्यात्तथाह—"सहजभवभावव्यवच्छित्तौ तु" सहजस्य–ब्रह्मविचटनादेः कुतोऽप्यप्रवृत्तस्य जीवतुल्यकालभाविनो भवभावस्य–संसारपर्यायस्य व्यवच्छित्तौ–क्षये, पुनः, किमित्याह—"तत्तत्स्वभावतया" तस्याः–सहजभवभावव्यवच्छित्तेर्जितभयत्वस्वभावतया भवत्येतदित्युत्तरेण सह सम्बन्धः, कीदृशमित्याह—"निरुपचरितं तात्त्विकं, कुत इत्याह—"उक्तवत्" प्रागुक्तशिवाचलादिस्थानप्राप्तिन्यायेन "शक्तिरूपेणापि" भययोग्यस्वभावेनापि" किं पुनः साक्षाद्भयभावेन, अत एवाह—"सर्व्वथा" सर्व्वप्रकारैः

**भयपरिक्षय इति निरुपचरितमेतत्, न सकृद्विचटनस्वभावत्वकल्पनयाऽद्वैतेऽप्येवमेवादोष इति न्याय्यं वचः, अनेकदोषोपपत्तेः, तथाहि–तद्विचटनं शुद्धादशुद्धाद्वा ब्रह्मण इति निरूपणीयमेतत्**

पं०...."भयपरिक्षयो" भयनिवृत्तिः "इति" अस्माद्धेतोः "एतत्" जितभयत्वमिति। अत्रैव परमतमाशङ्क्य परिहरन्नाह—"न" नैव "सकृद्विचटनस्वभावत्वकल्पनया" एकवारं परमब्रह्मणः सकाशाद्विभक्तिभावस्वभावत्वकल्पनया "अद्वैतेऽपि" परमब्रह्मलक्षणे किं पुनः द्वैते, "एवमेव" भवदभ्युपगमन्यायेनैव "अदोषः" उपचरितं जितभयत्वमेवंलक्षणदोषाभावः "इति" एवंरूपं "न्याय्यं" न्यायानुगतं "वचो" वचनं, कुत इत्याह—अनेकदोषोपपत्तेः, तामेव भावयति, "तथाहीति" पूर्वोक्तभावनार्थः "तत्" सकृद्विचटनं विभागो ब्रह्मणः सकाशात् क्षेत्रविदामिति गम्यते, "शुद्धात्" सकलदोषरहिताद् "अशुद्धाद्" इतररूपात्, वाशब्दो विकल्पार्थो, "ब्रह्मणः" परमपुरुषाद्वैतरूपात् "पुरुष एवेद" मित्यादिवेदवाक्यनिरूपिताद् "इति" एवं "निरूपणीयं" पर्यालोच्यं, "एतत्" सकृद्विचटनं, प्रकारद्वयेऽपि दोषसम्भवाद्, दोषमेव दर्शयति—

**शुद्धविचटने कुतस्तेषामिहाशुद्धिः, अशुद्धविचटने तु तत्र लयोऽपार्थकः, न चैवमेकमविभागं च तदिति, अनेकत्वे च परमताङ्गीकरणमेव, तद्विभागानामेव नीत्या आत्मत्वादिति, एतेन यदाह—**

पं०...शुद्धाद्ब्रह्मणो विचटने कुतः ?, न कुतश्चिदित्यर्थः, "तेषां" क्षेत्रविदाम् "इह" संसारेऽशुद्धिः, यत्क्षयार्थं यमनियमाभ्यासो योगिनामिति, "अशुद्धविचटने तु" अशुद्धाद्विचटने

पुनः ब्रह्मणि "लय" उक्तरूपः "अपार्थकः" निरर्थकः, तदशुद्धिजन्यस्य क्लेशस्य तत्रापि मुक्तानां प्राप्तेः, तदभ्युपगमेनापि ब्रह्म दूषयन्नाह्—"नच" नैव "एवं" परमब्रह्मणः क्षेत्रज्ञानां विघटने लये चैकम् –अद्वितीयं अविभागं च–निरवयवं तत्–परमब्रह्मेति, किन्तु ? विपर्यय इति, एवमपि किमित्याह्—"अनेकत्वे च" क्षेत्रज्ञापेक्षया परमब्रह्मणः, परमताङ्गीकरणमेवाभ्युपगतं स्यात्, कुत इत्याह्—"तद्विभागानामेव" तस्य–परमब्रह्मणः आत्मसामान्यरूपस्य विभागानां–व्यक्तिरूपाणां "नीत्या" युक्त्या "आत्मत्वात्" क्षेत्रज्ञत्वात्, "एतेन" ब्रह्मनिरासेन, यदाह् कश्चिदेतत् तदपि प्रतिक्षिप्तमिति योगः उक्तमेव दर्शयति—

टी०....एवं च द्वात्रिंशत्पदानां विवरणकरणानन्तरं एवम्भूता एव–पूर्वकथितसकल-विशेषणविशिष्टाः, एव परममहत्त्वशालिनोऽर्हन्तो भगवन्त एव प्रेक्षावतां ( प्रतिभाशालिनां ) नमस्करणीयाः–पूजनीयाः–स्तोतव्या एव, किञ्च 'नमोत्थुणं अरिहंताणं भगवंताणं' रूपादिभागे नमःशब्दप्रयोगः कृतः, ' संपत्ताणं नमो ' इति पर्यन्ते नमःशब्दप्रयोगः अर्थादाद्यन्तसङ्गतो नमस्कारो मध्यव्यापी ' सयंसंबुद्धाणं इति पदादारभ्य सव्वदरिसीणं ' पर्यन्ताः सर्वा मध्यस्थाः सम्पदः, तथा सम्पदन्तर्गतानि सर्वाणि पदानि मध्यस्थानि गणेयानि, अतः सर्वमध्यवर्तिसम्पत्पदैः सहनमस्कारोऽर्थान्नमः शब्दो व्यापको (नमः पदस्य नमः पदरहितेषु सर्वेषु पदेषु अनुवृत्तिर्ज्ञेया, यत आद्यन्तसंगतो नमस्कारः मध्यव्यापी–मध्यस्थपदेषु पुनः पुनरनुवर्त्तते इति ) ज्ञेया इति भावना ( संस्कारो विचारो वा ज्ञेयः ) किञ्च जितभया–भयविजेतारोऽपि एते पूर्वविवेचित सकलविशेषणविशिष्टा जिनेश्वरा देवा एव नान्य इति प्रतिपादयन्नाह—

'नमो जिनेभ्यो जितभयेभ्यः' नमः पदस्य तथा जिनपदस्य विवरणं पूर्ववज्ज्ञेयम्, एवं च जिनाः (जिनत्वविशिष्टात्मानः) भवप्रपञ्चान्निवृत्तेः (संसाराधिकारस्य निवृत्तेः) ( जिनेषु सर्व-भयप्रधानमरणभयस्य आत्यन्तिकध्वंसे सति तत्त्वतः सर्वथेहलोकादिभयसप्तकध्वंस एव, यतो जिना आत्मानः परमस्वास्थ्यस्वरूपस्वस्थतावन्तो भवन्तीति) भयस्य क्षयवन्तो–क्षपितभया जिनाः कथ्यन्ते, (उपशमरूपजयस्यापेक्षया सत्तायां भयसत्तायां सत्यां उपशान्तभया जितभया उच्यन्ते-ऽतोऽत्र क्षायिका क्षयरूपजयापेक्षया सत्तारूपेणाऽपि भयस्य क्षीणत्वेन क्षपितमोहा एवात्र 'जितभयाः' सम्यग् ज्ञेयाः )

तथा च पूर्वकथनस्याशयेन—भवप्रपञ्चक्षयरूपभयविजयस्य (भावेन जितभयत्वस्य) निर्देशेना-द्वैतमुक्तव्यवच्छेदे=परमब्रह्मरूपेऽद्वैते सति, ( वेदान्तमतेऽभिमतं,एकमेव परमब्रह्माऽस्ति ) अतः क्षीणभवा मुक्तास्तेषां व्यवच्छेदो—निरासः कृतः,

३१

वेदान्तिमते सर्वथा मुक्तात्मसु जितभयत्वस्याऽनुपपत्तिः, जैनमते सर्वथा जितभयत्वस्योपपत्तिर्दर्श्यते=तत्र हीत्यादिः=तत्र—अद्वैते हि—यतः क्षेत्रज्ञाः—संसारिणः परमब्रह्मविस्फुलिङ्गकल्पाः (क्षेत्रज्ञः—क्षेत्रं देहमात्रं जानाति—चेतयते शरीरप्रमाणत्वात् क्षेत्रज्ञः । जीवात्मा शरीरसम्बन्धेन ज्ञानवान् । यथाऽहं त्वमित्यादि । क्षेत्रं—शरीरं आत्मत्वेन जानातीति क्षेत्रज्ञ इति व्युत्पत्तिः । 'इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते, एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' गीता १३/१ )

(यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वलोकाः सर्वे देवाः सर्वाणि भूतानि सर्वे एवात्मनो व्युच्चरंति ॥ श्रुतिः ॥ बृह. उप. २/१/२० )

'ममैवांशो जीवलोके जीवभूतः सनातनः' (वेदान्तदर्शन–शास्त्ररूप वल्लभवेदान्ताचार्या अभूवन् ये शुद्धाद्वैतस्य मुख्यप्रवर्त्तका गण्यन्ते, तेषां मते जगदिदं परमब्रह्मणोऽविकारिपरिणामरूपं. परमब्रह्म, अंशिरूपं तथा जीवोऽजीवश्च ब्रह्मणोंऽशरूपोऽवयवरूपः, जीवस्तु भक्तिगुणाश्रयेन परमब्रह्म प्राप्नोति, वल्लभस्य समय ईसाया पञ्चदशशताब्द्या मन्यते ) परमब्रह्मणः—परमपुरुषस्यावयवा एवेतिभावः, यद्येवं स्थितिस्ततः, तेषां च—क्षेत्रज्ञानां (जीवात्मरूपमुक्तात्मनां) ततः—परमब्रह्मणः—पृथग्भावेन—विघटनेन ब्रह्मसत्तात एव—ब्रह्मसत्ताया एव सकाशात् ( पश्चात अपेक्षातः ) कश्चिद्—कालादिः अपरः—अन्यो हेतुः—निमित्तम् इति,

(एवं कथनेनाऽत्र ब्रह्म च कालादिरित्येवं द्वैतपदार्थसिद्धिर्ज्ञेया) यदि जीवात्ममुक्तात्मनां ब्रह्मतो विघटने ब्रह्मसत्तातोऽन्यकालादिरूपनिमित्तस्याऽनभ्युपगमे मात्रब्रह्मसत्ताया एव निमित्तत्वाऽभ्युपगमे, सा ब्रह्मसत्ता तु परब्रह्मणि मुक्तात्मनां लयभावे सत्यपि पूर्ववत्—

तथाविधैव—ब्रह्मतो विघटने निमित्तताऽविच्छिन्नैवार्थादेकवारमिव भूयोऽपि मुक्तात्मनः ब्रह्मसत्तातो विघटनेन संसारसत्ताया वल्गनात्पुनः संसारभ्रमणप्राप्तिप्रसंग आपतेत् । अर्थात् सर्वथाऽचलत्वरूपाभयत्वरूपं जितभयत्वं कथं घटेत । मुक्तात्मसु भवाधिकारोऽक्षीणोऽस्ति, ततो भवाधिकारक्षयरूपं जितभयत्वं कथमुत्पद्येत कथं प्राकट्यमापद्येतेति यतः पूर्ववद् विघटनहेतुभूता ब्रह्मसत्ता विद्यमानाऽस्ति ।

तात्त्विकजितभयत्ववर्णनम्='सहजभवभावव्यवच्छित्तौ तु'=सहजस्य ( कस्मादपि ब्रह्मविघटनादेः कुतोऽपि, अप्रवृत्तस्य—ब्रह्मतो विघटनद्वारा यः संसारपर्यायः स सहजभवभावो नास्ति परन्तु आरोपितोऽस्ति—कल्पितोऽस्ति ) जीवसमानकालभाविनो भवभावस्य—संसारपर्यायस्य

व्यवच्छित्तौ–क्षये सत्येव सहजसंसारपर्यायस्य क्षय एव जितभयत्वस्वस्वभाव–रूपत्वं भवति, तदेव जितभयत्वं निरुपचरितं तात्त्विकं (ब्रह्मलयरूपं जितभयत्वमारोपितं कथ्यते, यतः पुनः (पश्चात्) ब्रह्मसत्तातो जितभयत्व–मुक्तत्वस्याभावस्य ( विघटनस्य भयं स्थितम् )

अर्थात् पूर्वोक्त–शिवाचलादिस्थानप्राप्तिन्यायद्वारा भव (य) योग्यतारूप–शक्तिरूपेणाऽपि ( भव(य) योग्यतारूपशक्तिक्षये सति साक्षाद्भयभावक्षयः सुतरामागत एव तत्र कः प्रश्नः ? स्वाभाविकभवभावव्यवच्छित्तौ हि स्वतन्त्रमोक्षत्वेन भूयोभवभवनस्य योग्यतायाः सर्वथा नष्टत्वात् ) शक्तिरूपेणाऽपि सर्वथा–सर्वप्रकारैः, भवपरिक्षयः–भयनिवृत्तिः, अस्माद्धेतोरेतद्–जितभयत्वं निरुपचरितं–तात्त्विकं जितभयत्वं ज्ञेयम् ।

परमतपरिहारः=सकृद्विचटनादिः=एकवारं परमब्रह्मणःसकाशाद्विभक्तिभाव (पृथग्भाव) रूपस्वभावत्व कल्पनया 'अद्वैतेऽपि' परमब्रह्मलक्षणे, अद्वैते किं पुनःद्वैते ? एवमेव–भवदभ्युपगमन्यायेनैव 'अदोषः' उपचरितजितभयत्व–लक्षणदोषाभावः इति न न्याय्यं–न्यायानुगतं वचः, कुत इति चेदुच्यते अनेकदोषाणामुपपत्तिर्भवति, तथाहि='तत्' सकृदेकवारं विचटनं–विभागः ब्रह्मणः शकाशात् क्षेत्रज्ञानां–मुक्तात्मनां, किं शुद्धात्–सकलदोषरहितात्, ब्रह्मणः विचटनं भवति.

अथवा किं अशुद्धात्=सकलदोषसहितात् ब्रह्मणो विचटनं भवतीति विकल्प द्वयमर्थाद् ब्रह्मणः–परमपुरुषाद्वैतरूपात् 'पुरुषवेदं' इत्वादिवेदवाक्यनिरूपितात् सकाशाद् विचटनमिति विज्ञेयम् ।

## सकृद्विचटनस्य प्रकारद्वये दोषदर्शनम्=

(१) प्रथमविकल्पे यदि शुद्धात्–सकलदोषरहिताद् परमपुरुषरूपब्रह्मणः तेषां–विचटनं कुर्वतां क्षेत्रज्ञानां कुतश्चिदिह–संसारेऽशुद्धिः, यदशुद्धिक्षयार्थं यमनियमाभ्यासो योगिनां भवति.

(२) द्वितीयविकल्पे–अशुद्धात् सकलदोषसहिताद् ब्रह्मणः क्षेत्रज्ञानां विचटने तु पुनः तत्र ब्रह्मणि ( परमब्रह्मणि क्षेत्रज्ञानामभेदरूपो ) लयो निरर्थको, यतः अशुद्ध ब्रह्मणः अशुद्धिजन्यस्य क्लेशस्य तत्रापि–ब्रह्मण्यपि मुक्तानां प्राप्तिर्भवति, दोषद्वयस्येष्टापत्तौ, एवं परमब्रह्मणः सकाशात्–क्षेत्रज्ञानां ( मुक्तात्मनां ) विचटने च लये, एकमद्वितीयं चाविभागं–निरवयवं नैव तत्परमब्रह्म भवति, अर्थाद् विपरीतं भवति यदुत तत् परमब्रह्म, अनेकं च सावयवं भवतीति,

'अनेकत्वे च'–क्षेत्रज्ञापेक्षया (मुक्तात्मापेक्षया) परमब्रह्मणः, परमताङ्गीकरणमेवाभ्युपगतं स्यात्, यतः तत्परब्रह्मणः (पुरुषाद्वैतलक्षणस्य) आत्मसामान्य (आत्मत्व–सत्तारूपस्य) अर्थात्

तद्‌गतानां विभागानामंशानां—व्यक्तिविशेषाणां ( मुक्त—लीनात्मनां ) युक्तिनीत्या आत्मत्वात्—क्षेत्रज्ञत्वात्, परब्रह्मणोऽनेकत्वमेव सांशत्वमपि सिद्धमेव.

' एतेन '—ब्रह्मनिरासेन—परमपुरुषस्यैकत्वाविभागत्वनिरासेन, यदाह—कश्चिदेतत् तदपि प्रतिक्षिप्तमिति योगः, उक्तमेव दर्शयति—

" परमब्रह्मण एते क्षेत्रविदोऽंशा व्यवस्थिता वचनात् ।
वह्निस्फुलिङ्गकल्पाः समुद्रलवणोपमास्त्वन्ये ॥१॥
सादिपृथक्त्वममीषामनादि वाऽहेतुकादि वा चिन्त्यम् ।
युक्त्या ह्यतीन्द्रियत्वात् प्रयोजनाभावतश्चैव ॥ २ ॥
कूपे पतितोत्तारणकर्त्तुस्तदुपायमार्ग्गणं न्याय्यम् ।
ननु पतितः कथमयमिति हन्त तथादर्शनादेव ॥ ३ ॥
भवकूपपतितसत्त्वोत्तारणकर्त्तुरपि युज्यते ह्येवम् ।
तदुपायमार्ग्गणमलं वचनाच्छेषव्युदासेन ॥ ४ ॥

पं०..."परमब्रह्मे" त्यादिरार्या, परमब्रह्मणः-पुरुषाद्वैतलक्षणस्यैते-शास्त्रलोकसिद्धाः क्षेत्रविदो—जीवाः अंशा—विभागा व्यवस्थिताः-प्रतिष्ठिताः, कुतः प्रमाणादित्याह-" वचनाद् " आगमात्, ते च द्विधा इत्याह्-वह्निस्फुलिङ्गकल्पाः-पृथगेव विघटनेन संसारिणः, समुद्रलवणोपमास्त्वन्ये-यथा समुद्रे लवणमपृथगेव लीनतया व्यवस्थितम्, एवं मुक्तात्मानः प्राग्विघटनात् संसारिणोऽपि च ब्रह्मणीति ॥१॥

सादीत्याद्यार्यात्रयं सुगममेव, परं "हन्त तथादर्शनादेवेति" हन्तेति प्रत्यवधारणे प्रत्यवधारयत तथादर्शनादेव-कूपपतनकारणविचारणमन्तरेणोत्तरणोपायमार्गणस्यैव दर्शनात्, " शेषव्युदासेने " ति वचनव्यतिरिक्तप्रमाणपरिहारेण साधनादिविघटनविचारपरिहारेण वा ॥

एवं चाद्वैते सति वर्णविलोपाद्यसङ्गतं नीत्या ।
ब्रह्मणि वर्णाभावात् क्षेत्रविदां द्वैतभावाच्च ॥५॥" इत्यादि,
एतदपि प्रतिक्षिप्तं, श्रद्धामात्रगम्यत्वात्,

पं०..."एवं चे" त्यादिरार्या, एवमिति-वचनप्रमाणतः, चः-समुच्चये, अद्वैते—आत्मनामेकीभावे सति वर्णविलोपादि—वर्णा—ब्राह्मणक्षत्रियविट्शूद्रलक्षणास्तेषां विलोपः—प्रतिनियतस्वाचारपरि-

हारेण परवर्णाचारकरणम् , आदिग्रहणात् स्वाचारपराचारानुवृत्तिरूपसंस्कारः " असङ्गतम् " अयुक्तं " नीत्या " न्यायेन, तामेवाह्–ब्रह्मणि–परमपुरुषलक्षणे वर्णाभावात्–ब्राह्मणादिवर्णविभागाभावात्, मा भूद्ब्रह्मणि वर्णविभागः तदंशेष्वात्मसु भविष्यतीत्याशङ्क्याह–"क्षेत्रविदां द्वैतभावाच्च " क्षेत्रविदोऽपि मुक्तामुक्तभेदेन द्वैविध्यमेवाश्रिताः अतस्तेष्वपि न वर्णविभागोऽतः कथमसत्यां वर्णव्यवस्थायां वर्णविलोपादि तात्त्विकमिति ॥ ५ ॥ " इत्यादि "

एवमन्यदपि वचनं गृह्यते, "एतदपि" अनन्तरोक्तं, किं पुनः परम्परोक्तं प्राच्यमित्यपिशब्दार्थः, "प्रतिक्षिप्तं" निराकृतं, कुत इत्याह्–"श्रद्धामात्रगम्यत्वाद्" रुचिमात्रविषयत्वात्, ननु वचनादित्युक्तं तत्कथमित्युच्यत इत्याह्–

**दृष्टेष्टाविरुद्धस्य वचनस्य वचनत्वाद्, अन्यथा ततः प्रवृत्त्यसिद्धेः, वचनानां बहुत्वात् मिथो विरुद्धोपपत्तेः, विशेषस्य दुर्लक्षत्वात् , एकप्रवृत्तेरपरबाधितत्वात् , तत्त्यागादितरप्रवृत्तौ यदृच्छा, वचनस्याप्रयोजकत्वात् ,**

पं०..." दृष्टेत्यादि, " " दृष्टेष्टाविरुद्धस्य " दृष्टम्–अशेषप्रमाणोपलब्धमिष्टं–वचनोक्तमेव तयोरविरोधेनाविरुद्धस्य वचनस्य " वचनत्वाद् " आगमत्वात् , कुत इत्याह्–" अन्यथा " उक्तलक्षणविरहे "ततो" वचनात् "प्रवृत्त्यसिद्धेः" हेयोपादेययोर्हानोपादानासिद्धेः, कुत इत्याह्–" वचनानां " शिवसुगतसुरगुरुप्रभृतिप्रणीतानां " बहुत्वाद् " व्यक्तिभेदेनैव, ततः किमित्याह्–" मिथः " परस्परं " विरुद्धोपपत्तेः " नित्यानित्यादिविरुद्धार्थाभिधानात्, तर्हि विशिष्टादेव ततः प्रवृत्तिरित्याह–"विशेषस्य" दृष्टेष्टाविरोधलक्षणस्य विचारमन्तरेण "दुर्लक्षत्वात् " सर्ववचनेभ्यो युगपत्प्रवृत्तिरसम्भविन्येवेति एकत एव ततः प्रवर्त्तितव्यं, तत्र च " एकप्रवृत्तेः " एकतो वचनात् प्रवृत्तेः–उक्तलक्षणायाः "अपरबाधितत्वाद्" अपरेण–वचनेन निराकृतत्वात् , ततः किमित्याह्–"तत्त्यागाद्" बाधकवचनत्यागाद् "इतरप्रवृत्तौ" बाध्यमानवचनप्रवृत्तौ "यदृच्छा" स्वेच्छा, कथमित्याह्–"वचनस्य" कस्यचिद् " अप्रयोजकत्वाद् " अप्रवर्तकत्वाद्, एतदपि कुत इत्याह्–

**तदन्तरनिराकरणादिति, न ह्यदुष्टं ब्राह्मणं प्रव्रजितं वा अवमन्यमानो दुष्टं वा मन्यमानः तद्भक्त इत्युच्यते, न च दुष्टेतरावगमो विचारणमन्तरेण, विचारश्च युक्तिगर्भ इत्यालोचनीयमेतत् , कूपपतितोदाहरणमप्युदाहरणमात्रं, न्यायानुपपत्तेः,**

पं०...."तदन्तरनिराकरणात्" तदन्तरेण-वचनान्तरेण सर्ववचनानां निराकरणात्, भवतु नाम वचनानां विरोधस्तथापि वचनबहुमानात् प्रवृत्तस्य यतः कुतोऽपि वचनादिष्टसिद्धिर्भविष्यतीत्याशङ्क्य व्यतिरेकतः प्रतिवस्तूपन्यासमाह-"न" नैव "हिः" यस्माद् "अदुष्टम्" अनपराधं "ब्राह्मणं" द्विजं "प्रव्रजितं वा" भागवतादिकम् "अवमन्यमानः" अनाद्रियमाणो "दुष्टं वा" सदोषं "मन्यमानो" वचनकरणादिना "तद्भक्तो" ब्राह्मणभक्तः प्रव्रजितभक्तो वा "इति" एवमुच्यते कुशलैः, अतो दुष्टभक्त एव ब्राह्मणादिभक्तः, एवमत्रापि योजना कार्या, एवं तर्ह्यदुष्टात्ततः प्रवर्त्तिष्यत इत्याशङ्क्याह-न च "दुष्टेतरावगमो" दुष्टादुष्टयोरवगमो विचारमन्तरेणातो विचार आश्रयणीयो, विचारश्च युक्तिगर्भो, न च युक्तिः प्रमाणं, परमते वचनमात्रस्यैव प्रमाणत्वाभ्युपगमाद् "इति" एवं ब्राह्मणादिन्यायेन आलोचनीयमेतत्-वचनमात्रात्प्रवर्त्तनमिति॥

**तदुद्भूतादेरपि तथादर्शनाभावात्, तत्र चोत्तारणे दोषसम्भवात्, तथा कर्त्तुमशक्यत्वात्, प्रयासनैष्फल्यात्, न चोपायमार्ग्गणमपि न विचाररूपं, तदिहापि विचारोऽनाश्रयणीय एव,**

पं०...तदालम्बनेत्यादिः, "तदुद्भूतादेरपि" तस्मिन्-कूपे उद्भूतो-मत्स्यादिरादिशब्दादतद्भूतोऽपि प्रयोजनवशात्तत्रैव बद्धस्थितिस्तस्यापि "तथादर्शनाभावात्" पतनकारणमविचार्य्यैवोत्तारणोपायमार्ग्गणस्यानवलोकनाद्, एवं च तथादर्शनादिति हेतोः प्रागुक्तस्य प्रतिज्ञैकदेशासिद्धता, अथ तदुद्भूतादिरप्युत्तारयिष्यते, ततो न हेतोः प्रतिज्ञैकदेशासिद्धता इत्याह-"तत्र च" तदुद्भूतादेरपि उत्तारणे "दोषसम्भवात्" मरणाद्यनर्थसम्भवात्, तथेति हेत्वन्तरसमुच्चये "कर्त्तुम्" उत्तारणस्य तदुद्भूतादेः, अशक्यत्वात्, हेतुमाह-"प्रयासनैष्फल्यात्" प्रयासस्य-प्रयत्नस्य नैष्फल्याद्-उत्तारणीयोत्तारलक्षणफलाभावात्, अभ्युच्चयमाह-"न च" नैव "उपायमार्ग्गणमपि" उत्तारणोपायगवेषणमपि परोपन्यस्तं न विचाररूपं, किन्तु विचाररूपमेव, यदि नामैवं ततः किमित्याह-"तत्" तस्माद् "इहापि" उत्तारणोपाये, आस्तां तावत्प्रकृतवचनार्थे "विचारो" विमर्शः "अनाश्रयणीय एव" न विधेय एव परमते, अथातीन्द्रियत्वात् युक्तेरविषयो वचनार्थः, इदं च कूपपतितोत्तारणं तथाविधं न भविष्यतीत्याशङ्क्याह-

**दैवायत्तं च तद्, अतीन्द्रियं च दैवमिति युक्तेरविषयः, शकुनाद्यागमयुक्तिविषयतायां तु समान एव प्रसङ्ग इतरत्रापीति, तस्माद्यथाविषयं त्रिकोटिपरिशुद्धविचारशुद्धितः प्रवर्त्तितव्यमित्युक्तं च-**

पं०..."दैवायत्तं च" कर्म्माधीनं "तद्" उत्तारणं, ततः किमित्याह–"अतीन्द्रियं च" इन्द्रियविषयातीतं च तदुत्तारणहेतु "दैव" कर्म "इति" अस्माद्धेतोः "युक्तेः" विचारणस्याविषयो, भवन्मतेन वचनमात्रस्यैव विषयत्वात्, कथं तत्र सम्यगविज्ञाते तदायत्तायोत्तारणाय प्रवृत्तिरिति, पुनरप्यभिप्रायान्तरमाशङ्क्याह–"शकुनाद्यागमयुक्तिविषयतायां तु" शकुनाद्यागम-आदिशब्दाद् ज्योतिष्काद्यागमग्रहो युक्तिश्च-विचारस्तद्विषयतायां तु दैवस्यानुकूलेतररूपस्य समान एव प्रसङ्गः "इतरत्रापि" परमब्रह्मादावतीन्द्रिये वचनार्थे. तदपि युक्त्यागमाभ्यां विचारयितुं प्रयुज्यत इत्ययुक्तमुक्तं प्राक् "सादिपृथक्त्वममीषामनादि चेत्यादि" इतिः–प्रक्रमसमाप्त्यर्थः, तस्माद्–वचनमात्रस्याप्रामाण्यात् "यथाविषयं" कषादिसर्वविषयानतिक्रमेण "त्रिकोटिपरिशुद्ध-विचारशुद्धितः" तिसृभिः–कषच्छेदतापलक्षणाभिरादिमध्यावसानाविसंवादलक्षणाभिर्वा कोटिभिः परिशुद्धो–निर्दोषो यो विचारो–विमर्शस्तेन या शुद्धिः–वचनस्य निर्दोषता तस्याः सकाशात्, प्रवर्त्तितव्यं हेयोपादेययोः,

"आगमेनानुमानेन, ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां, लभते तत्त्वमुत्तमम् ॥१॥
आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणम् ।
अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥ २ ॥
आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः ।
वीतरागोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसम्भवात् ॥ ३ ॥
तच्चैतदुपपत्त्यैव, गम्यते प्रायशो बुधैः ।
वाक्यलिङ्गा हि वक्तारः, सद्वाक्यं चोपपत्तिमत् ॥४॥
अन्यथाऽतिप्रसङ्गः स्यात्, तत्तया रहितं यदि ।
सर्वस्यैव हि तत्प्राप्तेरित्यनर्थो महानयम् ॥५॥"इत्यलं प्रसङ्गेन,

टी०....परमब्रह्मणः – पुरुषाद्वैतलक्षणस्यैते–शास्त्रलोकसिद्धाः क्षेत्रविदो–जीवाः, अंशा–विभागाः, आगम–वचनरूपप्रमाणेन व्यवस्थिताः–प्रतिष्ठिताः ते च द्विधा इत्याह–वह्निस्फुलिङ्गकल्पाः–पृथगेव (ब्रह्मणः) विघटनेन संसारिणः (प्रतिष्ठिताः) लवणसमुद्रोपमास्त्वन्ये–यथा समुद्रे लवणमपृथगेव लीनतया व्यवस्थितम्, एवं मुक्तात्मनः प्राग् विघटनात् संसारिणोऽपि ब्रह्मणि ॥ १ ॥

अमीषां जीवानां सादि पृथक्त्वम् अनादि वाऽहेतुकादि वा युक्त्या चिन्त्यं (विचारणीयं मोक्तव्यं वा) यतोऽतीन्द्रियत्वं प्रयोजनाभावो वर्त्तते ॥ २ ॥

यथा कूपे पतितोत्तारणकर्त्तुः तदुत्तारणोपायमार्गणं न्याय्यं—न्यायानुगतं । ननु (तर्के) कथमयं पतित इति हन्तेति—प्रत्यवधारणे (प्रतिनिश्चये) प्रत्यवधारयत तथा दर्शनादेव—कूपपतनकारणविचारणमन्तरेणोत्तारणोपाय—मार्गणस्यैव दर्शनात् ॥ ३ ॥

भवरूपकूपपतितोत्तारणकर्त्तुरपि ह्येवं युज्यते, वचनात्—आगमात् तदुत्तारण—मार्गणमलं, शेषव्युदासेन—वचनव्यतिरिक्तप्रमाणपरिहारेण, साधनादिविघटनविचारपरिहारेण वा ॥ ४ ॥

एवमिति—वचनप्रमाणतः, अद्वैते—आत्मनामेकीभावे सति वर्णविलोपादि=वर्णाः—ब्राह्मणक्षत्रियवैश्यशुद्रलक्षणास्तेषां विलोपः—प्रतिनियतस्वाचारपरिहारेण परवर्णाचारकरणम्, आदिग्रहणात् स्वाचारपराचारानुवृत्तिरूपसंस्कारः, "असङ्गतम्" अयुक्तं नीत्या—न्यायेन, नीतिविचारः=परमपुरुषलक्षणे ब्रह्मणि वर्णाभावात्—ब्राह्मणादि—वर्णविभागाभावात्, मामूद्ब्रह्मणि वर्णविभागः, ब्रह्मणोंऽशभूतेष्वात्मसु भविष्यतीति चेदाह—

"क्षेत्रविदां द्वैतभावाच्च" क्षेत्रवेदोऽपि मुक्ता—मुक्तभेदेन द्वैविध्यमाश्रिताः, अतस्तेष्वपि न वर्णविभागोऽतः कथमसत्यां वर्णव्यवस्थायां वर्णविलोपादि तात्त्विकमिति. 'इत्यादि' एवमन्यदपि वचनं गृह्यते, एतदपि—अनन्तरोक्तं, किं पुनः परम्परोक्तं प्राच्यमित्यपि शब्दार्थः,

'प्रतिक्षिप्तं' निराकृतं, कुत इत्याह—'श्रद्धामात्रगम्यत्वाद्' रुचिमात्रविषयत्वात्, पूर्वोक्तं सर्वं वादिना यदुक्तं तत्सर्वं न्यायेन खण्डितं भवति कथमिति चेदुच्यते यदि श्रद्धा—रुचिर्भवेत्तदा स्वीकरणीयं नान्यथाऽत्र युक्ति—तर्कबलं नास्ति, 'वचनात् परमब्रह्मण एते क्षेत्रविदोंऽशा व्यवस्थिताः' इत्यत्र वचनस्य निर्वचनमुच्यतामिति प्रश्ने,

वचननिर्वचनम्=दृष्टं=अशेषप्रमाणैरुपलब्धं, इष्टं—वचनोक्तमागमोक्तमेव दृष्टेष्टयोर्द्वयोर्मध्ये विरोधाभावेनाविरुद्धस्य वचनस्य वचनत्वमागमत्वम्, (दृष्टाबाधितत्वे सतीष्टा—बाधितत्वं वचनस्य लक्षणम्, दृष्टशास्त्राविरोधार्थं, सर्वसत्त्वहितावहं, मितं गम्भीरमाह्लादि वाक्यं यस्य स सर्ववित् ।)

अन्यथा—यत्र वचने पूर्वोक्तवचनस्य लक्षणं घटते, तद्बाधितवचनद्वारा, हेयहानोपादेयोपादानरूप—प्रवृत्तिरसिद्धाऽवरुद्धा भवति,

(अत्र हेयहानोपादेयोपादानरूपप्रवृत्तिं प्रति दृष्टेष्टाऽविरोधि वचनं कारणमस्ति, हेयहानोपादेयोपादानरूपप्रवृत्तिं प्रति दृष्टेष्टविरोधिवचनं प्रतिबन्धकमस्ति, एवं कार्यकारणभावश्च

प्रतिबध्यप्रतिबन्धकभावो विज्ञेयः) यतः शिवसुगतसुरगुरुप्रणीतानां वचनानां व्यक्तिभेदेनैव बहुत्वेन—नानात्वेन वचनप्रणेतृरूपव्यक्तीनामनेकत्वेन वचनानि, अपि नाना—अनेकानि सन्ति, तत एव मिथः—परस्परं नित्यविरुद्धा—नित्यरूपस्य, अनित्यविरुद्ध—नित्यरूपस्य पदार्थस्य वाचकानि वचांसि परस्परविरोधीनि (मिथोबाधकानि) गण्यन्ते, मिथोबाधकानि च वचांसि नैकविधानि प्रवर्त्तकानि न भवन्ति (प्रवृत्तिबाधः) यद्येवं तदा विशिष्टवचनादेव प्रवृत्तिरित्याह 'विशेषस्य' दृष्टेष्टाविरोधरूपविशेषस्य प्रवर्त्तकत्वं गणेयं, तथापि विचारं विना विशेषयुक्त—विशिष्टं वचनं दुर्लक्षं भवति. पुष्टमीमांसां विना विशिष्टवचनस्य ज्ञानं (भानं—परिचयः—ध्यानं—लक्ष्यं) अशक्यं (दुःशकं वा) भवति.

किञ्च सर्ववचनेभ्यो युगपत्प्रवृत्तिरसम्भविन्येवेति, एकवचनत एव ततःप्रवर्त्तितव्यम्,

तत्र च एकतो वचनात्, हेयहानोपादेयोपादानरूपप्रवृत्तौ सत्यां प्रवृत्तिप्रतिबन्धकेनापरवचनेन पूर्वोक्त—प्रवृत्तिर्निराकृता—प्रतिबद्धा भवति. किञ्च बाधकवचनस्य त्यागेन (तत्त्यागात्) 'इतरप्रवृत्तौ' बाध्यविषयवचनेन प्रवृत्तौ (प्रतिबध्यमान—वचनतः प्रवृत्तौ) यदृच्छा—स्वेच्छा सिद्धा भवति, कथमिति चेदुच्यते. यतः कस्यचिद् वचनस्य, अप्रयोजकत्वं—अप्रवर्त्तकत्वं—प्रवृत्तिप्रतिबन्धकत्वं वर्तते, एतदपि कुत इत्याह 'तदन्तरनिराकरणात्,=यतो वचनान्तरेण—अन्येन वचनेन सर्ववचनानां निराकरणं भवति.

भवतु नाम वचनानां विरोधस्तथापि वचनबहुमानात् प्रवृत्तस्य यतः कुतोऽपि वचनादिष्टसिद्धि र्भविष्यतीत्याशङ्क्य, व्यतिरेकतः प्रतिवस्तू—पन्यासमाह—'न' अभावमुद्रयाऽन्यवस्तुनउपन्यासं कथयति—'न' हिः—यस्माद्, निर्दोषं—निरपराधं ब्राह्मणं (द्विजं) भागवतादिकं प्रव्रजितं (सन्न्यासिनं) अवमा(म)न्यमानः अनाद्रियमाणः—तिरस्कारपूर्वकमनादरकर्त्ता अथवा दुष्टं—सदोषं (सापराधं) प्रतिवचनकरणादिना मन्यमानः—सप्रेमादरवान्, ब्राह्मणभक्तः प्रव्रजितभक्तो वा नैवेत्युच्यते—एवमुच्यते कुशलैः, अतो दुष्टभक्त एव ब्राह्मणादिभक्तः, एवमत्राऽपि योजना कार्या, तथाहि=एवं निर्दोषं शास्त्रमनाद्रियमाणः सदोषं वा मन्यमानः शास्त्राराधको न स्यादिति।

### एवं तर्हि वचनाददुष्टात्ततः प्रवर्तिष्यते इत्याशङ्क्याह—

दुष्टेतरावगमः—सदोषनिर्दोषवचनयोर्विज्ञानं—विचारं विना नैव भवति, अतो विचार आश्रयणीयः, विचारश्च युक्तिगर्भो (युक्तिमूलकस्तर्कोभवति) युक्तिश्च दृष्टेष्टाविरोधरूपा ज्ञेया।

३२

न च युक्तिप्रमाणम् (गणनीयप्रमाणसङ्ख्याऽतिरिक्ता युक्तिरतो न प्रमाणम्) परमते (अद्वैत-वादमते) वचनमात्रस्यैव प्रमाणत्वाऽभ्युपगमात्, एवं ब्राह्मणादि—न्यायेनालोचनीयमेतद् —वचन-मात्रात् प्रवर्त्तनमिति (वेदोक्तमात्रत्वेन प्रवर्तनम्, अत्रोपपत्तिमवगणय्य सदोषनिर्दोषविचारशून्य-त्वेन वचनमात्रमेव ग्राह्यम्, तदयुक्तं (सर्वसमानमान्यतायां) -शुष्कार्द्रेन्धनदहनकल्पमेव.)

तथा च न्यायस्य—युक्तिपूर्वकविचारस्यानुपपत्तेः कूपपतितोदाहरणमप्युदाहरणं—कथनमात्रं वर्त्तते,

यतः तत्कूपे, उद्भूतमत्स्यादेः तथाऽऽदिशब्दाद् 'अतद्भूतोऽपि' कार्यवशात्तत्रैव बद्ध-स्थितिस्तस्याऽपि पतनकारणमविचार्य्यैवोत्तारणोपायमार्गणस्याऽनवलोकनात्, एवं च 'तथा-दर्शनाद्' इति हेतोः पूर्वोक्तस्य प्रतिज्ञैकदेशासिद्धिः, (अग्रे तृतीयश्लोकस्थात् 'तथादर्शनाद्-एव'—कूपपतन—कारणविचारणमन्तरेणोत्तारणोपायमार्गणस्यैव दर्शनात्) अथ 'तदुद्भूतादिरप्युत्ता-रयिष्यते, ततो न प्रतिज्ञैकदेशासिद्धिरि'त्याह—'तत्र च' तदुद्भूतादेरपि, उत्तारणे—जलचरमत्स्यादे र्बाह्यनिष्कासने मरणाद्यनर्थरूपदोषसम्भवात्, तथेति हेत्वन्तरसमुच्चये, तदुद्भूतादेरुत्तारणं कर्त्तुमशक्यत्वात्, अशक्यत्वे हेतुमाह='प्रयासनैष्फल्यात्,' उत्तारणरूपप्रयत्नस्य नैष्फल्यात्—उत्तारणीयोत्ताररूपफलाभावात्,

सारसङ्ग्रहं कथयति—नैवोत्तारणोपायगवेषणमपि परोपन्यस्तं न विचाररूपं, किन्तु विचाररूपमेव,

यद्येवं ततः—तस्मादुत्तारणोपायेऽपि, विचारो—(आस्तां तावत् प्रकृतवचनार्थेऽपिशब्दार्थः) विमर्शः अनाश्रयणीय एव—न विधेय एव, परमते अथ वचनार्थः, अतीन्द्रियत्वाद्युक्तेरविषयः इदं च कूपपतितोत्तारणं तथाविधं युक्तेरविषयरूपं न भविष्यतीत्याशङ्क्याह 'दैवायत्तं च तद्' तत्कूपपतितोत्तारणं दैवायत्तं—कर्माधीनं वर्ततेऽतः तदुत्तारणहेतुः, अतीन्द्रियं—इन्द्रियविषयातीतं 'दैवं' कर्म वर्ततेऽतो, विचारणरूपयुक्तेरविषयरूपं दैवं—कर्माऽस्ति, भवन्मतेन वचनमात्रस्यै—कविषयत्वात् विचारवचनयोर्महदन्तरं मेरुसर्षपवद् वर्त्तते,

कथं तत्र सम्यगविज्ञाते दैवे—कर्मणि, तत्कर्मायत्तायोत्तारणाय प्रवृत्तिः ?

पुनरपि—अभिप्रायान्तरं कथयति=शकुनाद्यागम (ज्योतिष्काद्यागमस्य) युक्तिरूपविचारस्य विषयतायां, अनुकूलप्रतिकूल (शुभाशुभ) स्य दैवस्य कर्मणः समान एव प्रसङ्गः 'इतरत्रापि'—परमब्रह्मादौ, अतीन्द्रिये वचनार्थे अथ च अतीन्द्रिय—वचनगम्यार्थभूतपरमब्रह्मादौ समानः प्रसङ्गः

अर्थात् अतीन्द्रियवचनगम्यार्थरूपपरमब्रह्मापि युक्तेर्विचारस्य गम्यमपि मन्तव्यमेवातस्तदपि युक्त्या-गमाभ्यां विचारयितुं प्रयुज्यते इत्ययुक्तमुक्तं प्राक् 'सादिपृथक्त्वममीषामनादि चेत्यादि.'इतिः—प्रक्रमसमाप्त्यर्थः ।

तस्माद्—वचनमात्रस्याप्रामाणात् यथाविषयं कषादिसर्वविषयानतिक्रमेण, कषच्छेदतापरूपाभिः आदिमध्यावसानाविसंवादरूपाभिर्वा तिसृभिः कोटिभिः परिशुद्धो—निर्दोषो यो विचारः—विमर्शस्तेन या शुद्धिः वचनस्य निर्दोषता तस्याः सकाशात् प्रवर्तितव्यं हेयोपादेययोः ।

(कषादिकोटित्रयं=प्राणवधादीनां पापस्थानानां यस्तु प्रतिषेधः ।

ध्यानाध्ययनादीनां यश्च विधिरेष धर्मकषः ॥ १ ॥

बाह्यानुष्ठानेन येन न बाध्यते तन्नियमात् ।
संभवति च परिशुद्धं स पुनर्धर्मच्छेद इति ॥ २ ॥

जीवादिभाववादो बन्धादि–प्रसाधक इह तापः ।
एभिः परिशुद्धो धर्मो धर्मत्वमुपैति ॥ ३ ॥ (हरिभ. सू. कृ. पंच व. द्वारे.)

व्यभिचारबाधविरोधरूपदोषत्रयरूपाऽविसंवादस्य सर्वथाऽभावरूपाद्यसंवादकोटीत्रयपरिशुद्ध-मथवाऽऽदिमध्यावसानाविसंवादरूपकोटित्रयपरिशुद्धं वचनम् ।

शास्त्रविरुद्धवादाभावरूप–यथार्थान्यथाकथनरूप – प्रमाणानुसरणरूपवंचनाभावरूपाविसंवाद-त्रयरहितं वचनम् ।

तथा च विचार—मीमांसापूर्वक—सूक्ष्मसमीक्षण—परीक्षणजन्य—वचनशुद्धिद्वारा परिशुद्धवचनं प्रवर्त्तकं, हेयहानोपादेयोपादानरूपप्रवृत्तौ कारणं भवति.

## —पूर्वोक्तविषये पातञ्जलयादीनामृषीणां संवादिता—

उक्तं चेत्यादिः—आगमेनेति—श्रद्धानुसारिणो बाल—जीवाः, प्रामाणिकपुरुषाणां वचन-रूपागमेन, अनुमानेनेति—युक्ति—अनुसारिणो मध्यमपुरुषाः, हेतुजन्यसाध्यविषयकज्ञानरूपानुमानेन, योगाभ्यासेनेति, अतीन्द्रियदर्शि—पुरुषः योगध्यानाऽभ्यासरसेनैवं प्रकारत्रयेण प्रज्ञां संस्कारसम्पन्नां प्रकल्पयन्नुत्तमं तत्त्वं लभते—प्राप्नोति—जानातीत्यर्थः, पापरूपसम्मोहनिवृत्त्याऽन्यथा न जानाति, श्रुतादिभेद=श्रुत—चिंता—भावना—तर्क—स्वपरहितादिनोत्तमं तत्त्वं ज्ञायते, इति पतञ्जल्याद्या वदन्ति ॥ १ ॥

धर्मास्तिकायादीनामतीन्द्रियपदार्थानां सद्भावस्य प्रतिपत्तये, आगमश्चोपपत्तिश्च संपूर्ण दृष्टि (दर्शन) तत्त्वस्य लक्षणम् ॥ २ ॥

आगमस्य लक्षणमाप्तवचनम्, 'आप्तवचनादाविर्भूतमर्थसंवेदनमागमः' ॥ १ ॥ उपचारादाप्तवचनं च ॥ २ ॥ (आप्ति हि रागद्वेषमोहानामैकान्तिक आत्यन्तिकश्च क्षयः, सा येषामस्ति ते खल्वाप्ताः, अभ्रादित्वादमत्वर्थी योऽच्प्रत्ययः । (स्या. मं. अन्य. यो. व्य. श्लोक १)

आप्तं दोषक्षयाद्, अनृतवचनहेतोरसम्भवात् वीतरागोऽनृतं वाक्यं न ब्रूयाद् ॥ ३ ॥ तत् च एतत् (आप्तवचनं) उपपत्त्यैव गम्यते बुधैः युक्तिद्वारैव (दृष्टेष्टाविरोधि वचनमागमः) प्रायशो पण्डितैर्ज्ञायते–निश्चीयते, वाक्यरूपलिङ्गेनैव वक्ता–(आप्तः) निर्णीयते यतः सद्वाक्यं चोपपत्तिमद् भवति. ॥ ४ ॥

(वाक्यलिङ्गा हि वक्तारः गुणदोषविनिश्चये, क्रियालिङ्गा हि कर्त्तारः, शिल्पमार्गे यथैव हि)

अन्यथाऽतिप्रसङ्गः स्यादिति=यदि उपपत्त्या–युक्तितो रहितं–यत्तद्वाक्यं वा सद्वाक्यत्वेन मतेऽतिप्रसङ्गः स्यात्–आप्तवाक्यपरिचायकसद्वाक्यतो भिन्नं सर्वं वाक्यं आगमत्वेन मतं भवेत् अथवा युक्तिरहितानि, विसंवादीनि, सर्वाण्यल्पज्ञवचनानि, आगमरूपाणि सद्वाक्यरूपाणि भवेयुर्यतो महतोऽपि महान्, अनर्थो भवेत्, इत्यलं प्रसङ्गेन–एवं प्रसङ्गोपात्त–चर्चा–विचारणया पर्याप्तमिति ।

नवम्याः सम्पदः क्रियमाण उपसंहारः—

**तदेवमर्हतां बहुत्वसिद्धिः, विषयबहुत्वेन च नमस्कर्त्तुः फलातिशयः, सदाशयस्फातिसिद्धेः । आह—एकया क्रियया अनेकविषयीकरणे केवाशयस्फातिः, ?, नन्वियमेव–यदेकया अनेकविषयीकरणं, विवेकफलमेतत्, आह–एवं ह्येकक्रिययाऽनेकसन्माननं बहुब्राह्मणैकरूपकदानतुल्यं, तत् कथं नाल्पत्वम् ? उच्यते, क्रियाभेदभावात्, सा हि रत्नावलीदर्शनक्रियेवैकरत्नदर्शनक्रियातो भिद्यते, हेतुफलभेदात्, सर्वार्हदालम्बनेयमिति हेतुभेदः, प्रमोदा-**

तिशयजनिकेति च फलभेदः, कथमित्थमल्पत्वं ? ब्राह्मणैकरूप-कदानोदाहरणं त्वनुपन्यसनीयमेव, रूपकादिव नमस्कारात् ब्राह्मणानामिवार्हतामुपकारायोगात्, कथं तर्हि तत्फलमिति ?, उच्यते, तदालम्बनचित्तवृत्तेः,

पं०–"तदालम्बनचित्तवृत्तेरिति" भगवदालम्बनचित्तवृत्तेर्नमस्काररूपायाः, तत्फलमिति सम्बध्यते, नन्वेवं तर्हि भगवद्भ्य इत्याशङ्कयाह—

तदाधिपत्यतः तत एव तद्भावात्, चिन्तामणिरत्नादौ तथा दर्शनादिति वक्ष्यामः, कथमेकपूजया सर्वपूजाभिधानं ?, तथा चागमः–"एगम्मि पूइयंमी, सव्वे ते पूइया होंति"। अस्ति एतद्, विशेषविषयं तु तुल्यगुणत्वज्ञापनेनैषामनुदारचित्तप्रवर्त्तनार्थं तदन्येषां सर्वसम्पत्परिग्रहार्थं सङ्घपूजादावाशयव्याप्तिप्रदर्शनार्थं च ॥

पं०..."तदाधिपत्यतो" भगवदाधिपत्यतो, भगवन्त एव तच्चित्तवृत्तेस्तज्जनकेषु हेतुषु प्रधानत्वेनाधिपतयस्ततः "तत" एव भगवद्भ्य एव "तद्भावात्" क्रियाफलभावात्, कथमित्याह—"चिन्तामणिरत्नादौ तथा दर्शनात्" चिन्तामण्यादौ प्रणिधानादेर्भवत् फलं चिन्तामणिरत्नादेर्भवतीति लोके प्रतीतिदर्शनाद्, "अनुदारे" त्यादि, "अनुदारचित्तप्रवर्त्तनार्थम्" अनुदारचित्तो हि कार्पण्यात्सर्व्वपूजां कर्तुमशक्नुवन्नेकमपि पूजयेद्, अतस्तत्प्रवर्त्तनार्थमुच्यते एगंमीत्यादि, द्वितीयं कारणमाह—"तदन्येषां" पूज्यमानादन्येषां भगवतां, "सर्वसम्पत्परिग्रहार्थं च" सर्वा–निरवशेषाः सम्पदः–स्तोतव्यहेतुसम्पदादय उक्तरूपास्तासामवबोधनार्थं च, तेऽपि परिपूर्णसम्पद एवेति भावः, "सङ्घपूजादौ" सङ्घचैत्यसाधुपूजादौ आशयव्याप्तिप्रदर्शनार्थं चेति तृतीयं कारणमिति ॥

एवंभूतश्चायमाशय इति, तदाऽपरागतहर्षादिलिङ्गसिद्धेर्भावश्रावकस्य विज्ञेय इति, एवमात्मनि गुरुषु च बहुवचनमित्यपि सफलं वेदितव्यं, तत्तुल्यापरगुणसमावेशेन तत्तुल्यानां परमार्थेन तत्त्वात्, कुशलप्रवृत्तेश्च सूक्ष्माभोगपूर्वकत्वात्, अतिनिपुणबुद्धिगम्यमेतदिति पर्याप्तं प्रसङ्गेन। नमो जिनेभ्यो जित-

## भयेभ्य इति । सर्वज्ञसर्वदर्शिनामेव शिवाचलादिस्थानसंप्राप्ते-र्जितभयत्वाभिधानेन प्रधानगुणापरिक्षयप्रधानफलाप्त्यभयसम्प-दुक्तेति । ९ ।

पं०..."एवंभूतश्च" व्यापकश्च "अयं" सङ्घादिपूजाविषय आशयः, कुत इत्याह "इति" एवं, यथा एकस्मिन् पूज्यमाने तथा "तदा" एकपूजाकाले "अपरागतहर्षादि-लिङ्गसिद्धेः" अपरेष्वपूज्यमानेषु सङ्घादिदेशेष्वागतेषु-तत्कालमेव प्राप्तेषु तेषु विषये आगतस्य -आरूढस्य हर्षपूजाभिलाषादिलिङ्गस्य सिद्धेर्भावश्रावकस्य विज्ञेयो न त्वन्यथा, तथाविधविवेका भावेन पूज्याः मानव्यतिरेकेणान्येषु हर्षादिलिङ्गाभावात्, "कुशलप्रवृत्तेरिति" कुशलानां-बुद्धिमतां प्रवृत्तेः-'एगंमि पूइयंमी'त्यादिकाथाः

**टीका०**....अथ-पूर्वोक्त-सप्रमाणपुष्टनिरूपणेन 'अद्वैत एको मुक्तः-ईश्वरोऽस्ति, इत्येत-न्मतखण्डनद्वारा, अर्हन्तः (मुक्ताः परमेश्वराः) बहवो यावदनन्ता इति सिद्धम्, तदेवमर्हतां बहुत्वस्य-(अनेकत्व-नानात्वस्य) सिद्धिर्ज्ञेया, विषयाणां बहुत्वेन च नमस्कारकारकस्य फलाति-शयः फलस्यातिशयः (बहुत्वं-महत्त्वं) कथमिति चेत्कथ्यते नमस्कार-नामकक्रियाया विषयभूतानां गुणिभूतानां (अर्हद्व्यक्तीनां बहुत्वेन) सदाशयस्फातिसिद्धेः=ध्यानातिशय-प्रयुक्त-सद् (शुभ) आशयरूपभावोल्लासस्य विशेष-विशाल-वृद्धि-सिद्धिरस्ति.

नमस्कारक्रियाकर्त्तरि-आत्मनि पूज्यार्हद्रूप-विषयबहुत्वद्वारा फलस्यातिशयो भवति, यतः सदाशयस्फातिरूपहेतुसिद्धिर्भवति.

ननु नमस्काररूपयैकया क्रिययाऽनेकेषां जिनानां विषयीकरणे, आशयस्फातिःकेव ?

प्रत्युत्तरम्=यदेकनमस्कारक्रियाऽनेकजिनानां विषयीकरणं (उक्त-क्रियायामनेकेषां जिनानां विषयतया परिणमनं) तदेतत्-समानगुणवतां जिनानां विषयतया ग्रहणं-विषयीकरणं विवेकरूप-फलजनकमत एव सदाशय-स्फाति-वृद्धिरेव,

**प्रश्नः**=यद्येवं तदैक (दानादिरूप) क्रिययैकयाऽनेक-सन्माननं बहुब्राह्मणैकरूपकदानं तथा नमस्कारपात्राणां जिनानामनेकेषां केवलैकनमस्कारक्रियया वन्दनं, तत् कथं नाऽल्पत्वम् ? (वत्) यथा सन्माननं (वन्दनं) न्यूनमस्ति, तदा फलमपि कथं न्यूनं न स्यात् ?

प्रत्युत्तरम्=क्रियाभेदभावात्-क्रियायां भेदभावतोऽनेकषां सन्माननस्य नाल्पता-न न्यूनताऽस्ति, यथा सा हि रत्नावलीविषयकदर्शनक्रिया, एकरत्न-विषयकदर्शनक्रियातो

भिद्यते—भिन्ना भवति, यतः हेतुफलभेदभावात्, हेतौ च फले भेदो भवति. तथात्राऽपि हेतौ च फले च भेदोऽस्ति, अतः क्रियायां भेदः, यत्र यत्र हेतुफलभेदो भवति तत्र तत्र क्रियाभेदो भवति, (हेतुफलभेदसत्त्वे क्रियाभेदसत्त्वं, क्रियाभेदहेतुः (कर्त्ता) हेतुफलभेदो वर्त्तते)

**—हेतुभेदस्य च फलभेदस्य च घटना—**

हेतुभेद—घटना=यथैकार्हद्विषयकनमस्कारक्रिया, सर्वार्हद्विषयकनमस्कारक्रियातो भिन्नाऽस्ति, यत एकार्हद्विषयकनमस्कारक्रियायामेकार्हद्रूपव्यक्तिः, आलम्बननिमित्तत्वेन हेतोर्भेदोऽस्ति, तथा सर्वार्हद्विषयकक्रिया—नमस्कारात्मकक्रिया एकार्हद्विषयकनमस्कारक्रियातो भिन्नाऽस्ति, यतः सर्वार्हद्—विषयकनमस्कारक्रियायां सर्वेऽनन्ता अर्हन्तो विषयतयाऽऽलम्बन—निमित्तत्वेन हेतुभेदोऽतः क्रियाभेदो ज्ञेयः, यथाहि—यथैकरत्नविषयकदर्शनक्रिया, रत्नावली (रत्नराशि) विषयकदर्शनक्रियातो भिन्नाऽस्ति, यतस्तस्यां दर्शनक्रियायां विषयतयाऽऽलम्बनमेकरत्नमस्ति, अतो हेतुभेदतः क्रियाभेदः, तथा रत्नराशिविषयकदर्शनक्रिया, एकरत्नदर्शनक्रियातो भिन्नाऽस्ति, यतः दर्शनक्रियायां आलम्बनभूता रत्नावलयः—रत्नराशयोऽतः क्रियाभेदः (एकवचन—बहुवचन—प्रयुक्त—क्रियाभेदः)

फलभेदघटना=यथैकरत्नदर्शने हर्षरूपं फलं यद्भवति, ततः रत्नावलीदर्शनेऽत्यन्तानन्द—पराकाष्ठा प्राप्ता, हर्षप्रकर्षो भवति, तथैवैकार्हद्विषयक—नमस्कारजन्यानन्दतः सर्वकालिकानन्तार्हद्—विषयकनमस्कारक्रिया, अत्यन्तअनंतानन्दजनकोऽस्ति, एवं फलभेदेन क्रियाभेदो ज्ञेयः, तथा चात्यन्तानन्दजनकत्वेनैक—नमस्कार—क्रियातोऽनेक—जिनानां सन्मानेऽल्पत्वस्यात्यन्ताभावोऽस्ति, हेतुफलभेदात्कथमित्थमल्पत्वम् ?

ब्राह्मणैकरूपकदानोदाहरणं तूपन्यासयोग्यं नैव रूपकादिव नमस्काराद् ब्राह्मणानामिवार्हतामुपकारा—योगात्—अर्थान्नमस्कार—क्रियया विषयभूतेष्वर्हत्सु किं जातीयमप्युपकाररूपफलं न भवति, (दृष्टान्त—वैषम्यमत्र ज्ञेयम्) कथं तर्हि तत्फलम् इति ? चेद् उच्यते—

तदालम्बनचित्तवृत्तेः=भगवतामालंबनं यत्र तादृशीचित्तवृत्तिरूपनमस्कारक्रियाया हर्षोत्कर्षरूपं फलं नमस्कार—कर्त्तरि भवति. यथाऽनेकप्रकाशकवस्तूनामालम्बनकारकचक्षुषा स्पष्टदर्शनं भवति, तथाऽत्रायं फलातिशयो ज्ञेयः,

**शङ्का**=यदि तादृशविशिष्टनमस्काररूपचित्तवृत्तेस्तादृशं फलं भवति तर्हि भगवद्भ्य एतत्फलं इति कथं कथ्यते ?

**समाधानम्**='तदाधिपत्यतो' भगवदाधिपत्यतः, भगवन्त एव तच्चित्तवृत्तेस्तज्जनकेषु हेतुषु प्रधानत्वेनाऽधिपतयः, अर्थात् सकलाऽर्हद्विषयक—तादृशनमस्काररूपचित्तवृत्तेरुपरिभगवता-माधिपत्यं (प्रधानकारणत्वं) भवत्यतः (भगवन्त एव तादृशनमस्काररूपचित्तवृत्तेस्तादृशप्रमोदातिशय—जनकहेतुषु प्रधानत्वेनार्हन्त एवाधिपतयः—अग्रिमपरमालम्बनभूताः, अर्थादनेक—भगवदधीना तादृशनमस्काररूपचित्तवृत्तिरस्ति, तादृशनमस्काररूपचित्तवृत्तेरधीनं हर्षोत्कर्षरूपं तादृशं फलं भवति.)

'तत एव' भगवद्भ्य एव 'तदभावात्' क्रियाफलभावात् अर्थात् तादृशविशिष्ट चित्तवृत्तिद्वारा, नमस्कारक्रियाजन्यप्रमोदातिशयरूपं फलं प्रति, अर्हन्तो भगवन्त एव अमोघ (पुष्ट—परम—प्रबल) आलम्बनरूपकारणमस्ति, अत एव तत्फलं भगवद्भ्य एव इति कथने न कोऽपि बाधः, चिन्तामणिरत्नादौ तथा दर्शनाद् चिन्तामण्यादौ विधितः प्रणिधानादेः (मनस एकाग्रता—विविधसाधनाप्रवृत्ते ) अर्थादेकध्येयस्थिरचित्तवृत्तिरूपप्रणिधानादि—निष्पाद्य—फलं तच्चिन्तामणिरत्नादितो भवतीति लोके प्रतीतिदर्शनात् (प्रतीतिव्यवहाराभ्यामर्थसिद्धिरिति नियमात्) तथाचालम्बनीय (प्रकृत—क्रियाया आलम्बन—योग्य—विषये चिन्तामणिरत्नादावर्हत्सु भगवत्सु)

उपकाराभावे सत्यपि तदालम्बक (नमस्कर्त्ता—आराधक—पूजक—उपासक) स्येष्टसिद्धिर-वश्यं भवति.

**शङ्का**=यदि सर्वार्हद्विषयकनमस्काररूपपूजयैव प्रमोदातिशयरूपं फलमस्ति, एकस्यार्हतः पूजायां सर्वार्हत्—पूजायाः समावेशो भवतीति यत्—शास्त्रीयवचनं यदुत 'एगम्मि पूइयम्मि सव्वे ते पूइया होंति' (अधिकृतैकार्हत्—पूजायां सकलार्हत्पूजालाभो भवति) तद्वचनस्य सङ्गतिःकथं ? कथमेक—पूजया सर्वपूजाऽभिधानं ?

**समाधानम्**=(१) इदं शास्त्रीयं वचो युक्तियुक्तं यदर्हतां गुणगणद्वारा एकस्यार्हत आराधनं, क्षेत्रे काले च सर्वस्मिन् स्थितानां सर्वेषामर्हतामाराधनारूपमस्ति, किञ्च—एकस्या-प्यर्हतः, अवज्ञा (अविनय—आशातना—अबहुमानादि) करणं सकलजगद्वर्तिनामर्हतामवज्ञाऽबहु-मानाशातनादिकरण—समानत्वे महापायकारणं, अन्यच्च तत एव, अर्हतां वन्दना बहुमानादि द्वारा (साक्षात्—अव्यवहितत्वेन) सर्वतीर्थंकराणां भक्तिबहुमानादि—जन्यफलं प्राप्यते, शास्त्रीय-वाक्यमिदं वैयावृत्त्यादौ योजनीयम्, किञ्चैकव्यक्तिरूप—विशेष—विषयक—एकस्य पूजया सर्वविष-यकपूजा भवत्येव,

अयं कथनस्योद्देशः=यथाऽयमेक—व्यक्तिरूप—तीर्थकर—विशेषः, यादृशयावद्गुणविशि-ष्टोऽस्ति, तावत्तादृशगुणवन्तः सर्वे तीर्थङ्कराः सन्ति, न गुणेषु तारतम्यं वर्त्तते, इत्येवं सर्वेषामेषां

तीर्थङ्कराणां तुल्यगुणत्व—ज्ञापनेन, अनुदाराणां—औदार्यरहितानां चित्तप्रवर्त्तनार्थं, अनुदारचित्तः पुरुषो हि कृपणतायोगतः सर्वतीर्थंकरपूजां कर्त्तुमशक्नुवन्—सन्—एकमपि तीर्थंकरं पूजयेत्, अतस्तत्प्रवर्त्तनार्थमुच्यते, 'एगम्मि' इत्यादिसूत्रपाठः,

व्यक्ति गौणीकृत्य (गुणाः पूजास्थानं, गुणिषु—वाकृयतः) अतो गुणान् प्रधानीकृत्य, ते गुणिनः सर्वे पूज्या एवेति भाववत्त्वेन चित्तस्यौदार्यसम्भवः, यद्यपि शास्त्रीयमिदं वचनं न भवेत्तदा कृपणो जनः, कार्पण्येन सर्वविषयकपूजां कर्त्तुमशक्नुवन्नैकमपि न पूजयेत्तथा च कृपणमपि पूजाविषये बलेन वर्तयत्वेव प्रोत्तेजयत्येवेदं वाक्यं, भो भ्रातरः ! यूयं सर्वान् जिनान् पूजयितु-मसमर्थास्तदैकमपि जिनं पूजयत, यतो गुणपूजां मुख्यीकृत्य एकस्य जिनस्य पूजनेन सर्वे जिनाः पूजिता इति लाभविशेषं समासादयतेति. 'एगम्मि' इत्यादिवाक्यस्य प्रथमं फलमिति.

(२) द्वितीयं कारणमुच्यते=पूज्यमानात्—पूजाया विषयभूतैकव्यक्तिरूपादर्हतो भगवतोऽन्ये येऽर्हन्तो भगवन्तस्तेषु सर्वा—निरवशेषाः सम्पदो नव सम्पदः ( स्तोतव्य—ओघहेतु—विशेषहेतु—स्तोतव्योपयोग—उपयोगहेतु—स्तोतव्य—विशेषोपयोग—स्तोतव्यस्वरूप—निज—समफलद—मोक्षरूपाः) स्युः तासां परिग्रहार्थमवबोधनार्थं च, तेऽपि परिपूर्णसम्पद एवेति भावः। यथैकस्तीर्थंकरः सर्वसम्पत्समन्वितस्तथा सर्वे तीर्थंकराः सर्वसम्पत्समन्विता एवेति 'एगम्मि' इत्यादि शास्त्रीय—वाक्यस्य द्वितीयं कारणमिति.

(३) 'एगम्मि पूइये सव्वे पूइया" इति शास्त्रीयवाक्यस्य तृतीयकारणमुच्यते "सङ्घ-पूजादौ" सङ्घचैत्य ( जिनमन्दिर—जिनप्रतिमा ) साधुपूजादौ, आशयव्याप्ति—प्रदर्शनार्थं चेति तृतीयं कारणम्, अर्थात् संघ—चैत्यसाधुपूजादौ ( च सर्वक्षेत्रीय—सर्वकालिक—संघादि प्रति पूजाभावस्य विद्यमानत्वेन ) तद्विषयकाशय—भावोल्लासस्य व्याप्ति ( व्यापकता ) दर्शकत्वेन शास्त्रीयवाक्यं सफलमिदम् ।

आशयव्याप्तिप्रदर्शनम्=अयं—एष सङ्घादिपूजाविषय आशयो भावोल्लासः—तत्तत्काल-क्षेत्रादिगत—संघादिपूजाकर्त्तुराशयः, एवंभूतः=व्यापकोऽस्ति ( सर्व—क्षेत्रीय—सर्वकालीन—सर्व पूजनीयरूपविषयगतः ) यतः इति एवं यथा एकस्मिन् पूज्यमाने तथा 'तदा' एकपूजा-काले 'अपरागत—हर्षादिलिङ्गसिद्धेः'=अपरेष्वपूज्यमानेषु सङ्घसाधु—चैत्यादि—पूज्यविभागेषु तत्कालमेव प्राप्तेषु तेषु विषये तत्कालं ( बुद्धौ वा ) साक्षादुपस्थितेषु साधुसंघादिपूजनीयपदा-

३३

र्थेषु, अर्थात्तान् प्रति हर्षः ( चित्तप्रसन्नता ) तथा पूजनीयपूजाविषयकाभिलाषादिलिङ्गानां सिद्धि वर्तते.

अत एवैष विशिष्टव्यापक—संघादि—विषयकागतहर्ष—पूजादि—अभिलाषादि लिङ्गानां सिद्धिः—सत्ता (अतो भावश्रावके एवंभूत आशयो विज्ञेयः)-भावश्रावके (न तु द्रव्यादिश्रावके) विज्ञेया;नत्वन्यथा, तथाविवेकाभावेन पूज्यमानव्यतिरेकेणाऽन्येषु पूज्येषुहर्षादिलिङ्गभावात् अर्थात्तथा-विध—विशिष्ट—विवेकस्याभावेन पूज्यमानैक—व्यक्ति—भिन्नान्य सर्व—पूज्यव्यक्तीन् (क्तीः) प्रति पूजा-विषयकाशयद्योतक हर्षपूजाऽभिलाषादिलक्षणानां, असत्त्वेन द्रव्यश्रावकादौ तथालक्षणदर्शनस्याभावः।

इति—नमस्कारक्रियाविषयभूतानामर्हतां बहुत्वेन नमस्कारकर्त्तरि शुभाशयस्य वृद्धिरस्ति, अत एव फलातिशयः—विशिष्ट—उत्कृष्टफलस्य सिद्धिः सुतरां सिद्धाऽस्ति.

एवं—यथास्तोतव्येषु, अर्हत्सु बहुवचनं सफलं तथा ( नमन्ति वद् ) एतद् वक्ष्यामः आत्मनि (स्तोत्रकर्तृस्तोतृरूपे आत्मनि) गुरुषु च (गुरवो वदन्ति) (तत्तुल्यगुणानां तत्तुल्यगुण-वतोऽपेक्ष्य, बहुत्ववाचकबहुवचनस्य सार्थक्यं—साफल्यं ज्ञेयम् , यतः तत्तुल्यानां, अन्येषां गुणानां समावेशेन ( गुणवतां वा ) स्तोतृसदृशगुणवति सर्वात्मनि, आत्मत्वं गुरुसदृशगुणवत्सु अपरेषु, सर्वगुरुषु गुरुत्वं, परमार्थतः स्तोत्रकर्तृत्वरूपमात्मत्वं तथा गुरुत्वम् ) किञ्च—मोक्षानुकूलाऽनुष्ठानकार-काणां कुशलानां—बुद्धिमतां पुरुषाणां ( अनेकगुणिनः पूजया सर्वेषां गुणवतां पूजा भवति, अर्थाद् गुणिनो गौणीकृत्य—गौणभावपूर्वकं, गुणानां प्रधानाभावे ) ( न प्रवृत्तिरूप ) प्रवृत्तिः, गुणगणाधारयोश्रिता—विचारणारूप-सूक्ष्माभोग—उपयोग (ज्ञान) पूर्विका भवति, अर्थादिदमेकं गुणवद्गतगुणपूजायाः प्रधानभावेन एकगुणिरूप—व्यक्तिपूजाकरणेन सकलगुणवतां पूजा कृता गण्यते, एतद् वस्तु, अत्यन्तनिपुणबुद्धिगम्यमिति पर्याप्तं प्रसङ्गेन, अर्थाद् विषयोऽयं तदैव ज्ञायते यदाऽतिनिपुणबुद्धिप्रयोगो भवेत् तथा च ' नमो जिणाणं जियभयाणं ' इति पदेन कथयति च—सर्वज्ञसर्वदर्शिनामेव शिवाचलादिस्थानसम्प्राप्तेर्जितभयत्वाभिधानेन, अर्थात् सर्वज्ञसर्वदर्शिषु एव सर्वथाभयाक्षयस्वरूपजितभयस्वरूपाभयत्वस्य प्रतिपादनेन प्रधान ( सर्वज्ञत्वादिरूपगुणानामपरिक्षयस्य प्रधानाशिवादिस्थानप्राप्तिरूप ) फलस्य चाप्तिरूपाभयनामकसम्पदुक्तेति (९)

(क्वचित् स्थले 'सव्वन्नूणं आदितो जियभयाणं इति पर्यन्तेषु त्रिषु पदेषु प्रभो मोक्षा-वस्थाया दर्शितत्वात्—एतत्पदत्रयवती नवमी सम्पन्मोक्षसम्पदुक्तैवेति. )

अथ प्रेक्षापूर्वक—प्रवृत्तिकारकाणां जिज्ञासां लक्ष्यीकृत्य तत्प्रत्युत्तररूपाणां नवसम्पदां क्रमशः चमत्कारपूर्वक उपन्यासः कृतः। एवंविषयमेनं सूक्ष्मेक्षिकया वर्णयति—

इह चादौ प्रेक्षापूर्वकारिणां प्रवृत्त्यङ्गत्वात् अन्यथा तेषां प्रवृत्त्यसिद्धेः प्रेक्षापूर्वकारित्वविरोधात् स्तोतव्यसम्पदुपन्यासः, तदुपलब्धावस्या एव प्रधानासाधारणासाधारणरूपां हेतुसम्पदं प्रति भवति विदुषां जिज्ञासा तद्भाजनमेते इति तदुपन्यासः, तदवगमेऽप्यस्या एवासाधारणरूपां हेतुसम्पदं प्रति परम्परया मूलशुद्ध्यन्वेषणपरा एते इति तदुपन्यासः, तत्परिज्ञानेऽपि तस्या एव सामान्येनोपयोगसम्पदं प्रति परम्परया फलप्रधानारम्भ-प्रवृत्तिशीला एते इति तदुपन्यासः, तत्परिच्छेदेऽपि उपयोग-सम्पद एव हेतुसम्पदं प्रति विशुद्धिनिपुणारम्भभाज एते इति तदुपन्यासः, एतद्बोधेऽपि स्तोतव्यसम्पद एव विशेषेणोपयोग-सम्पदं प्रतीतिसामान्यविशेषरूपफलदर्शिन एत इति तदुपन्यासः, एतद्विज्ञानेऽपि स्तोतव्यसम्पद एव सकारणां स्वरूपसम्पदं प्रति विशेषनिश्चयप्रिया एते इति तदुपन्यासः, एतत्संवेदनेऽप्यात्म-तुल्यपरफलकर्तृत्वसम्पदं प्रतीति, अतिगम्भीरोदारा एते इति तदुपन्यासः, एतत्प्रतीतावपि प्रधानगुणापरिक्षयप्रधानफलाप्त्य-भयसम्पदं प्रति भवति विदुषां जिज्ञासा दीर्घदर्शिन इति तदुपन्यासः, अनेनैव क्रमेण प्रेक्षापूर्वकारिणां जिज्ञासाप्रवृत्तिरित्येवं सम्पदामुपन्यासः, एतावत्सम्पत्समन्विताश्च निःश्रेयसनिबन्धनमेते एतद्गुणबहुमानसारं–

पं०..."तद्भाजनमेत इति" तद्भाजनं–जिज्ञासाभाजनं, एते–प्रेक्षापूर्वकारिणः, "एतद्गुणे-त्यादि" एतद्गुणबहुमानसारम्–एतेषां–स्तोतव्यसम्पदादीनां गुणानां बहुमानेन–प्रीत्या सारं स एव वा सारो यत्र तत्सम्यगनुष्ठानं भवतीति सम्बन्धः, कथमित्याह–

टी०...'इह चादौ' इत्यादि–प्रेक्षापूर्वकार्यकारिणः–जिज्ञासवः पूर्वं एतज्ज्ञातुमिच्छन्ति यत्

(१) 'कं विषयं प्रगृह्य शक्रस्तवस्य प्रवृत्ति र्जाता ?' इति प्रश्नप्रत्युत्तरमज्ञात्वा शक्रस्तवपाठादौ प्रवृत्तिः प्रेक्षावतां का कीदृशी वा भवेत् ? अत एव शास्त्रकारेण पूर्वं 'नमोत्थुणं अरिहंताणं भगवंताणं अर्हद्भ्यो भगवद्भ्यो नमोऽस्तु' इति पदवती प्रथमा स्तोतव्यसंपदुपन्यस्ता, प्रेक्षावतां शक्रस्तवेऽस्मिन् प्रवृत्तिर्भवेदत्यर्थं, आदौ—आरम्भे, एतस्यां सम्पदि प्रवृत्तेरङ्गभूतस्य विषयस्य (विशेषस्य) उद्घोषणं कृतमस्ति, यदि प्रेक्षावतां प्रवृत्तेरङ्गभूतस्तुतिविषयाणां, अर्हतां भगवतां निरूपणं न कृतं स्यात्तदा प्रेक्षापूर्वकारित्वविरोधे प्रेक्षापूर्वकारिणां प्रवृत्तेरसिद्धि र्भवति, यतः प्रेक्षापूर्वकारिणां प्रवृत्तिस्तदा भवेद् यदा प्रवृत्तेरङ्गानि ( सर्वाणि ) ज्ञातानि भवेयुः, अर्थादस्मिन्प्रकृतस्तवे प्रेक्षापूर्वकार्यकारिणां प्रवृत्तिर्भवेदेतदर्थं प्रवृत्तेरङ्गभूत-स्तोतव्य-स्तुतिपात्र—अर्हद्भगवद्रूपविषय—प्रतिपादिकायाः—स्तोतव्यसम्पदः प्रथमतः उपन्यासः कृतः ।

(२) जिज्ञासुप्रश्नः=स्तोतव्यसम्पदः किमर्थं पूर्वं निर्देशः कृतः ? तस्य प्रत्युत्तरं ( समाधानं ) ज्ञातं परन्तु प्रेक्षापूर्वकारिणः पुनः ( जिज्ञासा=प्रश्नः—अवान्तर—धर्मप्रकारक ज्ञानेच्छा—विशेषज्ञानगोचरेच्छा, विचार इति जिज्ञासायाश्चत्वारोऽर्थाः ) जिज्ञासा प्रादुर्भवति, कीदृशं प्रधानं सर्वसाधारणं चानन्यसाधारणं हेतुं गृहीत्वा स्तोतव्याऽर्हद्भगवतःस्तुतिः क्रियते ?

यदैवं जिज्ञासा ज्ञाता तदा सूत्रकारेण 'आइगराणं तित्थयराणं' सयंसंबुद्धाणं 'आदिकर—तीर्थंकर—स्वयंसम्बुद्धेभ्योऽर्हद्भ्यो भगवद्भ्यो नमोऽस्तु,' एतत्पदत्रयवती द्वितीया प्रधानसाधारणासाधारणहेतुसम्पत् कृता. साधारण—हेतुरूपादिकरत्वस्य, चासाधारणहेतुरूपं तीर्थंकरत्वं स्वयंसम्बोधिश्च, ययोः स्वरूपं पूर्वं कथितं तत एव ज्ञेयम् ।

आदिकरत्वं=तथा चादौ—मोक्षापेक्षया आदौ—भवे जन्मादिप्रपञ्चकरणस्वभाववन्तः, अत एव तीर्थंकरत्वसम्बन्धेन, स्वयंसम्बोधिनामकगुणसंसर्गेण आदिकरत्वेन—तीर्थंकरत्वेन—स्वयंसम्बुद्धत्वेनाऽर्हन्तो भगवन्तः स्तोतव्या एव ।

(३) जिज्ञासुप्रश्नः=प्रेक्षापूर्वकारिणो द्वितीयसम्पदो बोधे जातेऽपि परम्परया (अविच्छिन्नधारया) क्रमतो मूलरूपतीर्थंकररूपात्मद्रव्यस्य शुद्धि—स्वच्छताया, अन्वेषण—अनुसंधानकरणे परायणं प्रेक्षापूर्वकारिणं जिज्ञासोत्तिष्ठते, एते तीर्थंकरपदवीविभूषितात्मानः परम्परया मूलतोऽनादिकालतः (प्रथमतो मूलतः) शुद्धा उत्तमकोटिकाः सन्ति न वा ?

**समाधानम्**=एतस्या जिज्ञासायाः प्रत्युत्तररूपा 'पुरिसुत्तमाणं—पुरिससिंहाणं—पुरिसवर-पुंडरियाणं—पुरिसवरगंधहत्थीणं'इति चतुष्पदवती तृतीया स्तोतव्यसम्पदोऽसाधारणरूपहेतुसम्पदुक्तेति.

( तीर्थंकरस्यात्मानः पुरुषोत्तमाः—उत्तमोत्तमकोटीका गण्यन्ते, एतद्विषये क्षेमंकरगणी, एतादृश—महापुरुष—उत्तमोत्तम—प्राणिनोऽङ्गे षट्पुरुष चरित्रे—कथयति, यत् तीर्थंकरनामकर्म विपाकोदयभोक्तृ—( त्रिलोकीनाथ—ईश्वर—सर्वगुणसंपन्न—परमात्म ) तीर्थंकरस्यात्मानो, उत्तमोत्तम-विभागे आगच्छन्ति, ईदृशा विशुद्धात्मानोऽव्यवहारराशिस्थास्तदाऽपि गुणेष्वपि—अन्यजीवेभ्यो विशिष्टाभवन्ति, तत्रापि तेषां रत्नत्वमाच्छादितं भवति, व्यवहारराशावागच्छेयुस्तदा यदि पृथ्वीकाये उत्पद्यन्ते, तदा चिन्तामणिरत्नत्वं प्राप्नुयुः, अप्सु जायन्ते तदा तीर्थजलादिके उत्पद्यन्ते, यदि तेजस्काये जायन्ते, तदा आरात्रिक—यज्ञमङ्गलदीपकादावग्नौ जायन्ते, यदि वायुकाये जायन्ते, तदा वसन्तर्तुकालीने मृदुमधुरसुरभितपवने भवन्ति, वनस्पतिकाये जायन्ते तदा कल्पवृक्षे—सहकारे प्रतापवत्यौषध्यां जायन्ते, तथैव द्वीन्द्रिये दक्षिणावर्त्तशङ्खादावेव जायन्ते, तिर्यक्पञ्चेन्द्रियेषूत्तमगजाश्वादौ जायन्ते, एवं रीत्या सर्वगत्यादौ सर्वोत्तमस्थानेषु जायन्ते, प्रान्ते यदा तीर्थंकरा भाविनस्तदा तेषां जननी, च्यवनकाले चतुर्दश महास्वप्नान् पश्यति, श्रीमन्तस्ते गर्भकालादारभ्य त्रिभिर्ज्ञानैः सहिता गर्भकालतो देवास्तेषां पितुर्गृहे धनानि धान्यानि वर्षयन्ति—वर्धयन्ति स्म, इत्यादि प्रतीतमेव. )

एते तीर्थंकरात्मानोऽनादिकालतः सदाकालं सर्वत्र सर्वगतिषु सर्वप्राणिभ्य उत्तमोत्तमा अतो उत्तमोत्तमत्वस्थानसंपन्ना भवन्ति, अर्हन्तो भगवन्तः केन विशिष्टकारणेन स्तूयन्ते ?

इति पूर्वोक्तविशिष्टजिज्ञासापूर्त्यर्थं विशिष्टहेतुना वर्णयति 'पुरुषसिंहत्वेन, पुरुषवरपुण्डरीक-त्वेन, पुरुषवरगन्धहस्तित्वेन, पुरुषोत्तमाः' सन्ति, अत एवाऽर्हन्तो भगवन्तो विशेषतः स्तोतव्याः सन्ति, वीतरागस्तुतेर्विशेषहेतुभूता ये चत्वारो हेतवो दर्शिताः सन्ति, ते, असाधारणाः= तीर्थंकरात्मद्रव्यभिन्नेषु—अन्यात्मद्रव्येषु, अविद्यमानत्वेनासाधारणरूपा अतएवास्याःसम्पदो नाम 'असाधारणरूपा हेतुसम्पदुक्ता'ऽस्ति ।

(४) जिज्ञासुप्रश्नः=यद्यपि—असाधारणरूपहेतुसम्पदःसम्यग्बोधेऽपि ' फलप्रधान आरम्भ इति सल्लोकनीतितः' प्रवृत्तिः फलप्रधाना कर्त्तव्या अर्था'न्नकुर्यान्निष्फलं कर्मे'ति सल्लोकनीतिः—शिष्टाचारः, परम्परया फलप्रधाना—फलस्य प्रधानतावानारम्भःकार्यं इति स्वभाववन्तःप्रेक्षा-पूर्वकारिणःसन्त्यतो ज्ञातुमातुरता भवति. यथा सामान्यतः सर्वलोकपरमार्थसम्पादनरूपोपयोग-फलसम्पादनकर्त्तार एतेऽर्हन्तो भगवन्तःसन्ति न वा ?

**समाधानम्**=एतत्प्रश्नसमाधानरूपेण 'लोकोत्तमेभ्यो, लोकनाथेभ्यो, लोकहितेभ्यो, लोकप्रदीपेभ्यो, लोकप्रद्योतकरेभ्यो नमोऽस्तु ' इतिरूपेण स्तोतव्य—सम्पद एव सामान्येनोपोयोग

सम्पदःसन्दर्भःकृतोऽस्ति. एतत्सम्पद एव पञ्चसु पदेषु परार्थसम्पादनरूपोपयोगफलं निहितमस्ति, अत एषा 'सामान्योपयोगसम्पद्' कथ्यते.

अर्थात् सर्वलोके परमार्थसम्पादनरूपोपयोगफलसम्पादकत्वेन, सर्वलोकस्योपकारकत्वेन सदाकालमर्हन्तो—भगवन्तःस्तोतव्या एवेति.

(५) जिज्ञासुप्रश्नः=स्तोतव्यसम्पदः सामान्येनोपयोगसम्पद्रूपा चतुर्थी सम्पत्—ज्ञाता तथाऽपि विशुद्धितो निपुणारम्भभाजः=निपुणता—सुनिश्चयपूर्वकारम्भ (प्रवृत्ति) कारकाः प्रेक्षापूर्वकारिणःपृच्छन्ति.

येऽर्हन्तो भगवन्तःसर्वलोके सामान्येन परार्थं सम्पादयन्ति कस्य कस्य द्वारा—अर्थात् लोकेभ्यो कस्य कस्य दानं दत्त्वोपकुर्वन्ति ? उपयोगसम्पदः हेतुं (उपायं साधनं) विज्ञापयन्तु भवन्त इति.

**समाधानं**=एतत्प्रश्नस्य प्रत्युत्तररूपेण सूत्रकारः कथयति, 'अभयदेभ्यो, चक्षुर्देभ्यो, मार्गदेभ्यो, शरणदेभ्यो, बोधिदेभ्यो नमो नमः' इति उपयोगसम्पदो हेतुसम्पद् व्यवस्थिता, अभयदानादिद्वारा सकललोकेषु सामान्यतःपरमार्थसम्पादनरूपोपयोगरूपफलजनकत्वेन परमदानवीराः—महामहोदाराः—महासमर्थाः सदा स्तोतव्या एव.

(६) जिज्ञासुप्रश्नः=पञ्चम्याः सम्पदः समीचीनत्वेन बोधो जातः, तथापि सामान्यविशेषरूप—फलद्वयप्रेक्षिणां प्रेक्षापूर्वकारिणां जिज्ञासोद्भवति यद् एतेऽर्हन्तो भगवन्तो हेतुपूर्वकं सर्वलोकसम्बन्धेन—सामान्यतः (समष्टिरूपेणव्यापकरूपेण) परार्थसम्पादनरूपोपयोगफलं ज्ञातं तथाऽपि, अर्हतां भगवतां विशेषतः (व्यष्टिरूपेण) परमार्थसम्पादनरूपोपयोगफलं किं किं ?

**समाधानम्**=एतस्या जिज्ञासायाः पूर्त्तये 'धर्मदेभ्यो, धर्मदेशकेभ्यो, धर्मनायकेभ्यो, धर्मसारथिभ्यो, धर्मवरचातुरन्तचक्रवर्तिभ्यो नमोऽस्तु' एतद्रूपा पदपञ्चकवती षष्ठी, स्तोतव्यसम्पदो विशेषत उपयोगसम्पदो योजना कृता, एतेऽर्हन्तो भगवन्तो विवक्षितेषु वा विशिष्टेषु, अधिकारिभव्येषु धर्मदानद्वारा, धर्मदेशकत्वद्वारा धर्मनायकत्वद्वारा, धर्मसारथित्वद्वारा, धर्मचक्रवर्त्तित्वद्वारा, विशेषतः परमार्थसंपादनरूपोपयोगरूपफलविधातृत्वेन भव्यैर्भावभरनिर्भरहृदयतः सततं स्तोतव्या एव.

(७) जिज्ञासुप्रश्नः=षष्ठी—सम्पदः सम्यकतया ज्ञातृत्वेऽपि विशेषस्य (वैशिष्ट्य—विशिष्टस्वरूपस्य) अथवा विशेषतो निश्चयं प्रति प्रेमधारकाणां प्रेक्षापूर्वकारिणां जिज्ञासा जागर्ति यद् 'एतेषामर्हतां भगवतां कीदृशं किं अद्भुतं अलौकिकं स्वरूपमस्ति ? यतः स्तोतव्याःस्युस्ते ?

**समाधानं**=ईदृश्या जिज्ञासायास्तृप्तये 'अप्रतिहतवरज्ञानदर्शनधरेभ्यो व्यावृत्तच्छद्मभ्यो नमः' इति पदद्वयवती स्तोतव्यसम्पदः सप्तमी सकारणस्वरूपसम्पदिति ख्याता,

अप्रतिहतवरज्ञानदर्शनधरत्व–व्यावृत्तच्छद्मत्वरूपं, अर्हतां भगवतां, अखण्डस्वच्छमनन्तं स्वरूपमेव विद्यतेऽर्थात्, एतद्रूपहेतुनाऽर्हन्तो भगवन्तो नैरन्तर्येण नियमतः स्तोतव्याःसन्ति ।

(८) जिज्ञासुप्रश्नः=एवं सप्तम्याःसम्पदो ज्ञानं सम्यक्तया जातं तथाऽपि अत्यन्तगम्भीरोदारप्रेक्षापूर्वकारिणां स्वारस्येन जिज्ञासा जायते यदर्हन्तो भगवन्तः स्वोपज्ञाऽऽज्ञानुसारेण गतिं कुर्वतां स्वसमानकरणे परमोदारमहाशयाः सन्ति वा न वा ? अर्थात् अर्हन्तः स्वकीयाऽऽज्ञाभक्तान् वीरसेवकान् भक्ति विनिमये स्वतुल्यघटनसमर्थाः सन्ति न वा ?

**समाधानम्**=यदेदृशी जिज्ञासा प्रादुर्भवति, तदा तत्पूर्तये 'जिनेभ्योः जापकेभ्यः, तीर्णेभ्यस्तारकेभ्यः, बुद्धेभ्यो बोधकेभ्यः, मुक्तेभ्यो मोचकेभ्यो नमः' एतद्रूपा पदचतुष्टयवती, अष्टमी, आत्मतुल्यपरफलकर्तृत्वनामिका सम्पत् स्थापिता, अस्यां सम्पदि, अर्हन्तो भगवन्तः स्वतुल्यफलं स्वदर्शितशासनमार्गे प्रस्थितानां परेषां समर्पयन्ति. अत एव महोदारा—परमकारुणिकाः सन्ति, अत एषां स्तुतिः परमकरणीया भवति.

(९) जिज्ञासुप्रश्नः=एव अष्टमी–सम्पदः सम्यग् ज्ञानं जातं तथापि दीर्घदर्शिनां प्रेक्षापूर्वकारिणां जिज्ञासोत्तिष्ठते यद् सर्वज्ञतासर्वदर्शितारूपप्रधानगुणस्याक्षयस्थितिसम्पादनेन शिवाचलादिरूप—सिद्धिगति–स्थानरूपप्रधानफलस्य परमलाभवन्तस्तेऽर्हन्तो भगवन्तः सन्ति न वा ? ते चैतदत्यन्तसुदुर्लभतमलाभेन सदा भयविजेतारः सन्ति वा न वा ?

**समाधानम्**=एतादृशी या जिज्ञासा तस्याः शान्तये 'सर्वज्ञेभ्यः, सर्वदर्शिभ्यः, शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्तिसिद्धिगतिनामधेयं स्थानं सम्प्राप्तेभ्योऽर्हद्भ्यो भगवद्भ्यः नमो नमः' इतिरूपा पदत्रयवती नवमी प्रधानगुणापरिक्षयप्रधानफलाप्तिरूपाभयसम्पदुपन्यस्ता.

अर्थादितेऽर्हन्तो भगवन्तः सर्वज्ञत्वसर्वदर्शित्वनामकगुणं सदा सर्वथाऽक्षीणत्वेन धारयन्तः, शिवमचलमरुजमनंतमक्षयमव्याबाधमपुनरावृत्ति—प्रभृतिरूपं सिद्धिगतिनामकस्थानरूपं फलं प्रबलं प्राप्य जितभयत्व (भवक्षयरूपभयविजय) रूपमभयं सम्प्राप्ता अत एव सदा सर्वथा सर्वत्राऽर्हन्तो भगवन्तः स्तोतव्या एव ।

अनेनैव क्रमेण प्रेक्षापूर्वकारिणां जिज्ञासाप्रवृत्तिरित्येवं सम्पदामुपन्यासः, एतावत्सम्पत् समन्विताश्च निःश्रेयस–निबन्धनमेते, एतद्गुणबहुमानसारं=एतेषां स्तोतव्यसम्पदादीनां गुणानां बहुमानेन प्रीत्या सारं स एव वा सारो यत्र तत्सम्यगनुष्ठानं भवतीति सम्बन्धः ।

अथवा बहुसम्पदां बहुगुणानां बहुमानेन प्रधानमनुष्ठानं सदनुष्ठानं गण्यते,

चित्राणां सम्पदामुपन्यासरूपप्रपञ्चस्य प्रयोजनं प्रदर्श्य, स्याद्वादस्य सोदाहरणं प्रबल-पुष्टिं वा सिद्धिं करोति विवरणकारः-

**विशेषप्रणिधाननीतितस्तत्तद्बीजाक्षेपसौविहित्येन सम्यगनुष्ठान-मिति च ज्ञापनार्थं, एकानेकस्वभाववस्तुप्रतिबद्धश्चायं प्रपञ्च इति सम्यगालोचनीयं,**

**अन्यथा कल्पनामात्रमेता इति फलाभावः, एकानेकस्वभावत्वं तु वस्तुनो वस्त्वन्तरसम्बन्धाविर्भूतानेकसम्बन्धिरूपत्वेन पितृपुत्र-भ्रातृभागिनेयादिविशिष्टैकपुरुषवत्,**

**पूर्वापरान्तरितानन्तरितदूरासन्नवपुराणसमर्थासमर्थदेवदत्तकृत-चैत्रस्वामिकलब्धक्रीतहृतादिरूपघटवद्वा,**

पं०..."विशेषप्रणिधाननीतितः" विशेषेण-विभागेन स्तोतव्यसम्पदादिषु गुणेषु प्रणिधानं-चित्तन्यासस्तदेव नीतिः-प्रणिधीयमानगुणरूपस्वकार्यप्राप्तिहेतुस्तया: "तद्बीजाक्षेपसौविहित्येन" तस्य-गुणस्यार्हत्त्वभगवत्त्वादेर्बीजं-हेतुस्तदावारककर्म्मह्रासस्तदनुकूलशुभकर्म्मबन्धश्च तस्य "अक्षेपः" अव्यभिचारस्तेन सौविहित्यं-सुविधानं तेन "सम्यग्" भावरूपम् अनुष्ठानमिति च ज्ञापनार्थम्-एतच्च ज्ञापितं भवतीतिभावः, इयं च चित्रा सम्पन्न स्याद्वादमन्तरेण सङ्गतिमङ्गतीति तत्सिद्धयर्थ-माह-"एकानेकस्वभाववस्तुप्रतिबद्धश्च" द्रव्यपर्यायस्वभावार्हल्लक्षणवस्तुनान्तरीयकः पुनः "अयम्" अनन्तरोक्तः "प्रपञ्चः" चित्रसम्पदुपन्यासरूप "इति" एतत् "सम्यगालोचनीयं" अन्वयव्यतिरेकाभ्यां यथेदं वस्तु सिध्यति तथा विमर्शनीयं, विपक्षे बाधामाह-

"अन्यथा" एकानेकस्वभावाभावेऽर्हतां "कल्पनामात्रं" कल्पना एव केवला निर्विषय-बुद्धिप्रतिभासरूपा "एताः" चित्राः सम्पदः, ततः किमत आह-"इति" अतः कल्पनामात्र-त्वात् "फलाभावो" मिथ्यास्तवत्वेन सम्यक्स्तवसाध्यार्थाभावो, न चैवं, सफलारम्भिमहापुरुष-प्रणीतत्वादासामित्येतदुपन्यासान्यथानुपपत्त्यैव चित्ररूपवस्तुसिद्धिरिति। पुनः सामान्येन चित्र-रूपवस्तुप्रत्यायनाय प्रयोगमाह-एकानेकस्वभावत्वं तु वस्तुन इति साध्यनिर्देशः, अत्र हेतुः वस्त्वन्तरैः-साध्यधर्मिव्यतिरिक्तैर्थैः सम्बन्धः-तत्स्वभावापेक्षालक्षणस्तेनाविर्भूतान्यनेकानि-नाना-रूपाणि सम्बन्धीनि-सम्बन्धवन्ति रूपाणि स्वभावात् यस्य तत्तथा तस्य भावस्तत्त्वं तेन,

दृष्टान्तमाह्-पितृपुत्रभ्रातृभागिनेयैरादिशब्दात् पितृव्यमातुलपितामहमातामहपौत्रदौहित्रादिभिर्जन-प्रतीतैः, विशिष्ट-उपलब्धसम्बन्धो यः "एको" द्रव्यतया पुरुषः-तथाविधपुमांस्तस्यैव, अस्यैव दृढत्वसम्पादनार्थं पुनर्दृष्टान्तान्तरमाह-

"पूर्वेत्यादि" तत्तदपेक्षया पूर्वापरादिपञ्चदशरूपः, आदिशब्दादणुमहद्दुचनीचाद्यनेकरूपश्च यो घटस्तस्यैव वा एकानेकस्वभावत्वमिति, हेतुसिद्ध्यर्थमाह-

**टी०**....संपदादिषु चित्तन्यासेन सम्यग् अनुष्ठानं- 'विशेषप्रणिधाननीतितः'=विशेषेण-विभागेन-पृथक्पृथक् स्तोतव्यसंपदादिगुणेषु प्रणिधानं-चित्तन्यासः (विशुद्ध-भावनासारं, तदर्थाऽर्पित-मानसम्। यथाशक्ति क्रियालिङ्गं, प्रणिधानं मुनिर्जगौ ॥) तदेव नीतिः-प्रणिधान-विषयभूतगुणरूपस्वकार्यप्राप्तिहेतुरूपा या नीतिः, तस्याः-तन्नीतिद्वारा-विशेषतःप्रणिधानरूपहेतुद्वारा अर्हत्त्वभगवत्त्वादिरूपगुणं प्रति हेतुरूपो यो गुणप्रतिबन्धक-आवारकभूतस्य कर्मणो ह्रासः विनाशः, तद्गुणानुकूल-पुण्यानुबन्धि-पुण्यकर्मबन्धो वर्तते, तस्याक्षेपः-अव्यभिचारः (अविसंवादः-अव्यवधानं) तेन सुविधानं भवति तद् द्वारा भावरूपं अनुष्ठानं ज्ञातं भवति एतद्विषयस्पष्टार्थं चित्र-नानाविध-सम्पदामुपन्यासप्रपञ्चः,

इयं चित्रा सम्पत् स्याद्वादमन्तरेण सङ्गतिमङ्गति, इति तत्सिद्ध्यर्थमाह-

"एकानेकस्वभावप्रतिबद्धश्च" द्रव्यपर्यायस्वभावार्हल्लक्षणवस्तुनान्तरीयकः पुनः 'अयम्' अनन्तरोक्तः प्रपञ्चः चित्रसम्पदुपन्यासरूपः 'इति' एतत् 'सम्यगालोचनीयं' अन्वय-व्यतिरेकाभ्यां यथेदं वस्तु सिद्ध्यति, अर्थात् स्तोतव्यसम्पदाद्या नानाविधाः सम्पदःचित्राःस्याद्वादं (नित्यत्वानित्यत्वाद्यनेक-धर्माऽवच्छिन्नैक-वस्तुस्वीकाररूपानेकान्तवादं 'नह्येकत्र नानाविरुद्धधर्मप्रतिपादकःस्याद्वादः, किन्तु अपेक्षाभेदेन तदविरोध-द्योतकस्यात्पदसमभिव्याहृत-वाक्यविशेषः') विना न सङ्गतिमङ्गन्ति, एतत् सिद्धान्तसिद्ध-द्रव्यपर्यायरूपस्वभावाऽवच्छिन्नार्हद्-रूपवस्तु, विमुच्य चित्राणां सम्पदामुपन्यास-प्रपञ्चःस्थातुं नार्हति, यत्र यत्राऽर्हदधिकरणे वस्तुनि द्रव्य-पर्यायस्वभावरूपं वस्तुत्वं वर्तते तत्र तत्र चित्राः सम्पदो युज्यन्ते,

यत्र यत्र द्रव्यपर्यायस्वभावरूपं वस्तुत्वं नास्ति, तत्र तत्र चित्रसम्पदो न सन्ति, यतोऽत्र व्याप्यव्यापकक्षेत्राणि समान्येव यथा यत्र यत्र ज्ञेयत्वं तत्र तत्र नामाऽस्तित्वं अथवा यत्र यत्र प्राणाःसन्ति तत्र तत्र चेतनत्वं, यत्र यत्र ज्ञेयत्वं नास्ति तत्र तत्र नामाऽस्तित्वं नास्ति, यत्र यत्र न प्राणाः सन्ति, तत्र तत्र चेतनत्वं नास्ति, इत्येवमन्वयव्याप्तिव्यतिरेकव्याप्तिद्वयं ज्ञेयम्,

३४

अत्र सहभाविभूत द्रव्यपर्यायस्वभावावच्छिन्नार्हद्रूपवस्तुनिष्ठ वस्तुत्वस्य, चित्रसम्पदां च सहभाव-नियमरूपोऽविनाभावोऽस्ति । यथा प्रमाणमीमांसायां (१-२-२०) 'सहक्रमभाविनोः सहक्रम-भावनियमोऽविनाभावः'

तत्र सहभावनियम एकसामग्रीप्रसूतयोरूपरसयोर्व्याप्यव्यापकयोश्च शिंशपात्ववृक्षत्वयोर्भवति. क्रमभावनियमस्तु कृत्तिकोदयरोहिण्युदययोः, पूर्वोत्तरभाविनोः, कार्यकारणयोश्च धूमवह्न्योर्भवति ।।

तथा च द्रव्यपर्यायात्मकं वस्तु, अर्थादेकानेकस्वभावावच्छिन्नमर्हद्वस्तु, एतस्मिन् द्रव्य-पर्यायात्मनि, अर्हद्वस्तुनि, अविनाभावसम्बन्धेन (सहभावनियमेन) चित्रसम्पदुपन्यास-प्रपञ्चः,

वस्तुमात्रमनन्तधर्मात्मकं सत्त्वादिति, अत्रान्तर्व्याप्तिद्वारा साध्यसिद्धिः, यद्यर्हद्रूपवस्तुनि द्रव्यपर्यायस्वभावाभावमान्यतायां एताश्चित्राः सम्पदः-कल्पना एव केवला निर्विषयबुद्धिप्रतिभास-रूपाः अतःकल्पनामात्रत्वात् , मिथ्यात्ववत्वेन सम्यक् साध्यार्थाभाव एव फलाभावः, सफला-रम्भिपुरुषप्रणीतत्वाद् चित्राणां सम्पदां, एवं फलाभावो नास्ति एवापि तु सफलता, एतदु-पन्यासान्यथानुपपत्त्यैव चित्ररूपसम्पद्वस्तुसिद्धिः। पुनःसामान्येन चित्ररूपवस्तुप्रत्यायनाय प्रयोगमाह-

एकानेकस्वभावत्वं तु वस्तुना इति साध्यनिर्देशः

अत्र हेतुः वस्त्वन्तरैः-साध्यधर्मिव्यतिरिक्तै र्यः सम्बन्धः-तत्स्वभावलक्षणस्तेनाविर्भूतानि अनेकानि-नानारूपाणि सम्बन्धीनि-सम्बन्धवन्ति रूपाणि स्वभावाद् यस्य तत्तथा तस्य भाव-स्तत्त्वं तेन, दृष्टान्तमाह-पितृपुत्रभागिनेयपितृव्य-मातुल-पितामह-मातामह-पौत्र दौहित्रादिभि र्जनप्रतीतैः, विशिष्ट-उपलब्धसम्बन्धो यः 'एको' द्रव्यतया पुरुषः-तथाविधपुंसस्तस्यैव,

तथा च यथा द्रव्यापेक्षया विशिष्टएकपुरुषः पर्यायापेक्षया (भिन्नभिन्नसम्बन्धापेक्षया) पिता च पुत्रश्च भ्राता च मातुलश्च भागिनेयश्च पितृव्यश्च पितामहश्च मातामहश्च पौत्रश्च (पुत्रस्य पुत्रः) दौहित्रः (दुहितुश्च पुत्रः) इत्यादिः, मिथोविरुद्ध-विशेषणै र्विशिष्टः कथ्यते यथाऽन्यवस्तुभिः (पुत्रादिभिः) सह पूर्वकथितापेक्षालक्षणसम्बन्धेन प्रादुर्भूतानेकसम्बन्धवान्, तत्सम्बन्धविशिष्ट एव पुरुषोऽस्ति,

एकानेकस्वभावत्वस्यैव दृढत्वसम्पादनार्थं पुनर्दृष्टान्तान्तरमाह-पूर्वापरान्तरितानन्तरित-दूरासन्ननवपुराणसमर्थाऽसमर्थदेवदत्तकृतचैत्रस्वामिकलब्धक्रीतहृतादिरूपघटवद्वा,

(१) पूर्वघटः=प्रथमकालावच्छिन्नो घटः-पूर्वकालिकोऽथवा पूर्वः=परः-प्रशंसा-कृत-पौर्वापर्य-परत्वापरत्वापेक्षयाऽयं मङ्गलः-उत्तमः कुम्भ इत्यर्थ,

(२) अपरघटः=पश्चात्कालिको घटः, अपर—अधमत्वापेक्षयाऽमङ्गलो घटः, अर्थादत्र कालकृतप्रशंसाकृत—पौर्वापर्यापेक्षयैष परः, न परः, अपरो घट उच्यते,

(३) अन्तरितो घटः=व्यवहितो घटः वस्तुद्वयान्तरे मध्ये स्थितः, अन्तरालस्थो घटः,

(४) अनन्तरितो घटः=अन्तराल—व्यवधानरहितोऽव्यवहितत्वेन—अनन्तरितत्वेन—अनन्तरस्थितो घटः, अमध्यस्थो घटः,

(५) दूरस्थितो घटः=असमीपस्थो घटः,

(६) आसन्नस्थो घटः निकटस्थितोऽदूरस्थो घटः, एकस्यां दिशि स्थितं पदार्थद्वयमाश्रित्य यो दूरे स्थितः स परः, निकटे स्थितोऽपर उच्यतेऽर्थादत्र क्षेत्रकृतदेशकृतपरत्वाऽपरत्वं ज्ञेयम्,

(७) नवो घटः=नवीनः, तत्कालकृतः, वार्तमानिकः, न भूतकालीनः, सद्यस्कः, अर्वाचीनः,

(८) पुराणो घटः=प्राचीनो, भूतकालीनः (अत्र कालकृते परत्वापरत्वे ज्ञेये)

(९) समर्थो घटः=जलानयनादि,—अर्थक्रियाकारित्वरूपसामर्थ्यविशिष्टो घटः—दृढो घटोऽस्ति,

(१०) असमर्थो घटः=जलानयनादिरूपार्थक्रियायामशक्तो घटोऽदृढोऽपि घटः,

(११) देवदत्तकृतो घटः=देवदत्तेन कृतो—निर्मितो घटोऽयं, न केनाप्यन्येन,

(१२) चैत्रस्वामिको घटः=चैत्रः स्वामी यस्य स घटः, चैत्रस्वामिको घटः, नान्यस्वामिको घटः,

(१३) लब्धो घटः=प्राप्तोऽयं पारितोषिके दानदक्षिणायां वा प्राप्तः, कुतोऽपि लब्धः=(न फल्गुरूपः)

(१४) क्रीतो घटः=दत्त्वा रूप्यकाणि लब्धो घटः, क्रयेण प्राप्तः,

(१५) हतो घटः=सच्छिद्रो घटः, मुद्गरादिना खण्डितो घटः, खण्डशः कृतः ।

(१६) आदिना अणुरूपो घटः, महान् घटः, उच्चोऽयं घटः, नीचोऽयं घटः, एक एव घटः, तत्तदपेक्षयाऽन्यै घंटै विशिष्टो वाच्यत्वरूपेण भिद्यते, यावदनन्तधर्मात्मको भवति,

वस्तुनिष्ठानां, अनन्तधर्माणां (सम्बन्धव्यवहारक्रियानयपर्यायादीनां) नियामिका अपेक्षा अनन्ता एव, ययाऽपेक्षया नित्यं तयाऽपेक्षया (विवक्षया) नित्यमेव, ययाऽपेक्षयाऽनित्यं वस्तु तयाऽपेक्षयाऽनित्यमेव न नित्यम् । अपेक्षाकृता, नित्यानित्याद्या, अनन्ता धर्माः,

वस्तुनि अनन्ता धर्माःकया रीत्या तिष्ठन्ति सा पद्धतिर्नीतिर्दर्श्यते=अत्र जैने शास्त्रे सौवर्णो घटो दृष्टान्तरूपोऽस्ति.

(१) यथाहि=एकःसौवर्णो घटः—स्वद्रव्यक्षेत्रकालभावविवक्षया विद्यते (अस्ति) परद्रव्य-क्षेत्रकालभावविवक्षया न विद्यते, इति सिद्धान्तस्त्रैकालिको वर्त्तते यदैको घटः, सत्त्वज्ञेयत्व-प्रमेयत्वादिधर्मैश्चिन्त्यते, तदा तस्य ये सत्त्वादयो धर्माः स्वपर्यायाः तेषु कश्चिदपि धर्मः परपर्यायो नास्ति, यतो वस्तुमात्रं सत्त्वादिधर्मापेक्षया सजातीयमेव, अभावस्तु विजातीयस्यैव कथ्यतेऽर्थात् केनचिदपि व्यावृत्ति र्न संभवति, यदा द्रव्यतः, घटा, पौद्गलिको विवक्ष्यते तदा तु यत्पौद्गलिकत्वं तद् द्रव्यत्वेनाऽस्ति तथापि धर्माऽधर्मादिरूपेण नास्ति, अत्र 'पौद्गलिकत्वं' स्वपर्यायोऽस्ति, धर्मजीवा द्यनेकेभ्यो व्यावृत्ते र्धर्मादिद्रव्यत्वं परपर्यायोऽस्ति, स त्वनन्तधर्मात्मकोऽस्ति. यतो जीवद्रव्यमनन्तधर्मात्मकमस्ति ।

(२) घट पौद्गलिकःसन्नपि पार्थिवत्वेन रूपेण विद्यमानोऽस्ति, जलत्वादिरूपेणाऽविद्य-मानोऽस्ति, तत्र पार्थिवत्वं स्वपर्यायोऽस्ति, तस्यैतज्जलादिबहुद्रव्यतो व्यावृत्तिरस्ति, एष परपर्यायोऽनन्तोऽस्ति, एवमग्रेऽपि स्वपर्यायव्यक्तिरवधार्या.

(३) घट्टः पार्थिवः सन्नपि धातुत्वरूपेणाऽस्ति, मृत्त्वरूपेण नास्ति धातुत्वेऽपि सुवर्णत्वे नास्ति, रौप्यादिरूपेण नास्ति, सुवर्णमपि घटितवस्तुरूपेणाऽस्ति, अघटितवस्तुरूपेण नास्ति, घटितसुवर्णरूपोऽपि देवदत्तघटित—वस्तुरूपेणास्ति देवदत्तादि—घटितोऽपि पृथुबुध्नाद्याकारेणास्ति, मुकुटाद्याकारेण नास्ति, पृथुबुध्नाद्याकारवानपि, वृत्तरूपेणाऽस्ति, अवृत्तरूपेण नास्ति, वृत्तोऽपि स्वाकारेणाऽस्ति, अन्यघटाद्याकाररूपेण नास्ति, स्वाकारोऽपि स्वकपालाभ्यामस्ति, परकपालाभ्यां नास्ति, एवं रीत्या येन येन पर्यायेण घटादेर्द्रव्यस्य विवक्षा भवेत्, स स पर्यायः, विवक्षित—घटादि—द्रव्यस्य स्वपर्यायः, तद्भिन्नास्ते सर्वे परपर्याया एवं द्रव्यतः स्वपर्यायाः स्वरूपे भवेयुश्च व्यावृत्तिरूपपरपर्याया अनन्ता भवेयुर्यतोऽनन्तरूपेण ते व्यावृत्ताः सन्ति. इति स्वद्रव्यपरद्रव्याभ्यां सन्तोऽसन्तश्च पदार्था उच्यन्ते.

क्षेत्रापेक्षया घटः सन्नसंश्च=एष घटः त्रिलोकवर्तित्वरूपेण विवक्षितोऽस्ति, कुतोऽपि व्यावृत्तो नास्ति, अत एष स्वपर्यायोऽस्ति, परपर्यायो नास्ति, त्रिलोकवर्त्यपि तिर्यग्लोकवर्तित्व-रूपेणाऽस्ति. ऊर्ध्वाधोलोकवर्तित्वरूपेण नास्ति, तिर्यग्लोकवर्ती, अपि जम्बूद्वीपवर्तित्वरूपेणाऽस्ति. द्वीपान्तरवर्तित्वरूपेण नास्ति, तादृशोऽपि घटः, एतद् भरतवर्तित्वरूपेणाऽस्ति, भरतान्तरवर्ष-वर्तित्वरूपेण नास्ति, गृहेऽपि अमुकप्रदेशवर्तित्वरूपेणाऽस्ति, अपरप्रदेशवर्तित्वरूपेण नास्ति, क्षेत्रतः स्वपर्यायाः स्वरूपाः सन्ति, परपर्यायाः असङ्ख्याताः सन्ति,

स्वपरकालापेक्षया वस्तु सद–सद् वा=कालत एतद्युगस्थरूपेण विवक्षितो घटो भवेत्तदा तद्रूपेणाऽस्ति, स तदा भूतभविष्यदादियुगवर्तित्वरूपेण नास्ति, एतस्मिन् युगेऽपि, एतद्वर्षसम्बन्धेन सोऽस्ति, अतीतानागतादिवर्षसम्बन्धेन नास्ति, तत्राऽपि नवत्वरूपेणाऽस्ति, पुराणस्वरूपेण नास्ति, तत्रापि अद्यतनत्वरूपेणाऽस्ति, अनद्यतनत्वरूपेण नास्ति, तथाऽपि, वर्त्तमान क्षणरूपेणाऽस्ति, अन्यक्षणरूपेण नास्ति, एवं कालतः स्वपर्याया असङ्ख्या (अनन्ता अपि) परपर्यायास्तु अनन्ताः ।

स्वपरभावापेक्षया घटादिः सन्नसन् वा स्यात्=अथ भावेन स घटः पीतवर्णेनाऽस्ति, अन्यनीलादिवर्णेन नास्ति, पीतः सन्नपि, अन्यपीतद्रव्येभ्य एकगुणो पीतोऽस्ति, स ततोऽपि द्वितीयतो द्विगुणः पीतोऽस्ति, तृतीयतः त्रिगुणोऽस्ति, अर्थादेवं मन्तव्यं यत् प्रत्येकपीतद्रव्यतः, अपेक्षयाऽनन्तगुणं पीतमस्ति, अन्यापेक्षया–एकगुणहीनः, ततो द्वितीयतो द्विगुणहीन इत्यादिरस्ति, तत एवं मन्तव्यं एकैकापेक्षयाऽनन्तगुणहीनपीतत्ववान् स भवति, एवं पीतत्वतोऽनन्ताः स्वपर्याया जाताः, अपीतवर्णतो द्रव्यस्य न्यूनाधिकत्वं गृहीत्वाऽनन्तभेदवतो नीलादिवर्णतो व्यावृत्तिरूपाः परपर्याया अपि अनन्ताः सन्ति, एवं रसपक्षेऽपि स्वमधुरादिरसापेक्षया पीतत्ववत् स्वपर्याया अनन्ता ज्ञेयाः,

सुरभिगन्धोऽपि एवं स्वपर्याया अनन्ता ज्ञेयाः, एवं गुरुलघुमृदुखरशीतोष्णस्निग्धरूक्षाद्यष्टस्पर्शापेक्षया न्यूनाधिकत्वयोगेन प्रत्येकस्यैवमनन्ताः स्वपरपर्याया ज्ञेयाः, यतः ईदृशानन्त–प्रदेशिनि स्कन्धे अष्टस्पर्शाः प्राप्यन्ते इति सिद्धान्तोऽस्ति,

अथवा सुवर्णे द्रव्येऽपि अनन्तकालतः पंच वर्णाः, गन्धद्वयं षड्रसाः, अष्टस्पर्शाः, ते सर्वे न्यूनाधिकत्वाऽपेक्षया, अनंताः सम्भवन्ति, स स तस्य तस्य परवर्णादितो व्यावृत्तो भवति, तत्तदपेक्षया स्वपरपर्याया अनन्ता ज्ञेयाः,

शब्दतोऽपि नानादेशापेक्षया घटादि–अनेक–शब्दवाचकोऽस्ति, ततोऽनेके स्वधर्मा भवन्ति, घटादि वा चक्रादितरैस्तैस्तैः शब्दे व्यावृत्तिर्भवति, परधर्मा अप्यनन्ता भवन्ति, अथवा घटस्य ये ये स्वधर्माः कथिताः, अथवा कथयिष्यन्ते तस्य वाचका ये ये शब्दाः सन्ति, ते सर्वे घटस्य स्वधर्माः सन्ति, तान् विना ये विषयान्तरवाचकाः ते परधर्माः, सङ्ख्यातोऽपि तत्तदपरापरद्रव्यापेक्षया घटस्य प्रथमत्व–द्वितीयत्व–तृतीयत्वादि–एवं यावदनन्तमत्वपर्यन्तं भवेदर्थाद् तया रीत्या स्वधर्मा अनन्ताः स्युः, तत्तत्सङ्ख्याया अवाचकैः शब्दो व्यावृत्तिरूपाः परधर्मा अनन्ताः ।

परिमाणतोऽपि नानाविधद्रव्याऽपेक्षया तस्य घटस्य अणुत्व–महत्त्व–ह्रस्वत्व–दीर्घत्वाद्या अनंताः स्वधर्मा भवेयुः, अथ स घटः परद्रव्यतो व्यावृत्तोऽस्ति, अतो ये परपर्यायाः सन्ति ते स्वद्रव्यतो भिन्ना ज्ञेयाः,

परत्वापरत्वतः मिथोऽनन्तद्रव्यापेक्षया तस्य घटस्य समीपता–अधिकसमीपता–बहुसमीपता–दूरता–बहुदूरता, एक–द्वित–आरभ्या–संख्यातपर्यन्तयोजनप्रमाणा दूरता समीपता वा भवेदर्थात् स्वपर्याया अनन्ता भवेयुः, अथवा परद्रव्यपेक्षया स पूर्वदिशि, तस्मादन्यापेक्षया पश्चिमदिशि, एवं दिग्विदिगपेक्षया दूरसमीपादिमान्यतायां स्वपर्याया अनन्ताः स्युः,

ज्ञानतोऽपीदृशरीत्या अनन्तधर्माऽऽत्मकत्वं घटस्य ज्ञेयम्, कर्मतोऽपि–उत्क्षेपण–क्षेपणा-कुञ्चनप्रसारणभ्रमण–स्पन्दन–रेचन–पूरण–चलन–कम्पन–अन्यस्थानप्रापण – जलाहरण – जलादि प्रापणमित्यादि-क्रियायाः कालभेदेन वा तस्य न्यूनाधिक्यतः अनन्तक्रियाया हेतुरूपेण घटस्य क्रियारूपाः स्वपर्याया भवन्ति, तत्रस्थैकद्वित्रिकादि–अनन्तधर्मैः सदृशा अनन्तभेद–भिन्नाः, घटस्यानन्तभेद–सादृश्या भावतः स्वधर्मा अनन्ता भवन्ति, किञ्च विशेषतो विचार्यमाणे सति अनन्तद्रव्येषु–अपरापरापेक्षया एकद्वित्रिकादि–अनन्तैरथवा यावद्भिर्धर्मैं घटो विलक्षणो भवेत् तावद्भिः अनन्तैर्विलक्षणहेतुभि धर्मैरनन्त–स्वधर्मा घटो मन्यते.

अनन्त–द्रव्यापेक्षया घटः, स्थूलः कृशः समो विषमः सूक्ष्मो बादरः–तीव्रचाकचिक्य-वान्–सौम्यः पृथुः सङ्कीर्णः–उच्चो नीचः, विशालमुखः इत्येवं (प्रत्येकः) घटोऽनन्तप्रकारको भवेदतस्तत्तत्प्रकारैरपि तस्य स्वधर्मा अनन्ताः, अथ सम्बन्धापेक्षया=अनन्तकालावच्छेदेन, अनन्त परवस्तुभिः सह प्रस्तुतो घटः–आधाराधेयरूपसम्बन्धेन अनन्तभेदवान् भवेदतस्तदपेक्षया स्वधर्मा अनन्ता भवेयुः, एवमेव स्वस्वामित्व-जन्यजनकत्व नैमित्तिकत्व–षोढाकारत्व प्रकाशप्रकाशकत्व–भोज्यभोजकत्व–वाह्यवाहकत्व आश्रयाश्रयित्व–वध्यवधकत्व-विरोध्यविरोधकत्व–ज्ञेयज्ञायकत्वाद्य-सङ्ख्यातसम्बन्धतः प्रत्येकप्रत्येकानन्ताः स्वधर्माः सिद्धा भवन्ति। किञ्चात्र घटस्य स्वपरपर्याया ये–अनन्तानन्ता उक्तास्तेषामपि–उत्पत्तिविनाशस्थितयः पौनः पुन्येनानन्तकालमध्येऽनन्तशो जाता जायन्ते भविष्यन्ति, अतस्तदपेक्षयाऽपि धर्मा अनन्ता भवन्ति, एवं पीतवर्णत आरभ्य एतावत्पर्यन्तं प्रेक्षमाणे भावतोऽनन्ता धर्मा (प्रकृतघटस्य) सिद्धाः,

अत्र ये द्रव्यक्षेत्रादि, आश्रित्य धर्माः कथिताः, तेभ्यो घटस्तु–अवक्तव्यो भवेत्, यत ईदृशः कोऽपि शब्दो नास्ति, यत्, यस्मात्, शब्दाद्, घटस्य स्वधर्माश्च परधर्माः कथ्यमाना

युगपत् कथ्यन्ते, शब्दतो यः कथ्यते स तत्तु क्रमत एव कथ्यते, अर्थाद् द्रव्यक्षेत्रादि–प्रत्येक–प्रकारैरवक्तव्यधर्मतश्चान्य–द्रव्यतो व्यावृत्तत्वेन अवक्तव्याः परधर्मा अप्यनन्ताः सन्ति, एवं यथैकघटस्यानन्तधर्मत्वं दर्शितं तथाऽऽत्मादिसर्ववस्तुषु, अपि सङ्गमनीयं (सम्यग्घटनीयम्)

धर्मास्तूत्पद्यन्ते पर्यायवशात्, पर्यायवशाद् व्ययन्ते, तथापि यो धर्मी, स द्रव्यरूपत्वात्त्वान्नित्यस्तिष्ठति, धर्मधर्मिणोः कथंचिदभेदेन धर्मी सदा सत्त्वावच्छिन्नोऽस्ति, कालत्रयवर्तिनो ये धर्मास्तेऽपि शक्तिरूपेण सदा सद्रूपा एवेति

**घटस्यैकानेकस्वभावत्वरूपहेतोः सिद्ध्यर्थं कथयति.**

## सकललोकसिद्धश्चेह पित्रादिव्यवहारः, भिन्नश्च मिथः, तथा प्रतीतेः, तत्तत्त्वनिबन्धनश्च,

## अत एव हेतोः, वासनाभेदादेवायमित्ययुक्तं, तासामपि तन्निबन्धनत्वात्, नैकस्वभावादेव ततस्ता इतिरूपात्,

पं०..."सकललोकसिद्धश्च" अविगानप्रवृत्तेः "इह" जगति "पित्रादिव्यवहारः" तथाविधाभिधानप्रत्ययप्रवृत्तिरूपो "भिन्नश्च" पृथक् "मिथः" परस्परम्, अन्यो हि पितृव्यवहारोऽन्यश्च पुत्रादीनां, कुत इत्याह—"तथा" मिथो भिन्नतया "प्रतीतेः" सर्वत्र सर्वदा सर्वैः प्रत्ययात् "तत्तत्त्वनिबन्धनश्च" तस्य–पित्रादितया व्यवहरणीयस्य तत्त्वं–पित्रादिरूपत्वं निबन्धनं यस्य स तथा, चकार उक्तसमुच्चये, एतदपि कुत इत्याह—

"अत एव" तथाप्रतीतेरेव हेतोः, न च सम्यक्प्रतीतिरप्रमाणं, सर्वत्रानाश्वासप्रसङ्गाद्, अत्रैव पराकूतं निरस्यन्नाह–"वासनाभेदादेव" व्यवहर्तृवासनावैचित्र्यादेव, न पुनश्चित्रैकस्वभावाद्वस्तुनः "अयं" पितृपुत्रादिव्यवहारो दृष्टान्ततयोपन्यस्त "इति" एतत्सुगतशिष्यमतम् "अयुक्तम्" असङ्गतं, ते हि निरंशैकस्वभावं प्रतिक्षणभङ्गवृत्ति वस्तु प्रतिपन्ना इति न तदालम्बनोऽयमेकस्मिन्नपि स्थिरानेकस्वभावसमर्पकः पितृपुत्रादिव्यवहारः, किन्तु प्रतिनियतव्यवहारार्थिकुशलकल्पितसङ्केताहितविचित्रवासनापरिपाकतः कल्पितकथाव्यवहारवद् असद्विषय एव प्रवर्त्तत इति, कुतोऽयुक्तत्व मित्याह–"तासामपि" वासनानां न केवल व्यवहारस्य, "तन्निबन्धनत्वाद्" व्यवह्रियमाणवस्तुनिबन्धनत्वाद्, अतन्निबन्धनत्वे 'नित्यं सत्त्वमसत्त्वं वे'त्यादिप्रसङ्गात्, एवमपि किमित्याह–"नैकस्वभावादेव" नैकान्तैकरूपादेव "ततो" व्यवहारविषयवस्तुनः "ताः" पित्रादिवासना इति, विपर्यये बाधकमाह—"रूपात्" कृष्णनीलादेर्वर्णात्

**रसादिवासनापत्तेः, जातिभेदतो नैतदित्यप्ययुक्तं नीलात्पीतादिवासनाप्रसङ्गात्, तत्तत्स्वभावत्वान्नैतदित्यप्यसत्, वाङ्मात्रत्वेन युक्त्यनुपपत्तेः.**

पं०...."रसादिवासनापत्तेः" रसस्पर्शादिविचित्रवासनापत्तेः, एकस्वभावादपि परैरनेकवासनाभ्युपगमात्, परिहारान्तरमाशङ्क्याह—"जातिभेदतो" रूपरसादिजातिविभागतो "नैतत्" न रूपाद्रसादिवासनापत्तिः, अत्यन्तभिन्ना हि रूपजाते रसादिजातिः, कथमिव ततो रसादिवासनाप्रसङ्ग इति, तदप्ययुक्तं, कुत इत्याह—"नीलाद्" रूपविशेषाद्रूपत्वेनाभिन्नजातीयात् "पीतादिवासनाप्रसङ्गाद्" द्रष्टुः पीतरक्तादिसजातीयवासनाप्रसङ्गात्. परिहारान्तरापोहायाह—"तत्तत्स्वभावत्वात्" तस्य—नीलादेस्तत्स्वभावत्वात्—पीतादिवासनानां सजातीयानामप्यजननस्वभावत्वात्, नीलादिवासनाया एव जननस्वभावत्वात्. न च स्वभावः पर्यनुयोगार्हः, 'अग्निर्दहति नाकाशं, कोऽत्र पर्यनुयुज्यते' इति, "न नैव" "एतत्" नीलात्पीतादिवासनाजन्मप्रसञ्जनम् "इति" एतदपि परिहारान्तरमसत्—असुन्दरं, कुत इत्याह—"वाङ्मात्रत्वेन" वाङ्मात्रमेवेदमिति युक्त्यनुपपत्तेः.

टी०....'सकललोकसिद्धश्च'=सकललोके सिद्धः—प्रसिद्धः, यतो, अविगानेनाऽविरोधेन प्रवृत्तिर्वर्तते, तथाहि—'इह' जगति. पित्रादिव्यवहारः—पितृपुत्रादिरूपतथाविधाभिधान—शब्दनिमित्त प्रवृत्तिरूपः, भिन्नश्च—पृथक् मिथः—परस्परं अन्यो हि पितृव्यवहारोऽन्यश्च पुत्रादीनां यतः, तथा—मिथो भिन्नतया, प्रतीतेः=सर्वत्र सर्वदा सर्वैः प्रत्ययात्, तस्य—पित्रादितया व्यवहरणीयस्य तत्त्वं—पित्रादिरूपत्वं निबन्धनं यस्य स तथा, तत्तत्त्वनिबन्धनः, अर्थात्, जगतीह पुरुषमेकमाश्रित्य पितृपुत्रादिव्यवहारः—अपेक्षाभेदकृतः शब्दप्रयोगः, अविगानेन—अविरोधेन प्रवर्त्तमानोऽविरुद्धोऽबाधितो दृष्टेष्टप्रमाणतः सिद्धः—प्रसिद्धोऽस्ति, किञ्च स पितृपुत्रादिव्यवहारो मिथः—परस्परं भिन्नोऽस्ति—भेदवानस्ति, यदपेक्षया पिताऽस्ति, तदपेक्षया पुत्रो नास्ति, अपेक्षाणां भिन्नत्वेन पितृपुत्रादिव्यवहारः, परस्परं भिन्नोऽस्ति, पितृप्रभृतिव्यवहारो भिन्नोऽस्ति (भिन्नापेक्षावान्) यतस्तादृशी=परस्परं भिन्ना, पित्रादिव्यवहारस्य प्रतीतिरेव प्रमाणम्, सर्वत्र स्थले सदा सर्वलोकानां परस्परभेदप्रकारिका तथा प्रतीतिर्भवति, पित्रादितया व्यवहरणीयस्यैकपुरुषस्य तत्त्वं—पित्रादिरूपत्वं मूलकारणं पित्रादिव्यवहारस्याऽस्ति, पित्रादिव्यवहारं प्रति पित्रादित्वेन व्यवहरणीयपुरुषनिष्ठपित्रादिरूपत्वं निबन्धनं कारणमस्ति, (एवं च व्यवहार्यपुरुषपितृत्वपुत्रत्वादिः, नानाधर्मसम्बन्धाऽवच्छिन्नोऽस्ति, अर्थात् पित्रादिव्यवहारं प्रति पितृत्वपुत्रत्वादि—नानाधर्मविशिष्टज्ञानं

कारणं 'व्यवहारं प्रति व्यवहर्त्तव्यतावच्छेदप्रकारकं ज्ञानं कारणं' इति न्यायोऽप्यत्र विचारणीयः) अर्थात् तादृशकार्यकारणभावेऽथवा प्रकृतविषये तत्तत्प्रकारिका प्रतीतिरेव प्रमाणम्, यदि समीचीनप्रतीतेरप्रमाणत्वे तर्हि सर्वत्राऽविश्वाससाम्राज्यं व्याप्तं स्यात्, अत एव सत्यप्रतीतिं प्रमाणं कृत्वा यथा पुरुषव्यक्तौ अनेकधर्मसम्बन्धाः स्थितास्तथा प्रत्येकवस्तुमात्रेऽनेके धर्माः सन्ति सम्बन्धावस्था–प्रकाराः सन्ति) इति मन्तव्यमेव ।

प्रतिपक्षः (बौद्धः) वासनाभेदादेवायम् = व्यवहर्तुर्वासना—(मनस्कार)—वैचित्र्यादेव, (वासनाया, अर्थः सा शाक्यपरिकल्पिता त्रुटितमुक्तावलीकल्पानां परस्परविशकलितानां क्षणानामन्योऽन्यानुस्यूतप्रत्ययजनिका एकसूत्रस्थानीया सन्तानाऽपरपर्याया वासना, वासनेति पूर्वज्ञानजनितामुत्तरज्ञाने शक्तिमाहुः, स्याद्वादमञ्जरी श्लो. १९.)

अन्यच्च बौद्धमतम्–पूर्वचित्तजनितायाश्चेतनायाः शक्तितो युक्तमन्यचित्तमुत्पद्यते, एतच्चेतनाशक्तिविशिष्टचित्तोत्पादः वासना, एतया वासनया वासक–(पूर्वक्षण) वास्य–(उत्तरक्षण)–योः सम्बन्धो भवति, आलयविज्ञानमपि एतद्वासनाया नामान्तरं, यथा पवनेन सागरे तरङ्गा उत्तिष्ठन्ति, तथा अहंकारयुक्तचेतनायां (आलयविज्ञाने) आलम्बन–समनंतर–सहकारि–अधिपतिप्रत्ययद्वारा, प्रवृत्तिविज्ञानरूपधर्म उत्पद्यते, शब्दादिग्राहक–पूर्वचित्तं 'प्रवृत्तिविज्ञानं' इति कथ्यते, एतत्प्रवृत्तिविज्ञानं शब्द–स्पर्श–रूप–रस–गन्ध–विकल्पविज्ञानस्य भेदेन षोढा शब्दस्पर्शादिग्राहकाणि पंच विज्ञानानि, निर्विकल्पकं (यत्र ज्ञाने विशेषाकाररूप–नानाविध–भिन्नभिन्न–पदार्था भासन्ते) विकल्पज्ञानं सविकल्पं (यत्र ज्ञाने सर्वपदार्थविज्ञानरूपं प्रतिभासते) कथितमस्ति, एतानि ज्ञानानि बौद्धा 'चित्तत्वेन' कथयन्ति, विज्ञानं चित्तमथवा चैतिकं च शेषाणि रूप–वेदना–संज्ञा–संस्कारस्कन्धान् 'चैत'मिति कथयन्ति, प्रवृत्तिविज्ञानेन सह युगपत्–एककाले भावि–अहंकारयुक्तचेतनां 'आलयविज्ञानं' कथयन्ति, एतदालयविज्ञान–पूर्वक्षणजनितचेतनाशक्तिविशिष्टमुत्तरचित्तमुत्पद्यते, एतदालयविज्ञानं 'वासनेति' कथ्यते,

(पूर्वपक्षः) पितृपुत्रादि—व्यवहारोऽयं दृष्टान्ततयोपन्यस्तः स व्यवहर्तृणां वासनानां वैचित्र्यादेव न पुनश्चित्रैकस्वभावाद्वस्तुनः,

(उत्तरपक्षः)=तदसङ्गतमेव, ते हि निरंशैकस्वभावं प्रतिक्षणभङ्गवृत्ति वस्तु प्रतिपन्ना इति. न तदालम्बनोऽयं–निरंशैकवस्तुस्वभावालम्बनप्रवृत्तौ, पितृपुत्रादिव्यवहारो, अयमेकस्मिन्नपि स्थिरानेक–स्वभावसमर्पक–पितृपुत्रादिव्यवहारो न प्रवर्त्तते किन्तु प्रतिनियतव्यवहारार्थिकुशलकल्पित

३५

सङ्केताहितविचित्रवासनापरिपाकतः कल्पितकथावत्, असद्विषय एव प्रवर्त्तते. अर्थाद् यदि निरंशैकस्वभाववच्च क्षणविनश्वरस्वभाववद्वस्तु, अवलम्ब्य पितृपुत्रादिव्यवहारो मन्येत. तदैक-पुरुषरूपव्यक्तिविशेषेऽपि स्थिरानेकस्वभावसमर्पकः पितृपुत्रादिव्यवहारो न प्रवर्तितुं शक्यते, परन्तु नियतव्यवहारार्थिकुशलपुरुषेण कल्पना-कृतसङ्केतैराहित–विचित्रवासनापरिपाकतः कल्पित–कथाव्यवहारवदसद्विषय एव पितृपुत्रादिव्यवहारो भवेत्, अर्थाद्, अविद्यमानविषयकपितृपुत्रादि-व्यवहारवत्त्वेन, स पितृपुत्रादिव्यवहारो युष्माकं मते, असंगतं (असद्) भवेदिति.

वस्तुमहत्त्वं=व्यवहारविषयभूतं वस्तु, केवलं व्यवहारस्यैव मूलबीजं नास्ति, परन्तु वासनाः प्रति मूलकारणं, यदि यस्य व्यवहारो भवति, तद्वस्तुरूपं मूलकारणं न मन्येत च वासना उत्पद्यन्तेऽर्थाद् विना कारणं, आकस्मिक्यो वासना भवन्ति, एव मन्येत तदा वासना–नियमाद् नित्यत्वेन विद्यमाना भविष्यन्ति, अथवा नित्यत्वेनाविद्यमानाः स्थास्यन्ति, इत्या-द्यापत्तिरागमिष्यति, सारांशः=एकान्तेनैकव्यवहारविषयवस्तुतोऽनेकरूपपितृपुत्रादिवासना नोत्पद्यन्ते तदा निरंशैकस्वभावे वस्तुनि पितृपुत्रादिव्यवहारस्यासङ्गतिः स्थिरैव, यदि, एकान्तैकरूपव्यवहार-विषयभूतवस्तुतोऽनेकरूपपितृपुत्रादिवासना उत्पद्यन्ते इति मान्यतायां कृष्णनीलादिवर्णरूपरूपतो रस–स्पर्शादिविषयकविचित्रवासनोत्पत्तिप्रतिपत्तिरूपापत्तिरागमिष्यति, यतः, एकस्वभावादपि परैर-नेकवासनाभ्युपगमः,

(यद्येवं भवेत्तदा चक्षुषाऽपि रसादिज्ञानमुत्पद्येत, सर्वेन्द्रियैः भिन्नैर्भिन्नैः सर्वविषयकज्ञानं सौकर्येण भवेदित्येवं कदाचिन्न भवति.)

**पूर्वपक्षः**=रूपरसादिजातिविभागतो न रूपाद् रसादिवासनाऽऽपत्तिः, यतः, अत्यन्त-भिन्ना रूपजाते रसादिजातिः, कथमिव ततो रसादिवासनाप्रसङ्ग इति,

**उत्तरपक्षः**=तदप्ययुक्तं यतः, रूपत्वेनाभिन्नजातीयात् रूपविशेषनीलाद्, द्रष्टुः पीत-रक्तादिसजातीयवासनोत्पत्तिप्रसङ्ग आयात्येव.

**पूर्वपक्षः**=तस्य नीलादेरतत्स्वभावत्वात्–पीतादिवासनानां सजातीयानामप्यजननस्वभाव-त्वात्, नीलादिवासनाया एव जननस्वभावत्वात्, न च स्वभावः पर्यनुयोगार्हः, 'अग्निर्दहति नाकाशं कोऽत्र पर्यनुज्यते' इति नीलात् पीतादिवासनाजन्मप्रसञ्जनं नैवेति,

**उत्तरपक्षः**=एतदपि परिहारान्तरमसत्–असुन्दरं, वाङ्मात्रमेवेदं इति युक्त्यनुपपत्तेः,

नहि नीलवासनायाः

पीतादिवत्पित्रादिवासनाया न भिन्ना पुत्रादिवासनेति निरूपणीयं, नोपादानभेदोऽप्यत्र परिहार

एकस्यानेकनिमित्तत्वायोगात्, न दर्शनादेवाविरोध इति, अभ्युपगमे विचारोपपत्तेः, न च सोऽप्येवं न विरुध्यत एव, तदेकस्वभावत्वेन विरोधात्, न चैकानेकस्वभावेऽप्ययमिति, तथा दर्शनोपपत्तेरिति, न हि पितृवासनानिमित्तस्वभावत्वमेव पुत्रवासनानिमित्तस्वभावत्वं, नीलपीतादावपि तद्भावापत्तेरिति, परिभावनीयमेतत्, एवं उभयथाऽपि

उपादाननिमित्तभेदेन न सर्वथैकस्वभावादेकतोऽनेकफलोदयः, केषाञ्चिदहेतुकत्वोपपत्तेः,

एकस्यैकत्रोपयोगेनापरत्राभावात्, अनेककार्यकरणैकस्वभावत्वकल्पना तु शब्दान्तरेणैतदभ्युपगमानुपातिन्येव,

पं....तामेव भावयति–"न हि नीलवासनायाः" सकाशात्,

"पीतादिवत्" पीतरक्तादिवासनावत् "पित्रादिवासनायाः" पित्रादिवासनामपेक्ष्य "न भिन्ना" न पृथक् पुत्रादिवासना किन्तु ! भिन्नैवेति, "इति एतन्निरूपणीयं सूक्ष्माभोगेन, यथा नीलादि दृष्टं सन्नीलादिस्ववासनामेव करोति, न भिन्नां पीतादिवासनामपि, तथैकस्वभावं वस्तु पित्रादि वासनामेकामेव कुर्यात्, न तद्व्यतिरिक्तामन्यां पुत्रादिवासनामपीति, पुनराशङ्कापरिहारायाह—"न" नैव "उपादानभेदोऽपि" न केवलं व्यवहरणीयपित्रादिनिमित्तो वासनाभेदः, किन्तु व्यवहारकोपादानकारणविशेषोऽपि वासनाभेदहेतुः "अत्र" एकस्वभावे वस्तुनि अनेकव्यवहारासाङ्कर्त्ये प्रेरिते "परिहारः" उत्तरं, परो हि पुत्रादेर्वासनाभेदनिमित्तत्वे प्रतिहते सति कदाचिदिदमुत्तरमभिदध्यात् यदुत–येयमेकस्मिन्नपि देवदत्तादावनेकेषां तं प्रति पितृपुत्रादिरूपतया व्यवस्थितानां या पुत्रादिवासनाप्रवृत्तिः सा तेषामेव स्वसन्तानगतमनस्कारलक्षणोपादानकारणभेदनिबन्धना, न व्यवह्रियमाणवस्तुस्वभावभेदनिमित्तेति, एतदपि अनुत्तरमेव, कुत इत्याह—

"एकस्य" देवदत्तादेः "अनेकनिमित्तत्वायोगाद्" अनेकेषां–पितृपुत्रादिव्यवहर्तृणां सहकारिभावायोगात्, ते हितमेकं सहकारिणमासाद्य, उपादानभेदेऽपि तथा सर्ववासनावन्तो भवन्ति, न च तस्य तदनुगुणतावत्स्वभावदरिद्रस्यानेकसहकारित्वं युक्तम्, अथ स्यात् 'न हि दृष्टेऽनुपपन्नं नाम' दृश्यते हि एकस्मिन्नविभागवति सहकारिणि स्वोपादानभेदादनेकवासनाप्रवृत्तिः, एतत्परिहारायाह—"न" नैव "दर्शनादेव" प्रत्यक्षज्ञानरूपात् केवलाद्, अविरोधः प्रस्तुतवासनाभेदस्येति, कुत इत्याह—"अभ्युपगमे विचारोपपत्तेः" अभ्युपगमो हि विचारयितुमुपपन्नो न दर्शनं, यद्येवं ततः किमित्याह—"न च" नैव 'सोऽपि अभ्युपगमः, अपिशब्दाद्दर्शनं च, "एवम्" एकस्यानेकसहकारित्वाभ्युपगमे न विरुध्यत एव, किन्तु विरुध्यत एव, कथमित्याह—"तदेकस्वभावत्वेन" व्यवह्रियमाणवस्तुनो निरंशैकस्वभावत्वेन "विरोधात्" निराकरणाद्, अनेकसहकारित्वाभ्युपगमस्य तस्यानेकस्वभावापेक्षित्वात्, अथानेकान्तेऽप्येकान्तपक्षदूषणप्रसङ्गपरिहारायाह—"न च" नैव "एकानेकस्वभावे" अनेकान्तरूपे विरोध एवेत्यपिशब्दार्थः, "अयमिति" व्यवहारविरोध इति, कुत इत्याह—"तथा दर्शनोपपत्तेः' यथा वस्त्वभ्युपगतं तथा दर्शनेन व्यवहारस्योपपत्तेः–घटनात्, तामेवाह—न हि पितृवासनानिमित्तस्वभावत्वमेव, एकानेकस्वभावे वस्तुनि, पुत्रवासनानिमित्तस्वभावत्वं, स्वभाववैचित्र्यदारिद्र्याद् विपक्षे बाधामाह—"नीलपीतादावपि" विषये "तद्भावापत्तेः" नीलवासनानिमित्तस्वभावत्वमेव पीतादिवासनानिमित्तस्वभावत्वमित्यादावापत्तेरिति, "भावनीयं" परिभावनीयमेतत् यदुत—एकमेव वस्तु विचित्रवासनावशेन विचित्रव्यवहारप्रवृत्तिहेतुरिति न भवतीत्यर्थः, अन्यथा तत एव सर्वव्यवहारसिद्धेः किं जगद्वैचित्र्याभ्युपगमेन ? प्रकृतसिद्धिमाह—"एवम्" उक्तनीत्या उभयथापि प्रकारद्वयेनापि तदेवाह—

"उपादाननिमित्तभेदेन" उपादानभेदेन निमित्तभेदेन च 'न' नैव "सर्वथैकस्वभावतः" एकान्तैकस्वभावात्, "एकतः" एकस्माद्धेतोः "अनेकफलोदयः" अनेकस्य–ऐहिकामुष्मिकरूपस्य फलस्य–कार्यस्य प्रसवः, यथा परैः परिकल्प्यते, तेषां हि किल रूपालोकमनस्कारचक्षुर्लक्षणा रूपविज्ञानजननसामग्री, यथोक्तम्—"रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्त्तते। विज्ञानं मणिसूर्यांशुगो(श)सकृद्भ्य इवानलः ॥१॥" इति, अत्र च रूपविज्ञानजनने प्राच्यज्ञानक्षणलक्षणो मनस्कार उपादानहेतुरिति, शेषाश्च रूपादित्रितयक्षणा निमित्तहेतवः, एवं रूपालोकचक्षुषामपि स्वस्वप्राच्यक्षणाः स्वस्वकार्यजनने उपादानहेतवः, शेषं त्रितयं च निमित्तहेतुरिति, एवमेकस्मादेकस्वभावादेकवस्तुनोऽन्येनान्येनोपादानहेतुनाऽन्यैश्चान्यैश्च निमित्तहेतुभिः सहायैरनेककार्योदयः सर्वसामग्रीषु योज्य इति, एतन्निषेधानभ्युपगमे बाधकमाह—"केषामित्यादि" एकतोऽनेकफलोदये "केषाञ्चित्" फलानाम् 'अहेतुकत्वोपपत्तेः निर्हेतुकत्वोपपत्तेः, कथमित्याह—

"एकस्य" हेतुस्वभावस्य एकत्र फले "उपयोगेन" व्यापारेण "अपरत्र" फलान्तरे, अभावात्, उपयोगस्य, आशङ्कान्तरपरिहारायाह—"अनेककार्यकरणैकस्वभावत्वकल्पना तु"

एकोऽपि वस्तुस्वभावोऽनेककार्यकरणस्वभावः, ततो न केषाञ्चिदहेतुकत्वमित्येषा पुनः कल्पना "शब्दान्तरेण" अस्मदभ्युपगमादेकमनेकस्वभावमित्यस्माच्छब्दान्तरेण, एकमनेककार्यकरणस्वभाव-मेवंलक्षणेन "एतदभ्युपगमानुपातिन्येव" एकमनेकस्वभावमित्यस्मन्मतानुसारिण्येव, न ह्येकस्मात् कथञ्चित्स्वभावभेदमन्तरेणानेकफलोदय इति प्राक् चर्चितमेव,

**टी०....**युक्त्यनुपपत्तिभावना—नीलवासनायाः सकाशात्, पीतरक्तादि—वासनावत् पित्रा-दिवासनामपेक्ष्य 'न भिन्ना' न पृथक्, पुत्रादिवासना किन्तु भिन्नैवेति 'इति' एतन्निरूपणीयं सूक्ष्माभोगेन यथा नीलादि दृष्टं सन्नीलादिस्ववासनामेव करोति, न भिन्नां पीतादिवासना-मपि, तथैकस्वभावं वस्तु पित्रादिवासनामेकामेव कुर्यात्, न तद्व्यतिरिक्तामन्यां पुत्रादिवासना-मपीति, पुनराशङ्कापरिहारायाह—

**पूर्वपक्षः**=नैव 'उपादानभेदोऽपि' न केवलं व्यवहरणीयपित्रादिनिमित्तो वासनाभेदः, किन्तु व्यवहारकोपादानकारणविशेषोऽपि वासनाभेदहेतुः 'अत्र' एकस्वभावे वस्तुनि, अनेकव्यवहार-साङ्कर्ये प्रेरिते 'परिहारः'—उत्तरं, परो हि पुत्रादे र्वासनाभेदनिमित्तत्वे प्रतिहते सति कदाचि-दिदमुत्तरमभिदध्यात्—यदुत येयमेकस्मिन्नपि देवदत्तादावनेकेषां तं प्रति पितृपुत्रादिरूपतया व्यवस्थितानां या पुत्रादिवासनाप्रवृत्तिः सा तेषामेव सन्तानगतमनस्कारलक्षणोपादानकारणभेद निबन्धना न व्यवह्रियमाणवस्तुस्वभावभेदनिमित्तेति,

**एतदपि—अनुत्तरमेव.**

**उत्तरपक्षः**=यथा नीलविषयक—वासनया पीतरक्तादिविषयकवासना भिन्ना नेति नापितु, भिन्नैव, तथा पित्रादिवासनया पुत्रादिवासना, सर्वथा भिन्नैवेति सूक्ष्मोपयोगेन निरूपणीयम्, तथा च यथा दृष्टं नीलादिवस्तु, नीलादिस्ववासनामेव करोति, सर्वथा तद्भिन्नां पीतादि-वासनामपि न करोत्येव, तथैकस्वभावं वस्तु, पित्रादिवस्तु, पित्रादिरूपैकवासनां करोति, सर्वथा भिन्नां पुत्रादिवासनां न करोति, तदा पुरुषरूपैकवस्तुतो विचित्रवासनानामभावे सति पुरुषे पित्रादिव्यवहारस्यासंभवः स्यादतो, वयं ब्रूमो युष्मन्मते पित्रादिव्यवहारो यः सकल-लोकसिद्धोऽस्ति, स युक्त्या न घटते.

**पूर्वपक्षः**=वासनाभेदं प्रति व्यवहारविषयपित्रादिः केवलं निमित्तं नास्ति परन्तु वासनाभेदं प्रति व्यवहारकर्तृहारमरूपोपादानकारणविशेषो हेतुरस्ति, अर्थात्, एकस्वभाववति वस्तुनि, अनेकव्यवहारस्याऽसङ्गतिरूपदोषस्य परिहारो भवति तथाहि—वासनाभेदं प्रति पुत्रादे निमित्तत्वे खण्डिते सति परो वादी—एतदुत्तरं दद्याद् यद्, एकव्यक्तिरूपदेवदत्तं विषयीकृत्य

तद्देवदत्तं प्रति पितृपुत्रादित्वेन व्यवस्थितानामनेकेषां या एषा पुत्रादिवासना प्रवृत्तिरस्ति, सा पुत्रादिवासनां प्रति तेषामनेकेषां स्वसन्तानगतमनस्काररूपोपादानकारणभेदमूलकारणवती, अस्ति, परंतु व्यवहारविषयवस्तुस्वभावभेदनिमित्तजन्या नेति. (अत्र मनस्कारोऽर्थात्पूर्वज्ञानक्षणरूपो ज्ञेयः)

**उत्तरपक्षः**=एतदपि—अनुत्तरमेव, यथार्थोत्तराभाववत्त्वात्, यतः एकव्यक्तिरूपदेवदत्ते पितृपुत्रादिरूपव्यवहारकारकाणां (पित्रादित्वेन भाषकाणां) अनेकेषां निमित्तस्य—सहकारिभावस्याभावो वर्त्तते, (स्वभिन्नत्वे सति स्वकार्यकारित्वम्, सहकारित्वम्, यथा दण्डस्य मृत्तिकाकार्यघटकारित्वम्) व्यवहारकारका अनेके ते, एकसहकारिरूपपुरुषविशेषं देवदत्तमासाद्य, उपादानभेदे सत्यपि तथा सर्ववासनावन्तो भवन्ति, (पित्रादिसर्ववासनावन्तो) तदेतत्कथनमयुक्तं यतः, सहकारिविशेष—एक—व्यक्तौ अनेकव्यवहारकारकाः पुत्रादेरनुकूलयोग्या (अनुरूप—प्रयोजक यावत्योवासना अथवा यावन्तो व्यवहारकर्त्तारःस्युः तावतां तावतीनां वा स्वभावस्य शून्यत्वेनानेकेषां सहकारित्वं न घटत इति.

**पूर्वपक्षः**=प्रत्यक्षतो दृश्यते, एकस्मिन्नविभागवति (निरंशे—निरन्वये) देवदत्ते सहकारिणि स्वोपादानभेदादनेक (पुत्रादि) वासनाप्रवृत्तिः प्रत्यक्षतो दृश्यतेऽत एकस्मिन्ननेकेषां सहकारित्वं सिद्धं कथं न ?

**उत्तरपक्षः**=व्यवहारघटनायाः क्रम एतादृशोऽस्ति यत्, येन प्रकारेण वस्तुनोऽभ्युपगमो (निश्चयविशेषो वा प्रतिपत्तिः) भवति, तेन प्रकारेण वस्तुनो दर्शनं—प्रत्यक्षज्ञानं भवेत्तदा तथादर्शनेनैव व्यवहारस्य घटना समीचीना भवति,

प्रस्तुतवासनाभेदं प्रति प्रत्यक्षज्ञानरूपदर्शनस्य विरोधोऽस्ति यतोऽभ्युपगमे विचारस्य योजनाऽस्ति, विचारयितुमभ्युपगम एव युक्त उपयुक्तोऽस्ति.

दर्शनं न, यतःसोऽपि, अभ्युपगमोऽपि—अपि शब्दाद् दर्शनं च एवम्—एकस्यानेकसहकारित्वाऽभ्युपगमे न विरुध्यते इति नापितु विरुध्यत एवार्थात्—एकस्मिन्नेकसहकारितायाः प्रतिपत्ति प्रति अभ्युपगमश्च दर्शनं च विरोधिनौ, कथमित्याह—'तदेकस्वभावत्वेन' व्यवह्रियमाणवस्तुनो निरंशैकस्वभावत्वेन 'विरोधात्' निराकरणात्, अनेकसहकारित्वाभ्युपगमस्य तस्यानेकस्वभावाऽपेक्षित्वात्, अथानेकान्तेऽप्येकान्तपक्षदूषणप्रसङ्गपरिहारायाह—नैव 'एकानेकस्वभावे' अनेकान्तरूपे विरोध एवेत्यपिशब्दार्थः 'अयमिति' कुत इत्याह—'तथादर्शनोपपत्तेः' यथा वस्त्वभ्युपगतं तथादर्शनेन व्यवहारस्योपपत्तेः घटनात्, उपपत्तिः—नियमः=एकानेकस्वभावे वस्तुनि

पितृवासनानिमित्तस्वभावताऽस्ति, सैव पुत्रवासनानिमित्तस्वभावता नास्ति, पितृवासनानिमित्त स्वभावताभिन्नाऽस्ति, च पुत्रवासनानिमित्तस्वभावता भिन्नाऽस्ति, यदि स्वभावभेदस्य सर्वथाऽस्वीकारेण पितृवासनानिमित्तस्वभावतैव वस्तुनि पुत्रवासनानिमित्तस्वभावतारूपैव, अर्थात् सर्वथा वासनानिमित्तस्वभावताया एकरूपत्वे नीलरूपवस्तुनिस्थित–नीलवासनानिमित्त–स्वभावतैव पीतादिवासनानिमित्तस्वभावतारूपा भविष्यति, एषाऽऽपत्तिरनिष्टापत्ति र्युष्माकम् ।

भावनीयमेतद् यदुत 'एकमेव वस्तु विचित्रवासनावशेन विचित्रव्यवहारहेतुरिति न भवतीत्यर्थः, अन्यथा–विचित्रवासनाऽधीनेनैकवस्तुनैव विचित्रव्यवहारस्य प्रवृत्तिस्वीकारे तत एव–एकवस्तुत एव सर्वव्यवहार–सिद्धेः, किं जगद्–वैचित्र्याऽभ्युपगमेन ? प्रकृतसिद्धिमाह–'एवं' उक्तनीत्या, उभयथापि–प्रकारद्वयेनाऽपि तदेवाह–

**पूर्वपक्षः**=उपादानकारणभेदेन च निमित्तकारणभेदेन सर्वथैकस्वभावेनैकवस्तुहेतुतः, अनेककार्योत्पत्तिस्वीकारे न कश्चिद्बाधः, यतः, अस्मन्मतः कारणविभागक्रम ईदृशोऽस्ति तथाहि (१) रूपविषयकज्ञानजनकसामग्री, एवं रूपाऽस्ति, अ–रूपं, आ–आलोकः–प्रकाशः इ–मनस्कारः (कृ+घञ् मनसःकारो व्यापारभेदः–मनसः सुखतत्परतेत्यर्थो न ग्राह्यः परन्तु परिभाषितपूर्वक्षणरूपवासना, मनस्कारोऽर्थो ग्राह्यः )

ई–चक्षुरिन्द्रियमिति चत्वारि रूपविषयकज्ञाने कारणानि तेषु (१) पूर्वज्ञानक्षणरूपमनस्कार एष रूपविज्ञानजनने उपादानकारणं च शेषरूपादीनि त्रीणि निमित्तकारणानि तथैव रूपालोकचक्षुषां अपि स्वस्वपूर्वक्षणाः स्वस्वकार्यजनने, उपादानकारणमपि शेषमयं निमित्तकारणं एवं एकस्वभाववदेकवस्तुना, भिन्नभिन्नोपादानहेतुभिश्च, भिन्नभिन्नसहकारि–कारणरूपनिमित्तकारणानां साहाय्येनानेककार्योदयः (उत्पत्तिः) सर्वसामग्रीषु योज्य इति वास्तविकमस्ति यस्मादेकस्वभावैकवस्तुना, अनेकविचित्रव्यवहारोत्पत्तिः समीचीना घटते, अतो भवद्दत्तापत्तिरस्माकं न लगिष्यति.

**उत्तरपक्षः**=उपादानभेदेन च निमित्तभेदेन सर्वथा (एकान्तेन) एकस्वभावेनैकवस्तुनैहिक पारलौकिकानेक–फलोत्पत्ति र्न भवत्येवेति नियमोऽस्ति, यदि नियममेनं न स्वीकुर्यादर्थादेकवस्तुतोऽनेककार्योत्पत्तिप्रतिपत्तौ तदा विना कारणं कार्याणि भवेयुराकस्मिककार्योत्पत्त्यापत्तिरागमिष्यति, सारांश एवंविधोऽस्ति, एकं मुख्यं कार्यं विना, सर्वाणि कार्याणि कारणं विना (अकस्मात्) भविष्यन्ति, यत एकहेतुस्वभावस्य एक–फलकार्ये एवोपयोग एव भवति ततोऽन्यकार्ये उपयोग–व्यापारस्याभावोऽस्ति.

पूर्वपक्षः=अस्मदीयैतादृशी मान्यताऽस्ति, यत्, एकोऽप्येतादृशो वस्तुस्वभावोऽस्ति, अनेक कार्यकरणस्वभाववानस्ति. एतादृशी–विशिष्टकल्पनया कानिचित् कार्याणि कारणरहितानि भविष्यन्ति, ईदृशी, आपत्ति र्नास्माकमागमिष्यति. यत एकवस्तुस्वभाव एवैतादृशोऽस्ति यदनेक–कार्य–करणे उपयोगो–व्यापार–कर्त्ता, भवत्येवेति.

उत्तरपक्षः=एषा मान्यता तु अस्मन्मतानुसारिण्येव न कश्चिद् भेदो दृश्यते, यथाहि=

(१) अस्मदीया मान्यता–जैनमतमस्ति.

'एकमनेकस्वभावं' (एकं वस्तु, नानास्वभावावच्छिन्नं)

(२) युष्मदीयमान्यता 'एकोपिवस्तुस्वभावोपिनेककार्यकरणस्वभावः' ततो न केषाञ्चिद्-हेतुकत्वमित्येषा कल्पना 'शब्दान्तरेण' अस्मदभ्युपगमादेकमनेकस्वभावमित्यस्माच्छब्दान्तरेण 'एकमनेककार्यकरणस्भावमेवंलक्षणेन "एतदभ्युपगमानुपातिन्येव" एकमनेकस्वभावमित्यस्मन्मतानुसारिण्येव, नह्यकस्मात्कथञ्चित् स्वभावभेदमन्तरेणानेकफलोदय इति प्राक् चर्चितमेव.

**निरूपितमेतदन्यत्र, 'यतःस्वभावतो जातमेकं नान्यत्ततो भवेत् ।**
**कृत्स्नं प्रतीत्य तं भूतिभावत्वात्तत्स्वरूपवत् ॥ १ ॥**
**अन्यच्चैवंविधं चेति, यदि स्यात्किं विरुध्यते ? ।**
**तत्स्वभावस्य कात्स्न्येन, हेतुत्वं प्रथमं प्रति' ॥२॥**

(निरूपितम् 'एतद्' अनन्तरोक्तं 'अन्यत्र' अनेकान्तजयपताकायां यथानिरूपितं तथैवाह–'यस्मात्' वस्तुगतरूपरसादिरूपादुपादानादुत्पन्नं एकं कार्यं वस्त्ररागादि, 'नान्यत्' द्वितीयं स्वग्राहकप्रत्यक्षादिकं सहकारिभावेन 'ततो' वस्तुस्वभावात् 'भवेत्' जायेत, हेतुमाह–समस्तमाश्रित्य वस्तुस्वभावं भवनस्वभावत्वात्, आद्यस्यैव कार्यस्य दृष्टान्तमाह–तत्स्वरूपवत् यथास्वभावस्य हेतुभूतस्याधिकृतैककार्यगतस्वभावस्य वा स्वरूपं स्वभावकात्स्न्यार्श्रयेणैव भवति, तथा कथमपि कार्यमिति पराभिप्रायमाशंक्याह–'अन्यच्च' द्वितीयं च कार्यमिति गम्यते, 'एवंविधं' तद्धेतुजन्यं च 'इति' एतद् 'यदिस्याद्' यदि भवेत् किं विरुध्यते ? न किञ्चित्, तदपि भवत्विति भावः, अत्रोत्तरं 'तत्स्वभावस्य' वस्तुगतरूपरसादिरूपस्य 'कात्स्न्येन' सर्वात्मना 'हेतुत्वं' निमित्तत्वं 'प्रथमं प्रति' आदिकार्यमाश्रित्य विरुध्यते, इदमुक्तं भवति–सर्वात्मनोपयुक्तत्वादाद्यकार्ये एव कुतस्ततः कार्यान्तरसम्भवः, तत्सम्भवे च न प्रथमकार्ये तस्य कात्स्न्येंपि योगः, इति बलादनेकरूपवस्तुसिद्धिरिति.)

## इत्यादिना ग्रन्थेनेति नेह प्रतन्यते ।

## तदेवं निरुपचरितयथोदितसम्पत्सिद्धौ सर्वसिद्धिरिति व्याख्यातं प्रणिपातदण्डकसूत्रम् ॥

पं० निरूपितम् "एतद्" अनन्तरोक्तम् "अन्यत्र" अनेकान्तजयपताकायां, यथा निरूपितं तथैवाह–"यत इत्यादिश्लोकद्वयं" यतो–यस्मात् "स्वभावतो" वस्तुगतरूपरसादिरूपादुपादानभूतात् "जातम्" उत्पन्नं "एकं" कार्यं वस्त्ररागादि, "नान्यत्" द्वितीयं स्वग्राहकप्रत्यक्षादिकं सहकारिभावेन "ततो" वस्तुस्वभावात् "भवेत्" जायेत, हेतुमाह,–

"कृत्स्नं" समस्तं "प्रतीत्य" आश्रित्य "तं" वस्तुस्वभावं "भूतिभावत्वाद्" भवनस्वभावत्वाद्, आद्यस्यैव कार्यस्य दृष्टान्तमाह–"तत्स्वरूपवद्" यथा स्वभावस्य हेतुभूतस्याधिकृतैककार्यगतस्वभावस्य वा स्वरूपं स्वभावकात्स्न्यश्रियेणैव भवति, तथा प्रथममपि कार्यमिति पराभिप्रायमाशङ्कयाह–"अन्यच्च" द्वितीयं च कार्यमिति गम्यते, "एवंविधं च" तद्धेतुजन्यं च "इति" एतद् "यदि स्याद्" यदि भवेत् किं विरुध्यते ?, न किञ्चित्. तदपि भवत्विति भावः, अत्रोत्तरं–"तत्स्वभावस्य" वस्तुगतरूपरसादिरूपस्य "कात्स्न्येन" सर्वात्मना "हेतुत्वं" निमित्तत्वं प्रथमं प्रति" आदिकार्यमाश्रित्य विरुध्यते, इदमुक्तं भवति–सर्वात्मनोपयुक्तत्वादाद्यकार्य एव कुतस्ततः कार्यान्तरसम्भवः, तत्सम्भवे च न प्रथमकार्ये तस्य कात्स्न्योपयोगः, इति बलादनेकरूपवस्तुसिद्धिरिति, आदिशब्दादन्यकारिकाग्रन्थो दृश्यः,

### टी०....अनेकान्तजयपताकायां निरूपितं तस्य निरूपणम्–

अर्थात्–यस्मादुपादानभूत–वस्तुगतरूपरसादिरूपस्वभावादेक–वस्त्ररागादिरूपकार्यं जातं तस्माद् वस्तुस्वभावात् (एकस्वभावत्वात्) सहकारिभावेन सहकारित्वेन स्वग्राहकप्रत्यक्षादिरूपं–(रूपरसादिग्राहकप्रत्यक्षादिरूप) द्वितीयं कार्यं नोत्पद्येत यतः, समस्तवस्तुस्वभावमाश्रित्य (संव्याप्यालम्ब्य निमित्तीकृत्य) जननस्वभावोऽस्ति, हेतुभूतवस्तुगतरूपरसादिरूपस्वभावस्याथवाऽधिकृत (वस्त्ररागादि) एककार्यगतस्वभावस्य स्वरूपं, यथा सामस्त्येन हेतुभूतस्वभावं वा कार्यगतस्वभावमाश्रित्य–निमित्तीकृत्य–अपेक्ष्योत्पद्यते, तादृश्या रीत्या प्रथमं वस्त्ररागादिरूपं कार्यं सामग्र्येण (समग्रत्वेन) हेतुभूतवस्तुगतरूपरसादिरूपस्वभावमपेक्ष्योत्पद्यते,

**पूर्वपक्षः**–यथा स्वहेतुतो वस्तुगतरूपरसादिरूपस्वभावतः प्रथमं कार्यं वस्त्ररागादि जायते तथा तस्मादेव वस्तुगतरूपरसादिस्वभावभूतस्वहेतुत एव द्वितीयकार्यस्य (स्वग्राहकप्रत्यक्षादिकस्य) को विरोधः ? ततो द्वितीयं कार्यं भवतु.

३६

उत्तरपक्ष:—यदि यत्स्वभावात् प्रथमं कार्यमुत्पद्यते, तत्स्वभावाद् द्वितीयं कार्यमुत्पद्येत तदा वस्त्ररागादिरूपं प्रथमकार्यं प्रति सामस्त्येन (सर्वात्मना) वस्तुगतरूपरसादिरूपस्वभावस्य हेतु विरुद्धो भवति—प्रतिबन्धको भवति. अर्थात् प्रथमकार्य—एव—वस्त्ररागादिकार्य एव सर्वात्मना हेतुरूपस्वभाव उपयोगी (व्यापारवान्) भवत्यतस्तेन हेतुना कथं द्वितीयं कार्यं सम्भवेत्? यदि तेन हेतुना द्वितीयं कार्यमुत्पद्यते इति मान्यतायां तु प्रथमकार्यरूपवस्त्ररागादौ एव तत्स्वभावरूपहेतोः सर्वात्मनोपयोग—व्यापारस्यासम्भवो भवेत्, इति बलादनेकरूपसिद्धिरिति.।

तस्माद् विवेचनपूर्वकं सूक्ष्मेक्षिकया चर्चापूर्वकं निरुपचरित—(सत्य—प्रधान—पवित्र) पूर्वकथितसम्पदां सिद्धौ सर्वैरिति व्याख्यातं प्रणिपातदण्डकसूत्रं (व्याख्यावृत्तिसहितं नमोत्थुणं सूत्रं समाप्तं) समाप्तमिति ॥

**तदेतदसौ साधुः श्रावको वा यथोदितं पठन् पञ्चाङ्गप्रणिपातं करोति, भूयश्च पादपुञ्छनादिनिषण्णो यथाभावं स्थानवर्णार्थालम्बनगतचित्तः सर्वसाराणि यथाभूतान्यसाधारणगुणसङ्गतानि भगवतां दुष्टालङ्कारविरहेण प्रकृष्टशब्दानि भाववृद्धयेऽपरयोगव्याघातवर्जनेन परिशुद्धामापादयन्योगवृद्धिमन्येषां सन्निधानतः सर्वज्ञप्रणीतप्रवचनोन्नतिकराणि भावसारं परिशुद्धगम्भीरेण ध्वनिना सुनिभृताङ्गः सम्यगनभिभवन् गुरुध्वनिं, तत्प्रवेशात्, अगणयन् दंशमशकादीन् देहे योगमुद्रया रागादिविषपरममन्त्ररूपाणि महास्तोत्राणि पठति, एतानि च तुल्यान्येव प्रायशः, अन्यथा योगव्याघातः, तदज्ञस्य तदपरश्रवणं, एवमेव शुभचित्तलाभः,**

**तद्व्याघातोऽन्यथेति योगाचार्याः, योगसिद्धिरेव, अत्र ज्ञापकं, द्विविधमुक्तं—शब्दोक्तमर्थोक्तं च, तदेतदर्थोक्तं वर्त्तते, शुभचित्तलाभार्थत्वाद्वन्दनाया इति, एवं च सति तन्न किञ्चिद् यदुच्यते परैरुपहासबुद्ध्या प्रस्तुतस्यासारतापादनाय, तद्यथा—**

"अलमनेन क्षपणकवन्दनाकोलाहलकल्पेन अभावितामिधानेन," उक्तवद्भाविताभिधानायोगात्, स्थानादिगर्भतया भावसारत्वात्, तदपरस्याऽऽगमबाह्यत्वात्, पुरुषप्रवृत्त्या तु तद्बाधाऽयोगात्, अन्यथाऽतिप्रसङ्गादिति न किञ्चिदेव। एवंभूतैः स्तोत्रैर्वक्ष्यमाण-प्रतिज्ञोचितं चेतोभावमापाद्य पञ्चाङ्गप्रणिपातपूर्वकं प्रमोदवृद्धि-जनकानभिवन्द्याचार्यादीन् गृहीतभावः सहृदयनटवत्, अधिकृत-भूमिकासम्पादनार्थं चेष्टते वन्दनासम्पादनाय ॥

(इति प्रणिपातसूत्रव्याख्या)॥

पं०..." यथेत्यादि " यथाभावं-यथायोग्यं " स्थानवर्णार्थालम्बनगतचितः " स्थानं-योगमुद्रादि, वर्णाः-चैत्यवन्दनसूत्रगताः, अर्थः-तस्यैवाभिधेयम्, आलम्बनं-जिनप्रतिमादि, तेषु गतम्-आरूढं चित्तं यस्य स तथा, यो हि यत्स्थानवर्णार्थालम्बनेषु मध्ये मनसाऽवलम्बितुं समर्थः तद्गतचित्तः सन्नित्यर्थः ॥

" द्विविधेत्यादि " द्विविधं-द्विप्रकारमुक्तं प्रवचनार्थदेशः, तदेव व्यनक्ति-" शब्दोक्तं " सूत्रादिष्टमेव " अर्थोक्तं " सूत्रार्थयुक्तिसामर्थ्यगतं ॥

॥ इति श्रीमुनिचन्द्रसूरिविरचितललितविस्तरापञ्जिकायां प्रणिपातदण्डकः समाप्तः ॥

टी०....तदेतत् प्रणिपातदण्डकसूत्रं ( नमोत्थुणं सूत्रं ) एष साधुः श्रावको वा यथोदितं ( यथाकथितं तथा ) पठन्-भणन् पञ्चाङ्गप्रणिपातं ( हस्तद्वयजानुद्वयमस्तकरूपपञ्चाङ्ग-भूमिस्पर्शनपूर्वकप्रणामं )

अर्थात् पञ्चाङ्गीमुद्रया प्रणिपातं (इह प्रतिपातशब्देन 'क्षमाश्रमणमुच्यते' इति श्री दे. चैत्य श्रीधर्म. संघाचारविधौ पृ. २४३ ) करोति.

भूयश्च (पुनश्च) पादपुञ्छनादि-(आसनविशेषादि) आसनादि-निषण्णः (उपविष्टः) साधुःश्रावको वा यथाभावं (परमकुशलाशयपूर्वकं)

**स्थानवर्णार्थालम्बनगतचित्तः =**

(१) स्थानयोगदत्तचित्तः=योगमुद्रादिमुद्राचतुष्टये प्रणिहितचित्तो भवेत्.

(२) वर्णयोगदत्तचित्तः=वर्णयोगे (सूत्रयोगे) अर्थात् सूत्रगतान्यक्षराणि, अत्यन्तस्पष्ट-

शुद्धानि स्वरव्यञ्जनभेदज्ञापकानि सुज्ञेयपदच्छेदसम्पदादीनि समुचितध्वनिपूर्वकाणि सोपयोगं वाच्यानि भवन्ति.

(३) अर्थयोगदत्तचित्तः=स्तोत्रसूत्रोच्चारसमये यथाज्ञानं शक्रस्तवादिस्तोत्रविषयकार्थ-विचाररूपोपयोगे दत्तचित्तेन भाव्यम्.

(४) आलम्बनयोगदत्तचित्तः=चैत्यवंदनसूत्रविषयकार्थे विचार्यमाणे भावाऽर्हदादिस्मरणं कर्त्तव्यं तथा यस्याग्रतो वंदनमारब्धं तत्प्रतिमाद्यपि स्मृतावेव रक्ष्यम्, अर्थादालम्बनभूतभावाऽर्हदादिस्थापनाऽर्हदादिविषये सोपयोगःसन्नालम्बनयोग एकाग्रमना भाव्यः,

**शङ्काः**=स्थाने, वर्णे, अर्थे, आलम्बने सर्वत्र युगपदनेकोपयोगाः कथं घटन्ताम्? यत एकसमयाऽवच्छेदेन केवलिन्यपि युगपदुपयोगद्वयं नास्त्येव.

**समाधानम्**:=मनसः शीघ्रगतिमत्त्वेन वर्णतोऽर्थे, अर्थत आलम्बने इत्यादिरीत्या भिन्नभिन्नसमयाऽवच्छेदेन, भिन्नभिन्नोपयोगस्य विद्यमानत्वेऽपि यथा ज्वलदुल्मुकस्य वृत्तचक्रवद् भ्रमणतो ज्वालाभेदो न दृश्यते तथोपयोगभेदो न ज्ञायते, अतस्तद्रीत्या स्थानादिषु चतुर्षूपयोगो रक्षणीयः. चतुष्टयभिन्नस्थाने नोपयोगो रक्षणीयः.

### किञ्च—महास्तोत्राणि कीदृशानि, पठति तानि कथ्यन्ते—

सर्वसाराणि 'महास्तोत्राणि' अर्थात् सर्वस्तोत्रेभ्यो, अतिशायीनि तथा सत्यार्थगुणसभराणि स्तोत्राणि साधु वा श्रावकःपठेत्, यतःस्तोत्रैः सत्सत्यगुणानां संकीर्तनेन मोक्षाभिलाषःप्रादुर्भवति तथा समरसःप्राप्यते, अन्यथाऽसद्भूत—गुणानां कीर्तनं भयङ्करभववर्धकं भवति.

पुनःकीदृशानि? भगवतां यथाभूतान्यसाधारणगुणसङ्गतानि=भगवन्निष्ठसत्यासाधारणगुणैः (अबाध्यसिद्धान्तानंतज्ञानवीतरागतादिगुणैः) सह सङ्गतिमन्ति—सम्बन्धावच्छिन्नानि, स्तोत्राणि साधुःश्रावको वा पठेत्, यतः, स्तोतव्याऽर्हद्भगवन्निष्ठासाधारणगुणानां संकीर्तनं शुभाशयकारणं।

"नात्यद्भुतं भुवनभूषणभूतनाथ! भूतैर्गुणैः भुवि भवन्तमभिष्टुवन्तः।
तुल्या भवन्ति भवतो ननु तेन किं वा, भूत्याश्रितं य इह नात्मसमं करोति॥"

### पुनःकीदृशानि तानि स्तोत्राणि?

दुष्टालङ्कारविरहेण प्रकृष्टशब्दानि। साहित्यशास्त्रप्रसिद्धशब्दालङ्कारार्थालङ्कारानपेक्ष्य दोषवतोऽलङ्कारान् विरहय्य प्रकृष्टाः—प्रकर्षवन्तः शब्दा येषु तानि प्रकृष्टशब्दानि महास्तोत्राणि, पठति साधुः श्रावको वा कीदृशः सन् स्तोत्राणि पठति?

अत एव 'भाववृद्धयेऽपरयोगव्याघातवर्जनेन परिशुद्धामापादयन् योगवृद्धिम्' शुभाशय-रूपभावस्य वृद्धयेऽपरो यो योगः ( स्तोत्रपाठभिन्नमोक्षोपायभूतयोगः ) तस्मिन् यो व्याघातः ( विघ्नोऽन्तरायः ) तस्य वर्जनेन ( अपरयोगव्याघातं वर्जयित्वा ) योगवृद्धि–स्थानादियोगे परिशुद्धां वृद्धिमापादयन्–कुर्वन् साधु वा श्रावकःस्तोत्राणि पठति.

पुनःकीदृशस्तोत्राणि ?–अन्येषां सद्विधानतः सर्वज्ञप्रणीतप्रवचनोन्नतिकराणि भावसारं= अन्येषां–जैनेभ्योऽन्येषामितरेषा,स्तोत्रविषयकसद्विधानतः,अपूर्वमनोहररचनातः–चमत्कारिसरसतया निर्माणतःसर्वज्ञप्रणीतजैनशासनोदयकराणि महास्तोत्राणि पठति।

कीदृशः सन् पठति ?–भावसारं परिशुद्धगम्भीरेण ध्वनिना सुनिभृताङ्गःसम्यगनभिभवन् गुरुध्वनि तत्प्रवेशात्=अर्थाद् भावस्य प्रधानतापूर्वकं सङ्गीतशास्त्रप्रसिद्ध तालरागयो नियमपूर्वकं पद्धतिप्रमाणेन गुरुध्वनेस्तिरस्काराभावसहितं वादित्रध्वनौ गाथकध्वनेःप्रवेशादेकीभवनरूपलयादि भवेद् यथा तथा निश्चल–नम्रशरीरः सन्, साधु वा श्रावको महास्तोत्राणि पठति ।

किं स्वरूपःसन् पठति ? अगणयन् दंशमशकादीन् देहे=भगवतःप्रति चित्तैकाग्र्येण देहे दशतां दंशमशकादीनामुपसर्गमगणयन् साधु वा श्रावको महास्तोत्राणि पठति।

कया मुद्रया पठति?–योगमुद्रया रागादिविषपरममन्त्ररूपाणि महास्तोत्राणि पठति=नमोत्थुणं स्तोत्रपाठः ( तथाऽन्यस्तवपाठः ) उपविश्य पठनीयत्वेन योगमुद्रया पठ्यते ( अङ्गुलीनां परस्परमन्तरितकरणेन कमलनालाकारेण योजितहस्तद्वयस्य कफोणिद्वयं उदरे संस्थाप्य योग-मुद्रा भवति, एतादृश्या योगमुद्रया रागद्वेषमोहादिविषनिवारणाय परममन्त्ररूपाणि महास्तोत्राणि साधु वा श्रावकःपठति. )

(जावंति चे. च जावंत केवि साहु पठनानन्तरं भण्यमानानि स्तोत्राणि स्तवनानि.) पठति.

**एतानि च तुल्यान्येव प्रायशः=**

एतानि महास्तोत्राणि शक्रस्तवस्य तुल्यानि ( प्रभुगुणसदर्थमयत्वेन ) अथवा उपसर्ग-हरस्तोत्रतुल्यानि एव प्रायो ज्ञेयानि.

यदि–एतानि महास्तोत्राणि शक्रस्तवतुल्यानि न मन्यन्ते तदा शुभभावरूपयोगस्य व्याघातो–विशेषतो हननं भवति. अतो महास्तोत्राणि शक्रस्तव (उपसर्गहरस्तोत्र) तुल्यानि मन्तव्यानि, महास्तोत्राणि ये न जानन्ति (पदपदार्थरूपेण) तेषां पठ्यमानमहास्तोत्रसमये परद्वारा पठ्यमानस्तोत्रभिन्नापरस्तोत्रस्य श्रवणं कार्यम्, अतःस्तोत्रश्रवणेन योगपूर्त्तिःस्यात्. एवमेव–स्वयं महास्तोत्रपठनेन परद्वारा तत्तुल्यान्यस्तोत्रश्रवणेन च शुभस्य चित्तस्य लाभो भवति.

यदि शुभचित्तलाभरूपफलजनकत्वेन सर्वाणि महास्तोत्राणि तुल्यानि सन्तीति मान्यताया अभावे शुभचित्तलाभरूपफलयोग–( अप्राप्तप्रापणरूपयोग– ) स्य व्याघातः–अभावो भवति. इति योगाचार्या वदन्ति.

अत्र ज्ञापकं ( प्रमाणं ) वन्दनयोगजन्यशुभचित्तलाभरूपफलयोगस्य सिद्धिरेवाऽस्ति महास्तोत्रस्य स्वयं पठनेन वाऽन्येषां पार्श्वे तत्तुल्यान्यस्तोत्रेण स्योगय सिद्धि र्भवति, तदेव ज्ञापकरूपप्रमाणम् ( प्रमाणमन्तःकरणप्रवृत्तय इति सूक्तेः )

एतद्वस्तुनःप्रवचनसिद्धत्वेन कथ्यते=ज्ञापकं वा जिनवचनं (द्विप्रकारमुक्तं प्रवचनार्थदेशः, तदेव व्यनक्ति–" शब्दोक्तं " सूत्रादिष्टमेव अर्थोक्तं, सूत्रार्थयुक्तिसामर्थ्यागतम् ) द्विविधमुक्तमस्ति–(१) शब्दोक्तं (२) अर्थोक्तं च सूत्रे–अक्षरश उक्तं शब्दोक्तं शब्दोल्लेखि शब्दोक्तत्वाभाववद् यत् सूत्रार्थयुक्तिसामर्थ्यागतं यथा यदुच्चार्यमाणमहास्तोत्रपदपदार्थस्याज्ञेन तत्समानान्यस्तोत्रश्रवणं, तदेतदर्थोक्तं वर्त्तते, अर्थतःशब्दोल्लेखाभावेऽपि तच्छ्रवणे चैत्यवन्दनायाः शुभचित्तलाभरूपार्थो विद्यमानोऽस्ति, एतद् वस्तु, अर्थात्, शास्त्रकथितं गण्यते एवं च सति परैरुपहासबुद्ध्या प्रस्तुतस्य–चैत्यवन्दनस्यासारता (साररहितता) आपादनाय–(आपत्तिदानाय ) यदुच्यते तन्न किञ्चिद्, तद्यथा–तथाहि "अलमनेन क्षपणकवन्दनाकोलाहलकल्पेन अभाविताऽभिधानेन'' क्षपणकानां–मुनीनां (अर्थान्मुनिआदि–चतुर्विधसंहितानां) वर्त्तमान–चैत्यवन्दनाद्वाराजनितकोलाहलसदृशेन–एतादृक् सहोच्चाररूपाडम्बरतुल्येन, अनेन–चैत्यवन्दनेनालं–(कृतं सृतं) इति तन्न किञ्चित्–उक्तवदभाविताऽभिधानायोगात्,

अर्थात्–यतःपूर्वकथितकथनवत्, अभावितं–भावरहितं तस्याभिधानस्य–कथनस्यायोगः–अभावो वर्त्तते,

कथमिति चेत्–स्थानवर्णादियोगचतुष्टयगर्भितत्वेन भावसारत्वं–भावप्रधानत्वं तत्र वर्त्तते, भावितानुष्ठानं वर्त्तते.

तस्मात्, अपरस्य–अभावितानुष्ठानस्य शास्त्रबाह्यत्वं कथ्यते,स्वतन्त्र–स्वच्छन्दिपुरुषप्रवृत्त्या–शास्त्रनिरपेक्षस्वच्छन्द–कपोलकल्पितप्रवृत्त्या, भावितानुष्ठाने बाधस्याभावो वर्त्तते–अबाधितत्वं ज्ञेयं,

अन्यथा (अभावितस्य सारत्वमान्यतायां) शुभानुष्ठानमात्रेऽसारताया अतिप्रसङ्ग आयाति, अत एव परोक्तं, आक्षिप्तं न किञ्चिदेवेति.

## इति प्रणिपातसूत्र–व्याख्या

॥ प्रथम विभागः समाप्त ॥

## -प्रशस्तिः-

( आर्याच्छन्दः )

सुधर्मस्वामिपट्टे, त्रिसप्ततितमेऽथ भास्वरभास्करः ।
श्रीमान् पञ्जाबदेश-धर्मोद्धारधुरंधर-वरः ॥ १ ॥

तपागच्छाधीश्वरो, वित्तो विजयानन्दसूरीश्वरः ।
वादि-विजेता वादे, ग्रन्थालेखन-सिद्धहस्तः ॥ २ ॥

तत्पट्टाम्बर-सूर्यः, इडरतीर्थोद्धारकनृपबोधकः ।
श्रीकमलसूरीश्वरः, कमलनिर्लेपो जयति जगति ॥३॥

तत्पट्टप्रद्योती, व्याख्यानवाचस्पति-सुविख्यातः ।
कटोसणनृपबोधकः, कविकुलकिरीटः शास्त्रज्ञः ॥४॥

भूरि-सूरि-करि-सिंहो लब्धीनामब्धि र्लब्धिसूरिपः ।
प्रत्युत्पन्नमतिधरो, जयतु शिष्यभुजिष्य-शिवकरः ॥५॥

तत्पट्टासनराजा, भुवनतिलकसूरि-करटि-पारीन्द्रः ।
श्रीकविकुलकोटीरः, सिद्धहस्तलेखप्रसिद्धः ॥६॥

शान्तिकारकः श्रीमान्, अन्तरीक्ष-तीर्थ-प्रभावकाड्यः ।
अन्तरीक्षेऽन्यचैत्यं, नवीनं कारयन् विजयते ॥७॥

तत्पट्टधरः श्रीमान्, श्रावस्तितीर्थोद्धारकः सूरिः ।
कर्णाटककेसरी च, संस्कृतकाव्यादि-कृति-चतुरः ॥८॥

प्रजयति श्रीमद्विजय-भद्रंकराचार्य-वर्य-धुर्यकः ।
भद्रंकरेणैतेन, ललितविस्तरा-महाग्रन्थे ॥ ९ ॥

पिण्डवाडा सुनगरे, राजस्थाने वीरचैत्यान्विते ।
आश्विनसितपञ्चम्यां, तिथौ विशुद्ध-शुद्धलग्ने लग्ने ॥१०॥

चन्द्रवेदाकाशकर-मिते वैक्रमीये वत्सरे वरे ।
टीका प्रारब्धाऽभय-सागरगणि-पण्डित-वचनतः ॥११॥

सुरुचिर-विरचितायां च, भद्रङ्करीवृत्तावाद्यभागे ।
सुव्रतजिनसमीपे, कानपूरे उत्तरदेशे ॥ १२ ॥

त्रयी-गति-व्योम-हस्त-मिते वैक्रमसंवत्सरे तस्मिन् ।
इदं प्रणिपातसूत्रं, नमोत्थुणं व्याख्यया समाप्तम् ॥१३॥

*Printed By:*
**KANTILAL D. SHAH**
" BHARAT PRINTERY "
New Market, Panjarapole,
Relief Road, AHMEDABAD-1
PHONE : 387964

॥ શ્રી અભિનંદન સ્વામિને નમઃ ॥

॥ શ્રી શંખેશ્વર પાર્શ્વનાથાય નમઃ ॥

॥ શ્રાવસ્તિ તીર્થાધિપતિ શ્રી સંભવનાથાય નમઃ ॥

॥ પૂ. સૂત્રકાર - તાર્કિકશિરોમણિ આચાર્યદેવ શ્રી હરિભદ્રસૂરીશ્વરાય નમઃ ॥

॥ પૂ. પંજિકાકાર - આચાર્યદેવશ્રી મુનિચંદ્રસૂરીશ્વરાય નમઃ ॥

॥ પૂ. આત્મકમલ - લબ્ધિ - ભુવનતિલકસૂરીશ્વરાય નમઃ ॥

# "લલિતવિસ્તરા"

## દ્વિતીય વિભાગ

**જ્ઞાન છે જગમાં મહાનિધાન,**
**સત્જ્ઞાન કરાવે મોક્ષે પ્રસ્થાન ।**
**જ્ઞાનદ્રવ્યનું કીધું દાન,**
**ઉપકાર માનીયે તમારો મહાન ॥**

પૂ. શ્રાવસ્તી તીર્થોદ્ધારક, કોંકણ ઉદ્ધારક **આ. શ્રી ભદ્રંકર સૂરીજી મ.સા.,**

**પૂ.આ.શ્રી પુણ્યાનંદ સૂ. મ., પૂ.આ. વીરસેન સૂ. મ.સા.**

આદિઠાણા તથા **સાધ્વીવર્યા પદ્મલતાશ્રી, સા. હર્ષપદ્માશ્રી** આદિઠાણાના
સાયનમાં વિ.સં. ૨૦૪૭ના ચાતુર્માસ સ્મૃત્યર્થે

## રૂા. ૫૧૦૦૦/-

# શ્રી જૈન શ્વેતામ્બર મૂર્તિ. સંઘ

સાયન (શીવ)

મુંબઈ - ૪૦૦ ૦૨૨.

જગતમાં ઉલ્લાસ લાવે છે આદિત્ય,
જીવનમાં ઉજાસ પ્રગટાવે છે સાહિત્ય ।

સ્વયંની કરાવે ઓળખાણ
તે વાસ્તવિક અને ખરૂ જ્ઞાન ......

**પૂ. આચાર્ય શ્રી અરુણપ્રભસૂરીશ્વરજી મ.સા. તથા**
**પૂ. મુનિપ્રવર શ્રી મહાસેન વિ.મ.ની શુભપ્રેરણાથી .....**
રૂા. ૧૧૦૦૦ = ૦૦ શ્રી ચિંતામણી પાર્શ્વનાથ જૈન સંઘ, ગોરેગામ(વેસ્ટ), આરેરોડ, મુંબઈ

**પૂ. આચાર્ય શ્રી વીરસેનસૂરીશ્વરજી મ. સા. ના સદુપદેશથી .....**
રૂા. ૫૦૦૧ = ૦૦ શ્રી કોલીવાડા (પૂર્વ) રાવલી કેમ્પ જૈન સંઘ મુંબઈ

**પૂ. સાધ્વીવર્યા સુભદ્રાશ્રીની પ્રેરણાથી ....**
રૂા. ૧૦૦૧ = ૦૦ શા. સોમચંદ ચુનીલાલ ચાણસ્માવાળાના સ્મૃત્યર્થે - હસ્તે સુપુત્રો

**પૂ. તપસ્વિની સાધ્વી સુવર્ણપ્રભાશ્રીની પ્રેરણાથી ....**
રૂા. ૧૦૦૧ = ૦૦ શ્રી સુંદરનગર જૈન સંઘ મલાડ - મુંબઈ

**સાહિત્યસર્જિકા પૂ. સાધ્વીવર્યા હંસાશ્રીજી મ.સા.ના ૫૫ વર્ષના સંયમપર્યાયની અનુમોદનાર્થે**
રૂા. ૧૦૦૦ = ૦૦ શ્રી માલેગામ જૈન સંઘ

**સાહિત્યસર્જિકા પૂ. સાધ્વીવર્યા હંસાશ્રીજી મ.સા.ના ૫૫ વર્ષના સંયમપર્યાયની અનુમોદનાર્થે**
રૂા. ૧૦૦૦ = ૦૦ શ્રી વર્ધમાનનગર શ્રાવિકા જૈન સંઘ, માલેગામ

**પૂ. સાધ્વીવર્યા ઉમંગશ્રીજી મ.સા.ની શુભપ્રેરણાથી ....**
રૂા. ૭૦૦ = ૦૦ જ્ઞાનદ્રવ્યમાંથી - ઈડર

**પૂ. તપસ્વિની સાધ્વી ભવ્યપદ્માશ્રીના સિદ્ધિતપ નિમિત્તે ....**
રૂા. ૫૦૧ = ૦૦ પીસ્તાબહેન સોહનરાજજી (એન્દલાગુડાવાળા)
રૂા. ૨૫૧ = ૦૦ શાહ લાલચંદ જીવરાજજી (વિઝોડાવાળા)

# લલિત વિસ્તરાના દ્વિતીય ભાગમાં
# અદ્વિતીય - અનુપમ - વિષય વિલોકન


૧ અરિહંત ચેઈયાણં (અન્નત્થ સહિત) ચૈત્યસ્તવ કે કાયોત્સર્ગ દંડક સૂત્રની સવિવેચન વ્યાખ્યા
૨ અર્હચ્ચૈત્યોના વંદના આદિ લાભ નિમિત્તે હું કાઉસ્સગ્ગ કરું છું. એ વિષયનું સચોટ વિવેચન
૩ પૂજન, સત્કારના અધિકારનો નિર્ણય ... ... ...
૪ દ્રષ્ટાંત દ્વારા દ્રવ્યસ્તવ વિષયક ઉપદેશ દાન દ્વારા સાધુઓને દ્રવ્ય સ્તવનું કરાવવું નિર્દોષ છે એ વિષયનું વિવેચન ... ... ... ...
૫ વંદન પૂજન સત્કાર સન્માન શા માટે ? એ વિષયનું વિવેચન ...
૬ શ્રદ્ધા વિ. થી રહિત કરેલો કાઉસ્સગ્ગ ઈષ્ટ ફલ સિદ્ધિવાળો થતો નથી એ વિષયનું વિવેચન અને વર્ધમાન શ્રદ્ધાનું વર્ણન ... ... ... ...
૭ વર્ધમાન મેધાનું વર્ણન ... ... ... ...
૮ વર્ધમાન ધૃતિ વર્ણન ... ... ... ...
૯ વર્ધમાન ધારણા વર્ણન ... ... ... ...
૧૦ વર્ધમાન અનુપ્રેક્ષા વર્ણન ... ... ... ...
૧૧ બીજાઓના મતથી શ્રદ્ધા વિ. નું ઉપમા સાથે સાધન ... ...
૧૨ 'અન્નત્થ ઉસસિએણં' રૂપ સૂત્રનો આરંભ અને સવિવેચન અર્થ ...
૧૩ 'લોગસ્સ' કે નામસ્તવ રૂપ સૂત્રનો આરંભ અને સવિવેચન અર્થ ...
૧૪ 'સવ્વલોએ અરિહંત ચેઈયાણં' રૂપ સૂત્રની વ્યાખ્યા ... ...
૧૫ 'પુક્ખરવરદીવડ્ઢે' કે શ્રુતસ્તવની સવિવેચન વ્યાખ્યા ... ...
૧૬ 'સુઅસ્સ ભગવઓ કરેમિ કાઉસ્સગ્ગં' રૂપ સૂત્રની વ્યાખ્યા ...
૧૭ 'સિદ્ધાણંબુદ્ધાણં' કે સિદ્ધસ્તવ રૂપ સૂત્રની સવિવેચન વ્યાખ્યા ...
૧૮ 'વૈયાવચ્ચગરાણં' રૂપ સૂત્રની સવિસ્તર વ્યાખ્યા ... ...
૧૯ 'જયવીયરાય' કે પ્રણિધાન રૂપ સૂત્રની વ્યાખ્યા ... ...
૨૦ પ્રણિધાનપર્યંત ચૈત્યવંદનનું કથન બાદ આચાર્યાદિને વંદના ત્યારબાદ કદાગ્રહના વિરહપૂર્વક યથોચિત કર્તવ્યનું વર્ણન ... ... ... ...
૨૧ ચૈત્યવંદનાદિ સિદ્ધિ માટે વરસતો સદ્‌બોધનો ધોધ. ત્યારબાદ ચૈત્યવંદન સૂત્રનું માહાત્મ્ય બતલાવી પ્રસ્તુત ગ્રંથની 'વિરહ' શબ્દથી સમાપ્તિ ... ...

॥ ॐ ह्रीँ श्रीँ शंखेश्वर पार्श्वनाथाय नमः ॥

# મંગલ વચન

પૂ. પાદ સુવિહિત શિરોમણિ જૈન શાસનના પરમપ્રભાવક સૂરિપુરંદર ૧૪૪૪ ગ્રંથરત્નોના રચયિતા આચાર્ય ભગવંત શ્રી હરિભદ્રસૂરીશ્વરજી મહારાજ રચિત 'ચૈત્યવંદન સ્તવ' સૂત્રો પરની સુપ્રસિદ્ધ 'લલિતવિસ્તરા' વૃત્તિ જૈન શાસનમાં ખૂબ જ શ્રદ્ધેય, અર્થગંભીર ને વિશિષ્ટ કોટિનું સ્થાન ધરાવતી સર્વશ્રેષ્ઠ સાહિત્ય કૃતિ છે. પૂ. યાકિની ધર્મસૂનુ આચાર્ય ભગવંતે પોતાની સર્વ શકિતઓનું અમી સીંચી આ ગ્રંથરત્ન રૂપ કલ્પવૃક્ષની આપણા પરમ પુણ્યોદયે જૈન સંઘને ચરણે અણમોલ ભેટ ધરી છે.

'ઉપમિતિભવ પ્રપંચ કથા' જેવા મહાન ને ચમત્કારિક ગ્રંથરત્નની રચના કરનાર પૂ. પાદ સિદ્ધર્ષિ ગણિ જેવા ધુરંધર વિદ્વાન મહર્ષિએ પણ જે લલિતવિસ્તરા ગ્રંથને બિરદાવતાં સ્પષ્ટપણે પોતાના તે ગ્રંથમાં ઉલ્લેખ કરેલ છે કે -

अनागतं परिज्ञाय, चैत्यवंदन संश्रया ।
मदर्थं निर्मितां येन, वृत्ति ललितविस्तरा ॥

ભાવિકાલે થનારા મારા ઉપકારને માટે જેઓશ્રીએ ચૈત્યવંદન સૂત્રોને આશ્રયીને લલિતવિસ્તરા વૃત્તિની રચના કરી છે.' આ રીતે પૂ.આ.મ.શ્રી હરિભદ્રસૂરીશ્વરજીની સર્વશ્રેષ્ઠ કૃતિને તેઓશ્રીએ બિરદાવી છે. તદુપરાંત સમર્થવાદિ શિરોમણિ પૂ.આ.મ.શ્રીમદ્ દેવસૂરીશ્વરજી મહારાજશ્રીના ગુરૂદેવ પૂ.સમર્થ ટીકાકાર આચાર્ય ભગવંત શ્રીમદ્ મુનિચંદ્રસૂરીશ્વરજી મહારાજશ્રી જેવા સમર્થ મહાપુરૂષે પૂ. હરિભદ્રસૂરીશ્વરજી મહારાજશ્રીની સાહિત્ય કૃતિ 'લલિતવિસ્તરા'ના મહિમાનું ગુણગાન કરતાં, તેની 'પંજિકા' નામની લઘુટીકા રચતાં મંગલાચરણમાં ફરમાવે છે કે -

को ह्येनां विवृणोतु ?नाम विवृतिं स्मृत्यै तथाप्यात्मन : ॥

પૂ.સૂરિપુરંદર આચાર્ય ભગવંત શ્રી હરિભદ્રસૂરિ મહારાજ રચિત આ લલિતવિસ્તરા વૃત્તિના વિવરણને કરવાને માટે કોણ સમર્થ છે?

પ્રસ્તુત 'લલિતવિસ્તરા' દેવવંદનના સૂત્રોપરની ગંભીર, ગહન તથા અનેકવિધ શાસ્ત્રરહસ્યોથી ભરપૂર વૃત્તિની રચના પૂ. સૂરિ મહારાજશ્રીએ શ્રી અહિરંત પરમાત્મા પ્રત્યેની અનન્ય ભકિતભાવનાથી કરેલી છે.

જૈન શાસનમાં યાવત્ સમસ્ત સંસારમાં શરણરૂપી શ્રી અરિહંત ભગવંત છે. ત્રણેય લોકના જીવો માટે ત્રણેય કાલમાં શ્રી અરિહંત પરમાત્મા મંગલરૂપ છે, જન્મ-જરા-મરણ, આધિ-વ્યાધિ તથા ઉપાધિ ને રોગ, શોક તેમજ સંતાપના ત્રિવિધ ચક્રવ્યૂહની વચ્ચે પીંખાઈ-પીંસાઈ રહેલ સમસ્ત જીવરાશિ માટે શરણ એક માત્ર શ્રી અરિહંતદેવ છે. જગતમાત્રના જીવોની દુઃખની પરંપરાના મૂલ કારણ કર્મની પરંપરાને ટાળવાનું અમોઘ અચિંત્ય તેમજ અનુપમ આલંબન હોય તો શ્રી અરિહંત પરમાત્મા છે. અરિહંત પરમાત્માની આજ્ઞાને જીવન ધ્યેય માનીને સિદ્ધ ભગવંતને લક્ષ્યરૂપ રાખી,

આચાર્ય, ઉપાધ્યાય તથા સાધુની શુભ નિશ્રામાં ધર્મની આરાધના કરનારા ભવ્યજીવોને શ્રી અરિહંત પરમાત્માનું શાસન પરમ તારક તથા ઉદ્ધારક છે.

અનાદિ અનંત સંસારમાં કર્મને વશ સંસારી જીવો ભૂતકાલમાં અનંતી વેળા ચારે પ્રકારની ગતિઓમાં પરિભ્રમણ કરતો જ રહ્યો છે. દુઃખના નાશની ને સુખ પ્રાપ્તિની તેની ઝંખના, આશા, કલ્પના ને મનોરથો નિરંતર ભાંગીને ભૂક્કો થઈ રહ્યા છે. કયાંયે તેને શાશ્વત, સ્વાધીનતા તથા અખંડ સુખની પ્રાપ્તિ થઈ નહિ. દુઃખની પરંપરાનો નાશ તેના જીવનમાં કયાંયે થયો નહિ. સામાન્ય દુઃખનો નાશ કે સુખ સામાન્યની પ્રાપ્તિ તો આત્માને ડગલે ને પગલે પુણ્યોદયથી પ્રાપ્ત થાય છે ને તેવો સામાન્ય પુણ્યોદયને તેણે ભૂતકાલમાં ઘણીયે વેળાએ પ્રાપ્ત કરેલ છે પણ દુઃખની પરંપરાનો નાશ તેને કદિયે અનુભવ્યો નથી ને શાશ્વત સુખની તેને પ્રાપ્તિ થઈ નથી.

શ્રી અરિહંત પરમાત્માનો ઉપકાર એ જ છે કે તેઓની શ્રી તીર્થંકર નામકર્મના ઉદયથી ધર્મતીર્થની સ્થાપના કરવા દ્વારા સંસારના દુઃખ સંતપ્ત સુખાભિલાષી જીવોને શાશ્વત, સ્વાધીન તથા અખંડ સુખ પ્રાપ્તિના અમોઘ સાધનરૂપ ધર્મનું વિશ્વકલ્યાણની કામનાથી પ્રદાન કરે છે. શ્રી અરિહંતદેવનો આ જ લોકોત્તર ઉપકાર છે કે તેઓ જગતના જીવોની અનાદિ કાલની સુખ ભૂખને સંતોષે છે; દુઃખની અનંત યાતનામાંથી મુકત કરે છે ને શાશ્વત સ્વાધીન તથા અખંડ સુખને પરંપરાએ તેઓ આપે છે. જો કે તેમની કરૂણાનો અધિકાર તો ભવ્યજીવોને જ પ્રાપ્ત થાય છે, પણ તેમાં જીવોની પાત્રતા, યોગ્યતા તથા તેવા પ્રકારની તથા ભવ્યતા મુખ્ય કારણ છે.

આવા પરમ કરૂણાસાગર વિશ્વવત્સલ દેવાધિદેવ શ્રી જિનેશ્વર ભગવંતનો અનંત ઉપકાર કેમેય ભૂલી શકાય તેમ નથી. સંસારમાં જે કાંઈ ઈષ્ટ, અનુકૂલ અને સુંદર પ્રાપ્ત થઈ રહ્યું છે, એકેન્દ્રિયમાંથી અરે અનાદિ નિગોદમાંથી વધતા વધતા જડ જેવા જીવનમાંથી પ્રગતિ કરતાં કરતાં બેઈન્દ્રિય, તેઈન્દ્રિય, ચઉરિન્દ્રિય અને પંચેન્દ્રિય તે રીતે દેવ, મનુષ્ય આદિ જે જે સ્થાનોની તેણે પ્રાપ્તિ કરી તે બધાયમાં પરંપરાએ શ્રી અરિહંત પરમાત્માનો પરમ ઉપકાર રહેલો છે. માટે જે કૃતજ્ઞભાવે તે દેવાધિદેવના ઉપકારની પરંપરાને યાદ કરી, તેઓશ્રીની આજ્ઞાનું પાલન કરવા ભવ્યજીવો ઉજમાળ બને છે.

તેઓશ્રીની આજ્ઞા પ્રત્યે આદર બહુમાન તથા પ્રીતિભાવ જે જીવોનાં કૃતજ્ઞભાવપૂર્ણ હૃદયમાં જાગૃત છે, તે ભવ્ય આત્માઓ તે દેવાધિદેવ પ્રત્યેની ભકિતથી તેઓશ્રીના પ્રતિનિધિત્વરૂપ તેઓશ્રીની પ્રશમરસ ઝરતી વૈરાગ્ય-શાંતમુદ્રાપૂર્ણ પ્રતિમાજીની અર્ચના- પૂજા તેમજ સ્તવના કરી પોતાની જાતને કૃતકૃત્ય ને ધન્ય બનાવે છે. દેવાધિદેવ અરિહંત પરમાત્માની પૂજા અર્ચના તે પરમાત્મા પ્રત્યેની કૃતજ્ઞતાની સૂચક છે. ભકત ભવ્યજીવોને સમ્યગ્દર્શનની નિર્મલતા માટે પરમ આલંબન છે, સમ્યગ્જ્ઞાન તથા સમ્યક્ ચારિત્રધર્મની પ્રાપ્તિમાં સહાયક છે. ચિત્તશુદ્ધિ, પ્રસન્નતા ને સમાધિભાવની પ્રાપ્તિ માટે શ્રી અરિહંત પરમાત્માની પૂજા-ભકિત, સેવા-ઉપાસના ખૂબ જ ઉપકારક છે. દુઃખનો ક્ષય, કર્મનો ક્ષય ને સમાધિમરણ તથા બોધિલાભને સાક્ષાત્ તથા પરંપરાએ તે આપે છે.

જૈન શાસનની લોકોત્તરતા તથા સર્વશ્રેષ્ઠતા તે જ કારણે છે કે, શ્રી અરિહંત પરમાત્મા જેવા વીતરાગ સર્વજ્ઞ ભગવંત તેના પ્રવર્તક છે; શ્રી અરિહંતદેવનું વ્યકિતત્વ વિશ્વમંગલકર છે ને ત્રણલોકના સમગ્ર ભવ્ય જીવો માટે કલ્યાણકર છે. તેઓના ઉપકારની અવધિ નથી. અનંત ઉપકારી તે દેવાધિદેવની ભકિત એ જ સમસ્ત સંસારમાં શ્રેષ્ઠતમ કલ્યાણનું સાધન છે. તે પરમાત્માના શાસનનો માટે જ મહાઉપકાર છે, કારણ કે, શ્રી અરિહંત પરમાત્માએ પ્રરૂપેલા માર્ગનું સમ્યગ્ રીતે વહન કરવા માટેનો મૂલ રાજમાર્ગ તે છે.

પૂ. પાદ આચાર્ય ભગવંત શ્રી હરિભદ્રસૂરિશ્વરજી મહારાજશ્રી જૈન શાસનની પીછાન પામ્યા પછી પોતાની જાતને કૃતકૃત્યને માનતાં, તેને ઓળખાવનારા જૈનશાસનના પ્રાણસમા જૈન આગમોની ઉપકારિતાને બિરદાવતા ને તેની પ્રાપ્તિથી પોતાની જાતને ધન્ય માનતા પોતાના હૃદયની ઉર્મિઓને ઠાલવતાં જણાવે છે કે,

'કત્થ અમ્હારિસા જીવા, દુસમાદોસ દૂસિઆ, હા હા અણાહા કહં હુંતા, જઈ ણ હુંતો જિણાગમો- જો તીર્થંકર ભગવંત પ્રરૂપિત જૈન સિદ્ધાંત-જૈન આગમોની પ્રાપ્તિ અમને ન થઈ હોત તો વીતરાગ ભગવંતનું ધર્મશાસન મને ન મલ્યું હોત તો ખરેખર આ વિષમકાલના-દુષમકાલના દોષથી દૂષિત અને અનાથ એવા અમારા જેવાનું શું થાત ?

જૈન શાસન પ્રત્યે પૂ. સૂરિ ભગવંતની કેટકેટલી ભકિતને કેટકેટલું હૃદયગત બહુમાન ! આ કારણે જ તે મહાપુરૂષ શ્રી અરિહંત ભગવંતની વંદનાના સૂત્રોનું તેમની ભાવપૂજાના, સ્તવના, અર્ચનાના વિધિ સૂત્રોનું રહસ્યોદ્ઘાટન કરવાના પૂર્ણપણે અધિકારી છે. ચૈત્યવંદન સૂત્રો, શક્રસ્તવ, શ્રુતસ્તવ, સિદ્ધસ્તવ તથા ચૈત્યસ્તવ પરની આ લલિતવિસ્તરા વૃત્તિ આ કારણે જ મહત્વની ને અનેકવિધ વૈશિષ્ટ્યયુકત છે. તેઓશ્રીમદ્‌ની વાણી ઘણી ગંભીર છે. શબ્દોની સંકલના ભાવવાહી છે ને શૈલી ચમત્કારી છે. આવા મહાઉપકારી સૂરિ ભગવંતની આ વૃત્તિ ગ્રંથની અનન્ય ઉપકારકતાને પૂ. આચાર્ય ભગવંતને પૂ. સિદ્ધર્ષિ ગણિવર જેવા મહાન ને સમર્થ પ્રભાવક પુરૂષ વાસ્તવિક રીતે પીછાણી શકયા હતા.માટે જ તેમણે પૂ. આચાર્ય ભગવંતને પોતાની ભાવભરી અંજલિ અર્પતા જે હૃદયોદ્‌ગાર પ્રગટ કરેલ છે તે યથાર્થ છે. તેઓ કહે છે કે -

विषं विनिर्धूय कुवासनामयं, व्यचीचरद्यः कृपया मदाशये ।
अचिन्त्य वीर्येण सुवासनासुधां, नमोऽस्तु तस्मै हरिभद्रसूरये ॥
आचार्य हरिभद्रो मे धर्मबोधकरो गुरू ...

મારા હૃદયમાં રહેલ કુવાસનામય મિથ્યામત રૂપ ઝેરને ટાળીને જેમણે પોતાના અચિંત્ય સમાર્થ્યથી કૃપાપૂર્વક મારા હૃદયમાં સમ્યગ્ધર્મની શ્રદ્ધારૂપ અમૃતનું સિંચન કર્યું તે પરમ કૃપાલુ આચાર્ય ભગવંત શ્રી હરિભદ્રસૂરિજી મહારાજને મારા કોટિ કોટિ વંદન હો ! ખરેખર તેઓશ્રી મારા પર પરમ ઉપકારને કરનારા ને મને સમ્યગ્ ધર્મરત્નનું પ્રદાન કરનારા મારા પરમ હિતવત્સલ કૃપાસાગર ગુરૂદેવ છે.

આટઆટલી શ્રદ્ધા, ભકિત તથા બહુમાન જે મહાપુરૂષના આ 'લલિતવિસ્તરા' ગ્રંથરત્નને વાંચી-વિચારી ને મનન-ચિંતન, અવગાહન કરી પૂ. સિદ્ધર્ષિ મહાત્માને પોતાના નિર્મલ હૃદયમાં જાગૃત થયાં તે લલિતવિસ્તરાનો ઉપકાર જૈન શાસનમાં ખરેખર મહાન ને લોકોત્તર છે.

ત્રિલોકનાથ દેવાધિદેવ શ્રી અરિહંત પરમાત્મા પ્રત્યેના ભકિતભાવને જાગૃત કરવાને માટે ને જે ભવ્યજીવોના હર્ષ પુલકિત હૃદયમાં ભકિતભાવ જાગૃત થયો હોય તેને સ્થિર કરી તેની વૃદ્ધિ કરવા માટે આ ગ્રંથરત્નનું સામર્થ્ય વચનાતીત છે.આ ગ્રંથરત્ન જૈન શાસનનું સર્વસ્વ છે, જૈન દર્શનના રહસ્યને સમજવા માટે ખૂબ જ ઉપકારક ને માર્ગદર્શક છે. જો કે દેવાધિદેવ શ્રી અરિહંત પરમાત્માની પાસેથી ત્રિપદીને પામીને દ્વાદશાંગીની રચના કરનાર પરમ કૃપાસાગર શ્રી ગણધર ભગવંત જેવા બીજ બુદ્ધિને કોષ્ઠ બુદ્ધિના સ્વામી શ્રી ગણધર ભગવંતની રચનારૂપ ચૈત્યવંદન સૂત્રો જેવા ગંભીર સૂત્રો પર તેના રહસ્યને વિસ્તારનારી વૃત્તિ માટેનો પ્રયાસ કે પરિશ્રમ સંપૂર્ણ કદિ હોઈ શકે જ નહિ. છતાં પૂ.આચાર્ય ભગવંત જેવા સમર્થ વિદ્વાન દિગ્ગજ પંડિત ધર્મધુરંધર સૂરિપુરંદર અવશ્ય આ ચૈત્યવંદન સૂત્રની વૃત્તિની રચના માટેના સંપૂર્ણ અધિકારી છે.

પૂ. સૂરિપુરંદરની આ કૃતિ જૈન શાસનના લોકોત્તર માર્ગની પ્રભાવના માટે મહાન ઉપકારક છે. જૈન દર્શન પ્રત્યે સ્થિરતા, દ્રઢતા તેમજ આસ્તિકતા પ્રગટાવવા માટે દરેક રીતે સમર્થ આ વૃત્તિ સારાયે જૈન સિદ્ધાંત સાગરનું મંથન કરીને પ્રાપ્ત થયેલ અમૃતરૂપ છે. મિથ્યાવાસના, કુતર્કો અને અજ્ઞાનના અંધકારને દૂર કરી સમ્યગ્ ધર્મનો, સમ્યગ્જ્ઞાનનો તથા સમ્યક્ શ્રદ્ધાનો પ્રકાશ પાથરવા તેજસ્વી સહસ્ત્રરશ્મિ સમાન શકિતશાલી છે.

પ્રસ્તુત પ્રકાશન 'લલિતવિસ્તરા'ના વિષયોનું અવગાહન કરવા માટે દીપિકા સમાન મહાન ઉપકારી છે. લલિતવિસ્તરાના વિષયોને વિસ્તૃત કરી, વર્તમાન કાલીન ધર્મશીલ ચિંતક ને જિજ્ઞાસુ શ્રદ્ધાવાન્ ભાવિકોના હિતની બુદ્ધિથી આ લલિતવિસ્તરા પર વિવેચનયુકત અનુવાદ વિદ્વાન પંન્યાસ પ્રવર શ્રી ભદ્રંકરવિજયજી ગણિવરે લખેલ છે. આજ અગાઉ છ વર્ષ પૂર્વે આ વિવેચન યુકત અનુવાદ ગ્રંથનો પ્રથમ ભાગ પ્રસિદ્ધ થયેલ હતો. કા. ૧૬ પેજી ૬૩૪ પેજના તે વિશાલ ગ્રંથમાં અનુવાદક ને વિવેચનકાર વિદ્વાન પંન્યાસ પ્રવરશ્રીએ ખૂબજ પરિશ્રમપૂર્વક 'નમુત્થુણં' સુધીની વૃત્તિનો વિસ્તાર કર્યો હતો.

શક્રસ્તવ પરની વૃત્તિ પરના વિવેચન ગ્રંથ પ્રસ્તુત પ્રથમ ભાગમાં વિવેચક પંન્યાસજી મહારાજે સુંદર રીતે દરેક વિષયની છણાવટપૂર્વક સરલ ભાવવાહી ને તાત્ત્વિક શૈલીથી લલિતવિસ્તરાના વિષયોનો વિસ્તાર કરેલ. પૂ. આચાર્ય ભગવંત શ્રી હરિભદ્રસૂરીશ્વરજી મહારાજશ્રી જેવા પ્રૌઢ ને પ્રખર પંડિતની ગૂઢ, ગંભીર રચનાનો વિસ્તાર કરવો તે ખરેખર દુષ્કરને કષ્ટ સાધ્ય કાર્ય છે. છતાંયે તેમણે તેમાં સુંદર રીતે સફલતા પ્રાપ્ત કરી છે. યુકિતઓ તથા સર્વજન ગ્રાહ્ય તર્કોથી એ ગ્રંથમાં વિવેચક મહારાજશ્રીએ પોતાના જૈન સિદ્ધાંતો વિષેના અધ્યયન, મનન અને પરિશીલનનો નિચોડ ઠાલવ્યો છે.ભાષાની સરલતા, શબ્દોની સુમધુરતા ને શૈલીની સુંદરતાપૂર્વક તેમણે તે ગ્રંથરત્નમાં પોતાની

અમૂલ્ય શકિતઓનો ધોધ વહેવડાવેલ છે.

વિવેચનકારની આ શકિત, ધીરતા ને પ્રૌઢ વિદ્વત્તા અવશ્ય અનુમોદન-પ્રશંસાની પૂર્ણપણે અધિકારી છે. આ હકીકત પ્રસ્તુત પ્રથમ ભાગનું સહૃદયપણે , સ્વસ્થતાથી અવગાહન કરનાર સર્વ કોઈ તે વિષયના જ્ઞાતાને લાગ્યા વિના નહિ રહે.

આજે તે ગ્રંથરત્નના અનુસંધાનમાં બાકીના ચૈત્યવંદન સૂત્રોની લલિતવિસ્તરા વૃત્તિના વિષયોનું અવગાહન કરનારને, ચિંતન-મનન કરનારા ખપી ધર્મભાવિત મુમુક્ષુ જીવોના ઉપકાર માટે બીજો ભાગ પ્રસિદ્ધ થઈ રહયો છે. તે ખરેખર ગૌરવનો વિષય છે. ચૈત્યસ્તવ, અરિહંત ચેઈઆણં, નામસ્તવ, લોગસ્સ, શ્રુતસ્તવ, પુખ્ખરવરદીવડ્ઢે ને સિદ્ધસ્તવ-સિદ્ધાણં-બુદ્ધાણં સૂત્રો પરની વૃત્તિનો ગૂઢ રહસ્યો તથા અર્થ ગંભીર પદોનો વિસ્તાર ને તેનું સુંદર સરલ વિવેચન આ ગ્રંથમાં પ્રસિદ્ધ થઈ રહેલ છે.

આ વિવેચન ગ્રંથમાં લેખક પંન્યાસજી મહારાજે ભાવની વિશદતાપૂર્વક, શબ્દોની સરલતા ને સૌમ્ય શૈલીથી વિષયોની છણાવટ અર્થગંભીર ભાષામાં કરી છે. પ્રાસંગિક વિસ્તાર કરીને અભ્યાસક જિજ્ઞાસુ વર્ગને ઉદ્‌બોધક બને તે રીતે તેમણે ગ્રંથની સંકલના કરી છે. વિવેચનકાર વિદ્વાન પૂજ્યશ્રીએ બન્નેય ભાગોમાં સુંદર શૈલીથી 'લલિતવિસ્તરા' ગ્રંથ પર કુશલતાપૂર્વક સંસ્કૃતમાં વિવેચન કરીને ગ્રંથના રહસ્યનું વિશદતાથી ઉદ્‌ઘાટન કરેલ છે. જેમ કોઈ કુશલ ચિત્રકાર પીંછીહાથમાં લઈ, ફલક પર ભવ્ય ચિત્રાલેખન કરી પોતાના કલા કૌશલથી ફલકને ચિત્રકલાથી સુશોભિત બનાવી, પાત્રોને ચિરંજીવી બનાવે, તે રીતે ચૈત્યવંદન સૂત્ર વૃત્તિરૂપ લલિતવિસ્તરા ગ્રંથના વિષયોને પોતાના મતિવૈભવથી કુશલતાપૂર્વક વિસ્તૃત કરીને વિદ્વાનશ્રીએ સૂત્રોના ગંભીર રહસ્યને સ્પષ્ટ રીતે મૂર્તિમંત કરેલ છે.

વિવેચનકારશ્રી, તર્કશાસ્ત્ર તથા શબ્દશાસ્ત્રના પ્રૌઢ પંડિત છે. જૈન સિદ્ધાંતોનું અવગાહન કરીને બહુશ્રુતતા પ્રાપ્ત કરનારા સમર્થ વિદ્વાન છે. શાંત તથા પ્રસિદ્ધિથી દૂર રહેનારા ને એકાંતપરાયણ તોએ સંસ્કૃત-પ્રાકૃત તથા ગુજરાતી ભાષામાં નૈસર્ગિક કાવ્યો રચનારા પ્રતિભાશાલી કવિરત્ન છે. તેઓએ જે મનન-ચિંતન, અવગાહનપૂર્વક ખંત, પરિશ્રમ તથા ધૈર્ય ને નિષ્ઠાથી લલિતવિસ્તરા જેવા મહાન શાસ્ત્ર પર વિવેચન કરવાની અસાધારણ કૌશલ્યતા દાખવી છે તે તેમના પુરૂષાર્થ અને પુણ્યાઈથી પ્રાપ્ત ક્ષયોપશમની સફલતા છે.

આવા મહાન વિવેચન ગ્રંથનું વિધિમાર્ગના અનુરાગી ખપી ભવ્યજીવો, વાંચન-મનન તથા પરિશીલન શ્રદ્ધાપૂર્વક કરી, પરમતારક દેવાધિદેવની નિઃસ્સીમ કરુણાદ્રષ્ટિને તેમજ તેમના લોકોત્તર વ્યકિતત્વને પિછાણી તે પરમ કરૂણાસિંધુ શ્રી અરિહંત પરમાત્મા પ્રત્યે પૂર્ણ ભકિત ભાવિત બની, વિધિપૂર્વક તેમની સેવા, ઉપાસના તથા આજ્ઞાની આરાધના કરી અનંત દુઃખરાશિ સંસાર સાગરના પારને પામી શાશ્વત સિદ્ધિસુખના સ્વામી બનો ! એ શુભ કામના સહ હું વિરમું છું.

**-પં. કનકવિજય ગણિ**
(આ. રામચંદ્રસૂ. સમુદાયના)
(ભાગ - ૨,જાના ગુજ. અનુ.)

**શ્રી નગીનભાઈ જૈન પૌષધશાળા**
પાટણ
વિ. સં. ૨૦૨૨

ऐँ नमः

* श्री शंखेश्वरपार्श्वनाथाय नमः *

पू. सूत्रकार-तार्किकशिरोमणी-आचार्यश्री-हरिभद्रसूरीश्वराय नमः

पू. पञ्जिकाकार-आचार्यदेव-श्री मुनिचंद्रसूरीश्वराय नमः

पू. आत्मकमललब्धिभुवनतिलकसूरीश्वराय नमः

# ललितविस्तरा

## 卐 द्वितीय विभागः 卐

— टीकाकार :—

पू. कर्नाटककेसरी, श्रावस्ती-तीर्थोद्धारक-आचार्यदेव

श्री भद्रंकरसूरीश्वरजी-महाराजः

# 卐 मंगलाचरणम् 卐

विश्रामधाम तव नाम जिनेश्वराऽस्ति, मोहभ्रमाद्भ्रमकृतां भवकक्षमध्ये ।
श्री शान्तिनाम मम चेतसि वर्ततां तद् यज्जापतो जनिभृतो जयमाप्नुवन्ति ॥वसंत ति.॥

सौधर्मपट्टसूर्याभः, श्री न्यायाम्भोनिधिः, सुधीः, ।
विजयानन्दसूरीशो जयति भारतेऽखिले ॥ अनु. ॥

श्रीमन्तं शान्तिकान्तं प्रवचनवचसो रक्षणे स्वान्तवन्तं,
राजन्तं शिष्यसङ्घैः गुणगणकलितैः धारयन्तं सुशीलम् ।
सामर्थ्याज्जैन-धर्मा-क्रमणकरनरान् कण्टकानुद्धरन्तं,
धीमन्तं धैर्यवन्तं कमलगुरुवरं सूरिवर्यं प्रवन्दे ॥ स्रग्धरा ॥

श्रीमान् शास्त्रविशारदो विशदवित्, वात्सल्यवारांनिधिः,
शुद्धान्तःकरणः सदा कमलव-न्निर्लेपतावान् गुरुः ।
शश्वच्छासनरागवान् प्रशमवान् कारुण्य-पुण्याम्बुधिः,
जीयाच्छ्री-कमलाख्यसूरिमुकुटः सद्धर्मरक्षाकरः ॥ शार्दूल वि. ॥

चित्ते भक्तिरसो जिनोक्तिविषयः सद्धर्मरागो हृदि ।
श्रोत्रे जैनवचः स्तुति-श्रुति-रतिः भाले परा भव्यता ।
नेत्रेऽर्हत्प्रतिमानिरीक्षण-रसः कण्ठे जिनानां वचः,
येषां श्री कमलाख्यसूरिगुरवस्ते पान्तु मां नित्यशः ॥ शा. वि. ॥

यस्याचार्य-पदार्पणं समभवत् श्रीपत्तने पत्तने,
श्री सङ्घस्तदनु प्रमोदभरितो जज्ञे कृतार्थः कृती ।
विद्वद्वर्य-युगप्रधान-विजया-नन्दाख्यसूरीशितुः,
श्रीपट्टे कमलाख्यसूरिसविता स द्योतते द्योतनः ॥ शा. वि. ॥

यत्पट्टाम्बर-भूषणौ कृतिवरौ श्रीदानलब्धिप्रभू,
सूर्याचन्द्रमसाविव द्युति-धरौ सूरीश्वरौ भास्वरौ ।

जातौ छाणिपुरे मुदा कृतमहे सङ्घेन मेधा–जुषा,
तं शंदं कमलं स्तुवे गतमलं सम्यक्क्रिया–प्रत्यलम् ॥ शा. वि. ॥
धिषणया धिषणं भुवि भूषणम्, जयति यो जिनदृष्टिविभूषया ।
प्रमुदितः प्रणमामि सदा मुदा, विजयलब्धिकवीश्वरसूरिपम् ॥ द्रुतवि. ॥
भविककमलसूर्यः साधुवर्येषु धुर्यः, धृतनिगदितदीव्यज्जैनधर्मात्ततूर्यः ।
वरतरगुणमूर्ति र्लोकसंगीतकीर्ति–र्भुवनतिलकसूरी राजते राजतेजाः ॥ मालिनी ॥
महोपाध्याय–न्याया–चार्य–वर्य–प्रातिभप्रभाजुषा ।
श्रीमद्‌यशोविजयेन, श्री कविकेसरिणा कृतानाम् ॥ आर्या. ॥
अध्यात्मसाराऽध्यात्म–उपनिषद् विजयोल्लासकाव्यानां ।
टीका हरिभद्रललित–विस्तराद्यभागस्य च तथा ॥ आर्या ॥
कृता मया सुभाग्येन, गुरोः कृपालतावता ।
विद्वद्‌भि र्वाच्यमाना सा, जयताज्जैनशासने ॥ उप. ॥ त्रिभिर्विशेषकम् ॥

卐

एवंभूतैः स्तोत्रै र्वक्ष्यमाण–प्रतिज्ञोचितं चेतोभावमापाद्य पञ्चाङ्गप्रणिपातपूर्वकं प्रमोदवृद्धिजनकानभिवन्द्याचार्यादीन् गृहीतभावः सहृदयनटवदधिकृत–भूमिकासम्पादनार्थं चेष्टते वन्दनासम्पादनाय.

एवंप्रकारावच्छिन्नैः स्तोत्रै ( शक्रस्तवसमानैः स्तोत्रैः ) र्वक्ष्यमाण—अग्रतः कथयिष्यमाणकायोत्सर्गरूप—प्रतिज्ञाया उचितं—योग्यं चेतसो भावं ( शुभ्रलेश्यां ) सम्पद्य पञ्चाङ्गप्रणिपातपूर्वकं– क्षमाश्रमणदानपूर्वकं प्रमोदवृद्धिजनकान्—प्रकृष्टानन्दवृद्धिकारणभूतान् ( श्रुतस्तवे जिननमस्कारवत् ) आचार्यादीन् ( आदिनोपाध्यायसर्वसाधून् ) अभितो वन्दित्वा,

( भावो भक्तिरपीत्यर्थः, साधुश्रावक–पक्षे भावः–भक्तिः, अथवाऽस्था–प्रेम–भावार्थ–अभिप्रायादिरर्थः, नटपक्षे हृदयावस्थावेदको मानसविकारो भावः, सङ्गीतसज्ञति (त) पदार्थद्योतक–हस्तचेष्टा- विशेषो भाव इति अभिनयकलाज्ञा नर्तकाश्च संगिरन्ते, अभिप्रायोऽपीति काव्यज्ञाः संजगदिरे ) भावं गृहीत्वा, सहृदयनटवत्–शुभान्तःकरणः, काव्यार्थभावज्ञाने पक्वबुद्धिकः, सम्यचित्ताऽभिप्राय–चित्रहृढनृत्यवन्निजकार्यसिद्धचित्तः, सहृदयनटवत् ( नान्दीपाठकनन्दीवत् )

अधिकृतभूमिकासम्पादनार्थं ( प्रकृतभूमिका कायोत्सर्गविषयणी या भूमिका तस्या ) (नटपक्षे तत्तद्वेषस्तु भूमिका ) अथवा वन्दनाविषयणी—भूमिकायाः सम्पादनाय चेष्टते (करोति) वन्दना—सम्पादनाय स चोत्तिष्ठति जिनमुद्रया पठति चैतत्सूत्रम्—

**स चोत्तिष्ठति जिनमुद्रया पठति चैतत्सूत्रम्–' अरिहंतचेइयाणं करेमि काउस्सग्गं वंदणवत्तियाए पूअणवत्तिआए सक्कारवत्तिआए सम्माणवत्तिआए बोहिलाभवत्तिआए निरुवसग्गवत्तिआए सद्धाए मेहाए धिइए धारणाए अणुप्पेहाए वड्ढमाणीए ठामि काउस्सगं '। अनेन विधनाऽऽराधयति स महात्मा वन्दनाभूमिकां,**

**आराध्य चैनां परम्परया नियोगतो निवृत्तिमेति, इतरथा तु कूटनटनृत्तवत् अभावितानुष्ठानप्रायं न विदुषामास्थानिबन्धनम्, अतो यतितव्यमत्रेति ।**

टी. वन्दनायामेव परिणतो यदात्मा प्राप्यते तदा वन्दनाभूमिका, तामाराधयति–जयति,

अन्यच्च स साधुर्वा श्रावक उत्तिष्ठति, जिनमुद्रया चैतत्सूत्रं पठति, ( अत्र कायोत्सर्गं कुर्वतां जिनानां या मुद्रा तया, अथवा जिन=विघ्नजेत्री या मुद्रा सा जिनमुद्रा तया ) ' अरिहंत चेइआणं ' चैत्यस्तवसूत्रं ( कायोत्सर्गदण्डकसूत्रं ) पठति, अरिहंत चै. सूत्रं, अन्नत्थ सहितं गण्यते, चैत्यस्तवस्य ( कायोत्सर्गदण्डकस्य ) अष्टौ सम्पदः सन्ति, तासां नामानि च स्वरूपं च कथयति,

(१) अभ्युपगमसम्पत्=' अरिहंत चेइयाणं, करेमि काउसग्गं ' इति पदद्वये जिन-मन्दिररूपचैत्यस्थितजिनप्रतिमारूप-चैत्यसत्क-वन्दनहेतु-कायोत्सर्गकरणं प्रतिपन्नमत एतत्पद-द्वयवती, ' अभ्युपगमसम्पत् ' कथ्यते.

(२) निमित्तसम्पत्=ततस्तत्कायोत्सर्गकरणस्य निमित्तं ( कार्यप्रयोजनं ) 'वंदणवत्तिआए' इति पदादारभ्य ' निरुवसग्गवत्तिआए ' पर्यन्तवद्-वाक्ये षट्सु पदेषु दर्शितमस्ति, अतः षट्-पदवती द्वितीया, निमित्तसम्पत् कथ्यते.

(३) हेतुसम्पत्=श्रद्धादिं विना कृतः कायोत्सर्गं इष्टफलसिद्धिसम्पन्नो न भवति तस्मा-त्कारणात् ' सद्धाए इति पदतः ठामि काउस्सग्गं ' पर्यन्तेषु सप्तसु पदेषु कायोत्सर्गस्य हेतुः, ( साधनं येन कार्यसिद्धिर्भवेत् ( तत्साधनं ) दर्शितोऽस्ति ) अतः पदसप्तकवती तृतीया हेतु-सम्पत् कथ्यते.

(४) एकवचनाकारसम्पत्=कृतस्य कायोत्सर्गस्याऽपि, आकारं-अपवादं विना निर्दोषता न भवति, अतः ' अन्नत्थ पदतो हुज्ज मे काउसग्गो ' पर्यन्त-पदेषु षोडाऽऽकारा दर्शिताः सन्ति तेषु ' अन्नत्थ पदतः, पित्तमुच्छाए ' पर्यन्तेषु नवसु पदेषु एकवचनत्वकारणेन नव-पदवती चतुर्थी ' एकवचनाकारसम्पत् ' कथ्यते.

(५) बहुवचनाकार-सम्पत्=ततः ' सुहुमेहिं पदतो, दिट्ठिसंचालेहिं ' पर्यन्तेषु त्रिषु पदेषु बहुवचनत्वेन त्रिपदी पञ्चमी ' बहुवचनाकार-सम्पत् ' कथ्यते.

(६) आगन्तुकाकारसम्पत्=ततः, अन्नत्थसूत्रकथिताकारेभ्यो भिन्ना बाह्यत आगताः केचिदाकाराः ' एवमाइएहिं ' इत्येतेन पदेन सूचिता आकारा सन्ति तैः सर्वाकारैरपि कायोत्सर्गो भग्नो माभूदित्यतो ' हुज्ज मे काउसग्गो ' पर्यन्तानि षट् पदानि कथितानि सन्तीत्यत-स्तत्षट्पदवती षष्ठी, आगन्तुकाकारसम्पत् कथ्यते.

*(७) कायोत्सर्गावधिसम्पत्=ततः ' जाव अरिहंताणं पदतो, न पारेमि ' पर्यन्तेषु* चतुर्षु पदेषु कायोत्सर्गे कियत् कालं स्थेयमिति तस्य कालनियमो दर्शितोऽस्ति, अतश्चतुष्पदी सप्तमी कायोत्सर्गावधिनामिका सम्पत् कथ्यते.

(८) कायोत्सर्गस्वरूपसम्पत्=तदनन्तरं 'तावकायं पदतो, वोसिरामि' पर्यन्तेषु षट्सु पदेषु कया रीत्या कायोत्सर्गः कार्यः ? इति तदीयस्वरूपं दर्शितं तस्मात्तत्श्चतुष्पदी, अष्टमी सम्पत् 'कायोत्सर्गस्वरूपनामिका सम्पत् कथिताऽस्ति.

सामान्यार्थस्त्वयम्=अर्हतां भगवतां चैत्यानि विषयीकृत्य त्रिधा करणेन वन्दनोद्देश्य-फलाभहेतवे द्रव्योपकरणैः पूजां कर्तुं लाभहेतवे वस्त्राभरणादिद्वारा सत्कारं कर्तुं लाभहेतवे स्तुत्यादिद्वारा सन्मानकरणजन्यलाभहेतवे एवं कृत्वा सम्यक्त्वविषयकलाभहेतवे, उपद्रवरहितो-ऽहं भवेयमिति मत्वा निरुपद्रवलाभहेतवे, करोम्यहं कायोत्सर्गं। कीदृश्या रीत्या ? एवं प्रश्ने कथयति, श्रद्धया वर्धमानया बलाद् विना मानसरुच्या, गतानुगतिकतां विना वर्धमानया बुद्धितो वा मर्यादया, वर्धमानया, धृत्या=रागादिनाऽप्रेरितया स्वतः शान्त्या, वर्धमानया धारणया-मनःशून्यतां विना, अर्हद्विषयक-गुणानामविच्छिन्नस्मरणशक्त्या वर्धमानया-अनु-प्रेक्षया=तत्त्वान्तगामिविचारणया, उच्छ्वसितादिरूपाकारान्, अपवादीकृत्य कायोत्सर्गं करोमि-स्थानेन मौनेन-ध्यानेन स्थिरो कायोत्सर्गे भवामि.

विशेषार्थस्त्वयम्-अनेन पूर्वोक्तविधिना स साधुः श्रावको वा वन्दनाभूमिकाराधको भवति, वन्दना-क्रियायां परिणतो यदात्मा भवति तदा वन्दनाभूमिका-वन्दनात्मनोस्तादा-त्म्यरूपाभवति तदा स तद्वन्दनाभूमिकाराधको महात्मा कथ्यते.

एतामेतादृशीं वन्दनाभूमिकामाराध्याराधको महात्मा परम्परया परमात्मा भवति।

अन्यथा='अरिहंत चेइयाणं' रूपसूत्रपाठादिरूपपूर्वो विधिमतिक्रम्य कायोत्सर्गविधाने यथा कूटनटनृत्तवत्-मायाविनृत्यकारनृत्यक्रियावत् स निष्फलो वाऽसत्फलो भवति तथा प्रकृत-सूत्रपाठादिविधि-विनाकृतं कायोत्सर्गरूपानुष्ठानं निष्फलमत एव प्रेक्षावतां कर्त्तव्यता-विषयक बुद्धिरूपास्थाया हेतुर्न भवति, तस्मात् सूत्रपाठादि-विधिपूर्वकः कायोत्सर्गादि-सम्यक्क्रियायां सर्वथा प्रयत्नः कार्य इत्युपदेशः।

-अथ शास्त्रकारो व्यापकरूपेणाक्षेपपरीहारपूर्वकस्य सूत्रार्थस्य गम्भीरगूढालोचनां करोति-

**सूत्रार्थस्त्वयम्-अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्ह-न्तीत्यर्हन्तः-तीर्थकराः तेषां चैत्यानि-प्रतिमालक्षणानि अर्ह-च्चैत्यानि, चित्तम्-अन्तःकरणं तस्य भावः कर्म्म वा वर्णदृढा-दिलक्षणे ष्यञि (वर्णदृढादिभ्यः ष्यञ्च पा० ५-१-१२३) कृते चैत्यं भवति, तत्रार्हतां प्रतिमाः प्रशस्तसमाधिचित्तोत्पादकत्वा-**

**दर्हच्चैत्यानि भण्यन्ते तेषां, किम् ?–'करोमि' इत्युत्तमपुरुषैकवचननिर्देशेनात्माभ्युपगमं दर्शयति, किमित्याह–कायः–शरीरं, तस्योत्सर्गः–कृताकारस्य स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य परित्याग इत्यर्थः, तं कायोत्सर्गम् ।**

पं. 'कृताकारस्येति' विहितकायोत्सर्गार्हशरीरसंस्थानस्य, उच्चरितकायोत्सर्गापवादसूत्रस्य वेति।

## टी....'अरिहंतचेइआणं करेमि काउसग्गं'=

अर्हन्तः=अशोकादिरूपाष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः । ( अशोकवृक्षः सुरपुष्पवृष्टिः, दिव्यध्वनिश्चामरमासनं च, भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणां) (१) प्रायो जिनेश्वराणां स्वशरीरतो द्वादशगुणो देवैश्चैत्यवृक्षो रच्यते तत्राध उपविश्य जिना उपदिशन्ति (२) सुरपुष्पवृष्टिः=योजनमात्रके समवसरणे जलजस्थलजानां सुरभिसुरभितानां विकचानां पंचवर्णानां जानूत्सेधप्रमाणानां सुमनसां सुमनसो वृष्टिं विदधति, तत्राचिन्त्यानुपमेयपरमेश्वर-प्रभावतो यातायातानां संघट्टनतो पुष्पाणि पीडितानि न भवन्ति.

(३) दिव्यध्वनिः=उपनीतरागत्वं मालवकैशिक्यादिरागयुक्तत्वं यद्यपि दिव्यध्वनि भगवतामेव तथापि भगवद्देशनाकाले बहुमानप्रकर्षेण प्रेरिताः पार्श्वद्वये स्थिताः सुरा वीणावंशवाद्यशुषिरादीनां सुमधुरस्वरेण भगवत्स्वरं पूरयन्ति.

(४) चामरं=रत्नघटित सौवर्णदण्डिकासहिताश्चतुरो युगलरूपान्–समवसरणे देवाश्चामरान् वीजयन्ति.

(५) आसनं=देवा भगवत उपवेशनाय सपादपीठं मृगेन्द्रासनमुज्ज्वलं चन्द्रकांतसूर्यकांतमणिरूपाकाशस्फटिकघटितत्वेन निर्मलं रचयन्ति.

(६) भामण्डलं=भामण्डलं चारुमौलिपृष्ठे विडम्बिताहर्पति–मण्डलश्रि.

(७) दुन्दुभिः=भगवतामग्रतोऽजस्रं दुन्दुभिं विशिष्ट–ढक्कां वादयन्ति.

(८) छत्रत्रयी=मौक्तिक–हारमालाशोभितं शारदचंद्रवदुज्ज्वलं उपर्युपरिछत्रत्रयं देवाः समवसृतौ भगवतां मस्तके रचयन्ति, भगवान् स्वयं समवसरणे पूर्वाऽभिमुखः सन्नुपविशति, अन्यासु तिसृषु दिक्षु देवा भगवतःप्रभावेन प्रतिबिम्बानि रचयित्वा स्थापयन्ति, समुदितानि तदा द्वादश छत्राणि भवन्ति, समवसरणाभावे, एतान्यष्टौ प्रातिहार्याणि तु भवन्त्येव.

( अन्यत्रापि, ये स्तुतिवन्दनयोग्या अमरेन्द्राणां पूजायोग्या ते श्रीमन्तोऽर्हन्तो भगवन्तो मम शरणदा भवन्तीत्युक्तमेव )

एतादृशां तीर्थंकराणां प्रतिमारूपाः स्थापनाजिनाः अत्र चैत्यशब्दो जिनप्रतिमादिके रूढ एव, यतः 'चैत्यं जिनौकस्तद्बिम्बं चैत्यो जिनसभातरुः' अत्र चैत्यशब्दो जिनगृह बिम्बरूपयोरर्थयोर्नपुंसकलिङ्गे वर्त्तते, जिनसभागतवृक्षरूपाशोकवृक्षरूपाऽर्थे पुलिङ्गे वर्त्तते.

चैत्यशब्दस्य व्युत्पत्तिलभ्यार्थं प्रदर्श्याऽर्हच्चैत्यानां वन्दनादिलाभादिनिमित्तमहं कायोत्सर्गं करोमीतीतिविषयस्य विवेचनम्—

'चित्तं' अन्तःकरणं, तस्य भावः कर्म वा,

( "चित्तंमणो पसत्थं तब्भावो चेइयंति तज्जणगं ।

जिणपडिमाओ तासिं वंदणमभिवायणं तिविहं ॥ १ ॥" )

यद्वा चितेः—लेप्यादिचयनस्य भावः कर्म वा चैत्यं, तच्च संज्ञादि—शब्दत्वाद् देवता—प्रतिबिम्बे प्रसिद्धं, चूर्णौ तु 'चिती संज्ञाने' काष्ठकर्मादिषु प्रतिकृतिं दृष्ट्वा संज्ञानमुत्पद्यते. यथाऽर्हदादिप्रतिमेष्वेत्युक्तम् ।

चित्तोत्पादकत्वमत्र प्रशस्तसमाधि—चित्तोत्पत्तावसाधारणकारणरूपा प्रतिमा भवति अतः ( कारणे कार्योपचारं कृत्वा अर्हच्चैत्यत्वेन चैत्यं व्यवह्रियते. उपचारस्यार्थः—उपचारोऽत्यन्तं विशकलितयोः शब्दयोः सादृश्याऽतिशयमहिम्ना भेदप्रतीतिस्थगनमात्रं यथाहि घटमृत्तिकयोरुदाहरणं यदा हि मृत्तिका स्वावस्थायां स्यात्, घटरूपेण न परिणता स्यात्तदापि सत्कार्यवादापेक्षया अथवा तिरोभावविवक्षया मृत्तिका, घटरूपेति मान्यतायामेतदुपचारस्योदाहरणमस्ति. विशेषत एतादृशीस्थितावपि, एषा मृत्तिका घटरूपेति कथनं, नाऽन्यथा यतो यद्यपि एवंस्थितौ मृत्तिकायां घटस्य जलाहरणाद्या धर्मा न सन्ति, अर्थादेतन्मृत्तिकातो घटस्य कार्यं न भवति तथापि रूपरसगन्धाद्याः केचित्समानधर्मा उभयत्र तिष्ठन्ति, अतः, तथा भविष्यत्काले सा घटीभवितुं शक्नोति, अत एवं कथनं न्याय्यमेव. पारिभाषिकशब्दैः, अत्र द्रव्यघटे भावघट आरोपित इति स्थापनाजिनो भावजिनत्वेनोपचर्यते. )

अर्हच्चैत्यानामहं कायोत्सर्गं करोमीति महावाक्यान्तर्गते 'अहंकरोमी' तिवाक्ये, उत्तमपुरुषैकवचननिर्देशोऽस्ति.

( पुरुषास् त्रयः सन्ति, प्रथमो, द्वितीयः, तृतीयः, संस्कृतव्याकरणे तान् पुरुषान् क्रमेणोत्तमो मध्यमश्च प्रथमश्चेति कथयन्ति, संस्कृते तृतीय.

पुरुषद्वारा रूपाख्यानं दत्तुं प्रचारोऽस्ति, तत्र तृतीयः-द्वितीयः, प्रथमः इति क्रमोऽस्ति, अस्मात् कारणात्, तृतीयः पुरुषः, प्रथम पुरुष इति, द्वितीयो मध्यस्थत्वान्मध्यमः प्रथमः, वक्तुः सम्बन्धित्वेनान्तिमत्वेनोत्तमः कथ्यते.)

तेन 'अहं' सर्वनाम्नाऽऽत्मनोऽभ्युपगमं दर्शयति. (अहमक स्म्, अहं करिष्यामि, अहं करोमीत्यादिप्रकारैः कालत्रयस्य व्यवहारेऽहमिति प्रतीतिर्भवति, तया प्रतीत्याऽप्यात्मा प्रत्यक्षसिद्धो वर्त्तते, यदि, आत्मनोऽनभ्युपगमे तदाऽहमिति शब्देन कस्य पदार्थस्य ग्रहणं स्यात्? कदाचिदहंशब्देन शरीरस्य ग्रहणं कुर्यात्तदा यथा 'मया कृत'मिति प्रतीतिः सचेतन-शरीरे भवति. तथाऽचेतनमृतकेऽपीदृशी प्रतीतिर्जायेत, यतः स्थितिद्वयेऽपि शरीरमस्त्येव, मृतके एतादृशी प्रतीतिर्न भवत्यतः 'मया कृतं, करोम्यहं' इत्यादिप्रतीतिः शरीराद्भिन्ने शरीरिणि आत्मनि भवति, स एवात्मा, नान्यत्किमपि शरीरादिकम्.)

## कायोत्सर्गपदस्य मर्मोद्घाटनम्-

कायोत्सर्गः=शरीरस्योत्सर्गः, कृताकारस्य=आकृति-जिनमुद्रया युक्तस्याथवाऽपवादरूपस्वा-भाविकक्रियारूपमुच्छ्वसितं निःश्वसितं कासितं, क्षुतं, जृम्भितं, उद्गारितं, वातनिसर्गं, भ्रमलीं पित्तमूर्च्छां, सूक्ष्माङ्गसञ्चारं, सूक्ष्मखेलसञ्चारं, सूक्ष्मदृष्टिसंचारं विनाऽर्थात्, अकस्मात् स्यात्तः शरीररक्षणं कर्त्तव्यं स्यादेतादृशाकारप्रतिपादक-सूत्रस्य 'अन्नत्थउससिएणं' रूपस्यो-च्चारणं कुर्वतः पुरुषस्य स्थानमौनध्यानक्रियां विनाऽन्यसर्वक्रियान्तरस्य अध्यासं (मिथ्या-ज्ञानं, तादात्म्यं, निवासं) उद्दिश्य अर्थात् कायं प्रतीत्य (आकारं-जिनमुद्रामागारं च) कुर्वतः पुरुषस्य स्थानमौनध्यानरूपक्रियाव्यतिरेकेण क्रियान्तरस्याध्याम-तादात्म्यस्य सर्वथा त्यागःकायोत्सर्ग इत्यर्थः, एवंविधं कायोत्सर्गं करोम्यहं (कायमेकस्थाने स्थिरं कृत्वा वाणीं मौनमयीं विधाय मानसं ध्यानेन सह संयुज्यात्मनि देहबुद्धिरूपाध्यासस्य नाशं निर्मायैव निर्मायःशुद्धः कायोत्सर्गो भवति.)

## अथाक्षेपपरिहारपूर्वकं पदान्वययोजनम्-

**आह कायस्योत्सर्ग इति षष्ठया समासः कृतः, अर्ह-च्चैत्यानामिति च प्रागावेदितं, तत्किमर्हच्चैत्यानां कायोत्सर्गं करोमीति, नेत्युच्यते, षष्ठीनिर्दिष्टं तत्पदं पदद्वयमतिक्रम्य मण्डू-**

कप्लुत्या वन्दनप्रत्ययमित्यादिभिरभिसम्बध्यते, ततश्चार्हच्चैत्यानां वन्दनप्रत्ययं करोमि कायोत्सर्गमिति द्रष्टव्यं.

तत्र वन्दनम्–अभिवादनं प्रशस्तकायवाङ्मनःप्रवृत्तिरित्यर्थः, तत्प्रत्ययं–तन्निमित्तं, तत्फलं मे कथं नाम कायोत्सर्गादेव स्यादित्यतोऽर्थमित्येवं सर्वत्र भावना कार्या, तथा "पूयणवत्तियाएत्ति" पूजनप्रत्ययं–पूजननिमित्तं, पूजनं–गन्धमाल्यादिभिः समभ्यर्चनं। तथा "सक्कारवत्तियाएत्ति" सत्कारप्रत्ययं–सत्कारनिमित्तं, प्रवरवस्त्राभरणादिभिरभ्यर्चनं सत्कारः। आह–साधुः श्रावको वा?, तत्र साधोस्तावत्पूजनसत्कारावनुचितावेव, द्रव्यस्तवत्वात्, तस्य च तत्प्रतिषेधात् "तो कसिणसंजमविऊ पुप्फाईयं न इच्छन्ति" इतिवचनात्, श्रावकस्तु सम्पादयत्येवैतौ यथाविभवं, तस्य तत्प्रधानत्वात्, तत्र तत्त्वदर्शित्वात्, जिणपूयाविभवबुद्धि'त्तिवचनात्, तत्कोऽनयोर्विषय इति, उच्यते, सामान्येन द्वावपि साधुश्रावकौ, साधोः स्वकरणमधिकृत्य द्रव्यस्तवप्रतिषेधः, न पुनः सामान्येन, तदनुमतिभावात्,

पं...."तत्फलेत्यादि" "तत्फलं" तस्य–वन्दनस्य फलं–कर्म्मक्षयादि मे–मम कथं नाम–केनापि प्रकारेण कायोत्सर्गस्यैवावस्थाविशेषलक्षणेन कायोत्सर्गादेव न त्वन्यतोऽपि व्यापारात्, तदानीं तस्यैव भावात् "स्याद्" भूयाद् 'इति' अनया आशंसया "अतोऽर्थम्" वन्दनार्थमिति.

टी.....वादी–( शङ्का ) कायस्योत्सर्ग इति विग्रहेण षष्ठ्या तत्पुरुषसमासः–प्रकृतः ( यत्र समासे पूर्वपदमुत्तरपदेन सह विभक्त्याः सम्बन्धेन युक्तं स तत्पुरुषः कथ्यते, तत्रोत्तरपदं प्रधानं च पूर्वपदं गौणं ) अत्र पूर्वपदरूपकायस्योत्सर्गरूपोत्तरपदेन सह विभक्त्या सम्बन्धः, अत 'कायोत्सर्ग' इत्यत्र षष्ठीतत्पुरुषसमासोऽस्ति, किञ्च 'अर्हच्चैत्यानां' इति च पूर्वमावेदितं, तत्किमर्हच्चैत्यानां कायोत्सर्गं करोमीत्यन्वयः क्रियते भवद्भिस्तदुच्यते–

**समाधानम्**=षष्ठीविभक्त्या दर्शितं यद् 'अर्हच्चैत्यानां' इति पदं, तस्यान्वयः-सम्बन्धः, अग्रेतनं पदद्वयमतिक्रम्य मण्डूकप्लुत्या ('मण्डूकप्लुतिन्यायः' यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति, तद्वत्प्रकृतेऽपि) उत्प्लुत्य 'करोमि च कायोत्सर्गं' इति पदद्वयं-पश्चात् कृत्वा-उल्लंघ्य वन्दनप्रत्ययमित्यादि-पदैः सहाभि-सम्बध्यते, अर्थात् 'अर्हच्चैत्यानां वन्दनप्रत्ययं करोमि' कायोत्सर्गं' अर्हतां प्रतिमानां वन्दनानिमित्तं कायोत्सर्गं करोम्यहमिति पदान्वयो योज्यः ।

कायोत्सर्गकरणाय निमित्तानां-प्रयोजनानां (उद्देश्यं यथा तस्यागमन-कारणमित्यादौ कारणमुद्देश्यं, प्रयोजनं, फलं वेत्यर्थः) वर्णनं वन्दनप्रत्ययमित्यादिपदादारभ्य निरुपसर्गार्थमिति पर्यन्तेषु षट्सु पदेषु दर्शितमस्त्यतः-षट्पदवती-निमित्तसंपदो निरूपणं क्रियते-

(१) वन्दनप्रत्ययमित्यत्र वन्दनं-अभिवादनं (अभिमुखीकरणाय वादनं वदनं वद 'ल्युट्' वा अभिमुखं वाद्यते आशीरनेन 'वदणि च ल्युट्। अभिवाद्यते आशिषं कार्यतेऽनेन) प्रशस्त-कायवाङ्मनःप्रवृत्तिरित्यर्थः, वन्दनप्रत्ययमित्येतत्सूत्रस्यैषोऽर्थः, अर्हतामर्थाद्भावार्हतां यानि चैत्यानि -चित्तसमाधिजनकप्रतिमालक्षणानि, तेषां वन्दनादिकप्रतीतिरूपमहं कायोत्सर्गं करोमि, कायोत्सर्गः-स्थानमौनध्यानानि विना क्रियान्तरत्यागः, तमहं करोमि.

('वन्दनवत्तियाए'-वन्दनं-श्रेष्ठमनोवचःकायप्रवृत्तिः, तन्निमित्तमर्थाद् वन्दनतो यथा पुण्यं भवेत् तादृशं कायोत्सर्गतोऽपि मम पुण्यं भवतु 'वत्तिआए' त्ति आर्षप्रयोगः, इति प्रतिमाशतके टीकायां)

तत्प्रत्ययं-तन्निमित्तं, तत्फलं मे कथं नाम कायोत्सर्गादेव स्यादित्यतोऽर्थमित्येवं सर्वत्र भावना कार्या (यद्यपि साधुः श्रावकश्च श्रीमदर्हतां चैत्यानि निरन्तरं यथोयोग्यं वन्देते एव तथापि, अधिकाधिकं कर्तुं भावं प्रदर्शयितुं भावातिशय-वृद्धये कायोत्सर्गद्वारा प्रार्थना कार्या, साऽपि युक्तियुक्ता, एवं रीत्या भक्तेरतिशयप्रकटन-जननद्वारा कर्मनिर्जराया आधिक्यं भवत्येव.)

(२) पूजनप्रत्ययं=तथा अर्हच्चैत्यानां पूजननिमित्तकफलमुद्दिश्याहं कायोत्सर्गं करोमीति वाक्येऽर्हच्चैत्यानां पूजनेनार्थाद् गन्धपूजा (चन्दनादिपूजा) माल्यपूजाभि (पुष्पादिपूजादिभिः) रादिना त्रिप्रकारी-पञ्चप्रकारी-अष्टप्रकारी-सप्तदशभेदवती-एकविंशतिभेदवती-अष्टोत्तर-शत-प्रकारीपूजाभिर्यादृक् कर्मक्षयादिरूपं फलं भवेत्तादृक् फलं कायोत्सर्गतो मम भवतु, एतदर्थं कायोत्सर्गं करोमि.

(३) तथाऽर्हच्चैत्यानां सत्कारनिमित्तकफलमुद्दिश्याहं कायोत्सर्गं करोमि. अत्र वाक्ये-ऽर्हत्प्रतिमायाः सत्कारः=उत्तमोत्तमवस्त्रपरिधापनादिकं, आभरणं (भिन्नभिन्नालंकारभूषणादिकं)

कस्तूरी. आदिना प्रभोःशरीरे पत्रादिद्वाराऽङ्गरचनारूपं तदेव सत्कारः, अर्थादर्हच्चैत्यानां सत्कारेण यादृशं कर्मक्षयादिरूपं फलं भवेत्तादृशं कर्मक्षयादिरूपं फलं कायोत्सर्गतो भवतु.

( पापानां गमनागमनादि–समुत्थानां क्षपणार्थं–निर्घातनार्थमीर्यापथिक्या कायोत्सर्ग इति योगः। गमनागमनादिसमुत्थपापक्षयरूपं फलमीर्यापथिकी–कायोत्सर्गाद् भवति, इति तथा वंदनप्रत्ययादीनि षट् निमित्तानि–फलानि येभ्यस्तु, तथा त्रय उत्सर्गा इति शेषः, वंदन–पूजन–सत्कार–सन्मान–बोधिलाभ–निरुपसर्गेति षट् फलानि चैत्यवंदनादिकायोत्सर्गेभ्यः, तत्र–"सुमरणथुइनमणाई शुभमणवइतणुपवित्ति वंदणयं। पुप्फाईहिं पूयणमिह वत्थाईहिं सक्कारो ॥१॥ संमाणो मणपीइइ, विणयपडिवत्ति, बोहिलाभोउ। पेच्चजिणधम्मसंपत्ति, निरुवसग्गो उनिव्वाणं ॥२॥ अरिहाइवंदणाइसु जं पुन्नफलं हवेउ स मज्झ, उस्सग्गाउच्चियतप्फलेहिं बोही तओवि सिवो ॥३॥"

तथा प्रवचनसुराः–सम्यग्दृष्टयो देवास्तेषां स्मरणार्थं वैयावृत्त्यकरेत्यादि–विशेषणद्वारेणोपबृंहणार्थं क्षुद्रोपद्रवविद्रावणादिकृते तत्तद्गुणप्रशंसया प्रोत्साहनार्थमित्यर्थः, यद्वा तत्कर्त्तव्यानां वैयावृत्त्यादीनां प्रमादादिना श्लथीभूतानां प्रवृत्त्यर्थं, अश्लथीभूतानां तु स्थैर्याय च स्मारणा–ज्ञापना, तदर्थं, सारणार्थं वा–प्रवचनप्रभावनादौ हितकार्ये प्रेरणार्थं. किं ? उत्सर्गः–कायोत्सर्गः चरम इति शेषः, इत्येतानि निर्मितानि–प्रयोजनानि फलानीति यावद् अष्टौ चैत्यवंदनायां भवन्तीति शेषः। श्री दे. चै. श्रीधर्म. संघाचारविधौ। पृ. ४०० )

अत्र मुख्यत्वे द्रव्यपूजया च द्रव्यसत्कारेण यत्फलं प्राप्नुयात् तत्फलं चैत्यवन्दनान्तर्गत-कायोत्सर्गतोऽपि भवतु इत्यर्थः, तथाऽपि भावपूजाया अधिकारिणो मुनेः कृते, एतत्पदसम्बन्धी ( द्रव्यपूजाफलसम्बन्धी ) विसंवादो नास्ति, द्रव्यपूजा–सत्कफल–याञ्चा–योग्याऽस्ति. यतो मुनेरनुमतिद्वारा द्रव्यपूजा विद्यतेऽर्थाद् द्रव्यपूजा प्रशंसनीया गण्यते, एतावदपि न, परन्तु द्रव्यपूजामकुर्वन्तं जनं द्रव्यपूजा–कृते प्रेरयत्यपि. तथा पूजनसत्कार–सन्मानयोः प्रार्थना साधुकृते नानुचिता, साधूनां द्रव्यस्तवनिषेधस्तु केवलं करणमपेक्ष्यास्ति, किन्तु कारणानुमती अपेक्ष्य नास्ति. जिनपूजा कार्यैव यतो गृहिणां लक्ष्म्याः सदुपयोगोऽस्माच्छुभतरं किमपि स्थानं नास्तीत्यादि–देशनादानद्वारा भगवतां पूजासत्कारयोः कारणं तथा पूजासत्कारौ दृष्ट्वाऽनुमोदनमेतत् साधूनामर्थे कर्त्तव्यमस्ति. शङ्का=पूजासत्कारयोरधिकारी साधु र्वा श्रावकः कोऽस्ति ? तत्र पूजासत्कारौ साधूनपेक्ष्यानुचितावेव. यतः पूजासत्कारौ द्रव्यस्तवरूपौ स्तः, ।

( "अकसिण पवत्ताणं, विरयाविरयाण एस खलु जुत्तो।
जेकसिणसंजमाण विऊपुप्फादिए ण कप्पए ॥ ( पुप्फाइयं न इच्छन्ति )"

( महानिशीथसूत्रे तृतीयाध्ययने )

" अकृत्स्नप्रवर्तकानां ( प्रवृत्तानां ) विरताविरतानां एष खलु युक्तः ।
येषां कृत्स्नसंयमानां विदां पुष्पादिकं न कल्पते ॥ " )

महानिशीथसूत्रेण साधूनां द्रव्यस्तवो निषिद्धोऽस्ति. श्रावकस्तु यथाविभवं पूजासत्कारौ सम्पादयत्येव. 'जिनपूयाविभवबुद्धि' इति शास्त्रीयवचनद्वारा, श्रावकस्य द्रव्यस्तवविषयक–प्रधानत्वेन तत्र–द्रव्यस्तवे तत्त्वदर्शनमस्ति, तस्मादनयोः साधुश्रावकयोः को विषयः ? कोऽधिकारी ? इति चेदुच्यते—

**समाधानम्**=सामान्येन ( पूजकत्वापेक्षया, करणकारणानुमोदनान्यतमत्वरूपसामान्यापेक्षयाऽथवा करणादित्रितयरूपसर्वापेक्षया ) द्वावपि साधुश्रावकौ विषयरूपाधिकारिणौ स्तः, शास्त्रे साधोः स्वकरणमधिकृत्य द्रव्यस्तवनिषेधः, अर्थात् साधुः स्वयं द्रव्यपूजारूपद्रव्यस्तवं न कुर्यादिति निषेधः कृतोऽस्ति. परन्तु करणकारणाऽनुमोदनरूपसर्वसामान्यापेक्षया न निषिद्धम्, यतः पूजासत्काररूपद्रव्यस्तवविषये साधूनामनुमोदनारूपोऽधिकारोऽस्ति, एतत्प्रमाणव्यवहारतः सिद्धं, तथा च पूजनसत्कारविषयकानुमोदना—प्रशंसा साधुषु व्यवस्थिताऽस्त्यतः साधूनामनुमतिरूपाऽपेक्षया द्रव्यपूजारूपो द्रव्यस्तवो विद्यते, ततो यत्फलं भवति तत्फलविषयकाशंसा, कायोत्सर्गतो याचनीयेति प्रमाणरूपेण युक्तमस्ति.

साधूनां पूजनसत्काररूपद्रव्यस्तवविषयिण्याः प्रशंसाया आकारं दर्शयित्वोपदेशनदानद्वारा द्रव्यस्तवस्य कारणं ( कारापणं ) कथं साधुषु घटेत ?—

**भवति च भगवतां पूजासत्कारावुपलभ्य साधोः प्रमोदः, साधु शोभनमिदमेतावज्जन्मफलमविरतानामिति वचनलिङ्गगम्यः, तदनुमतिरियं, उपदेशदानतः कारणापत्तेश्च, ददाति च भगवतां पूजासत्कारविषयं सदुपदेशं—कर्त्तव्या जिनपूजा, न खलु वित्तस्यान्यच्छुभतरं स्थानमिति वचनसन्दर्भेण, तत्कारणमेतत्, अनवद्यं च तद्, दोषान्तरनिवृत्तिद्वारेण, अयमत्र प्रयोजकोंऽशः, तथा भावतः प्रवृत्तेः,, उपायान्तराभावात्,**

पं....ननु यावज्जीवमुज्झितसर्वसावद्यस्य साधोः कथं सावद्यप्रकृतेः द्रव्यस्तवस्योपदेशेन कारणं युज्यते ? इत्याशङ्कयाह—" अनवद्यं च " निर्दोषं च " एतद् " द्रव्यस्तवकारणं,

हेतुमाह-" दोषान्तरनिवृत्तिद्वारेण " दोषान्तराद्-द्रव्यस्तवापेक्षयाऽन्यस्मादिन्द्रियार्थहेतोर्महतः कृष्याद्यारम्भविशेषात्तस्य वा या निवृत्तिः-उपरमः स एव द्वारम्-उपायस्तेन, ननु कथमिदमनवद्यम्? अवद्यान्तरे प्रवर्त्तनादित्याशङ्क्याह-" अयं " दोषान्तरान्महतो निवृत्तिरूपः "अत्र" द्रव्यस्तवोपदेशने " प्रयोजकः " प्रवर्त्तकः " अंशः " निवृत्तिरूपाया द्रव्यस्तवकर्तृक्रियाया विभागः, कुत इत्याह-"तथाभावतो" दोषान्तरनिवृत्तिभावात् "प्रवृत्तेः" चेष्टायाः " उपायान्तराभावात् " द्रव्यस्तवपरिहारेण अन्यहेतोरभावात्, कथमित्याह-

टी०....तथा च=इदमेतावद-विरतानां(विरताविरतानां वा) जन्मनः फलं साधु-शोभनमिति वचनलिङ्गगम्यम्, भवति च भगवतां पूजासत्कारावुपलभ्य साधोः प्रमोदः-तदनुमतिरियं.

( पूयाफलपरिकहणा पमोयणा चोयणा उ कारावणं ।
अनुमोयणाऽविजायइ पमोयउववूहणाईहिं ॥ ४११ ॥ बृ. )

उपदेशदानतः कारणापत्तेश्च,

( सुव्वइय वइररिसिणो कारावणंपिय अणुट्ठियमिमस्स ।
वायगगंथेसु तहा एयगया देसणा चेव ॥ ४१२ ॥ बृ. )

ददाति च भगवतां पूजासत्कारविषयं सदुपदेशं-' कर्त्तव्या जिनपूजा ' न खलु वित्तस्याऽन्यच्छुभतरं स्थानमिति वचन-सन्दर्भेण, तत्कारणमेतत्, अनवद्यं च तद्, दोषान्तरनिवृत्तिद्वारेण,

( पूजासत्कारविषयकप्रशंसा तु यथा दानधर्मस्य प्रशंसयाऽऽरम्भपरिग्रहप्रशंसा न गण्यते यतः तत्र त्यागांशस्य प्रशंसा वर्त्तते, तथाऽत्रापि पूजासत्काररूप-द्रव्यस्तवस्य प्रशंसया, आरम्भपरिग्रहप्रशंसा न गण्यते यतोऽत्र भक्तिबहुमानांशस्य प्रशंसा वर्त्तते. )

अयमत्र प्रयोजकोंऽशः, तथा भावतः प्रवृत्तेः, उपायान्तराभावात्, अर्थादेतद् द्रव्यस्तवस्योपदेशद्वारा कारणं ( कारापणं ) साधूनां निर्दोषमेव, यतस्तत्र द्रव्यस्तवापेक्षया यदन्यमहतः, इन्द्रियार्थ-विषयहेतुभूतकृष्यादि-महारम्भविशेषतो विरमणमथवा तन् महाविषयहेतुभूत कृष्यादि-महारम्भविशेषतो निवृत्तिरूप-महागुणरूपोपायहेतुद्वारलक्षणमस्ति, अर्थान्महादोषान्तर निवृत्तिरूपमहागुणद्वारा द्रव्यस्तवस्य कारणं ( कारापणं ) तन्निरवद्यमेव.

अन्यच्च द्रव्यस्तवस्योपदेशप्रवृत्तिं प्रति द्रव्यस्तवकर्तृनिष्ठक्रियाविभागांशभूतमहादोषान्तर निवृत्तिः, हेतुरस्ति, यतो द्रव्यस्तवोपदेशं विना द्रव्यस्तवप्राप्तिरन्यस्य कथं स्यादर्थाद् द्रव्यस्तवं विना महादोषान्तरनिवृत्तिरन्यस्य न स्यात्, द्रव्यस्तवसत्त्व एव महादोषान्तरनिवृत्तिः संभवेत्,

अर्थादन्येषां महादोषान्तरनिवृत्तये साधूनां महादोषान्तरनिवृत्तिहेतुभूतद्रव्यस्तवस्योपदेशोऽनिवार्य आवश्यको भवेदेव. एवं द्रव्यस्तवोपदेशो प्रवर्त्तकत्वरूपेण महादोषान्तरनिवृत्तिरेवोद्देश्यभूता. यतो द्रव्यस्तवोपदेशाऽभावे द्रव्यस्तवो न भवेद्, द्रव्यस्तवाभावे महादोषान्तरनिवृत्तेरभावः स्यादतो द्रव्यस्तवोपदेशदानद्वारा साधूनां द्रव्यस्तवस्य कारणं ( कारापणं ) निरवद्यं–महागुण-निष्पादकं–निर्दोषं, युक्तियुक्तमेव ।

द्रव्यस्तवोपदेशने प्रयोजकः–प्रवर्त्तकः. अंश–निवृत्तिरूपो द्रव्यस्तवकर्तृक्रियाया विभागरूपः, कुत इत्याह–तथाभावतः–दोषान्तरनिवृत्तिभावात् प्रवृत्तेः–चेष्टाया, उपायान्तराभावात्= द्रव्यस्तवपरिहारेण, अन्यहेतोरभावो वर्त्तते ।

### अत्र विषये दृष्टान्तपूर्वकभावना विचार्या–

## नागभयसुतगर्त्ताकर्षणज्ञातेन भावनीयमेतत्, तदेवं साधुरित्थ-मेवैतत्सम्पादनाय कुर्वाणो नाविषयः, वचनप्रामाण्यात्, इत्थमेवेष्ट-सिद्धेः, अन्यथाऽयोगादिति,

पं....“ नागेत्यादि ” नागभयेन–सर्पभीत्या सुतस्य–पुत्रस्य गर्त्तात्–श्वभ्रादाकर्षणम्–अप-नयनमेतदेव ज्ञातं–दृष्टान्तस्तेन “भावनीयमेतत्” साधोर्द्रव्यस्तवकारणं देशनाद्वारेण, तथाहि–किल काचित्स्त्री प्रियपुत्रं रमणीयरूपमुपरचय्य रमणाय मन्दिरस्य बहिर्विससर्ज्ज, स चातिचपलतया अविवेकतया च, इत इतः पर्यटन्नवटप्रायमतिविषमतटमेकं गर्त्तमाविवेश, मुहूर्त्तान्तरे च प्रत्य-पायसम्भावनया चकितचेता माता तमानेतुं तं देशमाजगाम, ददर्श च गर्त्तान्तर्वर्त्तिनं निजसूनुं, तमनु च प्रचलितमनाकलितकोपप्रशममञ्जनपुञ्जकालकायमुद्घटितातिविकटस्फटाटोपं पन्नगं, ततोऽसौ गुरुलाघवालोचने चतुरा नूनमतः पन्नगादस्य महानपायो भवितेति विचिन्त्य सत्वर-प्रसारितकरा गर्त्तात् पुत्रमाचकर्ष, यथाऽसौ स्तोकोत्कीर्णशरीरत्वक्तया सपीडेऽपि तत्र न दोषवती, परिशुद्धभावत्वात्, तथा सर्वथा त्यक्तसर्वसावद्योऽपि साधुरुपायान्तरतो महतः सावद्यान्तरा-न्निवृत्तिमपश्यन् गृहिणां द्रव्यस्तवमादिशन्नपि न दोषवानिति ।

**टी०....नागभयसुतगर्त्ताकर्षण–ज्ञातेन भावनीयमेतत्**–सर्पस्य भयेन पुत्रस्य गर्त्ता-दपनयनमेतदेव ज्ञातं–दृष्टान्तस्तेन भावनीयमेतत्, साधोर्द्रव्यस्तवकारणं देशनाद्वारेण, पञ्जिकायां दृष्टान्तो द्रष्टव्यः। सर्वथा त्यक्तसर्वसावद्योऽपि साधुरुपायान्तरतो महतः सावद्यान्तरान्निवृत्तिम-पश्यन् गृहिणां द्रव्यस्तवमादिशन्नपि न दोषवानिति ।

तदेवं साधुरित्थमेवैतत्सम्पादनाय–कारणानुमतिपूर्वक–द्रव्यस्तवसम्पादनाय, कारणानुमती कुर्वाणः, तत्र प्रवर्त्तमानो नाविषयः–द्रव्यस्तवस्याऽपेक्षयाऽधिकारी, साधुरेव. एवमेव शास्त्र-वचनस्य प्रामाण्यमस्ति, यदि वचनप्रामाण्यमन्येत तदा पूजासत्काररूप–द्रव्यस्तवतो यत् कर्मक्षयादि फलं भवति, तत् कायोत्सर्गतो भवतु, इत्याकारकाशंसया प्रार्थनया वा कर्मक्षयादि-रूपेष्ट–फल–सिद्धिर्भवति. अन्यथा–वचन–प्रामाण्याऽस्वीकारे पूर्वोक्तेष्टफलसिद्धेरभावः स्यादिति साधोर्द्रव्यस्तवाधिकार–सिद्धिः।

श्रावकस्य पूजासत्कारविषयेऽसन्तोषः–

**श्रावकस्तु सम्पादयन्नप्येतौ भावातिशयात् अधिकसम्पाद-नार्थमाह, न तस्यैतयोः सन्तोषः,**

**तद्धर्म्मस्य तथास्वभावत्वात्, जिनपूजनसत्कारयोः करण-लालसः खल्वाद्यो देशविरतिपरिणामः, औचित्यप्रवृत्तिसारत्वेन, उचितौ चारम्भिण एतौ, सदारम्भरूपत्वात्,**

पं....“तद्धर्म्मेत्यादि” तद्धर्म्मस्य–श्रावकधर्म्मस्य “तथास्वभावत्वात्” जिनपूजासत्कार-योराकाङ्क्षातिरेकात्, असन्तोषस्वभावत्वात्, एतदेव भावयति–“जिनपूजासत्कारयोः” उक्त-रूपयोः “करणलालस एव” विधानलम्पट एव, खलुशब्दस्यैवकारार्थत्वात्, यः सचित्ताऽऽ-रम्भवर्जाभिधानाष्टमप्रतिमाभ्यासात् प्राक्कालभावी “देशविरतिपरिणामः” श्रावकाध्यवसायः, कथमित्याह–“औचित्यप्रवृत्तिसारत्वेन” निजावस्थाया आनुरूप्येण या प्रवृत्तिः–चेष्टा तत्प्रधान-त्वेन, औचित्यमेव भावयन्नाह–“उचितौ च” योग्यौ च “आरम्भिणः” तत एव पृथिव्याद्यारम्भवतः “एतौ” पूजासत्कारौ, कुत इत्याह–“सदारम्भरूपत्वात्” सन्–सुन्दरो जिनविषयतया आरम्भः–पृथिव्याद्युपमर्दस्तद्रूपत्वाद्, आरम्भविशेषेऽपि कथमनयोः सदारम्भत्व-मित्याशङ्क्याह—

टी०....अथ श्रावकस्तु स्वयं नियमतोऽर्हच्चैत्यानां पूजासत्कारौ सम्पादयत्येव तथापि भावस्य–परिणामस्यातिशयात्–प्राबल्यात्, पूजासत्कारौ, अधिकाऽधिकं कर्तुं वदति “अर्हच्चै-त्यानां पूजासत्काराभ्यां यत्कर्मक्षयादि फलं भवेत्तत् कायोत्सर्गतो मम भवतु” इत्याशंसा (प्रार्थना–भाव) विशिष्टः श्रावकः ‘पूयणवत्तियाए’ ‘सक्कारवत्तियाए’ इत्यादि पदानि वद-तीति युक्तमेव. यतः श्रावकस्य पूजासत्कारविषये संतोषो (तृप्तिः) न भवति, यतः श्रावक-

धर्मस्य जिनपूजासत्कारविषये इच्छातिरेकादसन्तोषस्वभावो (कृतयोरपि, एतयो र्न संतोष इति स्वरूपो) वर्त्तते, एतदेव स्पष्टयति–

जिनपूजा–जिनसत्कारयोः पुनरपि पुनः करणलम्पट एव, यः सचित्ताऽऽरम्भवर्जननामकाऽष्टम–प्रतिमाया अभ्यासात्, आद्यः प्राक्कालभावी, देशविरतिपरिणामः–श्रावकस्याध्यवसायो भवति, यतो निजावस्थाया आनुरूप्यरूपौचित्यद्वारा प्रवृत्तिरतस्तत्प्रधानतावान् श्रावकाऽध्यवसायो वर्त्तते, किमौचित्यमत्रेति चेदुच्यते तत एव पृथिव्याद्यारम्भवतः 'आरम्भिणः' श्रावकस्य पूजा-सत्कारावेतावुचितौ–योग्यावेव. यतः सन्–जिनविषयतया सुन्दरः, आरम्भः–पृथिव्याद्युपमर्दस्तद्-रूपौ–सदारम्भरूपौ पूजासत्कारौ वर्त्तेते.

(मुनेर्निर्मलाशयपूर्वक–तया नद्या उत्तारे हिंसा न कथिता, यद्यपि नद्या उत्तारे जीवविराधनाऽस्त्येव तथापि विधिना, यतनया, शुभाशयतया नद्या उत्तारे मुने हिंसा न कथिता, तथा विधियोगेन शुभभावेन यतनया जिनेन्द्राणां पूजाऽपि निःश्रेयस–निबन्धनम्, एषा जिनपूजा सोपयोगं सशुभभावं भवति, तस्मात्, जिनपूजादौ, अपरिमितारम्भमान्यतावन्तः स्वयं भवजले पतन्ति, अन्यांश्च पातयन्ति, यस्यां क्रियायां विषयारम्भत्यागोऽस्ति, सा क्रियानित्यं भवजलतारिणी कथ्यते. यतः संसारहेतुभूत–विषयारम्भः पापवर्धको भवति, तथापि यः सदारम्भोऽस्ति, ततोऽशुभभावान्निवृत्तिश्च पापक्षयो भवति, जिनेन्द्रपूजया वीतरागदेवस्य गुणानां ध्यानं भवति, वीतरागविषयकगुणध्यानरूप–शुभभावतो विषयारम्भत्यागतो निर्भयताऽऽयाति. अत एव जिनपूजादिकं सदारम्भरूपमस्ति, तत्र चाशुभभावनिवृत्तिरूपो महान् गुणोऽस्ति.)

अन्यच्च प्रतिमापूजनेन विनयो भवति, विनयोऽतरङ्गतपस्त्वेन कथ्यते, यतः प्रभोः प्रतिमाविनयेन शुभभावो भवति, शुभभावेन च जीवः मुक्तिगतिप्राप्तये भाग्यवान् भवति.

यः कश्चित् प्रतिमापूजायामारम्भं मत्वा जिनेन्द्रं न पूजयति, तन्न युक्तं यतः प्रतिमा-पूजने आरम्भवादी, किं दानं, वन्दनं, आदेशादिक्रियां न विदधाति? दानवन्दनादिक्रियायां क्रियमाणायां किं वायुकायादि–जीवस्य विराधना न भवति? दानादिधर्म–प्रवृत्ति–स्वीकारं विना किं चलति? दानादिप्रवृत्तौ क्रियमाणायां वायुकायादिर्जीवविराधनाया आशयो नास्ति. अपि तु शुभाशयो वर्त्तते, तर्हि तदुत्तरे विज्ञापनमस्ति, यत् पूजायां क्रियमाणायामपि जल-कायादिजीवविराधनाया भावो नास्ति परन्तु शुभाशयोऽस्ति. पुष्पादिजीवारम्भतः पूजा सावद्येति

मा वादीः, यतः पुष्पादिजीवारम्भतः पूजा सावद्या दृश्यते परन्तु, अनुबन्धापेक्षयोत्तरोत्तरभाव-वृद्धितः पूजा निरवद्याऽस्ति. यतः पूजाकाले जिनेन्द्राणां गुणा अति बहुमता भवन्ति. ततः शुभध्यानं प्रवर्त्तते, यस्माच्च येन पापबन्धो भवतीदृशाऽसद् (मलिन) आरम्भतो निवृत्तिर्भवति, वीतरागप्रभोर्बहुमानेन भावो निर्मलो भवति, ततश्चित्तशुद्धिर्भवति, अन्योऽपि लाभो भवति य ज्जिनेन्द्रपूजामर्चां दृष्ट्वा भव्यानां भव्यभाव उल्लसत्येव, तच्छुभभावबलेन, षट्जीवनिकायरक्षको भूत्वा भवजलात्तरति, यथा नदीमुत्तरतो मुनेर्दयापरिणामो मिथ्या नास्ति तथा श्रावकस्य पुष्पपूजादिकं कुर्वतोऽपि पुष्पादिजीवोपरि दयापरिणामः (निःशूकत्वाभावभावः) मिथ्या नास्ति, किञ्च जैनी पूजा रोगिण औषधसमाऽस्ति, गृहिश्रावकस्तु, असदारम्भरूपरोगवानस्ति, तदसदा-रम्भरोगोपशमनाय सद् (शुभ) आरम्भरूपौषधसमा जिनपूजाऽस्ति, अपि च मुनिस्तु सर्वसावद्य-योगतो विरतोऽस्ति, तेषां कोऽपि, असदा रम्भरूपो रोगो नास्त्येव ततः कथं रोगं विनौषधम् ?

शङ्का=जिनपूजायां मनोवचोवपूरूपशुभयोगेन, द्रव्याश्रवो जायते ततो निजपरिणामरूप-धर्मः कथं न हन्यते ?

समाधानं=जिनपूजया निजपरिणामरूपो धर्मो न हन्यते, यावदात्मनो योगक्रिया न निवृत्ता, तावदात्मा योगारम्भवानस्ति, अर्थाद् यत् क्रियाकरणेन निजस्वभावपरिणतिरूपात्मधर्मो नष्टो भवेत्सा क्रिया न कर्त्तव्या, परन्तु वीतरागपूजया तु, आत्मधर्महानिर्न भवति प्रत्यु-तात्मधर्मे पुष्टिर्भवति, तत एव जिनपूजायामादरः किं न कर्त्तव्यः ? अपि तु कर्त्तव्य एव, जिनपूजाकरणेन द्रव्याश्रवो भवति, तथाऽपि साऽऽत्मधर्मपोषकत्वेन पूजाऽवश्यंकरणीया आदर-णीया. यावन्मनोवचःकायरूपयोगक्रिया न निवृत्ता, तावत्ते शुभे वाऽशुभे मार्गे प्रवर्त्तन्ते ततस्तु योगत्रयेण जिनपूजारूपशुभमार्गे प्रवर्त्तमानस्य श्राद्धस्य को विद्वान् निषेधयेत् ? श्रावको गृही तु असदारम्भी वर्त्ततेऽर्थाद् येन पापं बध्यते तादृशारम्भं करोति, तस्मात्संसारसागरं तरीतुं श्रावकेणाऽवश्यं जैनी पूजा कार्या.

शङ्का=द्रव्यस्तवेन पुण्यं बध्यते, ततश्च तत्स्वर्गस्य कारणम्, अपि च मोक्षस्य कारणं नास्ति, ततः कथं स कर्त्तव्यः ?

समाधानं=द्रव्यस्तवोऽवश्यं करणीयः, यतो द्रव्यस्तवो भावस्तवस्य कारणमस्ति, अत आत्मधर्मप्रकटनकारकत्वेनाऽवश्यमादरणीयः, यथा स्वर्गस्य कारणं सराग—संयमोऽस्ति तथापि सरागसंयमो गृह्यते, तथाऽत्रापि ज्ञेयं,

शङ्का=द्रव्यस्तव एषोऽप्रधानस्तवोऽस्ति, अतस्तं त्यक्त्वा भावस्तवः केवलं कथं न क्रियेत ?

**समाधानं**=द्रव्यस्तवेन—पूजादिना, भावस्तवः—चारित्रप्राप्तिर्भवति अतः द्रव्यस्तवघटक-द्रव्यशब्दोऽत्राप्रधानवाचको नास्ति, अपि तु कारणवाचको ज्ञेयः, अतो द्रव्यस्तवस्य भाव-स्तवकारणत्वेनाऽवश्यं द्रव्यस्तवो विधातव्य एवाधिकारिणा.

अथ शङ्का समाधानदृष्टान्तपूर्वकं श्रावकस्य पूजासत्कार–विषयकोऽधिकारः सदा नियतो-ऽस्तीति विषय–स्पष्टीकरणम्—

**औचित्याज्ञाऽमृतयोगात्, असदारम्भनिवृत्तेः, अन्यथा तद-योगादतिप्रसङ्गादिति, तथाहि—द्रव्यस्तव एवैतौ, स च भाव-स्तवाङ्गमिष्टः,**

**तदन्यस्याप्रधानत्वात्, तस्याभव्येष्वपि भावात्, अतः आज्ञयाऽसदारम्भनिवृत्तिरूप एवायं स्यात्, औचित्यप्रवृत्तिरूप-त्वेऽप्यल्पभावत्वाद् द्रव्यस्तवः, गुणाय चायं कूपोदाहरणेन,**

**न चैतदप्यनीदृशं इष्टफलसिद्धये, किं त्वाज्ञामृतयुक्तमेव, स्थाने विधिप्रवृत्तेरिति सम्यगालोचनीयमेतत्॥ तदेवमनयोः साधुश्रावकावेव विषय इत्यलं प्रसङ्गेन।**

पं..."आज्ञामृतयोगाद्" आज्ञैव—"जिनभवनं जिनबिम्ब" मित्याद्याप्तोपदेशरूपाऽमृतम्—अजरामरभावकारित्वात् तेन योगाद्, आज्ञापि किंनिबन्धनमित्थमित्याशङ्क्याह—"असदा-रम्भनिवृत्तेः" असत इन्द्रियार्थविषयतया असुन्दरस्यारम्भस्य ततो वा जिनपूजादिकाले निवृत्तेः, ननु तन्निवृत्तिरन्यथापि भविष्यतीत्याशङ्क्याह—"अन्यथा" आज्ञामृतयुक्तौ पूजासत्कारौ विमुच्य "तदयोगाद्" असुन्दरारम्भनिवृत्तेरयोगाद्, विपक्षे बाधामाह—"अतिप्रसङ्गात्" प्रकारान्तरेणाप्यसदारम्भनिवृत्त्यभ्युपगमे घृतरमणान्दोलनादावपि तत्प्राप्त्याऽतिप्रसङ्गादिति, "इतिः" वाक्यसमाप्तौ, औचित्यमेव पुनर्विशेषतो भावयन्नाह–तथाहि–द्रव्यस्तवः "एतौ" पूजासत्कारौ, ततः किमित्याह—"स च" द्रव्यस्तवो "भावस्तवाङ्ग" शुद्धसाधुभावनिबन्धनम् "इष्टः" अभिमतः, कुत इत्याह—

"तदन्यस्य" भावस्तवानङ्गस्य "अप्रधानत्वाद्" अनादरणीयत्वात्, कुत इत्याह—"तस्य" अप्रधानस्य "अभव्येष्वपि" किं पुनरितरेषु "भावात्" सत्त्वात्, न च ततः

काचित्प्रकृति (त) सिद्धिः, "अतः" अन्यस्य अप्राधान्यात् हेतोः "आज्ञा" आप्तोपदेशेन "असदारम्भनिवृत्तिरूप एव" असदारम्भाद्-उक्तरूपात्तस्य वा या निवृत्तिः-उपरमः तद्रूप एव, न पुनरन्यो बहुलोकप्रसिद्धः "अयं" शास्त्रविहितो द्रव्यस्तवः "स्याद्" भवेद्, आह-कथमसौ न भावस्तवः?, औचित्यप्रवृत्तिरूपत्वात्, साधुधर्म्मवदित्याशङ्कयाह-"औचित्य-प्रवृत्तिरूपत्वेऽपि" श्रावकावस्थायोग्यव्यापारस्वभावतायामपि, किं पुनः तद्भावे "अल्पभाव त्वात्" तुच्छशुभपरिणामत्वात्, "द्रव्यस्तवः" पूजासत्कारौ, एवं तर्हि अल्पभावत्वादेवा-किञ्चित्करोऽयं गृहिणामित्याशङ्कयाह-"गुणाय च" उपकाराय च, "अयं" द्रव्यस्तवः, कथमित्याह-"कूपोदाहरणेन" अवटज्ञातेन, इह चैवं साधनप्रयोगो-गुणकरमधिकारिणः किञ्चि-त्सदोषमपि पूजादि, विशिष्टशुभभावहेतुत्वात्, यद् विशिष्टशुभभावहेतुभूतं तद्गुणकरं दृष्टं, यथा कूपखननं, विशिष्टशुभभावहेतुश्च यतनया पूजादि, ततो गुणकरमिति, कूपखननपक्षे शुभभाव-स्तृष्णादिव्युदासेनानन्दाद्यवाप्तिरिति; इदमुक्तं भवति-यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोष-दुष्टमपि जलोत्पत्तावनन्तरोक्तदोषानपोह्य स्वोपकराय परोपकाराय वा यथाकालं भवति, एवं पूजादिकमप्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेनाशुभकर्म्मनिर्ज्जरणपुण्यबन्धकारणं भवतीति, दृष्टान्तशुद्ध्यर्थमाह—

"न च" नैव "एतदपि" कूपोदाहरणमपि "अनीदृशम्" उदाहरणीयबहुगुणद्रव्य-स्तवविसदृशं यथाकथञ्चित् खननप्रवृत्त्या "इष्टफलसिद्धये" इष्टफलम्-आरम्भिणां द्रव्यस्तवस्य बहुगुणज्ञापनं तत्सिद्धये भवतीति, दार्ष्टान्तिकेन वैधर्म्याद्, यथा तु स्यात्तथाऽऽह-किन्तु "आज्ञामृतयुक्तमेव" आज्ञैवामृतं परमस्वास्थ्यकारित्वादाज्ञामृतं तदुक्तमेव-तत्सम्बन्धमेव; तथाहि-महत्यां पिपासाद्यापदि कूपखननात्सुखतरान्योपायेन विमलजलासम्भवे निश्चितस्वादु-शीतस्वच्छजलायां भूमौ अन्योपायपरिहारेण कूपखननमुचितं, तस्यैव तदानीं बहुगुणत्वाद्, इत्थमेव च खातशास्त्रकाराज्ञा, कुत एतदित्याह-"स्थाने" द्रव्यस्तवादौ कूपखननादिके च उपकारिणि "विधिप्रवृत्तः" औचित्यप्रवृत्तेरन्यथा ततोऽपि अपायभावात्॥

**टी...शङ्का**=आरम्भविशेषेऽपि कथमनयोः पूजासत्कारयोः सदारम्भवत्त्वम्?

**समाधानम्**=गृहिणः श्रावकस्य पूजासत्काररूपो द्रव्यस्तवः कर्त्तव्योऽस्ति, यत औचित्यं (निजावस्थाया आनुरूप्यं) योग्यतामनुलक्ष्याथवौचित्यरूपाऽऽज्ञैव "जिनभवनं जिनबिम्ब" (प्रशमरतौ) मित्याद्याप्तोपदेशरूपा, अमृतं-अजरामरभावकारित्वात्, तेन योगोऽस्ति, तथा-

"जिनभवनबिम्बठावणा जिणपूआई सुत्तओ। विहिणा दव्वत्थओत्ति नेयं भावत्थव कारणत्तेण॥"

**शङ्का**=इत्थमाज्ञाऽपि किं निबन्धनम्?

**समाधानम्**=द्रव्यस्तवविषयकाऽऽज्ञायां, असदारम्भ-निवृत्तिर्मूलकारणमस्ति. अर्थादसत

इन्द्रियार्थ—विषयतया, असुन्दरस्य—अप्रशस्तस्यारम्भस्य ततो वा जिनपूजादिकाले निवृत्ति-निबन्धनबीजं ज्ञेयम्, अर्थादाज्ञाऽमृतयुक्तपूजासत्काररूपद्रव्यस्तवो ( सदारम्भरूपः ) भवेत्तर्हि, एवासद् (अशुभ) आरम्भान्निवृत्तिर्भवति, आज्ञाऽमृतयुक्तद्रव्यस्तवाभावेऽसद् आरम्भनिवृत्तेरभाव इति कार्यकारणभावः।

अन्यथा—आज्ञामृतयुक्तौ पूजासत्कारौ विमुच्य, असदारम्भनिवृत्तेरभावसत्तायां, अन्येन प्रकारेणापि, असदारम्भनिवृत्ति—प्राप्त्याऽतिप्रसङ्गो भविष्यतीति. ( अतिप्रसङ्गो नामातिव्याप्तिः, प्रकृतादन्यत्र प्रसञ्जनं चापादनम्। यथाऽत्र घटः स्यात्तर्हि—उपलभ्येतेति, आहार्यारोपः। यथा यदि पर्वतो निर्वह्निः—स्यात्तर्हि निर्धूमः स्यात् )

## औचित्यस्यैव विशेषतः पुनर्भावना

तथाहीति—जिनपूजासत्कारौ द्रव्यस्तव एव, स च द्रव्यस्तवो, भावस्तवाङ्गं=भावस्तवस्य —शुद्ध—साधुभावस्य (निश्चयतः शुद्ध—साधुतायाः) निबन्धनत्वबीजरूपकारणत्वेनेष्टो—अभिमतः।

अर्थाद् भावस्तवरूपकार्यं प्रति द्रव्यस्तवो मुख्य—फलोपधायकं कारणमस्ति. "कारणं हि तद्भवति यस्मिन् सति यद्भवति, यस्मिश्चासति यन्न भवति (न्या. वा. १ पृ. २४) कार्योत्पादकं, कारणं तावद् द्विविधं, मुख्यं, अमुख्यं च, तत्र घटादिकं प्रति मृदादिकं कपालादिकं वा मुख्यं, मुख्यभिन्नं त्वमुख्यं। तच्च सहकारिकारणमुच्यते, मुख्यत्वे फलो-पधायकत्वं फलनिष्पादकत्वम्।"

द्रव्यस्तवे सति भावस्तवो जायते. द्रव्यस्तवाभावे भावस्तवाभावोऽस्ति. यो भावस्तवस्य मुख्यं कारणं द्रव्यस्तवो नास्ति, तस्य द्रव्यस्तवस्याप्रधानत्वेन फलाजनकत्वेनादरणीयत्वाभावः, कथमिति चेत् कथ्यते. अप्रधानद्रव्यस्तवस्याभव्येषु—मुक्तिगमनायोग्येषु—जीवेषु सत्वाऽस्ति. किं पुनरितरेषु मिथ्यात्विषु इत्यपि—शब्दार्थः, किंच ततः काचित्, शुद्धनिर्ग्रंथतारूपभावस्तवस्य प्रकृतफलस्य सिद्धि र्न भवति,

अन्यस्य=भावस्तवरूपफलजनकद्रव्यस्तवभिन्नद्रव्यस्तवस्य अप्रधानता—भावस्तवरूपफलस्या-कारणता तस्या हेतुत्वेन. तथा च भावस्तवरूपफलजनकप्रधान—द्रव्यस्तवस्य फलोपधायकहेतु-त्वेन, सर्वज्ञवचनरूपाऽऽज्ञामृतमेवासदारम्भनिवृत्तेरेवात्रैव कारणत्वेन, पुनरन्यो, बहुलोक प्रसिद्धः, अयं—शास्त्रविहितो द्रव्यस्तवः स्याद्—भवेद्,

शङ्का=एषोऽसदारम्भनिवृत्तिरूपः शास्त्रविहितो द्रव्यस्तवः, औचित्यप्रवृत्तिरूपत्वेन साधु-धर्मवद् भावस्तवः कथं न मन्यते?

**समाधानं**=असदारम्भनिवृत्तिरूपद्रव्यस्तवो भावस्तवत्वेन न मन्यते, कथमिति चेत्कथ्यते, असदारम्भनिवृत्तिरूपद्रव्यस्तवस्य, औचित्यप्रवृत्तिरूपत्वेऽपि=श्रावकावस्थायोग्यव्यापारस्वभावतायामपि (औचित्यप्रवृत्तिरूपत्वं यत्र नास्ति तत्र कः प्रश्नः) अल्पभावत्वं ( भावस्तवापेक्षया तुच्छशुभ-परिणामत्वं ) विद्यतेऽतः पूजासत्काररूपो द्रव्यस्तवो द्रव्यस्तवत्वेनाऽङ्गीक्रियते, भावस्तवेन नाऽङ्गीक्रियते एव.

**शङ्का**=यदि द्रव्यस्तवस्याऽल्पभावत्वं स्यात्तदा गृहिणामेष द्रव्यस्तवः, अकिंचित्करः ( न किञ्चित् करोति, क्रियाशून्यः, असमर्थः ) कथं न ?

**समाधानम्**=अयं–द्रव्यस्तवस्तु, गुणाय–उपकारायैव कूपोदाहरणेन, इह चैवं साधन-प्रयोगो, गुणकरं ( गुणाय ) अधिकारिणः किञ्चित्सदोषमपि पूजादि, विशिष्टशुभभावहेतुत्वात्, यद् विशिष्ट–शुभभावहेतुभूतं, तद्गुणकरं दृष्टं यथा कूपखननं. विशिष्टशुभभावहेतुश्च यतनया पूजादिः, ततो गुणकरमिति, ( पक्षः ) अधिकारिणः किञ्चित् सदोषमपि पूजादि, ( साध्यं ) गुणकरत्वं, (हेतुः) विशिष्टशुभभावहेतुः, (व्याप्तिः) यद्यद् विशिष्टशुभभावहेतुः तत्तद्गुणकरम् यत्र यत्र विशिष्टशुभभावहेतुत्वं तत्र तत्र गुणकरत्वं (दृष्टान्तः) यथा कूपखननम्,

(उपनयः) गुणकरत्व–व्याप्य–विशिष्टशुभभावहेतुत्ववत्, यतनया पूजादि (साध्यव्याप्य हेतुमान् पक्षः ) ( निगमनं ) गुणकरत्ववत् ( गुणकरं ) यतनया पूजादि ( साध्यवान् पक्षः ) कूपखननपक्षे शुभभावस्तृष्णादिव्युदासेनानन्दावाप्तिरिति, यथा कूपखननं श्रमतृष्णा-कर्दमोपले-पादिदोषदुष्टमपि जलोत्पत्तावनन्तरोक्त–दोषानपोह्य स्वोपकाराय परोपकाराय वा यथाकालं भवति, एवं पूजादिकमप्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेनाऽशुभकर्मनिर्जरण–पुण्यानुबंधि-पुण्यबन्धकारणं भवतीति,

( हिंसाया ज्ञानयोगेन, सम्यग्दृष्टेर्महात्मनः । तप्तलोह–पदन्यास–तुल्याया नानुबन्धनम् ।। ४७ ।।
सतामस्याश्च कस्याश्चित् यतनाभक्तिशालिनां, अनुबंधो ह्यहिंसाया जिनपूजादिकर्मणि ।। ४८ ॥

अध्यात्मसारे सम्यक्त्वाधिकारे, " स्थेयो वायुचलेन निर्वृतिकरं, निर्वाण–निर्घातिना, स्वायत्तं बहुनायकेन सुबहु स्वल्पेन सारं परं । निःसारेण धनेन पुण्यममलं कृत्वा जिनाभ्यर्चनं यो गृह्णाति वणिक् स एव निपुणो वाणिज्य–कर्मण्यलम् "

" परिणामविशेषोऽपि शुभफलो, यत्रानन्योपायत्वेन यतनया प्रकृष्टप्रतनुचैतन्यानां पृथि-व्यादिजीवानां वधेऽपि स्वल्पपुण्यव्ययेनापरिमितसुकृतसम्प्राप्तिः "

" न च जिनायतनविधापनादौ पृथिव्यादिवधेऽपि न गुणः। तथाहि–तद्दर्शनाद् गुणानुरागितया भव्यानां बोधिलाभः, पूजातिशय–विलोकनादिना च मनःप्रसादः, ततः समाधिः, ततश्च क्रमेण निःश्रेयसाप्तिरिति " स्याद्वादमंजरी )

## दृष्टान्तशुद्धिकृते कथयति

एतत्कूपोदाहरणमपि, आरम्भिणां द्रव्यस्तवस्य बहुगुणज्ञापनरूपेष्टफलसिद्धये यथाकथञ्चित् खननप्रवृत्त्या दार्ष्टान्तिक–बहुगुणसम्पन्न–द्रव्यस्तवेन सह सदृशं नास्तीति–नापितु सदृशमेव.

( वादिप्रतिवादिनो र्यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः, तेन युतः ठञ् ) यत्र दृष्टांतो लगति सः, दृष्टान्तवदुपमेयं,

(दार्ष्टान्तिकत्वम्–दृष्टान्तप्रयुक्तोपमेयत्वम्। यथा चन्द्रवन्मुखमित्यादौ मुखस्यदार्ष्टान्तिकत्वम् तथाऽत्रापि कूपखननवद् द्रव्यस्तवः इति अत्र द्रव्यस्तवस्य दार्ष्टान्तिकत्वम्–बोध्यम्. )

दार्ष्टान्तिकेनारम्भिणां बहुगुणद्रव्यस्तवेन सह यथा साम्यं न भवतीति विषयं–वैधर्म्यं दर्शयति–परमात्मिक–स्वास्थ्यकारित्वेन जिनवचनरूपाज्ञाऽमृतेन सहसम्बन्धवान् बहुगुणसम्पन्न–द्रव्यस्तवोऽस्त्यर्थादेतदाज्ञाऽमृतसम्बन्धापेक्षया कूपोदाहरणेन सहद्रव्यस्तवस्य वैधर्म्यमस्ति.

तथाहि–मह्र्व्यां पिपासाद्यापदि कूपखननात्सुखतरान्योपायेन विमलजलासम्भवे निश्चित-स्वादुशीतस्वच्छजलायां भूमौ, अन्योपाय–परिहारेण कूपखननमुचितं, तस्यैव तदानीं बहुगुणत्वात्, इत्थमेव च खातशास्त्रकाराज्ञा, तथाचारम्भि–श्रावकस्य पूजासत्काररूपद्रव्यस्तवं विना, उपायान्तरेण बोधिबीज–अशुभकर्मनिर्जरा–पुण्यानुबन्धिपुण्य–असदारम्भनिवृत्तिरूपबहुगुणानामसम्भवे सति, तेषां सदारम्भिणां पूजासत्काररूपद्रव्यस्तव उचित एव, यतोऽस्मिन् काले पूजासत्कारौ बहुगुणौ तथा च तादृशप्रकारवती जिनेन्द्रवचनरूपाऽऽज्ञाऽस्ति, तदंशे साम्यं ज्ञेयं।

## तादृशाऽऽज्ञाया मुख्यबीजं दर्शयति

'स्थाने'–उपकारि–द्रव्यस्तवादौ ( दार्ष्टान्तिकपक्षे ) च कूपखननादौ ( दृष्टान्तपक्षे ) विधिप्रवृत्तिः–औचित्य–अर्थान्निजाऽवस्थाया योग्यतारूपौचित्यपूर्वक–प्रवृत्तिरस्ति, यदि स्थाने ( उपकारिस्थले ) औचित्यप्रवृत्तिरूप–विधिप्रवृत्ति र्न भवेत् ( प्रकारान्तरेणाऽपि–औचित्यप्रवृत्तिरूपविधिप्रवृत्तिप्रकारादन्यप्रकारेण करणेऽपि ) तदाऽपि ततोऽपि प्रत्यपायभावो भवति. तथा चेतादृग् वस्तुस्थित्यैव पूजासत्कारयोः ( कारणानुमत्यपेक्षया ) साधुश्च ( करणकारणानुमत्यपेक्षया ) श्रावकोऽधिकारी भवति.

( पूजासत्कारोद्देश्यक ( विशेष्यक ) विषयतावन्तौ साधुश्रावकावेवेत्यर्थः )—अथ शास्त्रकारः, अर्हच्चैत्यविषयकसन्मार्गजन्यकर्मक्षयादिरूपफलोद्देश्यक--प्रार्थनागर्भितकायोत्सर्गस्य वर्णनम्—

तथा "सम्माणवत्तियाएत्ति" सम्मानप्रत्ययं—सन्माननिमित्तं, स्तुत्यादिगुणोन्नतिकरणं सन्मानः, तथा मानसप्रीतिविशेष इत्यन्ये। अथ वन्दनपूजनसत्कारसम्मानाः किंनिमित्तमित्यत आह—"बोहिलाभवत्तियाए" बोधिलाभप्रत्ययं—बोधिलाभनिमित्तं, जिनप्रणीतधर्म्मप्राप्तिर्बोधिलाभोऽभिधीयते, अथ बोधिलाभ एव किंनिमित्तमित्यत आह—"निरुवसग्गवत्तियाए" निरुपसर्गप्रत्ययं—निरुपसर्गनिमित्तं, निरुपसर्गो-मोक्षः, जन्माद्युपसर्गाभावेन, आह—साधुश्रावकयोर्बोधिलाभोऽस्त्येव, कथं तत्प्रत्ययं, सिद्धस्यासाध्यत्वात्, एवं तन्निमित्तो निरुपसर्गोऽपि तथाऽनभिलषणीय एवेति किमर्थमनयोरुपन्यास इति ?, उच्यते, क्लिष्टकर्म्मोदयवशेन बोधिलाभस्य प्रतिपातसम्भवाजन्मान्तरेऽपि तदर्थित्वसिद्धेः, निरुपसर्गस्यापि तदायत्तत्वात् सम्भवत्येवं भावातिशयेन रक्षणमित्येतदर्थमनयोरुपन्यासः, न चाप्राप्तौ प्राप्तावेवेह प्रार्थना, प्राप्तभ्रष्टस्यापि प्रयत्नप्राप्यत्वात्, क्षायिकसम्यग्दृष्ट्यपेक्षयाऽप्यक्षेपफलसाधकबोधिलाभापेक्षयैवमुपन्यासः। अयं च कायोत्सर्गः क्रियमाणोऽपि श्रद्धादिविकलस्य नाभिलषितार्थप्रसाधनायालमित्यत आह—"सद्धाए मेहाए धीइए धारणाए अणुप्पेहाए, वड्ढमाणीए ठामि काउस्सग्गंति" श्रद्धया—हेतुभूतया न बलाभियोगादिना श्रद्धा—निजोऽभिलाषः, मिथ्यात्वमोहनीयकर्म्मक्षयोपशमादिजन्यश्चेतसः, प्रसाद इत्यर्थः, अयं च जीवादितत्त्वार्थानुसारी समारोपविघातकृत् कर्म्मफलसम्बन्धास्तित्वादि-

**सम्प्रत्याकारश्चित्तकालुष्यापनायी धर्म्मः, यथोदकप्रसादको मणिः सरसि प्रक्षिप्तः पङ्कादिकालुष्यमपनीयाच्छतामापादयति, एवं श्रद्धामणिरपि चित्तसरस्युपपन्नः सर्वं चित्तकालुष्यमपनीय भगवदर्हत्प्रणीतमार्गं सम्यग्भावयतीति,**

पं... "श्रद्धासमारोपेत्यादि" समारोपविघातकृत्—समारोपो नामासतः स्वभावान्तरस्य मिथ्यात्वमोहोदयात्तथ्ये वस्तुन्यध्यारोपणं काचकामलाद्युपघातात् द्विचन्द्रादिविज्ञानेष्विवेति, तद्विघातकृत्—तद्विनाशकारी "कर्म्मफलसम्बन्धास्तित्व( आदि ) सम्प्रत्ययाकार इति" कर्म—शुभाशुभलक्षणं फलं च तत्कार्यं तथाविधमेव तयोः सम्बन्ध—आनन्तर्येण कार्यकारणभावलक्षणो वास्तवः संयोगो न तु सुगतसुतपरिकल्पितसन्तानव्यवहाराश्रय इवोपचरितो, यथोक्तं तैः—"यस्मिन्नेव हि सन्ताने, आहिता कर्म्मवासना। फलं तत्रैव सन्धत्ते, कार्प्पासे रक्तता यथा ॥ १ ॥" तस्यास्तित्वं—सद्भावः, आदिशब्दाद् 'आत्माऽस्ति स परिणामी, बद्धः सत्कर्म्मणा विचित्रेण। मुक्तश्च तद्वियोगाद्धिंसाऽहिंसादि तद्धेतुः ॥ १ ॥ इत्यादि,' इत्यादिचित्रप्रावचनिकवस्तुग्रहः, तस्य सम्प्रत्ययः—सम्यक्श्रद्धानयुता प्रतीतिः स आकारः—स्वभावो यस्य स तथा।

टी०....तथा 'सम्माणवत्तियाए' त्ति. सम्मानप्रत्ययं—सम्माननिमित्तं, स्तुत्यादिगुणोन्नतिकरणं सम्मानः, तथा मानसप्रीतिविशेष इत्यन्ये।

अर्थात्तथा—वन्दनादिवत् 'अर्हच्चैत्यानां सम्मानेन यथा कर्मक्षयादिरूपं फलं भवेत्तथा कर्मक्षयादिरूपं फलं मे कायोत्सर्गतो भवतु, एतादृशी प्रार्थना ( आशंसा ) साधुश्रावकयोर्भवति.

स्तुतिआदि ( आदिना काव्यगीतिप्रशंसास्तोत्रस्तवनपूजादि ) द्वारा गुणानां—सद्गुणानां, उन्नतिकरणं—उत्कीर्तनं ( भगवतां गुणानामुच्चैर्गानं—भजनादिकीर्तनं ) सम्मानः, मानसगत-विशिष्टप्रीतिरूपोचितविनयप्रतिपत्तिरूपः सम्मानः, इत्यन्ये.

अथ वन्दनपूजनसत्काराः किं निमित्तं—कस्मै हेतवे वा फलाय? ततः कथयति. 'बोहिलाभवत्तियाए' बोधिलाभप्रत्ययं—बोधिलाभनिमित्तं ( निमित्तमुद्देश्यम् यथा तस्यागमनकारणम्, इत्यादौ कारणमुद्देश्यम्। प्रयोजनं फलं वेत्यर्थः ) अर्थाद् वन्दनादिभिश्चतुर्भिः किं फलं प्राप्यते? तत्प्रत्युत्तरं दीयते, वन्दनादिचतुष्टयेन बोधिलाभरूपमहाफलं प्राप्यतेऽर्थाद् बोधिलाभरूपमहाफलं प्रति वन्दनादिचतुष्कं कारणम्, बोधिलाभः—जिनप्रणीतधर्म( जैनधर्म )प्राप्तिर्बोधिलाभोऽभिधीयते. अथ वन्दनादिचतुष्ककारणजन्य (कार्य)भूतबोधिलाभ एव किं निमित्तं? तत्प्रत्युत्तरे ज्ञापयति, 'निरुवसग्गवत्तिआए' निरुपसर्गनिमित्तं, अर्थाद् बोधिलाभेन निरुपसर्गो

मोक्षः, जन्माद्युपसर्गाभावेन जन्यतेऽतो निरुपसर्ग–मोक्षकार्यं प्रति बोधिलाभः कारणमस्ति. बोधिलाभाऽविनाभाविमोक्षः.

**शङ्का=**साधुश्रावकयो–र्बोधिलाभोऽस्त्येव, तत एवाऽर्हच्चैत्यानां वन्दनादितो मे बोधिलाभोऽस्तु, एतादृशी कामना ( प्रार्थना ) निरर्थिकैव, यतो यद्वस्तु सिद्धमस्ति, तत् साध्यं भवितुं नार्हति, साध्यं तदेव भवति यन्न सिद्धम्, तथा च साधुश्रावकयोर्बोधिलाभः सिद्ध-एवार्थात् साधुश्रावकयोर्बोधिलाभविषयक–प्रार्थनागर्भितं 'बोहिलाभवत्तियाए' इति पदं कथं सार्थकं भवेत् ? तथा बोधिलाभरूपनिमित्तजन्यनिरुपसर्गो मोक्षोऽपि कथमभिलषणीयो भवेत् ? यतो बोधिलाभतोऽवश्यं मोक्षलाभो भाव्येव, अतो 'बोहिलाभवत्तियाए' 'निरुवसग्गवत्तियाए' इति पदद्वयस्योपन्यासः किमर्थकः ?

**समाधानम्=**साधुश्रावकयोः क्लिष्ट ( सानुबन्ध–निकाचित ) कर्मण उदयवशेन बोधिलाभस्य प्रतिपातसम्भवः, अर्थाद् बोधिलाभस्य पतनं प्रति क्लिष्टकर्मोदयः कारणम्, अतोऽत्रामुत्रापि साधुश्रावकयोः क्लिष्टकर्मोदये बोधिलाभस्य पतनसम्भवेन बोधिलाभोऽसिद्धोऽस्ति, अतोऽसिद्धोऽस्ति, अतस् तस्य साध्यत्वमस्ति, अतो बोधिलाभस्यार्थित्वं ( अभिलाषः प्रार्थना ) साधुश्रावकयोर्मध्येऽध्यास्ते, तथा निरुपसर्गो–मोक्षोऽपि बोधिलाभाधीनोऽस्ति. बोधिलाभसत्तायां मोक्ष–सत्ताऽस्ति, तस्माद्भावस्यातिशयेन ( सर्वथा सर्वोत्कृष्टभावपूर्वकं ) बोधिलाभस्य क्षेम–रक्षणमनिवार्यमावश्यकम्, एनं हेतुं लक्ष्यीकृत्य एतत्पदद्वयस्योपन्यासः ( रचना ) कृतोऽस्ति, अर्थादेतत्पदद्वयं साधुश्रावकयोः सार्थक्यवत्सफलमेव ।

**शङ्का=**यद्येवं तर्हि, अप्राप्तस्य प्राप्तिविषये एव प्रार्थना भवति, ततोऽत्र प्रार्थनास्वरूपं कथं घटेत ?

**समाधानम्=**अत्राप्राप्तप्राप्तीच्छारूपैव प्रार्थनाऽस्तीति, परन्तु बोधिलाभः पूर्वं प्राप्तोऽपि, पश्चात् क्लिष्टकर्मोदयेन गतोऽपि ( बोधिलाभाद्भ्रष्टोऽपि ) तस्य प्राप्तभ्रष्टस्यापि पुनर्बोधिलाभः, प्रकृष्ट–प्रयत्नेन प्राप्यते, तस्मात् केवलाप्राप्तप्राप्तीच्छारूपैव प्रार्थनेति न, परन्तु पूर्वं प्राप्तस्य-पश्चाद् भ्रष्टस्यापि पुनः प्राप्तीच्छाऽपि प्रार्थना ज्ञेया.

**शङ्का=**क्षायिकसम्यग्दृष्टेः किमेतत्पदद्वयस्योच्चारणमावश्यकमथवा न ?

**समाधानम्=**क्षायिकसम्यग्दृष्टिमतोः साधुश्रावकयोः क्षायिक ( सम्यग्दृष्ट्यपेक्षया ) अपि–अक्षेपेण (अव्यवहितत्वेन) मोक्षफलसाधकबोधिलाभ ( यद्बोधिभाऽव्यवहितोत्तरक्षण–जायमान–मोक्षो भवति, तद्बोधिलाभ) विषयकप्रार्थनायाः सत्त्वात् 'बोहिलाभवत्तियाए' 'निरुवसग्गवत्तियाए' इतिपदद्वयं क्षायिकसम्यग्दृष्टौ यथार्थं घटते तस्मात्तदपेक्षयैवमुपन्यासः,

—प्रार्थनास्वरूपस्य सारांशः=भेदचतुष्टयम्

(१) अप्राप्तप्राप्तीच्छारूपप्रार्थना—यस्य बोधिलाभरूपविशिष्टधर्मस्य प्राप्तिर्नाभूत्तस्य पुरुषस्याप्राप्तबोधिलाभस्य प्राप्तिरूपयोगेच्छेति प्रथमप्रार्थनाभेदो ज्ञेयः,

(२) प्राप्तपतनप्राप्तरक्षणरूपक्षेमेच्छा प्रार्थना—यस्य बोधिलाभः प्राप्तोऽस्ति तस्य पुरुषस्य प्राप्तबोधिलाभस्य पातो मा भवतु ! एवंविधप्राप्तबोधिलाभस्य सर्वथा—भावातिशयपूर्वकरक्षणरूपक्षेमस्य प्रार्थनेति, द्वितीयप्रार्थनाभेदः,

(३) प्राप्तभ्रष्टस्य ( प्रयत्नपूर्वक ) प्राप्तीच्छारूपप्रार्थना=यस्य बोधिलाभः पूर्वं प्राप्तो भवेत्, पश्चात् क्लिष्टकर्मोदयेन पतितो भवेत्तस्य पुरुषस्य पुनर्बोधिलाभ—प्राप्तीच्छा, प्रार्थनेति तृतीयः प्रार्थनाप्रकारः,

(४) अक्षेपेण ( अव्यवहितत्वेन ) मोक्षफलसाधकबोधिलाभप्राप्तीच्छारूपप्रार्थना=यः क्षायिकसम्यग्दृष्टिरस्ति, यस्य क्षायिक (अप्रतिपाति) सम्यक्त्वं प्राप्तमस्ति, तस्य पुरुषस्याक्षेपेण ( आनन्तर्येण ) मोक्षफलसाधकबोधिलाभरूपविशिष्ट=बोधिलाभप्राप्तीच्छारूपप्रार्थनेति प्रार्थनायाश्चतुर्थो भेदः,

सारांशस्तु वन्दनादिकारणचतुष्टयेन यथा पुण्यानुबन्धिपुण्यफलकर्मक्षयादिरूपफलानि प्राप्यन्ते, तथा कायोत्सर्गतो मे भवतु, तथा (पुण्यफल—कर्मक्षयादिरूपफलैः) ततो बोधिलाभरूपं महाफलं भवतु तथा च बोधिलाभरूपमहाफलेन निरुपसर्गः—मोक्षरूपं परमफलं भवतु, इत्येवं विशिष्टप्रार्थनाकारकौ साधुश्रावकौ भवतः ।

—श्रद्धादिं विना कृतः कायोत्सर्गः, इष्टफलसिद्धिदायको न भवत्यतः कारणतः, ' सद्धाए ' इत्यत आरभ्य 'ठामि काउसग्गं' इति पर्यन्तेषु पदेषु कायोत्सर्गहेतुर्दर्शितोऽस्त्यतः, एतत्पदवती तृतीया हेतुसम्पत् कथ्यते—

'सद्धाए मेहाए धीइए धारणाए अणुप्पेहाए वड्ढमाणीए ठामि काउसग्गंति' अर्थाद् वर्धमानश्रद्धादिद्वारा क्रियमाणः कायोत्सर्गो, मोक्षरूपेष्टफलसिद्धिरूपकार्यं प्रति परमं कारणमस्तीत्येवं कार्यकारणभावो विज्ञेयः,

## वर्धमानश्रद्धादे विवेचनम्

(१) इष्टफलहेतुभूतवर्धमानश्रद्धया ( न बलाभियोग—बलात्कार—प्रेरणा—पराक्रमणाभिनिवेशादिना ) श्रद्धा=निजोऽभिलाषः, मिथ्यात्वमोहनीयकर्मक्षयोपशमादिजन्यश्चेतसः प्रसाद इत्यर्थः, (चित्तस्यात्मनः प्रसादरूपपरमानन्दानुभवं प्रति मिथ्यात्वक्षयोपशम—उपशम—क्षयादि,

कारणमस्तीत्येवं कार्यकारणभावो ज्ञेयः) चित्तप्रसन्नतारूपनिजाभिलाषरूपविशिष्टपरिणामः—श्रद्धा, मिथ्यात्वमोहनीयकर्मक्षयोपशमादिजन्यत्वे सति चित्तप्रसन्नत्वं श्रद्धाया लक्षणम्, एवंविधलक्षण—निरूपणानन्तरं स्वरूपं निवेदयति, एष निजाभिलाषरूपश्रद्धारूपधर्मः कीदृशः ? इति दर्शयति—

(१) अयं च श्रद्धाधर्मः—जीव ( अजीव ) आदितत्त्वरूपमर्थं, अनुसरतीत्येवं शीलः—जीवादितत्त्वार्थानुसारी, श्रद्धाधर्मः,

(२) समारोपविघातकृत्=समारोपः—असतः—अविद्यमानस्य वाऽसत्यस्य स्वभावान्तरस्य—अन्यस्वभावस्य, मिथ्यात्वमोहोदयात्, तथ्ये—सत्ये वस्तुन्यध्यारोपणं—काचकमलादिरोगोपघाताद् यथा द्विचन्द्रादिविज्ञानेषु अध्यारोपणं—रज्जौ सर्पादिरूपारोपो मिथ्याज्ञानं, यत्र यन्नास्ति तत्र तस्य ज्ञानं, यथा काचकमलादिरोगोपघातेन, द्विचन्द्रादिविज्ञानम्, ( " अतस्मिंस्तदध्यवसायः समारोप इति. त. न्या. वि. पृ. ५०१, सू. ७) एतल्लक्षणवतः समारोपस्य विपर्ययानध्यवसाय संशयादिभेदेन त्रयो भेदाः,

(१) विपर्ययः—विपरीतैककोटिनिश्चयो, विपर्ययः' यथा शुक्तिकायां रजतम्,

(२) अनध्यवसायः=इदं किञ्चिदस्तीति केवलालोचनात्मकं ज्ञानं, यथा कस्मिंश्चिन्मार्गे गच्छतोऽन्यत्र चित्तगमनेन तृणस्पर्शो भवन्नपि मम कस्यचिद् वस्तुनः स्पर्शो जातः ? परन्तु कस्य वस्तुविशेषस्य जातः स्पर्श इति न प्रतिभासते इत्येवं ज्ञानमनध्यवसायः,

(३) संशयः=साधक—बाधकप्रमाणाभावेन वस्तुन्येकस्मिन् विरुद्धधर्मकोटिद्वयस्य ज्ञानं, यथा स्थाणुर्वा पुरुषो वा, पदार्थस्य वास्तविकनिश्चयाय, साधकबाधकप्रमाणान्यावश्यकानि यथा दूरतः पुरुषाकारः पदार्थो दृष्टः, तदनन्तरं एष पुरुषो वा स्थाणुर्वेति संदेहे जाते, तन्निरासाय पुरुषत्व—साधकप्रमाणाभावे सति, तत् तथा नास्तीति प्रतीतिकारकबाधकप्रमाणस्यावश्यकता, बाधकप्रमाणाभावे कश्चिन्निर्णयो भवितुं न शक्यते, अत एवं निर्णयाभावेन यस्य पुरुषप्रयोजनमस्ति स तदर्थं न प्रवर्त्तते, तथा यस्य तत्प्रयोजनं नास्ति, स व्यक्तिविशेषः, ततो न निवर्तते, अतः प्रवृत्तिनिवृत्तिकृते स्थानं न स्यादीदृशीपरिस्थितिमध्ये स्थितं ज्ञानं संशयःकथ्यते.

(एकधर्मिक—विरुद्धाविरुद्धभावाऽभावप्रकारकं ज्ञानं संशयः, उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्, यथोच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्नवेति संदिग्धे। )

(३) कर्मफलसम्बन्धाऽस्तित्वादिसम्प्रत्ययाकारः=शुभाशुभरूपं कर्म, शुभाशुभकर्मजन्यं (कार्यं) शुभाशुभरूपं फलमेव, तयोः=शुभाशुभकर्मफलयोः सम्बन्धः—अव्यवहितत्वेन कार्यकारणभावरूपो वास्तवः संयोगः.

(न तु सुगतसुतेन परिकल्पित—संतानरूपव्यवहाराश्रय-वत्सम्बन्धवत्, संबंध उपचरितोऽस्ति, यथोक्तं तैः "यथा कार्पासे बीजे रक्तता आहिता, फलमपि रक्तं तावद्‌भवति, तथा यस्मिन्नेव सन्ताने आहिता कर्म्मवासना, तद्‌वासनायां कर्मवासनायाः फलं तिष्ठति")

तत्संयोगस्यास्तित्वं (सत्ता) आदिशब्दाद् "आत्माऽस्ति स परिणामी, बद्धःसत्कर्म्मणा विचित्रेण, मुक्तश्च तद्वियोगाद्‌हिंसाऽहिंसादि तद्धेतुः ॥१॥ इत्यादि"

इत्यादि चित्रप्रावचनिकवस्तुग्रहः, तस्य—तत्‌संयोगाऽस्तित्वस्य सम्प्रत्ययः—सम्यक्‌श्रद्धान-युता प्रतीतिः=तदाकार—स्वभाववान्,

('बध्यमान आत्मा बन्धनं वस्तु सत्कर्मेति'—बन्धवान्, आत्मा च कर्मरूपं बन्धनं सत्यं वस्तु समस्ति, तथाहि—स्वसामर्थ्यस्यावृतत्वाद् पारवश्यं प्राप्त आत्मा, तत्कर्मणा बध्यमानो ज्ञेयः, जीवः कर्म बध्नाति, जगति च स्थितानामनेकविधपरमाणूनां मध्ये यादृक्‌कर्म करोति. तद्-योग्य—परमाणवः ते प्रत्याकृष्टास्तं बध्नन्ति, कर्म सत्यमस्ति, कल्पना नास्तीत्येवं ज्ञेयं, यथा यदा वस्त्रं स्नेहलग्नं तदा परमाणवो वह्वस्तं लगन्ति, तथा यदा आत्मनि रागद्वेषादि—अशुभभावस्नेहो लग्नस्तदा कर्मपरमाणव आत्मानं प्रत्याकृष्टाः सन्तो बध्नन्ति, कर्म सदस्ति, ये केचिदेवं मन्यन्ते हि कर्म वस्तु नास्ति, आत्मनो रागद्वेषादिभावा एवात्मानं बध्नन्ति, एवं कथनमसत्यमेव, पुरुषश्च निगडश्च भिन्नावपि यथा निगडेन पुरुषो बध्यते, कर्माण्यात्मानं बध्नन्ति, तत्सत्यमेव यतो यदाऽऽत्मनि रागादिवहुषितभावा उत्पद्यन्ते, तदा कर्मपरमाणव आकृष्टाः सन्त आत्मानमभिबध्नन्ति, अपि च रागद्वेषाद्या भावाः आत्मानं बद्धुं न शक्नुवन्ति,

(४) चित्तकालुष्यापनायी धर्म्मः (श्रद्धाधर्मः) चित्तस्य—आत्मनः कालुष्यं—मालिन्यं, अपनयतीति—चित्तकालुष्यापनायी श्रद्धाधर्मः, अर्थाऽऽर्जीवादितत्त्वार्थानुसारी, समारोपविघातकृत्, कर्मफलसम्बन्धाऽस्तित्वादिसम्प्रत्ययाकारः, चित्तकालुष्यापनायी विशिष्टनिजाभिलाषरूपः श्रद्धा-धर्मः कथ्यते।

यथोदकप्रसादको मणिः, सरसि प्रक्षिप्त पङ्कादिकालुष्यमपनीय स्वच्छतामापादयति, (कतकक्षोदो जलनैर्मल्यहेतुरपि दृष्टान्तः स्मरणीयः, 'विमलस्वामिनो वाचः कतकक्षोदसोदरा। जयन्ति त्रिजगच्चेतोजलनैर्मल्यहेतवः'॥ सकलाऽर्हत् १५ श्लो.) एवं श्रद्धामणिरपि चित्तसर-स्युपपन्नः सर्वं चित्तकालुष्यमपनीय भगवदर्हत्प्रणीत—मार्गं सम्यग् भावयतीति,

**मेधावर्णनम्—**

## एवं मेधया—न जडत्वेन, मेधा ग्रन्थग्रहणपटुः परिणामः,

ज्ञानावरणीयकर्म्मक्षयोपशमजः चित्तधर्म्म इति भावः, अयमपीह सद्ग्रन्थप्रवृत्तिसारः पापश्रुतावज्ञाकारी गुरुविनयादिविधिवल्लभ्यो, महाँस्तदुपायेन परिणामः।

आतुरौषधाप्त्युपादेयतानिदर्शनेन—यथा प्रेक्षावदातुरस्य तथा तथोत्तमौषधाप्तौ विशिष्टफलभव्यतयेतरापोहेन तत्र महानुपादेयभावो ग्रहणादरश्च, एवं मेधाविनो मेधासामर्थ्यात्सद्ग्रन्थ एवोपादेयभावो ग्रहणादरश्च, नान्यत्र, अस्यैव भावौषधत्वादिति, एवं च धृत्या—न रागाद्याकुलतया, धृतिर्मनःप्रणिधानं, विशिष्टा प्रीतिः, इयमप्यत्र मोहनीयकर्मक्षयोपशमादिभूता रहिता दैन्यौत्सुक्याभ्यां धीरगम्भीराशयरूपा अवन्ध्यकल्याणनिबन्धनवस्त्वाप्त्युपमया, यथा—दौर्गत्योपहतस्य चिन्तामण्याद्यवाप्तौ विज्ञाततद्गुणस्य गतमिदानीं दौर्गत्यमिति विदिततद्विघातभावं भवति धृतिः, एवं जिनधर्म्मचिन्तारत्नप्राप्तावपि विदिततन्माहात्म्यस्य क इदानीं संसार इति तद्दुःखचिन्तारहिता सञ्जायत एवेयमुत्तमालम्बनत्वादिति, एवं धारणया—न चित्तशून्यत्वेन, धारणा—अधिकृतवस्त्वविस्मृतिः, इयं चेह ज्ञानावरणीयकर्म्मक्षयोपशमसमुत्था अविच्युत्यादिभेदवती प्रस्तुतवस्त्वानुपूर्वीगोचरा चित्तपरिणतिः, जात्यमुक्ताफलमालाप्रोतकदृष्टान्तेन तस्य यथा तथोपयोगदार्ढ्यात्, अविक्षिप्तस्य सतो यथार्हं विधिवदेतत्प्रोतनेन गुणवती निष्पद्यते अधिकृतमाला, एवमेतद्बलात् स्थानादियोगप्रवृत्तस्य यथोक्तनीत्यैव निष्पद्यते योगगुणमाला, पुष्टिनिबन्धनत्वादिति। एवम् 'अनुप्रेक्षया' न प्रवृत्तिमात्रतया, अनुप्रेक्षा नाम तत्त्वार्थानुचिन्ता, इयमप्यत्र ज्ञानावरणीयकर्म्मक्षयोपशमसमुद्भवोऽनु-

भूतार्थाभ्यासभेदः परमसंवेगहेतुस्तद्दार्ढ्यविधायी उत्तरोत्तरविशेषसम्प्रत्ययाकारः केवलालोकोन्मुखश्चित्तधर्म्मः, यथा रत्नशोधकोऽनलः रत्नमभि सम्प्राप्तः रत्नमलं दग्ध्वा शुद्धिमापादयति तथा अनुप्रेक्षानलोऽप्यात्मरत्नमुपसंप्राप्तः कर्ममलं दग्ध्वा कैवल्यमापादयति, तथा तत्स्वभावत्वादिति। एतानि श्रद्धादीन्यपूर्वकरणाख्यमहासमाधिबीजानि, तत्परिपाकातिशयतस्तत्सिद्धेः, परिपाचना त्वेषां कुतर्कप्रभवमिथ्याविकल्पव्यपोहतः श्रवणपाठप्रतिपत्तीच्छाप्रवृत्त्यादिरूपा, अतिशयस्त्वस्यास्तथा स्थैर्यसिद्धिलक्षणः प्रधानसत्त्वार्थहेतुरपूर्वकरणावह इति परिभावनीयं स्वयमित्थम्, एतदुच्चारणं त्वेवमेवोपधाशुद्धं सदनुष्ठानं भवतीति, एतद्वानेव चास्याधिकारीति ज्ञापनार्थं, वर्द्धमानया–वृद्धिं गच्छन्त्या नावस्थितया प्रतिपदोपस्थाप्येतत्, श्रद्धया वर्द्धमानया एवं मेधयेत्यादि, लाभक्रमादुपन्यासः श्रद्धादीनां, श्रद्धायां सत्यां मेधा तद्भावे धृतिः ततो धारणा तदन्वनुप्रेक्षा, वृद्धिरप्यनेनैव क्रमेण, एवं तिष्ठामि कायोत्सर्ग्गमित्यनेन प्रतिपत्तिं दर्शयति,

पं०..."अविच्युत्यादिभेदवतीति, अविच्युतिस्मृतिवासनाभेदवती "श्रवणपाठप्रतिपत्तीच्छाप्रवृत्त्यादिरूपेति" श्रवणं–धर्म्मशास्त्राकर्णनं, पाठः–तत्सूत्रगतः, प्रतिपत्तिः–सम्यक्तदर्थप्रतीतिः इच्छा-शास्त्रोक्तानुष्ठानविषया चिन्ता प्रवृत्तिःतदनुष्ठानमादिशब्दाद्विघ्नजयसिद्धिविनियोगा द्रष्टव्याः, तत्र विघ्नजयो–जघन्यमध्यमोत्कृष्टप्रत्यूहाभिभवः, सिद्धिः-अनुष्ठेयार्थनिष्पत्तिः, विनि योगः–तस्या यथायोगं व्यापारणं ततस्ते रूपं यस्याः सा तथा ॥

टी...एवं वर्धमानया मेधया–धारणसमर्थबुद्धिपूर्वकं कायोत्सर्गं करोम्यहं, परन्तु न जडत्वेनार्थाद्गतानुगतिकतया–मुर्खतया विना, बुद्धिमज्जा।

मेधायाः-सलक्षणस्वरूपम्=ज्ञानावरणीयकर्मक्षयोपशमजन्यो ग्रन्थविषयकग्रहणपटुता (तीक्ष्णता) समन्वितः परिणामश्चित्तधर्म्म इति भावः ( ज्ञानावरणीय–कर्मक्षयोपशमजन्यत्वे सति ग्रन्थ-

ग्रहणपटुत्वविशिष्टपरिणामरूपचित्त ( आत्मा ) धर्म्मवत्त्वं मेधायालक्षणम् ) अयमर्थोह–एष मेधारूपधर्मोऽत्र.

(१) सद्ग्रन्थे (परलोकविधानविषयकवचनप्रमाणयुक्त–सम्यग्ज्ञानयुक्तसद्विधायक सद्ग्रन्थे) मुख्यत्वेन प्रवृत्तिकारणरूपफलवति, या सद्ग्रन्थे प्रवृत्तिं न कारयति सा मतिर्मेधा न कथ्यते, या च सद्ग्रन्थे प्रवृत्तिं कारयति सा मतिर्मेधारूपो धर्मो निगद्यते.

(२) पापश्रुताऽवज्ञाकारी=पापश्रुतस्य ( चित्तमालिन्यकारकमोमादिविषयक–मिथ्यात्व-पोषकस्य) अवज्ञा–तिरस्कारं करोतीति पापश्रुताऽवज्ञाकारी मेधारूप आत्मधर्मः. ( एकोनत्रिंशत् पापश्रुतानि कथ्यन्ते तद्यथा अष्टधा–दिव्यादीनि निमित्तशास्त्राणि, सूत्र–वृत्ति–वार्तिकरूपत्रयेण गुणितानि ( ८×३=२४ ) तथा नाट्य–वास्तु–विद्या–धनुर्वेद–आयुर्वेदैर्मिलितानि (२४–५=२९) एवं एकोनत्रिंशत् पापश्रुतानि.

(३) गुरुविनयादिविधिवल्लभ्यः=यथा गुरुविषयकविनयादिना विधिवल्लभ्यते तथा गुरु-विनयादिना मेधाधर्मो लभ्यते. मेधारूपचित्तधर्म्म–प्राप्तिं प्रति विधिवद्गुरुविनयादि, कारणमस्ति, यावदात्मनि गुरुविनयादि–सत्तायामेव मेधारूपचित्तधर्मस्य सत्ता.

(४) एतेन मेधारूपासाधारणकारणेनापकृष्टपरिणामाभावपूर्वक उत्कृष्टपरिणामरूपाध्य-वसायो भवति. अथवा 'महांस्तदुपादेयपरिणामः' इति पाठान्तरेण. 'सद्ग्रन्थ एवोपादेयो-ऽस्ति, असद्ग्रन्थस्तु नोपादेयः' ईदृशः परिणामो महान्–महत्त्वशाली ( सुदृढतमः ) मेधायाः प्रभावेण भवति. अत्रातुरौषधाप्त्युपादेयतानिदर्शनेन–ज्ञेयम्, यथा प्रेक्षावदातुरस्य–बुद्धिमतो रोगिणस्तथा तथोत्तमौषधाप्तौ विशिष्टफलभव्यतया=फलविशेष–भावित्वेन, औषधेतरवस्तुनोऽपोहेन, तत्र–औषधे महान्–उपादेयभावः, अत एव ग्रहणादरः ( सादरंग्रहणं ) तथा–एवं मेधाविनो मेधासामर्थ्यात् सद्ग्रन्थे ( असंवादिवचनविशिष्टवीतरागवचनरूपसद्ग्रन्थे एव ) उपादेयभाव–उपादानयोग्यभावो (एष एव ग्राह्यो नान्य इति परिणामभावो) भवति, सद्ग्रन्थस्यैव ग्रहणं प्रत्यादरश्च नान्यत्र (असद्ग्रन्थग्रहणं प्रति नादरः) यतः अस्यैव–सद्ग्रन्थस्यैव भावरूपौषध-त्वमस्ति, कथमिति चेदुच्यते कर्मरूपाभ्यन्तररोगदूरीकरणाय वीतरागप्रणीतग्रन्थ एव (शास्त्रमेव) रामबाणवद्, अमोघमतुलमेवौषधमस्ति, नान्यदिति.

धृतिस्वरूपम्=यथा श्रद्धया, मेधया च कायोत्सर्गः सफलो भवति. तथा धृत्या (रागाद्याकुलतां विना, शान्त्या रागादिजन्यव्याकुलताया अभावपूर्वकः) कायोत्सर्गः सफलो भवति.

**धृतेः, लक्षणस्वरूपदृष्टान्तद्वारा निरूपणम्–**

धृतिर्मनःप्रणिधानं, विशिष्टा प्रीतिः=चित्तस्यैकाग्रता (अनन्यवृत्तिता)–अन्यत्र गच्छन्मन आकृष्य कायोत्सर्गे स्थिरभाववद् भवच्चित्तं,

नमस्कारविषयभूतपदार्थे मनसो योजनं—सङ्गमनं, लगनं तदेव मनःप्रणिधानम्। तथा विशिष्टा प्रीतिः कायोत्सर्गघटितनमस्कारविषयभूतपदार्थं प्रति सर्वातिशायि प्रेम (अन्तरङ्गस्नेहविशेषो) धृतिरुच्यते, धृतिरियमप्यत्र मोहनीयकर्मणः क्षयोपशमादि (उपशम—क्षयादि) भूता (अर्थान्मोहनीयकर्मक्षयोशमादिजन्यत्वे सति, मनःप्रणिधानसत्त्वे, सति विशिष्टप्रीतिमत्त्वं धृत्या लक्षणम्)

धृतेः स्वरूपम्=(१) इयं धृतिरत्र स्थले मोहनीय—कर्मणः क्षयेण—क्षयोपशमेन—उपशमेन जन्यते.

(२) दैन्यौत्सुक्याभ्यां रहिता धृतिः–दीनतया (प्राप्तुमत्यन्तकामनायां सत्यामधुनैव प्राप्स्यतीति मानसतीव्रतायां सत्यामलाभजन्या दीनता, तया) औत्सुक्येन—तत्कालमेव प्राप्तौ शीघ्रातिशीघ्रता, तया, अर्थाद् वस्त्वभाव—प्रयुक्तदीनता—वस्तुप्राप्त्यत्यन्तातुरतारहिता धृतिः प्रशस्यते.

(३) धीरगम्भीराशयरूपा धृतिः=निश्चलताऽगाधतासहिताऽभिप्रायरूपा धृतिः.

(४) अवन्ध्यं—अमोघं, यत्कल्याणं, श्रेयस्—तन्निबन्धन—मूलबीजकारणरूपस्य वस्तुनो या—अवाप्तिस्तदुपमयोपमिता धृतिः.

यथा दौर्गत्य (दारिद्र्य) उपहतस्य, (दरिद्रस्य) चिन्तामणि—कल्पवृक्षादेरवाप्तौ विज्ञातः तच्चिन्तामण्यादेः गुणः—प्रभावो येन स विज्ञाततद्गुणः तस्य विज्ञाततद्गुणस्य (दरिद्रस्य) गतमिदानीं दौर्गत्यं निर्धनत्वं) इति विदिततया तस्य—दौर्गत्यस्य विघातभावः यथा स्यात्तथा भवति धृतिः मानससन्तोषरूपतृप्तिः, एवं जिनधर्म—चिन्तारत्नस्य प्राप्तावपि विदितं तज्जिनधर्ममाहात्म्यं येन स विदिततन्माहात्म्यः, तस्य विदिततन्माहात्म्यस्य क इदानीं संसार इति तज्जन्मादिरूपसंसारदुःखविषयक—चिन्तारहिता धृतिः सञ्जायत एवेयं धृतिर्यतः परमधृते र्जिनधर्मरूपचिन्तारत्नं उत्तमं—उत्कृष्टमालम्बनमस्ति, अर्थात् परमां धृतिं प्रति जिनधर्मप्राप्तिरसाधारणं कारणमस्तीत्येवं कार्यकारणभावो विज्ञेयः।

सारांशोऽयं=कर्मसम्बन्धरूपभावदारिद्र्येण दरिद्रस्यात्मनो जिनधर्मरूपमहादुर्लभचिन्तामणि—प्राप्तितः, तज्जिनधर्मरूपचिन्तारत्नस्य माहात्म्य—वैशिष्ट्यज्ञानानन्तरं मदीयः संसाररूपभाव-

निर्धनता निधनतां प्राप्नैव तादृशी सद्भावनोद्भवति, ततः सांसारिकदुःखमात्रस्य तच्चिन्ता-मात्रस्य चात्यन्ताभावो भवति, अत एवात्मनो, जिनधर्मनामकचिन्तामणिमालब्ध्यैवधृतिनामक-परमसन्तोषः प्रादुर्भवति.

**अथ लक्षणस्वरूपदृष्टान्तपूर्व्विका धारणा कथ्यते–**

यथा श्रद्धया, मेधया, धृत्या, कायोत्सर्गः सफलो भवति तथा धारणया (स्वस्वध्येये चित्तस्य स्थिरबन्धनेन) कायोत्सर्गः सफलो भवति.

धारणायाःस्वरूपम्=धारणा=अभिकृतवस्त्वविस्मृतिः=अधिकृत–नमस्कारविषयभूतवस्तुनः –अर्हतो भगवतः पदार्थस्याविस्मृतिः–नित्यस्मृतिः, अपायरूपेण निश्चितस्य प्रस्तुतस्यार्हच्चैत्य–पदार्थस्य मनसा सम्यग्धारणम् ( अधिकृतवस्तुनोऽविस्मृतिमत्त्वं धारणायो लक्षणम् )

(१) इयं धारणा चेह–स्वरूपवर्णने ज्ञानावरणीय–कर्मक्षयोपशमसमुत्था=ज्ञानावरणीय-नामककर्मणःक्षयोपशमेन समुत्था–उत्पन्ना धारणा निगद्यते,

(२) अविच्युति–वासना–स्मृतिरूपभेदत्रयवती धारणा भवति, अपायनिश्चितार्थविषय-कोपयोगसातत्यमविच्युतिः, तयाऽविच्युतिरूपधारणया वासनाख्यसंस्कार आत्मनि स्मृतिहेतुत्वेन स्थाप्यते सा वासना, यः पदार्थः पूर्वमनुभूतः तस्य वासनया कालान्तरे 'स एव' इत्युल्लेखरूपेण स्मरणं सा स्मृतिरुच्यते.

(३) प्रस्तुतवस्त्वानुपूर्वीगोचरा चित्तपरिणतिः=प्रस्तुतस्य–नमस्कारविषयभूताऽर्हद्भगवद्-वस्तुसत्कानुपूर्वी (क्रम–परम्परा) विषयिणी चित्तपरिणतिः–मानसिकः परिणामो धारणा,

जात्यमुक्ताफलमालाप्रोतकदृष्टान्तेन=जात्य ( श्रेष्ठ–समकोण–अभिजात ) मुक्ताफलमाला-प्रोतनक्रियाकारक–प्रोतको यथायोग्यं विधिक्रमेण, तस्य प्रोतकस्य यथा तथोपयोग ( चित्तैका-ग्रताजन्यप्रणिधान–ध्यान )स्य दृढत्व ( समर्थत्व–कठिनत्व–निश्चलत्व ) हेतुतः, केनाऽपि कारणेन विक्षेपमप्राप्तस्य सतः, एतत् प्रोतनेन=एतन्मुक्ताफलप्रोतनेन गुणवती–सूत्रवती निष्पद्यते, अधिकृतमाला=जात्य–मुक्ताफलमाला सिद्ध्यति।

उपनयः=एवमेतद्बलात्=ज्ञानावरणीयकर्मक्षयोपशमजन्याविच्युति–आदि भेदत्रयवत्याः, प्रकृतवस्तु–आनुपूर्वीविषयकचित्तपरिणतिरूपधारणाया बलेनाथवा यत्प्रकारावच्छिन्नं वस्तु वर्तते तत्प्रकारावच्छिन्नवस्तुविषयकोपयोगदृढता–बलेन स्थानादियोगप्रवृत्तस्य स्थानादियोगः=मोक्षेण सहयोजनात् सर्वप्रकारकोऽपि धर्मव्यापारो योगः कथ्यते, स योगः पञ्चधा तथाहि–

(१) स्थानं=येन स्थिरो भवति तत् स्थानमासनम्, कायोत्सर्गः, पर्यङ्कासनं–पद्मा-सनादिकं सकलयोगशास्त्रप्रसिद्ध विशिष्टासनप्रकारं,

(२) उर्ण—वर्णः=आत्मनो योगक्रियायां योजने, यानि प्रणवादिमन्त्राक्षराणि, उच्चारे आगच्छन्ति, तानि उर्ण—वर्णरूपाणि कथ्यन्ते, यथा 'ओँ, अर्हं, सोऽहं, तत्त्वं, वीरमित्यादीनि,' तथाऽऽत्मध्यानं, समाधिप्राणायामादेरुपयोगितादर्शकानि शास्त्राणि ' उर्ण—वर्णे ' त्यादिशब्देनोच्यन्ते,

(३) अर्थः=ध्यानसमाधि—प्रभृति—प्रारम्भे, उच्चार्यमाण—मन्त्रतच्छास्त्रादीनां परमार्थ-रहस्यादीनि ज्ञात्वा—विभाव्य तथा तथा भावनायुक्तैर्भाव्यम्,

(४) आलम्बनम्=बाह्यप्रतिमादिकमवलम्ब्य ध्यातव्यम्, वीतरागप्रेम्णा परमपूज्यभावेन रावणवद् भगवद् भक्तिः कार्येति,

(५) निरालम्बनम्=रूपिद्रव्य—प्रतिमादेरालम्बनं बिना ध्यानं यत् कर्तव्यम्, स निरालम्बनयोगः कथ्यते, स्थानवर्ण ( उर्ण ) रूपौ द्वौ प्रकारौ कर्मयोगस्य वर्तेते, शेषप्रकारत्रयं ज्ञानयोगस्य, प्रणिधानादिः, शुभाशयेन सह भवत्यतः सर्वधर्म—व्यापारोऽतिशयशुद्धो भवति, ततस्ते योगत्वेन कथ्यमानाः सन्ति, तथाऽपि सर्वदर्शनकारैर्येन सङ्केतेन योगो ज्ञापितः स विशेषप्रकारैः स्थानकानि प्राप्तो धर्मव्यापारः स योगः कथ्यते ।

चैत्यवन्दनोपरि योगघटना=स्वरसम्पन्मात्रादे नियमपूर्वकं शुद्धानां वर्णानां स्पष्टमुच्चारणं यथाविधि—उच्चारणं वर्णयोगः,वर्णयोगस्य फलं यथार्थं पदज्ञानम्, अत एव चैत्यवंदनसूत्रोच्चारणसमये वर्णयोगे सति, सूत्राणां पदज्ञानं यथार्थं, यदा यथाविध्यासनं कृत्वा शुद्धोच्चारपूर्वकं सूत्रमुच्चार्य चैत्यवंदनं कुर्याच्च सहैव तत्सूत्राणां भावार्थस्तथा, आलम्बने स्यादुपयोगस्तदा तच्चैत्यवन्दनं पूर्वोक्तयोगचतुष्टयसम्पन्न भवति. एतादृशं चैत्यवंदनं तदेव भावक्रिया, तदेव, अमृतमनुष्ठानं, अथ यथाविधि, आसने स्थित्वा, शुद्धपद्धत्या, सूत्रमुच्चार्य चैत्यवन्दनं क्रियमाणमपि तत्समये सूत्रस्याऽर्थे तथाऽऽलम्बने उपयोगो, न स्यात्तदा तच्चैत्यवंदनं, ज्ञानयोगशून्यत्वेन, द्रव्यक्रियारूपमस्ति, एतादृश्यां द्रव्यक्रियायां, अर्थालम्बनयोगस्याभावे सत्यपि तस्य तीव्रारुचिर्भवेत्तदा सा द्रव्यक्रिया प्रान्ते भावक्रियाद्वारा कदाचिन्मोक्षदाऽपि मता, तस्मादीदृशी—क्रिया तद्धेत्वनुष्ठानत्वेनोपादेया कथिता, अथ स्थानादियोगानामभावे क्रियमाणं चैत्यवन्दनं केवलं निष्फलं, एतावदपि न परन्तु—अनिष्टफलदायकं भवति, एतावदर्थं योग्याधिकारिणामेव शिक्षा दातव्येति ।

यः कश्चिदर्थाऽऽलम्बनरूपाभ्यां द्वाभ्यां योगाभ्यां शून्यो भूत्वा स्थानवर्णयोगाभ्यां शून्यो भवेत्तस्य तदनुष्ठानं कायिकचेष्टामात्रत्वेन निष्फलं भवेदथवा मृषावादत्वेन विपरीतफलदं भवेत्तस्मात्तदसदनुष्ठानं वाच्यम्, एतावदर्थं योग्याधिकारिभ्यश्चैत्यवन्दनं शिक्षणीयम्, चैत्यवन्दने

'तावकायं....वोसिरामि' इत्यादि शब्दैर्या कायोत्सर्गकरणप्रतिज्ञा श्रूयते, ततः सर्वविरतश्चैत्य-वंदनस्य तात्त्विकाधिकारी देशविरतोऽपि, अधिकारी तथा सम्यग्दृष्टिरपुनर्बंधकोऽपि व्यवहार-मात्रेणाधिकार्यस्ति, परन्तु ये विधिबहुमानं कर्त्तुं न जानन्ति, ते सर्वथा चैत्यवंदनस्यानधि-कारिणः, तत एतादृशानामात्मनां चैत्यवंदनं न शिक्षणीयम्) पुरुषस्य यथोक्तनीत्यैव=

यादृशं भवेत् तादृशोपयोगस्थिरीकरणेनैव केनाऽपि कारणेनाविक्षिप्तभवनरूपनीत्या–तथा यथाभव्यं यथाविधि, अनुसरणरूपनीत्या–हीत्यैव योगस्याष्टगुणमाला निष्पद्यते, यतः पुण्योपचयपुष्टेः मूलभूतकारणमस्ति, (गुणाष्टकस्वरूपमित्थं=१–अद्वेषः=सत्तत्त्वं प्रति द्वेषाभावः, २–जिज्ञासा= सत्तत्त्वं ज्ञातुमिच्छा, ३–शुश्रूषा=सत्तत्त्वविषयकोत्कटेच्छा, ४–श्रवणं=सत्तत्त्वविषयकश्रवणं, ५–बोधः=सत्तत्त्वविषयको बोधः, ६–मीमांसा=विदितसत्तत्त्वविषयकं सूक्ष्मचिन्तनं, ऊहोऽपोहः, हेयोपादेयादिविवेकः, ७–प्रतिपत्तिः=उपादेयतत्त्वग्रहणं, ८–प्रवृत्तिः=तत्त्व–सत्यरूपप्रवृत्तिः, चरण-रमणता, आत्मस्वरूपे स्थिरता.)

## अथाऽनुप्रेक्षारूपात्मधर्मस्य दृष्टान्तपूर्वकं सलक्षणं स्वरूपं निरूपयति–

अनुप्रेक्षास्वरूपम्=यथा श्रद्धया, मेधया धृत्या, धारणया, कायोत्सर्गः सफलो भवति, तथा 'एवं अनुप्रेक्षया'–अर्हद्गुणानां पुनः पुन श्चिन्तनेनार्थादर्हद्गुणेषु तैलधारावत् चित्त-स्याखण्डप्रवाहवाहनेनैव, न प्रवृत्तिमात्रतया–केवलं क्रियारूपेण न हि, अथवाऽर्हतां गुणानां पुनः पुनश्चितनाभावपूर्वेण नहि. अपि तु भावपूर्णेन चिन्तनं अर्थादनुप्रेक्षया कायोत्सर्गो मे सफलो भवति.

अनुप्रेक्षालक्षणम्=अनुप्रेक्षा नाम तत्त्वार्थानुचिन्ता=तत्त्वस्य=अर्थस्यानुचिन्तनं–पुनः पुन-र्विचारणमथवा तत्त्वभूतस्यार्थस्यानुचिन्तनं–पुनः पुनर्विचारणमनुप्रेक्षाया लक्षणम्.

अनुप्रेक्षाया वैशिष्ट्यं=(१) प्रस्तुतानुप्रेक्षा, चित्तधर्मः=आत्मधर्मविशेषः,

(२) एषोऽनुप्रेक्षारूप आत्मधर्मः, ज्ञानावरणीयकर्मणः क्षयोपशमेन जन्यः,

(३) अनुभूतः–प्रत्यक्षाद्यनुभवविषयभूतार्थ–पदार्थस्य पुनः पुनःप्रवृत्तिरूपाऽभ्यासभेद–प्रकारविशिष्टः चित्तधर्मः (पुनः पुनः संशीलनम्, (सर्व. पृ. १२४ रामा.) स्थितौ यत्नोऽभ्यासः। प्रकाशप्रवृत्तिरूपवृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामविशेषः स्थितिः। तन्निमित्तीकृत्य यत्नः पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यासः (सर्व. सं. पृ. ३६६ पाताञ्ज.) पौनःपुन्यम्। यथा समाधि–विशेषाभ्यासात् (गौ. सू. ४–२–३६) इत्यादौ विषयान्त-रानभिष्वङ्गस्याभ्यासः (गौ. वृ. ४–२–३६) संस्कारबाहुल्यमभ्यासः। दृढतरसंस्कार इति केचित् (गौ. वृ. ३–२–४२)

(४) परमसंवेगहेतुः=एष चित्तधर्मः=परमस्य ( अत्यन्तोत्कटस्य–तीव्रतमस्य ) संवेगस्य (मोक्षविषयकाभिलाषस्य हेतुः, अनुप्रेक्षाः, अनुप्रेक्षा कारणं भवति परमसंवेगं कार्यं प्रति )

( संवेगः=देवमानवचक्रवर्तिनां भोगाः, कामाश्च आपातकाल एव मधुरा अपि प्रान्ते दुःखस्वरूपसंसारबन्धननिबन्धनभूता इति ज्ञात्वा—एकमोक्षाकाङ्क्षा संवेगः, अथवा मोक्षमार्गं प्रति अदम्यःपरमसम्यगुत्साहः )

(५) परमसम्यक्संवेगविषयकदृढता (मेरुवन्निश्चलता स्थिरता) विधायी—विधायको-ऽनुप्रेक्षारूपश्चित्तधर्मः,

(६) उत्तरोत्तरविशेषसम्प्रत्ययाकारः=उत्तरोत्तरं ( क्रमानुसारेण—एकैकानन्तरं वर्धमानो-ऽग्रेऽग्रे वर्धमानः ) विशेषः ( उत्कृष्टः—श्रेष्ठः ) सम्प्रत्ययः=सम्यक् श्रद्धायुक्तप्रति—ज्ञानस्वभाव-वानेषोऽनुप्रेक्षारूपश्चित्तधर्मः ।

(७) केवलालोकोन्मुखश्चित्तधर्म्मः=केवलज्ञानरूपमहाज्योतिः सम्मुखताकारी, अनुप्रेक्षा-रूप आत्मधर्म्म इति स्वरूपम्,

तत्रोदाहरणम्=यथा रत्नशोधकः—रत्नस्य शुद्धिकारकोऽनलो—वह्निरत्नमभि सम्प्राप्तः—अभिव्याप्तः, रत्नस्य मलं—दोषं दग्ध्वा शुद्धिमापादयति—निर्मलतां प्रकरोति तथाऽनुप्रेक्षानामकोऽ-नलोऽप्यात्मरत्नमुपसम्प्राप्तः,

कर्मरूपमलं दग्ध्वा—शोधयित्वा कैवल्यमपुनर्भवमापादयति- नितरां निर्माति यतस्तथा तत्स्वभावोऽस्तीति.

श्रद्धादिपंचकं महासमाधिजनकम्=‘एतानि श्रद्धादीन्यपूर्वकरणाख्यमहासमाधिबीजानि’ एतानि—अनन्तरोक्तस्वरूपाणि श्रद्धादीनि पञ्च=श्रद्धामेधाधृतिधारणाऽनुप्रेक्षारूपचित्तधर्मात्मकपञ्चकं, अपूर्वकरण (प्रथम) नामक महासमाधि—बीजरूपं ( अपूर्वकरण—नामक- महासमाधिरूपकार्यं प्रति श्रद्धादिपञ्चकं मूलभूतबीजं. )

( अपूर्वकरणस्वरूपम्=अपूर्वकरणं तु पूर्वप्रवृत्तयथाप्रवृत्तिकरणादनन्तरं, अनिवृत्तिकरणा-त्पूर्वमुद्भवत्करणं, सामान्यविचारतो यथाऽपूर्वकरणमिदं पूर्वप्रवृत्तस्य कार्यं तथाऽनिवृत्तिकरणस्येदं कारणं, अपूर्वकरणमेतत् पूर्वप्रवृत्तकरणादत्यन्तशुद्धमतिशायि, परन्तु, अनिवृत्तिकरणात्तदधःकक्षं, एकेन्द्रियतश्चतुरिन्द्रियपर्यन्ता जीवा एतदपूर्वकरणस्याधिकारिणो न सन्ति, अपूर्वकरणे तु पचेन्द्रियपर्याप्तसंज्ञिनस्तथाऽपार्धपुद्गलपरावर्त्ततः किञ्चिन्न्यूनसंसारपर्यन्तवर्तिनस्तावति कालेऽवश्यं मुक्तिगामिनः सत्ता वर्त्तते, ते एव विशिष्टा जीवा परिभाषितग्रन्थिभेदनेऽपूर्वकरणनामक—शस्त्रस्योपयोगं विदधति. एतादृशजीवेषु, द्वेषेर्ष्या—निन्दादिदोषाणामल्पीयान् प्रभावः पतति, यतो

जीवानामेतेषां स्वकल्याणकरणात्यन्तिक–तीव्रतमोऽभिलाषो भवति. तस्मात्कारणात् ते सांसारिक-प्रपञ्चतो दूरस्था एव स्थातुं प्रयतन्ते, नीतिमार्गमाश्रिताः, सत्पुरुषनिष्ठगुणपक्षपातिनः, तथा सुदेवसुगुरु–अतिबहुमानकरणसप्रयत्नास्तत्र का नवीनता? एतेषां जीवानां सम्बन्धे, इत्येवं कथ्यते यत्तेऽध्यात्मनः प्राग्भूमिकास्थास्तेऽपुनर्बन्धकानन्तरमपि पूर्वाऽननुभूताऽध्यवसायविशेषमपूर्वकरणं प्राप्नुवन्ति, यद्यपि यथाप्रवृत्तकरणे, आत्मनो निर्मलताया अधिष्ठानं क्षिप्यते, तस्य विशिष्ट-विमलता तु अपूर्वकरणमध्य एव भवति, यतोऽस्मिन्करणे प्रवेशेन सहैव प्रथमसमयात् (१) स्थितिघात (२) रसघात (३) गुणश्रेणिः (४) अभिनवस्थिति बन्धात्मिकाश्चतस्रः क्रिया भवन्ति)

कथमिति चेदुच्यते 'तत्परिपाकातिशयतस्तत्सिद्धेः=श्रद्धादिरूपबीज–कारणस्य परिपाकस्य (फलोत्पत्तिं प्रति अभिमुखत्वं–परिपक्वताया) अतिशयतः–प्रकर्षतः अपूर्वकरणरूपमहासमाधि-फलस्य सिद्धिर्भवति,

## एतद् श्रद्धादिपञ्चकस्य परिपाकस्वरूपम्–

परिपाचना त्वेषां कुतर्कप्रभवमिथ्याविकल्पव्यपोहतः श्रवणपाठप्रतिपत्तीच्छाप्रवृत्त्यादिरूपा,

एषां श्रद्धादीनां पञ्चानां परिपाचना–परिपाकः, कुतर्कप्रभवः. (बोधरोगः शमाऽपायः श्रद्धाभङ्गोऽभिमानकृत्। कुतर्कश्चेतसो व्यक्तं भावशत्रुरनेकधा ॥ यो. स. ८७,

(१) कुतर्कः=बोधं–सम्यग्ज्ञानं प्रति व्याधिरूपोऽस्ति. यतः स कुतर्को यथार्थबोधमुपहन्ति.

(२) कुतर्कः=शमापायः–शमं–आत्मशान्तिं प्रति अपायरूपो विघ्नरूपोऽस्ति, यतः कुतर्को मिथ्यात्वरज्ञान् जनयति.

(३) श्रद्धाभङ्गः=कुतर्कः, कदाग्रहः श्रद्धां भनक्ति। यतः सदागमार्थं न प्रतिपद्यते.

(४) अभिमानकृत्=कुतर्कः, अभिमानं करोति, अभिमानस्य कारको भवति, यतो मिथ्याऽभिमानं–स्वमहत्त्वं गायति. कुतर्कश्चेतस आत्मनो व्यक्तं प्रकटरीत्याऽनेकधानेक–प्रकारै र्भावशत्रुः–आन्तरारिर्महानेव. )

ये मिथ्याविकल्पाः "अविद्यासङ्गताः प्रायो विकल्पाः सर्व एव यत्। तद्योजना-त्मकश्चैष कुतर्कः किमनेन तत् ॥ यो. स. ९० ॥ जातिप्रायश्च सर्वोऽयं प्रतीतिफलबाधितः, हस्ती व्यापादयत्युक्तौ प्राप्ताऽप्राप्तविकल्पवत् ॥ यो. स. ९१ ॥" कल्पनामात्रात्मकास्तेषा-मात्यन्तिकाभावद्वारा, श्रवणपाठप्रतिपत्तीच्छा प्रवृत्त्यादिरूपा=

(१) श्रवणपरिपाकः=धर्मशास्त्रस्य सप्रेम, निशमनम्,

(२) पाठपरिपाकः=धर्मशास्त्राणां सूत्राणां मनसा सावधानेन स्वाध्यायः कर्त्तव्यः,

(३) प्रतिपत्तिपरिपाकः=धर्म्यशास्त्राणामर्थानां सम्यग् संवादिनी प्रतीतिः (निश्चयात्मक श्रद्धा)

(४) इच्छापरिपाकः=शास्त्रविहितानुष्ठानविधिविधानात्मकतीव्रतमाभिलाषः ( अद्वेष—रुचिगुणरूपः )

(५) प्रवृत्तिपरिपाकः=शास्त्रविहितानुष्ठानस्य विधिबहुमानपूर्वकमखिन्नतयाऽऽचरणम् (अखेद-गुणाऽऽविष्कारः) आदिशब्दतोऽत्र विघ्नविजयादिरूपपरिपाकस्य ग्रहणम् तथाहि=

(६) विघ्नविजयरूपपरिपाकः=धर्मेऽन्तरायकारकाणां जघन्यमध्यमोत्कृष्ट विघ्नानां निराकरणम्, मार्गे गच्छतां यथा कण्टकज्वरादिदिङ्मोहा विघ्नभूता भवन्ति, तथा मुक्तयेऽनुतिष्ठता कण्टकविघ्नसमाः परिषहाः, ज्वरविघ्नसमा शारीरा 'रोगाश्च' दिङ्मोह—समा मिथ्यात्वाद्युदयरूपाः, तेषां क्रमेण सिद्धासनाद्यासनेन, हितमिताहारादिना, गुरुसेवादिना जयो भवति,

(७) सिद्धिरूपपरिपाकः=अनुष्ठेयार्थ (धर्मपुरुषार्थ)स्य सिद्धिर्विजयः, अथवाऽधिकृताऽहिंसादिधर्मस्थानस्य सिद्धिः—प्राप्तिः, यत्र गुणाधिकान् प्रति विनयः, गुणहीनान् प्रति दया, मध्यम—गुणवतः प्रत्युपकारस्य भावना प्रधानतया वर्त्तते,

(८) विनियोगरूपपरिपाकः=कर्त्तव्यार्थसिद्धिर्यथायोगं विनियोज्याऽथवा स्वप्राप्तधर्मस्थानं यथायोग्यमुपायेन, अन्येषु जीवेषु प्रापणीयम्, अतोऽनेकजन्मजन्मान्तरं यावत् प्रकृष्टधर्मस्थानस्य-प्राप्तिपरम्परा चलन्ती भवेत्,

(९) अवंचकत्रयरूपपरिपाकः=सत्यसाधुस्वरूप—सत्पुरूप—सद्गुरोर्योगः स योगावंचकः, जातुचिन्न वञ्चयते, अमोघमवश्यमविसंवादी भवति, पश्चाच्च सत्पुरुषं सत्पुरुषत्वेन परिचित्य, या वन्दननमस्कार—वैयावृत्त्यादि—क्रियाःक्रियन्ते स योगः क्रियाऽवञ्चकः, सा क्रिया कदाचिन्न वञ्चयतेऽन्यं, अवश्यं धर्मफलदायिनी तथा चैवं सत्पुरुषं सद्गुरुत्वेन परिचित्य—ज्ञात्वा तं प्रतीत्य या वन्दनादिकाः क्रियाः कृतास्तासां फलमपि जातुचित् न वञ्चयते, अवश्यममोघं फलमायात्येव स योगः फलावञ्चको ज्ञेयः,

**श्रद्धादि—परिपाकातिशयस्वरूपवर्णनम्—**

श्रद्धादि पञ्चकस्य (१) श्रवणादिपरिपाकस्यातिशयः तथा स्थैर्यसिद्धिरूपलक्षणं,

(२) श्रद्धादि—पञ्चकस्य श्रवणादिपरिपाकस्याऽतिशयः प्रधानपुरुषार्थस्य—मोक्षपुरुषार्थस्य हेतुः—कारणमस्ति,

(३) श्रद्धादिपञ्चकस्य श्रवणादिपरिपाकस्याऽतिशयः, अपूर्वकरणरूपमहासमाधिपरम-तत्त्वावह इति परिभावनीयं स्वयमित्थम्,

"एतदुच्चारणं त्वेवमेवोपधाशुद्धं सदनुष्ठानं भवती" ति, एतेषां श्रद्धादि–सूत्राणा-मुच्चारणं ( कण्ठताल्वाद्यभिघातेन शब्दजनकव्यापारः शब्दोत्पत्त्यनुकूलव्यापारः ) तु, एवमेव–पूर्वोक्तविधिप्रकारेणोपधाशुद्धं=मायया वा परीक्षया शुद्धं रहितं वा निर्मलं) सद् अनुष्ठानं–सद्धेतु, अमृताऽनुष्ठानं भवतीति, श्रद्धादि–उपधा शुद्धश्रद्धाद्युच्चारणरूप–सदनुष्ठानवानेवास्य–कायोत्सर्गस्याधिकारी–योग्य इति ज्ञापनार्थं, श्रद्धादिसूत्राणामुच्चारणं विशिष्टमेवात एव–विशिष्टतां श्रद्धादीनां दर्शयति–

'वर्धमानया–श्रद्धया' वृद्धिं गच्छन्त्या, प्राप्नवत्या प्राप्नुवन्त्या, नावस्थितया (न बन्धवत्या न स्थितया न निवृत्तया–हीनमानया तु नैव) वर्धमानयेति पदमिदं श्रद्धादिपञ्चकपदेऽर्थात् प्रतिपदं–पदे पदे, उपस्थायि=उपतिष्ठते इत्येवं शीलं, श्रद्धया वर्धमानया एवं मेधयेत्यादि=वर्धमानया, धृत्या वर्धमानया, धारणया वर्धमानया, अनुप्रेक्षया वर्धमानया, लाभक्रमादुपन्यासः श्रद्धादीनां, तथाहि–अन्वयव्यतिरेकाभ्यां पूर्वपूर्वपदस्य सत्त्वयोत्तरोत्तरपदसत्ता, तथा च श्रद्धायां सत्यां–विद्यमानायां मेधायाः सत्ता, श्रद्धाया अभावे मेधाया अभावः,

(१) यतो मेधाया लाभं प्रति श्रद्धालाभः कारणम्, तस्मान्मेधाकारणभूता श्रद्धा पूर्वं रक्ष्यते, श्रद्धायाः कार्यभूता मेधा तदनु मुच्यते,

(२) तथा मेधालाभसत्त्वे धृतिलाभस्य सत्ता, अत एव धृत्याः कारणभूता मेधा पूर्वं मुच्यते, तस्याश्च कार्यभूता धृतिस्तदनु मुच्यते,

(३) तथा धृतिलाभे धारणाया लाभः, अतो धारणाकारणभूता धृतिः पूर्वं मुच्यते, तस्याश्च कार्यभूता धारणा तदनु मुच्यते,

(४) तथा धारणालाभेऽनुप्रेक्षालाभः, अतोऽनुप्रेक्षया कारणभूता धारणा पूर्वं मुच्यते, अतःकार्यभूताऽनुप्रेक्षा तदनु मुच्यते,

वृद्धिरप्यनेनैव क्रमेणाऽर्थात्, श्रद्धावृद्धितो मेधावृद्धिः, तथा मेधावृद्धितो धृतिवृद्धिः तथा धृतिवृद्धितो धारणावृद्धिः, तथा धारणावृद्धितोऽनुप्रेक्षावृद्धिः, एवं –वर्धमानया श्रद्धया, वर्धमानया मेधया, वर्धमानया धृत्या, वर्धमानया धारणया, वर्धमानयाऽनुप्रेक्षया, "तिष्ठामि कायोत्सर्गमित्यनेन प्रतिपत्तिं दर्शयति" प्रतिपत्तिं–प्रतिज्ञां दर्शयति ( कायोत्सर्गस्यारम्भ–आद्य-प्रयत्न–आद्यप्रवृत्तिरूपप्रतिपत्तिं दर्शयति )

–करोमि कायोत्सर्गं च तिष्ठामि कायोत्सर्गमिति द्वयो र्वाक्ययो र्वस्तुतो योऽर्थभेदो ययाऽपेक्षयाऽस्ति, तं सुन्दरशैल्या दर्शयति. प्राक् 'करोमि' 'करिष्यामि' इति क्रियाऽऽभिमुख्य-मुक्तं, साम्प्रतं त्वासन्नतरत्वात्क्रियाकालनिष्ठाकालयोः कथञ्चिदभेदात् तिष्ठाम्येवाऽहं–

प्राक् " करोमि " करिष्यामि इति क्रियाभिमुख्यमुक्तं, साम्प्रतं त्वासन्नतरत्वातक्रियाकालनिष्ठाकालयोः कथञ्चिदभेदात्तिष्ठाम्येवाहं, अनेनाभ्युपगमपूर्वं श्रद्धादिसमन्वितं च सदनुष्ठानमिति दर्शयति ।

आह—श्रद्धादिविकलस्यैवमभिधानं मृषावादः, को वा किमाहेति, सत्यम्, इत्थमेवैतदिति तन्त्रज्ञाः, किन्तु न श्रद्धादिविकलः प्रेक्षावानेवमभिधत्ते, तस्यालोचितकारित्वात्,

मन्दतीव्रादिभेदाश्चैते, तथाऽऽदरादिलिङ्गा इति, नातद्वत आदरादीति, अतस्तदादरादिभावेऽनाभोगवतोऽप्येत इति ।

इक्षुरसगुडखण्डशर्करोपमाश्चित्तधर्म्मा इत्यन्यैरप्यभिधानात्, इक्षुकल्पं च तदादरादीति भवत्यतः क्रमेणोपायवतः शर्करादिप्रतिमं श्रद्धादीति,

कषायादिकटुकत्वनिरोधत' शममाधुर्यापादनसाम्येन चेतस एवमुपन्यास इति, एतदनुष्ठानमेव चैवमिहोपायः तथा तथा सद्भावशोधनेनेति परिभावनीयं उक्तं च—

पं०..." प्रतिपत्तिमिति " प्रतिपत्तिः—कायोत्सर्गारम्भरूपा तां " क्रियाकालनिष्ठाकालयोः कथञ्चिदभेदादिति " कथञ्चित्—निश्चयनयवृत्त्या, स हि क्रियमाणं क्रियाकालप्राप्तं कृतमेव—निष्ठितमेव मन्यते, अन्यथा क्रियोपरमकाले क्रियानारम्भकाल इवानिष्ठितप्रसङ्गात्, उभयत्र क्रियाभावाविशेषात्, कृतं पुनः क्रियमाणमुपरतक्रियं वा स्यादिति, यदुक्तं—" तेणेह कज्जमाणं, नियमेण कयं कयं च भयणिज्जं । किञ्चिदिह कज्जमाणं, उवरयकिरियं व होज्जाहि ॥ १ ॥" व्यवहारनयस्त्वन्यत् क्रियमाणमन्यच्च कृतमिति मन्यते, यदाह—" नारम्भे च्चिय दीसइ, न सिवादद्धाए दीसइ तयन्ते । जम्हा घडाइकज्जं, न कज्जमाणं कयं तम्हा ॥ १ ॥" ततोऽत्र निश्चयनयवृत्त्या व्युत्स्रष्टुमारब्धकायस्तद्देशापेक्षया व्युत्सृष्ट एव द्रष्टव्य इति, ननु कदाचिच्छ्रद्धादिविकलः प्रेक्षावानप्येवमभिदधद्दृश्यते इत्याशङ्क्याह—

"मन्देत्यादि" मन्दो-मृदुस्तीव्रः-प्रकृष्टः, आदिशब्दात्तदुभयमध्यवर्त्ती मध्यमः, त एव भेदा-विशेषा येषां ते तथा "चः" समुच्चये "एते" श्रद्धादयः, किंविशिष्टा इत्याह-"तथा" तेन प्रकारेण ये आदरादयो वक्ष्यमाणास्त एव लिङ्गं-गमकं येषां ते तथा, "इतिः" वाक्यसमाप्तौ, ननु कथमेषां लिङ्गत्वं सिद्धमित्याह-"न" नव "अतद्वतः" अश्रद्धादिमतो यत इति गम्यते "आदरादि" वक्ष्यमाणमेव "इति" अतः श्रद्धादिकारणत्वाल्लिङ्गमिति, ततः किं सिद्धमित्याह-"अतः" श्रद्धादिकारणत्वात् "तदादरादिभावे" तत्र-कायोत्सर्गे आदरादेः लिङ्गस्य भावे-सत्तायाम् "अनाभोगवतोऽपि" चलचित्ततया प्रकृतस्थानवर्णाद्युपयोगविरहेऽपि किंपुनराभोगे? इत्यपिशब्दार्थः, "एते" श्रद्धादयः कार्याविनाभावित्वात् कस्यचित् कारणस्य यथा प्रदीपस्य प्रकाशेन वृक्षस्य वा च्छायया, इतिर्वाक्यसमाप्तौ ॥

अतो मन्दतया श्रद्धादीनामनुपलक्षणे, अपि, आदरादिभावे सूत्रमुच्चारयतोऽपि न प्रेक्षावत्ताक्षतिः, परमतेनापि श्रद्धादीनां मन्दतीव्रादित्वं साधयन्नाह-"इक्षुरसगुडखण्डशर्करोपमाः" इक्ष्वादिभिः-पञ्चभिर्जनप्रतीतैरुपमा-सादृश्यं येषां ते तथा "चित्तधर्म्माः" मनःपरिणामा "इति" एतस्यार्थस्य "अन्यैरपि" तन्त्रान्तरीयैः, किं पुनरस्माभिः? "अभिधानात्" भणनात्, प्रकृतयोरेवोपमानोपमेययोर्योजनामाह-"इक्षुकल्पं च" इक्षुसदृशं च "तद्" आदरादि' तस्मिन्-कायोत्सर्गे आदरः-उपादेयभावः आदिशब्दात्करणे प्रीत्यादि "इति" अस्मात्कारणाद् "भवति" सम्पद्यते "अतः" इक्षुकल्पादादरादेः "क्रमेण" प्रकर्षपरिपाट्या "उपायवतः" तद्धेतुयुक्तस्य शर्करा-सिता आदिशब्दात्पश्चानुपूर्व्या खण्डादिग्रहः तत्समं प्रकृतसूत्रोपात्तं श्रद्धामेधादिगुणपञ्चकम् "इतिः" परिसमाप्तौ। आह-किमिति दृष्टान्तान्तरव्युदासेनेक्ष्वाद्युपमोपन्यास इत्याशङ्कयाह-

"कषायादिकटुकत्वनिरोधतः" कषायाः-क्रोधादयः, आदिशब्दादिन्द्रियविकारादिग्रहस्त एव कटुकत्वं-कटुकभावस्तस्य निरोधादात्मनि किमित्याह-"शममाधुर्यापादनसाम्येन" शमः-उपशमः स एव माधुर्यं-मधुरभावः प्रीणनहेतुत्वात् तस्यापादनं-विधानं तेन तस्य वा साम्यं-सादृश्यं तेन "चेतसो" मनसः "एवम्" इक्ष्वाद्युपमानोपमेयतयोपन्यास आदरादीनाम् "इतिः" परिसमाप्तौ, उपायवत इति प्रागुक्तम्, अत उपायमेव दर्शयति-"एतदनुष्ठानमेव च" प्रकृतकायोत्सर्गविधानमेव न पुनरन्यत् "चः" समुच्चये "एवम्" इति सामान्येनादरादियुक्तम् "इहेति" शर्करादिप्रतिमश्रद्धादिभवने "उपायो" हेतुः, कुत इत्याह-"तथा तथा" तत्तत्प्रकारेण "सद्भावशोधनेन" शुद्धपरिणामनिर्मलीकरणेन "इति" एतत् "परिभावनीयं" अन्वयव्यतिरेकाभ्यामालोचनीयमेतद्। इदमपि परमतेन संवादयन्नाह-उक्तं च-

टी०...यत् प्राक् 'करोमि कायोत्सर्गमिति वाक्यं कथितं तत्र 'करोमि' रूप-क्रियापदस्य वर्तमानकालीनो यः प्रयोगः स भविष्यत्कालीनार्थवान् ('सत्सामीप्ये सद्वद्वा'

॥ ५–४–१ ॥ समीपमेव सामीप्यम्। सतो वर्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्तमानाद् धातोः सद्वद्वर्त्तमानवत् प्रत्यया वा स्युः ) अर्थात् प्राक् 'करोमि'—करिष्यामि इति क्रियाया आभिमुख्य—सामीप्यमुक्तं—दर्शितम्,

साम्प्रतमधुना तु 'तिष्ठामि कायोत्सर्गं' 'करोमि कायोत्सर्गं' करोमीति क्रियापदद्वारा तु—आसन्नतरत्व—आत्यन्तिक—समीपत्वस्य प्रतिपादनं भवति—यतोऽत्यन्तसमीपत्वेन निश्चयनय-विशेष—ऋजुसूत्रनयापेक्षया ( ऋजुसूत्रनयस्तु बहुसरलोऽस्ति भूतभविष्यत्कालं न पश्यन्, वर्त्तमानकाले किमस्ति ? किं भवति ? तद्विचारयति, सर्वसामग्री लब्धा न तदा कार्यमार-ब्धमिति कथं मन्येत ? सामग्री-प्राप्त्यनन्तरं कार्यमारभ्यते, यथा घटकार्यं, कार्यं, तदर्थं सामान्यतो मृत्तिकादण्डचक्रदवरक—कुम्भकारादिसामग्री घटनीया परन्तु, एतत्सर्वं स्थूलसामग्र्य-न्तर्गतं, तस्मादेतत्सर्वं सदपि कार्यं विलम्बतो भवतीत्येवं नो लगति, ततो वयं ब्रूमो 'यत्कार्यं विलम्बेन भवति' पूर्वोक्तसामग्रीतस्तत्र कारणभूता, अन्या सूक्ष्मा सामग्री वर्त्तते, सा काल-स्वभावनियतिकर्मपुरुषादिसामग्री मिलेत्तदा तत्क्षणादेव कार्यमुत्पद्यते, किञ्च पूर्वदर्शितसामा-न्यसामग्र्येव यदि घटे, उपयोगन्येव मन्येत तदा तन्मृत्पिण्डश्चक्रे आरोपितश्च तन्मृत्पिण्डस्य तदा प्रथमेकाऽऽकृतिर्जाता. साऽऽकृतिः पूर्वदर्शितसर्वसामग्रीतो जाताऽस्ति, ततः किं साऽऽ-कृति घटः कथयितुं न शक्यते परन्तु साऽऽकृतिर्भविष्यद् घटे उपयोगिन्यस्ति, एवं घटघटनाद् पूर्वीया याऽन्तिमाऽऽकृति भवति यतोऽनन्तरमेव घटो भवन्नस्ति साऽऽकृतिर्घटे वास्तविकी कारणभूताऽस्ति, तदाकृतेरनन्तरं घटारम्भो भवति चैकस्मिन्नेव समये घटो भवत्येव. ) क्रिया-काल (चरमसामयिकारम्भकाल) करणकाल—कार्यस्य चरमसमयाऽवच्छिन्नकरणरूप (क्रियाकाल) स्य च कार्यस्य निष्ठाकाल ( समाप्तिकाल ) स्याऽभेदोऽस्ति. यतो निश्चयनयस्य मतमेतद् क्रियमाणं कार्यं (चरमसमयावच्छेदेन वर्त्तमानक्रियाक्षणभाविकार्यं) अवश्यं कृतमेव,

**अन्यथा**—क्रियमाणकार्यस्य कृतत्वाभावे क्रियोपरमकाले क्रियाऽनारम्भकाले यथा कार्यस्याऽसमाप्तिरस्ति, तथाऽत्र कार्याऽसमाप्ति—प्रसङ्ग ( आपत्तिः ) आगमिष्यति यत उभयत्र क्रियाभावविशेषस्याऽभावोऽस्ति, ततो निश्चयनयाऽपेक्षया व्युत्सृज्यमानकायः ( व्युत्सर्गाय यः कायारम्भः—प्रथमप्रवृत्तिः ) स, देश—अंशस्यापेक्षया व्युत्सृष्ट एव मान्यः,

(**भगवतीजीसूत्रटीकायां**—कथं पुनस्तद्वर्त्तमानं सदतीतं भवति ? अत्रोच्यते यथा पट उत्पद्यमानकाले प्रथमतन्तुप्रवेशे उत्पद्यमान एवोत्पन्नो भवतीति, उत्पद्यमानत्वं च तस्य प्रथम-तन्तुप्रवेशकालादारभ्य पट उत्पद्यते इत्येवं व्यपदेशदर्शनात्प्रसिद्धमेव, उत्पन्नत्वं तूपपत्त्या

प्रसाध्यते, तथाहि–उत्पत्तिक्रियाकाल एव प्रथमतन्तुप्रवेशेऽसावुत्पन्नः, यदि पुनर्नोत्पन्नोऽभविष्यत्, तदा तस्याः क्रियाया वैयर्थ्यमभविष्यत्, निष्फलत्वात्, उत्पाद्योत्पादनार्था हि क्रिया भवन्ति, यथा च प्रथमे क्रियाक्षणे नासावुत्पन्नस्तथोत्तरेष्वपि क्षणेषु अनुत्पन्न एवाऽसौ प्राप्नोति, को ह्युत्तरक्षणक्रियाणामात्मनि रूपविशेषो ? येन प्रथमया नोत्पन्नस्तदुत्तराभिस्तूत्पाद्यते, अतः सर्वदैवानुत्पत्तिप्रसङ्गः दृष्टा चोत्पत्तिः, अन्त्यतन्तुप्रवेशे पटस्य दर्शनात्, अतः प्रथमतन्तुप्रवेशकाल एव किञ्चिदुत्पन्नं पटस्य, यावच्चोत्पन्नं न तदुत्तरक्रिययोत्पाद्यते, यदि पुनरुत्पाद्येत तदा तदेकदेशोत्पाद एव क्रियाणां कालानां च क्षयः स्यात्, यदि हि तद्देशोत्पादननिरपेक्षा अन्याःक्रिया भवन्ति, तदोत्तरांशानुक्रमणं युज्यते नान्यथा, तदेव यथा पट उत्पद्यमान एवोत्पन्नस्तथैव बहुसमयपरिमाणत्वात् कायोत्सर्गस्यादिसमयात् प्रभृति व्युत्सृज्यमानकाय एव व्युत्सृष्टः, कथं यतो यदि हि स कायोत्सर्जनाभिमुखीभूतः कायोत्सर्गस्यादिसमय एव न व्युत्सृष्टः स्यात्तदा तस्याद्यस्य व्युत्सर्जन–समयस्य वैयर्थ्यं स्यात्, तत्राव्युत्सृष्टत्वात्, यथा च तस्मिन् समये न व्युत्सृष्टः, तथा द्वितीयादिसमयेष्वपि न व्युत्सृजेत्, को हि तेषामात्मनि रूपविशेषो ? येन प्रथमसमये न व्युत्सृष्ट, उत्तरेषु व्युत्सृजतीति, अतः सर्वदैवाऽव्युत्सर्जन–प्रसङ्गः, अन्त्यसमये कायोत्सर्गस्य दर्शनात्, अतः कायोत्सर्गादिसमय एव किञ्चिद् व्युत्सृष्टं, यश्च तस्मिन् व्युत्सृष्टः स चोत्तरेषु समयेषु न व्युत्सृजति, यदि तु तेष्वपि तदेवाद्यं व्युत्सर्जनं भवेत्तदा तस्मिन्नेव व्युत्सर्जने सर्वेषां कायव्युत्सर्जन–समयानां क्षयः स्यात् यदि हि तत्समयव्युत्सर्जन–निरपेक्षाण्यन्यसमयव्युत्सर्जनानि भवन्ति, तदोत्तरव्युत्सर्जनाऽनुक्रमणं युज्येत, नान्यथा तदेवं व्युत्सृज्यमानोऽपि कायो व्युत्सृष्टो भवतीति.)

"कृतं पुनः क्रियमाणं उपरतक्रियं वा स्यात् 'तेनेह क्रियमाणं नियमेन कृतं, कृतं च भजनीयं, किञ्चिदिह क्रियमाणं उपरतक्रियं वा भवेदि' ति। व्यवहारनयस्त्वन्यत् क्रियमाणं अन्यच्च कृतमिति मन्यते, यदाह "नारम्भे किल दृश्यते न शिवादर्धे नो दृश्यते तदन्ते, यस्माद्घटादि कार्यं न क्रियमाणं कृतं तस्मात्" ततोऽत्र निश्चयनयवृत्त्या, व्युत्स्रष्टुमारब्धकायस्तद्देशापेक्षया व्युत्सृष्ट एव द्रष्टव्य इति"

इत्येतन्निरूपणेनेदं वस्तु दर्शयति यत् प्रतिज्ञापूर्वकं श्रद्धादिना युक्तं यदनुष्ठानं तत्सदनुष्ठानं कथ्यते.

**अथ विषयमेनं शङ्कासमाधानपूर्वकं सुन्दरं विवेचयति–**

**शङ्का**=श्रद्धादिविकलस्य (यस्य श्रद्धादि नास्ति तस्य एवमभिधानं) ('अरिहंत-

चेइयाणमिति पदादारभ्य ठामि काउसग्गं" पर्यन्तं पाठरूपेणोच्चारणं ) मृषावादः, को वा किमाहेति, यतो वस्त्वेतन्निश्चितमेव यत्र पुरुषे श्रद्धादिधर्माभावोऽस्त्यतः तस्यैवं कथनं मृषावादः कथं न ?

**समाधानम्**=युष्मदीयं कथनं सत्यमस्ति यतः श्रद्धादिरहितस्य सूत्रोच्चारणं मृषावादरूपमिति–'इत्थमेवैतदिति तन्त्रज्ञाः (शास्त्रज्ञाः) कथयन्ति, परन्तु श्रद्धादिविकलः प्रेक्षावान्, एवं नाभिधत्ते यतस्तस्मिन् प्रेक्षावति, आलोचित–कारित्वं सुतरां वर्त्तते.

**शङ्का**=कदाचित्, श्रद्धादिविकलः प्रेक्षावानपि, एवमभिदधत् कथं दृश्यते ?

**समाधानम्**=एते–श्रद्धादयः (१) मन्दभेदवन्तः–मन्दो मृदुः (जघन्यकोटिकः) तद्वन्तः (२) तीव्रः–प्रकृष्टः ( उत्कृष्टकोटिकः ) तद्भेदवन्तः, (३) आदिशब्दतः–तदुभयमध्यवर्ती मध्यमः (मध्यमकोटिकः) तद्भेदवन्तः, श्रद्धादयः ।

'तथादरादिलिङ्गाः=तेन प्रकारेण ये, आदरादयो वक्ष्यमाणास्ते एव लिङ्गं–गमकं येषां ते तथा ।

( लिङ्गशब्दव्युत्पत्तिस्तु व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम् ( सि. च. २ पृ. २५×गौ. वृ. । अथवा लिङ्ग्यते गम्यतेऽनेनार्थः इति लिङ्गम् (न्या. बिन्दु. पं. २ पृ. २१)

(१) जघन्यकोटिक ( मन्द ) श्रद्धादेर्निर्णयः ( परीक्षा ) जघन्यकोटिक ( मन्द ) आदरादिलिङ्गेन–गमकेन ज्ञायतेऽनुमीयते.

(२) मध्यमकोटिक–श्रद्धादे–र्निर्णयो मध्यमकोटिकादरादिलिङ्गेन–हेतुना ज्ञायते.

(३) उत्कृष्टकोटिकश्रद्धादेः परीक्षा, उत्कृष्टकोटिकादरादि–गमकेन गम्यतेऽर्थात् प्रेक्षावान् पुरुषः सर्वथा श्रद्धादिराहित्यवान् न भवति, कदाचित् सूत्रमनुच्चारयन् सन्, अर्थान्मन्दादरादि दृष्ट्वा कदाचिदेवं कथ्यते, एष 'श्रद्धादिविकलः' परन्तु तत्र सर्वथा श्रद्धादिविरहो नास्ति. परन्तु मन्दादरादि–सत्त्वान्–मन्दश्रद्धादि वर्त्तते एवं ज्ञेयं.

**शङ्का**=श्रद्धादीन् प्रति आदरादीनां लिङ्गत्वं–गमकत्वं कथं सिद्धं स्यात् ?

**समाधानम्**=श्रद्धादिविरहवति पुरुषे, आदरादिविरहो दृश्यते, अर्थाद् यत्र श्रद्धादिविरहोऽस्ति, तत्रादरादिविरहोऽस्ति, यत्र श्रद्धादिसद्भावोऽस्ति, तत्रादरादिसद्भावोऽस्ति, इत्येवं ज्ञानं भवति, तथा च श्रद्धादेरादरादि, कारणत्वेन लिङ्गं कथ्यते, यदा श्रद्धादि, कार्यं तदाऽऽदरादि, तस्य कारणम्, आदरादिसत्तायां श्रद्धादेःसत्ता, आदरादेरसत्तायां श्रद्धादेरसत्ता, अर्थादन्वयव्यतिरेकाभ्यां श्रद्धादिकार्यं प्रति, आदरादिकारणमस्ति–एवं कार्यकारणभावो विज्ञेयः ।

अत एव 'तदादरादिभावे' तत्र—कायोत्सर्गे श्रद्धादिरूपकार्यस्य कारण (लिङ्ग) भूतादरादेः सत्तायां (विद्यमानतायां) सत्यां 'अनाभोगवतोऽपि' चित्तस्य—परिणामस्य चञ्चलत्वेन प्रकृत—प्रस्तुतस्थानवर्णादि—विषयकोपयोगस्याभावेऽपि (किं पुनराभोगे? इत्यपि शब्दार्थः) 'एते' श्रद्धादयः सन्ति, श्रद्धादिकारणत्वेनादरादेः कायोत्सर्गे सत्त्वम्, अनाभोगवत्यपि.

अर्थात् कस्यचित् कारणस्य कार्याऽविनाभावित्वेन—आदरादिकारणसत्त्वे श्रद्धादिकार्य-सत्त्वम् आदरादिकारणाभावे श्रद्धादिकार्याभावः यथा प्रदीपस्य प्रकाशेन-प्रदीपसत्त्वे प्रकाश-सत्त्वम् प्रकाशेन सहाविनाभावित्वं—प्रदीपं विना प्रकाशो न भवति. अथवा वृक्षस्य च्छायया, वृक्षं विनाच्छाया न भवति. छायया सह वृक्षस्याविनाभावित्वं विद्यते.

सारांशः=पूर्वोक्तविवेचनतः श्रद्धादेर्मन्दता (अल्पता) वत्त्वात् श्रद्धादि न प्रतिभाति, तथाऽपि, आदरादेः सद्भावे सति सूत्रस्योच्चारणं (पाठं) कुर्वति पुरुषे प्रेक्षावत्तायाः क्षति र्नायाति.

**अथान्येषां मतेन श्रद्धादेर्मन्दता—मध्यता—तीव्रतादि साधयति—**

"इक्षुरसगुडखण्डशर्करोपमाश्चित्तधर्मा" इत्यन्यैरप्यभिधानात्, 'इक्षुरसगुडखण्डशर्करोपमाः' =इक्ष्वादिभिः पञ्चभिर्जनप्रतीतैरुपमा—सादृश्यं येषां ते तथा 'चित्तधर्माः' मनः परिणामा 'इति' एतस्यार्थस्य 'अन्यैरपि' तन्त्रान्तरीयैः, किं पुनरस्माभिरभिधानात्—भणनात्। प्रकृतयोरे-वोपमानोपमेययो र्योजनामाह—'इक्षुकल्पं च' इक्षुसदृशं च 'तद्' आदरादि॥

तथा च कायोत्सर्गे, इक्षु (उपमान) सदृशं, आदरादि (उपमेयं) वर्त्तते, तत्र कायो-त्सर्गे, आदरः—उपादेय—भाव—बुद्धिः, अनादिकालीनमलिनवासनां गृहीत्वा एष जीवः, पौद्गलिकं वस्तु प्रति यावद्—अभ्यस्ततावान्—वासनावासितोऽस्ति, पौद्गलिकं वस्तु, उपादेयत्वेन गणयति, तदेव प्राप्तुं प्रतिदिनं प्रयतते प्रवर्त्तते च, परन्तु यदैतस्य जीवस्य तथाभव्यतायाः परिपाकेन तथा कर्मक्षयोपशमेन किञ्चित् सत्यं ज्ञानं प्राप्यते, तदा पौद्गलिके सर्ववस्तुनि, उपादेयभावं परित्यज्य जगत्सारभूतमुपादेयं मोक्षमार्गस्य बीजमेष कायोत्सर्ग एवास्ति, ईदृश-कायोत्सर्गं प्रत्युपादेयबुद्धिः सैवाऽत्रादरो विज्ञेय इति। आदिशब्दात् 'करणे प्रीत्यादि' अग्रतो वक्ष्यमाणं करणे प्रीत्यादि स्वरूपं विज्ञेयम्। 'अतः' इक्षुकल्पादादरादेः क्रमेण—प्रकर्षपरिपाट्या, उपायवतः—तद्धेतुयुक्तस्य, आदरादिरूपहेतुजन्या, शर्करा—सिता, आदिशब्दात् पश्चानुपूर्व्या खण्डादिग्रहः, तत्समं प्रकृतसूत्रोपात्तं श्रद्धामेधादिगुणपञ्चकम्।

शङ्का=दृष्टान्तान्तराणि विहायेक्ष्वाद्युपमाया उपन्यासः किमर्थं?

**समाधानम्**=क्रोधादिकषाय–इन्द्रियविषयविकारादिकटुकत्व ( कटुस्वाद ) स्य निरोधा-दात्मनि, उपशम ( शान्तरस ) रूपप्रीणनहेतु–माधुर्य ( मधुरभाव ) स्य विधान–साम्येन ( सादृश्येन ) चेतसः–मनसः ( आत्मनः ) 'एवं' इक्ष्वाद्युपमानोपमेयतयोपन्यास आदरादीनाम्।

| लाभापेक्षया पश्चानुपूर्वी | | उत्पत्त्यपेक्षया पूर्वानुपूर्वी |
|---|---|---|
| उपमान | उपमेय | |
| इक्षु | आदरादि | इक्षुः |
| शर्करा | श्रद्धा | रसः ( कवोष्णं कृत्वा ) |
| खण्ड | मेधा | गुडः |
| गुडः | धृतिः | खण्डः |
| रसः | धारणा | शर्करा ( सूक्ष्मशर्करा ) |
| इक्षु | अनुप्रेक्षा | उत्तमजातिकशर्करा ( शुद्ध ) |
| | सहादरादिः, | |

अथ 'चोपायवत' इति प्रागुक्तम्, अत उपायमेव दर्शयति–एवं सामान्येनानादरादि-युक्तं प्रकृतकायोत्सर्ग–विधानमेव न पुनरन्यत्, शर्करादिप्रतिमश्रद्धादिभवने उपायः–हेतुः, यतः 'तथा तथा' तत्तत्प्रकारेण, शुद्धपरिणामं निर्मलं कृत्वा–सद्भावं शोधयित्वाऽर्थात् तत्तत्प्रकारा-वच्छिन्नसद्भावस्य निर्मलीकरणद्वारा, सामान्येनादरादियुक्तं–प्रकृतकायोत्सर्गकरणं यदाभवेत्तदा शर्करादिसदृश–श्रद्धादेरुत्पत्तिरस्ति, तत्तत्प्रकारावच्छेदेन सद्भावस्य शुद्धीकरणद्वारा, सामान्येना-दरादियुक्तं प्रकृतकायोत्सर्गस्य करणं न भवेत्तदा शर्करादिसदृशश्रद्धादेरभावोऽस्ति, अर्थात्, शर्करादि सदृशश्रद्धादेरुत्पत्तिं प्रति तत्तत्प्रकारेण शुद्धपरिणामस्यातिनिर्मलीकरणद्वारा सामा-न्येनादरादियुक्त–कायोत्सर्ग–करणमेष हेतुरस्ति, एवमन्वयव्यतिरेकाभ्यां कार्यकारणभावो निर्णेतव्यः।

इदमपि परमतेन संवादयति–

**परैरपि–" आदरः करणे प्रीतिरविघ्नः सम्पदागमः।**
**जिज्ञासा तज्ज्ञसेवा च, सदनुष्ठानलक्षणम् ॥ १ ॥**
**अतोऽभिलषितार्थाप्तिस्तत्तद्भावविशुद्धितः।**
**यथेक्षोः शर्कराप्तिः स्यात्क्रमात्सद्धेतुयोगतः ॥२॥ इत्यादि"**

अप्रेक्षावतस्तु यदृच्छाप्रवृत्तेः नटादिकल्पस्य गुणद्वेषिणो मृषावाद एव, अनर्थयोगात्, तत्परितोषस्तु तदन्यजनाधःकारी मिथ्यात्वग्रहविकारः, यथोक्तमन्यैः—

"दण्डीखण्डनिवसनं, भस्मादिविभूषितं सतां शोच्यम् ।
पश्यत्यात्मानमलं, ग्रही नरेन्द्रादपि ह्यधिकम् ॥ १ ॥
मोहविकारसमेतः, पश्यत्यात्मानमेवमकृतार्थम् ।
तद्व्यत्ययलिङ्गरतं, कृतार्थमिति तद्ग्रहावेशात् ॥२॥ इत्यादि" ।
तस्मात्प्रेक्षावन्तमङ्गीकृत्यैतत्सूत्रं सफलं प्रत्येतव्यमिति ।

पं०..."परैरपि" मुमुक्षुभिः किमुक्तमित्याह—"आदरेत्यादिश्लोकद्वयं" सुगमं, नवरम् "अविघ्न इति" सदनुष्ठाननिहतक्लिष्टकर्म्मतया सर्व्वत्र कृत्ये विघ्नाभावः, "तत्परितोषेत्यादि" तेन—मृषावादेन मिथ्याकायोत्सर्गरूपेण परितोषः—कृतार्थतारूपस्तु:—पुनरर्थे "तदन्यजनाधःकारी" सम्यक्कायोत्सर्गकारिलोकनीचत्वविधायी "मिथ्यात्वग्रहविकारो" मिथ्यात्वमेव उन्मादरूपतया ग्रहो—दोषविशेषस्तस्य विकार इति "एवमिति" ग्रहप्रकारेण "तद्व्यत्ययलिङ्गरतमिति" तस्य—कृतार्थस्य व्यत्ययुः, अकृतार्थस्तस्य लिङ्गानि—उच्छृङ्खलप्रवृत्त्यादीनि तेषु रतं, "तद्ग्रहावेशादिति" स एव ग्रहो मोहविकारोग्रहस्तस्यावेशाद्—उद्रेकात् ॥

टी०...(१) आदरः=इष्टादिक्रियां प्रत्यादरः—यत्नातिशयः, यदिष्टक्रियानुष्ठानं क्रियते, —तद्बहुमानपूर्वमत्यन्तादरेण—यत्नातिशयेन क्रियते, तत्सदनुष्ठानलक्षणं, सोपयोगं प्रेमातिशयेन क्रियाकरणं तत्सदनुष्ठानं सूचयति.

(२) करणे प्रीतिः=क्रियां प्रति सान्तरङ्गः स्नेहः स सदनुष्ठानलक्षणं.

(३) अविघ्नः=सदनुष्ठान-निहतक्लिष्टकर्मतया सर्वत्र कृत्ये विघ्नात्यन्ताभावः सदनुष्ठानलक्षणम्.

(४) सम्पदागमः=आभ्यन्तरज्ञानादिसम्पदामागमनं=आगमः सदनुष्ठानलक्षणम्, अर्थात् कायोत्सर्गादिधार्मिकानुष्ठानानि प्रति जीवस्य यदा बहुमानं भवति तदा स, स्वस्य सर्वस्व-समर्पणं कुर्व्वन्नपि पृष्ठे न पश्यति. एवं श्रद्धापूर्वं धर्म्यानुष्ठानं कर्त्तुं व्यसनं पातनीयमत एतस्य जीवस्य नानाविधा लाभाः—फलानि भवन्ति, इति सम्पदागमः.

(५) जिज्ञासा=तत्तत्क्रियासत्कं ज्ञानं प्राप्तुं तीव्रेच्छा, सा सदनुष्ठानलक्षणम्, सर्वे पौद्गलिकाभिलाषाः, तारतम्यवन्तः, स्पर्धापूर्विका अपि चातुर्गतिक—संसारे भ्रमयन्ति, परन्तु

स्वहिताय ध्यानादिक्रियाऽभिलाषाः, अधिकाधिकगुणलाभार्थे स्पर्धारूपा अपि स्पृहा, अथवा गुणादिप्रवेशायोत्कटजिज्ञासा, मोक्षदायित्वेन सदनुष्ठानलक्षणम् .

(६) तज्ज्ञसेवा=तत्त्वज्ञातुरथवा सदनुष्ठान–मर्मणः ज्ञातुः पुरुषस्य सेवा (आराधना) सदनुष्ठानस्य लक्षणम् तत्त्ववेत्तुर्गुरोर्भक्तिप्रभावेणैष जीवः प्रगतिपथेऽग्रतो वर्धते, तथा गुरुसमागमेन समापत्तिनामकदशाविशेषे तथा तद्भेदेषु लीन–भवनेन अभ्यस्ततया ध्यानद्वारा तीर्थंकरं पश्यति, एतद्दर्शनं हि मोक्षैकमसाधारणं कारणं भवति, किञ्च गुरून् प्रति भक्तिबहुमानादरातिशयेन तथा तदादेशप्रमाणेन वर्त्तनेनावश्यंकल्याणं भवति, तथाऽत्र परत्र हितकारी तथा यः पुण्यानुबन्धिपुण्यबन्धोऽस्ति, स एव गुरुभक्ति–साध्योऽस्ति. गुरोः साहाय्यं विनोत्तरोत्तर वृद्धि र्न भवत्येवेति विशिष्टभावप्रयोगेण तज्ज्ञसेवा सदनुष्ठानलक्षणम्.

'च' शब्देन 'तज्ज्ञानुग्रहः' तत्त्वज्ञातृ–पुरुषाणां कृपारूप–प्रसादोऽपि सदनुष्ठानलक्षणं ज्ञेयम्, आदरादीनां सदनुष्ठानत्वेन कथनस्य कारणं कथ्यते, शृणुत तावत्, अनुबन्ध–सारत्वेन सदनुष्ठानं कथ्यते, उत्तरोत्तर–शुभानुबन्ध–परम्परा, प्रवर्त्तमाना भवति.

उत्तरोत्तर–पुण्यानुबन्धि–पुण्ये मात्रा वर्धमाना भवति, सदनुष्ठानलक्षणादरादिभिः, तत्तद्भाव–परिणामनैर्मल्यजननद्वारा, श्रद्धादिरूपाभिलषितार्थस्य प्राप्तिर्भवति, यथा क्रमात् सम्यग् हेतुसामग्रीयोगतः यथेक्षोः शर्करासिः, एव आदरादिभिः श्रद्धादयो ज्ञेयाः, उक्तं च परैरपीत्यादि ।

मृषावादः कस्य ?–यदृच्छया (स्वाच्छन्द्येन) प्रवृत्तिमतः, वेषमात्रधारिणः नटादिवद्नाटककारककल्पस्य (वेषमात्रं भजन्ते बाह्यतो नत्वन्तः करणेन) गुणिनिष्ठगुणं प्रति द्वेषकारकस्या प्रेक्षावतस्तु (बुद्धि=गीतार्थतारहितस्य) मृषावाद एव यतोऽनर्थस्य योगो भवति. (बलवदनिष्टानुबंधिरूपयोगः)

'तत्परितोषेत्यादि' तेन मृषावादेन मिथ्याकायोत्सर्गरूपेण परितोषः=कृतार्थतारूपः (अहं कृतार्थः सञ्जातः इति संतोष तृप्तिः) अन्यच्च 'तदन्यजनाधःकारी' यो लोकस्तस्य नीचत्वकारी 'मिथ्यात्वग्रहविकारः' मिथ्यात्वमेव उन्मादरूपतया ग्रहो–दोषविशेषस्तस्य विकारः–मिथ्यापरिणामः ("एवमिति" एवं ग्रहप्रकारेण, "तद्व्यत्ययलिङ्गरतमिति" तस्य–कृतार्थस्य व्यत्ययोऽकृतार्थस्तस्य लिङ्गानि–उच्छृङ्खल–प्रवृत्त्यादीनि, तेषु रतं)

एतेन मिथ्याकायोत्सर्गरूपमृषावादजन्यपरितोषस्य स्वरूपं ज्ञेयम्। उक्तमन्यैरपि–
"दण्डी (दण्डधरः) खण्डनिवसनं (खण्डशो वस्त्रधारकः) भस्मादिना विभूषितं सतां–

सज्जनानां शोच्यं, मिथ्यात्वनामकग्रहग्रथिलः नरेन्द्रादपि अधिकं–महान्तं निर्मलं स्वात्मानं पश्यति ''

मोहविकारसमेतः अकृतार्थमेवात्मानं एवं ग्रहप्रकारेण, तस्य–कृतार्थस्य

व्यत्ययोऽकृतार्थस्तस्य लिङ्गानि–उच्छृङ्खलप्रवृत्त्यादीनि, तेषु रतं परायणं, स एव ग्रहो मोहविकारो ग्रहस्तस्यावेशाद्–उद्रेकात्, ''कृतार्थं पश्यति इत्यादि'' तस्मात्प्रेक्षावन्तमङ्गी-कृत्यैतत् सूत्रं सफलं प्रत्येतव्यमिति। कायोत्सर्गे आकारा दर्श्यन्ते.

'ठामि काउसग्गं' एतत् पाठेन 'कायव्यापारस्य त्यागरूपे कायोत्सर्गे तिष्ठामि' इति कथनेन कायव्यापाराकरणप्रतिज्ञा गृहीता, अस्यां प्रतिज्ञायां शरीरस्याऽन्यः कश्चिद् व्यापारो भवेत्तदा प्रतिज्ञाभङ्गो भवेत्, तदर्थं तत्प्रतिज्ञायां–कायोत्सर्गे आकारा रक्षिताश्च ते, आकारा एतेन 'अन्नत्थ उससिएणं' पाठेन विज्ञापिता एतेनाकारनिकरेण कायोत्सर्गभङ्गो न स्याच्च 'के ते आकाराः' इति तद् विज्ञाय, ततः कायोत्सर्गोऽभङ्गोऽविराधितो भवतु इति विषयं दर्शयितुं

**'अन्नत्थ ऊससिएणं' सूत्रमारभते शास्त्रकारः**

**अण्णत्थ ऊससिएणं नीससिएणं खासिएणं छीएणं जंभाइएणं उड्डुएणं वायनिसग्गेणं भमलीए पित्तमुच्छाए सुहुमेहिं अंगसंचालेहिं सुहुमेहिं खेलसंचालेहिं सुहुमेहिं दिट्ठिसंचालेहिं एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो जाव अरिहंताणं भगवंताणं नमुक्कारेणं न पारेमि ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि ॥**

किं सर्वथा तिष्ठति कायोत्सर्गमुत नेति, आह–''अन्नत्थ ऊससिएणमित्यादि'' अन्यत्रोच्छ्वसितेन–उच्छ्वसितं मुक्त्वा योऽन्यो व्यापारस्तेनाव्यापारवत इत्यर्थः, एवं सर्वत्र भावनीयं, तत्रोर्द्ध्वं प्रबलं वा श्वसितमुच्छ्वसितं तेन ''नीससिएणमिति'' अधः श्वसितं निःश्वसितं तेन, ''खासिएणंति'' कासितेन कासितं प्रतीतं. ''छीएणंति'' क्षुतेन इदमपि प्रतीतमेव ''जंभाइएणंति'' जृम्भितेन विवृतवदनस्य प्रबलपवननिर्गमो जृम्भितमुच्यते

"उड्डुएणंति" उद्गारितं प्रतीतं तेन "वायनिसग्गेणंति" अधिष्ठानेन पवननिर्गमो वातनिसग्गो भण्यते तेन "भमलीएत्ति" भ्रमल्या इयं चाऽऽकस्मिकी शरीरभ्रमिः प्रतीतैव "पित्तमुच्छाएत्ति" पित्तमूर्च्छया पित्तप्राबल्यान्मनाङ् मूर्च्छा भवति "सुहुमेहिं अङ्गसञ्चालेहिंति" सूक्ष्मैः अङ्गसञ्चारैः लक्ष्यालक्ष्यैर्गात्रविचलनप्रकारैः रोमोद्गमादिभिः, "सुहुमेहिं खेलसञ्चालेहिंति" सूक्ष्मैःखेलसञ्चारैः यस्माद्वीर्यसयोगिसद्द्रव्यतया ते खल्वन्तर्भवन्ति, "सुहुमेहिं दिट्ठिसञ्चालेहिन्ति" सूक्ष्मैर्दृष्टिसञ्चारैः निमेषादिभिः "एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गोत्ति" एवमादिभिरित्यादिशब्दाद् यदा ज्योतिः स्पृशति तदा प्रावरणाय कल्पग्रहणं कुर्वतोऽपि न कायोत्सर्गभङ्गः, आह–नमस्कारमभिधाय किमिति तद्ग्रहणं न करोति? येन तद्भङ्गो न भवति, उच्यते, नात्र नमस्कारेण पारणमित्येतावदेव अविशिष्टं कायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणो यत्र कायोत्सर्ग उक्तः तत ऊर्ध्वं समाप्तेऽपि तस्मिन् नमस्कारमपठतो भङ्गः, अपरिसमाप्तेऽपि पठतो भङ्ग एव, स चात्र न भवतीति, न चैतत्स्वमनीषिकयैवोच्यते, यत उक्तमार्षे–

"अगणी उ छिंदिज्ज व, बोहियखोभाइ दीहडक्को वा ।
आगारेहिँ अभग्गो, उसग्गो एवमादीहिं ॥१॥"

आक्रियन्त इत्याकारा आगृह्यन्त इति भावना, सर्वथा कायोत्सर्गापवादप्रकारा इत्यर्थः, तैः–आकारैर्विद्यमानैरपि, न भग्नोऽभग्नः भग्नः–सर्वथा नाशितः, न विराधितोऽविराधितः विराधितो–देशभग्नोऽभिधीयते, भूयात् 'मे' मम कायोत्सर्गः ।

पं. क्षोभः स्वराष्ट्रपरराष्ट्रकृतः,आदिशब्दात् गृहप्रदीपनकग्रहः, 'दीर्घो'दीर्घकायः सर्पादिर्दष्टो वा तेनैव ततस्तेषां प्रतिविधानेऽपि न कायोत्सर्गभङ्ग इतिभावः। "वीर्यसयोगिसद्द्रव्यतयेति" वीर्येण वीर्यान्तरायकर्मक्षयक्षयोपशमप्रभवेणात्मशक्तिविशेषेण सयोगीनि-सचेष्टानि सन्ति-विद्यमानानि द्रव्याणि-मनोवाक्कायतया परिणतपुद्गलस्कन्धलक्षणानि यस्य स तथा तद्भावस्तत्ता तया, अथवा वीर्येण-उक्तलक्षणेन सयोगिनो-मनोवाक्कायव्यापारवतः सतो जीवस्य द्रव्यतः-खेलसंचारादीन् प्रति हेतुभावस्तयेति ॥ "अगणिओ छिन्देज्ज वेत्यादि" अग्निर्वा स्पृशेत्, स्वस्य कायोत्सर्गालम्बनस्य च गुर्वादेरन्तरालभुवं कश्चिदवच्छिन्द्यात्, बोहिका मानुषचौराः..

टी०....'अण्णत्थ ऊससिएणं' इत्यादि। अत्र कायव्यापारोत्सर्गे समये नीचैर्दर्शयद्भिराकारैः कायोत्सर्गविषयकप्रतिज्ञाभङ्गो न भवेत्, अन्यत्र (१) ऊच्छ्वसितेन (२) निःश्वसितेन (३) कासितेन (४) क्षुतेन (५) जृम्भितेन (६) उद्गारितेन (७) वातनिःसर्गेण (८) भ्रमर्या (९) पित्तमूर्च्छया (१०) सूक्ष्मैरङ्गसञ्चारैः (११) सूक्ष्मैः खेलसञ्चारैः (१२) सूक्ष्मैर्दृष्टिसञ्चारैः, एवमादिभिराकारैरभग्नोऽविराधितो भवतु मे (मम) कायोत्सर्गो यावदर्हतां भगवतां नमस्कारेण न पारयामि तावत् कायं स्थानेन मौनेन ध्यानेनाऽऽत्मानं व्युत्सृजामि ॥

अथ कृतः कायोत्सर्गोऽपि विनाऽऽकारान् निर्दोषो भवितुं न शक्नोति तदर्थं 'अन्नत्थ पदतो भवतु मे कायोत्सर्गपर्यन्ते कायोत्सर्गस्य षोढा आकारा दर्शिताः, तत्र 'अन्नत्थ पदतः पित्तमुच्छाए' पर्यन्तानि नव पदानि एक वचनवत्त्वादेतानि नव पदानि चैत्यस्तवस्य चतुर्थी एकवचनाकारसम्पत्,

(एषा नवपदवती एकवचनान्ताऽऽकारसम्पदपि त्रिधावर्त्तते, तद्यथा प्रथमपदद्वयवती 'सहजाकारसम्पत्' तदनन्तरं त्रिपदी 'अल्पाऽऽगन्तुकहेतु-सम्पत्' ततश्च चतुष्पदीया 'बहु-आगन्तुकहेतु सम्पत्' तत्र प्रथमा सहजाऽस्ति, द्वितीया वायु-आदिसत्काऽल्पविकारा, तृतीया च वायुअजीर्णादि-जन्या महाविकारा)

**प्रश्नः**=किं सर्वथा (एकान्तेन-आकाररूपापवादान् विहाय) तिष्ठति, करोति कायोत्सर्गमथवा नेति प्रश्नः,

प्रत्युत्तरम्=आहेति-"अन्नत्थ ऊससिएणमित्यादि"

(१) अन्यत्रोच्छ्वसितेन-ऊच्छ्वसितं मुक्त्वा योऽन्यो व्यापारस्तेनाव्यापारवत इत्यर्थः, अर्थात् ऊच्छ्वसित-भिन्नक्रियाऽभाववतः-ऊच्छ्वसितनामकव्यापारवतः, ऊच्छ्वसितं-मुखनासिकाभ्यां उद्र्ध्वं प्रबलं वा श्वसित-श्वासग्रहणरूपं कायव्यापारं त्यक्त्वाऽन्यकायव्यापारस्य त्यागवान्, कायोत्सर्गे स्थिरस्तिष्ठति.

(२) 'नीससिएण'मिति=मुखनासिकाभ्यामधः श्वसितं निःश्वसितं तेन, (अशक्य-परिहारावाकारावेतौ मुक्तौ)

(३) 'खासिएण'मिति—कासितेन कासितं प्रतीतं,

(४) 'छीएण'मिति—क्षुतेन, इदमपि प्रतीतमेव,

(५) 'जंभाइएण'मिति—जृम्भितेन, विवृतवदनस्य प्रबल—पवन—निर्गमो जृम्भितमुच्यते,

(६) 'उड्डुएण'मिति उद्गारितं प्रतीतं तेन,

(७) 'वायनिसग्गेण'मिति—अधिष्टानेन पवननिर्गमो, वातनिसर्गो भण्यते तेन,

(८) 'भमलीए'त्ति—भ्रमरया, इयं चाऽऽकस्मिकी शरीरभ्रमिः प्रतीतैव,

(९) 'पित्तमुच्छाए'त्ति—पित्तमूर्च्छया पित्तप्राबल्यान्मनाङ्मूर्च्छा भवति ।

अथ—'सूक्ष्मै र्दृष्टिसंचारै'रिति पर्यन्तानि बहुवचनप्रयोगान्तत्वादेतानि त्रीणि पदानि चैत्यस्तवस्य पञ्चमी—बहुवचनाकार—संपदं वर्णयति=

(१०) 'सुहुमेहिं अङ्ग—सञ्चालेहिं'ति सूक्ष्मैः अङ्गसञ्चारैः लक्ष्यालक्ष्यैर्गात्रचलनप्रकारै रोमोद्गमादिभिः,

(११) सुहुमेहिं खेल सञ्चालेहिं'ति सूक्ष्मैः खेलसञ्चारै र्यस्माद्वीर्यसयोगिसद्द्रव्यतया ते श्लेष्मसञ्चारा—

("भ. ५ श. ४ उ. 'वीरियसजोगदव्वयाए'ति वीर्यान्तरायक्षयप्रभवा शक्तिः, तत्प्रधानं सयोगं मानसादिव्यापार—युक्तं यत्सद्—विद्यमानं द्रव्यं तत्तथा वीर्यसद्भावेऽपि जीवद्रव्यस्य योगान् विना चलनं न स्यादिति सयोगशब्देन सद् द्रव्यं विशेषितं, सदिति विशेषणं च तस्य सदा सत्ताऽवधारणार्थं, अथवा स्वमात्मा तद्रूपं द्रव्यं स्वद्रव्यं ततः कर्म-धारयः, अथवा वीर्यप्रधानः, सयोगो योगवान्, वीर्यसयोगः, स्चासौ सद्द्रव्यश्च, मनः प्रभृतिवर्गणायुक्तो, वीर्यसयोगसद्द्रव्यस्तस्य, भावस्तत्ता, तया, हेतुभूतया 'चलाई' ति अस्थिराणि, 'उवकरणाइं'ति अङ्गानि")

—दीनां सूक्ष्मतया वीर्यसयोगिसद्द्रव्यरूपजीवव्यापारविशेषे समावेशो भवतीति, अर्थाद् वीर्यसयोगिसद्द्रव्यते'ति वीर्येण—वीर्यान्तराय—कर्मक्षयक्षयोपशम—प्रभवेणात्मशक्ति—विशेषेण, सयो-गीनि—सचेष्टानि, सन्ति विद्यमानानि, द्रव्याणि मनोवाक्कायतया परिणत—पुद्गलस्कन्धलक्ष-णानि यस्य स तथा तद्भावस्तत्ता तया, अथवा वीर्येण—उक्तलक्षणेन सयोगिनो—मनोवाक्काय व्यापारवतः सतो जीवस्य द्रव्यता—खेलसञ्चारादीन् प्रति हेतुभावस्तयेति ।। यदि वीर्यजन्य-

मनोवाक्कायव्यापारवान् जीवोऽस्ति, अतः श्लेष्मसंचारादि, विद्यते, यदि वीर्यजन्यमनोवाक्-कायव्यापारवान जीवो नास्ति, तदा श्लेष्मसञ्चारादि न भवेत्, ततः श्लेष्मसञ्चारादीनां समावेशः, वीर्यसयोगिसद्द्रव्यरूपजीवस्य व्यापारविशेषे भवति, तादृशवीर्यजन्य–मनोवचनकाय-व्यापारवता जीवेन श्लेष्मसञ्चारादि–कायव्यापारा, जन्यन्ते प्रकटी भूयन्ते.

(१२) सूक्ष्मैर्दृष्टिसञ्चारैर्निमेषादिभिः=सूक्ष्मैश्चक्षुषो निमेषोन्मेषादिः–(निमीलनोन्मीलनादिः) सूक्ष्मसंचाररूप–क्रियाव्यापारभिन्नान्यकायव्यापारत्यागवान् कायोत्सर्गे तिष्ठति, स्थिरो भवति. (अस्थिरकर्मनामजन्योऽयं कथं नाकारः?) अथ 'अन्नत्थसूत्रकथिताकारेभ्यो बहिःस्था अपि केचिदाकारा' 'एवमादिभिः' इति पदेन सूचितास्तैः सर्वैराकारैरपि कायोत्सर्गस्य भङ्गो न भवेदतः 'हुज्ज मे काउसग्गो' पर्यन्तानि षट्पदानि कथितानि, तत्षट्पदवती षष्ठी 'आग-न्तुकाकारनाम संपद्' वर्ततेऽतस्तां सम्पदं वर्णयति.

"एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउसग्गोत्ति" एवं उच्छ्व-सितनिःश्वसितकासितक्षुत—जृम्भितोद्गारितवातनिःसर्गभ्रमलीपित्तमूर्च्छा—सूक्ष्माङ्गसञ्चारसूक्ष्मश्लेष्म-सञ्चारसूक्ष्मदृष्टिसञ्चाररूपाकारै र्द्वादशभिः कायोत्सर्गरक्षितैरपवादैः कायोत्सर्गभङ्गो न स्याद् (यदि एतानाकारान्न रक्षित्वा कायोत्सर्गं कुर्यात्तदा नैसर्गिकरीत्या जायमानाभिरेताभि र्द्वादशक्रियाभिः सर्वथा निष्क्रियकायोत्सर्गभङ्ग एव स्यात्)

एत आकारास्तु एक–स्थाने ऊर्द्ध्वं स्थित्यपेक्षया सन्ति. परन्तु कायोत्सर्गस्य, नियत-स्थानं विमुच्या ऽन्यत्र स्थानगमनेऽपि 'कायोत्सर्गः' अखण्डो गण्येत तादृशानपि मुख्यान् चतुर आकारान् (अग्नि–पञ्चेन्द्रियच्छिन्दन बोधिक–क्षोभादि–दंशरूपान्, आ. नि. गा. १५, १६, (१) अग्निस्पर्श (२) उन्दुरादि पञ्चेन्द्रिय जीवानां छिन्दनं (अन्तहायनं) (३) चौरनृपादिरागत्य क्षोभरूपान्तरायं कुर्यात् (४) सर्पादिभये उपस्थिते, अन्यत्र गमनेऽपि न कायोत्सर्गे भङ्गः) 'एवमादिभिः' पदद्वारा दर्शयति, एवमादिभिरित्यादिशब्दाद् यदा ज्योतिः स्पृशति तदा प्रावरणाय कल्पग्रहणं कुर्वतोऽपि न कायोत्सर्गभङ्गः

(विद्युतो दीपकस्य वाऽग्ने ज्योतिः–प्रकाशः शरीरोपरि यदा पतेत्तदा प्रकाशस्याऽग्नि-जीवाः शरीरस्पर्शेन नश्यन्ति, तद्रक्षार्थं वर्त्तमानकायोत्सर्गे प्रावरणाय कल्पस्य (और्णिक-कम्बलादेः) ग्रहणं कुर्वतोऽपि न कायोत्सर्गभङ्गः,) (अग्नेः शुद्ध–काचादि रूपान्तररहिते प्रकाशे तथा काचेभ्यो भित्वाऽऽगच्छत् प्रकाशे युक्तिवादेनाऽग्निजीवानामभावं वर्त्तमानकाले केचिन्मन्यन्ते, परन्तु मार्गानुयायिभिराज्ञायां युक्तिवादं पुरस्कृत्य प्रतिकूल–प्रवृत्ति र्नाचरणीयेति महाश्रेयस्करं)

शङ्का:=' नमो अरिहन्ताण ' एतद्रूपनमस्कारमभिधाय किमिति तत्कल्पग्रहणं न करोति ? येन तत्कायोत्सर्गभङ्गो न भवति ?

समाधानं=उच्यते, नात्र नमस्कारेण पारणमित्येतावदेवाविशिष्टं—सामान्यं कायोत्सर्गमानं ( प्रतिज्ञा ) क्रियते किन्तु यो यत्परिमाणो ( यावान् ) यत्र कायोत्सर्ग उक्तः ( अष्टोश्वास—पञ्चविंशतिश्वासोच्छ्वासापरिमाणः कायोत्सर्गः कथितः ) तावतः कायोत्सर्गपरिमाणस्य समाप्त्यनन्तरं गुरोः पारणानन्तरं ' नमो अरिहंताणं ' इत्येतत्पदमकथयित्वा पारयेत्तदा कायोत्सर्ग—भङ्गः, तथा यो यावान् यत्र कायोत्सर्ग उक्तः तत्र तावतः कायोत्सर्गस्यासमाप्तत्वे, ' नमो अरिहंताण'मिति पदं पठेत्तदाऽपि कायोत्सर्गभङ्गः, स च नात्र भवतीति—स कायोत्सर्गभङ्गः, अत्र—एवमादिभिरिति पदेनाऽऽकारादीनां सद्भावे न भवतीति.

न चैतत्स्वमनीषिकयैवोच्यते—आकाराद्येतत् सर्वं स्वबुद्ध्यैव न कथ्यते. यतः उक्तमार्षे—ऋषिप्रणीतशास्त्रे ( आवश्यकनिर्युक्त्यादौ )

**" अगणी उ छिंदिज्ज व बोहिय खोभाइ दीहऽक्को वा ।**
**आगारेहिं अभग्गो, उस्सग्गो एवमादीहिं ॥ "**

' अगणीओ छिन्देज्जवेत्यादि ' अग्निं वा स्पृशेत्, स्वस्य कायोत्सर्गालम्बनस्य च गुर्वादेरन्तरालभुवं कश्चिदवच्छिन्द्यात्, बोहिका मानुषचौराः, क्षोभः स्वराष्ट्रपरराष्ट्रकृतः, आदिशब्दाद् गृहप्रदीपनकग्रहः, ' दीर्घो ' दीर्घकायः सर्पादिदष्टो वा तेनैव ततस्तेषां प्रतिविधानेऽपि न कायोत्सर्गभङ्गः इति वा भावः। आकार—शब्दस्य व्युत्पत्तिः=आ क्रियन्त इत्याकाराः—मर्यादया क्रियन्ते, मर्यादया गृह्यन्ते इत्याकारा इति भावना—व्युत्पत्तिद्वारा विचारणा, तदनन्तरं तात्पर्यार्थो दर्श्यते, सर्वथा कायोत्सर्गापवादप्रकारा इत्यर्थः, अर्थात् कायोत्सर्गेऽपवादस्य ये प्रकारास्ते सर्वे आकारा उच्यन्ते तैराकारैः—अपवादप्रकारैः विद्यमानैः वर्त्तमानैरपि न भग्नोऽभग्नः, भग्नः—सर्वथा नाशितः—विनाशं प्राप्तः, न विराधितोऽविराधितः, विराधितो—देशभग्नोऽभिधीयते, देशभग्नः—अमुकांशतः खण्डितः, तैराकारैः ' मे ' मम कायोत्सर्गः ( सर्वथाऽथवांशतः ) अभग्नोऽविराधितो भूयात् ।

( बलवदनिष्टाननुबन्धित्वविशिष्टकृति — साध्यत्वविशिष्टसमग्रागारभिन्नसर्वप्रकारावच्छिन्न—कायव्यापारत्यागरूपकायोत्सर्ग—भवनानुकूलकृतिमान् कायोत्सर्ग—विधायी पुरुष इति शाब्दबोधः)

—अथ षोडशाकारान्, अतिचारजातित्वेन परिज्ञाप्य सहजादिषु पंचसु विभागेषु अवतारयन्ति शास्त्रकाराः—

तत्रानेन सहजास्तथा अल्पेतरनिमित्ता आगन्तवो नियमभाविनश्चाल्पाः बाह्यनिबन्धना बाह्याश्चातिचारजातय इत्युक्तं भवति, उच्छ्वासनिःश्वासग्रहणात्सहजाः, सचित्तदेहप्रतिबद्धत्वात्, कासितक्षुतजृम्भितग्रहणात्स्वल्पनिमित्ता आगन्तवः, स्वल्पपवनक्षोभादेस्तद्भावात्, उद्गारवातनिसर्गभ्रमिपित्तमूर्च्छाग्रहणात्पुनर्बहुनिमित्ता आगन्तव एव, महाजीर्णादेस्तदुपपत्तेः, सूक्ष्माङ्गखेलदृष्टिसञ्चारग्रहणाच्च नियमभाविनोऽल्पाः, पुरुषमात्रे सम्भवात्, एवमाद्युपलक्षितग्रहणाच्च बाह्यनिबन्धना बाह्यास्तदद्वारेण प्रसूतेरिति, उपाधिशुद्धं परलोकानुष्ठानं निःश्रेयसनिबन्धनमिति ज्ञापनार्थममीषामिहोपन्यासः, उक्तं चागमे–

"वयभंगे गुरुदोसो, थेवस्सवि पालणा गुणकरी उ।
गुरुलाघवं च णेयं, धम्मंमि अओ उ आगारा ॥१॥" इति,

एतेनार्हच्चैत्यवन्दनायोद्यतस्योच्छ्वासादिसापेक्षत्वमशोभनम्, अभक्तेः, न हि भक्तिनिर्भरस्य क्वचिदपेक्षा युज्यत इत्येतदपि प्रत्युक्तं, उक्तवदभक्त्ययोगात्, तथाहि–का खल्वत्रापेक्षाः ?, अभिष्वङ्गाभावात्, आगमप्रामाण्याद्, उक्तं च–

"उस्सासं न निरुंभइ, आभिग्गहिओवि किमुय चिट्ठाए ?।
सज्जमरणं णिरोहे, सुहुमुस्सासं तु जयणाए ॥ १ ॥"

न च मरणमविधिना प्रशस्यत इति, अर्थहानेः, शुभभावनाद्ययोगात् स्वप्राणातिपातप्रसङ्गात्, तस्य चाविधिना निषेधात्, उक्तं च–

"सव्वत्थ सञ्जमं सञ्जमाओ अप्पाणमेव रक्खिज्जा।
मुच्चइ अइवायाओ, पुणो विसोही न याविरई ॥ १ ॥"

कृतं प्रसङ्गेन, कियन्तं कालं यावत्तिष्ठामीत्यत्राह–

"जाव अरिहंताणमित्यादि" यावदिति–कालावधारणे, अशोकाद्यष्टमहाप्रातिहार्यलक्षणां पूजामर्हन्तीत्यर्हन्तस्तेषामर्हतां, भगः–समग्रैश्वर्यादिलक्षणः स विद्यते येषां ते भगवन्तः तेषां सम्बन्धिना नमस्कारेण 'नमो अरिहन्ताणन्ति' अनेन "न पारयामि" न पारं गच्छामि, तावत्किमित्याह–

"ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि" तावच्छब्देन कालनिर्देशमाह, "कायं" देहं "स्थानेन" ऊर्ध्वस्थानेन हेतुभूतेन, तथा "मौनेन" वाग्निरोधलक्षणेन तथा "ध्यानेन" धर्म्मध्यानादिना "अप्पाणंति" प्राकृतशैल्या आत्मीयम्, अन्ये न पठन्त्येवैनमालापकं "व्युत्सृजामि" परित्यजामि, इयमत्र भावना–कायं स्थानमौनध्यानक्रियाऽव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य व्युत्सृजामि, नमस्कारपाठं यावत्प्रलम्बभुजो निरुद्धवाक्प्रसरः प्रशस्तध्यानानुगतस्तिष्ठामीति, ततः कायोत्सर्गं करोतीति। जघन्योऽपि तावदष्टोच्छ्वासमानः।

टी०....तत्रानेन सहजास्तथा अल्पेतरनिमित्ता आगन्तवो नियम–भाविनश्चाल्प–बाह्यनिबन्धना बाह्याश्चातिचारजातय इत्युक्तं भवति.

(१) सहजाः–उच्छ्वासनिःश्वासग्रहणात् सहजाः सचित्तदेहप्रतिबद्धत्वात्, सर्वथा कायोत्सर्गगताऽतिचारजातिरूपोच्छ्वासः (मुखेन नासिकया वाऽन्तर्नीयमानः श्वासः) निःश्वासश्च (यःश्वासो मुखनासिकाभ्यां शरीराद् बहिर्निष्काश्यमानः) उच्छ्वासनिःश्वासौ द्वौ सहजौ जीवनधारणोपयोगिभूतप्राणविशेषौ, उच्छ्वासनिःश्वासौ नैसर्गिकौ, यतः सचित्त (जीवत्) (सजीव) देहेन सह प्रतिबद्धौ–व्याप्तिमन्तौ, यत्र यत्रोच्छ्वासनिःश्वासौ तत्र तत्र सजीवदेहत्वम्, यत्र सजीवदेहत्वं नास्ति, तत्रोच्छ्वासनिःश्वासौ न स्तः, प्रत्येकप्राणिपर्यासौ,

(२) कासितक्षुतजृम्भितग्रहणात्स्वल्पनिमित्ता आगन्तवः, स्वल्पपवनक्षोभादेस्तद्भावात्, अर्थात् सर्वथा कायोत्सर्गेऽतिचारजातिरूपकासित-क्षुत-जृम्भिताकारास्त्रयोऽल्पनिमित्तान्यालम्ब्य जन्यप्रकृतयः सन्ति, यतः स्वल्पपवन-( उदाननामकपवनकृत )-क्षोभभ्रमणविकारादिनोत्पन्नाः कासितक्षुतजृम्भिताकारा ( वायुप्रभृतिजन्याल्पविकारा ) भवन्ति.

(३) उद्गार-वातनिःसर्ग-भ्रमि-पित्तमूर्च्छाग्रहणात् पुनर्बहुनिमित्ता आगन्तव एव, महाऽजीर्णादिस्तदुपपत्तेः, अर्थात् सर्वथा कायोत्सर्गेऽतिचारजातिरूपोद्गार-वातनिःसर्ग-भ्रमि-पित्तमूर्च्छाद्याश्चत्वार आकारा बहूनि निमित्तान्यालम्ब्यागमनस्वभावा एव यतः महाऽजीर्ण-अपथ्याहार-विहार-अप्रियवास-मानसिकाघात-तथाविधरोगादि-पित्ताऽतिशय-उदानापानवायु-वेगादिजन्योद्गार-वातनिःसर्ग-भ्रमि-भानाभावरूपपित्तमूर्च्छा भवन्ति ( वाताऽजीर्णादिजन्यमहा-विकारा आकारा एते भवन्ति. )

(४) सूक्ष्माङ्गखेलदृष्टिसञ्चारग्रहणाच्च नियमभाविनोऽल्पाः, पुरुषमात्रे सम्भवात्, अर्थात् सर्वथा कायोत्सर्गेऽतिचारजातिरूपाणि सूक्ष्माङ्गानां सञ्चरणं, सूक्ष्मं श्लेष्मणः सञ्चरणं, सूक्ष्मं नेत्रस्य सञ्चरणमित्यादिरूपाणि, त्रीणि सञ्चरणानि, तेषां ग्रहणाच्च नियमतो भाविन आकारा अल्पाः-सूक्ष्मा अलक्ष्या यतः पुरुषमात्रे सकलनरनारीषु सम्भवोऽस्ति.

( सूक्ष्माङ्गसञ्चारः-नेत्रपक्ष्मस्फुरण-कपोलस्फुरण-करपादस्नायूनां संचरणं-रोमोद्गमादि-सूक्ष्मक्रियाणां, अस्मत्प्रयत्नेच्छाऽनधीनत्वेन सर्वकाले प्रकटनसम्भवेनापवादेऽन्तर्भावः क्रियते, सूक्ष्म-श्लेष्मसञ्चार एतस्याः क्रियायाः शरीरे सातत्येन सञ्चरणं, वायुः श्लेष्म गृहीत्वा भिन्नभिन्नस्थाने नयति, कचित् तस्य वेगातिशयेनास्माकं ज्ञानमपि भवति यदन्तः श्लेष्मणः सञ्चरणं चलति, एषोऽपि, एकजातीयः सूक्ष्मकायव्यापारोऽस्ति, तथापि-अनिवार्यत्वेन-अनियन्त्रणीयत्वेनाऽस्यान्त-र्भावोऽपवादेऽस्ति.

सूक्ष्मदृष्टिसञ्चारः-अक्षिपक्ष्मादिसञ्चारःएषोऽपि, एकप्रकारकसूक्ष्मकायव्यापारोऽस्ति, तथापि नियन्त्रणरहितत्वेनाऽपवादेऽन्तर्भावः कृतोऽस्ति. )

(५) एवमाद्युपलक्षितग्रहणाच्च बाह्यनिबन्धना बाह्यास्तद्द्वारेण प्रसूतेरिति, अर्थात् सर्वथा कायोत्सर्गेऽतिचारजातिलक्षणेन 'एवमादि' रूपेणोपलक्षणपदेन ( एवमादिपदमुपलक्षणं, अजहत् स्वार्थलक्षणयाऽन्यग्राहकमित्युपलक्षणलक्षणेनाग्न्याद्यन्यपदार्थानां चतुर्णां ग्रहणं बोध्यम् । 'वाक्या-र्थाऽन्वयिमुख्यार्थो मिश्रित-मुख्यार्थाऽन्यपदार्थोपस्थितिरूपमुपलक्षण-लक्षणमपि' बोध्यम् । उप-लक्ष्यते स्वं स्वेतरच्चानेनेति व्युत्पत्तिः । करणे ल्युट् । लक्षणं तु लक्ष्यताऽवच्छेदकरूपेण

स्वस्वेतरबोधकपदत्वम् ।। ) उपलक्षित—सङ्गृहीतरूपेण कृताभ्युपद्रवपञ्चेन्द्रिय—च्छिन्दन ( अन्तराय—मध्येउत्तरणं )—चौरादेर्भयं, सर्पादेर्भयमित्येतद्रूपाश्चत्वार आकाराः स्वशरीराद् बाह्य—पदार्थानां मूलकारणत्वेन बाह्या उच्यन्ते यतो बाह्यपदार्थद्वारा बाह्याग्निप्रभृतिउपद्रवादि—चतुष्टयाकारा जायन्ते.

उपाधिशुद्धं परलोकानुष्ठानं निःश्रेयसनिबन्धनमिति ज्ञापनार्थममीषामिहोपन्यासः,

( उपाधयो—धर्म्मानुविद्धाश्चिन्तास्तैः शुद्धमवदातं—उपाधयः अपवादप्रकारास्तैर्विशुद्धमकलङ्कितमिति भावः, देशकालाद्यौचित्येन यथा—प्रस्तावनियोजितस्यापवादस्योत्सर्गफलदायित्वेनोत्सर्गविशेषरूपत्वात् )

उपाधिभिः ( मिथ्यात्वासंयमादिदोषैः आकारैः ) शुद्धं ( रहितं वा पवित्रं ) परलोकहितानुष्ठानं ( पर—उच्चोत्कृष्टमहत्सद्रूप—परलोकहितानुष्ठानं ) निःश्रेयसस्य—मोक्षस्य निबन्धनं विशिष्टकारणं, यत्र यत्रोपाधिशुद्धपरलोकानुष्ठानं तत्र तत्र निःश्रेयसरूपं कार्यं, यत्रोपाधिशुद्धपरलोकानुष्ठानं नास्ति तत्र निःश्रेयसरूपकार्यं नास्त्येवेति अन्वयव्यतिरेकाभ्यां कार्यकारण—निश्चयो ज्ञेयः । इति ज्ञापनार्थं, अमीषां—आकाराणां ( अपवादविशेषाणां ) इह—अत्रत्यसूत्रे (प्रकृतदण्डके) उपन्यासः—विशिष्टरचना विद्यते,

किञ्चागमे, उक्तमस्ति " **वयभंगे गुरुदोसो, थेवस्स विपालणा गुणकरीउ ।**
**गुरुलाघवं च णेयं, धम्मंमि अओ उ आगारा ॥** "

व्रतभङ्गे गुरुदोषो—अपवादविशेषानाकारान्, न प्रतिपद्य, व्रतभङ्गे—सर्वथात्यागे गुरु—र्महान् दोषः ( अप्रतिकार्यदोषः ) कथ्यते. स्तोकस्याऽपि पालना गुणकरी=रक्षितस्याऽल्पस्य व्रतस्य ( महाव्रतस्य ) ( नवकोटीमध्यतः सप्तादिकोटीमयस्य महाव्रतस्य, 'सर्वनाशे समुत्पन्ने अर्धं रक्षति पण्डितः' ) पालना गुणकरी—लाभकरी यतो गुरुलाघवं ज्ञेय लाभालाभविचारः कर्त्तव्यः, यतो धर्मे ( क्रियात्मकचारित्राद्यनुष्ठाने ) यतस्त्वाकाराः ( अपवादाः ) कथिताः, अथवा धर्मशास्त्रे, आकाराणां ( आगाराणामतिचार—जातीनामपवादप्रकाराणां ) प्रतिपादनं कृतं वर्तते ॥

एतेन=पूर्वकथितप्रतिपादनेन—

पूर्वपक्षः=अर्हच्चैत्यवन्दनायोद्यतस्य (उद्यमस्य कर्तुः उच्छ्वासनिःश्वासादिरूपाणामाकाराणां सापेक्षत्वम् ( अपेक्षा ) अशोभनमसुन्दरम्, यतः अभक्तिरूपकारणं वर्त्ततेऽर्थाद् भक्तेरभावो दृश्यते, न हि भक्तिभरनिर्भरस्य क्वचिदपेक्षा युज्यते इति पूर्वपक्षकथितं वचनं प्रत्युक्तं—

खण्डितम्, उक्तवदभक्त्ययोगात्=पूर्वोक्तवद् अभक्तिरूपहेतो योगो न तिष्ठति, यतो भक्तियोगो वर्तमानोऽस्ति, तथाहि=का खल्वत्रापेक्षा ? अभिष्वङ्गाभावात्, आगमप्रामाण्याद्=अभिष्वङ्गस्य —भौतिकलालसारूपासक्तिरूपाऽनिष्टतत्त्वस्याभावो वर्तते तथैवाऽऽगमस्य प्रामाण्यं वर्तते, आभिग्रहिकः (कायोत्सर्गस्य प्रतिज्ञां कृत्वा सर्वचेष्टा—निरोधकः) उच्छ्वासं न रुणद्धि (निरुन्धन्ति), किमुत—चेष्टायां ? "सद्यो मरणं निरोधे, सूक्ष्मोच्छ्वासं तु यतनया" यत उच्छ्वासनिरोधे सद्यो मरणं ततो यतनापूर्वकं सूक्ष्मोच्छ्वासो ग्राह्यः ।

शङ्का=उच्छ्वासमनपेक्ष्योच्छ्वासनिरोधे मरणभवने का हानिः ?

**समाधानम्**=न च मरणविधिना प्रशस्यते इति, अर्थादविधिना-विराधनादिपूर्वकं मरणं प्रशंसाऽऽस्पदं न भवति यतः (१) अर्थहानि-मोक्षादिपुरुषार्थस्येष्टफलस्य वा हानिर्भवति.

(२) शुभभावनाद्ययोगात्-शुभस्य भावनादेरयोगो विशिष्टभावनाऽन्तिमाराधनाकारक (निमित्त—नियामक) आदेर्योगो न भवति.

(३) स्वस्य श्वासोच्छ्वासादिप्राणानामतिपातो (हिंसा) भवति. यतः स्वप्राणातिपातो न कर्त्तव्यः, जीवन्नरो भद्रशतानि पश्यति (करोति) पापघातः श्रेयान् स्वप्राणघातो न श्रेयान्,

(४) अविधिना विधिविरोधेन (विराधना—असदाचारादिद्वारा) मरणस्य शास्त्रे निषेधो विहितो वर्तते.

**उक्तं च " सव्वत्थ संजमं संजमाओ अप्पाणं रक्खिज्जा ॥**
**मुच्चइ अइपायाओ, पुणो विसोही नयाविरई ॥ ११ ॥ "**

सर्वत्र (सर्वथा)संयमं, संयमतः, आत्मानमेव रक्षेत्, मुच्यतेऽतिपातात् पुनर्विशोधि र्न चाविरतिः । पूर्वं सर्वथा संयमो रक्षणीयः, संयमतोऽपि आत्मानं (जघन्यचारित्रभावरूपात्मानं) रक्षेत् (जघन्यचारित्रभावरूपापतनरक्षणं कार्यं) यदि अविधिमरणरूपात् प्राणातिपाततो मुच्यते—द्रव्यजीवनं रक्ष्यते तदा पुनः (प्रायश्चित्तेन) अतिचाराद् विशुद्धिर्भवति. यद्यविरतिमान् भवेत्तदा प्रायश्चित्तादिना स न शुद्ध्यति, अतोऽविरतितो रक्षितः, प्रायश्चित्तादिना प्राणातिपातादिपापान्मुक्तो भवति, विरतित आत्मरक्षा भवति, तथा च जघन्य—संयमरक्षा भवति, अर्थात् मूलसम्पदःखण्डिततारक्षायै अपवाद—आकारादीनां सेवनमनिवार्यमेवेति.

सारांशः—उच्छ्वासादेरपेक्षा, रागवत्त्वेन नास्ति, अभिष्वङ्गो नास्ति, तत्रागमस्य साक्षित्वं तथा तत्तदाकारैः, अभक्तिप्रसङ्गाभाव इत्यादिनिरूपणेनालम्,

अथ शास्त्रकारः 'जाव अरिहंताणं' पदतो 'न पारेमि' पर्यन्त—चतुष्पदेषु कायोत्सर्गे कियत्कालं स्थितिः ? तस्य कालनियमस्य दर्शितत्वात्, चतुष्पदवती सप्तमी कायोत्सर्गावधि (कायोत्सर्गस्य मर्यादारूपा) सम्पद् वर्त्तते, तदनन्तरं 'तावकायं' पदतः 'वोसिरामि' पर्यन्ते पदषट्के कायोत्सर्गः कया रीत्या कर्त्तव्यः, तस्य स्वरूपं दर्शितं, तस्मात्पदषट्कवतीं, अष्टमीं सम्पदं दर्शयति.

कियन्तं कालं यावत्तिष्ठामीत्यत्राह कालस्थिति—नियमं दर्शयति, (यावदर्हद् भगवतो नमस्कारेणार्थात् 'नमो अरिहंताणं' इत्येतत्पदोच्चारणेन न पारयामि) "जावअरिहंताण-मित्यादि" यावदिति—कालावधारणे, अशोकाद्यष्टमहाप्रातिहार्यलक्षणां पूजामर्हन्तीत्यर्हन्तस्तेषामर्हतां, भगः—समग्रैश्वर्यादिलक्षणः स विद्यते येषां ते भगवन्तः, तेषां सम्बन्धिनां नमस्कारेण,

(अशोकवृक्षः सुरपुष्पवृष्टि—दिव्यध्वनिश्चामरमासनं च ।
भामण्डलं दुन्दुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणाम् ॥)

'नमो अरिहन्ताणंति' अनेन (पदोच्चारणेन) 'न पारयामि' न पारं गच्छामि कायोत्सर्गं पूर्णं न करोमि) तावत् किमित्याह—"तावकायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि" 'तावत्कायं'=तावच्छब्देन कालनिर्देशमाह कायं—देहं 'स्थानेन'—ऊर्ध्वस्थानेन हेतुभूतेन, तथा मौनेन वाग्निरोधलक्षणेन तथा 'ध्यानेन'—धर्मध्यानादिना 'अप्पाणंति' प्राकृतशैल्या, आत्मीयम्, (आत्मीयं देहं) अन्ये न पठन्त्येवैनमालापकं (केचित् 'अप्पाणं' इत्यालापकं न पठन्ति) 'व्युत्सृजामि' परित्यजामि,

'धर्मध्यानादि'ना धर्मध्यानं=मैत्र्यादिभेदेन चतुष्प्रकारकं ध्यानं (१) मैत्रीध्यानं= परजीवविषयकं हितचिन्तनं (२) करुणा=परदुःखप्रहाणविषयकेच्छा (३) प्रमोद भा.=परसुखादि विषयकसन्तोष—आनन्दः, (४) उपेक्षा भा.=परजीवनिष्ठदोषोपेक्षणम्, एतद्भावनाचतुष्टयं धर्मध्यानपोषकत्वेन रसायनकल्पं ॥

(१) आज्ञाविचयध्यानं=जिनानामाज्ञाविषयकचिन्तनं (२) अपायविचयं=सांसारिककष्ट —दुःखादिचिन्तनरूपं (३) विपाकविचयं=कर्मफल—परिणामचिन्तनरूपं (४) संस्थानविचयं= लोकाकृतिचिन्तनरूपं)

इयमत्रभावना-"कायं स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य व्युत्सृजामि"

सर्वथा कायोत्सर्गदशायां स्थान—मौन—ध्यानरूपक्रियां विहाय तदन्यसर्वकायव्यापार-विषयकं मिथ्याज्ञानजन्यं तत्तादात्म्यं व्युत्सृजामि—अर्थात् स्थानादिक्रियात्रयभिन्न—सर्वकायक्रिया,

काये वर्त्तते, एतादृशो योऽध्यासः—मिथ्याज्ञान—तादात्म्यं त्यक्तव्यमित्येतदपेक्षया सर्वथा कायं व्युत्सृजामि,

अथवा सर्वथा कायोत्सर्गदशायां "स्थान—मौन—ध्यान" रूप क्रियात्रयभिन्नसर्वकाय-व्यापारानपेक्ष्य, कायं सर्वथाऽहं व्युत्सृजामि, अर्थात् क्रियाऽऽधारभूतशरीरतः स्थान—मौन—ध्यानानि विना सर्वकाय—व्यापारान् कायोत्सर्गो व्युत्सृजामीति, अपेक्षयाऽहमपि मम कायं त्यजामीति कथ्यते.

नमस्कारपाठं यावत्प्रलम्बभुजो "प्रलम्बितभुजद्वन्द्वमूर्ध्वस्थस्याऽऽसितस्य वा स्थानं कायानपेक्षं यत्, कायोत्सर्गः स कीर्तितः ॥" निरुद्धवाक्प्रसरः प्रशस्तध्यानाऽनुगतस्तिष्ठामीति, ततः कायोत्सर्गं करोमीति। जघन्योऽपि तावदष्टोच्छ्वासमानः।

"पायसमा उसासा, कालयमानेन हुंति नायव्वा।
एवं कालप्रमाणेन उस्सग्गेण तु नायव्वं ॥"

अत्रोच्छ्वासस्य प्रमाणं एकगाथाया एकपादोच्चारणमात्रं न तु नासिकायाः श्वासोश्वासमानं।

अर्थाद् यावत् 'नमो अरिहंताणं' इति पदमुच्चार्य, न पारयामि तावत्प्रलम्बभुजः, निरुद्धवाक्प्रसरः, प्रशस्तध्यानाऽनुगतस्तिष्ठामीति.

अथ शास्त्रकारः केवलं प्रलम्बित—भुजद्वन्द्वपूर्वक एव कायोत्सर्गो भवति, जघन्यतोऽप्यष्ट-श्वासोच्छ्वासप्रमाणः कायोत्सर्गो • भवतीति मतं खण्डयित्वा प्रलम्बित—भुजद्वन्द्वपूर्वको जघन्य-तोऽप्यष्टश्वासोच्छ्वास—प्रमाणः कायोत्सर्गो भवतीति विषयस्य निपुणनिरूपणम्—

**इह च प्रमादमदिरामदापहृतचेतसो यथावस्थितं भगवद्वचनमनालोच्य तथाविधजनासेवनमेव प्रमाणयन्तः पूर्वापरविरुद्धमित्थमभिदधति—उत्सूत्रमेतत्, साध्वादिलोकेनानाचरितत्वात्, एतच्चायुक्तं, अधिकृतकायोत्सर्गसूत्रस्यैवार्थान्तराभावात्, उक्तार्थतायां चोक्ताविरोधात्, अथ भवत्वयमर्थः कायोत्सर्गकरणे न पुनरयं स इति, किमर्थमुच्चारणमिति वाच्यं. वन्दनार्थमिति चेत्, न, अतदर्थत्वात्, अतदर्थोच्चारणे चातिप्रसङ्गात्,**

**कायोत्सर्गयुक्तमेव वन्दनमिति चेत्, कर्त्तव्यस्तर्हि स इति,**

भुजप्रलम्बमात्रः क्रियत एवेति चेत्, न, तस्य नित्यप्रमाणत्वात्, चेष्टाभिभवभेदेन द्विप्रकारत्वाद्, उक्तं च–

"सो उस्सग्गो दुविहो, चेट्ठाए अभिभवे य णायव्वो।
भिक्खायरियाइ पढमो, उवसग्गभिओजणे बीओ ॥ १ ॥"

अयमपि चानयोरेवान्यतरः स्यात्' अन्यथा कायोत्सर्गत्वायोगः, न चाभिभवकायोत्सर्ग एषः, तल्लक्षणायोगात्, एकरात्रिक्यादौ तद्भावात्, चेष्टाकायोत्सर्गस्य चाणीयसोऽप्युक्तमानत्वात्, उक्तं च–

"उद्देससमुद्देसे, सत्तावीसं अणुण्णवणियाए।
अट्ठेव य उस्सासा, पट्ठवणपडिक्कमणमादी ॥ १ ॥"

अत्रायं न गृहीत इति चेत्, न, आदिशब्दावरुद्धत्वाद्, उपन्यस्तगाथासूत्रस्योपलक्षणत्वाद्, अन्यत्रापि चागमे एवंविधसूत्रादनुक्तार्थसिद्धेः, उक्तं च–

"गोसमुहणंतगादी, आलोइय देसिए य अइयारे।
सव्वे समाणइत्ता, हियए दोसे ठवेज्जाहि ॥ १ ॥"

अत्र मुखवस्त्रिकामात्रोक्तेः आदिशब्दाच्छेषोपकरणादिपरिग्रहोऽवसीयते, सुप्रसिद्धत्वात् प्रतिदिवसोपयोगाच्च न भेदेनोक्त इति, अनियतत्वात् दिवसातिचारस्य युज्यत एवेहादिशब्देन सूचनं, नियतं च वन्दनं, तत्कथं तदसाक्षाद्ग्रह इति चेत्, न, तत्रापि रजोहरणाद्युपधिप्रत्युपेक्षणस्य नियतत्वात्, समानजातीयोपादानादिह एतद्ग्रहणमस्त्येव, समानजातीयं च मुखवस्त्रिकायाः शेषोपकरणमिति चेत्, तत्रापि तन्मानकायोत्सर्गलक्षणं समानजा-

तोयत्वमस्त्येवेति मुच्यतामभिनिवेशः, न चेदं साध्वादिलोकेनानाचरितमेव, क्वचित्तदाचरणोपलब्धेः आगमविदाचरणश्रवणाच्च, न चैवंभूतमाचरितमपि प्रमाणं, तल्लक्षणायोगाद्, उक्तं च–

"असढेण समाइण्णं, जं कत्थइ केणई असावज्जं।
ण णिवारियमण्णेहि य, बहुमणुमयमेयमायरियं ॥ १ ॥"

न चैतत् सावद्यं, सूत्रार्थाविरोधात्, सूत्रार्थस्य प्रतिपादितत्वात्, तस्य चाधिकतरगुणान्तरभावमन्तरेण तथाऽकरणविरोधात्, न चान्यैरनिवारितं, तदासेवनपरैरागमविद्भिर्निवारितत्वाद्, अत एव न बहुमतमपीति भावनीयम्, अलं प्रसङ्गेन, यथोदितमान एवेह कायोत्सर्ग इति।

पं०..."उक्तार्थेत्यादि" उक्तो–व्याख्यातः कायोत्सर्गलक्षणोऽर्थः–अभिधेयं यस्य प्रकृतदण्डकस्य तद्भावस्तत्ता तस्यां "चः" पुनरर्थे "उक्ताविरोधात्" अष्टोच्छ्वासमानकायोत्सर्गाविरोधाद् "अथेति" पराकूतसूचनार्थः "भवतु" प्रवर्त्ततामयं नियतप्रमाणलक्षणे वन्दनाद्यर्थकायोत्सर्गकरणेऽभ्युपगम्यमाने, एवं तर्हि किमत्र क्षुण्णमिति आह–न पुनः न त्वयं दण्डकार्थे कायोत्सर्गः "इतिः" परवक्तव्यतासमाप्त्यर्थः ॥

टी०...इह च प्रमादमदिराऽपहतचेतसो यथावस्थितं भगवद्वचनमनालोच्य तथाविधजनासेवनमेव प्रमाणयन्तः पूर्वाऽपरविरुद्धमित्थमभिदधति.

पूर्वपक्षः=उत्सूत्रमेतद्=जघन्यतोऽप्यष्टोच्छ्वासप्रमाण-कायोत्सर्गस्य कथनमूत्सूत्रं (कायोत्सर्गसूत्रतो विरुद्धं) साध्वादिलोकेनाऽनाचरितत्वात्.

उत्तरपक्षः=एतच्चायुक्तं, अधिकृतकायोत्सर्गसूत्रस्यैवार्थान्तराभावात्, किञ्च कायोत्सर्गदण्डके कायोत्सर्गस्यार्थव्याख्याने जघन्यतोऽप्यष्टश्वासोश्वासप्रमाण–कायोत्सर्गस्य विरोधो नास्ति.

पूर्वपक्षः=अथ भवत्वयमर्थः कायोत्सर्गकरणे=एष (नियतप्रमाणस्य कायोत्सर्गरूपः) अर्थः कायोत्सर्गकरणे भवतु, परन्तु (वन्दनादिनिमित्तस्य) एष स कायोत्सर्गो नास्ति.

उत्तरपक्षः=कायोत्सर्गसूत्ररूपदण्डकस्योच्चारणं किमर्थं ? वन्दनार्थमिति चेत्–दण्डकस्य वन्दनार्थमुच्चारणमिति कथने प्रकृतदण्डकस्य, कायोत्सर्गरूपार्थशून्य–प्रकृतदण्डकोच्चारणेऽति-

प्रसङ्गदोष आयात्, अर्थादन्यस्याऽपि सूत्रस्योच्चारणं प्रस्तुतप्रयोजनभिन्नप्रयोजनार्थे भविष्यति. कायोत्सर्गवन्दनाद्यर्थं प्रकृतदण्डकस्योच्चारणं तदर्थवत्त्वेन, न प्रकृतदोषः, यदि कायोत्सर्गयुक्त-वन्दनमेव प्रकृतदण्डकस्यार्थः ( प्रयोजनं ) एवं तर्हि सूत्रमुच्चार्य कायोत्सर्गः कर्त्तव्यः,

शङ्का=केवलं प्रलम्बितभुजद्वन्द्वमात्रेण कायोत्सर्गकरणं कथं न युक्तम् ?

प्रत्युत्तरं=तस्य नित्यप्रमाणत्वात्, चेष्टाऽभिभवभेदेन द्विप्रकारत्वाद् अर्थात् कायोत्सर्गस्य नित्य—नियतप्रमाण ( परिमाण ) त्वात्, जघन्यतोऽप्यष्टश्वाससोच्छ्वासादिप्रमाणनियतत्वात्, स कायोत्सर्गचेष्टाऽभिभवभेदेन द्विप्रकारो भवति.

( यः ' कायोत्सर्गः ' गमनागमनाऽनन्तरं, विहाराऽनन्तरं अथवा दिनान्ते,निशान्ते, पक्षान्ते, चतुर्मास्यन्ते, संवत्सरान्ते, नियतप्रमाणत्वेन क्रियते, स चेष्टाकायोत्सर्गः' कथ्यते, यः कायोत्सर्गः, तितिक्षाशक्तिविकासाय, अर्थात् परिषहाणां जयाय, वन—प्रेतवननिर्वरुतिकादि—स्थलेषु गत्वा क्रियते स 'अभिभवे' त्युच्यते. )

उक्तं च " सो उस्सग्गो दुविहो चेट्ठाए अभिभवे य णायव्वो ।
भिक्खायरियाइ पढमो उवस्सगा—भिओ—जणे बीओ ॥ "

तथाहि भिक्षाचर्यायां ( भिक्षाऽऽदेर्गमनागमनाद्यनन्तरं ) प्रथमः कायोत्सर्गः, उपसर्गसह-नायाऽथवा परिषहादिजये द्वितीयोऽभिभवकायोत्सर्ग इति द्विधा कायोत्सर्गो भवति. एष प्रकृत-कायोत्सर्गोऽपि प्रकारद्वयमध्यतः, एकः प्रकारो भाव्यः, अन्यथा कायोत्सर्गत्वाऽयोगात्, अयं प्रकृतकायोत्सर्गः, अभिभवनामकः कायोत्सर्गो नास्त्येव, यतोऽभिभवकायोत्सर्गस्य लक्षणस्याऽ-भावोऽस्ति स एकरात्रिकीप्रतिमादौ घटते-

किञ्च चेष्टाकायोत्सर्गस्य चाणीयसोऽप्युक्त (अष्टश्वासोच्छ्वास—) मानो भवति.
(जीतकल्पाख्यागमे उक्तं च "उद्देश—समुद्देशे सत्तावीसं अणुण्णवणियाए ।
अट्ठेवय उस्सासा पट्ठवण—पडिक्कमणमादि ॥ १ ॥ "

अर्थ=उद्देशे अर्थाद् विधिपूर्वकं गुरुणा सूत्रप्रदाने, समुद्देशे—तदनन्तरं गुरुणा विधि-पूर्वकमर्थप्रदाने, अनुज्ञायां=सूत्रार्थविषयकस्थिर—परिचयाभ्यासानन्तरं गुरुणाऽऽज्ञा दीयते यत् सूत्रार्थधारणाऽन्यपात्रे प्रापणं गुरुगुणैर्वृद्धि—प्राप्ति—रूपाऽऽज्ञाऽथवाशीर्वादो दीयते, एतदुद्देश-समुद्देशानुज्ञानिमित्तेऽपि कायोत्सर्गः सप्तविंशतिश्वासोच्छ्वास—प्रमाणो भवति.

तथा प्रस्थाने—कालिकसूत्रस्वाध्यायात् प्राक् सूत्रस्वाध्यायस्य प्रारम्भिकविधौ प्रतिक्रमणे—

सूत्रस्वाध्याय–कार्याय प्रतिक्रमणस्य कायोत्सर्गादिविधौ, अर्थात् प्रस्थानप्रतिक्रमणयोरष्टश्वासोच्छ्वासप्रमाणः कायोत्सर्गो विधेयः )

**शङ्का**—अत्राऽयं न गृहीत इति चेत्–अत्र-अस्मिन् वन्दनार्थकः कायोत्सर्गः कुत्र गृहीतोऽस्ति ? यतः अनयोः कायोत्सर्गः अष्टश्वासोच्छ्वासप्रमाणः सिद्धो भवेत्,

प्रत्युत्तरम्–अत्र न गृहीत इति–नाऽपि गृहीत एव 'प्रतिक्रमादीति' वाक्ये, आदि ग्रहणेनैव गृहीत एव, अत्र प्रतिक्रमणादौ, आदिशब्दावरुद्धत्वं, उपन्यस्तगाथासूत्रस्योपलक्षणत्वात् (उपलक्ष्यते स्वं स्वेतरच्चानेनेति व्युत्पत्तिः। करणे ल्युट्। लक्षणं तु लक्ष्यतावच्छेदक रूपेण स्वस्वेतरबोधकपदम् )

अन्यत्राऽपि चागमे एवंविधसूत्रादनुक्तार्थ–सिद्धेः, उक्तं च–

"गोसमुहणंतगादी, आलोइय देसिएय अइयारे।
सव्वे समाणइत्ता, हियए दोसे ठविज्जाहि ॥ १ ॥"

अत्र मुखवस्त्रिकामात्रोक्तेः, आदिशब्दाच्छेषोपकरणादिपरिग्रहोऽवसीयते, सुप्रसिद्धत्वात्, प्रतिदिवसोपयोगाच्च न भेदेनोक्त इति,

अनियतत्वाद् दिवसातिचारस्य एवेहादिशब्देन सूचनं, अर्थात्, शास्त्रकथनानुसारेण 'प्रातर्मुखवस्त्रिकादि प्रतिलेख्ये'त्यादि. अत्र केवल–साक्षात्, शब्देन मुखवस्त्रिका–मात्रस्य ग्रहणमस्ति, परन्तु, उपलक्षणरूपादिशब्देन, शेषोपकरणादेर्ग्रहणं क्रियते, यतः सुप्रसिद्धत्वेन प्रतिदिनोपयोगेन च कारणेन पृथक्त्वेन न कथितः,

**प्रश्नः**–यदि दिवसातिचारस्य तु अनियतत्वेनात्रादिशब्देन सूचनं युक्तं यदा वन्दनन्तु नियतमेव तदा वन्दनं साक्षाच्छब्देन कथं न गृहीतम् ?

**समाधानं**=तत्रापि रजोहरणाद्युपध्युत्प्रेक्षणस्य नियतत्वात्, समानजातीयोपादानादिह, एतद्ग्रहणमस्त्येव, अर्थात् प्रतिलेखनप्रसङ्गे रजोहरणादिरूपोपधेः प्रतिलेखनं नियतमेव नियतत्वरूपसाजात्येन समानजातीयोपादानाद्, शेषोपकरणादि गृहीतं तथा नियतत्वसाजात्येन वन्दनं गृहीतमेव.

**शङ्का**=मुखवस्त्रिकया सह नियतत्वरूपसमानजातीय–शेषोपकरणस्यादिशब्दतो ग्रहणं वरमस्तु परन्त्वत्र चैत्यवन्दनग्रहणं किं साजात्यमस्ति ?

**समाधानं**=प्रतिक्रमणादेः, अष्टश्वासोच्छ्वासप्रमाणरूपस्य कायोत्सर्गस्य साजात्यं ज्ञेयम्, तथा च प्रतिक्रमणग्रहणे, आदिशब्दतः, चैत्यवन्दनादेरष्टश्वासोच्छ्वासरूपैकसमानजातिमत्त्वं सर्वस्य ग्रहणं ज्ञेयं–तत्रापि तन्मानकायोत्सर्गलक्षणं समानजातीयत्वमस्त्येवेति मुच्यतामभिनिवेशः,

(अत्रेदं बोध्यम्=प्रस्थान—प्रतिक्रमण—कायोत्सर्गः, वन्दनकायोत्सर्गश्चेमौ द्वौ कायोत्सर्गहेतुना मिथः सजातीयौ स्तः, अस्मिश्च प्रस्थापनप्रतिक्रमणस्य, अष्टश्वासोच्छ्वासप्रमाणः कायोत्सर्गः, वन्दनार्थकोऽपि, अष्टश्वासोच्छ्वासप्रमाणः कायोत्सर्गश्चेतौ द्वौ सर्वथा सजातीयौ जातौ, अर्थादेक—सजातीयस्य कथने सहवर्तिनाऽऽदिपदेनान्यस्वसजातीयस्य ग्रहणं भवति, तत्समभङ्गसमेव. ततो वन्दनार्थकायोत्सर्गे अष्टश्वासोच्छ्वासस्य प्रामाण्यं प्रतिपत्तव्यमेव तदभिनिवेशस्त्याज्य एव. )

**—कायोत्सर्गे जघन्यतोऽप्यष्टश्वासोच्छ्वासप्रमाणः कर्त्तव्यो मन्तव्यश्च—**

तथा चैषोऽष्टश्वासोच्छ्वासप्रमाणः कायोत्सर्गः साध्वादिलोकेनाऽऽचरित एव.

यतः क्वचित् तदाऽऽचरितोपलब्धेः, आगमविदाचरणश्रवणाच्च.

**प्रश्नः**=न चैवंभूतमाचरितमपि प्रमाणं, तल्लक्षणायोगात् । उक्तं च—

"असढेन समाचीर्णं, कुत्रापि केनचित्, असावद्यं ।

न निवारितमन्यैश्च, बहु(मनु) मतमेतदाचरितम् ॥ " छाया ॥

(एषोऽष्टश्वासोच्छ्वासप्रमाणः कायोत्सर्गः) न चैतदसावद्यं सूत्रार्थविरोधात्, सूत्रार्थस्य प्रतिपादितत्वात्, तस्य चाधिकगुणान्तरभावमन्तरेण तथाऽकरणविरोधात्, न चान्यैरनिवारितं, तदासेवनपरै—रागमविद्भिर्निवारितत्वात्, अत एव न बहुमतमपीति भावनीयम् । अलं प्रसङ्गेन,

**समाधानं**=यथोदित—मान एव कायोत्सर्ग इति, अर्थात् पूर्वोक्तोऽष्टश्वासोच्छ्वासप्रमाण एव कायोत्सर्गोऽत्र कर्त्तव्य एव,

**उत्तरपक्षः**=एषोऽष्टश्वासोच्छ्वासमानः कायोत्सर्गः कार्यः, यतः सावद्यं नास्ति, प्रकृतसूत्रार्थरूपकायोत्सर्गेण सह विरोधो नास्ति, सूत्रस्यार्थोऽस्ति प्रतिपादितः प्रतिपादित—सूत्रार्थस्याऽधिकतरं गुणान्तरोपत्तिं विना तथाऽकरणे विरोधोऽस्ति, अर्थात्, अधिकतरगुणान्तरोत्पत्तिर्भवति, तथाकरणे विरोधो नास्ति, सम्मतिरस्ति.

अत्र चैत्यवन्दनेऽष्टश्वासोच्छ्वासमानः कायोत्सर्ग एव मान्यः, अथ शास्त्रकारः कायोत्सर्गे, ध्येय—नैयत्यं नास्ति, अमुकविषयकध्यानममुकं फलं ददातीति, आनुषङ्गिकं विषयं दर्शयित्वा कायोत्सर्गः कया रीत्यैकेन वाऽनेकैः पार्य इति विधानं सहेतुकं ज्ञापयति.

**इहोच्छ्वासमानमित्थं न पुनर्ध्येयनियमः, यथापरिणामेनैतत्स्थापने च गुणाः तत्त्वानि वा स्थानवर्णार्थालम्बनानि वा आत्मीयदोषप्रतिपक्षो वा**

एतद्विद्याजन्मबीजं तत्पारमेश्वरं, अतः इत्थमेवोपयोगशुद्धेः, शुद्धभावोपात्तं कर्म्मावन्ध्यं सुवर्णघटाद्युदाहरणात्, एतदुदयतो विद्याजन्म, कारणानुरूपत्वेन,

युक्त्यागमसिद्धमेतत्, तल्लक्षणानुपाति च, "वर्चोगृहकृमेर्यद्वद्, मानुष्यं प्राप्य सुन्दरम्।

तत्प्राप्तावपि तत्रेच्छा, न पुनः सम्प्रवर्त्तते ॥ १ ॥
विद्याजन्माप्तितस्तद्वद्. विषयेषु महात्मनः।
तत्त्वज्ञानसमेतस्य, न मनोऽपि प्रवर्त्तते ॥ २ ॥
विषग्रस्तस्य मन्त्रेभ्यो, निर्विषाङ्गोद्भवो यथा।
विद्याजन्मन्यलं मोहविषत्यागस्तथैवहि ॥ ३ ॥
शैवे मार्गेऽत एवासौ, याति नित्यमखेदितः।
न तु मोहविषग्रस्त, इतरस्मिन्निवेतरः ॥ ४ ॥
क्रियाज्ञानात्मके योगे, सातत्येन प्रवर्त्तनम्।
वीतस्पृहस्य सर्वत्र, यानं चाहुः शिवाध्वनि ॥५॥" इतिवचनात्,

अवसितमानुषङ्गिकं, प्रकृतं प्रस्तुमः, स हि कायोत्सर्गान्ते यद्येक एव ततो "नमोअरिहंताणंति" नमस्कारेणोत्सार्य स्तुतिं पठत्यन्यथा प्रतिज्ञाभङ्गः, जाव अरिहंताणं इत्यादिनाऽस्यैव प्रतिज्ञातत्वात्, नमस्कारत्वेनास्यैव रूढत्वाद्, अन्यथैतदर्थाभिधानेऽपि दोषसम्भवात्, तदन्यमन्त्रादौ तथादर्शनादिति। अथ बहवस्तत एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गेणैव तिष्ठन्ति, यावत्स्तुतिपरिसमाप्ति, अत्र चैवं वृद्धा वदन्ति–यत्र किलाऽऽयतनादौ वन्दनं चिकीर्षितं तत्र यस्य भगवतः सन्निहितं स्थापनारूपं तं पुरस्कृत्य प्रथमकायोत्सर्गः, स्तुतिश्च, तथा शोभन-

## भावजनकत्वेन तस्यैवोपकारित्वात्, ततः सर्वेऽपि नमस्कारोच्चारणेन पारयन्तीति व्याख्यातं वन्दनाकायोत्सर्गसूत्रं ॥

पं०..." एतद्विद्येत्यादि " एतत्–प्रतिविशिष्टध्येयध्यानं विद्याजन्मबीजं–विवेकोत्पत्तिकारणं "तदिति" शास्त्रसिद्धं "पारमेश्वरं" परमेश्वरप्रणीतं, हेतुमाह–"अतः" प्रतिविशिष्टध्येयध्यानाद् "इत्थमेव" विद्याजन्मानुरूपप्रकारेणैव ' उपयोगशुद्धेः" चैतन्यवृत्तेर्निर्मलीभावाद्, एतदेव भावयति–" शुद्धभावोपात्तं " शुद्धः–अधिकृतकायोत्सर्गध्यानादिरूपो भावस्तदुपात्तं कर्म्मसद्वेद्यादि अवन्ध्यम् अवश्यं–शुद्धभावफलदायि. कथमित्याह–" सुवर्णघटाद्युदाहरणेन " यथा सुवर्णघटो भङ्गेऽपि सुवर्णफल एव, आदिशब्दाद्रूप्यघटादिपरिग्रहः, तथा प्रकृतकर्म्मापीति, यद्येवं ततः किमित्याह– " एतदुदयतः " शुद्धभावोपात्तकर्म्मोदयतो " विद्याजन्म " विवेकोत्पत्तिलक्षणं, कुत इत्याह–" कारणानुरूपत्वेन " कारणस्वरूपानुविधायी हि कार्यस्वभावः, ततः कथमिव शुद्धभावोपात्त कर्म न शुद्धभावहेतुः स्याद् ? अस्यैव हेतोः सिद्धयर्थमाह–

"युक्त्यागमसिद्धं" युक्तिः–अन्वयव्यतिरेकविमर्शरूपा आगमश्च " जं जं समयं जीवो, आविस्सइ जेण जेण भावेण " इत्यादिरूपस्ताभ्यां सिद्धं–प्रतिष्ठितम् " एतत् " कारणानुरूपत्वं कार्यस्य, सिद्ध्यतु नामेदमन्यकार्येषु प्रकृते न सेत्स्यतीत्याह–" तल्लक्षणानुपाति च " युक्त्यागमसिद्धकारणानुरूपकार्यलक्षणानुपाति च विद्याजन्म, कुत इत्याह–इतिवचनादिति वक्ष्यमाणेन सम्बन्धो. वचनमेव दर्शयति "वर्चोगृहेत्यादिश्लोकपञ्चकं" सुगमशब्दार्थं च, नवरं "इतरस्मिन्निवेतरः" इति यथा इतरस्मिन्–संसारमार्गे इतरो–मोहविषेणाग्रस्तो विवेकी नित्यमखेदितो न याति, तथा शैवे मार्गे मोहविषग्रस्तो न याति, खेदितस्तु कोऽपि कथञ्चित् द्रव्यत उभयत्रापि यातीति भावः, अभिप्रायः पुनरयम्–अनुरूपकारणप्रभवे हि विद्याजन्मनि विषयवैराग्यक्रियाज्ञानात्मके योगे सातत्यप्रवृत्तिलक्षणं च शिवमार्गगमनं तत्फलमुपयुज्यते नान्यथेति,

**॥ इतिश्रीमुनिचन्द्रसूरिकृतायां ललितविस्तारापञ्जिकायामर्हच्चैत्यदण्डकः समाप्तः ॥**

**टी०**...." इहोच्छ्वासप्रमाणमित्थं न पुनर्ध्येयनियमः, यथा परिणामेनैतत्, स्थापनेशगुणतत्त्वानि वा, स्थानवर्णार्थालम्बनानि वा, आत्मीयदोष–प्रतिपक्षो वा" कायोत्सर्गेऽष्टश्वासोच्छ्वासप्रमाणं सिद्धम् । कायोत्सर्गे ध्येय–ध्यानविषयस्य नियमो नास्ति, श्वासोच्छ्वासप्रमाणमस्ति ।

**प्रश्नः**—कायोत्सर्गे ध्येयं—ध्यानविषयः कः ?

**प्रत्युत्तरम्**—यथा परिणामेन—परिणामं स्वभावमनुस्मृत्यैतद् ध्येयम्, ज्ञेयम्. ध्यानस्यानेकानि ध्येयानि सन्ति,

(१) स्थापनेशगुणतत्त्वानिः=स्थापनाया ईशस्य गुणाश्च तत्त्वानि वा,

स्थापनेशगुणाः=हृदये सम्मुखं चक्षुषो यं स्थापयित्वा—संकल्प्य कायोत्सर्गः क्रियते तस्य गुणो ध्येयरूपोः, स्थापना चार्हतो भगवतस्तथाऽऽचार्यादिगुरोः कर्त्तव्या, ततस्तत्र देवाधिदेवस्यार्हतस्तीर्थङ्करस्याथवा गुर्वादि—पञ्चपरमेष्ठिनां भगवतां गुणाः, ध्येयाः—इति स्थापनेशगुणाः स्थापनेशतत्त्वानि=स्थापनेशस्य—ईशरूपतीर्थकरस्य प्ररूपितानि तत्त्वानि—जीवादीनि ध्येयानि अथवा पिंडस्थपदस्थरूपस्थ—रूपातीतादितत्त्वं स्वरूपं गुरोरपि लक्षणादितत्त्वं स्वरूपं तथा देवस्य गुरोश्च महिमादि तत्त्वं ध्येयम् ( पाठान्तरे—यथापरिणामेनैतत्स्थापने च गुणाः तत्त्वानि वा—अर्थात् परिणामप्रमाणेन ध्येयस्थापने—विषये गुणा वा तत्त्वानि )

(२) स्थानवर्णार्थालम्बनानि ध्येयानि (स्थानं=आसनविशेषः, कायोत्सर्गासनं पर्यङ्कासनं, पद्मासनमित्यादि तथा योगमुद्रा—जिनमुद्रा—मुक्ताशुक्तिमुद्रा, इत्यादेः सम्यक्पालनं, वर्णः=वंदना—कायोत्सर्गसूत्रस्याक्षराणां अतिस्पष्टता—शुद्धता—स्वरव्यञ्जनयोर्भेदसाहित्यं, पदच्छेदपूर्वकता तथा सम्पत् (विरामयति) सहितत्वं, उचित—ध्वनि—सङ्कलितत्वम्, इति वर्ण—योगः, अर्थाः—वन्दना कायोत्सर्गसूत्रस्यार्था अपि सूत्रोच्चारणसमये यथा—स्वज्ञानं विचारणीयाः इति अर्थयोगः, आलम्बनं=भावाऽर्हन्तोऽपि स्मरणीयाः, तथा यस्याग्रतः चैत्यवन्दनं समारब्धं तस्य प्रतिमादेः, स्मरणमवश्यं कार्यम्, अर्थादालम्बनं जिनप्रतिमादि, ज्ञेयम्, )

(३) आत्मीयदोषप्रतिपक्षः=आत्मीया ये दोषास्तेषां प्रतिपक्षः स ध्येयः—ध्यानविषयः कार्यः—तथाहि आत्मनिष्ठा ये मिथ्यात्वाद्या दोषाः—आत्मनः दूषितकारकत्वेन, तेषां प्रतिपक्षरूपः सम्यक्त्वादिगुणो ध्येयः ।

स्थानादि—आत्मीयदोष—प्रतिपक्षादि—विषयकं ध्येयम् विवेकोत्पत्ते मूलम्, यथा हेयोपादेय—आश्रव—संवर—पुण्य—पाप—जडचेतनादिविषयक—विवेकस्य उत्पत्ति बीजं, तथा नित्ये नित्यत्वबुद्धिः, पवित्रे पवित्रत्वबुद्धिः, आत्मनि आत्मत्वबुद्धिः—आदिरूपे तस्मिन् तत्त्वबुद्धि विद्याजन्मनो गुणादिविषयकं ध्यानं बीजं, अस्ति, किञ्च शास्त्रसिद्ध—तद् विवेकोत्पत्तिबीजभूत—गुणादि—विषयकध्यानं पारमेश्वरम्—परमेश्वरप्रणीतमेव.

अत एव विशिष्ट—ध्येय—ध्यानेन विवेकोत्पत्तियोग्य—प्रकार द्वारा चैतन्यरूपशक्तेः शुद्धिर्भवति,

तथा—उपयोगशुद्धिरूपं कार्यं प्रति विवेकजननप्रकार—द्वारा विशिष्टगुणादिविषयकं ध्यानं कारणम् ।

तथा च प्रकृत–कायोत्सर्गध्यानादिरूप–शुद्धभावेनोपात्त–सातवेदनीयादिरूपं। पुण्यानुबन्धिपुण्यकर्म, नैयत्येन शुद्धभावफलदमस्त्येव, एवं च शुद्धभाव (श्रद्धादि) रूपं फलं–कार्यं प्रति निरुक्तशुद्धभावोपात्तं कर्म, असाधारणं कारणमस्ति,

—अर्थेन विषयं सोदाहरणं ज्ञापयति—

यथा सौवर्णो घटः, भग्नदशायामपि सुवर्ण–फलकस्तु नित्यस्तिष्ठति, अर्थात् स्वर्णं नित्यं, आदिना रूप्य–घटादिर्ग्राह्यः, तथा प्रकृतकर्माऽपि ज्ञेयं, अर्थात्–शुद्धभावोपात्तं कर्म, शुद्धभावरूपं फलं ददाति, सारं तु, शुद्धभावोपात्त–कर्मण उदयेन विवेकोत्पत्तिरूपं विद्याजन्म भवति, यतः कारणस्वभावानुविधायी कार्यस्वभावो वर्त्तते, यादृशः कारणस्वभावः तादृश एव-कार्यस्वभावः, अतः शुद्धभावेनोपात्तं कर्म शुद्धभावस्य कारणं कथं न? अर्थात् शुद्धभावोपात्तं कर्म शुद्धभावस्य कारणं भवत्येव. शुभसंस्कारकारणमपि.

कारणानुगुणकार्ये युक्तिश्चागमश्च–

(१) युक्तिः=कारणस्वभावानुसारी कार्यस्वभावः, इति वस्तु, युक्त्याऽऽगमेन सिद्धम्, अन्वयव्यतिरेकसङ्गतिमती युक्ति दृश्यते च सुवर्णकुम्भभङ्गे नष्टखण्डावस्थायां सुवर्णमेव लभ्यते इत्यन्वयः, मृत्कुम्भे भग्ने सुवर्णं न लभ्यते इति व्यतिरेकः।

(२) आगमः=" जं जं समयं जीवो आविसइ जेण जेण भावेण।
सो तंमि तंमि समये सुहासुहं बंधए कम्मं॥" उ. मा. श्लो. २४

यत्र यत्र समये जीवो येन येन भावेन संयुक्तो भवति. तत्र तत्र समये स तादृशं शुभं वाऽशुभं कर्म बध्नातीति.

शुभभावेन च शुभं चेत्कर्म तदा सातवेद्योच्चैर्गोत्रयशोनामकर्मादि, जीवो बध्नाति, अशुभभावेन तदाऽसातवेद्यनीचैर्गोत्रापयशोनामकर्मादि कर्म बध्नाति.

अर्थात् कायोत्सर्गकाले क्रियमाणात् पूर्वोक्तध्येयमध्यतः, एकतरं, निरन्तरनित्यनियतध्येय-विषयकं ध्यानं, एतावन्माहात्म्यवदस्ति यतो विद्या–विवेकोत्पत्तिर्भवति.

(एतद्वस्तु शास्त्रीयं परमेश्वरप्रणीतं तथा–एतद् विवेकोत्पत्तिद्वारा ध्येयध्यानेन चैतन्यपरिणामरूपयोगः शुद्धो भवति. यथा विवेकमात्रानुसारेण विशिष्टविशिष्टतर उपयोगस्तेजस्वी शुद्धो भवति. शुद्धभावोपात्तं कर्मावन्ध्यं तथाहि सुवर्णघटोदाहरणेन शुद्धभावात् शुद्धभाव उत्पद्यते, कथमिति चेत् कथ्यते, शुद्धभावोपात्तं कर्मावन्ध्यमवश्यं नियमात्, शुद्धभावदायकं

भवति, अत्र शुद्धभावोपात्तं कर्मविपाकं प्राप्य सातवेद्यादिकं दर्शयित्वा नश्यति तथापि तत्पृष्ठे मौलिकशुद्धभावोऽखण्डरूपेण स्थितोऽस्त्येव )

**प्रश्नः=**भूतकालावच्छेदेन शुद्धभाव आसीत् ततो वर्तमानकालावच्छेदेन स भावोऽवश्यं भवेदिति नियमः कथं ? पूर्वकालीन—शुद्धभावेन तु सातवेद्यादि—पुण्यपुञ्जो दत्त एव, एतत्कर्मोदयेन सातादिर्भवेत् परन्तु शुद्धभावः कथं उदयेत् ?

**समाधानं=**शुद्धभावोपात्तं कर्म, शुभानुबन्धित्वेनास्योदयवेलायां यानि सातादीनि, अनुकूलत्वानि प्राप्यन्ते तानि रागादिसंक्लेशरहितानि, ततस्तत्काले विद्याविवेको जायते, अस्मिन् विवेके मलिनत्वं भावविषयके न भवति, परन्तु शुद्धिरेव, शुद्धभावोपात्तं कर्म शुद्धभावकारणं भवति, कार्यं कारणानुरूपमिति नियमतः, शुद्धभावोपात्तं कर्म, तदुदयः स्वकारण—स्वभावानुसार्येव, शुद्धभावो हि शुभकर्मजनकत्वेन सह शुभसंस्कारकारणं भवति. एतत् संस्कारयुतकर्मोदये तादृशो भाव उदेतीति युक्तियुक्तं, अत एकशः शुद्धभावः कार्यः, शुद्धभावेन सुकृत्यं कृत्यं, मात्रं पुण्यं नहि परन्तु भाविनि शुद्धभावभूमिकाऽपि प्राप्तव्यैवेत्युपदेशः,

युक्त्यागमसिद्धमेतत्, तल्लक्षणाऽनुपाति च । अर्थादितरकारणानुरूपं कार्यवस्तु, युक्त्यागमाभ्यां, अन्वयव्यतिरेकविचारेण, ' जं जं समयं जीवो ' इति स्वरूपेणागमेन सिद्धम्, कारणानुरूपकार्यरूप—लक्षणानुसारित्वं, वर्त्तते, तथाहि=

( युक्तिस्वरूपं=कारणाधिकरणे कार्यस्य सत्त्वम् , यथा यत्सत्त्वे ( कारणसत्त्वे ) यत्सत्त्वम् ( कार्यसत्त्वम् ) अन्वयः । कार्यकारणयोः साहचर्यमन्वयः । तत्र कार्यकारणयोः साहचर्यं च स्वस्वव्याप्येतरयावत्कारणसत्त्वे यत्सत्त्वेऽवश्यं यत्सत्त्वमिति । यथा चक्रादिघटितसामग्रीसमवहितदण्डादिसत्त्वे घटसत्त्वमिति, कार्ये कारणानुसरणमन्वयः, कार्यसत्तापादकस्वसत्ताकस्य कारणस्य कार्ये स्थितिरन्वयः । कारणाभाव—कार्याभावयोः साहचर्यं व्यतिरेकः । कारणाभावाधिकरणे कार्यासत्त्वम् व्यतिरेकः ।

यदभावे यदभाव इति, स यथा चक्रचीवरादिघटितस्य दण्डस्याऽसत्त्वे घटस्यासत्त्वमिति, व्यतिरेकः । अयं व्यतिरेकः कारणत्वग्रहजनक इति ज्ञेयम् । )

" तल्लक्षणानुपाति च "=युक्त्यागमाभ्यां सिद्धकारणानुरूपकार्यरूपलक्षणानुपाति च विद्याजन्म—विवेकोत्पत्तिः, वर्चोगृहादिश्लोकपञ्चकरूपवचनात्, अत एव तद्वचनं दर्शयति.

"यथा वर्चोगृहस्य—विष्ठागृहस्य कृमिः, सुन्दरं—शोभनं मानुष्यं जन्म प्राप्य, मनुष्यजन्मप्राप्तावपि-मानवजन्मलाभेऽपि, तत्र—वर्चोगृहे गन्तुं पुनरिच्छा न सम्यक्तया प्रवर्तते ॥१॥

तथा विद्याजन्माप्तितः—विवेकोत्पत्ति—नित्यशुच्यात्मसुखादिषु तत्त्वेषु नित्यत्वादि—तत्त्वबुद्धिरूप-विद्याविवेकोत्पत्ति—प्राप्तितः, तत्त्वज्ञानसमेतस्य महात्मनो विषयेषु—इन्द्रियकृतेषु पञ्चसु विषयेषु मनश्चित्तमपि न प्रवर्त्तते, तत इन्द्रियाणि कथं प्रवर्त्तेरन्? आत्मा, मनः प्रवर्तयति, मनः इन्द्रियाणि विषयेषु प्रवर्त्तयन्ति. तत इन्द्रियाणि विषयेषु प्रवर्त्तन्ते ॥ २ ॥ यथा मन्त्रेभ्यो—जाङ्गुल्या विषनाशकविद्यामन्त्रेभ्यो विषग्रस्तस्य—विषाक्रान्तस्य, निर्विषशरीरशरीरावयवोत्पत्ति भवति तथैव हि विद्याजन्मनि सति विद्याजन्मवति वा पुरुषे मोहरूपविषस्य त्यागः अलं नियमतः, अर्थात् समर्थः सर्वथा। त्यागो भवति, पुनरुद्भवो न भवेदिति. त्यागः स त्याग एव ॥ ३ ॥ अतः विद्याजन्मजन्यमोहविषत्यागत एवासौ महात्मा, नित्यमखेदितः=प्रवृत्तिकरणे परिश्रमरहितः, अविरतत्वेनाऽश्रान्तत्वेन प्रवृत्तिकरणे परायणः, सदा प्रसन्नोऽपि शैवमार्गे—मोक्ष-मार्गे याति—गच्छति, परन्तु मोहविषग्रस्तो मोक्षमार्गे न याति,

इतरस्मिन्निवेतरः इति=इव=यथा, इतरस्मिन्—संसारमार्गे इतरो—मोहविषेणाऽग्रस्तो विवेकी नित्यमखेदितो न याति, अर्थाद् मोहविषाऽनाक्रान्तत्वेसति नित्यमखेदितत्वे सति, विद्याजन्म-विवेकवत्त्वे सति महात्मा संसारमार्गे—मिथ्यात्वादिसंसारमार्गे न याति—गमनप्रतिबन्धो भवति.

तथा शैवमार्गे=सम्यग्दर्शनादिमोक्षमार्गे मोहविषग्रस्तो न याति—गमनप्रतिबन्धो भवति, उभयत्र—मार्गे खेदितस्तु—प्रवृत्तिकरणे परिश्रान्तस्तु कोऽपि कथञ्चित् द्रव्यतः—संसारमोक्षफलाऽभावतः, द्रव्यापेक्षया ( न भावापेक्षया ) उभयत्रापि—संसारमार्गे मोहविषाग्रस्तः, मोक्षमार्गे मोहविषग्रस्तो यातीति भावः ॥४॥ अभिप्रायः पुनरयम्=अनुरूपकारणप्रभवे हि विद्याजन्मनि विषयवैराग्यक्रियाज्ञानाऽऽत्मके योगे, सातत्यप्रवृत्तिलक्षणं च शिवमार्गगमनं, तत्फलमुपयुज्यते नान्यथेति. अर्थाच्छुद्धभावोपाचकर्मोदयजन्यविवेकोत्पत्तिकार्यं भवति. अतः शुद्धभावोपात्तं कर्म, शुद्धभावजनकमतः, अनुरूपकारणप्रभवे हि विद्याजन्मनि सत्येव विषयवैराग्य—क्रिया ज्ञानात्मके योगे ( मोक्षमार्गे ) सातत्यप्रवृत्ति (अविच्छिन्नाखेदजन्यप्रवृत्ति) लक्षणं शिवमार्गगमनं भवति, तत्र तन्मोक्षफलकमुपयुक्तं भवति. नान्यथा—नान्यप्रकारेणेति. विशिष्टज्ञानक्रियात्मके योगे (मोक्षमार्गे) वीतस्पृहस्य निराशंसभावसमेतस्य सातत्येन (अविच्छिन्नाखेदितभाववत्त्वेन) सर्वत्र—योगे प्रवर्त्तनं 'शिवमार्गे, गमनं—भावतः प्रवृत्तिः, तदेव (भाव) यानमाहुः—कथयन्ति महर्षयः' ॥ ५ ॥ इति वचनानि वर्त्तन्ते. तथा च कायोत्सर्गे स्थित्वा, क्रियमाणं पूर्वोक्त-ध्येयविषयकं ध्यानं तदेव विद्याविवेकबीजं, तत एव विवेकजननान्तरं ज्ञानक्रियात्मके योगे

सर्वत्र निराशंसभावपूर्वकं सातत्येन प्रवर्त्तनं शिवमार्गे भावगमनं-भावयानमित्यर्थः तत्र व्याख्यायां विशिष्टध्येयध्यान-विद्या–तत्फलादिकमानुषङ्गिकं कथितं.

अथ प्रकृतं प्रस्तुमः, स हि ( कायोत्सर्गकर्त्ता हि ) कायोत्सर्गस्यान्ते यदि, एक एव ( एकको न्यायः ) ततो 'नमो अरिहंताणं ति' इत्याकारकनमस्कारपदमुच्चार्य, कायोत्सर्गं पारयित्वा स्तुतिः पठनीयेत्यन्यथा–यदि 'नमो अरिहंताणं' रूपनमस्कारपदमुच्चार्य पारयेत्तदा प्रतिज्ञाया भङ्गो भवेत् यतः 'जाव अरिहंताणं भगवंताणं नमुक्कारेण' रूप 'नमो अरिहंताणं इति पदं न कथयामि तावत् मम कायोत्सर्गं नाहं पारयामीति वाक्यतो नमो अरिहंताणमिति पदोच्चारणविषयिका प्रतिज्ञा कृताऽस्ति० 'नमो अरिहंताणमिति पदं नमस्कारत्वेन रूढमस्ति, नमस्कारः=नमो अरिहंताणं रूपपदस्य नमस्कारे रूढिरस्ति,

अन्यथा=अन्यप्रकारेणास्यार्थस्याभिधानेऽपि दोषसम्भवोऽस्ति. अन्यथा शब्दोच्चाररूढि-प्रस्तावे शब्दोच्चारं मुक्त्वा, एतदर्थकथनेऽपि दोषः कथं न ? यत्रार्थे यस्य रूढिरस्ति स रूढोऽर्थो ग्राह्यः प्रकृतनमस्कारभिन्नमन्त्रादिके तथादर्शनमस्ति. यतः सर्वत्र रूढिर्बलीयसी.

अथ कायोत्सर्गस्थिता बहवस्ततः–तेभ्य एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गेणैव तिष्ठन्ति, यावत्स्तुतिपरिसमाप्ति.

अत्र चैवं वृद्धा वदन्ति यत्र किलाऽऽयतनादौ–चैत्यादौ वन्दनं चिकीर्षितं–कर्तुमिष्टं तत्र यस्य भगवतः सन्निहितं स्थापनारूपं (जिनप्रतिमादिकं) तं (जिनेश्वरं भगवन्तं) पुरस्कृत्य ( उद्दिश्य ) प्रथमकायोत्सर्गः स्तुतिश्च तथा शोभनभाव ( शुभशुद्ध–वर्धमानभाव ) जनकत्वेन तस्यैवोपकारित्वात्, ततः सर्वेऽपि कायोत्सर्गस्थिता अन्ये सर्वेऽपि नमस्कारोच्चारणेन–'नमो अरिहंताणं' एतत्पदस्योच्चारणं कृत्वा पारयन्ति, कायोत्सर्गमिति, व्याख्यातं वंदना-कायोत्सर्गसूत्रम् ।

卐 अर्हच्चैत्यदण्डकः समाप्तः 卐

अथ च शक्रस्तवनामक–प्रथमदण्डके 'नमोत्थुणं' पदतः जिअभयाणं' पर्यन्तपाठे भाव-जिनविषयवन्दना, अर्थात् तीर्थकरनामकर्मणो विपाकोदयवन्तः केवलिनस्तीर्थकरा भगवन्तो देशनादिद्वारा भव्यजीवानुद्धरन्तः, विहारेण पृथ्वीतलं पवित्रयन्तो विचरन्त आसन्स्त समये तद्दशां लक्ष्यीकृत्य वन्दना कृताऽस्ति,

एतं प्रथमाधिकारं दर्शयित्वा 'नमोत्थुणं' सूत्रस्यान्तिमसम्पूर्ण–गाथायां द्रव्यजिनवन्दना, अर्थात् पूर्वस्य तृतीयभवे निकाचितं तीर्थकरनामकर्म बद्ध्वा, तस्य प्रदेशोदये वर्त्तमाना ये

तीर्थकरा, अद्य—पर्यन्तं केवलज्ञानपूर्वकं भावाऽर्हत्त्वं न प्राप्ताः परन्तु भविष्यन्ति, कालेऽवश्यं प्राप्स्यन्ति, ते द्रव्यजिनाः अथवा ये तीर्थकराः सिद्धास्ते सिद्धावस्थावन्तोऽपि द्रव्यजिनाः कथ्यन्ते, एवं भावजिनस्योभयपार्श्ववर्ति—(भूतभविष्यत्कालवर्ति(—अवस्थारूपा, द्विप्रकारा द्रव्य-जिना, तद्विषयकवन्दनारूपद्वितीयाधिकारदर्शनानन्तरं, चैत्यसत्कस्तुतेः कायोत्सर्गस्य दर्शकत्वेन, 'अरिहंत चेइ.' पदतः प्रथमस्तुति—पर्यन्तस्य सूत्रस्य गौण ( गुणनिष्पन्न ) नामरूपचैत्यस्तव-विषयकवन्दनाकायोत्सर्गरूप—द्वितीयदण्डके यच्चैत्ये चैत्यवन्दना कर्त्तव्याऽस्ति, तच्चैत्यस्थितस्था-पनाजिनवन्दना, अधिकृत—जिनस्य प्रथमः कायोत्सर्गस्तथा तस्य स्तुतिः कथिताऽस्ति, एत-द्रूपतृतीयाधिकार—दर्शनानन्तरमथ वर्त्तमानाऽवसर्पिण्याश्चतुर्विंशते भगवतां नाम्नः स्तुतिरस्त्यतः, एत'लोगस्से'त्यस्य द्वितीयनामरूपनामस्तवरूप—तृतीयदंडकस्य तथा लोगस्सेति सूत्रमध्ये वर्त्तमाना-ऽवसर्पिण्यां जातत्वेन चतुर्विंशतेस्तीर्थंकराणां नाम्नां स्तुतिरस्ति,

अतः 'नामतीर्थंकरस्य' वन्दनारूप—चतुर्थाधिकारदर्शनेऽवतरणिकामर्पयति शास्त्रकारः—

**पुनरत्रान्तरेऽस्मिन्नेवावसर्प्पिणीकाले ये भारते तीर्थकृत-स्तेषामेवैकक्षेत्रनिवासादिनाऽऽसन्नतरोपकारित्वेन कोर्त्तनाय चतु-र्विंशतिस्तवं पठति पठन्ति वा, स चायम्—**

**"लोगस्स उज्जोअगरे, धम्मतित्थयरे जिणे।**
**अरिहंते कित्तइस्सं, चउवीसंपि केवली ॥१॥"**

**अस्य व्याख्या—लोकस्योद्द्योतकरानित्यत्र विज्ञानाद्वैतव्यु-दासेनोद्द्योत्योद्द्योतकयोर्भेदसंदर्शनार्थं भेदेनोपन्यासः, लोक्यत इति लोकः, लोक्यते प्रमाणेन दृश्यत इतिभावः, अयं चेह तावत्पञ्चास्तिकायात्मको गृह्यते, तस्य लोकस्य किम्? उद्द्योत-करणशीला उद्द्योतकरास्तान्, केवलालोकेन तत्पूर्वकवचनदीपेन वा सर्वलोकप्रकाशकरणशीलानित्यर्थः, तथा दुर्गतौ प्रपतन्तमा-त्मानं धारयतीति धर्म्मः, उक्तं च—**

**"दुर्गतिप्रसृताञ्जीवान्, यस्माद्धारयते ततः।**
**धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म्म इति स्मृतः ॥१॥ इत्यादि"**

तथा तीर्यतेऽनेनेति तीर्थं, धर्म्म एव धर्म्मप्रधानं वा तीर्थं धर्म्मतीर्थं, तत्करणशीला धर्म्मतीर्थकरास्तान्, तथा रागादिजेतारो जिनास्तान्, तथाऽशोकाद्यष्टप्रातिहार्यादिरूपां पूजामर्हन्तीत्य-र्हन्तस्तानर्हतः, "कीर्त्तयिष्यामि" इति, स्वनामभिः स्तोष्ये इत्यर्थः, "चतुर्विंशतिमिति" सङ्ख्या, अपिशब्दो भावतस्तदन्यसमुच्चयार्थ इति, केवलज्ञानमेषां विद्यत इति केवलिनस्तान् केवलिनः।

अत्राह–लोकस्योद्द्योतकरानित्येतावदेव साधु, धर्म्मतीर्थ-करानिति न वाच्यं, गतार्थत्वात्, तथाहि–ये लोकस्योद्द्योत-करास्ते धर्म्मतीर्थकरा एवेति, अत्रोच्यते, इह लोकैकदेशेऽपि ग्रामैकदेशे ग्रामवल्लोकशब्दप्रवृत्तेः मा भूतदुद्द्योतकरेष्ववधिविभङ्ग-ज्ञानिष्वर्कचन्द्रादिषु वा सम्प्रत्यय इत्यतस्तद्व्यवच्छेदार्थं धर्म्म-तीर्थकरानिति। आह–यद्येवं धर्म्मतीर्थकरानित्येतावदेवास्तु लोक-स्योद्योतकरानिति न वाच्यमिति, अत्रोच्यते,

पं०...."भावतस्तदन्यसमुच्चयार्थ इति" भावतो–नामस्थापनाद्रव्यार्हत्परिहारेण शुभाध्य-वसायतो वा तदन्येषां–ऋषभादिचतुर्विंशतिव्यतिरिक्तानां ऐरवतमहाविदेहजानामर्हतां सङ्ग्रहार्थः, तदुक्तं–"अविसद्दग्गहणा पुण एरवयमहाविदेहे य"

टी०...अथ लोगस्ससूत्रस्यावतरणिका–

पुनरत्रान्तरे–किश्चास्मिन् प्रस्तावे (चैत्यवंदनप्रस्तावे) अस्मिन्नेवावसर्पिणीकाले–वर्त्तमानावसर्प्पिणी–तृतीयचतुर्थारकरूपे काले भारते–भरतवर्षे (क्षेत्रे) ये तीर्थकरास्तेषामेवैक-क्षेत्रनिवासादिनाऽऽसन्नतर–अत्यन्तसमीपोपकारित्वेन कीर्तनाय (यशोगानाय–गुणगानाय) चतु-र्विंशतिस्तवं पठति, पठन्ति वा,

(चतुर्विंशतिस्तवः=चतुर्विंशतेर्जिनानां नाम गृहीत्वा स्तुति–नमिस्तुतिर्भवति, अतो गुणनिष्पन्नं नाम (गौणं) नाम समुच्यते, 'लोगस्सेति नाम सूत्रादित्वेनादानं नामोच्यते.)

एकोवाऽनेके वा पठति. पठन्ति च स चायम्–

" लोगस्स उज्जोयगरे, धम्मतित्थयरे जिणे । अरिहंते कित्तइस्सं, चउवीसंपि केवलि ॥ १ ॥
(लोकस्योद्द्योतकरान्, धर्मतीर्थकरान् जिनान् । अर्हतः कीर्तयिष्यामि, चतुर्विंशति केवलिनः॥ १ ॥)

अस्य–चतुर्विंशतिस्तवस्य व्याख्या–

"लोकस्योद्द्योतकरानित्यत्र, ( लोकस्येत्यत्रासमस्त–षष्ठीविभक्तेर्भावार्थः–षष्ठीविभक्तिर्मुख्यत्वेनोपपदविभक्तिरस्ति, षष्ठीविभक्तेः सम्बन्धोऽन्येन नाम्ना सहाऽस्ति, अर्थस्य दृष्ट्या पश्चादागच्छन्नाम्नो विशेषणं यथाऽस्ति तथा, दा. त. ' ग्रामस्योद्योगाः ' ग्रामोद्योगाः इति रीत्या षष्ठीविभक्तेरर्थो विशेषणवद् भवति, ततः केचित् षष्ठीविभक्ति विशेषणविभक्तित्वेन कथयन्ति, अर्थाद् विशेषणस्य भेदत्वेन विवक्षायामेव विशेषणस्य षष्ठीविभक्तिर्भवति, अभेदविवक्षायां नहि, तथाऽत्रापि विषयिज्ञानेन विषयभूतलोकस्य भेदविवक्षाऽस्ति, एवं लोकशब्दस्था षष्ठीविभक्तिः कथयति )

एवं याऽसमस्तत्वेन लोकशब्दतः षष्ठीविभक्तिकरणपूर्विका वाक्यरचना कृताऽस्ति, तत्र हार्दमेवमस्ति "विज्ञानाद्वैतव्युदासेनोद्द्योत्योद्द्योतकयो र्भेदसन्दर्शनार्थं भेदेनोपन्यासः" ये विज्ञानाद्वैतवादिनो जगतः केवलविज्ञानरूपत्वं मन्यन्ते, तन्मतखण्डनद्वारा–

विज्ञानाद्वैतवादिनो योगाचार–विशेषस्य विज्ञानवादिनो. बौद्धास्तु विज्ञानं द्विविधम् प्रवृत्तिविज्ञानम् आलयविज्ञानं च । तमाद्यं अयं घटः इत्याकारकम् । द्वितीयं चाहं जानामि इत्याकारकं । तदेवात्मा इत्युच्यते, इति वदन्ति । बौद्धस्य मतमस्ति यद् ग्राह्यग्राहकादिना रहितस्य 'विज्ञानमात्रस्य' परमार्थतः सत्यताऽस्ति, यतो बाह्यपदार्थानामभावो वर्त्तते, ज्ञानं कारणं किञ्चिद् बाह्यपदार्थरूपं नास्ति, अर्थाद् विज्ञानं विमुच्य बाह्यः पदार्थः किञ्चिद् वस्तु नास्ति, वस्तुतस्तु समस्तो भावः, स्वप्नवन्मायावद् गन्धर्वनगरवद्–असद्रूपोऽस्ति, तस्मात् परमार्थसत्यतः स्वयं प्रकाशकं विज्ञानमेव सत्यमस्ति सर्वमेतद् दृश्यमानं जगद् विज्ञानपरिणामरूपं–विज्ञानमयमस्ति, सर्वे पदार्था निःस्वभावाः) उद्द्योत्यं–प्रकाश्यं (प्रमेयज्ञेयवस्तु) चोद्द्योतकश्च (प्रकाशकं–प्रमाणं–ज्ञानं) उद्द्योत्योद्द्योतकयो र्भेदसन्दर्शनार्थं भेदेनोपन्यासः (वाक्यरचनारूपः)

लोकशब्दव्याख्या=लोक्यते लोकः (दृश्य पदार्थः) लोक्यते केवलज्ञानदर्शन–प्रमाणेन दृश्यते इति भावः (प्रमाणेन प्रमाणित–दृश्य–ज्ञेय–पदार्थः) स्वपरनिर्णायकज्ञानप्रमाणेन सम्यगर्थनिर्णयप्रमाणेन प्रत्यक्षपरोक्षरूपभेदद्वयवता प्रमाणेन प्रमेय–विषयलोकः,

" अयं चेह तावत्पञ्चास्तिकायात्मको गृह्यते " अत्रायं लोकः पञ्चास्तिकायात्मको गृह्यते.

(चेतनालक्षणो जीवः, संख्यादृष्ट्याऽनन्ताः, असंख्यातप्रदेशात्मकाः (१) रूपिणः पुद्गलाः, संख्यातासंख्यातानन्त–प्रदेशात्मका अनेके (२) सहजत्वेन गति–परिणाम–प्राप्त-जीवपुद्गलयोर्गतौ, (३) अपेक्षाकारणं धर्मास्तिकायः असंख्यातप्रदेशात्मक एकः । सहजत्वेन स्थितिं कुर्वतो जीवपुद्गलयोः स्थितिसहायको द्रव्यविशेषोऽधर्मास्तिकायोऽसंख्यातप्रदेशात्मक एकः । दुग्ध–शर्करावत्, अयोगोलकाऽग्निवत्, अवकाशं ददाति तथा अवगाहकपदार्थानाम-वकाशदमाकाशं, असंख्यातप्रदेशात्मकं लोकाकाशं (अनन्तप्रदेशात्मकमलोकाकाशम् एकं) तस्य लोकस्य किम् ? इति प्रश्ने 'उद्द्योतकरणशीलाः'

(१) उद्द्योतकरास्तान्, केवलालोकेन तत्पूर्वकवचनदीपेन वा सर्वलोकप्रकाशकरा-नित्यर्थः । अर्थात् केवलालोकेनेति स्वप्रकाशकं ज्ञानं, द्योतित केवलज्ञानरूपप्रकाशपूर्वक–वचनदीपेनेति (स्वपरप्रकाशकज्ञानद्वारा वचनरूपश्रुतेन–देशनादिना गणधरादीनामग्रे परप्रका-शकाः) स्वपर सर्वलोक प्रकाशकरान् लोकस्योद्द्योतकरान् अर्हतः (विशेष्यपदम्) कीर्तयिष्यामि–स्तोष्ये (क्रियापदम्) इति प्रथमं विशेषणपदम् ।

(२) धर्मतीर्थकरान्=तथा लोकस्योद्द्योतकरा अर्हन्तस्तथा धर्मतीर्थकरा अर्हन्तो भवन्त्यतः 'धर्मतीर्थकरान् अर्हतः कीर्तयिष्यामि दुर्गतौ प्रपन्तमात्मानं धारयतीति 'धर्मः, उक्तं च–"दुर्गतिप्रसृताञ्जीवान् यस्माद् धारयते ततः । धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्मृतः ॥ इत्यादि" अर्थाद् 'धृ' 'धा'रूपोभयधात्वोर्ग्रहणात्प्रथमं धारणं कृत्वा पश्चाद् शुभस्थाने स्थापनमिति धर्मशब्दस्य व्युत्पत्तिगम्योऽर्थः, क्रोधादिकाषायिकभावांस्तथा हिंसादि दुष्कृत्यानि परावृत्य क्षमादित्वाहिंसादिरूपधर्मसेवनेन क्षमादि–दयादिरूपविविधधर्मस्य दुर्गति–कारणाधर्मरूपकषायादिभाव–हिंसादि दुष्कृत्यरूपनिषेध्यनिषेधरूपधर्मद्वारा, दुर्गतिकारणतो निवृत्तितः सद्गतिकारण–निष्पत्तितः–धर्मतो जीवाःसद्गतिं प्रति गच्छन्ति, तत्र तिष्ठन्ति, दुर्गतिं प्रति न गच्छन्ति, अतःशुभभावाः कर्त्तव्याःशुभकार्याणि ज्ञात्वा कार्याणि, सद्गतिमिच्छता सन्मतिः स्पृहणीया, सत्कृतिः करणीयेति.

धर्मतीर्थ=तथा तीर्यतेऽनेनेति तीर्थं, धर्म एव धर्मप्रधानं वा तीर्थं धर्मतीर्थं, तत्करणशीला धर्मतीर्थकरास्तान् अर्थात् तरणकारणं तीर्थं धर्मएव तीर्थं–श्रमणश्रावकधर्मः (श्रुतचारित्रधर्मः) संसारसागरतारणकारणत्वेन तीर्थमथवा धर्मप्रधानं–सङ्घादि, वस्तु वा धर्मेण प्रधानः–चतुर्विधः श्रमणप्रधानसङ्घस्तं अथवा धर्मप्रधानं–चतुर्विधसंघं तीर्थं कथयन्ति जिनाः, अतो धर्मप्रधान-

त्वेन प्रवचनाधिकरणं तीर्थमुच्यत एव) धर्माधारः—प्रवचनधारःचतुर्वर्णःसंघः 'न धर्मो धार्मिकै विना, यं तीर्थं कथयन्ति पावनतयेत्यभियुक्तोक्तेः' यथा घृतमानयेत्युक्ते घृतं साक्षान्नानीयते, घृतपात्रे घृतमानीयते, तथैव धर्म इत्युक्ते श्रमणश्रावकयोर्धर्माधारतयैवा—भिन्नत्वेन धर्म-धर्मिणोरभेदात् धर्मिधर्मप्रधानौ तीर्थत्वेन भण्येते, अर्थात्प्रवचनप्रवचनाधारचतुर्विधसंघरूप—धर्मतीर्थकरणशीला धर्मतीर्थकरास्तान, अर्हतःकीर्तयिष्यामीति, अर्हतो द्वितीयविशेषणम् ।

(३) 'जिनान्' तथा रागादिजेतारो जिनास्तान्, पूर्वोक्त विशेषणत्रयं यथा, तथा 'रागद्वेषमोहरूपभावशत्रूणां' (आत्मगुणघातिकर्मादिशत्रूणां) मिथो जन्यजनकभावेन स्थितानां रागादिकर्मादिशत्रूणां मूलतः सर्वथा विजेतारः—विजयकर्त्तारो जिनास्तान् अर्हतःकीर्तयिष्यामीति तृतीयविशेषणम् ।

(४) तथाऽशोकाद्यष्टप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तस्तानर्हतः, अशोकप्रभृत्यष्टप्रातिहार्यादिरूपां विशिष्टपूजामर्हन्तीत्यर्हन्तः विशिष्टपूजाया योग्यत्वेनार्थेन विशेषणमप्यत्र विशेष्यवाचकं पदं ज्ञेयम्,

"चिह्नैर्व्यक्ते भवेद्व्यक्ते जातिशब्दोऽपि वाचकः" अ.चि., चिह्नै विशेषणै व्यक्तेः निःसंदेहै जात्यभिधायकोऽपि शब्दो व्यक्ते वाचको भवेत् व्यक्तेर्नामतां यातीत्यर्थः, लोकोद्द्योतकरादिभिःविशेषणैः, अर्हत्त्वजात्यभिधायकोऽर्हच्छब्दो ऋषभादिव्यक्ते वाचका भवेत्)

(५) केवलिनः=केवलज्ञानमेषां विद्यते इति केवलिनस्तान्—अर्हतःकीर्तयिष्यामि, 'कीर्तयिष्यामि' इति स्वनामभिः—क्रमशःऋषभादिनामानि गृहीत्वा स्तोष्ये—तानर्हतः स्तुतिविषयीकरिष्येऽहम् इत्यर्थः । अत्रेदं स्मरणीयम्,

(१) अर्हत इति विशेष्यवाचकं पदम्,
(२) कीर्तियिष्यामीति क्रियावाचकं पदम्,
(३) लोकस्योद्द्योतकरानिति प्रथमं विशेषणपदम् यद् वचनातिशयदर्शकं,
(४) 'धर्मतीर्थकरानिति' द्वितीयं विशेषणपदम् यत् पूजातिशयद्योतकं वर्त्तते,
(५) 'जिनानि' ति तृतीयं विशेषणपदं, यदपायागमातिशयसूचकं विद्यते,
(६) 'केवलिनः' इति चतुर्थं विशेषणपदं, यज्ज्ञानातिशयज्ञापकं ज्ञायते,
(७) 'चतुर्विंशति' इति संख्यावाचकं विशेषणपदम्,

(८) 'अपि' इति अव्ययपदं वर्तमानचतुर्विंशतिगतान् ऋषभादीनमर्हताऽर्हतो नामानि गृहीत्वाऽहं स्तोष्ये, 'भावतस्तदन्यसमुच्चयार्थोऽपि शब्दः' अर्थाद् भरतवर्षभिन्नान्यक्षेत्रवर्तिनोऽन्यान् तीर्थङ्करान् नामानि दत्त्वा स्तोतुमशक्यत्वादपिशब्दद्वारा मनसि कृत्वा भावतः "भावतस्तदन्यसमुच्चयार्थ इति" भावतो—नामस्थापना—द्रव्यार्हत्परिहारेण, शुभाध्यवसायतो वा तदन्येषां, ऋषभादिव्यतिरिक्तानां ऐरवतमहाविदेहजानामर्हतां सङ्ग्रहार्थः, तदुक्तं—"अविसद्दगहणा पुण एरवयमहाविदेहे य" अन्यक्षेत्रवर्तिनोऽथवा कालत्रयवर्तिनः सर्वानर्हतः भावतः स्तोष्ये इत्यर्थः,

**—एतानि पञ्च पदानि विवेच्य, अथ प्रत्येकविशेषणोपन्यासस्य सार्थक्यचर्चा—**

अत्राह **वादी—शङ्का**=लोकस्योद्द्योतकरानित्येतावदेव साधु धर्मतीर्थकरानिति न वाच्यं, गतार्थत्वात्, तथाहि ये लोकस्योद्द्योतकरास्ते धर्मतीर्थकरा एवेति, अर्थात् प्रथमविशेषणं 'लोकस्योद्द्योतकरान्' एतावदेव साधु (निर्दोषं—व्यभिचाररहितं) 'धर्मतीर्थकरानि' ति द्वितीयं विशेषणं वक्तुं नार्हति. द्वितीयविशेषणस्यार्थोभावः प्रथमविशेषणेऽन्तर्गत एवेति. तथाहि ये लोकस्योद्द्योतकरास्ते धर्मतीर्थकरा एवेति. अर्था'ल्लोकस्योद्द्योतकरा' इत्येवं कथनेन 'धर्मतीर्थकरा' अर्हन्त एव भवन्तीति सम्यक्तया ज्ञायत एव यदि ये लोकोद्द्योतकरा भवेयुश्च धर्मतीर्थकरा न भवेयुस्तदा तेषु विशेषणमिदं व्यभिचरितं स्यात्तदा तद् व्यभिचारव्यवच्छेदाय 'धर्मतीर्थकरा' इति विशेषणं सफलं भवेत्, एतादृशं त्वत्र नास्त्येव किं न ?

**समाधानं**—अत्रोच्यते=इह लोकैकदेशेऽपि ग्रामैकदेशे ग्रामवल्लोकशब्दप्रवृत्ते र्मा भूत्तदुद्द्योतकरेष्ववधि—विभङ्गज्ञानिष्वर्क—चन्द्रादिषु वा सम्प्रत्यय इत्यतस्तद् व्यवच्छेदार्थं 'धर्मतीर्थकरा' निति अर्थाद् इह—लोकोद्द्योतकरविशेषणव्याख्याने तु ग्रामस्यैकभागे—अमुकस्थले यथा ग्रामशब्दस्य व्यवहारोऽनुभूयते, तथा पञ्चास्तिकायात्मकलोकशब्दस्य प्रवृत्ति—व्यवहारेण लोकस्यैक--अमुकभागे (स्थले) प्रकाशकरा अवधिविभङ्गज्ञानिषु (अवधिज्ञानावरणीयकर्मणः क्षयोपशमादिहेतूनां सद्भावे, आत्मनो यो रूपिपदार्थविषयक—साक्षात्कार (प्रत्यक्ष) बोधः, अवधिज्ञानं कथ्यतेऽथवा केवलरूपिपदार्थविषयकसाक्षात्कारे साधनभूतात्मनो व्यापारविशेषः, 'अवधिज्ञानं' किञ्च मिथ्यादृष्टेरवधिज्ञानं, भङ्गाः—विकल्पाः, विरुद्धविकल्पा—विभङ्गा यत्र भवन्ति तद् विभङ्गज्ञानं, अथवा अवधिज्ञानस्य विपरीतो भेदः 'विभङ्गज्ञानं कथ्यते.)

अथवाऽर्कचन्द्रादिषु यत् किञ्चिद् (द्रव्यभाव) उद्द्योतकरत्वेन सर्वलोकोद्द्योतकरस्याऽर्हतः सम्प्रत्ययः (विश्वासः) स्यादित्यतस्तद् व्यवच्छेदार्थं धर्मतीर्थकरानिति किञ्चित्किञ्चिदुद्द्योतकरा धर्मतीर्थकरा न भवन्ति, अवधिविभङ्गज्ञानि—आदि—निष्ठ व्यभिचारवारणाय 'धर्मतीर्थकरा' इति विशेषणं सार्थकमिति.

शङ्का=यद्येवं तर्हि 'धर्मतीर्थकरानि'त्येतावदेवास्तु 'लोकस्योद्द्योतकरानि'ति न वाच्यम्, यतो धर्मतीर्थकरा, लोकस्योद्द्योतकरा एव धर्मतीर्थकरेषु लोकस्योद्द्योतकरत्वस्य भावोऽर्थो वा गत एवातः 'धर्मतीर्थकरा' इति विशेषणमस्तु, अन्यविशेषणानि निष्प्रयोजनानि कथं न?

इह लोके येऽपि नद्यादिविषमस्थानेषु मुधिकया धर्म्मार्थिभवतरणतीर्थकरणशीलास्तेऽपि धर्मतीर्थकरा एवोच्यन्ते, तन्मा भूदतिमुग्धबुद्धीनां तेषु सम्प्रत्यय इति तदपनोदाय लोकस्योद्द्योतकरानप्याहेति । अपरस्त्वाह–जिनानित्यतिरिच्यते, तथाहि–यथोक्तप्रकारा जिना एव भवन्तीति, अत्रोच्यते, मा भूत्कुनयमतानुसारिपरिकल्पितेषु यथोक्तप्रकारेषु सम्प्रत्यय इत्यतस्तदपोहायाह–जिनानिति, श्रूयते च कुनयदर्शने–

"ज्ञानिनो धर्म्मतीर्थस्य, कर्त्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥१॥" इत्यादि,

तन्नूनं ते न रागादिजेतार इति, अन्यथा कुतो निकारतः पुनरिह भवाङ्कुरप्रभवो ? बीजाभावात्, तथा चान्यैरप्युक्तम्–

"अज्ञानपांशुपिहितं, पुरातनं कर्म्मबीजमविनाशि ।
तृष्णाजलाभिषिक्तं, मुञ्चति जन्माङ्कुरं जन्तोः ॥ १ ॥

तथा–दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः ।
कर्म्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥२॥ इत्यादि,

आह—यद्येवं जिनानित्येतावदेवास्तु लोकस्योद्द्योतकरानित्याद्यतिरिच्यते, अत्रोच्यते, इह प्रवचने सामान्यतो विशिष्टश्रुतधरादयोऽपि जिना एवोच्यन्ते, तद्यथा–श्रुतजिनाः अवधिजिनाः

मनःपर्यायजिनाःछद्मस्थवीतरागाश्च, तन्मा भूत्तेष्वेव सम्प्रत्यय इति तद्व्युदासार्थं लोकस्योद्द्योतकरानित्याद्यप्यदुष्टमिति, अपरस्त्वाह—अर्हत इति न वाच्यं, न ह्यनन्तरोदितस्वरूपा अर्हद्व्यतिरेकेणापरे भवन्तीति, अत्रोच्यते, अर्हतामेव विशेष्यत्वान्न दोष इति। आह–यद्येवं हन्त तर्ह्यर्हत इत्येतावदेवास्तु लोकस्योद्द्योतकरानित्यादि पुनरपार्थकं, न, तस्य नामाद्यनेकभेदत्वात् भावार्हत्संग्रहार्थत्वादिति, अपरस्त्वाह–केवलिन इति न वाच्यं, यथोदाहृततत्स्वरूपाणां अर्हतां केवलित्वे अव्यभिचारित्वात्, सति च व्यभिचारसम्भवे विशेषणोपादानसाफल्यात्, तथा च सम्भवे व्यभिचारस्य विशेषणमर्थवद्भवति, यथा नीलोत्पलमिति, व्यभिचाराभावे तु तदुपादीयमानमपि यथा कृष्णो भ्रमरः शुक्लो बलाहक इत्यादि, ऋते प्रयासात्कमर्थं पुष्णातीति, तस्मात्केवलिन इत्यतिरिच्यते, न, अभिप्रायापरिज्ञानात्, इह केवलिन एव यथोक्तस्वरूपा अर्हन्तो नान्ये इति नियमार्थत्वेन स्वरूपज्ञापनार्थमेवेदं विशेषणमित्यनवद्यं, न चैकान्ततो व्यभिचारसम्भवे एव विशेषणोपादानसाफल्यं, उभयपदव्यभिचारे एकपदव्यभिचारे स्वरूपज्ञापने शिष्टोक्तिषु तत्प्रयोगदर्शनात्, तत्र उभयपदव्यभिचारे यथा–नीलोत्पलमिति, तथैकपदव्यभिचारे यथा–अब्द्रव्यं पृथिवी द्रव्यमिति, तथा स्वरूपज्ञापने यथा–परमाणुरप्रदेश इत्यादि, यतश्चैवमतः केवलिन इति न दुष्टं, आह—यद्येवं केवलिन इत्येतावदेव सुन्दरं, शेषं तु लोकस्योद्द्योतकरानित्याद्यपि न वाच्यमिति, अत्रोच्यते, इह श्रुतकेवलिप्रभृतयो अन्येऽपि विद्यन्त एव केवलिनस्तन्मा भूत्तेष्वेव सम्प्रत्यय इति तत्प्रतिक्षेपार्थं लोकस्योद्-

द्योतकरानित्याद्यपि वाच्यमिति, एवं द्व्यादिसंयोगापेक्षयाऽपि विचित्रनयमताभिज्ञेन स्वधिया विशेषणसाफल्यं वाच्यमित्यलं विस्तरेण, गमनिकामात्रमेतदिति ।

टी०....समाधानं=अत्रोच्यते, इह लोके ये नद्यादिविषमस्थानेषु मुधिकया, धर्मार्थम-(भ)वतरणतीर्थकरणशीलास्तेऽपि धर्मतीर्थकरा एवोच्यन्ते, तन्माभूदतिमुग्धबुद्धीनां तेषु सम्प्रत्यय इति तदपनोदाय लोकस्योद्द्योतकरानप्याह । अर्थादिह नदीसरोवरादिविषम (कठिन-तम—सौकर्येणाऽवतरितुमशक्य) स्थानेषु मुधिकया—धर्मपुण्यबुद्ध्या स्वद्रव्यव्ययेन रचितत्वेनान्येषां मुधा, धर्मार्थं (अवतरन्त्यनेनाऽस्मिन् वाऽवतारः, नद्यादीनामवतरणमार्गः,तीर्थः) अवतरणतीर्थं (घट्ट—अवतार) करणशीलास्तेऽपि धर्मतीर्थकरा एवोच्यन्ते, (अथवा लौकिकदृष्ट्या भवतरणहेतु-तीर्थ—पवित्रस्थान—यात्रास्थानप्रभृतिरूपतीर्थकरणशीलास्तेऽपि धर्मतीर्थकरा एवोच्यन्ते.) तन्मा-भूदतिमोहमुग्धबुद्धीनां जीवानां, तेषु—इतराभिमतधर्मतीर्थकरेषु 'अर्हत्त्वसम्प्रत्यय' इति, तत्रार्हत्त्वविषयकमिथ्यासम्प्रत्ययाऽपनोदाय 'लोकस्योद्द्योतकरा' नप्याह (अत्र पूर्वकथितेतराभि-मतधर्मतीर्थकरेषु धर्मतीर्थकरत्वं बुद्धिः स्यादपि तत्र 'लोकस्योद्द्योत—करत्वं' नास्त्येवातोऽत्यन्त-मुग्धबुद्धिजनस्याप्यर्हत्त्वबुद्धि र्न भवेत्)

शङ्का=लोकोद्द्योतकरत्वधर्मतीर्थकरत्वविशिष्टानर्हतोऽहं कीर्तयिष्यामीत्येवास्तु 'जिनानि' ति विशेषणपदं निरर्थकमधिकं किमर्थं कथ्यते ? यतःपूर्वोक्त—लोकोद्द्योतकरत्व—धर्मतीर्थकरत्वरूप—विशेषणद्वय—विशिष्टा ये, ते जिना एव भवन्ति नान्ये, अतोऽतिरिक्तं 'जिनानि' ति पदं वर्त्तते व्यावर्त्तकत्वेनेदं सफलं नैव, कथं सफलं स्यात् ?

समाधानम्=अत्रोच्यते. माऽभूत् कुनयमतानुसारिपरिकल्पितेषु यथोक्तप्रकारेषु सम्प्रत्यय-इत्यतस्तदपोहाय-'जिनानि' ति श्रूयते च कुनयदर्शने—

"ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥ १ ॥" इत्यादि,

तन्नूनं ते न रागादिजेतारः (जिनाः) इति, अन्यथा कुतो निकारतः पुनरिह भवाङ्कुरप्रभवो ? बीजाभावात्, तथाचान्यैरप्युक्तम्—

"अज्ञानपांशुपिहितं, पुरातनं कर्म बीजमविनाशि ।
तृष्णाजलाभिषिक्तं, मुञ्चति जन्मान्तरं जन्तोः ॥ १ ॥ तथा

दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाऽङ्कुरः ।
कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥ २ ॥" इत्यादि,

अर्थाद् 'जिनानि' ति, अर्हतो विशेषणपदं व्यावर्त्तकं वर्तते,

(विद्यमानं सद्व्यावर्त्तकं विशेषणं, यत् साधारण्येन प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य, एकस्मिन् प्रकारे व्यवस्थापयति तद् विशेषणं' । संस्कृतवैयाकरणा हि विशेषणं त्रिधा वदन्ति (१) व्यावर्त्तकं (२) विधेयं (३) हेतुगर्भं,

व्यावर्त्तकं—भेदकं यथा 'पीतं वस्त्रं' इत्यत्र 'पीतं' विशेषणं व्यावर्त्तकं, यत इदं वस्त्रं, अन्यजातीयवस्त्राणि व्यावर्त्तयति विशेषणस्यैव मुख्यो धर्मः, तथा कस्यचिद् विधानं तद् विधेयं विशेषणं यथा—एतत् पुस्तकं सुन्दरं, अत्र 'सुन्दरं' इदं विधेयं विशेषणम् । यत्र हेतोरर्थो गर्भितोऽस्ति, तद् 'हेतुगर्भं' विशेषणं, यथा 'मद्यपः पुरुषो मार्गे पतति' मद्यपानकारकत्वेन हेतुना पततीत्यत्र हेतुगर्भं विशेषणं, काव्ये तु साभिप्रायविशेषणेन चमत्कारिणा 'परिकरालङ्कारो' भवति ।

अर्थात् कुनय कुदर्शनमतानुसारि—परिकल्पितेषु लोकस्योद्योतकरत्वधर्मतीर्थकरत्व प्रकारेषु, अर्हत्त्व–सम्प्रत्ययो माऽभूदित्यस्तदपनोदायाह 'जिनानि' ति विशेषणं भेदकमस्ति, तथा च "धर्मतीर्थकरा ज्ञानिनः परमं पदं गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥ १ ॥" इत्यादि

('तथा चाहुराजीवकनयानुसारिणः' स्याद्वादमञ्जरी. अन्य. यो. व्य. श्लो. १) धर्मतीर्थकरा ज्ञानिनोऽपि प्राप्य परमं पदं स्वशासननिकारतःभवे पुनरावृत्तिकराः, भवबीजाङ्कुरजननरागाद्यशत्रु—विजेतारः (जिनाः) न सन्ति ।

अन्वयः=भवबीजजनकानां रागादीनां सत्त्वे भवरूपाङ्कुरसत्ता, व्यतिरेकः=रागादिरूपबीजाऽभावे भवाङ्कुराभावः, एवं चान्वयव्यतिरेकाभ्यां रागादिभवरूपकार्यकारणभावः, अर्थात् संसाररूपाङ्कुरकार्यं प्रति रागादिरूपबीजं कारणं ज्ञेयम् । अन्यैरप्युक्तम्—

अज्ञानपांशुपिहितं पुरातनं कर्म्मबीजमविनाशि ।
तृष्णाजलाभिषिक्तं मुञ्चति जन्माङ्कुरं जन्तोः ॥ १ ॥ तथा—
"दग्धे बीजे यथाऽऽत्यन्तं प्रादुर्भवति नाऽङ्कुरः,
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः ॥ २ ॥" इत्यादि

प्रथमश्लोके, कर्मबीजसत्त्वे जन्मकार्यस्य सत्तारूपोऽन्वयः, द्वितीयश्लोके रागादिरूपबीजे दग्धेऽत्यन्तं भवाङ्कुराभावः, इति व्यतिरेकः ।

अर्थादर्हत्त्वाभाववति पुरुषे, अन्यदर्शनाभिमतज्ञानिनि (लोकोद्द्योतकरत्वधर्मतीर्थकरत्वरूप-विशेषण—द्वये सति कश्चिन्मुग्धः, तस्मिन्नर्हत्त्वबुद्धिं मा कुर्यात् इति अन्यदर्शनि—कल्पिता आप्तपुरुषा अर्हन्तो न सन्तीति दर्शनार्थेऽथवा अन्यदर्शनिकल्पिताप्तपुरुषव्यवच्छेदाय 'जिनानि' ति अर्हतो विशेषणं सार्थकम्।

सारांशः=‘अन्यमतिकल्पित—मुक्तजीवः पुनः सकारणं संसारी भवति' ततःतस्मिन् रागादि (संसारबीज) जेतृत्वरूपजिनत्वाभावोऽस्त्यतः 'जिनानि' ति विशेषणं, अन्यदर्शनकल्पिताप्तत्वस्य व्यावर्त्तकत्वेन सफलमस्ति.

**शङ्का**=रागादिविजेतृत्वरूपजिनत्व—विशिष्टान् जिनान् 'अर्हतः' कीर्तयिष्याम्येतदेव वाच्यम्, 'लोकस्योद्द्योतकरत्व—धर्मतीर्थकरत्वरूपं विशेषणद्वयं अतिरिच्यते यतो ये जिनास्ते लोकोद्द्योतकराश्च धर्मतीर्थकरा नियतं किं न भवन्त्येव ?

**समाधानम्**=इह प्रवचने—जैनशासनेऽस्मिन्, सामान्यतो विशिष्टश्रुतधरादयोऽपि जिना एवोच्यन्ते, तद्यथा श्रुतजिनाः (श्रुतकेवलिनः) अवधिजिनाः, मनःपर्यायजिनाः, छद्मस्थवीतरागाश्च, (छद्मस्थवीतरागाश्च—उपशान्तमोहक्षीणमोहनामकैकादशद्वादशगुणस्थानस्था आत्मानः)

(जिनेशाः—इत्यत्र, रागद्वेषमोहानां जेतारः—चतुर्थगुणस्थानकादारभ्य यावद् द्वादशगुण-स्थानपर्यन्तवर्तिन आत्मानः, तेषामीशाः, ते एव सर्वज्ञ—देवाः कथ्यन्ते, ये रागद्वेषमोहाः सर्वांशेन जिता न, ते सर्वज्ञदेवा अपि न, अल्पांशेनाऽपि च जिता न, ते जिना अपि न, सर्वांशेन रागादिजेतारः, त्रयोदशचतुर्दशगुणस्थाने स्थिताः श्रीसर्वज्ञदेवाः सन्ति चाल्पाऽधिकांशेन जेतारःचतुर्थादारभ्य यावद् द्वादशगुणस्थानवर्त्तिन आत्मानःसन्ति, ते च जिनपदेन व्यपदेश्याः सन्ति, यद्यपि क्षीणमोहनामक—द्वादशगुणस्थानके स्थिता महात्मानो रागद्वेषमोहानां सर्वथा क्षयकारिणो भवन्ति तथापि, तेषामद्यापि केवलिनो भवितुं। स्वल्पकालस्यान्तरमस्ति, ततस्तेषां कृतेऽपि सर्वज्ञदेवस्य व्यपदेशो न भवति परन्तु 'जिने' ति पदेन ते व्यपदिश्यन्ते,

अत्रेदं बोध्यं=त्रयोदशचतुर्दशगुणस्थाने स्थिता आत्मानो द्विधा (१) सामान्यकेवलिनः (२) तीर्थङ्करदेवात्मानः यद्यपि सामान्यकेवलिनो महर्षयोऽपि सर्वांशेन रागादिविजेतारःसन्ति. ततश्चतुर्थाद्यन्यगुणस्थानस्थानामवध्यादि—जिनानामीशाः—स्वामिनो भवितुं योग्याः सन्ति, तथापि ते, श्री तीर्थङ्करनामकर्मनामक—महापुण्य—प्रकृतेः स्वामिनो न सन्त्यतः, श्री तीर्थङ्करदेवात्मा-पेक्षया 'सामान्यजिनाः' एव कथ्यन्ते च तीर्थङ्करदेवात्मानःसामान्यजिनानामपीशाः कथ्यन्ते, श्री जिनेश्वरपदं श्री तीर्थङ्करदेवात्मनां कृते रूढमस्ति.)

'तन्माऽभूत् तेष्वेव सम्प्रत्ययः' अर्थाल्लोकोद्द्योतकरत्वधर्मतीर्थकरत्वरूपं विशेषणद्वयं विमुच्य केवलं 'जिने' ति, एकं विशेषणं यदि दत्तं स्यात्तदा 'जिने' ति पदेन सामान्येन श्रुतजिनादिष्वेवाऽर्हत्त्वप्रतीतिः स्यादतः, तद्भ्रान्तिव्युदासार्थं 'लोकस्योद्द्योतकरानि' त्याद्युष्टमेवार्थाद् लोकोद्द्योतकरत्वधर्मतीर्थकरत्वविशेषणद्वय–निवेशेन 'श्रुतजिनादीनां' व्यवच्छेदः सुतरामेव, लोकस्योद्द्योतकरत्वादि–विशेषणद्वयं श्रुतजिनादीनां भेदकत्वेन सार्थकमेव.

**शङ्काः**='अर्हत इति न वाच्यं, नह्यनन्तरोदितस्वरूपा अर्हद्व्यतिरेकेणापरे भवन्ति किं ? अर्थाल्लोकोद्द्योतकर–धर्मतीर्थकर–जिनान् कीर्तयिष्यामीत्येतावदेवोच्यतां 'अर्हत इतिपदं न वाच्यम्' यतो लोकोद्द्योतकरत्व–धर्मतीर्थकरत्व–जिनत्वरूपस्वरूपा अर्हन्त एव भवन्ति नान्ये, तथाऽर्थापत्तितोऽर्हन्त एवाऽऽयान्ति तर्हि शब्दतो–अर्हत इति शब्दतःकथं कथयन्ति भवन्तः ? पूर्वोक्तविशेषणत्रयविशिष्टा अर्हद्भिन्ना अन्ये आत्मानो भवेयुस्तदा शब्दतोऽर्हत इति पदं वाच्यं कथं न भवेत् ?

**समाधानम्**=अत्रोच्यते, अर्हतामेव विशेष्यत्वान्न दोष इति. अर्थाद् यदि केवलं गुणानामेव (लोकोद्द्योतकरत्व–धर्मतीर्थकरत्व–जिनत्वादिगुणानामेव) मूल्यं प्रतिपन्नं स्यात्, तेषामधिकरणभूतानां गुणिव्यक्तीनां महत्त्वं प्रतिपन्नं न स्यात्तदा मिथ्यात्वादिदोषः प्रसज्येत, तद्दोषनिवारणाय, किञ्च गुणाधारभूतगुणिव्यक्तीनां महत्त्वं गुणतुल्यं कथं न ? गुणतुल्यमेवेति व्यक्तीकर्तुं 'अर्हत' इति विशेष्यपदं सार्थकमेव गुणगुणिनोरभेद–सम्बन्धोऽस्ति.

**शङ्का**=यद्येवं हन्त तर्ह्यर्हत इत्येतावदेवास्तु लोकस्योद्द्योतकरानित्यादि पुनरपार्थकं कथं न ?

**समाधानम्**=तस्य नामाद्यनेकभेदत्वाद् भावाऽर्हत्संग्रहार्थत्वादिति.

अर्थात्, अर्हन्तोऽपि नामादिरूपानेकभेदवन्तो भवन्ति,

("नामजिणा जिणनामा, ठवणजिणा पुण जिणंदपडिमाओ ।
दव्वजिणा जिणजीवा, भावजिणा समवसरणत्था ॥"

ऋषभदेवेत्यादीनि यानि नामानि, तानि 'नामजिना' इत्युच्यन्ते, पुनर्जिनेन्द्राणां प्रतिमाः (बिम्बानि) 'स्थापनाजिना' इत्युच्यन्ते, जिनानां जीवा 'द्रव्यजिना' उच्यन्ते, समवसरणस्था 'भावजिना' उच्यन्ते)

नामादिनानाभेदत्वात् भावाऽर्हतामेव संग्रहार्थं, संग्राह्योऽत्र भावाऽर्हन्नेव, नामाद्या अत्र व्यवच्छेद्याः कथ्यन्ते, लोकोद्द्योतकरत्व–धर्मतीर्थकरत्व–जिनत्वादीनि विशेषणानि नामा–

द्यर्हतां व्यावर्त्तकत्वेन सफलान्येव. यद्येतानि विशेषणानि न निविष्टानि तदा भावार्हद्‌भिन्न-नामाद्यर्हतामवश्यं ग्रहणं स्यात् केवलं भावाऽर्हद्‌ग्रहणायेमानि विशेषणानि विशेषोपयोगीन्येव ॥

**शङ्का**=अपरस्त्वाह–केवलिन इति न वाच्यं, यथोदाहृततत्स्वरूपाणां, अर्हतां केवलित्वे, अव्यभिचारित्वात्, सति च व्यभिचारसम्भवे विशेषणोपादानसाफल्यात्, तथा च सम्भवे व्यभिचारस्य (रे च) विशेषणमर्थवद् भवति. यथा नीलोत्पलमिति, व्यभिचाराभावे तु तदुपादीयमानमपि यथा कृष्णो भ्रमरः शुक्लो बलाहक इत्यादि ऋते प्रयासात्कमर्थं पुष्णातीति, तस्मात् केवलिन इत्यतिरिच्यते,

अर्थात्=लोकोद्‌द्योतकरत्व–धर्मतीर्थकरत्व–जिनत्वविशिष्टानर्हतोऽहं कीर्तयिष्यामीत्येतावदेवास्तु 'केवलिन' इति विशेषणं माऽस्तु । यतः पूर्वोक्तविशेषणत्रयविशिष्टानामर्हतां केवलित्वे व्यभिचाराभावो वर्त्तते, अविनाभावो वर्त्तते, पूर्वोक्तविशेषणत्रयी वर्त्तते तत्रावश्यं केवलित्वं वर्त्तत एव, पूर्वोक्तविशेषणत्रयवन्तः केवलिन एव भवन्ति. अत्र व्यभिचाराभावेन विशेषणं सफलम् ।

किञ्च–व्यभिचारसम्भवे सति विशेषणग्रहणसफलत्वं भवति, तथा च सम्भवे व्यभिचारे च विशेषणमर्थवद् भवति.

यथा नीलोत्पलमिति, ["सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्" यथा नीलो घट इत्यत्र घटस्य नीलता नीले घटे सम्भवति, पीतादिघटे व्यभिचरत्यतो घटस्य नील इति विशेषणमर्थवत्, "यत्र विशेष्ये विवक्षितविशेषणस्य न सम्भवो नापि सम्भवासम्भवरूपो व्यभिचारस्तत्र तद्विशेषणोपन्यासो व्यर्थत्वान्न कार्य इत्यर्थः" अत्र विशेष्ये विशेषणस्य सत्त्वं (विद्यमानत्वं) सम्भवः, व्यभिचारस्तु विशेष्याद्‌भिन्नव्यक्तिषु विशेषणस्यासत्त्वं (अविद्यमानत्वं)]

यथा नीलोत्पलमित्यत्र स्थले, उत्पलस्य नीलत्वं नीलोत्पले सम्भवति, तथा रक्तोत्पले व्यभिचरति–न संभवति, अर्थाद् रक्तोत्पलव्यावृत्तिरपि उत्पलस्य नीलत्वसिद्धिकारिका, संभव-व्यभिचारद्वारा विशेषणं सार्थकम् ।

व्यभिचाराभावे तु गृह्यमाणं विशेषणं यथा कृष्णो भ्रमरः, शुक्लो बलाहक इत्यादि विशेषणं क्लेशार्थकं कथं न?

अर्थाद् यथा 'कृष्णो भ्रमरः' इत्यादिस्थले विशेषणं निरर्थकमधिकं तथाऽत्रापि अर्हतः–केवलिनः इति विशेषणं निरर्थकं कथं न?

**समाधानम्**=नाधिकमिदं विशेषणं कथमिति चेद् अभिप्रायापरिज्ञानात्, इह केवलिन एव यथोक्तस्वरूपा अर्हन्तो नान्ये इति नियमार्थत्वेन स्वरूपज्ञापनार्थमेवेदं विशेषणमित्यनवद्यं,

न चैकान्ततो व्यभिचारसम्भवे एव विशेषणोपादानसाफल्यम्, उभयपदव्यभिचारे, एकपदव्यभिचारे, स्वरूपज्ञापने शिष्टोक्तिषु तत्प्रयोगदर्शनात्,

अर्थात्, अभिप्रायपरिज्ञानं चेत्थं–लोकस्योद्योतकरा–धर्मतीर्थकराः–जिनाः 'केवलिनः' एवाऽर्हन्तो नान्ये नाकेवलिनः, इति नियमार्थ–व्याप्त्यर्थ स्वरूप (अर्हत्स्वरूप) ज्ञापनार्थमिदं केवलिन इति विशेषणमस्त्यनवद्यम्,

किञ्चैकान्तेन (सर्वथा) व्यभिचारसम्भवे (अतिव्याप्तिआदिदोषसम्भवे) एव विशेषणग्रहणसाफल्यं न, यतः उभयपदव्यभिचारे, एकपदव्यभिचारे, स्वरूपज्ञापने शिष्टोक्तिषु तत्प्रयोगदर्शनात्,

(१) तत्रोभयपदव्यभिचारे यथा नीलोत्पलमिति, नीलमपि कमलं भवति, श्वेतमप्युत्पलं भवति, प्रस्तुते नीलत्वाविशेषे श्वेतमप्यागच्छेत्, अप्रस्तुते व्यभिचरणमतिक्रमणं जातमिति व्यभिचारवारणाय नीलं वाच्यं, एवं नीलं कमलं तु भवति च वस्त्रमपि भवेत्, तत उत्पलाकथनेनाप्रस्तुते वस्त्रे व्यभिचारो जातस्तद्वारणाय पदद्वयं वाच्यम्।

(विशेषणविशेष्ययोः सम्बन्धिशब्दत्वादेकतरोपादाने नैव द्वये लब्धे. द्वयोरुपादानं परस्परमुभयोर्व्यवच्छेद्यव्यवच्छेदकत्वे समासो यथा स्यादित्येवमर्थं। यथा नीलोत्पलमित्यत्र नीलशब्देन रक्तोत्पलादिकं व्यवच्छिद्यते। उत्पलशब्देन नीलपटादिकं व्यवच्छिद्यते इति)

अत्र नीलपदमितरव्यावर्त्तकं, उत्पलपदमपीतरव्यावर्त्तकं व्यभिचारद्वय–वारकम् विशेषणपदं। अत्रेतरव्यावृत्तिफलम्,

(२) तथैकपदव्यभिचारे यथा अब् द्रव्यं, पृथिवी द्रव्यम्, अत्रैकपदव्यभिचारवद् विशेषणपदप्रयोगवती, वाक्यरचना, यथा जलं द्रव्यं, पृथ्वी द्रव्यमत्र द्रव्यत्वरूपविशेषणेन गुणादिगतव्यभिचारो व्यवच्छिद्यते, अत एवैकपद–व्यभिचारो (अतिव्याप्तिः) दृष्टांतेन ज्ञेयः।

(३) तथा स्वरूपज्ञापने यथा परमाणुरप्रदेशः इत्यादि,

स्वरूपज्ञापनरूपफलवद्विशेषणप्रयोगवत्या शिष्टवाक्यरचनाया दृष्टान्तः, यथा 'परमाणुरप्रदेशः', (परमाणोः प्रदेशो नास्ति, यतः स्वयमेवैक–प्रदेशरूपोऽस्ति.) अत्र परमाणोःप्रदेशराहित्यरूपस्वरूपज्ञापकं 'अप्रदेश' इति विशेषणपदम्, वस्तुस्थितिरेवमस्ति, यत् स्वरूपज्ञापनरूपफलमुद्दिश्य विशेषणपदप्रवृत्तिः, शिष्टानां–आप्तपुरुषाणां वाक्ये दृश्यमानाऽस्ति, अतः 'केवलिनः' इत्येतत् स्वरूपज्ञापनरूपफलज्ञापकं विशेषणपदं सफलं–निर्दोषम्,

यतश्चैवमतः केवलिन इति न दुष्टं

**शङ्का=**आह—यद्येवं केवलिन इत्येतावदेव सुन्दरं, शेषं तु लोकस्योद्द्योतकरानित्याद्यपि न वाच्यमिति,

अर्थात् 'केवलिनोऽर्हतः कीर्त्तयिष्यामी' ति वाच्यम्, लोकोद्द्योतकर—धर्मतीर्थकर—जिनानित्यादि कथं वाच्यम्?

**समाधानम्=**अत्रोच्यते, इह श्रुतकेवलिप्रभृतयो, अन्येऽपि विद्यन्त एव केवलिनस्तन्मा-भूत्तेष्वेव सम्प्रत्यय इति तत्प्रतिक्षेपार्थं लोकस्योद्द्योतकरानित्याद्यपि वाच्यमिति,

अर्थात्, अत्र केवलित्वरूपसामान्यधर्मापेक्षया श्रुतकेवलि—आदि (आदिना सामान्य केवली (तीर्थंकरान् गणधरान् विना शेषकेवली) तथा मुण्डकेवलि (मूकान्तकृत् केवलि) प्रभृतयो ज्ञेयाः)

सम्पूर्णश्रुतादिसापेक्षश्रुतकेवल्यादयो भवन्ति, तेषु श्रुतकेवलिप्रभृतिषु भावार्हत्त्व-प्रतीतिर्मा भूत्, तथा श्रुतकेवल्यादिषु भावार्हत्त्वाभ्रान्तिभङ्गाय, लोकोद्द्योतकर—धर्मतीर्थकर—जिन—केवल्यादिविशेषणानि भावार्हद्ग्रहणाय अत्यावश्यकानि, एवं द्व्यादिसंयोगापेक्षयाऽपि विचित्रनयमताऽभिज्ञेन स्वधिया विशेषणसाफल्यं वाच्यमित्यलं विस्तरेण, गमनिकामात्रमेतदिति.

(इयं पद्धतिःपुरातनी, श्रीमद्—हरिभद्रसूरीश्वरेण यथा 'लोगस्स' इत्यादि प्रथमगाथायां विशेषणसाफल्यं कृतं तथा श्रीमद्हेमचन्द्रसूरीश्वरविरचिताऽन्ययोगव्यवच्छेदद्वात्रिंशिकास्तवे श्रीमन्मल्लिषेणसूरिप्रणीतायां स्याद्वादमञ्जर्यां प्रथमश्लोकटीकायां विशेषणसाफल्यविधौ पद्धति-रेतादृशी समादृता, प्रलोक्यतां तत्र.)

तत्र यदुक्तं (या प्रथमगाथायां प्रतिज्ञा कृताऽऽसीद् यत्, अहं नाम गृहीत्वा चतुर्विंशतिमर्हतां 'कीर्तयिष्यामि' इति यदुक्तं) तत्कीर्तनं कुर्वन्नाह—

**तत्र यदुक्तं "कीर्त्तयिष्यामीति" तत्कीर्त्तनं कुर्वन्नाह—**

**उसभमजिअं च वंदे, संभवमभिणंदणं च सुमइं च ।**
**पउमप्पहं सुपासं, जिणं च चंदप्पहं वंदे ॥२॥**

**सुविहिं च पुप्फदंतं, सीअल--सिज्जंस--वासुपुज्जं च ।**
**विमलमणंतं च जिणं, धम्मं संतिं च वंदामि ॥३॥**

कुंथुं अरं च मल्लिं, वंदे मुणिसुव्वयं नमिजिणं च ।
वंदामि रिट्ठनेमिं, पासं तह वद्धमाणं च ॥ ४ ॥

एता निगदसिद्धा एव, नामान्वर्थनिमित्तं त्वावश्यके "उरूसु उसभलञ्छण, उसभं सुमिणंमि तेण उसभजिणो" इत्यादि ग्रन्थादवसेयमिति, कीर्त्तनं कृत्वा चेतःशुद्ध्यर्थं प्रणिधिमाह—

एवं मए अभिथुआ, विहुअरयमला पहीणजरमरणा ।
चउवीसंपि जिणवरा, तित्थयरा मे पसीयंतु ॥ ५ ॥

व्याख्या—"एवम्" अनन्तरोदितेन विधिना मयेत्यात्मनिर्देशमाह, अभिष्टुता इति आभिमुख्येन स्तुता अभिष्टुताः स्वनामभिः कीर्तिता इत्यर्थः, किंविशिष्टास्ते? विधूतरजोमलाः, तत्र रजश्च मलं च रजोमले विधूते—प्रकम्पिते, अनेकार्थत्वाद्धातूनाम्, अपनीते रजोमले यैस्ते तथाविधाः, तत्र बध्यमानं कर्म्म रजो भण्यते, पूर्वबद्धं तु मलमिति, अथवा बद्धं रजः, निकाचितं मलः, अथवैर्यापथं रजः साम्परायिकं मलमिति, यतश्चैवंभूता अत एव प्रक्षीणजरामरणाः, कारणाभावादित्यर्थः, तत्र जरा—वयोहानिलक्षणा मरणं—प्राणत्यागलक्षणं प्रक्षीणे जरामरणे येषां ते तथाविधाः, चतुर्विंशतिरपि, अपिशब्दादन्येऽपि, जिनवराः—श्रुतादिजिनप्रधानाः, ते च सामान्यकेवलिनोऽपि भवन्ति, अत आह—"तीर्थकरा" इत्येतत्समानं पूर्वेण मे—मम किं? प्रसीदन्तु—प्रसादपरा भवन्तु,

टी०..."ऋषभमजितं च वन्दे, सम्भवमभिनन्दनं च सुमतिं च ।
पद्मप्रभं सुपार्श्वं, जिनं च चन्द्रप्रभं वन्दे ॥ २ ॥
सुविधिं च पुष्पदन्तं, शीतलश्रेयांसवासुपूज्यं च ।
विमलमनन्तं च जिनं, धर्म्मं शान्तिं च वन्दामि ॥ ३ ॥

कुंथु अरं च मल्लिं, वन्दे मुनिसुव्रतं नमिजिनं च।
वंदामि रिष्टनेमिं, पार्श्वं तथा वर्धमानं च ॥ ४ ॥"

एता निगदसिद्धा एव, नामाऽन्वर्थनिमित्तं त्वावश्यके "उरूसु उसभलञ्छण, उसभं सुमिणंमि तेण उसभजिणो" इत्यादिग्रन्थादवसेयमिति।

आवश्यकसूत्रनिर्युक्तौ, एवं वर्णितमस्ति, तत्तत्प्रभोर्गर्भकाले घटिता या घटना, तथा तादृश्या विशेषतया यन्नामजातं तद्व्यक्तिविशेषनाम, तथा संस्कृतभाषायां शब्दव्युत्पत्त्या द्वारा यज्जातं नाम, तन्नाम, सर्वभगवद्विषयव्यापकं नाम भवति.

**एतस्यामवसर्पिण्यां—**

(१) **व्युत्पत्तिः**—ऋषति—गच्छति परमपदमिति "**ऋषिवृषिलुसिभ्यः कित्**" (उणा. ३३१)
**विशेषनाम**—यद्वा ऊर्वोर्वृषभलाञ्छनमभूद्भगवतो, जनन्या च चतुर्दशानां स्वप्नानामादौ वृषभो दृष्टस्तेन '**ऋषभः**'।

(२) व्यु.—परीषहादिभि र्न जितः इति, '**अजितः**'।
**वि.**—यद्वा गर्भस्थे अस्मिन्—द्यूते राज्ञा जननी न **जितेत्यजितः**।

(३) व्यु.—शं—सुखं भवत्यस्मिन् स्तुते '**शम्भवः**'।
**वि.**—यद्वा गर्भगतेऽप्यस्मिन्नभ्यधिकसस्यसम्भवात् **सम्भवो**ऽपि।

(४) व्यु.—अभिनन्द्यते देवेन्द्रादिभिरित्यभिनन्दनः, भुज्यादित्वाद् नट्।
**वि.**—यद्वा गर्भात्प्रभृत्येवाभीक्ष्णं शक्रेणाऽभिनन्दनाद् '**अभिनन्दनः**'।

(५) व्यु.—शोभना मतिरस्य '**सुमतिः**'।
**वि.**—यद्वा गर्भस्थे जनन्याः सुनिश्चिता मतिरभूदिति **सुमतिः**।

(६) व्यु.—निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभाऽस्य '**पद्मप्रभः**'।
**वि.**—यद्वा पद्मशयनदोहदो मातुर्देवतया पूरित इति, पद्मवर्णश्च भगवानिति वा **पद्मप्रभः**।

(७) व्यु.—शोभनौ पार्श्वावस्य '**सुपार्श्वः**'।
**वि.**—यद्वा गर्भस्थे भगवति जनन्यपि सुपार्श्वाऽभूदिति **सुपार्श्वः**।

(८) व्यु.—चन्द्रस्येव प्रभा—ज्योत्स्ना सौम्यलेश्याविशेषोऽस्य '**चन्द्रप्रभः**'।
**वि.**—तथा गर्भस्थे देव्याः चन्द्रपानदोहदोऽभूदिति **चन्द्रप्रभः**।

(९) व्यु.—शोभनो विधिर्विधानमस्य '**सुविधिः**'।
**वि.**—यद्वा गर्भस्थे भगवति जनन्यऽप्येवमिति **सुविधिः**।

(१०) व्यु.—सकलसत्त्वसन्तापहरणात्, 'शीतलः'।
वि.—तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नाऽचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्तः इति **शीतलः**।

(११) व्यु.—श्रेयांसावंसावस्य **श्रेयांसः**, पृषोदरादित्वात्।
वि.—यथा गर्भस्थेऽस्मिन् केनाऽप्यनाक्रान्तपूर्वदेवताऽधिष्ठितशय्या जनन्याक्रान्तेति श्रेयो जातमिति **श्रेयांसः**।

(१२) व्यु.—वसुपूज्यनृपतेरयं '**वासुपूज्यः**'।
वि.—यद्वा गर्भस्थेऽस्मिन् वसु—हिरण्यं तेन, वासवो राजकुलं पूजितवानिति, वसवो देवविशेषास्तेषां पूज्यो वा वसुपूज्यः, प्रज्ञाद्यणि **वासुपूज्यः**।

(१३) व्यु.—विगतो मलोऽस्य, विमलज्ञानादियोगाद्वा '**विमलः**'।
वि.— यद्वा गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति **विमलः**।

(१४) व्यु.—न विद्यते गुणानामन्तोऽस्य '**अनन्तः**,' अनन्तजिदेकदेशो वा '**अनन्तः**', भीमो भीमसेन इति न्यायात् स चासौ तीर्थकृच्चानन्ततीर्थकृत्।
वि.—स्वप्ने मात्रा (अनन्त) रत्नराशिखचितो महान् हारो दृष्टः।

(१५) व्यु.—दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयति **धर्मः**।
वि.—तथा गर्भस्थे जननी दानादिधर्मपरा जातेति '**धर्मः**'।

(१६) व्यु.—शान्तियोगात् तदात्मकत्वात् तत्कर्तृकत्वाच्चायं '**शान्तिः**'।
वि.—गर्भस्थे पूर्वोत्पन्नाऽशिवशान्तिरभूदिति **शान्तिः**।

(१७) व्यु.—कुःपृथ्वी, तस्यां स्थितवानिति '**कुन्थुः**' पृषोदरादित्वात्।
वि.—तथा गर्भस्थे भगवति जननी रत्नानां कुन्थुराशिं दृष्टवतीति **कुन्थुः**।

(१८) व्यु.—"सर्वो नाम महासत्त्वः, कुले य उपजायते।
तस्याऽभिवृद्धये वृद्धै रसावर उदाहृतः॥" इतिवचनादरः।
वि.—तथा गर्भस्थे भगवति जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इत्यरः।

(१९) व्यु.—परीषहादिमल्लजयान्निरुक्तान्मल्लिः।
वि.—तथा गर्भस्थे भगवति मातुः सुरभिकुसुममाल्यशयनीयदोहदो देवतया पूरित इति **मल्लिः**।

(२०) व्यु.—मन्यते जगतस्त्रिकालावस्थामिति 'मुनिः,' "मनेरुदेतौ चाऽस्य वा" (उणा—६१२) इति इप्रत्ययेउपान्त्य स्योत्वम्। शोभनानि व्रतान्यस्य सुव्रतः, मुनिश्चासौसुव्रतश्च 'मुनिसुव्रतः'
वि.—तथा गर्भस्थे जननी मुनिवत् सुव्रता जातेति मुनिसुव्रतः।

(२१) व्यु.—परीषहोपसर्गादिनामनात् "नमेस्तु वा" (उणा—६१३) इति विकल्पेनोपान्तस्येकाराभावपक्षे 'नमिः'।
वि.—यद्वा गर्भस्थे भगवति परचक्रनृपैः अपि प्रणतिः कृतेति नमिः।

(२२) व्यु.—धर्मचक्रस्य नेमिवन्नेमिः, नेमीतीन्नन्तोऽपि दृश्यते यथा "वन्दे सुव्रतनेमिनौ इति।
वि.—जनन्या स्वप्ने रिष्टरत्नमयो नेमिः ( चक्रधारा ) दृष्ट इति नेमिः।

(२३) व्यु.—स्पृशति ज्ञानेन सर्वभावानिति 'पार्श्वः'।
वि.—तथा गर्भस्थे जनन्या निशि शयनीयस्थयाऽन्धकारे सर्पो दृष्ट इति गर्भानुभावोऽयमिति मत्वा पश्यतीति निरुक्तात् पार्श्वः, पार्श्वोऽस्य वैयावृत्यकरो यक्षस्तस्य नाथः, पार्श्वनाथः 'भीमो भीमसेन' इति न्यायाद् वा पार्श्वः।

(२४) व्यु.—विशेषेण ईरयति प्रेरयति कर्माणीति 'वीरः'।
वि.—गर्भस्थे भगवति ज्ञातकुलं धनधान्यादिसर्वर्द्धिलो वर्धमानं जातमतो 'वर्धमानः' इति नाम कीर्त्यमानमस्ति।

**अथ कीर्तनं कृत्वा चेतः शुद्ध्यर्थं प्रणिधिमाह—**

**अर्थात्**—पूर्वगाथासु पूर्वं कीर्तनं कृतमधुनाऽध्यवसायविशुद्धये प्रणिधिं कथयति (प्रणिधानं) करोति, अत्र पञ्चमीगाथायां 'तीर्थंकरा मम प्रसीदन्तु' इति वाक्येन प्रार्थनामात्रं नास्त्यपितु प्रणिधानं—चित्तस्य ध्यानपूर्वकं, एकप्रशस्ताऽऽशंसारूप—निर्मलात्मपरिणामोऽस्ति.

"एवं मया—अभिष्टुता, विधूतरजोमलाः प्रहीणजरामरणाः।
चतुर्विंशतिरपि जिनवराः, तीर्थंकरा मे प्रसीदन्तु ॥ ५ ॥"

**व्याख्या**—एवं—पूर्वकथितेन विधिना—स्तुतिकरणविषयक—विधिना, मयेति आत्मनिर्देशमाह (अत्र स्तुतिकारकस्य निर्देशनं—स्वव्यक्तिदर्शनं) अभिष्टुताः—अभिमुखत्वेन (सम्मुखत्वेन, तीर्थंकरान् अभिसम्मुखस्थितेनेव मया ) नामानि गृहीत्वा चतुर्विंशतिजिनवराः स्तुताः कीर्तिताः, कीदृशास्ते तीर्थंकराः? किं विशिष्टास्ते? 'विधूतरजोमलाः' तत्र रजश्च मलं च रजोमले, विधूते—प्रकम्पिते, अनेकार्थत्वाद्धातूनाम्, अपनीते रजोमले यैस्ते तथाविधाः।

तत्र (१) बध्यमानं कर्म रजो भण्यते, पूर्वबद्धं तु मलमिति. अर्थात्, यथा पवनेन नीयमानं भित्त्यादौ रजः स्पृशति तथा आश्रवेण योगेन नीयमानं (बध्यमानं) वर्त्तमानकालीनं नवीनं कर्म रज उच्यते ( स्पृष्टं कर्म ) प्रमादादिना बद्धं मिथ्या मे दुष्कृतं भूयादिति विधिना क्षीयते,

(२) पूर्वबद्धं तु मलमिति. पूर्वकालीनं—भूतकालावच्छेदेन आत्मप्रदेशैः सह बन्धन-विषयीकृतं कर्म ( पौद्गलिकं ) मलं कर्म कथ्यते,

अथवा (१) बद्धं रजः, अर्थात् (स्पृष्ट—बद्ध—निधत्त—निकाचितभेदेन कर्माणि चतुर्धा कथ्यन्ते) तन्मध्ये बद्धं कर्म यथा सूचीपुञ्जो यदि सूत्रेन बद्धः सन् यदा सूत्रबन्धनस्य मोचनेन तदा सूच्योऽपि मुक्ता भवन्ति तथा यत्कर्म, विकथादिप्रमादेन जनितं प्राणातिपातादि—दोषैः बद्धं भवेत्, तदालोचना—प्रतिक्रमणादि कृत्वा क्षीयते—क्षयभावं नीयते तद् बद्धं।

(२) निकाचितं मलः (कर्म) चतुर्विधानां कर्मणां निकाचित—सुदृढरूपेण बद्धं, अर्थात् यथा तत्सूचीपुञ्जः, प्रागग्नौ मुक्त्वा धमित्वा लोहसत्क एक पिण्डीभूतो (कृतः) भवेत्, ततः तं लोहपिण्डं भङ्क्त्वा पुन र्घटित्वा ( घटेयुः ) तदा नवीनाः सूच्यो भवेयुः तथा जीवेन ज्ञात्वा (बुद्ध्वा) विपरीताध्यवसायेन यत्कर्म, कृतं, किञ्च 'मयेदं प्रशस्तं कृतं' पुनरपि पुन एवमेव करिष्यामीत्यादिवचोभि र्भूयोभूयः प्रशंसाकरणेन जीवस्य प्रदेशैः सह गाढैकत्वं प्रापितं तत् कर्म, यादृशं कृतं तादृशमेव भोक्तव्यमेव, गुरुणा दत्तेन घोरातिघोरतपः—प्रायश्चित्तादिनाऽपि न क्षयं याति तन्निकाचितं कर्म, तदत्र मल इत्युच्यते.

अथवा=(१) ऐर्यापथं रजः (२) साम्परायिकं मलमिति,

अर्थाद् वीतरागस्य मात्रयोगेन बध्यमानं कर्म 'ऐर्यापथं' कर्म, सातवेदनीयं, त्रिसामयिकं—बन्धभोगक्षयात्मकं, छद्मस्थस्य कषायेण बध्यमानं कर्म 'साम्परायिकं'

विधूतरजोमलाः=सर्वथाऽपनीतरजोमलास्तीर्थकराः

"यतश्चैवंभूता अत एव प्रक्षीणजरामरणाः, कारणाभावादित्यर्थः, तत्र जरा—वयोहानि-लक्षणा, मरणं प्राणत्यागलक्षणं, प्रक्षीणे जरामरणे येषां ते तथाविधाः,"

अर्थाद् यतोऽपनीतरजोमलाः ( रजोमलकर्मरहिता ) अत एव प्रक्षीणजरामरणाः, यतः कर्मकारणाभावो वर्त्तते, यदि कर्मसत्ता स्यात् तदा जरामरणयोः सत्ता स्यात्, कर्मकारणस्या-त्यन्तिकाभावः स्यात्तत्र जरामरणरूपकार्यस्यैकान्तिकाभावः सिद्धः, अजरामरत्वमापन्नाः। तत्र जरा=वयोहानिः ( शरीरस्य वियन्ति—क्रमेण गच्छन्ति वयांसि, बाल्यादीनि तेषां ( वयसो वा यौवनस्य ) हानिः—क्षीणता—न्यूनता, वृद्धावस्थेत्यर्थः )

मरणं—प्राणत्यागः—प्राणैः सह विप्रयोगो मरणमुच्यते प्राणेष्वपि प्रधानप्राणरूपमायुः, तस्य नाशेन शेषाः प्राणा वियुक्ता भवन्ति. यतो रजोमलरूपकर्मक्षयकारकाः अत एव जरामरणक्षयकारकाः ॥

"चतुर्विंशतिरपि, अपिशब्दादन्येऽपि जिनवराः=श्रुतादिजिनप्रधानाः, ते च सामान्यकेवलिनोऽपि भवन्ति, अत आह—"तीर्थंकरा" इत्येतत्समानं पूर्वेण, मे—मम किं ? प्रसीदन्तु—प्रसादपरा भवन्तु, अर्थाद् चतुर्विंशतिरपि—अत्रापि शब्देनैरवतमहाविदेहक्षेत्रीयाः, तीर्थंकरा अपि ग्राह्याः, 'जिनवराः'—श्रुतादिजिनप्रधानाः—श्रुतजिनावधिजिनेषु प्रधानाः, पूर्ववत् सामान्यकेवलिनां व्यवच्छेदाय 'तीर्थंकरा' इति विशेषणं जिनवराणां ज्ञेयमिति, पूर्वोक्तविध्यनुसारेण स्तुताः, विधुतरजोमलाः, प्रक्षीणजरामरणाः चतुर्विंशतिरपि जिनवरास्तीर्थंकरा मयि प्रसादपरायणा भवन्तु.

**आह—किमेषा प्रार्थना अथ नेति, यदि प्रार्थना न सुन्दरैषाऽऽशंसारूपत्वात्, अथ न, उपन्यासोऽस्या अप्रयोजन इतरो वा ? अप्रोजनश्चेदचारु वन्दनसूत्रं, निरर्थकोपन्यासयुक्तत्वात्, अथ सप्रयोजनः, कथमयथार्थतया तत्सिद्धिरिति, अत्रोच्यते, न प्रार्थनैषा, तल्लक्षणानुपपत्तेः, तदप्रसादाक्षेपिकैषा, तथा लोकप्रसिद्धत्वात्, अप्रसन्नं प्रति प्रसाददर्शनात्, अन्यथा तदयोगात्, भाव्यप्रसादविनिवृत्त्यर्थं च, उक्तादेव हेतोरिति, उभयथाऽपि तदवीतरागता, अत एव स्तवधर्म्मव्यतिक्रमः, अर्थापत्त्याऽऽक्रोशात्, अनिरूपिताभिधानद्वारेण, न खल्वयं वचनविधिरार्याणां, तत्त्वबाधनात्, वचनकौशलोपेतगम्योऽयं मार्ग्गः, अप्रयोजनसप्रयोजनचिन्तायां तु न्याय्य उपन्यासः, भगवत्स्तवरूपत्वात्॥ उक्तं च—**

**क्षीणक्लेशा एते न हि प्रसीदन्ति न स्तवोऽपि वृथा।**
**तत्स्वभावभाव (सद्भाव)विशुद्धेः प्रयोजनं कर्म्मविगम इति ॥१॥**
**स्तुत्या अपि भगवन्तः परमगुणोत्कर्षरूपतो ह्येते।**
**दृष्टा ह्यचेतनादपि मन्त्रादिजपादितः सिद्धिः ॥२॥**

यस्तु स्तुतः प्रसीदति रोषमवश्यं स यानि निन्दायाम् ।
सर्वत्रासमचित्तः स्तुत्यो मुख्यः कथं भवति? ॥३॥

शोतार्दितेषु हि यथा द्वेषं वह्निर्न याति रागं वा ।
नाह्वयति वा तथापि च तमाश्रिताः स्वेष्टमश्नुवते ॥४॥

तद्वत्तीर्थंकरान्ये त्रिभुवनभावप्रभावकान् भक्त्या ।
समुपाश्रिता जनास्ते, भवशीतमपास्य यान्ति शिवम् ॥५॥

एतदुक्तं भवति–यद्यपि ते रागादिभी रहितत्वान्न प्रसीदन्ति, तथापि तानुद्दिश्याचिन्त्यचिन्तामणिकल्पान् अन्तःकरणशुद्ध्याऽभिष्टवं च कर्तृणां, तत्पूर्विकैवाभिलषितफलावाप्तिर्भवतीति गाथार्थः

तथा "कित्तियवन्दियमहिया, जे ए लोगस्स उत्तमा सिद्धा ।
आरुग्गबोहिलाभं, समाहिवरमुत्तमं दिंतु ॥६॥"

व्याख्या–कीर्त्तिताः–स्वनामभिः प्रोक्ताः; वन्दिताः–त्रिविधियोगेन सम्यक् स्तुता, महिताः–पुष्पादिभिः पूजिताः, क एते इत्यत आह–य एते लोकस्य–प्राणिलोकस्य मिथ्यात्वादिकर्म्ममलकलङ्काभावेनोत्तमाः–प्रधानाः, ऊर्द्धं वा तमस इत्युत्तमसः, "उत्प्राबल्योर्ध्वगमनोच्छेदनेषु" इति वचनात्, प्राकृतशैल्या पुनरुत्तमा उच्यन्ते, "सिद्धा" इति सितं–ध्मातमेषामिति सिद्धाः कृतकृत्या इत्यर्थः, अरोगस्य भाव आरोग्यं–सिद्धत्वं तदर्थं बोधिलाभः आरोग्यबोधिलाभः–जिनप्रणीतधर्म्मप्राप्तिर्बोधिलाभोऽभिधीयते, तं, स चानिदानो मोक्षायैव प्रशस्यते इति, तदर्थमेव च सात्विकम्, ? अत आह–समाधानं समाधिः, स च

द्रव्यभावभेदाद् द्विविधः, तत्र द्रव्यसमाधिः यदुपयोगात्स्वास्थ्यं भवति, येषां वाऽविरोध इति, भावसमाधिस्तु ज्ञानादिसमाधानमेव, तदुपयोगादेव परमस्वास्थ्ययोगादिति, यतश्चायमित्थं द्विधा, अतो द्रव्यसमाधिव्यवच्छेदार्थं, आह, वरं–प्रधानं भावसमाधिमित्यर्थः, असावपि तारतम्यभेदेनानेकधैव, अत आह–उत्तमं–सर्वोत्कृष्टं ददतु–प्रयच्छन्तु, आह–किमिदं निदानमुत नेति, यदि निदानमलमनेन, सूत्रप्रतिषिद्धत्वात् , न चेत्सार्थकमनर्थकं वा ?, यद्याद्यः पक्षस्तेषां रागादिमत्त्वप्रसङ्गः, प्रार्थनाप्रवीणे प्राणिनि तथादानात्, अथ चरमः, तत आरोग्यादिदानविकला एते इति जानानस्यापि प्रार्थनायां मृषावादप्रसङ्ग इति, अत्रोच्यते, न निदानमेतत्, तल्लक्षणायोगात्, द्वेषाभिष्वङ्गमोहगर्भं हि तत्, तथा तन्त्रप्रसिद्धत्वात् ,

पं०...."न निदानेत्यादि" न नैव निदानं–नितरां दायते–लूयते सम्यग्दर्शनप्रपञ्चबहलमूलजालो ज्ञानादिविषयविशुद्धविनयविधिसमुद्धुरस्कन्धबन्धो विहितान्दातदानादिभेदप्रभेदशाखोपशाखाखचितो निरतिशयसुरनरभवप्रभवसुखसम्पत्तिप्रसूनाकीर्णोऽनभ्यर्णीकृतनिखिलव्यसनव्याकुलशिवालयशर्मफलोल्बणो धर्म्मकल्पतरुरनेकसुरर्द्धयाद्याशंसनपरिणामपरशुनेति निदान, "एतद्" आरोग्यबोधिलाभादिप्रार्थनं, कुत इत्याह–"तल्लक्षणायोगात्" निदानलक्षणाघटनात् , निदानलक्षणमेव भावयन्नाह–"द्वेषाभिष्वङ्गमोहगर्भं हि तत्" द्वेषो–मत्सरः, अभिष्वङ्गो–विषयानुग्रहो, मोहः–अज्ञानं ततस्ते द्वेषाभिष्वङ्गमोहा गर्भाः–अन्तरङ्गकारणं यस्य तत्तथा हिः–यस्मात्तन्निदानं, कुत इत्याह–"तथा" द्वेषादिगर्भतया "तन्त्रप्रसिद्धत्वात्" निदानस्यागमे रूढत्वात् , रागदोषगर्भयोर्निदानयोः सम्भूत्यग्निशर्मादिषु प्रसिद्धत्वेन तल्लक्षणस्य सुबोधत्वात्, निर्दिशमनादरस्य मोहगर्भनिदानलक्षणमाह—

टी०...'प्रसीदन्तु' इत्येतत् प्रार्थना–विषयक–चर्चा–

शङ्का=आह "किमेषा प्रार्थना उत न? इति, यदि प्रार्थना, न सुन्दरैषाऽऽशंसारूपत्वात्। अथ न, उपन्यासोऽस्या अप्रयोजन इतरो वा? अप्रयोजनश्चेदचारु वन्दनसूत्रं निरर्थकोपन्यासतुल्यत्वात्। अथ सप्रयोजनः कथमयथार्थतया तत्सिद्धिरिति।"

अर्थात्तीर्थङ्कराः प्रसीदन्तु इत्यत्रैतद् वाक्यं यदि प्रार्थना–याचनारूपं स्यात्तदाऽऽशंसा, (इच्छा) त्याज्यैव, चैत्यवंदनादिकं तु निराशंस–निष्कामभावेन कर्त्तव्यमेव,

यदि न प्रार्थना तदा तदुपन्यासः कथं कृतः ? अप्रयोजनश्चेद्–(प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तते) प्रयोजनं–फलं न तदा चैत्यवन्दनादिसूत्रं सुन्दरं न ।

यदि सप्रयोजन उपन्यासस्तदा वीतरागाःप्रसीदन्तु इत्येवं सूत्रं कथयति, (प्रसादरूपो) तदर्थं एष (प्रसन्नाप्रसन्नताविशिष्टवीतरागत्वेन) वस्तुतो–यथार्थतया वस्तुस्थितिरूपो न जातः, अर्थात् सूत्रमयथार्थं प्रतीत्य प्रयोजनं कथं सिद्ध्येत् ?

**समाधानम्**=अत्रोच्यते–' न प्रार्थनैषा, ' तल्लक्षणानुपपत्तेः

(१) तदप्रसादाक्षेपिकैषा, तथा लोकप्रसिद्धत्वात्, अप्रसन्नं प्रति प्रसाद ( प्रार्थना ) दर्शनाद् , अन्यथा तदयोगात् ,

(२) भाव्यप्रसादविनिवृत्त्यर्थं च, उक्तादेव हेतोरिति। उभयथाऽपि तदवीतरागता। अर्थात् , एतत् प्रार्थनाया अभावोऽत्र साध्यते, प्रार्थनाया लक्षणस्याघटमानता, प्रार्थनालक्षणं–प्रार्थनीयव्यक्तौ यद्वस्तु नास्ति तत्कारणाय याचनं,

(१) अतः प्रार्थनीयवस्तुनि तत्प्रसादाभावविषयक आरोप उत्थितो (उत्थापितो) भवति अर्थापत्तिद्वारा तत्प्रसादासंभवो परिख्याप्यते, तथा च प्रस्तुते ' वीतरागाः प्रसीदन्तु ' इति प्रार्थनावाक्येन वीतरागा अप्रसन्नाः सन्ति, तथा लोकप्रसिद्धहेतु–द्वारा कथ्यते, यत् 'अप्रसन्नं प्रत्येव प्रसादविषयकप्रार्थना' दृश्यते अन्यथा=प्रसन्नं प्रति प्रसादाप्रार्थनाया अयोगः–अभाव एव.

(२) साम्प्रतं प्रसन्नो, अप्रसन्नो नास्ति, परन्तु भाविकाले–अप्रसादविनिवृत्त्यर्थं–भविष्यत्काले–अप्रसन्ना मा भवन्तु इति भाविकालीनप्रसन्नतासिद्ध्यर्थं प्रार्थना भवति,

उभयत्र लोकप्रसिद्धिनामको हेतु र्विज्ञेयः, उभयथाऽपि तदवीतरागता, अर्थाल्लोकप्रसिद्धि-हेतुजन्य–वर्तमानकालावच्छिन्न प्रसादविषयक–भाविकालीनाप्रसाद–विनिवृत्ति–फलकप्रार्थनारूप–प्रकारद्वयेन तीर्थकरेषु वीतरागेषु, अवीतरागता–वीतरागताया अभाव एव ॥

**भगवत्स्तुतिरूपा प्रार्थना**—

अत एव स्तवधर्मव्यतिक्रमः, अर्थापत्त्याक्रोशात्, अनिरूपिताऽभिधानद्वारेण न खल्वयं वचनविधिरार्याणां, तत्तत्त्वबाधनात् । वचनकौशलोपेत–गम्योऽयं मार्गः । अप्रयोजनसप्रयोजन-चिन्तायां तु न्याय्य उपन्यासः, भगवत्स्तवरूपत्वात्, अर्थात् , अत्र 'प्रसीदन्तु' इति वाक्येन

'प्रसन्ना भवन्तु' प्रार्थनारूपार्थग्रहणेन प्रस्तुतस्तुतिवाक्यं लक्षणहीनं भविष्यति, यतःस्तुति-लक्षणमिदं, ये स्तोतव्यास्तेषामीदृशी स्तुतिःकार्या, येन स्तुतिवचनेन, स्तुत्येषु गुणस्थानेषु दोषा-रोपणं न भाव्यम्, येन वचसा यदि दोषारोपणस्यार्थापत्तिः, निःसरेत्तदा स्तुतिवर्चसि लक्षण-मुल्लङ्घितमेव,

प्रस्तुते प्रसादविषयकप्रार्थनावचनमते, एतादृश्यर्थापत्ति निःसरति यद् 'भगवान् मयि प्रसीदतु, अर्थाद् भगवान् प्रसादाप्रसादरहितोऽस्ति अथवाऽप्रसन्नो भवत्यपि' एतादृशानुचित-वस्त्वारोपविषयकार्थापत्ति भवेत्, एतादृशप्रार्थनाद्वारा, अविचारितं कथितं, प्रार्थनापद्धति विचारणीयाऽत्र.

आर्याणामेतादृशी वचनपद्धति र्न भाव्या, यत्रानुचित–दोषारोपणं भवेत् यतः, अत्र वीतरागप्रार्थनाकरणविषये प्रभुनिष्ठ–वीतरागतातत्त्वं बाधते, अनार्याणां तु तत्त्वा–तत्त्वविषयक-विवेको न भवति.

अत्र 'तीर्थंकरा मयि प्रसीदन्तु' इति वचनं महार्यशिरोमणि–गणधराणां विद्यते, एते पुरुषोत्तमा वीतरागता–तत्त्वबाधकं वचो न वदन्त्येव.

किञ्च वचनकौशलोपेतगम्योऽयं मार्गः ।

अप्रयोजनसप्रयोजनचिन्तायां तु 'प्रसीदन्तु' इति वाक्यं प्रार्थनापरकं नास्ति, अत एव 'तीर्थंकरा मयि प्रसीदन्तु' इति वाक्योपन्यासो न्याय्यः (न्याययुक्तः) विद्यते यतो भगवत्स्तुतिरूपं वचनमस्ति.

('निष्कामस्य निरर्थकत्वाभावात्, सप्रयोजने स्तुत्यस्य तथाऽभावेऽपि स्तोतुस्तथाफलदर्शनात्)

**उक्तं** च—"क्षीणक्लेशा एते नहि प्रसीदन्ति, न स्तवोऽपि वृथा ।

तत्स्वभावभाव (सद्भाव) विशुद्धेःप्रयोजनं कर्मविगम इति ॥"

(यं वयं 'प्रसीदन्तु' एवं कथयामः, स जिनो भगवान् वीतरागोऽस्ति, अर्थात्तः स्तोतुरुपरि प्रसन्नो न भवति, तथा निन्दकस्योपरि, अप्रसन्नो न भवति, तथाऽपि स्तोतुश्च स्तुतिफलं प्राप्नोति, निन्दकस्य निन्दाफलं प्राप्नोति, यतः प्रत्येकक्रियाफलमवश्यं भवत्येव, किञ्च यथा चिंतामणितो मंत्रादिकरणतः शुभेच्छुकस्य शुभं फलं भवति, अशुभेच्छुकस्याऽशुभं फलं भवति, तथाऽत्र स्तुतितः स्तुतिफलं भवति,)

(१) अर्थाद् रागादिकर्मादिरूपक्लेशरहिताः, एते—वीतरागा न यथा प्रसादपरायणा भवन्ति, तथा भगवतां स्तुतिरपि न वृथा—निष्फला भवति, यतः स्तुतिद्वारा तेषु स्वभाव-

भावस्याथवा सद्भावस्य विशुद्धिहेतोरथवा भक्तेषु तेषु स्वभावरूप–भावरूप–भक्तितः–नामादिजपविधितः, कर्मविगमः–कर्मक्षयोपशमादिरूपं प्रयोजनं–फलं भवति. भव्यानां कल्याणं भवति.

(२) परम–उत्कृष्टगुणरूपेण कारणेन, एते भगवन्तः स्तुत्या अपि सन्ति, तेषां स्तुतिद्वारा सिद्धिर्दृष्टा, यतो, अचेतनादपि मन्त्रादि–जपादितः सिद्धिः,

"अप्रसन्नात् कथ प्राप्यं, फलमेतद–सङ्गतम् ।
चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ॥" हेमचन्द्रसूरयः, वी. सू.
"निरागी सेवे कांइ होवे, एम मनमां नवि आणुं ।
फले अचेतन पण जेम सुरमणि, तिम तुम भक्ति प्रमाणुं ॥" यशो.चो.१५,
"सेवकना तिम दुःख गमावे, प्रभु गुण–प्रेम स्वभावे"

अर्थात् वीतरागस्य सेवया किं फलं स्यात्? इति प्रश्नो मनसि निरवकाश एव, अचेतनोऽपि चिन्तामणिर्यथाविधि सेवया ये ये पदार्था अस्माभि र्मनसि चिन्तितास्तान् सर्वान् पूरयति, अर्थात् तस्य प्रभावेण तादृशं पुद्गलानां परिणमनं भवति, तत्र देवसहायताऽपेक्षिता न, अचेतनोऽपि चिन्तामणि र्यदा फलति तर्हि परमचैतन्यप्रभुरपि प्रभुः, तद्भक्ति–सेवा–तन्मूल्य–ज्ञातृत्वे भक्तस्य भक्तिफलं कथं न देयात्, भगवांस्तु भक्तं स्वतुल्यं कर्तुं क्षमोऽस्ति, प्रभुस्तु प्रभुरेव तत्र शङ्का न कार्या, परन्तु सत्यभावेन सत्यत्रिकरणयोगेन, पूर्णश्रद्धापूर्वकं भगवतां भक्तिकरणेन, तस्याः फलं अवश्यं–निःशङ्कं भवत्येव.

तथाऽर्हन्तो वीतरागा एव कुतोऽपि कारणात् कस्मिंश्चिदपि न द्वेषं, अपूर्वस्तुतिकर्तरि–विज्ञप्तिकर्तरि न रागं च विदधति, ते त्वक्षयगुणनिधानत्वेन तेषां भक्ते वा स्तावके तत्तत्प्रकारकगुणानामाऽऽविर्भावः स्वतः–सहजत्वेन भवति, तद्रीत्या तेषां प्रसन्नताऽस्ति,

(३) "यस्तु स्तुतः"–स्तुतिविषयीकृतः, प्रसीदति–प्रसादपरायणो भवति, स निन्दायां रोषमवश्यं याति, सर्वत्र चित्तस्य समताया अभावेन विषमतायाः सद्भावेन, मुख्यत्वेन स्तुत्यः कथं भवति? अर्थान्मुख्यःस्तुत्यो न भवति. मुख्यत्वेन वीतरागा एव स्तोतव्या, गौणत्वेन वीतरागप्रणीतमार्ग ( वीतरागता–मार्ग ) स्याराधका एव.

(४) यथा वह्निः, शीतेनाऽर्दितेषु–पीडितेषु रागद्वेषौ न करोति, अथवा न तानाह्वयति–अत्रागच्छत यूयं, युष्माकं शीतमवश्यं विनश्यतीति, तथाऽपि तं–वह्निमभिमाश्रिताः–शरणागताः, स्वेष्टं–आत्मीयमिष्टं–शीतपीडानाशरूपं, उष्णता–स्फूर्ति–प्राप्तिरूपं, वाञ्छितमश्नुवते–प्राप्नुवन्ति नान्यथा.

(५) तथा ये, त्रिभुवनस्य—जगत्त्रयस्य भावानां—पदार्थानां प्रभावकान्—उद्द्योतकरान् तीर्थकरान्—अर्हतः, भक्त्या सत्यहृदयबहुमानातिशयतः, समुपाश्रिताः—सम्यक्तया शरणाश्रिता जना—पुरुषास्ते, भवशीतं—भवीयभयङ्करशैत्यपीडामपास्य—विनाश्य शिवं—मोक्षं यान्ति—गच्छन्ति.

एतदुक्तं भवति—यद्यपि ते रागादिभीरहितत्वान्न प्रसीदन्ति, तथाऽपि तानुद्दिश्याऽचिन्त्य-चिन्तामणिकल्पान्, अन्तःकरणशुद्धयाऽभिष्टवं च कर्तॄणां, तत्पूर्विकैवाऽभिलषितफलाऽवाप्ति-र्भवतीति गाथार्थः ।। ५ ।।

अर्थात् तात्पर्यांशस्तु यद्यपि तीर्थकरा भगवन्तो रागादीनामत्यंताभाववन्तः सन्तो न प्रसीदन्ति तथापि, अचेतनाचिन्त्यचिन्तामणि—सदृशान्, तान्, तीर्थकरान् भगवत उद्दिश्य चित्तस्य नैर्मल्येन, एकाग्रतापूर्वकं स्तुति—कर्त्तारः—आराधकाः—सेवका भावविशुद्धिपूर्वकमेवा-भिलषितफलं प्राप्नुवन्तीति ।

**अथ यथा नामस्तवस्य गाथापञ्चकं विवृतम्, तथा षष्ठीगाथाया विवरणं क्रियते—**

**"कित्तिय वन्दियमहिया, जेए लोगस्स उत्तमा सिद्धा ।**
**आरुग्गबोहिलाभं, समाहिवरमुत्तमं दिन्तु ।। ६ ।।**

व्याख्याः—'कीर्तिताः'=स्वनामभिः प्रोक्ताः, चतुर्विंशतिस्तीर्थकरा नामान्युच्चार्य सम्बोधिता—कथिताः, 'वन्दिताः' मनोवचनकाययोगेन—मनसि भावजागृतिं कृत्वा, वचनतः शुद्धोच्चारणपूर्वकं, कायेन पाणी कुड्मलीकृत्वा, मस्तकं नामयित्वा, वर्धमानभावोल्लासपूर्वकं स्तुताः, वन्दिता—अभिवादनविषयीकृताः, 'महिताः'—द्रव्यस्तवेन—पुष्पादिभिरर्चिताः—साधु-श्रावकाभ्यां करणकारणप्रशंसा—अनुमतिभिः समभ्यर्चिताः 'क एते' इत्यत आह 'य एते' 'लोकस्य'—प्राणिलोकस्य—( जीवराशौ ) मिथ्यात्वादिकर्ममलकलङ्काभावेन 'उत्तमाः'=प्रधानाः, उर्ध्वं वा तमस इत्युत्तमसः, 'उत्प्राबल्योर्ध्वगमनोच्छेदनेषु' इति वचनात् प्राकृतशैल्या (प्राकृते प्रायःव्यञ्जनान्तनाम्नोऽभावात् तमसादिशब्दान्त्य 'स' लोपात् तमादिशब्दास्तिष्ठन्ति, उत्—उध्द्र्वगमनार्थत्वेन, तमसोऽन्धकारात् उध्द्र्वं गताः,)उत्तमा उच्यन्ते,

"त्वामामनन्ति मुनयः परमं पुमांस—मादित्यवर्णममलं तमसः परस्तात् ।" ( भक्तामरस्तोत्रे. )

'सिद्धाः'=सितं ध्मातं ( बद्धं ) एषामिति सिद्धाः, कृतकृत्याः, अर्थात् कर्माभावेन प्रयोजन—कार्याभावः, अन्तरायस्यान्ते समस्तलब्धयः, ज्ञानदर्शनावरणध्वंसे ज्ञानप्राकट्यं मोहनीयकर्मविनाशे, इच्छारूपविकाराभावः, ततः प्रयोजनेच्छाभावः,

'अरोगस्य भाव आरोग्यं—सिद्धत्वं, तदर्थं बोधिलाभः, आरोग्यबोधिलाभः—जिनप्रणीत-

धर्मप्राप्तिबोधिलाभोऽभिधीयते, तं, स चानिदानो मोक्षायैव प्रशस्यते इति, तदर्थमेव च तावत्किम्? अत आह–समाधानं समाधिः,

अर्थात् कर्मसंयोगरूपसंसार एव भाव–महारोगः कथ्यते, तस्याऽऽत्यन्तिकध्वंसो मोक्ष एव भावारोग्यं–सत्यारोग्यं–नित्यस्वास्थ्यं–सिद्धत्वं, तदर्थं=सिद्धत्व–सिद्धये बोधिलाभः=आरोग्य-बोधिलाभः–जिनप्रणीतधर्मप्राप्तिबोधिलाभः कथ्यते, तं=आरोग्यबोधिलाभं,

स चानिदानो=आरोग्यबोधिलाभश्च, पौद्गलिक–किंप्रकारकाशंसारहितत्वविशिष्टनिदान-रहितो मोक्षायैव प्रशस्यते, अनिदानधर्मः=सम्यग्दर्शनादारभ्य यावद् वीतरागत्वजनक–परम-कक्षक–शुद्धात्मीयपरिणामरूपधर्मपर्यन्तो धर्मो ज्ञेयः, तदा 'तदर्थमेव तावत्किम्' तस्य-बोधिलाभस्य अर्थं–कृते किं? बोधिलाभाय च किं स्पृहणीयं? बोधिलाभसुदृढता–सुस्थिरतायै किं याचनीयम्?

अत आह–'समाधिवरमुत्तमं ददतु' 'समाधानं समाधिः स च द्रव्यभावभेदाद् द्विविधः, तत्र द्रव्यसमाधिः–यदुपयोगात् स्वास्थ्यं भवति, येषां वाऽविरोध इति, भाव-समाधिस्तु ज्ञानादिसमाधानमेव, तदुपयोगादेव परमस्वास्थ्ययोगादि'ति, अर्थात्, समाधिः–

(१) द्रव्यसमाधिः=येषां पदार्थानामुपयोगात् शरीरस्वास्थ्यं (तंदुरस्ती भाषायां, बाह्यशांति र्भवति) अथवा ये पदार्था बाह्यस्वास्थ्ये विरोधिनो न, अनुकूलाः सन्ति, ते पदार्थाः समाधौ कारणत्वेन द्रव्यसमाधित्वेन कथ्यन्ते.

(२) भावसमाधिः–ज्ञानादिसमाधानमेव यतः, तेषां ज्ञानादीनामुपयोगात्–आराधना द्वारा परमस्वास्थ्ययोगोऽस्ति, (परमात्मिक शान्ति सम्पूर्णस्वरूपरमणता–स्थिरतारूपः परम-स्वास्थ्ययोगोऽस्ति.)

यतश्चायमित्थं द्विधा, अतो द्रव्यसमाधिव्यवच्छेदार्थं, आह–वरं प्रधानं भावसमाधिमित्यर्थः, असावपि तारतम्यभेदेनानेकधैव, अत आह उत्तमं सर्वोत्कृष्टं ददतु–प्रयच्छन्तु,

अर्थात्, द्विप्रकारोऽयं समाधिस्तथापि सिद्धत्वाय द्रव्यसमाधिरहेतुत्वेनाऽसमर्थो, अतो द्रव्यसमाधिव्यवच्छेदार्थं आह वरं–प्रधानं भावसमाधिरेव सिद्धत्वाय निबंधनत्वेन प्रधान-कारणमस्ति, तदपि ज्ञानादिरूपभावसमाधेः तारतम्येन–(न्यूनाधिक्येन) अनेके प्रकाराः सन्त्येवाऽत आह–उत्तमं–सर्वोत्कृष्टं भावसमाधिं ददतु–प्रयच्छन्तु–क्षायिकज्ञानसर्वसंवररूपभावचारित्रादिरूपं भावसमाधिं–उत्कृष्टभावसमाधिं ददतु–प्रयच्छन्तु ॥

तथा च ये, इन्द्रादिकैः नामपूर्वकं स्तुताः—वंदिताः, महिताः, ते लोके उत्तमा (सर्वप्राणिलोकप्रधानाः, लोके परंज्योतीरूपा सिद्धाः, माम् (मम) आरोग्यं तथा तद्‌सिद्धये बोधिलाभं च केवलज्ञानं सर्वसंवररूप—यथाख्यातचारित्रनामक—सर्वोत्कृष्ट—वरसमाधि—भावसमाधिं ददतु, एष समुदितोऽर्थो ज्ञेयः*)

अथ तीर्थंकरा आरोग्यबोधिं समाधिं ददति, इति विषयः कथं सत्यः? यतः तीर्थंकराः वीतरागा सन्ति, तथा, इदं असत्यमपि न, यतः तं तस्य ध्यानात् प्राप्नोति, अतःशास्त्रकाराः इदंजातीयां प्रार्थनां 'असत्यामृषा' नामिकां चतुर्थीभाषां कथयन्ति. अतः तीर्थंकरा माम् (मम) पुरतः एवं रीत्या प्रार्थना पुनः पुनः कर्त्तव्या, एतद्—विषयिणीं चर्चा. आक्षेपपरिहारपूर्विकां सुंदर—शैल्या, अत्र निरूपयति.—

**आह—शङ्का** =किमिदं 'आरोग्यबोहिलाभं समाधिवरमुत्तमं ददतु' इत्यादिवाक्यं निदानमुत नेति? यदि निदानमलमनेन, सूत्र—प्रतिषिद्धत्वात् (दशाश्रुतस्कन्धादि—सूत्रे निदानप्रतिषेधः कृतोऽस्ति) यदि निदानं न चेत्तदा तत्प्रार्थनं सार्थकं वाऽनर्थकं किं? यद्याद्यः पक्षः, तेषां रागादिमत्त्वप्रसङ्गः, (वीतरागेषु—अर्हदादिषु रागादिमत्तारूपप्रसङ्गः—वीतरागा अपि रागादिमन्तःस्युरिति महापत्तिः, वीतरागावीतरागयोः कः प्रतिभेदः इति अतिप्रसङ्गः स्यात्)

रागादिमत्तास्वीकारे प्रार्थनाप्रवीणे प्राणिनि तथादानात्—प्रार्थनाकरणेऽत्यन्तकुशले यथाप्रार्थितं (प्रार्थितारोग्यबोधिलाभादि) दानाद्—वितरणात् सार्थकं प्रार्थनमिति, अतिप्रसङ्गो ज्ञेयः, अथ चरमः पक्षः (प्रार्थनं निरर्थकमिति.) आरोग्यादिदानविकला एते इति जानानस्यापि प्रार्थनायां मृषावाद—प्रसङ्ग इति.

**समाधानम्** =अत्रोच्यते, एतत्—'आरोग्यबोधिलाभं समाधिवरमुत्तमं ददतु' इत्येतद्वाक्यं, 'न निदानेत्यादि' नैव निदानं—(व्युत्पत्तिजन्योऽर्थः) नितरां दायते—लूयते,

(१) सम्यग्दर्शनस्य प्रपञ्चः (सप्तषष्टिभेदप्रभेदरूपः) स एव बहलः (सुदृढः—अत्यन्तगाढः) मूलजालः (मूलस्य जालं—समूहः) यस्य स (धर्मकल्पतरुः) (सम्यक्त्वसम्बन्धि—श्रद्धानचतुष्ट्यादिसप्तषष्टिभेदप्रभेदरूप—प्रपञ्चमय—सुदृढमूल—समुदायविशिष्ट इत्यर्थः)

(२) ज्ञानदर्शनादि—विषयक—विशुद्धि—विनयविधिरूप—समुन्नत—स्कन्ध (प्रकाण्डमस्तक)स्य बन्धो (रचना) यत्र स (धर्मकल्पतरुः) (ज्ञानदर्शनादि—विषयकविशुद्धदशविध—विनयवैयावृत्त्यादिसहित) विधिरूप वृद्धि—समुन्नति (शुद्धि—सहित) स्कन्धः, (शाखाप्रशाखाजनकत्वेन प्रसिद्धः) कथ्यते, तस्य बन्धः (बन्धन—रचनाविशिष्टः)

(३) विहिता ये, अवदाताः (निर्मलाः) दानशीलादिरूपा भेदास्तेषां भेदाः प्रभेदाः, तद्रूपाः शाखाश्च शाखायाः या शाखाः–उपशाखाः भेदप्रभेदरूपशाखोपशाखाभिः खचितः–मिश्रितः ( संयुक्तः ) ( धर्मकल्पतरुः )

(४) निरतिशया (नितरांअतिशयाः) सुरनररूपभवतः प्रभवा–जन्या या सुखसम्पत्तिः सैव प्रसूनानि–पुष्पाणि तैः, आकीर्णो व्याप्तः (धर्मकल्पतरुः)

(५) अनभ्यर्णी कृता दूरीकृता चासौ निखिल (समस्त) व्यसनैर्दुःखैर्व्याकुलता च, अनभ्यर्णीकृतनिखिलव्यसनव्याकुलता, अत एव शिवश्चासौ आलयश्च–निःश्रेयसरूपस्थानस्य (अखंड–अनन्तात्मक) शर्मरूपं फलं तेनोज्ज्वलः–स्पष्टः (धर्मकल्पतरुः)

अर्थाद् विशेषणपञ्चकविशिष्ट एष धर्मकल्पवृक्षः, अनेकसुराणां समृद्ध्यादेराशंसन–प्रार्थनादिरूपपरिणामपरशुना (कुठारेण) नितरां दायते–लूयते, तन्निदानमिति व्युत्पत्तिजन्योऽर्थः,

परन्तु, एतद्–आरोग्यबोधिलाभादिप्रार्थनं न निदानं, यतः 'तल्लक्षणायोगात्' –निदानलक्षणाघटनात्,

## निदानलक्षणस्य भावना—

निदानलक्षणम्=द्वेषाऽभिष्वङ्गमोहगर्भत्वं निदानस्य लक्षणम्

(१) द्वेषः–मत्सरः–नीचता–दुर्जनता,

(२) अभिष्वङ्गः–विषयानुग्रहः,–विषयान् प्रत्युत्कटरागः.

(३) मोहः–अज्ञानं, ततस्ते द्वेषाऽभिष्वङ्गमोहागर्भाः–अन्तरङ्गकारणं यस्य तत् द्वेषाऽभिष्वङ्गमोहगर्भं निदानम्, तथा–द्वेषादिगर्भतया निदानस्यागमे प्रसिद्धत्वात्–रूढत्वात्,

रागद्वेषगर्भयो निदानयोः सम्भूति–अग्निशर्मादिषु (१—वन्दारुवन्दक–चक्रवर्तिनःस्त्रीरत्नस्य कोमल–कवर्याः केशकलापस्पर्शनमात्रेण कामरागान्धेन संभूतिमुनिना निदानं कृतं अहं भवान्तरे एतत्तपआदेः प्रभावेण स्त्रीरत्नस्य भोक्ता चक्रवर्ती भवेयमिति, तत एतन्निदानेन चक्रवर्ती जातः सः, सप्तमीपृथिवीरूप–नरकस्य–अतिथि जातः, सुदीर्घसंसारवर्धकोऽभवदिति, २—प्रथमे भवेऽग्निशर्मणा तापसेन कल्याणमित्रगुणसेननामक– महाराजस्योपरि द्वेषेण वैरेण निदानं कृतं, "प्रतिभवं राज्ञोऽस्य मारको भवेय'मिति एतेन निदानेनोग्रतप–स उपरि जलं प्रतिक्षिप्तमभितः सुदीर्घतरः संसारो वर्धितः।) प्रसिद्धत्वेन रागगर्भदोषगर्भरूपनिदानलक्षणं सुबोधं भवति, अत एव स्पष्टीकरण–विवेचन–कथनरूप–निर्देशमनादृत्य मोहगर्भनिदानस्य लक्षणं लक्षयति.

धर्म्माय हीनकुलादिप्रार्थनं मोहः, अतद्धेतुकत्वात् , ऋद्ध्यभिष्वङ्गतो धर्म्मप्रार्थनाऽपि मोहः, अतद्धेतुकत्वादेव, ॥ तीर्थकरत्वेऽप्येतदेवमेव प्रतिषिद्धमिति, अत एवेष्टभावबाधकृदेतत्,

तथेच्छाया एव तद्विघ्नभूतत्वात् तत्प्रधानतयेतरत्रोपसर्जनबुद्धिभावात् अतत्त्वदर्शनमेतत्, महदपायसाधनं, अविशेषज्ञता हि गर्हिता–

पृथग्जनानामपि सिद्धमेतत, योगिबुद्धिगम्योऽयं व्यवहारः, सार्थकानर्थकचिन्तायां भाज्यमेतत्, चतुर्थभाषारूपत्वात्तदुक्तं–

"भासा असच्चमोसा णवरं भत्तीऍ भासिया एसा ।
न हु खीणपेज्जदोसा देंति समाहिं च बोहिं च ॥ १ ॥
तप्पत्थणाएँ तहवि य, ण मुसावाओवि एत्थ विण्णेओ ।
तप्पणिहाणाओ च्चिय तग्गुणओ हंदि फलभावा ॥ २ ॥
चिंतामणिरयणादिहिँ, जहा उ भव्वा समीहियं वत्थुं ।
पावंति तह जिणेहिं तेसिं रागादभावेऽवि ॥ ३ ॥
वत्थुसहावो एसो अउव्वचिन्तामणी महाभागो ।
थोऊणं तित्थयरे पाविज्जइ बोहिलाभोत्ति ॥ ४ ॥
भत्तीऍ जिणवराणं खिज्जन्ती पुव्वसंचिया कम्मा ।
गुणपगरिसबहुमाणो कम्मवणदवाणलो जेण ॥ ५ ॥"

एतदुक्तं भवति–यद्यपि ते भगवन्तो वीतरागत्वादारोग्यादि न प्रयच्छन्ति, तथाप्येवंविधवाक्यप्रयोगतः

प्रवचनाराधनतया सन्मार्ग्गवर्त्तिनो महासत्त्वस्य तत्सत्तानिबन्धनमेव तदुपजायत इति गाथार्थः ॥ ६ ॥

पं०..."धम्मीय" धर्म्मनिमित्तमित्यर्थो "हीनकुलादिप्रार्थनं" हीनं-नीचं विभवधनादि-भिर्यत्कुलम्-अन्वय आदिशब्दात्कुरूपत्वदुर्भगत्वानादेयत्वादिग्रहः, भवान्तरे तेषां प्रार्थनम्-आशंसनं, किमित्याह-"मोहो" मोहगर्भं निदानं, कुत इत्याह-"अतद्धेतुकत्वाद्" अविद्यमानास्ते हीन-कुलादयो हेतवो यस्य स तथा तद्भावस्तत्त्वं तस्मात्, अहीनकुलादिभावभाजो हि भगवन्त इवाविकलधर्म्मभाजनं भव्या भवितुमर्हन्ति नेतरे इति, उक्तं च-"हीनं कुलं बान्धववर्जितत्वं, दरिद्रतां वा जिनधर्म्मसिद्धयै। प्रयाचमानस्य विशुद्धवृत्तेः, संसारहेतुर्गदितं निदानम् ॥ १ ॥" प्रकारान्तरेणापीदमाह-"ऋद्ध्यभिष्वङ्गतः" पुरन्दरचक्रवर्त्यादिविभूत्यनुरागेण "धर्म्मप्रार्थनापि" नूनं धर्म्माराधनमन्तरेणेयं विभूतिर्न भविष्यतीत्याशया धर्म्माशंसनमपि, किं पुनर्हीनकुलादि-प्रार्थनेत्यपिशब्दार्थः, किमित्याह-"मोहः" उक्तरूपः, कुत इत्याह-"अतद्धेतुकत्वाद्" अविद्यमान उपसर्जनवृत्त्याऽऽशंसितो धर्म्मो हेतुर्यस्याः सा तथा तद्भावस्तत्त्वं तस्मादेव अनुपादेयता-परिणामे, नैवोपहतत्वेन धर्म्मस्य ततोऽभिलषितऋद्ध्यसिद्धेः यत एवं ततः "तीर्थकरेऽपि" अष्टमहाप्रातिहार्यपूजोपचारभाजि प्राणिविशेषे, किं पुनरन्यत्र पुरन्दरादौ विषयभूते? "एतत्" प्रार्थनमेव ऋद्ध्यभिष्वङ्गेणैव, यथाऽयं भुवनाद्भुतभूतविभूतिभाजनं भुवनैकप्रभुः प्रभूतभक्तिभर-निर्भरामरनिकरनिरन्तरनिषेव्यमाणचरणो भगवांस्तीर्थकरो वर्त्तते, तथाऽहमप्यमुतस्तपःप्रभृतितोऽ-नुष्ठानाद्भूयासमित्येवंरूपं न पुनर्यन्निरभिष्वङ्गचेतोवृत्तेर्धर्म्मादेशोऽनेकसत्त्वहितो निरुपमसुख-सञ्जनकोऽचिन्त्यचिन्तामणिकल्पो भगवानहमपि तथा स्यामित्येवंरूपं निषिद्धं-निवारितं दशाश्रुत-स्कन्धादौ तदुक्तं-"एत्तो य दसाईसुं तित्थयरंमि वि नियाणपडिसेहो। जुत्तो भवपडिबन्धं सामिस्संगं तयं जेणं ॥ १ ॥ जं पुण निरभिस्संगं धम्माएसो अणेगसत्तहिओ। निरुवमसुह-संजणओ अउव्वचिन्तामणिकप्पो ॥२॥" इत्यादि, "अत एव" ऋद्ध्यभिष्वङ्गतो धर्म्मप्रार्थनाया मोहत्वादेव "इष्टभावबाधकृत्" इष्टो भावो निर्वाणानुबन्धी कुशलः परिणामस्तस्य बाधकृत्-व्याघातकारि "एतत्" प्रकृतनिदानं कुत इत्याह—

"तथेच्छाया एव" धर्म्मोपसर्जनीकरणेन ऋद्ध्यभिलाषस्यैव "तद्विघ्नभूतत्वाद्" इष्टभावविघ्नभूतत्वाद्, एतत्कुत इत्याह-"तत्प्रधानतया" ऋद्धिप्राधान्येनेतरत्र-धर्म्मे "उपसर्जनबुद्धिभावात्" कारणमात्रत्वेन गौणाध्यवसायभावाद्, इदमेव विशेषतो भावयन्नाह-"अतत्त्वदर्शनमेतद्" अपरमार्थावलोकनं विपर्यास इत्यर्थः, एतत्-प्रकृतनिदानं, कीदृगित्याह-"महदपायसाधनं" नरकपाताद्यनर्थकारणं, कुत इत्याह-"अविशेषज्ञता" सामान्येन गुणानां पुरुषार्थोपयोगिजीवाजीवधर्म्मलक्षणानां दोषाणां-तदितररूपाणां तदुभयेषां च विशेषो विवरको विभाग इत्येकोऽर्थस्तस्यानभिज्ञता-विपरीतबोधरूपाऽर्थकृत्यनर्थप्राप्तिहेतुतया हिंसानृतादिवत् "हिः" यस्मात् "गर्हिता" दूषिता, ननु कथमिदं प्रत्येयमित्याशङ्क्याह—

"पृथग्जनानामपि" पृथक्-तथाविधालौकिकसामयिकाचारविचारादेर्बहिःस्थिता बहुविधा बालादिप्रकारा जनाः-प्राकृतलोकाः पृथग्जनास्तेषामपि, किं पुनरन्येषां शास्त्राधीनधियां सुधिया-

मित्यपिशब्दार्थः, सिद्धं-प्रतीतमेतद्-अविशेषज्ञतागर्हणं, 'नार्घन्ति रत्नानि समुद्रजानि परीक्षका यत्र न सन्ति देशे। आभीरघोषे किल चन्द्रकान्तं, त्रिभिः किलाटैः (भिवरातैः) प्रवदन्ति गोपाः ॥ १ ॥ अस्यां सखे! बधिरलोकनिवासभूमौ, किं कूजितेन तव कोकिल! कोमलेन। एते हि दैववशतस्तदभिन्नवर्णं, त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥२॥ इत्याद्यविशेषज्ञ-व्यवहाराणां तेषामपि गर्हणीयत्वेन प्रतीतत्वात्, स्यादेतद्-अभ्युदयफलत्वेन धर्मस्य लोके रूढत्वात्तथैव च तत्प्रार्थनायां काऽविशेषज्ञता इत्याशङ्क्याह-"योगिबुद्धिगम्योऽयं व्यवहारो" मुमुक्षुबुद्धिपरिच्छेद्योऽयं ऋद्ध्यभिष्वङ्गतः धर्मप्रार्थनाया अविशेषज्ञतारूपो व्यवहारः, धर्मस्य चारम्भावसानसुन्दरपरिणामरूपत्वादृद्धेश्च पदे पदे विपदां पदभूतत्वात् महान् विशेषः, अन्यस्य च भवाभिष्वङ्गत इत्थं बोद्धुमशक्तत्वात् "सार्थकानर्थकचिन्तायां तु भाव्यमेतत्" चतुर्थः—

चतुर्थभाषारूपत्वादिति, अयमभिप्रायः-चतुर्थी हि एषा भाषा आशंसारूपा न कञ्चन सिद्धमर्थं विधातुं निषेद्धुं वा समर्थेत्यनर्थिका, प्रकृष्टशुभाध्यवसायः फलमस्या भवतीति सार्थिकेत्येवं भाव्यतेति ॥

टी०...मोहगर्भस्य निदानस्य लक्षणं च—"धर्माय हीनकुलादिप्रार्थनं मोहः, अतद्धेतु-कत्वात्," धर्मस्य निमित्तं-धर्मरूपफल-प्राप्तये, हीनं=विभव-विभुतादिभिर्नीचं यत्कुलं=अन्वयः, आदिशब्दात् कुरूपत्व-दुर्भगत्वानादेयत्वादे ग्रहः (ग्रहणम्) भवान्तरे (अन्यभवे) तेषां-हीन-कुलादीनां प्रार्थनं-आशंसनम् "मोहः" मोहगर्भं निदानं, "अहेतुकत्वाद्" अविद्यमानास्ते-हीनकुलादयो हेतवो यस्य (धर्मस्य) स, "अतद्हेतुकः," तद्भावस्तत्त्वं, तस्मात्-अतद्हेतु-कत्वात्, धर्मं प्रति हीनकुलादयो न हेतवः, परन्तु मोहोदयेन ते मन्यन्ते धर्मं प्रति हीन-कुलादयः, अप्रतिबन्धकाः। हीनकुलादिभावभाजो धर्मभाजनं प्रायो भव्या—न योग्या भवन्ति, परन्तु अहीन (उत्तमपरमोत्तम) कुलान्वयसुरूपत्वसुभगत्वादेयत्वावच्छिन्नादित्वरूपभावभाजो हि भगवन्त इवाविकल (सर्वांशीय-सम्पूर्ण) धर्मभाजनं भव्या भवितुमर्हन्ति नेतरे इति उक्तं च "हीनकुलं बान्धववर्जितत्वं, दरिद्रतां वा जिनधर्म-सिद्धये।

प्रयाचमानस्य विशुद्धवृत्तेः, संसारहेतुर्गदितं निदानम् ॥"

'विशुद्धवृत्तेरित्यत्र विशुद्धावृत्तिर्यस्य स (वृत्तिः-वर्तनं-आजीविका-स्थितिः इत्यर्थः) तस्य।

प्रकारान्तरेणापीदमाह-'ऋद्ध्यभिष्वङ्गतः' पुरन्दर-चक्रवर्त्यादिविभूत्यनुरागेण "धर्म-प्रार्थनाऽपि" नूनं धर्माराधनमन्तरेणेयं विभूतिर्न भविष्यतीत्याशया धर्माशंसनमपि, किं पुनर्हीनकुलादिप्रार्थनेत्यपिशब्दार्थः, किमित्याह-'मोहः' उक्तरूपः, कुत इत्याह-'अतद्धेतुकत्वाद्' अविद्यमान उपसर्जनवृत्त्याऽऽशंसितो धर्मो हेतुर्यस्याः सा, तथा तद्भावस्तत्त्वं, तस्मादेव, अनुपादेयतापरिणामे नैवोपहतत्वेन धर्मस्य ततोऽभिलषित-ऋद्ध्यसिद्धेः, यत एवं ततः अर्थाद्—

पुरन्दरादि–ऋद्धि–सम्पद् विभूत्यनुरागमुख्यत्वापेक्षया, धर्माराधनस्याविनाभावित्वेन, निश्चयतः विभूतिं प्रति विभूत्याशया ( मुख्यहेतुरूपया ) धर्माराधन–विषयकाशाऽपि, मोहगर्भं निदानं ज्ञेयम्, यतो गौणवृत्त्येष्टधर्मनिष्ठ–हेतुत्वाभाववत्त्वप्रयुक्तामुख्यत्वेनाऽनुपादेयतापरिणामजन्यधर्मध्वंसो भवति, ततो धर्मध्वंसोऽतोऽभिलषित–ऋद्धिसिद्ध्यभावः ।

यत एवं ततः 'तीर्थकरेऽपि' अष्टमहाप्रातिहार्यपूजोपचारभाजि प्राणिविशेषे तीर्थकरात्मनि ( विशिष्टात्मनि ) किं पुनरन्यत्र पुरन्दरादौ प्रार्थना–विषय–भूते 'एतत्' प्रार्थनमेव ऋद्धि-अभिष्वङ्गेण–आसक्तित एव,

यथाऽयं भुवनाद्भुतभूतविभूतिभाजनं भुवनैकप्रभुः प्रभूतभक्तिभरनिर्भरामर–निकरनिरन्तर-निषेव्यमाणचरणो भगवांस्तीर्थकरो वर्तते, तथाऽहमप्यमुतस्तपः प्रभृतितोऽनुष्ठानाद् भूयासमित्येवं-रूपं, न पुनर्यन्निरभिष्वङ्गचेतोवृत्तिर्धर्मादेशोऽनेकसत्त्वहितो निरुपमसुखसञ्जनकोऽचिन्त्यचिन्तामणि-कल्पो भगवानहमपि तथा स्यामित्येवंरूपं निषिद्धं–निवारितं दशाश्रुतस्कन्धादौ तदुक्तं–

"एत्तो यदसाईसुं तित्थयरंमि वि नियाणपडिसेहो ।
जुत्तो भवपडिबन्धं साभिस्संगं तयं जेणं ।। १ ।।
जं पुणनिरभिस्संगं धम्माएसो अनेकसत्तहिओ ।
निरुवमसुहसंजनओ अउव्वचिन्तामणिकप्पो ।।२।।"

अर्थात्तीर्थंकरत्वविषयकाशंसारूपं निदानं तदैव भवति यदा, पूजातिशयादिगत–परमैश्वर्य–महेन्द्रादिकृतकल्याणकादिगतमहाभिषेकादिमहैश्वर्यं दृष्ट्वा पौद्गलिकबाह्यविभूतिमपराभूतिं निरीक्ष्य कश्चिद् सम्यक्त्वादिरहितत्वेन केवलकृत्रिमानित्यभौतिकविभूतिप्रकर्षनिष्ठबुद्धिद्वारा, विभूतिप्रकर्षमात्रा-शंसाद्वारा, मिथ्या ( स्ववशाद् ) आत्मीयविभूतिप्रकर्षमज्ञात्वाऽश्रद्धाय बाह्यवैभवयाचनारूपाशंसा चेत्तदा तीर्थंकरत्वपदाशंसा निदानरूपत्वेन, निषिद्धत्वेनानाचाररूपैव। परन्तुनिरभिष्वङ्ग (निरभिष्वंगं) –चेतोवृत्ते धर्मादेशः, ( धर्मोपदेशः ) अनेक प्राणिप्रकृष्टकल्याणकारी, निरुपमसुखसञ्जनकोऽ-चिन्त्यचिन्तामणिकल्पो भगवानहमपि तथास्यामित्येवंरूपं ( तीर्थंकरत्व ) प्रार्थनं न निषिद्धम्–न निवारितम्, तथा च साभिष्वङ्गत्वनिरभिष्वङ्गत्व–प्रयुक्त–तीर्थंकरपदाशंसायां निदानत्वाऽनिदानत्वे भवत इत्यर्थः ।

'अत एव' ऋद्ध्यभिष्वङ्गतो धर्मप्रार्थनाया मोहत्वादेव, इष्टो भावो निर्वाणानुबन्धी कुशलः परिणामस्तस्य बाधकृत्–व्यावृत्तिकारि 'एतद्' प्रकृतनिदानं ऋद्ध्यभिष्वङ्गजन्यधर्म-प्रार्थनानिष्ठमोहत्वप्रयुक्तं, इष्टभाव–निर्वाणानुबन्धिकुशलपरिणामप्रतिबन्धकं, प्रकृतनिदानं (साभिष्वङ्ग-

तीर्थकरनिदानं) यतः 'तथेच्छाया एव' धर्मं गौणीकृत्य, ऋद्धि—अभिलाष एवेष्टभावं (मोक्षभावं) प्रति विघ्नरूपः, यतः, ऋद्धिनिष्ठप्राधान्यप्रयुक्तधर्मनिष्ठगौणबुद्धिभावः (कारणमात्रत्वेन-गौणाध्यवसायभावः)

अत्रैव विशेषतो भावना=एतत् प्रकृतनिदानम् (ऋद्धीच्छाया, मुख्यत्वपूर्वक-तीर्थंकरपद (धर्म) विषयकाशंसा) 'अतत्त्वदर्शनम्' अपरमार्थावलोकनं विपर्यासः (मिथ्याज्ञानं—भ्रान्तिज्ञानं) इदं, अतत्त्वदर्शनं 'महदपायसाधनं'—नरकपाताद्यनर्थकारणं, प्रकृतिनिदानं, मिथ्यात्वप्रयुक्तातत्त्व-दर्शनं विपर्यासरूपं नरकपाताद्यनर्थकारणं भवति,

**तत्र हेतुं प्रदर्शयति—**

"अविशेषज्ञता हि गर्हिता" सामान्येन, पुरुषार्थोपयोगिनो जीवस्याजीवस्य च धर्मरूपा गुणास्तेषां, गुणेतररूपाणां दोषाणां, गुणदोषाणां च विशेषः—विवरणकारको विभागः,

जीवगतधर्माःगुणाःपुरुषार्थोपयोगिनः=जीवगता वैराग्याऽनासक्ति—शुद्धज्ञानादिस्वरूपोपशमेन्द्रियदमनहेयोपादेयोपेक्षणीय—तत्त्वदृष्टिप्रभृतयो धर्माः सत्पुरुषार्थोपयोगिनः,

जीवगतदोषाः—जीवगता रागद्वेषकामक्रोधलोभजडदृष्टिप्रभृतयो दोषाः, सत्पुरुषार्थोपघातकाः,

अजीवगतगुणे, पुद्गलगुणे तथा तद्दोषचिन्तनं=शटनपतनविध्वंसनादिः पुद्गलगुणः, इति चिन्तनादिद्वारा, वैराग्यादिद्वारा—पुरुषार्थोपयोगि, यदाऽदोषत्वेनेष्टवर्णवर्ण—गन्ध—रस—स्पर्शादिधर्माः, रागादिजनकत्वेन सत्पुरुषार्थोपघातकाः,

एतादृशी=अविशेषज्ञता, विपरीतबुद्धिरात्महितघातस्य नरकाद्यनर्थप्राप्तेः कारणत्वेन हिंसा-ऽनृतादिवत् सा गर्हिता—दूषिता, 'पृथग्जनानामपि' पृथक्—तथाविधालौकिकसामायिकाचार-विचारादे र्बहिःस्थिता बहुविधा बालादिप्रकारा जनाः—प्राकृतलोकाः पृथग्जनास्तेषामपि, किं पुनरन्येषां शास्त्राधीनधियां सुधियामित्यपिशब्दार्थः, सिद्धं—प्रतीतमेतद्—अविशेषज्ञतागर्हणं.

"नार्घन्ति रत्नानि समुद्रजानि, परीक्षका यत्र न सन्ति देशे।
आभीरघोषे किल चन्द्रकांतं, त्रिभिः किलाटैः (भिर्वशटैः) प्रवदन्ति गोपाः ॥१॥

"अस्यां सखे! बधिरलोकनिवासभूमौ, किं कूजितेन तव कोकिल! कोमलेन।
एते हि दैववशतस्तदभिन्नवर्णं, त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥२॥"

इत्याद्यविशेषज्ञव्यवहाराणां तेषामपि गर्हणीयत्वेन प्रतीतत्वाद्, स्यादेतद्—अभ्युदयफलत्वेन धर्मस्य लोके रूढत्वात्तथैव च तत्प्रार्थनायां, काऽविशेषज्ञता इत्याशङ्क्याह—'योगिबुद्धिगम्योऽयं व्यवहारः' "मुमुक्षुबुद्धिपरिच्छेद्योऽयं व्यवहारो" मुमुक्षुबुद्धिपरिच्छेद्योऽयं, ऋद्धयभिष्वङ्गतो

धर्मप्रार्थनाया अविशेषज्ञतारूपो व्यवहारः, धर्मस्य चारम्भावसानसुन्दरपरिणामरूपत्वादृद्धेश्च पदे पदे विपदां पदभूतत्वात्, महान् विशेषः, अन्यस्य च भवाऽभिष्वङ्गत इत्थं बोद्धुमशक्तत्वात् 'सार्थकानर्थक–चिन्तायां तु भाज्य' मेतत्।

अर्थाद्, अभ्युदयरूपं फलं धर्मस्य रूढत्वेन मन्यमानाःसंसारव्यवहारिणो भवन्ति, अभ्युदयफलाय धर्मप्रार्थनायामविशेषज्ञता, एतादृशी दृश्यते तथाहि ऋद्धयभिष्वङ्गतोऽभ्युदयाय क्रियमाणायां धर्मप्रार्थनायामविशेषज्ञ–व्यवहारः योगि–मुमुक्षुबुद्धिगम्यो–गोचरोऽस्ति, दृश्यतां तावद् ऋद्धिधर्मयोर्मध्ये, ईदृशो विशेषो–विवेको ज्ञेयः, आरम्भत आरभ्य परिसमाप्ति (अवसान) पर्यन्तं सुन्दरपरिणाम (भाव–फल) वान् धर्मोऽस्ति, ऋद्धिस्तु पदे पदे विपदां पदभूताऽस्ति, एतादृशो विशेषबोधो, भवाऽभिनन्दिनां संसारसागरं प्रति, अपाररागसागरवतां भवितुमशक्योऽस्ति, "सार्थकानर्थकचिन्तायां तु भाज्यमेतत्" 'चतुर्थभाषारूपत्वादि' ति, अयमभिप्रायः=चतुर्थी हि एषा भाषा आशंसारूपा न कञ्चन सिद्धमर्थं विधातुं निषेद्धुं वा समर्थेति–अनर्थिका,

प्रकृष्टशुभाध्यवसायः फलमस्या भवतीति सार्थिकेत्येवं भाज्यतेति ॥

('समाधिवरमुत्तमं ददतु' इति वचनमेतत् सार्थकनिरर्थक–चिन्तायां विकल्पनीयं भजनाऽत्रास्ति यतः चतुर्थभाषारूपमस्तीति. )

तदुक्तं "भाषा असत्यामृषा, नवरं भक्त्या भाषिता एषा ।
न खलु क्षीणप्रेमदोषा, ददति समाधिं च बोधिं च ॥"

(१–सत्या–मृषा-सत्यामृषा–असत्यामृषेति भाषायाश्चत्वारो भेदा भवन्ति, तन्मध्यतः प्रस्तुतत्वेन चतुर्थी भाषा वर्ण्यते, तथाहि–असत्यामृषारूपाया भाषाया, द्वादशभेदाः कथ्यन्ते, एषा भाषा न सत्या, न मृषा, सत्याऽमृषारूपा नास्ति, किञ्चास्या व्यवहार एव हेतुरस्ति,

(१) आमंत्रणी='हे विबोध'! एवं सम्बोधनरूपा,
(२) आज्ञापनी='त्वमेवं कुरु' इति–आज्ञारूपा,
(३) याचनी=' त्वं मह्यममुकं देहि ' इति याचनारूपा,
(४) प्रच्छनी=तज्ज्ञपार्श्वे ' प्रश्नस्य समाधानं प्रष्टव्यम् ' इति प्रच्छनरूपा,
(५) प्रज्ञापनी=शिष्यायोपदेशो दातव्यः 'हिंसा न कार्या' इति प्रज्ञापनारूपा,
(६) प्रत्याख्यानी=याचकस्य नेति कथनरूपा,
(७) इच्छानुलोमा=कश्चित् किञ्चित्कार्यारम्भकरणे कञ्चित् पृच्छेच्च स कथयेत् 'इदं कृत्यं कुरु' मदीयानुमोदनाऽस्तीति,

(८) अनभिगृहीता=बहुकार्यकरणावसरे कश्चित् कञ्चित् पृच्छेदिदं कृत्यं कुर्याम् ? तदा कथयेत्स 'त्वं यथामति तत्कार्यं कुर्याः'

(९) गृहीता='अधुनेदं कर्त्तव्यम्' इत्यादिकथनमिति,

(१०) संशयकरणी=अनेकार्थकशब्दस्य प्रयोगीकरणं यथा 'सैन्धवमानयेत्यत्र सैन्धवस्य द्वावर्थौ' भवतः (१) लवणं (२) अश्वश्चेति, आनयनकारकेण किमानेतव्यम् इति तस्य निर्णयकरणमवशिष्टं भवतीति,

(११) व्याकृता=स्पष्टार्थकःशब्दो वक्तव्यः,

(१२) अव्याकृता=अतिशयेन गहनार्थकमथवाऽव्यक्ताक्षरकं कथनम्,

"तत्प्रार्थनायां तथाऽपि च, न मृषावादोऽप्यत्र विज्ञेयः ।
तत्प्रणिधानतः खलु तद्‍गुणतोऽवश्यं फलभावः ॥२॥
चिन्तामणिरत्नादिभिः, यथा तु भव्याःसमीहितं वस्तु ।
प्राप्नुवन्ति तथा जिनैः, रागाभावेऽपि (रागाद्यभावेऽपि) ॥३॥
वस्तुस्वभाव एषः, अपूर्वचिन्तामणि र्महाभागः ।
स्तुत्वा तीर्थकरान्. प्राप्यते बोधिलाभ इति ॥ ४ ॥
भक्त्या जिनवराणां, खिद्यन्ते (क्षीयन्ते) पूर्वसंचितानि कर्माणि ।
गुणप्रकर्षबहुमानः कर्मवनदवानलो येन ॥५॥"

**अर्थात्**--"समाधिवरमुत्तमं ददतु" इति वचनप्रयोगः, सार्थकानर्थक चिन्तायां (प्रश्ने वा) भजना--विकल्पो वर्तते, यतः, चतुर्थीव्यवहाररूपाऽस्ति, एष विषयःपूर्वाचार्यैः कथितोऽस्ति यत--

(१) एषा चतुर्थी, असत्याऽमृषा भाषाऽस्ति, विशेषस्तु भक्त्या भाषितैषा खलु क्षीणरागद्वेषा वीतरागाः साक्षात् समाधिं च बोधिं च न ददति ।

(२) तथापि वीतरागानामग्रतो या प्रार्थना क्रियते तत्र प्रार्थनावचसि मृषावादरूपदोषो नास्ति, तत्प्रणिधानः, यतश्चित्ते--परिणामेण सुन्दरात्महितस्याशंसनमस्ति, समाधिबोधिरूपं निर्मलं प्रणिधानं भवति, तद्‍गुणतः=तथाऽर्हतामचिन्त्यप्रभावेण समाधिबोधिरूपं फलं निष्पद्यते एवं वर्तमाननिर्मलपरिणतिस्तथा भाविसुन्दरपरिणामो यत्र प्रार्थनायां वर्त्तते, तदा मृषावादः कथं तिष्ठेत् ?

(३) यथाचिन्तामणिरत्न--दक्षिणावर्तशङ्ख--कल्पवृक्ष--कामकुम्भादिः, यद्यपि पूजकस्योपरि न रज्यति, रागेण किमपि स्वकरतो न यच्छति, तथापि चिन्तामणि--प्रभृति--द्वारा तु भव्या

मनोमनीषितं प्राप्नुवन्ति, (एवं पूजकाः पूजकोपरिरागद्वेष–शून्यपरमात्मद्वारा परमात्मभक्ति-स्तुतिकरणेन भव्या इष्टफलसिद्धिं प्राप्नुवति) अत उच्यते 'परमात्मतः' फलरूपबोधिसमाधिः प्राप्तो भवति, किञ्चातो बोधिदं समाधिदं प्रभुमर्हन्तं स्तुवे सदैवं प्रोच्यते।

(४) यथा चिन्तामणिरत्नादेरुपासनाद्वारा फलप्राप्तावपि निश्चयतश्चिन्तामणिरत्नस्य एतादृग्वस्तुस्वभावोऽस्ति यत्, तस्योपरि रागाभावेऽपि तत्फलं ददाति, तथाऽर्हतां प्रभूणां, एतादृग्वस्तुस्वभाव एवाऽस्ति, यदेतेषां परमात्मनां स्तुतितो बोधिलाभादि भव्या रागा-भावेऽपि लभन्ते, 'स्वभावस्तु पर्यनुयोगानर्होऽस्ति,'

(५) अर्हतामेतादृशोऽचिन्त्यप्रभावोऽस्ति, यदेषां भक्तिकरणतः पूर्वसञ्चितानि कर्माणि क्षीयन्ते, यतः स्तुतिभक्तिबहुमानप्रभृतिषु परमात्मनां परमगुणानां परमबहुमानोऽस्ति, एतच्च-कर्मवनदहनदावानलसदृशं कर्मसञ्चयस्तु मिथ्यात्वादिदोषान् गृहीत्वैव जातः, ततः स्वाभाविकं वस्तु वर्त्तते यत् सर्वज्ञवीतरागगुणविषयकभक्तिबहुमानतो दोषा नश्यन्ति।

(६) एतदुक्तं भवति–यद्यपि ते भगवन्तो वीतरागत्वात् प्रार्थनीयारोग्यादिं, साक्षान्न प्रयच्छन्ति, तथाप्येवंविधवाक्यप्रयोगतः="समाहिवरमुत्तमंदितु" इत्यादि प्रार्थनावचनं–गणधर रचितवचनं तत्र तीर्थंकरस्य सम्मत्या 'जिनप्रवचनं' तद्–श्रद्धाय, तद्द्वारा क्रियमाणप्रार्थनायां-प्रवचनाराधनं ज्ञेयं, तत्प्रवचनाराधनतया प्रार्थनाकारकस्य सन्मार्गवर्तिनः साधोः श्रावकस्य च सन्मार्ग–सम्यग्दर्शनादिमार्गानुसारिणः, तत्सत्तानिबन्धनमेव तदुपजायते='आरोग्यबोधिलाभं समाधिवरमुत्तमं ददतु' इत्यादि–भक्तिगर्भितवचनरचनाद्वारा, प्रवचनस्याराधना भवति, ततः सन्मार्गवर्तिना महात्मना, आरोग्यरूपसिद्धत्वजनकबोधिलाभप्रयुक्तोत्तमवरसमाधिमूलकारणभूतमारा-धनमाप्यतेऽथवा, आराधनायाःसत्ता यत्र मूलकारणमस्ति, तदारोग्यादि प्राप्यते, अर्थात्प्रवचना-राधनाद्वारा सन्मार्गवर्तिनो महापुरुषस्य, आरोग्यादि प्राप्तं भवति, किञ्च प्रवचनाराधना, एतादृशभक्तिरसभरपूरितवचनरचनया भवति, एवं परम्परया भगवन्तो भक्तानामारोग्यादिविषयिणीं प्रार्थनां पूरयन्त्येव।

अथाऽत्र श्रीसिद्धभगवतां स्तुतिकरणद्वारा, सिद्धस्थितेः सम्पूर्णवर्णनं, वैखरीवाण्या न शक्यमतस्तस्योपमाद्वारा यत् किञ्चित् सम्यग्दानं ददाति शास्त्रकारः–

**चंदेसु निम्मलयरा आइच्चेसु अहिअं पयासयरा।**
**सागरवरगंभीरा, सिद्धा सिद्धिं मम दिसंतु ॥७॥**

गाहा, व्याख्या—इह प्राकृतशैल्या आर्षत्वाच्च पञ्चम्यर्थे सप्तमी द्रष्टव्येति, चन्द्रेभ्यो निर्मलतराः, पाठान्तरं वा "चंदेहिं निम्मलयरत्ति" तत्र सकलकर्म्ममलापगमाच्चन्द्रेभ्यो निर्म्मलतरा इति, तथा, आदित्येभ्योऽधिकं प्रकाशकराः, केवलोद्द्योतेन विश्व-प्रकाशनादिति, उक्तं च—

"चंदाइच्चगहाणं पहा पगासेइ परिमियं खेत्तं ।
केवलियणाणलंभो लोयालोयं पगासेइ ॥ १ ॥"

तथा—सागरवरगम्भीराः' तत्र सागरवरः—स्वयम्भूरमणोऽभि-धीयते, परीषहोपसर्गाद्यक्षोभ्यत्वात्, तस्मादपि गम्भीरा इति भावना, सितं—ध्मातमेषामिति सिद्धाः, कर्म्मविगमात्कृतकृत्या इत्यर्थः, सिद्धिं—परमपदप्राप्तिं, मम दिशन्तु—अस्माकं प्रयच्छन्त्विति गाथार्थः, ॥७॥

[ इति श्रीमुनिचन्द्रसूरिविरचितललितविस्तरापञ्जिकायां चतुर्विंशतिस्तवः समाप्तः ॥ ]

टी०..."चंदेसु निम्मलयरा, आइच्चेसु अहियं पयासयरा ।
सागरवरगम्भीरा, सिद्धा सिद्धिं मम दिसन्तु ॥७॥ "

(१) चन्द्रत्वावच्छेदेनावच्छिन्ना यावन्तश्चन्द्राश्चराचरभेदेन ते असंख्याताः सकर्माणः सावद्यो बाह्या अशाश्वतास्तेषां समुदितचन्द्राणां या निर्मलता, बाह्यजगति वर्ततेऽतो लोका वदन्ति, चन्द्रा निर्मला—मलरहिताः, परन्तु, अर्हन्तो भगवन्तः परमात्मानः सदा सकलकर्म-मलाऽपगमात्—घाति—अघातिरूपः—सकलः – कर्मरूपभावमलस्तस्याऽपगमेन—क्षयेण, पूर्वोक्त-चन्द्रेभ्यो, आत्यन्तिकैकान्तिकानन्तकालीन—स्वाभाविकनिर्मलतराः, भगवतां निर्मलता चन्द्रेभ्यो-ऽनन्तगुणवती भगवद्भ्यश्चन्द्राणां निर्मलताऽनन्तगुणहीनतावती कथ्यते.

(२) तथा, आदित्येभ्योऽधिकं प्रकाशकराः, केवलोद्द्योतेन विश्वप्रकाशनादिति.
उक्तं च—"चन्द्रादित्यग्रहाणां प्रभा प्रकाशयति परिमितं क्षेत्रम् ।
कैवलिकज्ञानलम्भो, लोकालोकं प्रकाशयति ॥ "

यथा चन्द्रेभ्यो निर्मलतरास्तथा आदित्येभ्योऽधिकं प्रकाशकराः, अनित्यासंख्यसूर्याश्च परिमितक्षेत्रं प्रकाशयन्ति, तेभ्योऽपि, अधिकं प्रकाशकरा अर्हन्तो भवन्ति, यतः केवलज्ञान-प्रकाशेन विश्वप्रकाशकाः अर्थात् केवलज्ञानप्रकाशेन त्रैकालिकसमग्रपर्यायसमग्रद्रव्यरूपं विश्वं प्रकाशयन्ति.

(३) यथा चन्द्रेभ्यो निर्मलतरा यथाऽऽदित्येभ्योऽधिकं प्रकाशकरास्तथा 'सागरवरगम्भीराः' असङ्ख्यातद्वीपसमुद्रेभ्यः परोऽन्तिमः स्वयम्भूरमणनामकः सागरः, अतिगम्भीरो वर्त्तते, प्रलय-कालीन–प्रभञ्जनादिवायुसमूह उपरिष्टाद् वहमानेऽपि पुष्करावर्तमहामेघा वर्षेयुस्तथापि, अविकृत-स्वभावः—अक्षोभ्यस्वभावः, परमगम्भीरस्वभावःस्वयंभूरमणसमुद्रो निगद्यते तथा, अर्हन्तोऽपि, अपरिमितपरिषहैः घोरैरुपसर्गबर्गादिवातपुञ्जैःसद्भिः, अक्षोभ्याः—अविकृतप्रकृतयो भगवन्तो भवन्ति. ते कस्याञ्चित् विषमपरिस्थितौ समतां—समतुलां न नाशयन्ति, ज्ञानादिभावजलेनामलेनाऽगाधतां धारयन्ति च सागरवर–स्वयम्भूरमणसागरतोऽपि, अतिगम्भीराः,

(४) सिद्धाः—सितं (बद्धं) ध्मातमेषामिति सिद्धाः, कर्मविगमात्कृतकृत्या इत्यर्थः, सिद्धिं—परमपदप्राप्तिं, मम दिशन्तु—अस्माकं प्रयच्छन्तु इति, गाथार्थः ॥

एवं चतुर्विंशतिस्तवमुक्त्वा सर्व्वलोक एवार्हच्चैत्यानां कायोत्सर्गकरणायेदं पठति पठन्ति वा—" सव्वलोए अरिहंत-चेइयाणं करेमि काउस्सग्गमित्यादि जाववोसिरामि " व्याख्या पूर्ववत् , नवरं सर्वलोके, अर्हच्चैत्यानां इत्यत्र लोक्यते—दृश्यते केवलज्ञानभास्वतेति लोकश्चतुर्दशरज्ज्वात्मकः परिगृह्यते इति. उक्तं च—"धर्म्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम् ।

तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥१॥ "

सर्व्वः खल्वधस्तिर्यगूर्ध्वभेदभिन्नः, सर्व्वश्चासौ लोकश्च सर्व्वलोकस्तस्मिन् सर्वलोके त्रैलोक्य इत्यर्थः, तथाहि—अधोलोके चमरादिभवनेषु तिर्यग्लोके द्वीपाचलज्योतिष्कविमानादिषु ऊर्ध्व-लोके सौधर्म्मादिषु सन्त्येवार्हच्चैत्यानि, ततश्च मौलं चैत्यं समाधेः कारणमिति मूलप्रतिमायाः प्राक् पश्चात्सर्वेऽर्हन्तस्तद्गुणा इति सर्वलोकग्रहः, कायोत्सर्गचर्चः पूर्ववत् तथैव स्तुतिः, नवरं

**सर्वतीर्थंकराणाम्, अन्यथाऽन्यः कायोत्सर्गः, अन्या स्तुतिरिति न सम्यक्, एवमप्येतदभ्युपगमेऽतिप्रसङ्गः, स्याद् एवमन्योद्देशेऽन्यपाठः, तथा च निरर्थका उद्देशादयः सूत्रे इति यत्किञ्चिदेतत्, व्याख्यातं लोकस्योद्द्योतकरानित्यादिसूत्रम् ॥**

अथ–क्षमाश्रमणत्रयं दत्त्वा चैत्यवंदनस्य, आदेशं मार्गयित्वा जघन्यतो गाथात्रयवत्, उत्कृष्टतः अष्टोतरशतगाथावत् चैत्यवंदनं क्रियते, तदनु 'जंकिंचिसूत्रं' कथयित्वा, शक्रस्तवः कथ्यते. प्रथमद्वितीयाऽधिकारौ, तदनु 'अरिहंत चेइयाण' च अन्नत्थसूत्रं कथयित्वा, एकनमस्कारविषयकः कायोत्सर्गःकार्यः, तदनु एकनमस्कारकायोत्सर्ग पारयित्वा अधिकृतैकचैत्यविषयकं, वा एकजिनसत्कां स्तुतिं वदेत्, इति तृतीयोऽधिकारः, तदनु चतुर्विंशतिस्तवः कथनीय इति चतुर्थोऽधिकारः, एवं चैत्यवंदनविषयकाश्चत्वारोऽधिकारा दर्शिताः, तदनन्तर 'सव्वलोए अरिहंत चेइयाणं करेमि काउस्सगं, वंदणवत्तियाए' इत्यादिपदैः अरिहंत चेइयाणं सूत्रं सम्पूर्णं कथनीयं, पुनः, अन्नत्थ सूत्रं कथयित्वा, एकनमस्कारकायोत्सर्गं कृत्वा, पारयित्वा च सर्व चैत्यसंबंधिनी अथवा सर्वजिनसंबंधिनी द्वितीयस्तुतिः कथनीया, इति पंचमाधिकारस्य व्याख्यां कथयति=

**टी०...**देववन्दने 'लोगस्स'स्यान्ते यत् 'सव्वलोए अरिहंतचेइयाणं करेमि काउस्सग्गं वंदणवत्तियाए' कथ्यते तत्र.

भवनपतौ सप्तकोट्यः द्विसप्ततिलक्षाणि जिनचैत्यानि सन्ति, तथाऽपि प्रत्येकचैत्ये, अष्टोत्तरशतानि जिनबिम्बानि मितानि–प्रमितानि ज्ञेयानि, अर्थात् त्रयोदशशतनवाधिकाशीतिकोटीसहित–षष्टिलक्षाणि जिनबिम्बानि बोध्यानि.

तिर्यग्लोके द्वात्रिंशदधिक–नवाधिकपञ्चाशत्–सहस्राणि चैत्यानि वर्त्तन्ते, तत्र लक्षत्रयाधिकैकाधिकनवतिसहस्राधिकत्रिशताधिकविंशतिसंख्याका जिनप्रतिमाः, सन्ति, तदुपरि व्यन्तरज्योतिषां निकायमध्ये यानि यानि शाश्वतानि जिनबिम्बानि तेषां शुभनामानि ऋषभ–चन्द्रानन–वारिषेण–वर्धमानरूपाणि सन्ति. सम्मेत्तशिखराष्टापदशत्रुञ्जयादीनि तीर्थानि बहुसंख्यानि तत्र स्थितानि जिनबिम्बान्यपि बहुसंख्यानि वर्तन्ते ।

सौधर्मादिदेवलोके :–प्रथमदेवलोके द्वात्रिंशल्लक्षाणि जिनचैत्यानि, द्वितीयदेवलोके अष्टाविंशतिलक्षाणि, तृतीय देवलोके द्वादशलक्षाणि, चतुर्थदेवलोके–अष्टलक्षाणि, पञ्चमे चतुर्लक्षाणि जिनचैत्यानि, तथा षष्ठे देवलोके पञ्चाशत्सहस्राणि, सप्तमेदेवलोके चत्वारिंशत् सहस्राणि,

अष्टमे देवलोके षट्सहस्राणि, नवमदशमयोः चतुःशतानि २ जिनचैत्यानि सन्ति, एकादशद्वादशयोः त्रिशतानि २, नवसु ग्रैवेयकेषु, अष्टादशाधिकत्रिशतानि, पञ्चसु अनुत्तरेषु पञ्च, उत्तमानि चैत्यानि सन्ति, एवं च चतुरशीतिलक्ष–समाधिक–नवति–सहस्राणि जिनचैत्यानि सन्ति,

तानि सर्वाणि योजनशतायतानि पञ्चाशद्योजनोच्चानि, द्वि (द्वा) सप्तति–योजन–पृथुलानि ज्ञेयानि.

एकैकस्मिन्, चैत्ये सभासहितानां, अष्टोत्तरशतजिनबिम्बानां प्रमाणं ज्ञेयं,

सर्वसंख्यां मिलित्वा, शतकोटिद्विपञ्चाशत्–कोटि चतुर्णवतिलक्ष–चतुश्चत्वारिंशत्–सहस्राधिकाष्टाधिकसप्त–शतसंख्याका जिनप्रतिमा ज्ञेयाः, ('अन्यथेत्यादि' अन्यथा–कायोत्सर्गस्य (निमित्तं) भिन्नं, स्तुतिश्च भिन्ना, एतन्न युक्तं, एवं सत्यपि भिन्नत्वाऽभ्युपगमेऽतिप्रसङ्गः स्यात्–एवं चेत् सूत्रस्योद्देशोऽन्यः, पाठश्चान्यः ततस्तु सूत्राऽध्ययनादेर्नाम दत्त्वा, सूत्रस्योद्देश–समुद्देश–अनुज्ञाकरणादिकं निरर्थकं भविष्यतीत्येवं यत् किञ्चित् एतद् )

**पुनश्च प्रथमपदकृताभिख्यं पुष्करवरद्वीपार्द्धं विधिवत्पठति पठन्ति वा तस्येदानीमभिसम्बन्धो विवरणं चोन्नीयते–सर्वतीर्थकराणां स्तुतिरुक्ता, इदानीं तैरुपदिष्टस्यागमस्य येन ते भगवन्तस्तदभिहिताश्च भावाः स्फुटमुपलभ्यन्ते तत्प्रदीपस्थानीयं सम्यक् श्रुतमर्हति कीर्त्तनम्, अत इदमुच्यते–**

**"पुक्खरवरदीवड्ढे धायइसंडे य जंबुद्दीवे य ।**
**भरहेरवयविदेहे धम्माइगरे नमंसामि ॥१॥"**

**व्याख्या–पुष्कराणि–पद्मानि तैर्वरः, पुष्करवरश्चासौ द्वीपश्चेति समासः, तस्यार्द्धं–मानुषोत्तराचलावार्ग्भागवर्त्ति तस्मिन्, तथा धातकीनां खण्डानि यस्मिन्स धातकीखण्डो द्वीपः तस्मिंश्च, तथा जम्ब्वा उपलक्षितस्तत्प्रधानो वा द्वीपो जम्बूद्वीपः तस्मिंश्च, एतेष्वर्द्धतृतीयेषु द्वीपेषु महत्तरक्षेत्रप्राधान्याङ्गीकरणतः पश्चानुपूर्व्योपन्यस्तेषु यानि भरतैरावतविदेहानि, प्राकृतशैल्यात्वेकवचननिर्देशः, द्वन्द्वैकवद्भावाद्वा भरतैरावतविदेह इत्यपि भवति,**

तत्र धर्म्मादिकरान्नमस्यामि, 'दुर्गतिप्रसृतान् जीवानि' त्यादि-श्लोकोक्तनिरुक्तो धर्म्मः, स च द्विभेदः-श्रुतधर्म्मश्चारित्रधर्म्मश्च, श्रुतधर्म्मेणेहाधिकारः, तस्य च भरतादिष्वादौ करणशीला-स्तीर्थकरा एव। आह-श्रुतज्ञानस्य स्तुतिः प्रस्तुता, कोऽवसर-स्तीर्थकृतां? येनोच्यते-धर्म्मादिकरान्नमस्यामोति, उच्यते, श्रुत-ज्ञानस्य तत्प्रभवत्वात्, अन्यथा तदयोगात्, पितृभूतत्वेनावसर एषामिति।

—अथ शास्त्रकारः, 'पुक्खरवरदी' सूत्रकथनपूर्वकं 'सुअस्स भगवओ करेमि काउसग्गं वंदणवत्तिआए' इत्यादिसूत्रमुच्चार्य 'अन्नत्थ' कथयित्वा एकनमस्कारविषयक-कायोत्सर्गं कृत्वा—पारयित्वा च सिद्धान्तविषयकवन्दनासत्क—तृतीयस्तुतिकथनरूप—षष्ठ-सप्तमाधिकारं दर्शयन् कथयति.—

टी...पुनश्चप्रथमपदकृताभिमुख्यं, आदिपदेन कृतनाम—आदाननामवत्—पुष्करवरद्वीपार्धसूत्रं-(गौण—गुणवाचकनामवत्—श्रुतस्तवं) विधिवत्, एकोऽनेके वा पठति—पठन्ति वा, तस्येदानीमभि-सम्बन्धो विवरणं चोन्नीयते, सर्वतीर्थंकराणां स्तुतिरुक्ता, इदानीं तैरुपदिष्टस्यागमस्य, येन ते भगवन्तस्तदभिहिताश्च भावाः स्फुटमुपलभ्यन्ते तत्प्रदीपस्थानीयं सम्यक्श्रुतमर्हति कीर्तनम् अत इदमुच्यते—

"पुक्खरवरदीवड्ढे धायइसंडे य जंबुदीवे य।
भरहेरवय—विदेहे धम्माइगरे नमंसामि॥"

अभिसम्बन्धः='लोगस्स' सूत्रे सर्वतीर्थंकराणां स्तुतिरुक्ता, अधुना तैरुपदिष्टस्यागम-शास्त्रस्य, येनागमेन ते भगवन्तस्तदभिहिताश्च भावाः (द्रव्यपर्यायाद्या) स्फुटं—स्पष्टमुपलभ्यन्ते, ज्ञानगोचरीक्रियन्तेऽतस्तत् प्रदीपस्थानीयं—स्वपरप्रकाशकदीपवत्—आगमज्ञानं—श्रुतज्ञानं प्रकाशयति. अत एव, एष सर्वज्ञः, तदुक्तागमश्च स्तुतिः—कीर्तनयोग्यैव.

पुष्करवरेत्यादि=पद्मपुञ्जप्रधानद्वीपस्यार्द्धे (अर्वाभागः) मानुषोत्तराचलादर्वाग्भागवर्ति, तस्मिन्। (मानुषा उत्तरे यस्य स मानुषोत्तराचलः, अर्थादेतस्य पूर्वभागे मानुषा न सन्ति, अपि तूत्तरभागे) पुष्करवरद्वीपार्धे,

(१) पुष्करैः-कमलैः सुन्दरं श्रेष्ठं तत् पुष्करवरद्वीपं, तस्यार्धभागे मानुषोत्तरपर्वतीय मनुष्याणां वसतिवदान्तरभागरूपार्धभागे वर्तते.

अत्रेदं बोध्यं मध्यलोकस्य मध्ये जम्बूनामको द्वीपो वर्त्तते, यद् यस्य मध्ये मेरु-नामको महानेको पर्वत आयातोऽस्ति, एतस्य द्वीपस्य सर्वपार्श्वत एको 'लवणसमुद्रोऽस्ति,' ततः पृथ्वी आगताऽस्ति, तस्या नाम' 'धातकीखंड' आगतोऽस्ति तत्र धातकीवृक्षाणां वनानि सन्ति, तस्य नाम, तत्पतितं। धातकीखंडस्य चतुःपार्श्वे 'कालोदधिः' समुद्रोऽस्ति, एतत्समुद्रादनन्तरं या पृथ्वी, तस्य नाम 'पुष्करवरद्वीपः' वर्त्तते, अस्य द्वीपस्य चतुःपार्श्वे 'पुष्करोदधिनामक' समुद्रोऽस्ति, पुष्करद्वीपस्य मध्ये 'मानुषोत्तरनामक' एकःपर्वत आयातोऽस्ति, यतस्तस्य द्वौ भागौ पततः, अन्तरभागे मनुष्याणां वसतिरस्ति। बाह्ये च भागे नास्ति, जंबूद्वीप—धातकीखंड—पुष्करवर—द्वीपार्धं इति मिलित्वा सार्ध—द्वीप—प्रमाणं मनुष्यक्षेत्रमस्ति, तीर्थंकरा, अन्ये महापुरुषा अत्रावतरन्ति.

(२) तथा धातकीनां खण्डानि यस्मिन् स धातकीखण्डो द्वीपः,

(३) तस्मिंश्च तथा जम्ब्वा उपलक्षितः, तत्प्रधानो वा द्वीपो, जम्बूद्वीपः, तस्मिंश्च, एतेष्वर्धतृतीयेषु द्वीपेषु महत्तरक्षेत्रप्राधान्याऽङ्गीकरणतः, पश्चानुपूर्व्योपन्यस्तेषु यानि भरतैरावत-विदेहानि। प्राकृतशैल्या त्वेकवचननिर्देशः, द्वन्द्वैकवद्भावाद् वा भरतैरावतविदेहमित्यादिर्भवति।

तत्र 'धर्मादिकरान्नमस्यामि' दुर्गतिप्रसृतान् जीवान् धारयते यतः। धत्ते चैतान् शुभ—स्थाने यतो धर्मस्ततः स्मृतः। इत्यादिश्लोकोक्त—निरुक्तो धर्मः। स च द्विभेदः, श्रुतधर्म-श्चारित्रधर्मश्च। श्रुतधर्मेणेहाधिकारः। तस्य भरतादिष्वादौ करणशीलास्तीर्थंकरा एव।

आह—श्रुतज्ञानस्य स्तुतिः प्रस्तुता, कोऽवसरस्तीर्थकृतां येनोच्यते 'धर्मादिकरान्नम-स्यामीति'? उच्यते श्रुतज्ञानस्य तत्प्रभवत्वात्, अन्यथा तदयोगात्, पितृभूतत्वेनाऽवसर एषामिति।

**—एतेन—धर्मादिकरत्वेन सर्वथा—अपौरुषेयवचननिरासः—**

**एतेन सर्वथा—अपौरुषेयवचननिरासः,**

**यथोक्तम्—" असम्भव्यपौरुषेयं " "वान्ध्येयखरविषाणतुल्यं अपुरुषकृतं वचनं विदुषामनुपन्यसनीयं विद्वत्समवाये, स्वरूप-निराकरणात्, तथाहि—उक्तिर्वचनम् उच्यत इति चेति पुरुष-क्रियानुगतं रूपमस्य, एतत्क्रियाऽभावे कथं तद्भवितुमर्हति, न**

चैतत्केवलं क्वचिद् ध्वनदुपलभ्यते, उपलब्धावप्यदृश्यवक्त्राशङ्का-सम्भवात् , तन्निवृत्त्युपायाभावात् , अतीन्द्रियार्थदर्शिसिद्धेः अन्यथा तदयोगात् ,

पुनस्तत्कल्पनावैयर्थ्यादसारमेतदिति, स्यादेतत्–भवतोऽपि तत्त्वतोऽपौरुषेयमेव वचनं,सर्वस्य सर्वदर्शिनस्तत्पूर्वकत्वात् "तप्पुव्विया अरहया" इतिवचनात् , तदनादित्वेऽपि तदनादित्वतस्तथात्वसिद्धेः,

अवचनपूर्वकत्वं चैकस्य, तदपि तन्त्रविरोधि, न्यायतोऽनादिशुद्धवादापत्तेरिति, न अनादित्वेऽपि पुरुषव्यापाराभावे वचनानुपपत्त्या तथात्वासिद्धेः,

न चावचनपूर्वकत्वं कस्यचित् , तदादित्वेन तदनादित्व-विरोधादिति, बीजाङ्कुरवदेतत् , ततश्चानादित्वेऽपि प्रवाहतः सर्वज्ञाभूतभवनवद्वक्तृव्यापारपूर्वकत्वमेवाखिलवचनस्येति, नन्वेवं सर्वज्ञ एवास्य वक्ता सदा नान्यः, तदसाधुत्वप्रसङ्गादिति,

सोऽवचनपूर्वक एव कश्चिन्नीतितः, ननु बीजाङ्कुरवत् इत्यनेन प्रत्युक्तं, परिभावनीयं तु यत्नतः, तथाऽर्थज्ञानशब्दरूप-त्वादधिकृतवचनस्य शब्दवचनापेक्षया नावचनपूर्वकत्वेऽपि कस्य-चिद्दोषः, मरुदेव्यादीनां तथाश्रवणात् , वचनार्थप्रतिपत्तित एव तेषामपि तथात्वसिद्धेस्तत्त्वतस्तत्पूर्वकत्वमिति, भवति च विशिष्ट-क्षयोपशमादितो मार्ग्गानुसारिबुद्धेर्वचनमन्तरेणापि तदर्थप्रतिपत्तिः, क्वचित्तथादर्शनात् , संवादसिद्धेः,

एवं च व्यक्त्यपेक्षया नानादिशुद्धवादापत्तिः, सर्वस्य तथा तत्पूर्वकत्वात् , प्रवाहतस्त्विष्यत एवेति, न ममापि तत्त्वतोऽपौरुषेय-मेव वचनमिति प्रपञ्चितमेतदन्यत्रेति नेह प्रयासः ।

पं०..."एतेनेत्यादि" एतेन–धर्म्मादिकरत्वज्ञापनेन सर्वथा–अर्थज्ञानशब्दरूपप्रकाशनप्रकारकात्स्न्येंनापौरुषेयवचननिरासः, न पुरुषकृतं वचनमित्येतन्निरासः कृत इति गम्यते, वचनान्तरेणापि एनं समर्थयितुमाह–

यथोक्तं धर्म्मसारप्रकरणे वचनपरीक्षायाम्, असम्भवि–न सम्भवतीत्यर्थः, अपौरुषेयम्–अपुरुषकृतं, वचनमिति प्रक्रमाद्गम्यते, इदमेव वृत्तिकृत् व्याचष्टे–बान्ध्येयखरविषाणतुल्यम्–असदित्यर्थः, अपुरुषकृतं वचनं, ततः किमित्याह–विदुषां–सुधियां "अनुपन्यसनीयं" पक्षतयाऽव्यवहरणीयं "विद्वत्समवाये" सभ्यपरिषदि, कुत इत्याह–"स्वरूपनिराकरणाद्" अपौरुषेयत्वस्य साध्यस्य धर्म्मिस्वरूपेण वचनत्वेन प्रतिषेधाद्, अस्यैव भावनामाह तथेत्यादिना कथं तद्भवितुमर्हतीति पर्यन्तेन, सुगमं चैतत्, प्रयोगः–यदुपन्यस्यमानं स्ववचनेनापि बाध्यते, न तद्विदुषा विद्वत्सदसि उपन्यसनीयं, यथा माता मे वंध्या, पिता मे कुमारब्रह्मचारीति, तथा चापौरुषेयं वचनमिति, अभ्युच्चयमाह–"न च" नैव "एतद्" अपौरुषेयतयाऽभ्युपगतं वेदवचनं "केवलं" पुरुषव्यापाररहितं "क्वचिद्" आकाशादौ "ध्वनत्" शब्दायमानम् "उपलभ्यते" श्रूयत इति, उपलभ्यत एव क्वचित् कदाचित्किञ्चिच्चेदित्याह—

"उपलब्धावपि श्रवणेऽपि क्वचिद्ध्वनच्छब्दस्य "अदृश्यवक्त्राशङ्कासम्भवाद्" अदृश्यस्य पिशाचादेर्वक्तुराशङ्कासम्भवात्तेन भाषितं स्यादित्येवं संशयभावादसारमेतदिति सम्बध्यते, कुत इत्याह–"तन्निवृत्त्युपायाभावाद्" अदृश्यवक्त्राशङ्कानिवृत्तेरुपायाभावात्, न हि कश्चिद्धेतुरस्ति येन साशङ्का निवर्त्तयितुं शक्यत इति, एतदपि कुत इत्याह–"अतीन्द्रियार्थदर्शिसिद्धेः" अतीन्द्रियं–पिशाचादिकमर्थं द्रष्टुं शीलः पुरुष एव हि तन्निवृत्त्युपायः, तत एव पिशाचादिप्रभवमिदं स्वत एव वा ध्वनदुपलभ्यते इत्येवं निश्चयसद्भावाद्, व्यतिरेकमाह–"अन्यथा" अतीन्द्रियार्थदर्शिनमन्तरेण "तदयोगाद्" अदृश्यवक्त्राशङ्कानिवृत्तेरयोगात्, यदि नाम अतीन्द्रियार्थदर्शी सिध्यति, ततः का क्षतिरित्याह—

"पुनस्तत्कल्पनावैयर्थ्यात्" अतीन्द्रियार्थदर्शिनमभ्युपगम्य पुनः–भूयस्तत्कल्पनावैयर्थ्याद्–अपौरुषेयवचनकल्पनावैयर्थ्यात्, सा ह्यतीन्द्रियार्थदर्शिनमनभ्युपगच्छतामेव सफला, यथोक्तम्–अतीन्द्रियाणामर्थानां, साक्षाद्द्रष्टा न विद्यते। वचनेन हि नित्येन, यः पश्यति स पश्यति ॥१॥ "असारं" परिफल्गु "एतद्" यदुतापौरुषेयं वचनमिति। "स्यादेतत्" परस्य वक्तव्यं, "भवतोऽपि" पौरुषेयवचनवादिनः "तत्त्वतः" परमार्थतो न केवलं मम "तत्त्वतः" ऐदम्पर्यशुद्धया अपौरुषेयमेव वचनं न पौरुषेयमपि, अत्र हेतुमाह–"सर्वस्य" ऋषभादेः "सर्वदर्शिनः" सर्वज्ञस्य "तत्पूर्वकत्वाद्" वचनपूर्वकत्वाद्, एतदपि कुत इत्याह–"तप्पुव्विया" वचनपूर्विका "अरहया" अर्हत्ता इति वचनाद्, अथ स्याद्–अनादिरर्हत्सन्तानस्ततः कथं न पौरुषेयं वचनमित्याशङ्क्याह–"तदनादित्वेऽपि" तेषाम्–अर्हतामनादित्वेऽपि "तदनादित्वतः"

तस्य–वचनस्यानादिभावात् "तथात्वसिद्धेः" अपौरुषेयत्वसिद्धेः, अस्यैव विपर्ययबाधकं पक्षान्तरमाह—

"अवचनपूर्वकत्वं चैकस्य" यदि हि अपौरुषेयं वचनं नेष्यते तदाऽवचनपूर्व्वः कश्चिदेक आदौ वचनप्रवर्त्तकोऽर्हन्नभ्युपगन्तव्य इति भावः, एवमपि तर्हि अस्तु इत्याशङ्क्य पर एवाह–"तदपि" अवचनपूर्वकत्वं "तन्त्रविरोधि" सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इत्यागमविरोधि, कुत इत्याह–"न्यायतः" "सदकारणवन्नित्य" मिति नित्यलक्षणन्यायाद् अनादिशुद्धः–परपरिकल्पितसदाशिवादिवत् कश्चिदर्हन्निति वादप्रसङ्गादिति, "इतिः" परवक्तव्यतासमाप्त्यर्थः, परपक्षमाशङ्क्योत्तरमाह–"न" नैव, एतत्परोक्तम्, अत्र हेतुमाह–"अनादित्वेऽपि" अविद्यमानादिभावेऽपि वचनस्य "पुरुषव्यापाराभावे" वचनप्रवर्त्तकताल्वादिव्यापाराभावे "वचनानुपपत्त्या" उक्तनिरुक्तवचनायोगेन तत्तथात्वासिद्धेः, पक्षान्तरमपि निरस्यन्नाह—

"न च" नैवावचनपूर्वकत्वं परोपन्यस्तं "कस्यचिद्" भगवतः, कुत इत्याह–"तदादित्वेन" वचनपूर्वकत्वेन "तदनादित्वविरोधात्" तस्य-भगवतो, अनादित्वस्य–अवचनपूर्वकत्वाऽऽक्षिप्तस्य विरोधात्–निराकरणादिति, परमार्थमाह–"बीजाङ्कुरवदेतद्" यथा बीजादङ्कुरोऽङ्कुराद्बीजं तथा वचनादर्हन्नर्हतश्च वचनं प्रवर्त्तत इति, प्रकृतसिद्धिमाह–"ततश्च" बीजाङ्कुरदृष्टान्ताच्च, अनादित्वेऽपि वचनस्य "प्रवाहतः" परम्परामपेक्ष्य "सर्वज्ञाभूतभवनवत्" सर्वज्ञस्य–ऋषभादिव्यक्तिरूपस्य प्रागभूतस्य भवनमिव वक्तृव्यापारपूर्वकत्वमेवाखिलवचनस्य लौकिकादिभेदभिन्नस्येति । नन्विति–पराक्षमायां, एवमिति–पौरुषेयत्वे, सर्वज्ञ एवास्य–वचनस्य वक्ता सदा–सर्वकालं नान्यः–तद्व्यतिरिक्तः, कुत इत्याह–तस्य–वचनस्यासाधुत्वप्रसङ्गाद्–अप्रामाण्यप्राप्तेः, वक्तृप्रामाण्याद्धि वचनप्रामाण्यमित्यस्माद्धेतोः.

"सः" सर्व्वज्ञः "अवचनपूर्व्वक एव कश्चित्" चिरतरकालातीतो "नीतितः" अन्यथाऽपौरुषेयं वचनं स्यादिति नीतिमाश्रित्याभ्युपगन्तव्य इति गम्यते, अत्रोत्तरं—ननु वितर्कय बीजाङ्कुरवदेतदित्यनेन ग्रन्थेन "प्रत्युक्तं" निराकृतमेतत्परिभावनीयं तु यत्नतः, तत्र सम्यक् परिभाविते पुनरित्थमुपन्यासायोगात्, न च जैनानां क्वचिदेकान्त इत्यपि प्रतिपादयन्नाह–तथेति पक्षान्तरसमुच्चये, अर्थज्ञानशब्दरूपत्वाद्—अर्थः–सामायिकपरिणामादिर्ज्ञानं–तद्गतैव प्रतीतिः, शब्दो–वाचकध्वनिः तद्रूपत्वात्–तत्स्वभावत्वाद् अधिकृतवचनस्य–प्रकृतागमस्य ततः "शब्दवचनापेक्षया" शब्दरूपं वचनमपेक्ष्य 'न' नैवावचनपूर्वकत्वेऽपि कस्यचित्सर्वदर्शिनो दोषः–अनादिशुद्धवादापत्तिलक्षणः, समर्थकमाह–"मरुदेव्यादीनां" प्रथमजिनजननीप्रभृतीनां स्वयमेव पक्वभव्यत्वानां तथाश्रवणात्—शब्दरूपवचनानपेक्षयैव सर्वदर्शित्वश्रवणात्, अथ 'तप्पुव्विया अरहये' तिवचनं समर्थयन्नाह—"वचनार्थप्रतिपत्तित एव" वचनसाध्यसामा-

यिकाद्यर्थस्य ज्ञानानुष्ठानलक्षणस्य प्रतिपत्तित एव—अङ्गीकरणादेव, नान्यथा, "तेषामपि" मरुदेव्यादीनाम्, अपिशब्दादृषभादीनां च "तथात्वसिद्धेः" सर्वदर्शित्वसिद्धेः "तत्त्वतो" निश्चयवृत्त्या नतु व्यवहारतोऽपि, "तत्पूर्वकत्वं" वचनपूर्वकत्वमिति, एतदेव भावयति— "भवति च विशिष्टक्षयोपशमादितो" विशिष्टाद्दर्शनमोहनीयादिगोचरात् क्षयक्षयोपशमोपशमात् "मार्गानुसारिबुद्धेः" सम्यग्दर्शनादिमोक्षमार्गानुयायिप्रज्ञस्य "वचनम्" उक्तलक्षणमन्तरेणापि–विनापि "तदर्थप्रतिपत्तिः" वचनार्थप्रतिपत्तिः, कुत इत्याह—"कचित्" प्रज्ञापनीये "तथादर्शनात्" वचनार्थप्रतिपत्तिदर्शनात्, कुत इदमित्याह—"संवादसिद्धेः" यदिदं त्वयोक्तं तन्मया स्वत एव ज्ञातमनुष्ठितं वेत्येवं प्रकृतार्थाव्यभिचारसिद्धेः ॥

"एवं च" वचनपौरुषेयत्वे "व्यक्तयपेक्षया" एकैकं सर्वदर्शिनमपेक्ष्य, "नानादिशुद्धवादापत्तिः" न कश्चिदेकोऽनादिशुद्धः सर्वदर्शी वक्ता आपन्नः, कुत इत्याह–"सर्वस्य" सर्वदर्शिनः "तथा" पूर्वोक्तप्रकारेण "तत्पूर्वकत्वात्" वचनपूर्वकत्वात्, "प्रवाहतस्तु" परम्परामपेक्ष्य इष्यत एवानादिशुद्धः, प्रवाहस्यानादित्वादिति, एवं न ममापि तत्त्वतोऽपौरुषेयं वचनं यत् त्वया प्राक् प्रसञ्जितमिति, प्रपञ्चितमेतदन्यत्र–सर्वज्ञसिद्ध्यादौ नेह प्रयासः प्रयत्नः,

टी०....अत्र श्रुत—आगमस्याद्युत्पादकत्वेन तीर्थकरः परमपुरुषः कथितः, यथोक्तं (धर्मसारप्रकरणे वचनपरीक्षायां) अपौरुषेयं "पुरुषेणानुच्चरितं वचनं, वन्ध्यापुत्रवत्, खरविषाणतुल्यं, अपुरुषकृतं वचनं विदुषाऽनुपन्यसनीयं विद्वत्सभायां स्वरूपनिराकरणात्" (कश्चिदुच्चारकर्त्ता पुरुष एव नास्ति, ततः किं वचनं? वचनं यत्पुरुषकृतं इति मे माता वन्ध्याऽसदसम्भवितं, पंडितपर्षदि, अपौरुषेयं वचनं पक्षत्वेन, (धर्मित्वेन) अव्यवहार्य यतः, अपौरुषेयत्वरूपसाध्यस्य धर्मिरूपवचनत्वेन सह बाधोऽस्ति.

अर्थात् 'वेदवचनमपौरुषेयं नित्यनिर्दोषत्वात्, इत्यनुमानमपि न रक्षितव्यम् यतोऽस्मिन् पक्षोऽस्ति, वचनं , तत्त्वेन–वचनत्वेन साध्यापौरुषेयत्वस्य निषेधो भवतीति.

तथाहि—उक्तिर्वचनम् उच्यत इति चेति पुरुषक्रियाऽनुगतं रूपमस्य 'एतद्वचनवस्तु' कस्यचिदपि पुरुषस्य वचनोच्चारक्रियया सह सम्बद्धं वर्त्तते, कश्चिदुच्चारकर्त्ता पुरुष एव नास्त्यतो वचनस्वरूपं केनचित् पुरुषेणोच्चरिततारूपपौरुषेयतासिद्धिर्भवति, वेदवचनेऽपौरुषेयताया अर्थः—पुरुषानुच्चरितत्वम्,

यद् यद् वचनं तत्तत् पौरुषेयमेव, यतो वेदादिकं वचनं वर्णात्मकं यथा कुमारसम्भवादिकं, वर्णात्मकत्वेनागमवेदादि पौरुषेयमेव. यथोक्तं–वर्णसमुदायो निश्चयतस्ताल्वादिजन्यं तथा वेदादिकं वर्णात्मकं विद्यते, ताल्वादिस्थानं पुरुषे भवति. अतो वेदादिकं पुरुषकृतमेव नापौरुषेयमेव. तथाचाकाशादौ पुरुषक्रियां विना, अपौरुषेयवचनं श्रूयते, तदापि अदृश्यपिशाचादि वक्त्राशङ्का

सम्भवोऽस्ति, एतद्वचनपिशाचादि—वक्तुराशङ्का 'एष पिशाचादि वक्ता भविष्यति वा न वा ?' एतादृशी शङ्काऽवश्यं कार्या ! एतादृशः कश्चित् हेतुर्नास्ति यतः सा शङ्का दूरे भवेत् ?

यदि—अतीन्द्रियार्थदर्शी—पिशाचादिरूपातीन्द्रियार्थ—द्रष्टा पुरुषो मन्येत तदा शङ्का दूरे गच्छेत् ! यतः, तेन पुरुषेण 'इदं वचनं' पिशाचादिजन्यमस्ति वाऽऽकस्मिकं (स्वतः) एवंविध—एक निश्चयस्य सद्भावोऽस्ति, यदि अतीन्द्रियार्थदर्शिनं पुरुषं न मन्येत तदाऽदृश्यवक्तृविषयक-शङ्कानिवृत्ति र्न भवितुं शक्येत, किञ्चातीन्द्रियार्थदर्शी, प्रकृतशङ्कानिवर्त्तकत्वेन मान्यः, तत्र का हानिः ? एतस्याः शङ्कायाः प्रत्युत्तरे कथनीयमेतावदेव, अतीन्द्रियार्थदर्शित्वेन मत्वा पुनरपौरुषेयवचनकल्पना व्यर्था भवति, यतः, अतीन्द्रियार्थदर्शिपुरुषस्याऽमान्यतायामपौरुषेयवचनस्य कल्पनायाः सफलताऽस्ति,

यथोक्तं—"अतीन्द्रियार्थपदार्थानां साक्षाद् द्रष्टा—अतीन्द्रियार्थदर्शी कश्चिन्नास्त्येवार्थान्नित्यवचन—वेदवाक्येन यः पश्यति, स द्रष्टाऽस्ति" एवं च यदि, अदृश्यपिशाचादिवक्तृविषयकशङ्कां निरसितुं, अतीन्द्रियार्थदर्शिपुरुषकल्पनायां पुनः, अपौरुषेयवचनकल्पना व्यर्था, स्वदृष्ट्याऽतीन्द्रियार्थ दर्शित्वाऽमान्यतायां साथिका तथापि यदि अतीन्द्रियार्थदर्शिपुरुषत्वाऽमान्यतायां च पूर्वकथिता-दृश्यपिशाचादिवक्तृविषयकशङ्काया नैयत्येन, अपौरुषेयवचनवादोऽकिञ्चित्करोऽस्त्येव.

**जैनमतस्योपरि—अपौरुषेयवचनाक्षेपः—**

एतत् पूर्वोक्तं स्याद्, (भवतु) भवतामपि (जैनानामपि) शास्त्रवचनस्य तत्त्ववशात्, 'अपौरुषेय' मेव वचनं, कथमिति चेदिदं शास्त्रवचनं साक्षिकं 'तप्पूव्विया अरहया' अर्हत्ता—अर्हत्त्वंवार्हत्समुदायः, वचनपूर्वक एव भवति, सर्वे, ऋषभाद्याः सर्वज्ञा आगमवचनमालम्ब्य भवन्ति, अतोऽनादितो जायमानानामर्हतामालम्बनरूपं समागच्छत्, एतदागमवचनं, अनादि—अपौरुषेयं—स्थितम्,

**प्रश्नः**—अर्हतामनादित्वेऽपि, अर्हतां प्रवाहोऽनादितोऽस्ति, तथोत्तरोत्तरं जायमानानामर्हतां, पूर्वं पूर्वं सञ्जातानामर्हतां वचनप्राप्तिरस्त्यत एवं कथयितुं शक्यते, अत्र वचनं पूर्वीयस्यार्हतोऽस्ति, अर्थात् पौरुषेयमेव, अपौरुषेयं कथं ?

**समाधानं**—अत्रार्हतामनादित्वं, एवं वचनमनादि, अनादि, अर्थात्नित्यमपौरुषेयं, पौरुषेयं कुत्र गतं ? आद्यस्यैकस्याऽर्हतो वचनपूर्वकत्वं नास्ति, एतेनाद्येनोच्चरितवचनादनु, अर्हन्तो भगवन्त आगता, एवं वचनं पौरुषेयं वाच्यं स्यात्, परंतु एवं कथनं स्वशास्त्रं बाधितं स्यात्, 'तदपि'—अवचनपूर्वकत्वं 'तन्त्रविरोधि' 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इत्यागमविरोधि, कुत इत्याह 'न्यायतः' सदकारणवन्नित्यमिति नित्यलक्षणन्यायाद्,

(१) एकतः शास्त्रं 'तप्पूविया अरहया' इति वाक्यतः सर्वे, अर्हन्तो प्रथमो वा मध्यमो वा (कोऽप्यर्हन् वचनपूर्वक एव भवति) वचनपूर्वका भवन्तीति कथयति शास्त्रं,

(२) जैनमतं, शैवमतमान्यानादि—शुद्ध—सदाशिववत्, अथवा पातञ्जलदर्शनमान्यानादि-शुद्धबुद्धपुरुषवत्, अनादिशुद्धःकश्चिदर्हन्नेवानादितः—प्रथमतो न मन्यते, अतो जैनमतमस्तकेऽनादि-शुद्ध—परमात्मवाद—प्रतिपत्तिरापतेदेतत्स्वशास्त्रबाधकं कथ्यते, अर्थादनादिशुद्धः कश्चिदेक आद्योऽर्हन् न भवतीति,

तथा च पुरुषस्य (कण्ठताल्वादेः संयोगस्य) व्यापारस्याऽभावे वचनस्याऽनुपपत्त्या, अपौरुषेयनित्यवचनं न सिद्धं भवति, यतः कश्चिदर्हन् भगवान्, पूर्वागमवचनं विना सञ्जातो भवेत्, एतन्न सम्भवति, ये सञ्जातास्ते वचनपूर्वका एवार्थात् (पूर्वं सर्वज्ञो नास्ति पश्चाद्-वचनपूर्वक—भूत—संजातवत्) अनादिशुद्ध भगवद् भवनमिति कथनमेव तद् विरुद्धं, एते वचनपूर्वका एव भवेयुः, बीजाङ्कुरदृष्टान्ताच्च, अनादित्वेऽपि वचनस्य प्रवाहतः परम्परामपेक्ष्य, सर्वज्ञस्य—ऋषभादि—व्यक्तिरूपस्य प्रागभूतस्य भवनमिव वक्तृव्यापार—पूर्वकत्वमेवाखिलवचनस्य, लौकिकादि-भेदभिन्नस्य समस्तवचनस्य वक्तृव्यापारपूर्वकत्वमेव, एतद्वचनं पूर्वीयसर्वज्ञेनोच्चरितता, अर्थात् प्रत्येकवचनमपि, आदिमत् सर्वज्ञश्चाप्यादिमान् । 'बीजाङ्कुरवत्प्रवाहतोऽनादिः'

एवमनादितोऽर्हदागमयोः परम्परा प्रचलति, तथापि बीजाङ्कुरन्यायेन प्रवाहतोऽनादिरस्ति, व्यक्तिदृष्ट्या, अर्हन्नुत्पद्यते, आगमोऽप्युत्पद्यते यथा बीजतोऽङ्कुरः,अङ्कुराच्च बीजं, किञ्च बीजतोऽङ्कुरोत्पत्तिः,अङ्कुरतो बीजोत्पत्तिरित्येवं धाराऽविच्छिन्ना चलति, तथाऽत्र, अर्हतोऽप्यागमो जायते, आगमतोऽप्यर्हन् जायते, किञ्चैतदर्हतोऽप्यागमः, आगमतोऽप्यर्हन्निति प्रवाहः एवं प्रचलति,

अर्थात् प्रस्तुतमागमवचनं अर्थ—ज्ञानं—शब्दमयमस्ति (अर्थागम—ज्ञानागम—शब्दागमभेदेन त्रिधा) अतः कश्चित् केवली शब्दागमापेक्षया वचनपूर्वको नास्ति, यथा स्वयमेव पक्वभव्यत्वा मरुदेव्याद्याः, (शब्दागमं विना तत्र कैवल्यं जातं) आगमोक्तपदार्थज्ञानेन विना तत्रापि सर्वदर्शित्वं सिद्धं, तथापि निश्चयनयतो वचनार्थभेदापेक्षया वचनपूर्वकताऽस्ति, किञ्च विशिष्ट-क्षयोपशमादितो मार्गानुसारिबुद्धिमतां, आगमं विनाऽपि आगमार्थबोधो जायते, यतःक्वचिदेवं दृश्यते, यतः तत्र संवादद्वारेण (आगमोक्तैः सह शब्दं विनैव स्वतो ज्ञाता—चरितयोः एकता द्वारेण) प्रस्तुतपदार्थस्य वचनेन सहाऽव्यभिचारित्वं सिद्धम्, एवं च व्यक्ति—अपेक्षया, न, अनादिशुद्धबुद्धवादापत्तिः ।

तथा च—विशिष्ट—दर्शनमोहनीयादिविषयक्षयक्षयोपशमोपशमैः, सम्यग्दर्शनादिरूपमोक्षमार्गा-

नुसारिबुद्धिमत्सु पुरुषेषु, शब्दवचननिरपेक्षार्थ ज्ञानक्रियास्वरूप—वचनसाध्यसामायिकादि—अर्थ-स्वीकाररूपवचनार्थ—प्रतिपत्तिः प्राप्यते, 'यदेतत्त्वयाकथितं, स्वतो ज्ञातं अथवा कृतं' एवं प्रकारकप्रकृताऽर्थविरोध-संगतिरूप—संवादस्य सिद्धत्वेन, क्वचित्-विशिष्टयोग्यतासंपन्न—प्रज्ञापनीय-पुरुषे वचनसाध्यार्थ—प्रतिपत्ति दृश्यते. एवं वचनस्य पौरुषेयत्वसिद्धया व्यक्ति—अपेक्षया (शृंग-ग्राहिकया—प्रत्येकसर्व—सर्वदर्शिनोऽपेक्ष्य) ज्ञेयम्

कश्चिदेकोऽनादिशुद्धसर्वदर्शी, वचनस्य वक्ता मान्यः' एवंवादापत्तिदोषो नास्ति, यतः सर्वः सर्वदर्शी तथा पूर्वोक्तप्रकारस्वभावयुक्तत्वेन वचनपूर्वक एव परन्तु प्रवाहाऽपेक्षया, अनादिशुद्धो मान्य एव यतः प्रवाहोऽनादिरस्ति,

एवं वचनं तु पौरुषेयमेवाऽस्ति, पुरुषोच्चरितं ततः कस्याश्चिद्व्यक्तेरपेक्षया, अनादि-शुद्धपरमात्मवाद—प्रतिपत्तेरापत्तिर्नास्ति, अनादित आगच्छन्ती, काचिदेका व्यक्तिर्नास्ति, यः सर्वज्ञो वक्ता भवेत्, प्रत्येक-सर्वज्ञाः पूर्वोक्तवत् वचनपूर्वका अभूवन्, सर्वज्ञपरम्पराऽपेक्षया तु अनादिशुद्ध—सर्वज्ञत इष्टोऽस्ति, यतः सर्वज्ञ—प्रवाहोऽनादितश्चलन्नस्ति, ततोऽस्माकमपि युष्माभिर्मीमांसकैः पूर्व—कथितवद् वस्तुगत्याऽपौरुषेयवचनापत्तिर्नास्ति, 'सर्वज्ञसिद्धि' आदि शास्त्रे विस्तारोऽस्याऽस्ति, ततो ज्ञेयं विशेषार्थिना।

**तदेवं श्रुतधर्म्मादिकराणां स्तुतिमभिधायाधुना श्रुतधर्म्म-स्याभिधित्सुराह—**

**"तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहिअस्स।**
**सीमाधरस्स वंदे पप्फोडिअमोहजालस्स ॥ २॥"**

**अस्य व्याख्या—तमः—अज्ञानं तदेव तिमिरं तमस्तिमिरं, अथवा तमः—बद्धस्पृष्टनिधत्तं ज्ञानावरणीयं—**

**निकाचितं तिमिरं तस्य पटलं—वृन्दं तमस्तिमिरपटलं तद्विध्वंसयति—विनाशयतीति तमस्तिमिरपटलविध्वंसनः तस्य, तथा चाज्ञाननिरासेनैवास्य प्रवृत्तिः, तथा "सुरगणनरेन्द्रमहितस्य" तथा ह्यागममहिमां (मानं) कुर्व्वन्त्येव सुरादयः, तथा सीमां—मर्यादां धारयतीति सीमाधरः तस्येति कर्म्मणि षष्ठी, तं वन्दे,**

तस्य वा यन्माहात्म्यं तद् वन्दे, अथवा तस्य वन्द इति तद्वन्दनं करोमि, तथा ह्यागमवन्त एव मर्यादां धारयन्ति, किंभूतस्य ?–प्रकर्षेण स्फोटितं मोहजालं–मिथ्यात्वादि येन स तथोच्यते तस्य, तथा चास्मिन्सति विवेकिनो मोहजालं विलयमुपयाति–इति ॥ इत्थं श्रुतमभिवन्द्याधुना तस्यैव गुणोपदर्शनद्वारेणाप्रमादगोचरतां प्रतिपादयन्नाह–"जाईजरामरणसोगपणासणस्स, कल्लाणपुक्खलविसालसुहावहस्स । को देवदाणवनरिंदगणच्चिअसस्स, धम्मस्स सारमुवलब्भ करे पमायं ॥३॥" अस्य व्याख्या–जातिः–उत्पत्तिः जरा–वयोहानिलक्षणा मरणं–प्राणनाशः शोकः–मानसो दुःखविशेषः, जातिश्च जरा च मरणं च शोकश्चेति द्वन्द्वः, जातिजरामरणशोकान् प्रणाशयति–अपनयति जातिजरामरणशोकप्रणाशनस्तस्य, तथा च श्रुतधर्म्मोक्तानुष्ठानाज्जात्यादयः प्रणश्यन्त्येव, अनेन चास्यानर्थप्रतिघातित्वमाह, कल्यम्–आरोग्यं कल्यमणतीति कल्याणं, कल्यं शब्दयतीत्यर्थः, पुष्कल–सम्पूर्णं न च तदल्पं, किन्तु ? विशालं–विस्तीर्णं सुखं–प्रतीतं, कल्याणं पुष्कलं विशालं सुखमावहति प्रापयति कल्याणपुष्कलविशालसुखावहः तस्य, तथा च श्रुतधर्म्मोक्तानुष्ठानादुक्तलक्षणमपवर्ग्गसुखमवाप्यत एव, अनेन चास्य विशिष्टार्थप्रसाधकत्वमाह, कः प्राणी देवदानवनरेन्द्रगणार्च्चितस्य श्रुतधर्म्मस्य सारं सामर्थ्यं उपलभ्य दृष्ट्वा विज्ञाय कुर्यात्प्रमादं सेवेत ?, सचेतसश्चारित्रधर्म्मे प्रमादः कर्त्तुं न युक्त इति हृदयं, आह--सुरगणनरेन्द्रमहितस्येत्युक्तं पुनर्देवदानवनरेन्द्रगणार्च्चितस्येति किमर्थम् ?, उच्यते, प्रस्तुतभावान्वयफलतन्निगमनत्वाददोषः, तस्यैवंगुणस्य धर्म्मस्य

सारं-सामर्थ्यमुपलभ्य कः सकर्ण्णः प्रमादी भवेच्चारित्रधर्म्मे इति ॥ यतश्चैवमतः—

"सिद्धे भो ! पयओ नमो जिणमए नन्दी सया संजमे,
देवंनागसुवण्णकिण्णरगणस्सब्भूअभावच्चिए ।
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं,
धम्मो वड्ढउ सासओ विजयओ धम्मुत्तरं वड्ढउ ॥४॥"

अस्य व्याख्या-सिद्धे-प्रतिष्ठिते प्रख्याते, तत्र सिद्धः फलाव्यभिचारेण प्रतिष्ठितः सकलनयव्यासैः प्रख्यातस्त्रिकोटी-परिशुद्धत्वेन, भो इत्येतदतिशयिनामामन्त्रणं पश्यन्तु भवन्तः, प्रयतोऽहं यथाशक्त्येतावन्तं कालं प्रकर्षेण यतः इत्थं परसाक्षिकं प्रयतो भूत्वा पुनर्नमस्करोति, "नमो जिनमते" सुपां सुपो भवन्तीति चतुर्थ्यर्थे सप्तमी, नमो जिनमताय, तथा चास्मिन् सति जिनमते "नन्दिः" समृद्धिः "सदा," सर्वकालं, क ? "संयमे" चारित्रे तथा चोक्तं-"पढमं नाणं तओ दयेत्यादि," किंभूते संयमे ?-देवनागसुवर्णकिन्नरगणैः सद्भूतभावेनार्चिते, तथा च संयमवन्त. अर्च्यन्त एव देवादिभिः, किंभूते जिनमते ?-लोकनं लोकः ज्ञानमेव स यत्र प्रतिष्ठितः, तथा जगदिदं ज्ञेयतया, केचिन्मनुष्यलोकमेव जगन्मन्यन्त इत्यत आह-"त्रैलोक्यं मनुष्यासुरं" आधाराधेयभावरूपमित्यर्थः, अयमित्थम्भूतः श्रुतधर्म्मो वर्धतां-वृद्धिमुपयातु, शाश्वतमिति क्रियाविशेषणमेतत् शाश्वतं वर्द्धतामित्यप्रच्युत्येति भावना, विजयतः,

अनर्थप्रवृत्तपरप्रवादिविजयेनेति हृदयं, तथा धर्म्मोत्तरं-चारित्रधर्म्मोत्तरं वर्द्धतां, पुनर्वृद्ध्यभिधानं मोक्षार्थिना प्रत्यहं

**ज्ञानवृद्धिः कार्येति प्रदर्शनार्थं, तथा च तीर्थकरनामकर्महेतून् प्रतिपादयतोक्तं "अपुव्वनाणगहणे इति"**

पं...." प्रस्तुतभावान्वयफलतन्निगमनत्वादिति " प्रस्तुतभावस्य सुरगणनरेन्द्रमहितः श्रुत-धर्म्मो भगवानित्येवंलक्षणस्यान्वयः-अनुवृत्तिः स एव फलं साध्यं यस्य तत्तथा तस्य—प्राग्व-चनस्य निगमनं—समर्थनं पश्चात्कर्म्मधारयसमासे भावप्रत्यये च प्रस्तुतभावान्वयफलतन्नि-गमनत्वं देवदानवनरेन्द्रगणार्चितस्येति यत्तस्मादिति ।।

टी०..."तदेवं श्रुतधर्मादिकराणांस्तुतिमभिधायाधुनाश्रुतधर्ममभिधित्सुराह तमतिमिरेत्यादि

(१) अज्ञानरूपतमस्तिमिरवृन्द-विनाशकं, बद्धस्पृष्टनिधत्त ज्ञानावरणीय—निकाचितरूप-तिमिरज्ञानावरणवृन्दविनाशकं,

(२) तथा सुरगणनरेन्द्रमहितं श्रुतं वन्दे ( तथाहिआगममहिमानं कुर्वन्त्येव सुरादयः )

(३) सीमाधरं—मर्यादाधरं श्रुतं वन्दे, (श्रुतस्य वा तथाह्यागमवन्त एव मर्यादां धारयन्ति)

(४) पुनः किं भूतं ? प्रस्फोटितमोहजालं—प्रकृष्टतया स्फोटित—मिथ्यात्वादिमोहजालं श्रुतं वन्दे, तथाचाऽस्मिन् सति (श्रुतज्ञाने सति) विवेकिनो मोहजालं विलयमुपयाति.

**इत्थं श्रुतमभिवन्द्याधुना तस्यैव—श्रुतस्यैव गुणानामुपदर्शनद्वाराऽप्रमाद (प्रमादाभाव) विषयतां प्रतिपादयन्नाह—**

(१) जाइजरेत्यादि, जातिजरामरणशोकप्रणाशनस्य जन्म वयो ( यौवन ) हानिरूपजरा प्राणनाशशोक—मानसिकविशिष्टदुःख—प्रणाशन—अपनायकस्य,

तथा च श्रुतधर्मोक्तानुष्ठानाज्जात्यादयः प्रणश्यन्ति एव, अनेन विशेषणरूपेण वाक्येन चास्य—श्रुतधर्मस्यानर्थप्रतिघातित्वमाह—

(२) कल्याणपुष्कलविशाल-सुखावहस्य (श्रुतधर्म्मस्य) आरोग्यकारणरूपकल्याणसम्पूर्ण—विस्तीर्ण—सुखप्रापकस्य ( श्रुतधर्मस्य ) तथा च श्रुतधर्मोक्तानुष्ठानादुक्तलक्षणमपवर्गसुखमवाप्यत विशेषणवाक्येनाऽस्य श्रुतधर्म्मस्य विशिष्टार्थसाधकमाह, (३) कः प्राणी देवदानवनरेन्द्रगणार्चितस्य श्रुतधर्मस्य सारं—सामर्थ्यं, उपलभ्य—दृष्ट्वा विज्ञाय, कुर्यात्—प्रमादं सेवेत ? सचेतसः—प्रेक्षा-वतश्चारित्रधर्मे प्रमादः कर्तुं न युक्तः इति हृदयं, ।

वादी आह—सुरगणनरेन्द्रमहितस्येत्युक्तं पुनर्देवदानवनरेन्द्रगणार्चितस्येति किमर्थम् ? उच्यते, प्रस्तुतभावाऽन्वयफलतन्निगमनत्वाददोषः, तथाहि—सुरगणनरेन्द्रैर्महितस्य—पूजितस्य,

श्रुतधर्मस्य पूजितत्व--पूज्यत्वरूपप्रस्तुतभावस्यानुवृत्ति-र्व्याप्ति-रविच्छिन्नप्रवाहरूपफलसाध्य-विशिष्ट पूर्ववचन ( प्रथमकथितविशेषणरूपपूर्ववचन )स्य समर्थनं 'देवदानवनरेन्द्रगणार्चितस्ये'ति द्वितीय-दत्तविशेषणे सम्यग्घटितं वर्त्ततेऽतः कोऽपि दोषो नास्त्येवात्र पुनरुक्तत्वं नास्त्येव ।

प्रस्तुतभावस्य सुरगणनरेन्द्रमहितः श्रुतधर्मो, भगवानित्येवं लक्षणस्यान्वयः—अनुवृत्तिः स एव फलं साध्यं यस्य तत्तथा तस्य—प्राग्वचनस्य निगमनं—समर्थनं पश्चात्कर्मधारयसमासे भाव-प्रत्यये च प्रस्तुतभावान्वय—फलतन्निगमनत्वं देवदानवनरेन्द्रगणार्चितस्येति, यत्तस्मादिति. यतश्चैवमतः "सिद्धे भो पयओ नमो जिनमए नन्दी सया'संजमे ।

देवं नागसुवण्णकिन्नरगणस्सब्भूयभावच्चिए ।
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं ।
धम्मो वड्ढउ सासओ विजयओ धम्मोत्तरं वड्ढउ ॥ ४ ॥

व्या. सिद्धे—प्रतिष्ठिते प्रख्याते=फलाव्यभिचारेण प्रतिष्ठितं ( योगक्रियाऽवञ्चकत्वेन फलाऽ-वञ्चकत्वेन—अवश्यं फलदायकत्वेन प्रतिष्ठां प्राप्तं जिनमतं ) तत्र सकलानां नयानां व्याप्तेः ( व्यापकत्वेन ) प्रख्यातः, कषच्छेदतापरूपत्रिकोटी—परिशुद्धत्वेन प्रख्यातं—प्रसिद्धिं प्राप्तं जिनमतं तत्र तस्मै वा. ।

'भो' इत्येतदतिशयिनामामन्त्रणं, पश्यन्तु भवन्तः प्रयतोऽहं यथाशक्ये तावन्तं कालं प्रकर्षेण यतः, अर्थात् अवध्यादिज्ञानातिशयिनां, ज्ञानलब्ध्यादिलब्धिधराणां महर्षीणामा-मंत्रणं कृत्वा कथयति 'भो भवन्तो भगवन्तः पश्यन्तु' यत् 'प्रयतः' प्रयत्नशीलः सन् इत्थं परसाक्षिकं प्रयतो भूत्वा पुनर्नमस्करोति, 'नमोत्ति नमते' नमो जिनमताय जिनमते वा, सुपां सुपो भवन्तीति चतुर्थी—अर्थे सप्तमी ( एकविभक्ति—स्थानेऽन्या विभक्ति र्भवतीति न्यायोऽत्र ) तथा चास्मिन् सति ( पुनर्नमस्कारकरणेन ) जिनमते 'नन्दिः' समृद्धिः, सदा—सर्वकालं क ? संयमे—चारित्रे, तथाचोक्तं 'पढमं ज्ञानं तओ दयेत्यादि' शुद्धचारित्रपालनं यथार्थज्ञान—सापेक्षं, प्रथमं समस्तजीवराशिज्ञानं, पश्चाच्च जीवदया, यथार्थैव ।

हार्दमिदं=चारित्र—दयासमृद्धिं प्रति जिनमतज्ञानं कारणम्, जिनमते सत्येव चारित्र-समृद्धिः, जिनमतज्ञानेऽसति चारित्ररूपदयासमृद्धेरभावः, एवमन्वयव्यतिरेकाभ्यां कार्यकारणनिश्चयः, किंभूते संयमे ? 'देवनागसुपर्णकिन्नरगणैः सद्भूतभावेनार्चिते' अर्थाद् वैमानिकदेवैः, नाग-कुमारैः, सुपर्णकुमारैः, किन्नरगणैः सत्यभावेनाऽर्चिते—पूजिते संयमे, जिनमते सत्येव समृद्धि-रस्ति, तथा च संयमवन्तः—चारित्रवन्तः, अर्च्यन्ते—पूज्यन्ते एव देवादिभिः ।

किंभूते जिनमते ! लोकनं लोकः, ज्ञानमेव, स यत्र प्रतिष्ठितः, तथा जगदिदं ज्ञेयतया, केचिन्मनुष्यलोकमेव जगन्मन्यन्ते इत्यत आह 'त्रैलोक्यं मनुष्यासुरं' आधाराधेयरूपमित्यर्थः, ।

त्रैलोक्यं-त्रिलोकी-मनुष्यादेराधारभूतो मध्यलोकः, सुरादेराधारभूतः-स्वर्गलोकः, असुरादेराधारभूतः पाताललोकः, अर्थान्मनुष्यादिराधेयभूतः, मध्यलोकादिराधारभूतः, आधाराधेयस्वरूपत्रैलोक्यरूपं जगद् यत्र ज्ञाने-श्रुतज्ञाने ज्ञेयत्वेन प्रतिष्ठितं-प्रतिष्ठां प्राप्तम् ।

अयमित्थम्भूतः श्रुतधर्मो वर्धतां-वृद्धिमुपयातु, शाश्वतमिति क्रियाविशेषणमेतत् 'शाश्वतं वर्धतामित्यप्रच्युत्येति भावना,' सदा नित्यत्वेन, अविनाशित्वेनेत्यर्थः,

'देवं' इत्यत्र वाक्यालङ्काराय-छन्दः-पूर्त्तये वा 'अनुस्वारःप्रयुक्तः,' विजयतः-अनर्थप्रवृत्तपरवादि-विजयेनेति हृदयं, (श्रुतधर्माभिन्नजिनमतं शाश्वतं वर्धताम्,

तथा (यस्योत्तरे-फले, तदनन्तरं चारित्रधर्मोऽस्ति, एतादृशं श्रुतधर्म्मोऽभिन्नं जिनमतं वर्धताम्, ज्ञानवृद्धिचारित्रवृद्धिद्वयं मिथोवृद्धि-अतिवृद्धि-सर्ववृद्धिकारणं ज्ञेयम्, तथापि चारित्रवृद्धिं प्रति ज्ञानवृद्धिरवश्यं ज्ञेया, ज्ञानस्य फलं विरतिरिति प्रघोषोऽस्ति, यथा यथा ज्ञानवृद्धिस्तथा तथा चारित्रगतिवृद्धिः)

धर्म्मोत्तरं-(धर्मोत्तरं चारित्रधर्मस्य प्राधान्यं यथा भवति एवं वर्धतां) चारित्रधर्मोत्तरं (जिनमतं) वर्द्धतां, पुनर्वृद्ध्यभिधानं, 'मोक्षार्थिना प्रत्यहं ज्ञानवृद्धिः कार्येति प्रदर्शनार्थं,' तथा च तीर्थंकरनामकर्महेतून् प्रतिपादयतोक्तं 'अपुव्वज्ञानग्रहणे' इति,

— अथ शास्त्रकारः श्रुतधर्मवृद्धिफलसिद्धिः, हेतुसिद्धिश्च दर्श्यते —

**प्रणिधानमेतत्, अनाशंसाभावबीजं, मोक्षप्रतिबन्धेन, अप्रतिबन्ध एष प्रतिबन्धः, असङ्गफलसंवेदनात्,**

**यथोदितश्रुतधर्म्मवृद्धेर्मोक्षः, सिद्धत्वेन, नेह फले व्यभिचारः, असङ्गेन चैतत्फलं संवेद्यते, एवं च सद्भावारोपणात्तद्वृद्धिः, शुभमेतदध्यवसानमत्यर्थं,**

**शालिबीजारोपणवच्छालिहेतुः, दृष्टा ह्येवं पौनःपुन्येन तद्वृद्धिः, एवमिहाप्यत इष्टवृद्धिरिति, एवं विवेकग्रहणमत्र जलम्, अतिगम्भीरोदार एष आशयः,**

अत एव संवेगामृतास्वादनं, नाविज्ञातगुणे चिन्तामणौ यत्नः, न चान्यथाऽतोऽपि समीहितसिद्धिः,

प्रकटमिदं प्रेक्षापूर्वकारिणां, एकान्ताविषयो गोयोनिवर्ग्गस्य, परमगर्भ एष योगशास्त्राणां, अभिहितमिदं तैस्तैश्चारुशब्दैर्मोक्षाध्वदुर्ग्गग्रहणमिति कैश्चित् तमोग्रन्थिभेदानन्द इति चान्यैः गुहान्धकारालोककल्पमपरैः भवोदधिद्वीपस्थानं चान्यैरिति,

न चैतद्यथावदवबुध्यते महामिथ्यादृष्टिः, तद्भावाऽऽच्छादनात्, अहृदयवत्काव्यभावमिति, तत्प्रवृत्त्याद्येव ह्यत्र सल्लिङ्गं, तद्भाववृद्धिश्च काव्यभावज्ञवत्, अत एव हि महामिथ्यादृष्टेः प्राप्तिरप्यप्राप्तिः, तत्फलाभावात्, अभव्यचिन्तामणिप्राप्तिवत्, मिथ्यादृष्टेस्तु भवेद्द्रव्यप्राप्तिः साऽऽदरादिलिङ्गा अनाभोगवती, न त्वस्यास्थान एवाभिनिवेशः, भव्यत्वयोगात्,

तच्चैवंलक्षणं, प्राप्तं चैतदभव्यैरप्यसकृत्, वचनप्रामाण्यात्, न च ततः किञ्चित्, प्रस्तुतफललेशस्याप्यसिद्धेः, परिभावनीयमेतदागमज्ञैर्वचनानुसारेणेति। एवमन्येषामपि सूत्राणामर्थो वेदितव्य इति, दिग्मात्रप्रदर्शनमेतत्,

एवं प्रणिधानं कृत्वैतत्पूर्विका क्रियाफलायेति श्रुतस्यैव कायोत्सर्ग्गसंपादनार्थं पठति पठन्ति वा "सुयस्स भगवओ करेमि काउस्सग्ग" मित्यादि यावद्वोसिरामि, व्याख्या पूर्ववत्, नवरं श्रुतस्येति—प्रवचनस्य सामायिकादिचतुर्दशपूर्वपर्यन्तस्य "भगवतः" समग्रैश्वर्यादियुक्तस्य,

शुद्धत्वेन समग्रैश्वर्यादियोगः, न ह्यतो विधिप्रवृत्तः फलेन

वरुच्यते, व्यासाश्च सर्वे प्रवादा एतेन, विधिप्रतिषेधानुष्ठान-पदार्थाविरोधेन च वर्त्तते स्वर्गकेवलार्थिना तपोध्यानादि कर्त्तव्यं, सर्वे जीवा न हन्तव्या इति वचनात्, समितिगुप्तिशुद्धा क्रिया असपत्नो योग

इति वचनात्, उत्पादविगमध्रौव्ययुक्तं सत्, एकं द्रव्य-मनन्तपर्यायमर्थ इति वचनादिति, कायोत्सर्गप्रपञ्चः प्राग्वत् तथैव च स्तुतिः, यदि परं श्रुतस्य, समानजातीयबृंहकत्वात्, अनुभवसिद्धमेतत्, तज्ज्ञानां, चलति समाधिरन्यथेति प्रकटं, ऐतिह्यं चैतदेवमतो न बाधनीयमिति व्याख्यातं पुष्करवरद्वीपार्द्धे इत्यादिसूत्रम् ॥

पं०..."प्रणिधानेत्यादि" प्रणिधानम्-आशंसा एतच्छ्रुतधर्म्मवृद्ध्यभिलषणं, कीदृगित्याह-"अनाशंसाभावबीजं" अनाशंसा -सर्व्वेच्छोपरमः सैव भावः-पर्यायः तस्य बीजं-कारणं, कथ-मित्याह-"मोक्षप्रतिबन्धेन" मोक्षं प्रति हीदं प्रार्थनं, स चानिच्छारूपो, नन्वप्रतिबन्धसाध्यो मोक्षः कथमित्थमपि तत्र प्रतिबन्धः श्रेयानित्याह-"अप्रतिबन्धः" अप्रतिबन्धसदृश "एषः" मोक्षविषयप्रतिबन्धः प्रार्थनारूपः, कुत इत्याह-"असङ्गफलसंवेदनाद्" असङ्गस्य-रागद्वेषमोहाद्य-विषयीकृतस्य फलस्य-आशंसनीयस्य संवेदनाद्,अनुभवाद्,अनीदृशफलालम्बनं हि प्रणिधानं प्रतिबन्धः परमपुरुषार्थलाभोपघातित्वात्, ननु कथमयं नियमो? यदुतेदं प्रणिधानमनाशंसाभावबीजमित्याह-

"यथोदितश्रुतधर्म्मवृद्धेः" सर्व्वज्ञोपज्ञश्रुतधर्म्मप्रकर्षात् "मोक्षः" अनाशंसारूपो यतो भवतीति गम्यते, अत्रापि कथमेकान्त? इत्याह-"सिद्धत्वेन" श्रुतधर्म्मवृद्धेर्मोक्षं प्रत्यवन्ध्यहेतु-भावेन, इदमेव भावयति "न" नैव "इह" मोक्षलक्षणे, फले "व्यभिचारो" विसंवादः फलान्तरभावतो निष्फलतया वा श्रुतधर्म्मवृद्धेरिति, अस्यैवासङ्गत्वसिद्ध्यर्थमाह-"असङ्गेन च" रागद्वेषमोहलक्षणसङ्गाभावेन च, "एतत्" मोक्षफलं "संवेद्यते" सर्वैरेव मुमुक्षुभिः प्रतीयत इति, इत्थं श्रुतधर्म्मवृद्धेः फलसिद्धिमभिधाय अस्या एव हेतुसिद्धिमाह-"एवम्" उक्तप्रकारेण "चः" पुनरर्थे भिन्नक्रमश्च "सद्भावारोपणात्" श्रुतवृद्धिप्रार्थनारूपशुद्धपरिणामस्याङ्गीकरणात् "तद्वृद्धिश्च" श्रुतधर्म्मवृद्धिः पुनर्भवतीति गम्यते, एतद्भावनायैवाह-"शुभं" प्रशस्तं "एतत्" पुनः श्रुतधर्म्मवृद्ध्याशंसालक्षणं "अध्यवसानं" परिणामः, "अत्यर्थम्" अतीव, कीदृगित्याह-

"शालिबीजारोपणवत्" शालिबीजस्य पुनः पुनः निक्षेपणमिव "शालिहेतुः" शालिफल-निमित्तं, एतदेव भावयति-"दृष्टा" उपलब्धा "हिः" यस्माद्, "एवं" श्रुतधर्म्मवृद्धिप्रार्थना-

न्यायेन पौनःपुन्येन शालिबीजारोपणस्य वृद्धिस्तद्वृद्धिः–शालिवृद्धिः, " एवं " शालिवृद्धिप्रकारेण " इहापि " श्रुतस्तवे " अतः " आशंसापौनःपुन्याद् " इष्टवृद्धिः " श्रुतवृद्धिरिति, अथ शालिबीजारोपणदृष्टान्ताक्षिप्तं सहकारिकारणं जलमपि प्रतिपादयन्नाह–" एवम् " अनन्तरोक्त-प्रकारेण " विवेकग्रहणं " विवेकेन–सम्यगर्थावधारणविचारेण ग्रहणं–स्वीकारः श्रुतस्य विवेकस्य वा ग्रहणं, तत्किमित्याह–'अत्र" श्रुतशालिवृद्धौ "जलम्" अम्भः, अथ विवेकमेव स्तुवन्नाह–"अतिगम्भीरोदारः" प्रभूतश्रुतावरणक्षयोपशमलभ्यत्वादत्यनुत्तान उदारश्च सकलसुखलाभसाधक-त्वाद् "एष" विवेकरूप "आशयः" परिणामः,

" अत एव " विवेकादेव न तु सूत्रमात्रादपि " संवेगामृतास्वादनं " संवेगो–धर्म्माद्यनु-रागो, यदुक्तम्–" तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते साधौ सर्व्वग्रन्थ-संदर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः ॥ १ ॥ " स एवामृतं–सुधा तस्याऽऽस्वादनम्–अनुभवो, ननु क्रियैव फलदा न तु ज्ञानं, यथोक्तं–" क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्। यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेद् ॥१॥" इति, किं विवेकग्रहणेनेत्याशङ्क्य व्यतिरेकतोऽर्थान्तरोपन्यासेनाह–" न " नैव " अविज्ञातगुणे " अनिर्णीतज्वराद्युपशमस्वभावे " चिन्तामणौ " चिन्तारत्ने " यत्नः " तदुचितपूजाद्यनुष्ठानलक्षणो, यथा हि चिन्तामणौ ज्ञातगुण एव यत्नस्तथा श्रुतेऽपीति ज्ञानपूर्विकैव फलवती क्रियेति, ननु चिन्तामणिश्चिन्ता-मणित्वादेव समीहितफलः स्यात्, किं तत्रोक्तयत्नेनेत्याह–" न च " नैव " अन्यथा " अज्ञात-गुणत्वेन यत्नाभावे " अतोऽपि " चिन्तामणेरपि आस्तां श्रुतज्ञानाम् " समीहितसिद्धिः " प्रार्थितपरमैश्वर्यादिसिद्धिः, इदमेव द्रढयन्नाह–

" प्रकटमिदं " प्रत्यक्षमेतत्, " प्रेक्षापूर्वकारिणां " बुद्धिमतां प्रेक्षाचक्षुषो विषयत्वाद्यदुत ज्ञानपूर्वः सर्वो यत्नः समीहितसिद्धिफलो, व्यतिरेकमाह–"एकान्ताविषयः" सदाऽप्यसंवेद्यत्वात्, "गोयोनिवर्गस्य" बलीवर्दसमपृथग्जनस्य, पुनः कीदृगित्याह–"परमगर्भः" परमरहस्यं, "एष" विवेको " योगशास्त्राणां " षष्टितन्त्रादीनां, कुतो ?–यतः अभिहितमिदं–विवेकवस्तु " तैस्तैः " वक्ष्यमाणैः "चारुशब्दैः" सत्योदारार्थध्वनिभिः " मोक्षाध्वेत्यादि " प्रतीतार्थं वचनचतुष्कमपि, नवरं " मोक्षाध्वदुर्गग्रहणमिति " यथा हि कस्यचित्कचिन्मार्गे तस्कराद्युपद्रवे दुर्गग्रहणमेव परित्राणं, तथा मोक्षाध्वनि रागादिस्तेनोपद्रवे विवेकग्रहणमिति, आह–श्रुतमात्रनियतं विवेक-ग्रहणं, तत्किमस्मादस्य विशेषेण पृथग् ज्ञापनमित्याशङ्क्याह—

"न (नच)" नैव "एतत्" श्रुतं कथञ्चित्पाठेऽपि "यथावत्" यत्प्रकारार्थवद्यादृशार्थ-मित्यर्थः, "अवबुध्यते" जानीते "महामिथ्यादृष्टिः" पुद्गलपरावर्त्ताधिकसंसारः, कथमित्याह–" तद्भावाच्छादनाद् " बोधभावाऽऽवरणात्, दृष्टान्तमाह–" अहृदयवद् " अव्युत्पन्न इव " काव्यभावमिति " शृङ्गारादिरससूचकवचनरहस्यमिति, अतः कथं श्रुतमात्रनियतं विवेक-ग्रहणमिति, कुत इदमित्थमित्याह–तत्प्रवृत्त्याद्येव " हिः " यस्मात् तत्रावबुद्धे श्रुतार्थे प्रवृत्ति-

विघ्नजयसिद्धिविनियोगा एवं न पुनः श्रुतार्थज्ञानमात्रम् "अत्र" श्रुतावबोधे सद्-अव्यभिचारि लिङ्गं-गमको हेतुः, किमेतावदेव नेत्याह-"तद्भाववृद्धिश्च" बोधभाववृद्धिश्च, "काव्य-भावज्ञवत्" काव्यभावज्ञस्येव काव्ये इति दृष्टान्तः, "अत एव" यथावदनवबोधादेव "हिः" स्फुटं "महामिथ्यादृष्टेः" उक्तलक्षणस्य प्राप्तिरध्ययनादिरूपस्य श्रुतस्याप्राप्तिः, कुत इत्याह- "तत्फलाभावाद्" यथावदवबोधरूपफलाभावात्, किंवदित्याह-"अभव्यचिन्तामणिप्राप्तिवत्" यथा हि अतिनिर्भाग्यतयाऽयोग्यस्य चिन्तामणिप्राप्तावपि तद्ज्ञानत्वाभावान्न तत्फलं, तथा अस्य श्रुतप्राप्तावपीति, भवतु नामैवं महामिथ्यादृष्टेः, मिथ्यादृष्टेस्तु का वार्त्तेत्याह-"मिथ्या-दृष्टेस्तु" धर्म्मबीजाधानाद्यर्हस्य "भवेत्" स्यात्, "द्रव्यप्राप्तिः" भावश्रुतयोग्यद्रव्यश्रुतव्याप्तिः, कीदृग् स्यात् द्रव्यश्रुतप्राप्तिः?-"आदरादिलिङ्गा" 'आदरः करणे प्रीति'रित्यादिलिङ्गा "अना-भोगवती" सम्यक्श्रुतार्थोपयोगरहिता, ननु मिथ्यादृष्टिमहामिथ्यादृष्ट्योरनाभोगाद्यविशेषात्कः प्रतिविशेष इत्याह-"न तु" न पुनः "अस्य" मिथ्यादृष्टेः "अस्थान एव" मोक्षपथप्रति-पन्थिन्येव भावे 'अभिनिवेशः" आग्रहः, स्थानाभिनिवेशस्यापि तस्य भावात्, कुत एवमित्याह- "भव्यत्वयोगाद्" भावश्रुतयोग्यत्वस्य भावाद् अस्थानाभिनिवेश एव हि न, तदभावाद्, अस्यैव हेतोः स्वरूपमाह—

"तच्च" तत्पुनर्भव्यत्वं "एवंलक्षणम्" अस्थाने स्थाने चाभिनिवेशस्वभावं इत्यनयोर्विशेषो ज्ञेयः, महामिथ्यादृष्टेः, प्राप्तिरप्यस्यासंभविनी कुतस्तस्य फलचिन्तेत्याह-"प्राप्तं" लब्धं, चकार उक्तसमुच्चये, "एतत्" श्रुतम् "अभव्यैरपि" एकान्तमहामिथ्यादृष्टिभिः किं पुनरन्य-मिथ्यादृष्टिभिः "असकृद्" अनेकशः, कुत इत्याह-"वचनप्रामाण्यात्" सर्वजीवाना-मनन्तशो ग्रैवेयकोपपातप्रज्ञापनाप्रामाण्याद्, एवं तर्हि तत्फलमपि तेषु भविष्यतीत्याह-"न च" नैव "ततः" श्रुतप्राप्तेः "किञ्चित्" फलमिति गम्यते, कुत इत्याह-"प्रस्तुतफललेशस्यापि" प्रकृतयथावद्बोधरूपफलांशस्यापि, आस्तां सर्व्वस्य "असिद्धेः" अप्राप्तेः, तत्सिद्धावल्पकालेनैव सर्वमुक्तिप्राप्तिप्रसङ्गात्,

"सिद्धत्वेनेति" सिद्धत्वेन फलाव्यभिचारप्रतिष्ठितत्वत्रिकोटिपरिशुद्धिभेदेन, इदमेव न ह्यतो विधिप्रवृत्त इत्यादिना वाक्यत्रयेण यथाक्रमं भावयति, सुगमं चैतन्नवरं-"विधिप्रतिषेधानुष्ठान-पदार्थाविरोधेन चेति" विधिप्रतिषेधयोः कषरूपयोः अनुष्ठानस्य-छेदरूपस्य पदार्थस्य च-तापविषयस्याविरोधेन-पूर्वापराबाधया वर्त्तते, चकार उक्तसमुच्चयार्थः, अमुमेवाविरोधं त्रिकोटि-परिशुद्धिलक्षणं द्वाभ्यां वचनाभ्यां दर्शयति-"स्वर्गेत्यादिना" सुगमं चैतत्, किन्तु स्वर्गार्थिना तपोदेवतापूजनादि, केवलार्थिना तु ध्यानाध्ययनादि कर्त्तव्यं, "असपत्नो योग इति" असपत्नः, परस्पराविरोधी स्वस्वकालानुष्ठानाद्योगः-स्वाध्यायादिसमाचारः.

"ऐतिह्यं चैतदिति" सम्प्रदायश्चायं यदुत तृतीया स्तुतिः श्रुतस्येति ॥

॥ इति श्रीमुनिचन्द्रसूरिविरचितायां ललितविस्तरापञ्जिकायां श्रुतस्तवः समाप्तः ॥

टी०... प्रणिधानमित्यादि, एतत् 'श्रुतधर्मो वर्धताम्' इत्येवं श्रुतधर्मवृद्धिविषयकाभिलाष–आशंसारूपं प्रणिधानं, कीदृगित्याह—सर्वेच्छोपरमरूपानाशंसारूपभावपर्यायकार्यस्य कारणं–प्रणिधानं ।

कथमित्याह—'मोक्षप्रतिबन्धेन' मोक्षं प्रति हीदं प्रार्थनं, सचानिच्छारूपः प्रतिबन्धः (मोक्षविषयिकी ममता) नन्वप्रतिबन्धसाध्यो मोक्षः कथमित्थमपि तत्र प्रतिबन्धः श्रेयानित्याह 'अप्रतिबन्धः' अप्रतिबन्धसदृशः 'एषः' मोक्षविषयप्रतिबन्धः प्रार्थनारूपः ।

कुत इत्याह—'असङ्गफलसंवेदनाद्' असङ्गस्य राग–द्वेषमोहाद्यविषयीकृतस्य फलस्य, आशंसनीयस्य (श्रुतधर्मवृद्धिरूपाशंसनीयस्य) मोक्षस्य वा सर्वेच्छोपरमस्य संवेदनाद्–अनुभवाद्, अनीदृशफलालम्बनं हि प्रणिधानं प्रतिबन्धः, परमपुरुषार्थलाभोपघातित्वात् ।

(इदं धर्मो वर्धतां' इति कथनं श्रुतधर्मवृद्धिरूपाशंसारूपं प्रणिधानं, सर्वाशंसाभङ्गबीजं, यतः–एषा प्रार्थनामोक्षप्रतिबद्धाऽस्ति, एष मोक्षप्रतिबन्धःमोक्षममत्वरूपं, यतोऽस्मिन्नसंगवत्फलानुभवो भवति, इदं प्रणिधानं अनाशंसाभावबीजमस्त्यतः सर्वज्ञोपज्ञश्रुतधर्मवृद्धितो मोक्षो भवति, यत एतन्मोक्षस्य सिद्धकारणमस्ति, अतः मोक्षफलसङ्गनेन, न, विसंवादोऽस्ति, रागद्वेषमोहसंगस्यात्यन्तिकाभावद्वारैवैतत्फलं प्रतीयते. )

ननु कथमयं नियमो ? यदुतेदं प्रणिधानमनाशंसाभावबीजमित्याह—यथोदितश्रुतधर्मवृद्धेः सर्वज्ञोपज्ञश्रुतधर्मप्रकर्षात्, 'मोक्षः' अनाशंसारूपो यतो भवतीति गम्यते, अत्रापि कथमेकान्तः ? इत्याह—'सिद्धत्वेन' श्रुतधर्मवृद्धे मोक्षं प्रत्यवन्ध्यहेतुभावेन, इदमेव भावयति 'न' नैव 'इह' मोक्षलक्षणे फले 'व्यभिचारो' विसंवादः, फलान्तरभावतो निष्फलतया वा श्रुतधर्मवृद्धेरिति, अस्यैवासङ्गत्वसिद्ध्यर्थमाह—'असङ्गेन च' रागद्वेषमोहलक्षणसङ्गाभावेन, 'एतत्' मोक्षफलं 'संवेद्यते' सर्वैरेव मुमुक्षुभिः प्रतीयते इति, इत्थं श्रुतधर्म्मवृद्धेः फलसिद्धिमभिधाय अस्या एव हेतुसिद्धिमाह—'एवम्' उक्तप्रकारेण 'चः' पुनरर्थे भिन्नक्रमश्च 'सद्भावारोपणात्' श्रुतवृद्धिप्रार्थनारूपशुद्धपरीणामस्याङ्गीकरणात् तद्वृद्धिश्च श्रुतधर्म्मवृद्धिः पुनर्भवतीति गम्यते, एतद्भावनायैवाह—'शुभं'—प्रशस्तं 'एतत्' पुनः श्रुतधर्म्मवृद्ध्याशंसालक्षणं 'अध्यवसानं' परिणामः 'अत्यर्थं' अतीव, कीदृशमित्याह—

**प्रश्नः**=कथमयं नियमो ? यदुत–इदं प्रणिधानं, अनाशंसाभाव–बीजम्–यत्र यत्र विवक्षितं यदिदं प्रणिधानं तत्र तत्रानाशंसाभावबीजं भवतीति व्याप्तिः कथं ?

**समाधानम्**=सर्वज्ञप्रणीतश्रुतधर्म्मस्य प्रकर्ष–उत्कर्षात्–अर्थात्, सर्वोत्कृष्ट–सर्वज्ञोक्त–श्रुतधर्मतः, अनाशंसारूप–मोक्षो भवत्यतः पूर्वोक्तो नियमोऽस्ति, ।

**प्रश्नः**=अत्रापि कथमेकान्तः ( नियमः )

**समाधानम्**=मोक्षं प्रति श्रुतधर्मवृद्धिरवन्ध्यममोघं कारणं मोक्षश्रुतधर्म्मवृद्धिद्वयस्य कार्य-कारणभावोऽस्ति मोक्षरूपफले व्यभिचारो–विसंवादः, फलान्तरभावापेक्षया ( मोक्षभिन्नमन्य-त्फलं न भवतीति ) अथवा निष्फलता–सर्वथा फलरहितत्वापेक्षया न भवतीति.

अस्यैव–मोक्षफलस्यैव, प्रकृष्ट–सर्वज्ञोपज्ञ श्रुतधर्मस्य वा असङ्गत्वसिद्धये कथयति, राग-द्वेषमोहरूपसङ्गस्याभावेन च, मोक्षफलं सर्वैरेव मुमुक्षुभिः प्रतीयते इति एवं श्रुतधर्म्मवृद्धेः फलसिद्धिमभिधाय पुनः श्रुतधर्मवृद्धिरूपकार्यं प्रति श्रुतवृद्धिप्रार्थनारूप–शुद्धपरिणामप्रतिपत्तिः कारणं, श्रुतधर्म्मवृद्धेरेव कारणसिद्धिकथनं ।

तथा च पुनः श्रुतधर्म्मवृद्धिविषयकाशंसारूपं प्रशस्तपरिणामोऽत्यर्थं स्मरणीयः ।

**प्रश्नः**=कीदृग्–अस्मिन् विषये को दृष्टान्तः ?

**समाधानम्**=यथा शालिबीजस्य पुनः पुन निंक्षेपणं शालिरूपफलस्य हेतुः, तथाहि–श्रुतधर्म्मवृद्धिप्रार्थनान्यायेन वारंवारं शालिबीजारोपणस्य वृद्धितः शालिवृद्धिः, प्रत्यक्षा.

दार्ष्टान्तिकत्वं–दृष्टान्ते घटना=एवं शालिवृद्धिप्रकारेण श्रुतस्तवे, आशंसापौनः पुन्याद् श्रुतवृद्धिरूपेष्ट–सिद्धिः, शालिबीजारोपणदृष्टान्ताऽन्यथाऽनुपपत्त्या ( अर्थापत्या ) सहकारिकारणं विवेकग्रहणं जलं ज्ञेयं–विवेकग्रहणमर्थात्, सम्यगर्थाऽवधारण–विचारेण, श्रुतस्य–विवेकस्य वा ग्रहणं स्वीकारः ।

श्रुतरूपशालिवृद्धौ विवेकग्रहणरूपजलं कथ्यते तत्र विवेकः कीदृशः, तस्य वैशिष्ट्यं स्तौति, "अतिगम्भीरोदार एष आशयः" प्रभूतश्रुतावरणक्षयोपशमजन्यत्वेन ( लभ्यत्वेन ) अति–अनुत्तानः ( अगाध–गम्भीरः नीचैर्यस्य सीमा नास्ति ) उदारश्च सकलसुखलाभसाधकोऽयं विवेक–रूपाशयः–परिणामः,

विवेकादेव नतु सूत्रमात्रादपि, संवेगामृतास्वादनं–संवेगो धर्म्माद्यनुरागो, यदुक्तं–"तथ्ये धर्म्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते, साधौ सर्वग्रन्थसन्दर्भहीने, संवेगोऽसौ निश्च-लोऽनुरागः" सुदेवसुगुरुसुधर्मानुरागो निश्चलः संवेग उच्यते, एतादृशसंवेगसुधाऽनुभवो भवति.

**प्रश्नः**=क्रियैव फलदा न तु ज्ञानं,

"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेद् ॥"

किं विवेकग्रहणेन.

**समाधानम्**=व्यतिरेकतोऽर्थान्तरोपन्यासेनाह=अविज्ञातगुणे= अनिर्णीतज्वराद्युपशमस्वभावे चिन्तामणौ, चिन्तारत्नोचितपूजाद्यनुष्ठानरूपः प्रयत्नः-क्रिया न भवति. यथा हि चिन्तामणौ ज्ञातगुण एव प्रयत्नस्तथा श्रुतेऽपीति ज्ञानपूर्विकैव फलवती क्रियेति,

**प्रश्नः**=चिन्तामणिश्चिन्तामणित्वादेव समीहित-फलदः स्यात् किं तत्रोक्तयत्नेनेति ?

**प्रत्युत्तरम्**=अन्यथा गुणज्ञानाभाववत्त्वेन प्रयत्नाभावे चिन्तामणेरपि—आस्तां श्रुतज्ञानात्, प्रार्थितपरमैश्वर्यादिसिद्धिर्नैव,

—गुणज्ञानानन्तरं प्रयत्नस्ततः समीहितसिद्धिरित्येनं विषयं द्रढयति—

बुद्धिमतां प्रेक्षारूपचक्षुषो विषयत्वादेतत्प्रत्यक्षम्, यदुत 'ज्ञानपूर्वः सर्वो यत्नः समीहित-सिद्धिरूपफलदः, परन्तु बलीवर्दसमपृथग्जनस्य सदाऽपि, असंवेदनविषयत्वेन एकान्ततः—अविषय एव.

**शङ्का**=पुनः कीदृग्—विवेकवस्तु ?

**समाधानम्**=एष विवेकः, षष्टितन्त्रादि—योगशास्त्राणां परमरहस्यरूपः परमगर्भः, यत इदं विवेकवस्तु, तैस्तैर्वक्ष्यमाणचारुशब्दैः—सत्योदारार्थगर्भितैर्ध्वनिभिरभिहितं ।

(१) इदं विवेकवस्तु, कैश्चिन्मोक्षाध्वदुर्गग्रहणम्=यथाहि कस्यचित्क्वचिन्मार्गे तस्करा-द्युपद्रवे दुर्गग्रहणमेव परित्राणं तथा मोक्षाध्वनि रागादिरूपस्तेनोपद्रवे विवेकग्रहणमेव,

(२) तमोग्रन्थिभेदानन्द इति चान्यैः=अनादिकालीनाज्ञानाविद्यारूपं तम एव ग्रन्थि—अभेद्यग्रन्थिः प्रागभूत्, यदा ज्ञानविवेकरूपदिव्यप्रकाशद्वारा सावधिक—भोजन—भोगजन्यानन्द-निवारणपूर्वक—तमोग्रन्थिभेदेन जन्य—निरवधिकानन्दस्तु विवेकद्वारैवेति, अभिहितं चान्यैः,

(३) गुहान्धकारालोककल्पमपरैः=एतद्विवेकग्रहणं, अविद्यारूपतमोभृत—गुहारूप आत्मा-ऽस्ति, तद्गुहान्तरन्धकारध्वंसक—श्रुतार्थ—विचाररूप—ज्वलत्—प्रकाशरूप—विवेकोऽस्ति, तत्रात्म-गुहागतलोकोत्तरसमृद्धि दृश्यते कथं तमस्तिष्ठेत् ? ।

(४) भवोदधिद्वीपस्थानं चान्यैरिति=एष विवेकः—भवसागरे निर्भय—विश्रामायैक—द्वीप-समस्थानं—शास्त्रान्तरीयैरन्यैः कथ्यते, सागरमध्ये भ्रमतो जीवस्य यदि कोऽपि द्वीपो मिलेत्तदा तस्य, आश्वासनाय, आनन्दाश्चर्यं समो लगति, तत्रान्नजलादिकं प्राप्यते, काचिन्नौकाऽऽगच्छेत्तदा सागरात्पारं गन्तुं शक्यता वर्त्तते, एवं श्रुतार्थबोधसम्प्राप्त्या महाऽऽश्वासो लभ्यते, शुभभावना-

ऽनुष्ठानरूपजलान्नं प्राप्यते, भवपारकारक–चारित्र–नौः समधि–गम्यते, विवेकं विना सर्वं शून्यं ज्ञेयम्, तत एष विवेकः संसाराब्धौ द्वीपरूपः,

**शङ्का**=श्रुतमात्रं नियतत्वेन विवेकग्रहणं, ततः किं, अस्मादस्य विशेषेण पृथग् ज्ञापनम्?

**समाधानम्**=नैव, श्रुतं, कथञ्चित् पाठेऽपि,- यद्–यत्प्रकारविशिष्टार्थवत् यादृशार्थं, पुद्गलपरावर्त्ताधिकसंसारवान्–महामिथ्यादृष्टिः श्रुतबोधभावावरणरूपतद्भावाच्छादनाद्, अव- बुध्यते–जानीते.

तत्र दृष्टान्तः–यथा, अव्युत्पन्नः=अहृदयो जनः, शृङ्गारहास्यकरुणादि–रससूचकवचन- रहस्यरूपकाव्यभावं नाऽवबुध्यते. अतः कथं श्रुतमात्रनियतं विवेकग्रहणमिति.

**शङ्का**=इदं वस्तुतत्त्वं, कस्मादित्थं भवति?

**समाधानम्**=तत्प्रवृत्त्याद्येव ह्यत्र सल्लिङ्गं=यस्मात्कारणात्तत्राऽवबुद्धे श्रुतार्थे प्रवृत्ति–विघ्न- जयसिद्धि–विनियोग एव, न पुनः श्रुतार्थज्ञानमात्रं, अत्र–श्रुतावबोधे सद्–अव्यभिचारि– लिङ्गं–गमको हेतुः,

(१) **अधिकृतधर्मस्थाने**=(गुणस्थाने) निपुणताऽतिशयसहितेन, उपकारसंगतेन, सम्यग्ज्ञानपूर्वकेण, अप्रमत्तभावेन, चञ्चलतारहितेन, अत्यन्ताधिकृतयत्नेन, या क्रिया क्रियते सा **प्रवृत्तिः** कथ्यते,

(२) **विघ्नजयः**=विघ्नेषु जयः, अर्थाद् धर्मकार्ये यद् विघ्नव्रातं समागच्छेत्तस्य पुरुषार्थेन त्यागः कार्यः स विघ्नजयः, विघ्नजयस्त्रिधा, हीनमध्यमोत्कृष्ट–भेदात् (१) मोक्षमार्गे गन्तुकामस्य जनस्य कण्टकसमानः क्षुधातृषातापशीतादिरूपानेक परिषहा विघ्नभूता भवन्ति, ततोऽनिराबाधा प्रवृत्ति र्भवति, एष प्रथमः परिषहादिजयरूपो लघुविघ्नजयः (२) यथा रोगाऽऽक्रान्त इष्टस्थले न गन्तुं शक्नोति एष विघ्नजयः सुदर्शनचूर्णादि औषधैः–उपवा- सादिभिरुपायैः रोगान् दूरीकृत्य, इष्टस्थले गन्तुं शक्यते, तथा शारीरिक–क्षयादिरोगैः, अशक्तेन विशेषतो धर्मानुष्ठान–ध्यानादौ विघ्ना आयान्ति, तद्दूरीकरणाय पिंडनिर्युक्त्यादौ यथाकथितं 'हिताहारा मिताहाराः' आत्मधर्माराधने हितकरं–विघ्नाभावो भवेत्तथा प्रमाण– युक्ताहारं गृह्णीयात्, शरीरं स्वस्थं भवेत्, चारित्राराधना समीचीना भवेत्।

तथाऽप्रमत्तो भूत्वा, मनो दृढं कृत्वा, विहरेत्, किञ्च यथा बाह्यरोगाः शरीरं पीड- यन्ति, तथाऽभ्यन्तररोगा अनेकशो जन्म–मरणादिकं कारयन्ति, भयंकरदुःखानि ददति, भावरोगान् हन्तुं भाववैद्योक्तं योगामृतमेवोपयोग्येव, तद्योगानुष्ठानं कार्यं, एतादृशभावनया सम्यग्धर्म आराध्यः।

(२) तृतीयप्रकारको विघ्नजयः=कारणेन, उन्मार्गस्थितः मार्गभ्रष्टः दिग्भ्रमिमान्, कश्चित्पथिकोऽस्ति, तं पथिकं पथज्ञोऽन्यः, भ्रमं दूरं कृत्वेष्टस्थानेऽवश्यं नयति, तथा मोक्ष-मार्गपथिकः कश्चित्, कुगुरु–आदियोगतः सन्मार्गभ्रष्टः, उन्मार्गे चटितः भ्रान्तः, स सद्गुरु–निश्रया सम्यक्शास्त्रं विचार्य, विवेकपूर्वकं सत्यज्ञानं प्राप्य यथाप्रवृत्ति–आदिकरणानि कृत्वा, सम्यग्दर्शनं प्राप्नोति, मिथ्यात्वरूपदिग्भ्रमं निवारयति, एष द्वितीय उत्कृष्टो विघ्नजयः,

(३) **सिद्धिः**=यानि यानि चारित्रादि–धर्मस्थानानि प्राप्तुमिष्टानि, तानि तानि अतिचारशून्यानि, पालनीयानि, अस्मदधिक–गुणसम्पन्नाचार्यादिगुरूणां, तपस्विआदीनां विनय–वैयावृत्त्य–बहुमानानि कर्त्तव्यानि, अस्मदल्पगुणानां निर्गुणानां दुःखिजनानामुपरिष्टाद् दया कार्या, तेषां दुःखविनाशाय यथाशक्ति प्रयत्नः कार्यः, मध्यमगुणवतां जीवानां यथायोग्यं दानमानादिः सत्कारो विधातव्यः, किञ्चार्थिकापद्–विपद उद्धारः कार्यः, ईदृश उपकारः सद्यः फलदो भवति, ततोऽस्मादृशा निर्गुणजीवात्मानोऽहिंसा–सत्यादि–सम्यक्त्वादिगुणान् प्राप्नुवन्ति, सा सिद्धिः,

**विनियोगः**=येषां, अहिंसा–सत्य–ब्रह्मचर्य–त्यागादि–गुणप्राप्ति–सिद्धिरूपः शुभाशयः प्रकटितः तैस्तैः, अन्यजीवात्मनां पुरतः सम्यक्त्वाहिंसादिगुणतो जायमानफलप्रभावादिकं वर्ण-नीयं–ज्ञापनीयमुपदेष्टव्यं, तथा स्वसमाना गुणवन्तः कार्याः, तत्कर्तुं प्रयत्नः पूर्णः कार्यः, यतः सम्प्रतिमहाराजवदुत्तरोत्तर–जन्मान्तरेषु श्रेष्ठसम्पदन्ते मोक्ष–सुखप्राप्तिरपि भवेत्, अन्यत्र सर्वत्र जनगणे शुभगुणसंस्थापनमेष विनियोगः ।

( षो. ३०८–९–१०–११–१२ श्लोकभावः )

**शङ्का**=किं एतावता पर्याप्तमथवा किञ्चिदन्यत्कथनीयं स्यात्तद् दर्श्यताम् ?

**समाधानम्**=किञ्चान्यत् तद्भाववृद्धिश्च –श्रुतबोधभाववृद्धिश्च भवति यथा काव्यभावज्ञस्य काव्यभावरसवृद्धिर्भवति, तथाऽत्रैवं विज्ञेयम्,

अत एव यथावदनवबोधादेव, स्पष्टमेव पुद्गलपरावर्त्ताधिकलक्षणमहामिथ्यादृष्टेः प्राप्ति-रपि, अप्राप्तिः अध्ययनादिरूपस्य श्रुतस्याऽप्राप्तिः,

कथमिति चेत्कथ्यते, यथावदवबोधरूपफलाभावरूपतत्फलाभावो वर्त्तते । अभव्यचिन्ता-मणिप्राप्तावपि=दृष्टान्तः, यथा अत्यन्तनिर्भाग्यतयाऽयोग्यस्य चिन्तामणिप्राप्तावपि तद् ( साध-नादि–विधि ) ज्ञानत्वस्याभावात् न तत्फलं, तथा, अस्य श्रुतप्राप्तावपीति,

**शङ्का**=भवतु नामैव महामिथ्यादृष्टेः, मिथ्यादृष्टेस्तु का वार्ता ! को विषयः ?

**समाधानम्**=धर्मबीजाधानाद्यर्हरूप-मिथ्यादृष्टेस्तु भावश्रुतयोग्यद्रव्यश्रुतप्राप्तिरूपद्रव्य प्राप्तिर्भवेत् .

**प्रश्न**-कीदृक् स्यात्, द्रव्यश्रुतप्राप्तिः ?

**समाधानं**=आदरादिलिङ्गगम्या, सम्यक्श्रुतार्थोपयोगसहिता, अनाभोगवती, द्रव्यश्रुतप्राप्तिः,

**शङ्का**=मिथ्यादृष्टिमहामिथ्यादृष्ट्योः, अनाभोगादेरविशेषात् – विशेषाभावात् कः प्रतिविशेषः ?

**समाधानम्** =अस्य-मिथ्यादृष्टेः, मोक्षमार्गविरोधिभावरूपाऽस्थान एव अभिनिवेशः (ममतारूपाग्रहो न भवति) स्थानाऽभिनिवेशस्यापि तस्य भवति.

**शङ्का**=कथमिति चेत् ?

**समाधानम्**=उच्यते, भावश्रुतयोग्यत्वरूपभव्यत्वस्य योगात्=भावात्, अस्थानाऽभिनिवेश एवहि न, तथा च भावश्रुतयोग्यत्वाभावात् महामिथ्यादृष्टौ पूर्वकथितास्थानविषयकाऽभिनिवेशस्वभावरूपं भव्यत्वमस्ति, तदा मिथ्यादृष्टौ पूर्वकथितस्थानविषयकाऽभिनिवेशस्वभावरूपं भव्यत्वमस्तीति मिथ्यादृष्टि–महामिथ्यादृष्ट्यो विशेषो विज्ञेयः।

**शङ्का**=पूर्वकथितास्थानविषयकाऽभिनिवेशस्वभावभव्यत्वं वर्ततेऽतो महामिथ्यादृष्टौ द्रव्यश्रुतप्राप्तिरप्यसम्भविनी कुतस्तस्य फलचिन्ता ?

**समाधानम्** =' एतद् ' द्रव्यश्रुतम्, एकान्त ( सर्वथा ) महामिथ्यादृष्टिरूपैरभव्यै ( अभव्यत्वनामकानादिकालीनजातिविशिष्टैः ) रपि किं पुनरन्यमिथ्यादृष्टिभिरनेकशः, प्राप्तमस्ति,

**शङ्का**=कस्तत्र हेतु र्वा प्रामाण्यं किं वा ?

**समाधानम्**=सर्वजीवानामनन्तशो ग्रैवेयकोपपातप्रज्ञापना–प्रामाण्यरूपं वचनप्रामाण्यं वर्तते,

**शङ्का**=एवं तर्हि श्रुतप्राप्तिफलमपि, तेषु–अभव्येषु भविष्यत्येव ?

**समाधानम्**=श्रुतप्राप्तेः किञ्चित्फलं नैवाऽभव्येषु,

**शङ्का**=कथमिति चेत् ?

**समाधानम्** =प्रकृत–यथावत् (यथार्थ) बोधरूपफलांशरूप–प्रस्तुतफललेशस्याऽपि, आस्तां सर्वस्य 'असिद्धेः' अभव्येषु, अप्राप्तिश्रुपोऽसम्भवोऽस्ति. यदि प्रस्तुतफलांशफलसिद्धिर्भवेत्तदाऽल्पकालेनैव सर्वमुक्तिप्राप्ति–प्रसङ्गःस्यात्।

तथा चैतत्–पूर्वोक्तवस्तुजातं, आगमवेत्तृभिर्वचन=सर्वज्ञवचनानुसारेण परिभावनीयं–परितो विमर्शनीयम्।

एवमन्येषामपि सूत्राणामर्थो वेदितव्य इति, दिङ्मात्रप्रदर्शनमेतत्।

**—अथ शास्त्रकारः 'सुयस्स भगवओ करेमि काउसग्गं' इत्यादि सूत्रस्य व्याख्यां ससंगति—विवेचनं करोतीति—**

एवं प्रणिधानं कृत्वा, एतत्पूर्विका क्रिया फलायेति श्रुतस्यैव कायोत्सर्ग—संपादनार्थं पठति वा पठन्ति वा, 'सुयस्स भगवओ करेमि काउसग्गमित्यादि' यावद् वोसिरामि। व्याख्या पूर्ववत्, नवरं 'श्रुतस्य' इति—प्रवचनस्य, सामायिकादि चतुर्दशपूर्वपर्यन्तस्य, 'भगवतः' समग्रैश्वर्यादि—युक्तस्य। अर्थात् 'श्रुतधर्मो वर्धताम्, एवं श्रुतधर्मविषयकं प्रणिधानं—चित्तस्यैकाग्रतां कृत्वा (पूर्वं प्रणिधानं कृतं) प्रणिधानपूर्विका क्रिया फलजनिका भवति, केवला क्रिया न फलजनिका, केवलं प्रणिधानमपि न फलजनकं, प्रणिधानपूर्विका क्रियैव फलायेति,

अत्र क्रियारूपेणैव कायोत्सर्गं कर्तुं=श्रुतस्यैव कायोत्सर्ग—सम्पादनार्थं पठति पठन्ति वा 'सुयस्स भगवओ करेमि काउसग्ग' मित्यादि यावद् 'वोसिरामि'। व्याख्या पूर्ववत्। क्रिया, फलं ददात्यपि, प्रणिधानपूर्विका चेत्तदा फलं यच्छेत्, प्रणिधानं यदि न भवेत्तदा क्रियायां, एकाग्रतासहितोपयोगाभावेन कथं फलमुत्पद्येतेति, प्रणिधानपूर्विकैव क्रिया फलदा, प्रणिधानकृतं कृतमिति न्यायेन,

नवरं 'श्रुतस्य' इति प्रवचनस्य, सामायिकसूत्र—'करेमि भंते' रूपसूत्रत आरभ्य चतुर्दशपूर्व—पर्यन्तस्य,

'भगवतः' समग्रैश्वर्यादियुक्तस्य, शुद्धत्व—सिद्धत्वापेक्षया, समग्रैश्वर्यादियोगः। श्रुत—आगमेऽस्मिन्—समग्रैश्वर्यादि—योगस्तु श्रुतस्य, शुद्धत्व—सिद्धत्वकारणेनाऽस्ति, अर्थाद्, श्रुते फलाव्यभिचारत्वेन, प्रतिष्ठितत्वेन, त्रिकोटिपरिशुद्धत्वेन सिद्धत्वमस्ति, एतद्वस्तु, जैनेतर—शास्त्रान्तरेषु नास्ति, तत इतरशास्त्रेभ्यः श्रुतस्यैश्वर्यम्, ईश्वरत्वं, ईशितृत्वम्, प्रभुत्वमस्ति,

इदमेव—सिद्धत्वं 'न ह्यतो विधिप्रवृत्तः' इत्यादिना वाक्यत्रयेण यथाक्रमं—फलाव्यभिचारं—प्रतिष्ठितत्वं—त्रिकोटि—परिशुद्धिं भावयति—

सिद्धत्वरूपफलाऽव्यभिचारः=(१) श्रुतस्य भगवत्त्वेन—सिद्धत्वेन समग्रैश्वर्यादियुक्तत्वकारणेन, विधिपूर्वकः प्रवृत्तः=प्रवृत्ति—क्रियावान्, फलेन नहि वञ्च्यते—फलावञ्चको योगः—श्रुतयोगो भवति.

(२) सिद्धत्वरूपप्रतिष्ठितत्वं=एतेन—श्रुतेन सह सर्वे प्रवादाः—नयवादा (दर्शनानि) व्याप्ताः—व्यापकतावन्तः, यतः—श्रुतं सर्वनयान् मन्यते, इतरदर्शनं, एकैकं नयं गृह्णाति.

(३) सिद्धत्वरूप—त्रिकोटि परिशुद्धत्वम्=विधिप्रतिषेधानुष्ठानपदार्था—विरोधेन—चेति

कषरूपयो र्विधिप्रतिषेधयोः, छेदरूपस्यानुष्ठानस्य, तापविषयस्य पदार्थस्य, अविरोधेन पूर्वापराऽबाधया=एषु त्रिषु मिथः संघर्षो–विरोधो न, अर्थादनुष्ठानमाचारो विधिप्रतिषेधौ न बाधते, एवं पदार्थः–सिद्धान्तव्यवस्था, विधिप्रतिषेधौ–अनुष्ठानमाचारं च न बाधेते, एवं कषच्छेदतापनामिकायां परीक्षायां सर्वथोत्तीर्णं यद् भवति श्रुतं तत् सिद्धत्वमाप्नोतीति,

अमुमेव त्रिकोटीपरिशुद्धिरूपमविरोधं–संवादं, द्वाभ्यां वचनाभ्यां दर्शयति स्वर्गार्थिना तपोदेवतापूजनादि, केवलज्ञानार्थिना तु ध्यानाऽध्ययनादि कर्त्तव्यं, इति कषपरीक्षायां विधिवाक्यं।

'सर्वे जीवा न हन्तव्याः' इति प्रतिषेधवाक्यम्, छेदपरीक्षायां विधिप्रतिषेधावबाधमानमनुष्ठानं ज्ञेयं,

(१) 'समितिगुप्ति–शुद्धा क्रिया' इति–अनुष्ठानवाक्यम्।

(२) 'असपत्नो योगः' योगः–मोक्षसाधको व्यापार–मात्रः मिथो यथा बाधको न भवेत्तथा व्यापारा व्यापार्या इति–अनुष्ठानवाक्यम्, असपत्नः–परस्पराविरोधी स्वस्वकालानुष्ठानाद्योगः–स्वाध्यायादि–समाचारः, तापपरीक्षा–पदार्थवाक्यम् यथा

(१) 'उत्पादव्यय-ध्रौव्ययुक्तं सत्'

(२) 'एकं द्रव्यमनन्तपर्यायमर्थः'–द्रव्यत्वेनैकं सत् द्रव्यं–अनन्तपर्यायात्मकोऽर्थः–पदार्थ इति.

"कायोत्सर्ग–प्रपञ्चः प्राग्वत्, तथैव च स्तुतिः, यदि परं–श्रुतस्य, समानजातीयबृंहकत्वात्, अनुभवसिद्धमेतत्, तज्ज्ञानां, चलति समाधिरन्यथेति प्रकटं, ऐतिह्यं चेतदेवमतो न बाधनीयमिति, व्याख्यातं पुष्करवरद्वीपार्द्धेत्यादिसूत्रम्॥"

इदमैदंपर्यम्=पूर्वोक्त–श्रुतवाक्यानि ज्ञापयन्ति, यद्, जैनश्रुतं विधिप्रतिषेधौ, अनुष्ठानमाचारश्च, पदार्थ इति त्रिकोटिर्मिथो बाधकतारहितत्वेन वर्तते,

अथ श्रुतस्य वन्दनाद्यर्थं कायोत्सर्गः कार्यः, तत्पूर्वं जिनसर्वजिनानां वन्दनादि, कायोत्सर्गं कथनानुसारेण 'अन्नत्थ सूत्रं' कथयित्वा 'सागारं' कायोत्सर्गं पारयित्वा स्तुतिरपि पूर्वकथनानुसारेण, उच्चारणीया परंतु श्रुतस्य स्तुतिर्वाच्या, सा स्तुतिरेव, स्वसजातीय–श्रुतस्तव–समर्थिका भवेत्, इदं तज्ज्ञातॄणामनुभवसिद्धम्, 'पुक्खरवरदीवड्ढे' सूत्रतः श्रुतस्य स्तवं कृत्वा, श्रुतस्य वन्दनादिनिमित्ते कायोत्सर्गः कृतः, अथ स्तुतिः श्रुतस्य स्थाने, अन्यस्य कथिता स्यात्तदा प्रस्तुतं समर्थितं न स्यादर्थाच्चित्तस्य य एकः श्रुतगुणगानविषयकः शुभपरिणामप्रवाहः चलन्नामत आसीत् स हतो भवेदर्थाच्चित्त–समाधिर्गतो भवेद्।

किञ्च एषा 'तृतीया स्तुतिः श्रुतस्यैव' एवमैतिह्यं–सम्प्रदायः चैतदतो न बाधनीयमिति व्याख्यातं 'पुष्करवरद्वीपार्द्धे' इत्यादि सूत्रम्।

(श्रुतस्य गुणगानावसरे वहन्त्यां धारायां श्रुतस्यैव स्तुतिः कथनीया, अन्यथा समाधिभङ्गो भवेत् इत्यादि शास्त्रवचनानुसारेण सर्वत्र विवेकं कृत्वा समाधीरक्षणीयः)

–अथ शास्त्रकारः 'सिद्धाणं च वैयावच्चगराणं, अन्नत्थं कथयित्वा एक–नवकारस्य कायोत्सर्गं पारयित्वा शासनदेवदेवीनां स्मरण–संबंधिनी चतुर्थस्तुतिः कथनीयेति द्वादशोऽधिकारः, एवं, अष्टतो द्वादशपर्यन्तान् अधिकारान् दर्शयतः, तत् प्राग् 'सिद्धाणं बुद्धाणं सूत्रस्य व्याख्या–

**पुनरनुष्ठानपरम्पराफलभूतेभ्यस्तथाभावेन तत्क्रियाप्रयोजकेभ्यश्च सिद्धेभ्यो नमस्करणायेदं पठति पठन्ति वा, "सिद्धाणं बुद्धाणं, पारगयाणं परंपरगयाणं। लोयग्गमुवगयाणं, नमो सया सव्वसिद्धाणं ॥ १ ॥ अस्य व्याख्या—सितं ध्मातमेषामिति सिद्धाः निर्दग्धानेकभवकर्मेन्धना इत्यर्थः तेभ्यो नम इति योगः ते च सामान्यतः कर्मादिसिद्धा अपि भवन्ति, यथोक्तम्—"कम्मे सिप्पे म विज्जा य, मंते जोगे य आगमे। अत्थ जत्ता अभिप्पाए, तवे कम्मक्खए इय ॥ १ ॥" इत्यादि, अतः कर्मादिसिद्धव्यपोहायाह—"बुद्धेभ्यः" अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः, सर्वज्ञसर्वदर्शिस्वभावबोधरूपा इत्यर्थः, एतेभ्यः–एते च संसारनिर्वाणोभयपरित्यागेन स्थितवन्तः कैश्चिदिष्यन्ते "न संसारे न निर्वाणे, स्थितो भुवनभूतये। अचिन्त्यः सर्वलोकानां चिन्तारत्नाधिको महान् ॥१॥" इति वचनात्, एतन्निरासायाह—"पारगतेभ्यः" पारं–पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगताः, तथा भव्यत्वाक्षिप्तसकलप्रयोजनसमाप्त्या निरवशेषकर्त्तव्यशक्तिविप्रमुक्ता इति**

यदुक्तं भवति एतेभ्यः, एते च यदृच्छावादिभिः कैश्चिदक्रमसिद्धत्वेनापि गीयन्ते, यथोक्तम्–"नैकादिसङ्ख्याक्रमतो, वित्तप्राप्तिर्नियोगतः। दरिद्रराज्याप्तिसमा, तद्वन्मुक्तिः क्वचिन्न किम्? ॥१॥" इत्येतद्व्यपोहायाह–"परम्परगतेभ्यः" परम्परया–ज्ञानदर्शनचारित्ररूपया मिथ्यादृष्टिसास्वादनसम्यग्मिथ्यादृष्टिअविरतसम्यग्दृष्टिविरताविरतप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिबादर-सूक्ष्मोपशान्तक्षीणमोहसयोग्ययोगिगुणस्थानभेदभिन्नया गताः परम्परगता एतेभ्यः, एतेऽपि कैश्चिदनियतदेशा अभ्युपगम्यन्ते, "यत्र क्लेशक्षयस्तत्र, विज्ञानमवतिष्ठते। बाधा च सर्वथाऽस्येह, तदभावान्न जातुचित् ॥१॥" इति वचनाद्, एतन्निराचिकीर्षयाऽऽह–"लोकाग्रमुपगतेभ्यः" लोकाग्रम्–ईषत्प्राग्भाराख्यं तदुप–सामीप्येन निरवशेषकर्म्मविच्युत्या तदपराभिन्नप्रदेशतया गताः–उपगताः, उक्तञ्च—"जत्थ य एगो सिद्धो, तत्थ अणंता भवक्खयविमुक्का। अन्नोन्नमणाबाहं, चिट्ठंति सुही सुहं पत्ता ॥१॥" तेभ्यः, आह–कथं पुनरिह सकलकर्म्मविप्रमुक्तानां लोकान्तं यावद्गतिर्भवति, भावे वा सर्वदैव कस्मान्न भवतीति, अत्रोच्यते, पूर्वावेशवशाद्दण्डादिचक्रभ्रमणवत् समयमेवैकमविरुद्धेति न दोष एतेभ्यः, एवंभूतेभ्यः किमित्याह–"नमः सदा सर्वसिद्धेभ्यः" नम इति क्रियापदं, "सदा" सर्वकालं, प्रशस्तभावपूरणमेतदयथार्थमपि फलवच्चित्राभिग्रहभाववदित्याचार्याः,

पं... "चित्राभिग्रहभाववदिति" यथा हि ग्लानप्रतिजागरणादिविषयश्चित्रोऽभिग्रहभावो नित्यमसम्पद्यमानविषयोऽपि शुभभावापूरकस्तथा नमः सदा सर्वसिद्धेभ्य इत्येतत्प्रणिधानं,

– सिद्धाणं बुद्धाणं सूत्रं (सिद्धस्तवः) –

टी०...अथ (पुनः) क्रियानुष्ठानानां परंपरा=अपुनर्बन्धकावस्थात आरभ्यायोगिगुण

स्थानपर्यन्तानुष्ठानपरम्परायाः फलभूतेभ्यः ( अनुष्ठानानां परम्परयाऽन्तिमफलस्वरूपेभ्यः ) तथा-भावेन—सिद्धत्वफलपरिणामेन स्वकीयदृष्टान्त—द्वारा तत्तदनुष्ठानेषु, अन्येषां जीवानां प्रवृत्तौ प्रयोजकेभ्यः-प्रेरकेभ्यश्च, नमस्करणायेदं पठति पठन्ति वा 'सिद्धाणं बुद्धाणं' इत्यादि सूत्र,=तद्व्याख्या=सिद्ध—बुद्ध—पारगत—परम्परागत- लोकाग्रमुपगत—सर्वसिद्धेभ्यो नमः सदा,

**व्याख्या**=(१) (प्रथमं विशेषणं)=सिद्धेभ्यः=सितं—बद्धं कर्म ध्मातं—दग्धं एषामिति सिद्धाः—निर्दग्धानेकभवकर्मेन्धना इत्यर्थः, निर्दग्धानि भस्मीकृतानि—अनेकैर्भवै र्बद्धानि कर्माण्येवेन्धनानि येषां ते—निर्दग्धानेकभवकर्मेन्धनेभ्यः सिद्धेभ्यः, तेभ्यः सिद्धेभ्यो नमः इति योगः,

ते च सिद्धाः, सामान्यतः कर्मादिसिद्धा अपि भवन्ति तथापि कर्मक्षयसिद्धेभ्योऽत्र सिद्धेभ्यो नमः । यथोक्तं=

"कर्मणि शिल्पे च विद्यायां, मन्त्रे योगे चागमे ।
अर्थयात्राऽभिप्रायेषु, तपसि कर्मक्षये इति ।।" इत्यादि

(२) द्वितीयविशेषणम्—अतः कर्मादिसिद्धव्यपोहायाह 'बुद्धेभ्यः सिद्धेभ्यः अज्ञाननिद्राप्रसुप्ते=अतत्त्व—अज्ञानमेव निद्रा, तत्र—निद्रायां—स्वरूपचैतन्यभानाभावदशायां प्रसुप्ते—प्रकर्षेण निद्राधीने, जगति—संसारे, अपरोपदेशेन परकृतमुपदेशं विनैव—स्वभिन्नपरस्योपदेशापेक्षां विना, स्वयमेव जीवादिरूपं तत्त्वं (जीवादिनवादि—तत्त्वमात्रं) बुद्धवन्तो—ज्ञातवन्तो, बुद्धाः—सर्वज्ञसर्वदर्शिस्वभाव—बोधरूपाः—केवलज्ञानकेवलदर्शनस्वभावबोधमयाः (अत्र निश्चयतो ज्ञानज्ञानिनोरभेदापेक्षयाऽर्थो ज्ञेयः, अत्र यथाऽर्हन्तस्तथा तत्र सिद्धौ, सिद्धाः—स्वयंसम्बुद्धाः साधनाकालापेक्षाऽत्र सिद्धानां परोपदेश—जन्यबोधसिद्धिरपीति ज्ञेया.)

(३) तृतीयविशेषणम्=सिद्धेभ्यः पारगतेभ्यैः इति विशेषणं, एते च संसारनिर्वाणोभयपरित्यागेन स्थितवन्तः कैश्चिदिष्यन्ते,

एते—सिद्धबुद्धाः सिद्धाश्च संसाररूपं स्थानं परित्यज्य, निर्वाणरूपं स्थानं परित्यज्य, तटस्था—मध्यस्थाः कैश्चिद्वादिभिरिष्यन्ते ।

**तत्र वचनप्रमाणं दीयते—**

"न संसारे, न निर्वाणे, स्थितो भुवनभूतये ।
अचिन्त्यः सर्वलोकानां, चिन्तारत्नाधिको महान् ।।" इति वचनात् एतन्निरासायाह 'पारगतेभ्यः' अर्थात्, न संसारे स्थितः, न निर्वाणे—मोक्षे स्थितः परन्तु भुवनस्य—जगतो,

भूतये–समुन्नतये मध्यस्थतया स्थितः सर्वलोकानामचिन्त्यः–अकल्प्योऽपि चिन्तामणितः फलाऽपेक्षयाऽधिकः–परमः, महान्–महापुरुषो मन्यते ।

अर्थात्–(१) संसारस्य भवभ्रमणस्य पारं–अन्तं, गताः–पारंगताः (२) प्रयोजनव्रातस्य वा=अनाद्यनन्तकालतोऽस्मिन् भवचक्रे भ्राम्यतो भव्यजीवस्य तथाभव्यत्वं यथा यथा परिपक्वं भवत् तथा तथा, आगतानि कार्याणि पूर्णीकृत्य सिध्यन्ति, तथाभव्यत्वं परिपच्यमानं पूर्णपक्वतायाः शिखरे गम्यमानं, अन्तिमप्रयोजनमुक्तिरपि सिध्यति, एवं प्रयोजनानि सर्वाणि समाप्तानि भवन्त्यतः, मुक्तौ सिद्धत्वाऽनन्तरं न किमपि कार्यं नावशिष्टं भवति, अर्थात् समस्त–निरवशेष कर्म–शक्ति–विमुक्ताः, पारगताः कथ्यन्ते, सकलकर्मक्षयानन्तरं, अव्यवहितत्वेन–निसर्गत एकसमयेन सिद्धौ गत्वा तिष्ठन्ति, तत्र स्वतः सहजतो ज्ञानादि–पर्यायश्चलति, कर्मशक्तिस्तत्र सर्वथा नश्यति, किमपि कर्त्तव्यं नास्ति, कर्मतत्कारणादीनां सर्वथाऽभावस्तत्रैव. कारणाभावात् कार्याऽभाव एव । एतेभ्यः सिद्धेभ्यो बुद्धेभ्यः पार–गतेभ्यो नमः ।

परम्परगतेभ्यो नमः–एते च–सिद्धा बुद्धाः पारगताः, कैश्चिद् यदृच्छावादिभिः, अक्रमसिद्धत्वेनाऽपि गीयन्ते, यथोक्तं–

"नैकादिसङ्ख्याक्रमतो वित्तप्राप्ति र्नियोगतः ।
दरिद्रराज्याप्तिसमा, तद्वन्मुक्तिः, क्वचिन्न किम् ? ॥ १ ॥"

नियमतो–एको द्वौ इत्यादि–संख्यायाः क्रमेण धनप्राप्ति र्भवेदित्येवं नास्ति यथा दरिद्रस्य राज्याप्तिः, तथाऽक्रमेण क्वचिज्जीवस्थाने मुक्तिः कथं न भवेदिति.

इत्येतत् सिद्धान्तखण्डनायाह=परम्परगतेभ्यः, परम्परया (क्रमेण) ज्ञान–दर्शन–चारित्ररूपया, मिथ्यादृष्टि–सास्वादन–सम्यग्मिथ्यादृष्टि–अविरतसम्यग्दृष्टि–विरताविरत–प्रमत्ताप्रमत्त–निवृत्त्यनिवृत्ति–बादर–सूक्ष्मोपशान्त-क्षीणमोह-सयोग्ययोगिगुणस्थानभेदभिन्नया ( मुक्ति ) गताः परम्परगता एतेभ्यः, ( क्रमेण चतुर्दशगुणस्थानविकास ( अध्यात्मविकास ) रूपसोपानपङ्क्ति–समारूढाः सन्तः सिद्धिं गताः स्थिताः सिद्धाः )

एतेऽपि कैश्चिदनियतदेशा अभ्युपगम्यन्ते,

"यत्र क्लेशक्षयस्तत्र, विज्ञानमवतिष्ठते ।
बाधा च सर्वथाऽस्येह, तदभावान्न जातुचित्" ॥१॥ इति वचनाद्,

एतन्निराचिकीर्षयाह–" लोकाग्रमुपगतेभ्यः "

अर्थात्=सिद्ध-बुद्ध-पारंगत–परंपरगता अप्येते, सिद्धाः कैश्चित्–नियतदेशरहिता

अभ्युपगम्यन्ते, तत्र तदागमप्रामाण्यम्, यत्र–यद्देशावच्छेदेन क्लेश ( कर्म ) क्षयस्तत्र–तद्देशावच्छेदेन विज्ञानं ( विज्ञानरूपात्मा ) अवतिष्ठते–तिष्ठति–स्थानं कुर्वन्नास्ते, अत्र–एतद्देशावच्छेदेन क्लेशस्याभावात्, सर्वथा क्लेशाभाववतो बाधा न जातुचित्–अत्रास्य क्लेशः आशयः संस्कारो नास्त्यतः सर्वथा बाधा–प्रतिबन्धकत्वं नास्त्येव.

एतद्बौद्धमतमस्ति यत्, क्लेशविशिष्टक्षणिकविज्ञानधारैषा, संसारः कथ्यते, निरुपप्लवचित्सन्ततिः मोक्षः कथ्यते, समस्तरागद्वेषादिक्लेशानां तथा तद्वासनासंस्काराणां विनाशाऽनन्तरं मुक्ते मृते सति विज्ञानस्य गमनागमनाभावो वर्त्तते यत्र तस्य कारणाभावः कारणम्। एतद् बौद्धमतस्य खण्डनायाह

'लोकाग्रमुपगतेभ्यः' लोकाग्रम् ईषत्प्राग्भाराख्यं ( सिद्धशिलाख्यं ) तदुप–सामीप्येन निरवशेषकर्मविच्युत्या 'तदपराभिन्नप्रदेशतया गताः, उपगताः। अर्थाद्, नवीनमुक्ताऽऽत्मा, सिद्धशिलाया उपरि, आकाशप्रदेशभागे पूर्वसिद्धात्मनाऽऽवगाढाऽऽकाशप्रदेशेषु, ज्योतिषिज्योतिर्लगति, तथा एक–दीपकज्योतिषा सहान्यज्योति मिलति तत्र द्वयोरस्तित्वं स्वतन्त्रं, मात्रं समानतयैक महाज्योति र्दृश्यते, एतावदेव, एवं एकसिद्धात्मनः प्रदेशैः सहान्यसिद्धात्मनः प्रदेशा मिलिताः सन्तः, द्वयोः स्वतंत्रताऽस्तित्वमस्ति, शुद्धात्मनोऽरूपित्वेन मिथः=एकोऽन्यं न बाधते, अत एतस्मिन्नेवाकाशभागेऽनन्ताः सिद्धात्मानः समाविष्टा भवन्ति, दीपज्योतिस्तु मूर्तैव तथापि यद्येकापवरके लक्षदीपानामपि ज्योतिः परस्परम् मिलित्वा समाविशति, तर्हि, अरूपिणां समावेशने कुतो बाधा? कुतः प्रश्नः? उक्तं च—

"जत्थ य एगो सिद्धो, तत्थ अणंता भवक्खय–विमुक्का।
अन्नोन्नमणाबाहं, चिट्ठंति सुही सुहं पत्ता ॥१॥"

**अर्थः**=यत्र यदाकाशभागावच्छेदेन लोकाग्रप्रदेशावच्छेदेनैकः सिद्धः, तत्र तत्राकाशप्रदेशावच्छेदेन भवक्षयेण विमुक्ता सिद्धाः पूर्णसुखं प्राप्ता अनन्ता अन्योऽन्यमव्याबाधं सुखिनः, तिष्ठन्ति,

**प्रश्नः** तेभ्यः, आह–कथं पुनरिह सकलकर्म्मविप्रमुक्तानां लोकान्तं यावद् गति र्भवति, भावे वा सर्वदैव कस्मान्न भवतीति? अर्थादत्र सकलकर्मक्षयेण सर्वथा कर्मविमुक्तात्मनां कस्यचिद् गतिप्रेरककर्मादिकारणस्वाभावेन, अस्मात्स्थानादुपरि लोकान्तपर्यन्तगामिनी गतिः कथं? यदि भवति तदा सर्वदैव गतिः कथं न?

प्रत्युत्तरम्=सकलकर्मक्षयानन्तरं गतिकारणं जीवस्थपूर्वकर्मप्रेरितगतेरावेगः ( आवेशः ) तत्रोदाहरणं, यथा दण्डादिचक्रभ्रमणं, तथाहि कुम्भकारस्य दण्डेन चक्रे भ्रमणं भवति, तत्प-

श्चात्, अस्यावेगेन दण्डोत्थानानन्तरमपि, अल्पसमयं भ्रमणं चलति, तिष्ठति, एवं रिक्त–तुम्बं जलस्याऽधस्तान्नीत्वा त्यागानन्तरं, अस्मिन् पूर्वाधोगतिप्रयोगस्यावेगेन पश्चादुपरि, आगच्छति, एवं पूर्वकर्मण आवेगेन (शेन) मुक्तजीवोपरिगतिः सहजैव, एवमपि–एषा, एकसमयं यावत्, अन्यसमये, आवेगाभावेन स्थिरताऽऽगच्छति, अर्थात् सदागतिविषयकप्रश्नोऽपि गच्छति निष्फलतां, यथा चक्रेऽपि सदा भ्रमणं न भवति, सिद्धबुद्धपारगतपरम्परगतलोकाग्रमुपगतेभ्यो नमः 'एवंभूतेभ्यः' किम्? इत्याह 'नमः सदा सर्वसिद्धेभ्यः'। 'नमः' इति क्रियापदं, 'सदा' सर्वकालं, प्रशस्तभावपूरणमेतदयथार्थमपि फलवच्चित्राभिग्रहभाववदित्याचार्याः 'नमः' इत्यत्राव्ययपदमपि 'नमामि' क्रियापदसूचकम् 'चित्राभिग्रहभाववदि' ति यथाहि ग्लानप्रतिजागरणादि (वैयावृत्यादि) विषयश्चित्रोऽभिग्रहभावो नित्यमसम्पद्यमानविषयोऽपि शुभभावापूरकस्तथा 'नमः सदा' सर्वसिद्धेभ्य इत्येतत् प्रणिधानं.

यथा केनचित्प्रतिज्ञातं यद् ग्लानस्य–व्याधितस्य मुनेः सदा वैयावृत्त्यं कार्यमिति. एष (वि) चित्राभिग्रहभावःकथ्यते, कथमिति चेदुच्यते, सदा–नित्यं वैयावृत्यविषयः कश्चिन्मुनि र्न सम्पद्यते, कदाचित् सम्पद्यतेऽपि. नित्यं न सम्पद्यते तथाऽपि सर्वकालं मुनिं प्रति प्रशस्तभावः–पूज्यतमभावः पूर्यते, बहुमानभावो वर्धमानो भवति. शुभभावो मनसि, नित्यमुत्थापितो भवति. –अथ सिद्धानां पंचदश भेदाः कथ्यन्ते–

**"सर्वसिद्धेभ्यः" तीर्थसिद्धादिभेदभिन्नेभ्यः, यथोक्तम्– "तित्थसिद्धा १ अतित्थसिद्धा २ तित्थगरसिद्धा ३ अतित्थगरसिद्धा ४ सयंबुद्धसिद्धा ५ पत्तेयबुद्धसिद्धा ६ बुद्धबोहियसिद्धा ७ थीलिंगसिद्धा ८ पुरिसलिंगसिद्धा ९ नपुंसकलिंगसिद्धा १० सलिंगसिद्धा ११ अण्णलिंगसिद्धा १२ गिहिलिंगसिद्धा १३ एगसिद्धा १४ अणेगसिद्धा १५" इति, तत्र तीर्थं–प्राग्व्यावर्णितस्वरूपं तच्चतुर्विधः श्रमणसङ्घः तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः, अतीर्थे सिद्धा अतीर्थसिद्धाः तीर्थान्तरसिद्धा इत्यर्थः, श्रूयते च "जिणंतरे साहुवोच्छेओ" त्ति तत्रापि जातिस्मरणादिनाऽवाप्तापवर्गमार्गाः सिध्यन्त्येव, मरुदेवीप्रभृतयो वा**

अतीर्थसिद्धाः, तदा तीर्थस्यानुत्पन्नत्वात्, तीर्थकरसिद्धाः तीर्थकरा एव, अतीर्थकरसिद्धा अन्ये सामान्यकेवलिनः, स्वयंबुद्धसिद्धाः स्वयंबुद्धाः सन्तो ये सिद्धाः, प्रत्येकबुद्धसिद्धाः प्रत्येकबुद्धाः सन्तो ये सिद्धाः, अथ स्वयंबुद्धप्रत्येकबुद्धसिद्धयोः कः प्रतिविशेष इति, उच्यते, बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथाहि --स्वयंबुद्धा बाह्यप्रत्ययमन्तरेण बुध्यन्ते, प्रत्येकबुद्धास्तु न तद्विरहेण, श्रूयते च बाह्यवृषभादिप्रत्ययसापेक्षा करकण्ड्वादीनां प्रत्येकबुद्धानां बोधिः, नैवं स्वयंबुद्धानां जातिस्मरणादीनामिति, उपधिस्तु स्वयंबुद्धानां द्वादशविधः पात्रादिः, प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्जः, स्वयंबुद्धानां पूर्वाधीतश्रुतेऽनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव, लिङ्गप्रतिपत्तिः स्वयंबुद्धानामाचार्यसन्निधावपि भवति, प्रत्येकबुद्धानां तु देवता प्रयच्छतीत्यलं विस्तरेण, बुद्धबोधितसिद्धा बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते इह गृह्यन्ते, एते च सर्वेऽपि स्त्रीलिङ्गसिद्धाः केचित् केचित्पुँल्लिङ्गसिद्धाः केचिन्नपुंसकलिङ्गसिद्धा इति। आह– तीर्थकरा अपि स्त्रीलिङ्गसिद्धा भवन्ति? भवन्तीत्याह, यत उक्तं सिद्धप्राभृते–" सव्वत्थोवा तित्थयरिसिद्धा, तित्थगरितित्थे णोतित्थगरसिद्धा असंखेज्जगुणाओ तित्थगरितित्थे णोतित्थगरसिद्धा संखेज्जगुणा" इति न नपुंसकलिङ्गसिद्धाः, प्रत्येकबुद्धास्तु पुँल्लिङ्गा एव, स्वलिङ्गसिद्धा द्रव्यलिङ्गं प्रति रजोहरणगोच्छधारिणः, अन्यलिङ्गसिद्धाः परिव्राजकादिलिङ्गसिद्धाः, गृहिलिङ्गसिद्धा मेरुदेवी प्रभृतयः, "एगसिद्धा" इति एकस्मिन् समये एक एव सिद्धः, "अणेगसिद्धा" इति एकस्मिन् समये यावदष्टोत्तरशतं सिद्ध, यत उक्तम्–

"बत्तीसा अडयाला सट्ठी बावत्तरो य बोद्धव्वा ।
चुलसीई छण्णउई दुरहिय अट्ठुत्तरसयं च ॥ १ ॥"

अत्राह चोदकः–ननु सर्व एवैते भेदास्तीर्थसिद्धअतीर्थसिद्धभेदद्वयान्तर्भाविनः, तथाहि–तीर्थसिद्धा एव तीर्थकरसिद्धाः, अतीर्थकरसिद्धा अपि तीर्थसिद्धा वा स्युरतीर्थसिद्धा वा, इत्येवं शेषेष्वपि भावनीयमित्यतः किमेभिरिति, अत्रोच्यते, अन्तर्भावे सत्यपि पूर्वभेदद्वयादेवोत्तरोत्तरभेदाप्रतिपत्तेरज्ञातज्ञापनार्थं भेदाभिधानमित्यदोषः ॥

पं०...'न नपुंसकलिङ्ग' इति नपुंसकलिङ्गे तीर्थकरसिद्धा न भवन्तीति योज्यम्

टी०....'सर्वसिद्धेभ्यः' तीर्थसिद्धादिभेदभिन्नेभ्यः, यथोक्तम् ॥

(१) 'तीर्थसिद्धाः'=तत्र तीर्थं प्राग्व्यावर्णितस्वरूपं, तच्चतुर्विधः श्रमणप्रधानसङ्घः, तस्मिन्–तीर्थे, उत्पन्ने सति ये सिद्धाः–तीर्थास्तित्वे यावत् सिद्धाः.

(२) 'अतीर्थसिद्धाः'=अतीर्थे सिद्धाः, अतीर्थसिद्धाः–तीर्थान्तरसिद्धा इत्यर्थः । श्रूयते च "जिणंतरे साहुवोच्छेओ" त्ति तत्रापि जातिस्मरणादिनाऽवाप्तापवर्गमार्गाः सिद्ध्यन्त्येव, मरुदेवी–प्रभृतयो वाऽतीर्थसिद्धाः, तदातीर्थस्याऽनुत्पन्नत्वात्, अर्थात्, तीर्थे विच्छिन्ने वा तीर्थेऽनुत्पन्ने, अतीर्थे=नवमसुविधिनाथदशमशीतलनाथ—भगवतोरन्तरे–मध्ये–व्यवधानकाले तीर्थ (साधु)विच्छेदोऽभूत्, तथाऽपि जातिस्मरणादिद्वारा प्राप्तमोक्षमार्गाः (सम्यग्दर्शनज्ञानचारित्ररूपमोक्षमार्गाः) सिद्ध्यन्त्येव.

(३) तीर्थकरसिद्धाः=तीर्थकरा एव तीर्थकर–सिद्धाः.

(४) अतीर्थकर–सिद्धाः=तीर्थकरेभ्योऽन्ये सामान्य–केवलिनः.

(५) स्वयंबुद्धसिद्धाः=स्वयंबुद्धाः सन्तो ये सिद्धाः, अर्थात् गुरोरुपदेशं विना तथा किञ्चिद्बाह्यनिमित्तं विना, कर्मणां कृशत्वेन, संसारासारताया ज्ञाने एतद्भावनाया उत्कटत्वेन केवलज्ञानं प्राप्य सिद्धाः–स्वयंबुद्धसिद्धाः.

(६) प्रत्येकबुद्धसिद्धाः=ऐन्द्रचापवत् सन्ध्यासत्कवार्दलरूपाणि परिवर्त्तन्ते तथा संसारे भौतिकं वस्तु क्षणिकमिति समीक्ष्यार्थात् किञ्चिदपि किंविधमपि वैराग्यजनकं निमित्तं सम्प्राप्य केवलज्ञानमधिगम्य सिद्धाः प्रत्येकबुद्धसिद्धाः,

शङ्का=स्वयंबुद्धसिद्धप्रत्येक–बुद्धसिद्धयोः कः प्रतिविशेषः ?

**समाधानम्**=प्रत्येकबुद्धस्वयंबुद्धसिद्धयोर्मध्ये भेदमहत्त्वापेक्षया, बोध्युपधिश्रुतलिङ्ग (वेष) भेदास्तु भेदः–विशेषः,

(१) बोधिभेदः=स्वयंबुद्धा बाह्यनिमित्तं विहाय जातिस्मरणादिना बुद्धयन्ते, प्रत्येकबुद्धास्तु बाह्यनिमित्तेनैव बुद्धयन्ते श्रूयते च बाह्यवृषभादि–प्रत्यय (निमित्त) सापेक्षःकरकण्डवादीनां प्रत्येकबुद्धानां बोधिः, एवं जातिस्मरणादीनां स्वयंबुद्धानां बाह्यप्रत्ययसापेक्षो बोधि नं भवति.

(२) उपधिभेदः=उपधिस्तु स्वयंबुद्धानां द्वादशविधः पात्रादिः, प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्ज्जः,

(यः सर्वदा धार्यते स औधिक उपधिः, स चतुर्दशविधः, तद् यथा १–पात्रकं २–पात्रबन्धनं (झोलिका) ३–पात्रकेशरिका (लध्वीपूंजणी) ४–गुच्छकं (गुच्छा) ५–पात्रस्थापना ६–पटलकं (पडला) ७–रजस्त्राणं ८ कल्पप्रावरणं (चादर–कपडो–कामली) ९–रजोहरणं (धर्मध्वज–ओघो) १०–मुखवस्त्रिका ११–मात्रकं १२–चोलपट्टकं १३–संस्तारकं (संथारो) १४–उत्तरपट्टकं (उत्तरपट्टो) तेभ्य चोलपट्टकं च मात्रकं वर्जयित्वा द्वादशविध उपधिः स्वयंबुद्धानां भवति. प्रावरणं–कल्पः=सार्धं त्रयहस्तायामः सार्धहस्तद्वय–विस्तार एष कल्पो भवति. सर्वं संभूय सौत्रिकद्वयं एकमौर्णिकमेवं त्रयं भवति.)

(३) श्रुतभेदः=स्वयंबुद्धानां पूर्वाऽधीतश्रुतेऽनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव, लिङ्गप्रतिपत्तिः, स्वयंबुद्धानामाचार्यसन्निधावपि भवति, प्रत्येकबुद्धानां तु देवता प्रयच्छतीत्यलं विस्तरेण,

अर्थात्, स्वयंबुद्धानां पूर्वं अधीतश्रुतविषये नियमो नास्त्येव, पूर्वाऽधीत श्रुतज्ञाने सत्येव, देवः साधुवेषमर्पयति, अथवा गुरुपार्श्वे गत्वैव साधुवेषं गृह्णाति,

अर्थात्–पूर्वाऽधीतश्रुतविषये नियमो नास्ति,

प्रत्येकबुद्धानां तु पूर्वाऽधीतश्रुतं नियमाद् भवत्येव.

तत्रापि जघन्यत एकादशाऽङ्गानि, उत्कर्षतश्च दशपूर्वेभ्यश्च किञ्चिन्न्यूनं ज्ञेयम्,

(७) बुद्धबोधितसिद्धाः=बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते इह गृह्यन्ते, एते च सर्वेऽपि, स्त्रीलिङ्गसिद्धाः केचित्, केचित्पुंलिङ्ग–सिद्धाः, केचिन्नपुंसकलिङ्गसिद्धा इति।

अर्थात्–पूर्वोक्तसप्तविधाः, तीर्थातीर्थ–तीर्थकरा–तीर्थकरसिद्ध–स्वयंबुद्ध–प्रत्येकबुद्ध–बुद्धबोधितसिद्धा अपि त्रिभेदाः स्युः,

(८) स्त्रीलिङ्गसिद्धाः=स्त्रीत्वसूचकचिह्नविशिष्टदेहे ये केचित् सिद्धाः स्त्रीलिङ्गसिद्धाः कथ्यन्ते

केचित् प्रत्येकबुद्धं विना, स्त्रीलिङ्गसिद्धत्वेन, तीर्थातीर्थ–तीर्थकरा–तीर्थकर–स्वयंबुद्ध–बुद्धबोधितसिद्धत्वेन षोढा सिद्धा भवन्ति.

(९) पुरुषत्वसूचक–चिह्नित–देहे ये सिद्धास्ते पुंलिंगसिद्धाः.

(१०) कृत्रिमनपुंसकत्व–सूचकदेहे सिद्धाः नपुंसकलिंगसिद्धाः.

शङ्का=तीर्थकरा अपि स्त्रीलिङ्गसिद्धा भवन्ति ? भवन्तीत्याह, यत उक्तं सिद्धप्राभृते= "सव्वत्थोवा तित्थयरि सिद्धा, तित्थगरितित्थे णो तित्थगरसिद्धा असंखेज्जगुणाओ तित्थयरि तित्थे णो तित्थगरसिद्धा संखेज्जगुणा"

सर्वस्तोकाः तीर्थकरीसिद्धाः, तीर्थकरी–तीर्थे नोतीर्थकरसिद्धाः (तेभ्यः) संख्यातगुणाः, तीर्थकरी तीर्थे नोतीर्थकरीसिद्धाः संख्यातगुणाः, तीर्थकरी–तीर्थे नोतीर्थकरसिद्धाः संख्यातगुणा इति (नोतीर्थसिद्धाः प्रत्येकबुद्धसिद्धाः कथ्यन्ते, अत्र तीर्थमर्थात् रजोहरण–मुखवस्त्रिका, कदाचिद् कस्यचित्प्रत्येक बुद्धस्य न भवति) नो तीर्थकरी सिद्धाः=तीर्थकरं विना स्त्रीलिङ्ग-सिद्धाः नोस्त्रीतीर्थकरसिद्धा उच्यन्ते,

न नपुंसकलिङ्ग–सिद्धाः=नपुंसकलिङ्गे तीर्थकर–सिद्धा न भवन्ति,

प्रत्येकबुद्धास्तु पुंलिङ्गा एव=प्रत्येकबुद्धास्तु पुंलिङ्ग एव सिद्धा भवन्ति स्त्रीनपुंसक-लिङ्गयो र्न सिद्धा भवन्ति.

(११) स्वलिङ्गसिद्धाः=द्रव्यलिङ्गं प्रति रजोहरणगोच्छधारिणः, जैनसाधुवेषेण सिद्धाः–द्रव्यलिङ्ग–बाह्यवेषापेक्षया, अत्र रजोहरण–गोच्छकादि–पात्र–निर्योग–धारणेन सिद्धाःस्युः.

(१२) अन्यलिङ्गसिद्धाः=परिव्राजकादिलिङ्गसिद्धाः, अर्थात् ये जैनेतरवेषे परिव्राजक-सन्न्यासिप्रभृतिरूपा भूत्वा सिद्धा भवेयुः, यद्यपि एतेषां जातिस्मरणादिना केवलज्ञानस्य प्रादुर्भावाऽनन्तरं, आयुरवशिष्टं भवेत्तदा देवः जैनमुनिवेषं समर्पयति, ततो मुनिवेषे सिद्धा भवन्ति.

(१३) गृहिलिङ्गसिद्धाः=गृहिलिङ्गसिद्धा मरुदेवी–प्रभृतयः । गृहस्थवेषे सिद्धा, यथा मरुदेव्यादयः.

(१४) एकसिद्धाः=एकस्मिन् समये एक एव सिद्धः इति.

(१५) अनेकसिद्धाः=एकस्मिन् समये यावदष्टोत्तरशतं सिद्धाः, यत उक्तम्–

"बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा ।
चुलसीई छण्णउई दुरहिय अट्ठुत्तरशतं ॥"

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| सिद्धसततसमय= | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | यावद् भवति तदा |
| प्रत्येकसमये, अधिकाधिक= | १०८ | १०२ | ९६ | ८४ | ७२ | ६० | ४८ | ३२ | यावत् सिद्धा भवेयुः |

**शङ्का**=ननु सर्व एवैते भेदास्तीर्थसिद्धाऽतीर्थसिद्धभेदद्वयान्तर्भाविनः, तथाहि तीर्थसिद्धा एव तीर्थंकरसिद्धाः । अतीर्थंकर-सिद्धा अपि तीर्थसिद्धा वा स्युरतीर्थसिद्धा वा इति एवं शेषेष्वपि भावनीयमित्यतः किमेभिरिति ?

**समाधानम्**=अत्रोच्यते, अन्तर्भावे सत्यपि पूर्वभेदद्वयादेवोत्तरोत्तरभेदाऽप्रतिपत्तेर ज्ञात ज्ञापनार्थं भेदाभिधानमित्यदोषः । अर्थाद्, अन्तर्भावे सत्यपि द्वितीयतीर्थंकरसिद्धादीनां तीर्थंकर-सिद्धत्वादिरूपेण-तत्तद्रूपेण सिद्धीभवनस्य बोधो न भवेद्, यथैष तीर्थंकरसिद्धः कथ्यते, एष गृहिलिङ्गसिद्धः, एष एकसिद्धः कथ्यते, एवं शृङ्गग्राहिकया सर्वभेदप्रतिपत्तेरभावेनाज्ञातस्य ज्ञापनार्थं ।

**—अथ सिद्धस्तवसूत्रस्य, द्वितीय—तृतीय गाथायां व्याख्यां अवतरणिका—सहितां करोति—**

**इत्थं सामान्येन सर्व्वसिद्धनमस्कारं कृत्वा पुनरासन्नोपकारित्वाद्वर्त्तमानतीर्थाधिपतेः श्रीमन्महावीरवर्द्धमानस्वामिनः स्तुतिं (करोति) कुर्व्वन्ति (वा,) "जो देवाणवि देवो, जं देवा पंजली नमंसंति। तं देवदेवमहिअं, सिरसा वंदे महावीरं ॥२॥" अस्य व्याख्या-'यो' भगवान्वर्द्धमानः 'देवानामपि' भवनवास्यादीनां 'देवः' पूज्यत्वात्, तथाचाह-'यं देवाः प्राञ्जलयो नमस्यन्ति' विनयरचितकरपुटाः सन्तः प्रणमन्ति 'तं' 'देवदेवमहितं' देवदेवाः-शक्रादयः तैर्महितः-पूजितः 'शिरसा' उत्तमाङ्गेनेत्यादरप्रदर्शनार्थमाह, वंदे, कं? 'महावीरम्' ईर गतिप्रेरणयोरित्यस्य विपूर्वस्य विशेषेण ईरयति कर्म्म गमयति याति चेह शिवमिति वीरः, महांश्चासौ वीरश्च महावीरः,**

**उक्तश्च-"विदारयति यत्कर्म्म, तपसा च विराजते ।**
**तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥ १ ॥"**

तं, इत्थं स्तुतिं कृत्वा पुनः परोपकारायाऽऽत्मभाववृद्ध्यै, फलप्रदर्शनपरमिदं पठति पठन्ति वा ॥

"इक्कोऽवि णमोक्कारो, जिणवरवसहस्स वद्धमाणस्स।
संसारसागराओ, तारेइ नरं व नारिं वा ॥ ३ ॥

अस्य व्याख्या–'एकोऽपि' नमस्कारः, तिष्ठन्तु बहवः 'जिनवरवृषभाय' वर्द्धमानाय यत्नात् क्रियमाणः सन् किम्?– संसरणं संसारः–तिर्यग्नरनारकामरभवानुभवलक्षणः, स एव भव-स्थितिकायस्थितिभ्यामनेकधाऽवस्थानेनालब्धपारत्वात्सागर इव संसारसागरः, तस्मात् तारयति–अपनयतीत्यर्थः, 'नरं व नारिं वा' पुरुषं वा स्त्रियं वा, पुरुषग्रहणं पुरुषोत्तमधर्म्मप्रतिपादनार्थं, स्त्रीग्रहणं तासामपि तद्भव एव संसारक्षयो भवतीति ज्ञापनार्थं,

टी०...(बाल्ये जयेच्छु–लघुयानपलायमानः, क्रीडन् सुरैर्युतिसमेत इति स्तुतो यः। देव! त्वमेव भगवन्नसि देवदेवो, देवाधिदेवमुदुशंति भवन्तमेव।)

श्रुतजिनावधिजिनादिजिनानां–सामान्यकेवलिषु, तीर्थंकरनामकर्मणः–उदयेन, उत्तमवृषभतुल्याः,

अयमत्रभावः–सति सम्यग्दर्शने परया भावनया क्रियमाण एकोऽपि नमस्कारः, तथा भूतस्य भावचरणरूपशुभाध्यवासयस्य हेतुर्भवति. यस्माद्, श्रेणिमवाप्य निस्तरति भवोदधिं, अतः कार्ये कारणोपचाराद्, एवमुच्यते।

'भवस्थितिस्तद्भवायुः' 'कायस्थितिस्तु पृथिवीकायिकादिशरीरिणाम्।
तत्रैवो कायेऽवस्थानं विपद्योत्पद्य चासकृत्' ॥

–अथ शास्त्रकारः यापनीयतन्त्रस्य पाठंदत्त्वा स्त्रीमुक्तिविषयकं विषयं, अत्यन्तंविशिष्टं निरूपयति–

वचः यथोक्तं यापनीयतन्त्रे–"णो खलु इत्थि अजीवो ण यावि अभवा ण यावि दंसणविरोहिणी णो अमाणुसा णो अणारिउप्पत्ती णो असंखेज्जाउया णो अइकूरमई णो ण उवसन्त-

मोहा णो ण सुद्धाचारा, णो असुद्धबोंदी, णो ववसायवज्जिया, णो अपुव्वकरणविरोहिणी, णो णवगुणठाणरहिया, णो अजोगा लद्धिए, णो अकल्लाणभायणंति कहं न उत्तमधम्मसाहिग" त्ति। तत्र 'न खल्विति' नैव स्त्री अजीवो वर्त्तते, किन्तु! जीव एव, जीवस्य चोत्तमधर्म्मसाधकत्वाविरोधस्तथादर्शनात्, न जीवोऽपि सर्व्वं उत्तमधर्म्मसाधको भवति, अभव्येन व्यभिचारात्, तद्व्यपोहायाह—'न चाप्यभव्या' जातिप्रतिषेधोऽयं, यद्यपि काचिदभव्या तथापि सर्वैवाभव्या न भवति, संसारनिर्वेदनिर्वाणधर्म्माद्वेषशुश्रूषादिदर्शनात्, भव्योऽपि कश्चिद्दर्शनविरोधी यो न सेत्स्यति तन्निरासायाह—'नो दर्शनविरोधिनी' दर्शनमिह सम्यग्दर्शनं परिगृह्यते तत्त्वार्थश्रद्धानरूपं, न तद्विरोधिन्येव, आस्तिक्यादिदर्शनात्, दर्शनाविरोधिन्यपि अमानुषी नेष्यत एव तत्प्रतिषेधायाह—'नो अमानुषी' मनुष्यजातौ भावात्, विशिष्टकरचरणोरुग्रीवाद्यवयवसन्निवेशदर्शनात्, मानुष्येऽप्यनार्योत्पत्तिरनिष्टा तदपनोदायाह—'नो अनार्योत्पत्तिः' आर्येष्वप्युत्पत्तेः, तथादर्शनात्, आर्योत्पत्तिरप्यसंख्येयायुर्नाधिकृतसाधनायेत्येतदधिकृत्याह— 'नो असङ्ख्येयायुः' सर्वैव, सङ्ख्येयायुर्युक्ताया अपि भावात्, तथादर्शनात्, सङ्ख्येयायुरपि अतिक्रूरमतिः प्रतिषिद्धा तन्निराचिकीर्षयाऽह—'नातिक्रूरमतिः' सप्तमनरकायुर्निबन्धनरौद्रध्यानाभावात्, तद्वत्प्रकृष्टशुभध्यानाभाव इति चेत्, न, तेन तस्य प्रतिबन्धाभावात्, तत्फलवदितरफलभावेनानिष्टप्रसङ्गात्,

अक्रूरमतिरपि रतिलालसाऽसुन्दरैव तदपोहायाह—'नो न उपशान्तमोहा' काचित् उपशान्तमोहापि सम्भवति, तथा-

दर्शनात् , उपशान्तमोहाऽप्यशुद्धाचारा गर्हिता तत्प्रतिक्षेपायाह– 'नो न शुद्धाचारा' कदाचित् शुद्धाचाराऽपि भवति, औचित्येन परोपकरणार्ज्जनाद्याचारदर्शनात्, शुद्धाचाराऽप्यशुद्धबोन्दिरसाध्वी तदपनोदायाह–'नो अशुद्धबोन्दिः' काचित् शुद्धतनुरपि भवति प्राक्कर्म्मानुवेधतः संसञ्जनाद्यदर्शनात् कक्षास्तनादिदेशेषु शुद्धबोन्दिरपि व्यवसायवर्जिता निन्दितैव तन्निरासायाह–'नो व्यवसायवर्जिता' काचित्परलोकव्यवसायिनी, शास्त्रात्तत्प्रवृत्तिदर्शनात्, सव्यवसायाऽप्यपूर्वकरणविरोधिनी विरोधिन्येव तत्प्रतिषेधमाह–'नो अपूर्वकरणविरोधिनी अपूर्वकरणसम्भवस्य स्त्रीजातावपि प्रतिपादितत्वात् , अपूर्वकरणवत्यपि नवगुणस्थानरहिता नेष्टसिद्धये ( इति ) इष्टसिद्ध्यर्थमाह–' नो नवगुणस्थानरहिता ' तत्सम्भवस्य तस्याः प्रतिपादितत्वात् , नवगुणस्थानसङ्गताऽपि लब्ध्ययोग्या अकारणमधिकृतविधेरित्येतत्प्रतिक्षेपायाह–'नायोग्या लब्धेः' आमर्षौषध्यादिरूपायाः, कालौचित्येनेदानीमपि दर्शनात्, कथं द्वादशाङ्गप्रतिषेधः ?, तथाविधविग्रहे ततो दोषात्, श्रेणिपरिणतौ तु कालगर्भवद्भावतो भावाऽविरुद्ध एव, लब्धियोग्याऽप्यकल्याणभाजनोपघातान्नाभिलषितार्थसाधनायालमित्यत आह-'नाकल्याणभाजनं' तीर्थकरजननात्, नातः परं कल्याणमस्ति, यत एवमतः कथं नोत्तमधर्म्मसाधिकेति, उत्तमधर्म्मसाधिकैव ।

अनेन तत्तत्कालापेक्षयैतावद्गुणसम्पत्समन्वितैवोत्तमधर्म्मसाधिकेति विद्वांसः, केवलसाधकश्चायं, सति च केवले नियमान्मोक्षप्राप्तिरित्युक्तमानुषङ्गिकं, तस्मान्नमस्कारः कार्य इति ।

पं...' सप्तमेत्यादि ' सप्तमनरकेऽतिक्लिष्टसत्त्वस्थाने आयुषो निबन्धनस्य रौद्रध्यानस्य तीव्र-

संक्लेशरूपस्याभावात् स्त्रीणां 'षष्ठीं च स्त्रियः' इति वचनात् तद्वत्प्रकृतरौद्रध्यानस्येव प्रकृष्टस्य मोक्षहेतोः शुभध्यानस्य शुक्लरूपस्याभाव इति ॥

एवं चेदभ्युपगमो भवतः, अस्य परिहारमाह—'न' नैवैतत्परोक्तं, कुत इत्याह—'तेन' प्रकृतरौद्रध्यानेन 'तस्य' प्रकृतशुभध्यानस्य 'प्रतिबन्धाभावाद्' अविनाभावायोगात्, प्रतिबन्धसिद्धौ हि व्यापककारणयोर्वृक्षत्वधूमध्वजयोर्निवृत्तौ शिंशपाधूमनिवृत्तिवत् प्रकृतरौद्रध्यानाभावे प्रकृष्टशुभध्यानाभाव उपन्यसितुं युक्तो, न चास्ति प्रतिबन्धः, कुत इत्याह—'तत्फलवत्' तस्य-प्रकृष्टशुभध्यानस्य फलं-मुक्तिगमनं तस्येव 'इतरफलभावेन' प्रकृतरौद्रध्यानफलस्य-सप्तमनरकगमनलक्षणस्य भावेन-युगपत्सत्तया 'अनिष्टप्रसङ्गात्' परमपुरुषार्थोपघातरूपस्यानिष्टस्य प्रसङ्गात्, प्रतिबन्धसिद्धौ हि शिंशपात्वे इव वृक्षत्वं धूम इव वा धूमध्वजः प्रकृष्टशुभध्यानभावे स्वफलकारिण्यवश्यंभावी प्रकृतरौद्रध्यानभावः स्वकार्यकारी, स्वकार्यकारित्वाद्वस्तुनः, स्वकार्यमाक्षिपत्कथमिव परमपुरुषार्थं नोपहन्यादिति,

'श्रेणीत्यादि' श्रेणिपरिणतौ तु-क्षपकश्रेणिपरिणामे पुनः वेदमोहनीयक्षयोत्तरकालं 'कालगर्भवत्' काले-ऋतुप्रवृत्त्युचिते उदरसत्त्व इव 'भावतो' द्वादशाङ्गार्थोपयोगरूपात् न तु शब्दतोऽपि 'भावः' सत्ता द्वादशाङ्गस्य 'अविरुद्धो' न दोषवान्, इदमत्र हृदयम्—अस्ति हि स्त्रीणामपि प्रकृतयुक्त्या केवलप्राप्तिः शुक्लध्यानसाध्यं च तत्, 'ध्यानान्तरिकायां शुक्लाद्यभेदद्वयावसान उत्तरभेदद्वयानारम्भरूपायां वर्त्तमानस्य केवलमुत्पद्यते' इति वचनप्रामाण्यात्, न च पूर्वगतमन्तरेण शुक्लध्यानाद्यभेदौ स्तः 'आद्ये पूर्वविदः (तत्त्वार्थे अ० ९ सूत्रम् ३९) इति वचनात्, दृष्टिवादनिषेधश्च 'स्त्रीणा' मितिवचनात्, अतस्तदर्थोपयोगरूपः क्षपकश्रेणिपरिणतौ स्त्रीणां द्वादशाङ्गभावः क्षयोपशमविशेषाददुष्ट इति ॥

टी०....स्त्री अजीवो नास्त्येव, यत एवं कथयितुं शक्यते, 'अजीवस्य मोक्षो न भवेत्', किन्तु जीव एव यतो जीवस्य लक्षणं चैतन्यमस्यां विद्यते, किञ्च जीव उत्तमचारित्र-धर्मसाधिकाऽस्ति, तत्साधनेन कश्चिद्विरोधो नास्ति । यतः,जीवेषूत्तमधर्मसाधकता दृश्यत एव.

शङ्का=जीवा अपि सर्व एव, उत्तमधर्मसाधका न भवन्ति यतो जीवत्वेन सहोत्तमधर्मसाधकताया नियमोऽवश्यं भावः कथयितुं न शक्यते, अभव्येष्वेवैतस्य नियमस्य व्यभिचारः—असंभवोऽघटनं वर्त्तते, सत्यपि जीवत्वे तत्रोत्तमधर्मसाधकता नास्त्येव, ततः स्त्री जीवोऽस्ति, एतावन्मात्रेणोत्तमधर्मसाधिकाऽस्ति एवं कथं कथ्यते ?

समाधानम्=जीवत्वेन सह नियमो नास्ति यतोऽभव्या जीवाः सन्ति तथापि ते, उत्तमधर्मसाधका न भवन्त्येव, एतत्सत्यं परन्तु स्त्री अभव्यत्वजातिमत्येव नास्ति, काचित् स्त्री अभव्याऽपि भवेत्, तथापि सर्वाः स्त्रियः अभव्या एव सन्ति, एवं नास्ति, काचित् स्त्री

भव्याऽपि भवेत् तत्र भव्यत्वयोग्यसंसारनिर्वेद–निर्वाणधर्माद्वेष–शुश्रूषादि दृश्यते एव, भव्योऽपि कश्चिद् दर्शनविरोधी यो न सेत्स्यतीति.

('सप्तमेत्यादि' सप्तमनरकेऽतिक्लिष्टसत्त्वस्थाने, आयुषो निबन्धनस्य रौद्रध्यानस्य तीव्र-संक्लेशरूपस्याभावात् स्त्रीणां 'षष्ठीं च स्त्रियः' इति वचनात्, तद्वत्–प्रकृतरौद्रध्यानस्येव प्रकृष्टस्य मोक्षहेतोः शुभध्यानस्य शुक्लरूपस्याभाव इति ।।

एवं चेदभ्युपगमो भवतः, अस्य परिहारमाह–'न' नैवेतत्परोक्तं, कुत इत्याह–'तेन'–प्रकृतरौद्रध्यानेन 'तस्य' प्रकृतशुभध्यानस्य 'प्रतिबन्धाभावाद्' अविनाभावाऽयोगात्, प्रतिबन्ध-सिद्धौ हि व्यापककारणयो वृक्षत्वधूमध्वजयो निवृत्तौ शिंशपाधूमनिवृत्तिवत् प्रकृतरौद्रध्यानाभावे प्रकृतशुभध्यानाभाव उपन्यसितुं युक्तो, न चास्ति प्रतिबन्धः, कुत इत्याह 'तत्फलवत्' तस्य प्रकृष्ट–शुभध्यानस्य फलं–मुक्तिगमनं, तस्येव 'इतरफलभावेन' प्रकृतरौद्रध्यानफलस्य सप्तमनरक-गमनलक्षणस्य भावेन–युगपत्सत्तया 'अनिष्टप्रसङ्गात्' परमपुरुषार्थोपघातरूपस्याऽनिष्टस्य प्रसङ्गात्, प्रतिबन्धसिद्धौ हि शिंशपात्वे इव वृक्षत्वं धूम इव वा धूमध्वजः प्रकृष्टशुभध्यानभावे स्वफल-कारिण्यवश्यंभावी प्रकृतरौद्रध्यानभावः स्वकार्यकारी, स्वकार्यकारित्वाद् वस्तुनः, स्वकार्यमाक्षिपत् कथमिव परमपुरुषार्थं नोपहन्यादिति,)

अर्थाद्, अनेन–पूर्वोक्तवचनराशिरूपवाक्येन, तत्तत् कालापेक्षया–स्वस्वकालमपेक्ष्य पूर्वोक्ता एतावन्तः–एतत्प्रमाणा ये गुणाः, तद्रूपसम्पत्–समन्वितैव स्त्री, उत्तमधर्मसाधिकेति विद्वांसो–ज्ञातारो वदन्ति ।

किञ्चैष, उत्तमो धर्मः केवलज्ञानसिद्धिकारकः सति च केवले केवलज्ञानसमवधाने, एव नियमतो मोक्षप्राप्तिरित्युक्तमानुषङ्गिकं–प्रासङ्गिकम्,

यदा जिनवरवृषभवर्धमानस्वामिनं प्रति कृत एकोऽपि नमस्कारो नरं नारीं वा भव-सागरतः, तारयत्येव.

**–अतो नरेण नार्या वा वर्धमानस्वामी नमस्कार्यः, सदा, इदं वाक्यं, स्तुति-अर्थवादरूपमस्ति, अथवा विधिवादरूपमस्ति ? इत्यस्य, आक्षेपपरिहारपूर्वकं सुंदर-शैल्या विवेचनं विस्तारयति–**

**आह–किमेष स्तुत्यर्थवादो यथा–'एकया पूर्णाहुत्या सर्वान् कामानवाप्नोती'ति, उत विधिवाद एव यथा–'अग्निहोत्रं जुहुयात् स्वर्गकाम' इति, किं चातः?, यद्याद्यः पक्षः ततो यथोक्तफल**

शून्यत्वात् फलान्तरभावे च तदन्यस्तुत्यविशेषादलमिहैव यत्नेन, न च यक्षस्तुतिरप्यफलैवेति, प्रतीतमेवैतत्, अथ चरमो विकल्पः ततः सम्यक्त्वाणुव्रत—महाव्रता—दिचारित्रपालनावैयर्थ्यं, तत एव मुक्तिसिद्धेः, न च फलान्तरसाधकमिष्यते सम्यक्त्वादि, मोक्षफलत्वेनेष्टत्वात् 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग' (तत्त्वार्थे अ० १ सू० १) इति वचनादिति, अत्रोच्यते, विधिवाद एवायं, न च सम्यक्त्वादिवैयर्थ्यं, तत्त्वतस्तद्भाव एवास्य भावात्, दीनारादिभ्यो भूतिन्याय एषः, तदवन्ध्यहेतुत्वेन तथा तद्भावोपपत्तेः, अवन्ध्यहेतुश्चाधिकृतफलसिद्धौ

भावनमस्कार इति, अर्थवादपक्षेऽपि न सर्वा स्तुतिः समानफलेत्यतो विशिष्टफलहेतुत्वेनात्रैव यत्नः कार्यः, तुल्ययत्नादेव विषयभेदेन फलभेदोपपत्तेर्बब्बूलकल्पपादपादौ प्रतीतमेतत्, भगवन्नमस्कारश्च परमात्मविषयतयोपमातीतो वर्त्तते, यथोक्तम्—

"कल्पद्रुमः परो मन्त्रः, पुण्यं चिन्तामणिश्च यः।
गीयते स नमस्कारस्तथैवाहुरपण्डिताः ॥१॥

कल्पद्रुमो महाभागः, कल्पनागोचरं फलम्।
ददाति न च मन्त्रोऽपि, सर्वदुःखविषापहः ॥ २ ॥

न पुण्यमपवर्गाय, न च चिन्तामणिर्यतः।
तत्कथं ते नमस्कार, एभिस्तुल्योऽभिधीयते? ।३। इत्यादि" ॥

पं०...'स्तुत्यर्थवाद इति' स्तुतये–स्तुत्यर्थं अर्थवादः–प्रशंसा स्तुत्यर्थवादो, विप्लावनाद्यर्थमपि अर्थवादः स्यात्, तद्व्यवच्छेदार्थं स्तुतिग्रहणमिति, 'तत्त्वत इत्यादि' तत्त्वतो निश्चयवृत्त्या 'तद्भाव एव' सम्यग्दर्शनादिभाव एव 'अस्य' नमस्कारस्य भावाद्, द्रव्यतः पुनरन्यथाऽप्ययं स्यादिति तत्त्वग्रहणं, इदमेव सदृष्टान्तमाह–'दीनारादिभ्यो' दीनारप्रभृतिप्रशस्तवस्तुभ्यो

'भूतिन्यायो विभूतिदृष्टान्तस्तत्सदृशत्वाद् भूतिन्याय 'एषः' सम्यक्त्वादिभ्यो नमस्कारः, एतदपि कुत इत्याह–'तदवन्ध्यहेतुत्वेन' यस्य–नमस्कारस्य साध्यस्यावन्ध्यहेतुत्वेन–नियतफलकारिहेतुभावेन सम्यक्त्वादीनां, 'तथा' भावनमस्काररूपतया 'तद्भावोपपत्तेः' सम्यक्त्वादीनां परिणत्युपपत्तेः, भूतिपक्षे तु तस्याः–भूतेरवन्ध्यहेतुत्वेन दीनारादीनां तथा–भूतितया तेषां–दीनारादीनां–परिणतेः घटनादिति योज्या इति, भवतु नामैवं तथाऽपि कथं प्रकृतसंसारोत्तारसिद्धिरित्याशङ्कयाह–'अवन्ध्यहेतुश्च' अस्खलितकारणं च "अधिकृतफलसिद्धौ" मोक्षलक्षणायां

"भावनमस्कारो" भगवत्प्रतिपत्तिरूप इति, कथं न मोक्षफलं सम्यग्दर्शनादि ?, परम्परया मोक्षस्य तत्फलत्वादिति "कल्पद्रुमेत्यादिश्लोकः" कल्पद्रुमः–कल्पवृक्षः "परो मन्त्रो" हरिणैगमेषादिः, पुण्यं–तीर्थकरनामकर्म्मादि चिन्तामणिविशेषो गीयते—यः श्रूयते जगतीष्टफलदायितया "तथैव" गीयमानकल्पद्रुमादिप्रकार एव, स भगवंस्तव नमस्कार आहुरपण्डिताः–अकुशला एतदिति शेषः,

**टी०...**पूर्वपक्षः(वादी) आह–किमेष 'स्तुत्यर्थवादः' इति, स्तुतये–स्तुत्यर्थं, अर्थवादः–प्रशंसा, स्तुत्यर्थवादो, विप्लावनाद्यर्थमपि, अर्थवादः स्यात्, तद्व्यवच्छेदार्थं स्तुतिग्रहणमिति (अर्थवादः(शब्दः) अर्थस्य प्रयोजनस्य वादो वादनम् । विध्यर्थ–प्रशंसापरं वचनमित्यर्थः अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवृत्तये प्रशंसति, (गौ. सू. २।२।६३) अर्थवादश्चतुर्विधः । स्तुतिः, निन्दा, परकृतिः पुराकल्पः (गौ. २।१।६४) प्रकारान्तरेण स त्रिविधः । गुणवादः, अनुवादः, भूतार्थवादश्चेति (न्या. मं. ४ पृ. ३०) तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः । (न्या. मं० ४ पृ. ३१)

यथा–एकया पूर्णाहुत्या सर्वान् कामानवाप्नोतीति, उत विधिवाद एव यथा 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इति.

(विधिवादः=अत्र विधिशब्दस्य विधिरूपशब्दे, इष्टसाधनत्वादिरूपे विध्यर्थे च प्रयोगो दृश्यते । तत्र विधायक इति आद्योऽर्थः यद्वाक्यं विधायकं चोदकं स विधिः । विधिस्तु नियोगोऽनुज्ञा वा यथा, अग्निहोत्रं जुहुयात्स्वर्गकामः (शतपथ. २) इत्यादि (वात्स्या. २।१।६३) विध्यभिधायकप्रत्ययः, तद्घटितवाक्यं वा (न्या. मं. ४) तदर्थश्च विधीयते विधिरूपशब्देन प्रतिपाद्यतेऽसौ विधिरिष्टसाधनत्वादिः । तस्याऽभिधायको वाचक इति, अथवा अर्थविशेषाभिधायकः प्रत्ययः स च प्रत्ययो लिङ् लोट् लेट् तव्यकृत्यप्रत्ययरूप इति (सि. च.) (भ. पं. ४ पृ. ५८) (त. प. सं. ४ पृ. ९३) प्रवृत्तिपरं वाक्यं । यथा ज्योतिष्टोमेन स्वर्गकामो यजेत (शतपथ.) ओदनकामस्तण्डुलं पचेतेत्यादि । अत्र ज्योतिष्टोमनामको यागः स्वर्गरूपेष्टसाधनम्, तण्डुलकर्मकः पाकः, ओदनरूपेष्टसाधनमुभयवाक्यार्थः ।

यजेत पचेतेत्यादि विधिप्रत्ययेनेष्टसाधनत्वोपस्थापनात् (त. कौ.)

किञ्चातः ? (तथाचैतस्मात् किं ?) यद्याद्यः पक्षः, (प्रशंसामात्रत्वात्) स्तुत्यर्थवादरूप-प्रथमपक्षे स्तुत्यर्थप्रशंसावाचक–वाक्यतः (ततः) यथोक्तफलशून्यत्वात्, फलान्तरभावे च तदन्य–(वीर–विभु–भिन्नान्य) स्तुतितः, अविशेषात्–विशेषाभावेन वीरस्तुतिविषयकप्रयत्नेनाऽलं–कृतं,

न च यक्षस्तुतिरप्यफलैवेति प्रतीतमेवैतत्.

अथ चरमो विकल्पः (विधिवादरूपः) ततः सम्यक्त्वाणुव्रत–महाव्रतादि–चारित्रपालना-वैयर्थ्यं, तत एव मुक्ति–सिद्धेः, न च फलान्तरसाधकमिष्यते सम्यक्त्वादि, मोक्षफलत्वेनेष्टत्वात्, "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" (तत्त्वा. अ. १, सू. १) इति वचनादिति.

एवमर्थवाद–दृष्ट्याऽथवा विधिवाददृष्ट्या, एतद् "इक्कोऽवि नमुक्कारो" वचनमेकवीर-नमस्कारोऽथवाऽन्यसम्यक्त्वादि निष्फलो भवतीति, एवं वचनं कथं कथितं ? इति पूर्वपक्षोऽस्ति.

उत्तरपक्षः=अत्रोच्यते, विधिवाद एवायम् । न च सम्यक्त्वादि–वैयर्थ्यं, तत्त्वतस्तद्भाव एवाऽस्य भावात्, दीनारादिभ्यो भूतिन्याय एषः, तदवन्ध्यहेतुत्वेन तथा तद्भावोपपत्तेः, अवन्ध्यहेतुश्चाऽधिकृतफल–सिद्धौ ।

'तत्त्वत इत्यादि' तत्त्वतो निश्चयवृत्त्या 'तद्भाव एव' सम्यग्दर्शनादिभाव एव 'अस्य' नमस्कारस्य भावाद्, द्रव्यतः पुनरन्यथाऽप्ययं स्यादिति तत्त्वग्रहणं, इदमेव सदृष्टान्तमाह––

'दीनारादिभ्यो' दीनारप्रभृति–प्रशस्तवस्तुभ्यो 'भूतिन्यायो' विभूति दृष्टान्तस्तत्सदृशत्वाद् भूतिन्याय 'एषः' सम्यक्त्वादिभ्यो नमस्कारः, एतदपि कुत इत्याह–'तदवन्ध्यहेतुत्वेन' तस्य नमस्कारस्य साध्यस्याऽवन्ध्यहेतुत्वेन–नियतफलकारिहेतुभावेन सम्यक्त्वादीनां 'तथा' भावनम-स्काररूपतया 'तद्भावोपपत्तेः' सम्यक्त्वादीनां परिणत्युपपत्तेः, भूतिपक्षे तु तस्याः–भूतेरवन्ध्यहेतुत्वेन दीनारादीनां तथाः–भूतितया, तेषां–दीनारादीनां परिणते घटनादिति योज्या इति ।

भवतु नामैवं तथाऽपि कथं प्रकृतसंसारोत्तारसिद्धिरित्याशङ्क्याह––'अवन्ध्यहेतुश्च' अस्खलितकारणं च 'अधिकृतफलसिद्धौ' मोक्षलक्षणायां ।

भावनमस्कार इति भगवत्–प्रतिपत्तिरूप इति,

अर्थात्–मोक्षरूपाधिकृतफलसिद्धिं प्रति भगवत्प्रतिपत्तिनामकभावनमस्कारः,

"तुरियभेदपडिवत्ती पूजा, उपशम खीण सजोगी रे ।
चउहा पूजा इम उत्तरज्झयणे भाषी केवल भोगी रे ॥"

(आ. चो. सुविधि. स्त. ७)

अस्खलितकारणत्वेन, भावनमस्कारेणैव नरस्य वा नार्या वा संसारसागरतः पारतस्तरणं भवति. अतः 'नमस्कारः कर्त्तव्यः' इति विधिवादः सफलः,

**शङ्का**=कथं न मोक्षफलं सम्यग्दर्शनादि ?

**समाधानम्**=परम्परया मोक्षस्य सम्यग्दर्शनादि, मोक्षकारणत्वेन मोक्षफलजनकं कथ्यते, उत्कृष्टसम्यग्दर्शनादि–परिणामप्राप्तभावनमस्कार एव साक्षान्मोक्षफलजनकमुच्यते इति विधिवाद-रूपद्वितीयपक्षस्य साफल्यम् ।

अर्थवादः=अर्थवादपक्षेऽपि न सर्वा स्तुतिः समानफलेत्यतो विशिष्टफलहेतुत्वेनाऽत्रैव यत्नः कार्यः, तुल्ययत्नादेव विषयभेदेन फलभेदोपपत्ते र्बब्बूलकल्पपादपादौ प्रतीतमेव.

(अर्थात् सर्वा स्तुतिः समानफलदात्री न भवति, भिन्न–भिन्न–फलदात्री भवति, एकस्तुतितोऽन्या, फलभेददात्री भवति, ततः यक्षादिस्तुतित एषा भगवद्वीरस्तुतिः फलाति-शयदात्री भवत्यतः वीरपरमात्मस्तुतावेव प्रयत्नः कार्यः, अन्यस्तुतिभ्यो वीरपरमात्मस्तुतिरत्र प्रशंसारूपत्वेनैषोऽर्थवादपक्षो घटनीयः)

समाने प्रयत्ने सत्येव विषय (निमित्त) स्य भिन्नतायां फलं भिन्नं भवति. बब्बूल–(कण्टकवृक्ष) स्य च कल्पवृक्षस्य भजने (प्रयत्नसमानतायां) यथा बब्बूलवृक्षसेवनतः कल्पवृक्षस्य सेवने विशिष्टं फलं प्राप्नोति.

विषयभेदेन फलभेदः सुतरां सिद्धः, प्रयत्नसमानतायां सत्यां, अतः प्रस्तुते वीराय नमः, वीरनमस्कार–प्रयत्नस्य विषयः परमात्मा वीरोऽस्ति
किञ्च, एष परमात्मा, अन्ययक्षादिभ्योऽतिशेते, उपमातीतत्वेन विशिष्यते, वीरनमस्कारविषयक-प्रयत्ने विशिष्टफलदातैव. यतो दृष्टेः समक्षं, उन्नतादर्शवशेन, उन्नतोऽध्यवसाय एव.

भगवन्नमस्कारश्च परमात्मविषयतयोपमातीतो वर्त्तते,

अर्थाद् "कल्पद्रुमेत्यादिश्लोकः" कल्पद्रुमः–कल्पवृक्षः "परोमन्त्रो" हरिणैगमेषादिः, पुण्यं–तीर्थकरनामकर्म्मादि, चिन्तामणि–विशेषो यो गीयते–यः श्रूयते जगतीष्टफलदायितया 'तथैव' गीयमान–कल्पद्रुमादिप्रकार एव, स भगवत्स्तव–नमस्कार, आहुरपण्डिताः–अकुशला, एतदिति शेषः,

अत्रोच्चः कल्पवृक्षः, उच्चो–मंत्रत्वेन हरिणैगमेषिदेवादिः इष्टफलार्थं प्रत्यक्षकरणाय जप्यमानो मंत्रः, उच्चं–पुण्यं–तीर्थंकरनामकर्मादि–पुण्यप्रकृतिर्ज्ञेया, चिन्तामणि–विशेषो जगति,

इष्टफलदायित्वेन गण्यते, वस्तुतस्तु भगवन्नमस्कारो जगतीष्टफलदायितया गीयमान—कल्पद्रुमादि—प्रकारमेव भगवन्स्तवनमस्कारतुल्यं, अपण्डिता—अकुशला एतद्वदन्ति—

तथाहि=महामहिमशाली, जागतिकः कल्पवृक्षः कल्पनाविषयं फलं ददाति भगवन्नमस्कारस्तु कल्पनाऽतीताऽनन्ताऽव्याबाधसुखमयमोक्षनामकं फलं ददाति, जागतिक—मन्त्रोऽपि सर्वदुःखरूप—विषापहो न भवति, परन्तु जन्मजरामरणशोकदारिद्रयभय—पराधीनता—विडम्बनादि—सकलसांसारिकदुःखरूपविषापहो भगवन्नमस्कारो भवति. जागतिक—तीर्थंकरनामकर्मादिरूपं पुण्यं तीर्थंकरत्वरूपं फलं ददाति. जागतिक—चिन्तामणिरपि चिंतितं लौकिकं फलं ददाति परन्तु सर्वकर्मक्षयरूपापवर्गं फलं तु भगवन्नमस्कारो ददाति. अतो जागतिकफलदायिचिन्तामण्यादिभिः, ते नमस्कारः, तुल्यो नाऽभिधीयते.

**एतास्तिस्रः स्तुतयो नियमेनोच्यन्ते, केचित्तु अन्या अपि पठन्ति, न च तत्र नियम इति न तद्व्याख्यानक्रिया,**

**टी०....**(श्रीमद्—हेमचन्द्रसूरीश्वरैः योगशास्त्रे स्वोपज्ञवृत्तौ कथितमस्ति यद् 'एतास्तिस्रः स्तुतयः' गणधरकृतत्वेन नियमेनोच्यन्ते केचित्तु, अन्यस्तुतिद्वयं वदन्ति.) यथाहि—

"उज्जितसेलसिहरे दिक्खा नाणं निसीहिया जस्स ।
तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥ ४ ॥
चत्तारि अट्ठदस दोय वंदिआ जिणवरा चउव्वीसं ।
परमट्ठनिट्ठि—अट्ठा सिद्धा सिद्धिं मम दिसंतु ॥ ५ ॥"

("उज्जयंत शैलशिखरे दीक्षा ज्ञानं निषेधिका यस्य ।
तं धर्मचक्रवर्तिनं, अरिष्टनेमिं नमस्यामि ॥
चत्वारो, अष्ट, दस, द्वौ च, वंदिता जिनवराः चतुर्विंशतिः ।
परमार्थ—निष्ठितार्थाः सिद्धाः सिद्धिं मम दिशन्तु ॥")

(तथा च शक्रस्तवे 'जे अइया सिद्धा' रूप—प्रथमगाथायां द्वितीयोऽधिकारश्च 'सिद्धाणं' सिद्धस्तवस्य, चरमगाथाद्वयरूपो दशम—एकादशोऽधिकार एव तदधिकारत्रयं,

श्रुतपरम्परया—गीतार्थ—पूर्वाचार्यस्य सम्प्रदायेन कथ्यते,. अथवा श्रुतेन—सूत्रेण तथा तत्सूत्रस्य निर्युक्तितो भाष्येण चूर्ण्या चैवं श्रुतपरम्परया—सूत्रादिपञ्चाङ्गीपरम्परया कथ्यते यथा सूत्रे चैत्यवंदनं श्रुतस्तवपर्यन्तं कथितं किञ्च निर्युक्तिमध्ये सिद्धस्तवपर्यन्तं (सिद्धाणं प्रथमगाथा

पर्यन्तं ) चूर्णौ च सिद्धस्तवस्य गाथात्रयपर्यन्तं, शेष उज्जयन्तादिरूपाऽधिकारो यथेच्छया कथनीयः, शेषा नवाधिकाराः सूत्र–प्रामाण्येन सन्ति यतोऽत्र ललितविस्तरावृत्तौ नवाऽधिकारा अवश्यं नियमेन भणनीयाः, शेषाधिकारत्रये 'न च तत्र नियम' इति न तद्व्याख्यान–क्रिया,

परन्तु शेषाधिकारत्रयं पूर्वाचार्यकृतनिर्युक्तौ चूर्णौ च कथितत्वेन श्रुतपरम्परया प्रवर्त्तते, यत्कारणेनाऽवश्यकचूर्णौ "सेसयाजहिच्छाए" अर्थाद् शेषाधिकारो वन्दनकेच्छानुसारेणाऽस्ति, एवं कथितं, तत्कारणेन 'उज्जयन्तशैलशिखरे' इत्याद्यधिकारत्रयमपि निश्चय (श्रुतपरम्परावत्त्वेन) श्रुतमयं ज्ञेयं, परन्तु श्रुतबाह्यं नास्ति यतः, आवश्यकचूर्णिसत्कवचनं श्रुतबाह्यं न गण्यते.) –अथ शास्त्रकारो 'वैयावच्चगराणं' सूत्रस्य व्याख्यां करोति–

एवमेतत्पठितोपचितपुण्यसंभारा उचितेषूपयोगफलमेतदिति ज्ञापनार्थं पठन्ति–"वेयावच्चगराणं संतिगराणं सम्मद्दिट्ठिसमाहिगराणं करेमि काउस्सग्गमित्यादि यावद्वोसिरामि" व्याख्या–पूर्ववत् नवरं–वैयावृत्त्यकराणां–प्रवचनार्थं व्यापृतभावानां यथाऽम्बाकूष्माण्ड्यादीनां, शान्तिकराणां क्षुद्रोपद्रवेषु सम्यग्दृष्टीनां–सामान्येनान्येषां समाधिकराणां–स्वपरयोस्तेषामेव, स्वरूपमेतदेवैषामिति वृद्धसम्प्रदायः, एतेषां सम्बन्धिनं, सप्तम्यर्थे वा षष्ठी, एतद्विषयं–एतानाश्रित्य, करोमि कायोत्सर्गमिति, कायोत्सर्गविस्तरः पूर्ववत्, स्तुतिश्च नवरमेषां वैयावृत्त्यकराणां तथा तद्भाववृद्धेरित्युक्तप्रायं, तदपरिज्ञानेऽप्यस्मात्,

तच्छुभसिद्धाविदमेव वचनं ज्ञापकं, न चासिद्धमेतद्, अभिचारुकादौ तथेक्षणात्, सदौचित्यप्रवृत्त्या सर्वत्र प्रवर्त्तितव्यमित्यैदम्पर्यमस्य, तदेतत्, सकलयोगबीजं वन्दनादिप्रत्ययमित्यादि न पठ्यते, अपि त्वन्यत्रोच्छ्वसितेनेत्यादि, तेषामविरतत्वात्, सामान्यप्रवृत्तेरित्थमेवोपकारदर्शनात्, वचनप्रामाण्यादिति, व्याख्यातं सिद्धेभ्य इत्यादि सूत्रम् ॥

पं... "उचितेषूपयोगफलमेतदिति" उचितेषु-लोकोत्तरकुशलपरिणामनिबन्धनतया योग्ये-ष्वर्हदादिषूपयोगफलं-प्रणिधानप्रयोजनम् "एतत्" चैत्यवन्दमित्यस्यार्थस्य ज्ञापनार्थमिति, "तदपरिज्ञानेत्यादि" तैः वैयावृत्त्यकरादिभिरपरिज्ञानेऽपि-स्वविषयकायोत्सर्गस्यास्मात्—कायोत्सर्गात्तस्य-कायोत्सर्गकर्त्तुः,

"शुभसिद्धौ" विघ्नोपशमपुण्यबन्धादिसिद्धौ, "इदमेव" कायोत्सर्गप्रवर्त्तकं वचनं "ज्ञापकं" गमकमाप्तोपदिष्टत्वेनाव्यभिचारित्वात् "न च" नैव "असिद्धं" अप्रतिष्ठितं, प्रमाणान्तरेण "एतद्" अस्माच्छुभसिद्धिलक्षणं वस्तु, कुत इत्याह-"आभिचारुकादौ" दृष्टान्तधर्म्मिण्याभिचारुके स्तोभनस्तम्भनमोहनादिफले कर्म्मणि, आदिशब्दाच्छान्तिकपौष्टिकादिशुभफलकर्म्मणि च "तथेक्षणात्" स्तोभनीयस्तम्भनीयादिभिरविज्ञानेऽपि आप्तोपदेशेन स्तोभनादिकर्म्मकर्त्तुरिष्टफलस्य स्तम्भनादेः प्रत्यक्षानुमानाभ्यां दर्शनात्, प्रयोगो-यदाप्तोपदेशपूर्वकं कर्म्म, तद्विषयेणाज्ञातमपि कर्त्तुरिष्टफलकारि भवति, यथा स्तोभनस्तम्भनादि कर्म्म, तथाचेदं वैयावृत्त्यकरादिविषयकायोत्सर्गकरणमिति,

टी०....अर्थादितत्सूत्रं (सिद्धाणं सूत्रं) पूर्वं पठितम्-पठनानन्तरं, उपचितं-वृद्धिं नीतं यत्पुण्यं तस्य सम्भारः समुदायो येषां ते, एतत्पठितोपचितसम्भारा (पुरुषाः चैत्यवंदनकारकाः) "उचितेषूपयोगफलमेतदिति" उचितेषु-लोकोत्तरकुशल-(शुभ) परिणामस्य, निबंधनतया-निदानतया योग्येषु, अर्हदादिषु-उपयोगफलं-प्रणिधानं, प्रयोजनं-फलं कार्यं यस्य तत् 'एतत्' चैत्यवन्दनमित्यर्थस्य ज्ञापनार्थं पठन्ति-"वैयावृत्त्यकराणां शान्तिकराणां सम्यग्दृष्टिसमाधिकराणां करोमि कायोत्सर्गमित्यादि यावद् व्युत्सृजामि" ।

व्याख्या पूर्ववत्, नवरं (विशेषतस्तु) (१) वैयावृत्यकराणां=प्रवचन-शासन-संघार्थं विशेषप्रकारेण व्यापार-प्रयत्नपूर्वकं कार्यसेवाभावविशिष्टा 'वैयावृत्यकराः' कथ्यन्ते, यथाऽम्बा-कुष्माण्डिका (चक्रेश्वरी) प्रभृतिदेव्यः, गोमुखाद्याः शासनदेवा वैयावृत्यकरत्वेन रूढा इति.

(२) शान्तिकराणां=विरोधि-आदिकृत-क्षुद्रोपद्रवविषयकशान्तिकरास्तेषां,

(३) सम्यग्दृष्टीनां=सामान्येन चैत्यवन्दनादिकारकाणां, अन्येषां-अचैत्यवंदनकारकाणां सर्वेषां सम्यग्दृष्टीनां समाधिकराणां=सम्यग्दृष्टिसमाधिकराणां, समाधिकराणां=स्वपरयोः-चैत्यवन्दनाराधकानाराधकयोः समाधिकरास्तेषां, समाधिकराणां स्वरूपमेतदेवैषां=वैयावृत्त्यकरणं, शान्तिकरणं सम्यग्दृष्टि-समाधिकरणमिति, एतत्स्वरूपं, एषां-शासनदेवदेवीनामस्ति, इति वृद्धसम्प्रदायोऽस्ति ।

एवं च वैयावृत्त्यकर-शान्तिकर-सम्यग्दृष्टिसमाधिकराणां (समग्रशासनदेवदेवीनां) सम्बधिनं (सत्कं) कायोत्सर्गमहं करोमि, अथवा सप्तम्यर्थे षष्ठी, अस्ति, एतादृशी-मान्यतायां वैयावृत्त्यकर

—शान्तिकर—सम्यग्दृष्टि—समाधिकररूपं विषयं गृहीत्वा, एतानाश्रित्य करोमि, कायोत्सर्गमिति, कायोत्सर्गविस्तरः पूर्ववत्,

किञ्चात्र वैशिष्ट्यमिदं यत्—स्तुतिश्चैषां वैयावृत्त्यकराणां (अत्र वृद्धसम्प्रदायः—वैयावृत्त्यकरनामक—शब्देनाऽम्बिका—चक्रेश्वरी—अप्रति—चक्रादि—शासनदेव्यः, तथा जैनशासनाऽधिष्ठायक—रक्षक—गोमुखादि—यक्षादि शासनदेवा गृह्यन्ते.)

यतो यत्सत्कः कायोत्सर्गः, तत्सत्का स्तुतिर्गीयते, तथा तद्भाववृद्धेरित्युक्तप्रायं=तथा-प्रकारकभावस्य वृद्धिप्रकर्षो भवति.

तथा च तेषां वैयावृत्त्यकरादीनां स्वविषयककायोत्सर्गस्य, अपरिज्ञाने (अपरिज्ञातत्वे) अस्माद् वैयावृत्त्यकरादिरूपविषय—विषयक—कायोत्सर्गतः कायोत्सर्गकर्त्तुः, विघ्नशान्तिपुण्यबन्धादि-रूपशुभफलसिद्धौ, इदमेव कायोत्सर्ग—प्रवर्त्तकं "वैयावच्चगराणं संतिगराणं सम्मदिट्ठिसमाहिगराणं करेमि काउसग्गं "इति वचनं ज्ञापकं—गमकं, आप्तोपदिष्टत्वेनाव्यभिचारित्वात्—फलावञ्चकत्वेन गमकम् ।

एतेन वचनेन शुभसिद्धिलक्षणं वस्तु, अन्येन प्रमाणेनासिद्धं—अप्रतिष्ठितं नास्ति, सिद्धमस्ति,

एतद्वस्तु दृष्टान्तेन ज्ञापयति, 'आभिचारुकादौ' दृष्टान्तधर्मिणि आभिचारुके स्तोभन—स्तम्भन—मोहनादि—फले कर्मणि, आदिशब्दात्, शान्तिकपौष्टिकादिशुभफलककर्मणि च 'तथेक्षणात्' स्तोभनीय-स्तम्भनीय—मोहनीयादिभिरविज्ञानेऽपि, आप्तोपदेशेन स्तोभनादि—कर्म—कर्त्तुरिष्टफलस्य स्तम्भनादेः प्रत्यक्षानुमानाभ्यां दर्शनात् प्रयोगो=यदाप्तोपदेशपूर्वकं कर्म, तद्विषयेणाऽज्ञातमपि कर्त्तुरिष्टफलकारि भवति, यथा स्तोभनस्तम्भनादि कर्म, तथा चेदं वैयावृत्त्यकरादि—विषयक कायोत्सर्ग—करणमिति.

अर्थात्—कायोत्सर्गकर्त्तुः, एतद्, शुभत्वेन विघ्नोपशमपुण्यबन्धादिः प्राप्तो भवति, इदं फलं प्रतिष्ठितमेव यतोऽभिचारप्रयोगादौ स्तोभन—स्तम्भनमोहनादिमंत्रतंत्रप्रयोगे एवं भवतीति दृश्यते तथा शान्ति—पौष्टिक—सात्त्विक—शुभफलकं कर्माऽपि, एवं भवद् दृश्यते, तत्र यमुद्दिश्य एष प्रयोगः क्रियते, स एतं प्रयोगं किञ्चिदपि न जानाति परन्तु, एषा व्यक्तिः, स्तोभन—स्तम्भन—मोहनाकर्षण—शमनानुकूलतावती भवति, एतादृशी, नियत—मंत्रतंत्रादिविषयक—साधना, मार्गदर्शकाप्तपुरुषकथनानुसारेण समीचीनसाधनाकरणेन, साऽज्ञानवती, व्यक्तिरपि जानाति, स्तोभनादिकं प्राप्यते,

यथा, यदाप्तपुरुषकथनानुसारेण मंत्रतंत्रादिकं क्रियते, स एतस्योद्देश्यभूतविषयमजानानोपि कर्म-कर्त्तुः फलं साधयन् वर्त्तते यथा स्तोभनस्तम्भनादि कर्म, तथैतं वैयावृत्त्यकारिणमुद्दिश्य क्रियमाणा कायोत्सर्ग-क्रिया, कायोत्सर्गकर्त्तुः फलं कथं नोत्पादयेत् ? उत्पादयेदेव,

कायोत्सर्गकर्त्तुः फलतो वैयावृत्त्यकारिणो वैयावृत्त्ये प्रकृष्टोत्साहो वर्त्तते—वर्धते च,

अत्रेदं हार्दं ज्ञेयम् =सदा नियमत औचित्येन शोभमानप्रवृत्तिपूर्वकं 'औचित्यप्रवृत्त्या सर्वत्र प्रवर्त्तितव्यम्' इति न्यायेन प्रवृत्तिः कार्या इति हेतुना वैयावृत्त्यकरादि-विषयक-कायोत्सर्गरूपैव ।

क्रिया, सकलयोगस्य (उत्तरोत्तर-गुणवृद्धेः) बीजं ज्ञेयम् । किञ्च 'वंदणवत्तियाए' इति पदत आरभ्य 'ठामि काउसग्गं' यावत्पाठोऽत्र नो समुच्यते, परन्तु 'अन्नत्थ उससिएणं' इत्यादि पाठो निगद्यते, यतस्ते वैयावृत्त्यकराः शासनस्य देवाश्च देव्यश्च, अविरतिमन्तो भवन्ति, सामान्य प्रवृत्तितः, एवमेवोपकारो दृष्टोऽस्ति, तस्मिन्नेव च प्रकृतसूत्ररूपवचनस्य प्रामाण्यमस्ति, एवं 'सिद्धाणं बुद्धाणं' रूप—सूत्र—सिद्ध—स्तवनामकसूत्रस्य व्याख्या समाप्तेति ।

**—अथ शास्त्रकारोऽवतरणिकासहितं 'जयवीयराय.'—प्रणिधानसूत्रम् व्याख्यानयति—**

**पुनः संवेगभावितमतयो विधिनोपविश्य पूर्ववत् प्रणिपातदण्डकादि पठित्वा स्तोत्रपाठपूर्वकं ततः सकलयोगाक्षेपाय प्रणिधानं करोति कुर्वन्ति वा, मुक्ताशुक्त्या**

उक्तं च—"पंचंगो पणिवाओ, थयपाढो होइ जोगमुद्दाए ।
वंदण जिणमुद्दाए, पणिहाणं मुत्तसुत्तीए ॥१॥
दो जाणू दोण्णि करा, पंचमगं होइ उत्तमंगं तु ।
संमं संपणिवाओ, णेओ पंचंगपणिवाओ ॥ २ ॥
अण्णोण्णंतरियंगुलिकोसागारेहिँ दोहिं हत्थेहिं ।
पेट्टोवरिकोप्परसंठिएहिँ तह जोगमुद्दत्ति ॥ ३ ॥
चत्तारि अंगुलाइं, पुरओ ऊणाइँ जत्थ पच्छिमओ ।
पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ॥ ४ ॥

मुत्तासुत्ती मुद्दा, समा जहिं दोवि गब्भिया हत्था ।
ते पुण निलाडदेसे, लग्गा अन्ने अलग्गत्ति ॥ ५ ॥"

प्रणिधानं यथाशयं यद्यस्य तीव्रसंवेगहेतुः, ततोऽत्र सद्योगलाभः, यथाहुरन्ये–

"तीव्रसंवेगानामासन्नः समाधिः, मृदुमध्याधिमात्रत्वात्, ततोऽपि विशेष इत्यादि" प्रथमगुणस्थानस्थानां तावत्, एवविधमुचितमिति सूरयः ॥

जय वीयराय! जगगुरु! होउ ममं तुहप्पभावओ भयवं? ।
भवनिव्वेओ मग्गाणुसारिया इट्ठफलसिद्धी ॥१॥
लोयविरुद्धच्चाओ, गुरुजणपूया परत्थकरणं च ।
सुहगुरुजोगो तव्वयणसेवणा आभवमखंडा ॥ २ ॥

अस्य व्याख्या–जय वीतराग! जगद्गुरो! भगवतस्त्रिलोकनाथस्याऽऽमन्त्रणमेतत् भावसन्निधानार्थं, भवतु, मम त्वत्प्रभावतो' जायतां मे त्वत्सामर्थ्येन भगवन्! किं तदित्याह–'भवनिर्वेदः' संसारनिर्वेदः, न ह्यतोऽनिर्विण्णो मोक्षाय यतते, अनिर्विणिस्य तत्प्रतिबन्धात्, तत्प्रतिबद्धयत्नस्य च तत्त्वतोऽयत्नत्वात्, निर्जीवक्रियातुल्य एषः, तथा 'मार्ग्गानुसारिता' असद्ग्रहविजयेन तत्त्वानुसारितेत्यर्थः, तथा "इष्टफलसिद्धिः" अविरोधिफलनिष्पत्तिः,

अतो हीच्छाविघाताभावेन सौमनस्यं, तत उपादेयादरः, न त्वथमन्यत्रानिवृत्तौत्सुक्यस्येत्ययमपि विद्वज्जनवादः,

पं..."ततोऽत्रेत्यादि" ततस्तीव्रसंवेगादुक्तरूपाद् "अत्र" प्रणिधाने "सद्योगलाभः" शुद्धसमाधिप्राप्तिः परसमयेनापि समर्थयन्नाह–"यथाहुः" "अन्ये" पतञ्जलिप्रभृतयः, यदाहुस्तदेव दर्शयति—

" तीव्रसंवेगानां " प्रकृष्टमोक्षवाञ्छानां " आसन्नः " आशुभावी " समाधिः " मनः-प्रसादो यत इति गम्यते, अत्रापि तारतम्याभिधानायाह—" मृदुमध्याधिमात्रत्वात् " मृदुत्वात्—सुकुमारतया, मध्यत्वाद्–अजघन्यानुत्कृष्टतया, अधिमात्रत्वात्—प्रकृष्टतया तीव्रसंवेगस्य " ततोऽपि " तीव्रसंवेगादपि किं पुनर्मन्दान्मध्याद्वा संवेगाद्विशेषस्त्रिविधः समाधिरासन्नाऽऽसन्नतराऽऽसन्नतमरूपः, आदिशब्दान्मृदुना मध्येनाधिमात्रेण चोपायेन यमनियमादिना समवायवशात् प्रत्येकं मृदुमध्याधिमात्रभेदभिन्नतया त्रिविधस्य समाधेर्भावात् नवधाऽसौ वाच्य इति ॥

" अतो हीत्यादि " " अतः " इष्टफलसिद्धेः " हि " यस्माद् "इच्छाविघाताभावेन" अभिलाषभङ्गनिवृत्त्या, किमित्याह- " सौमनस्यं " चित्तप्रसादः " ततः " सौमनस्याद् " उपादेयादरः " उपादेये-देवपूजादौ आदरः-प्रयत्नः, अन्यथाऽपि कस्यचिदयं स्यादित्याशङ्क्याह– " नतु " न पुनः " अयम् " उपादेयादरः " अन्यत्र " जीवनोपायादौ "अनिवृत्तौत्सुक्यस्य" अव्यावृत्ताऽऽकाङ्क्षाऽतिरेकस्येति, तदौत्सुक्येन चेतसो विह्वलीकृतत्वात् ॥

टी०...किञ्च पुनः संवेग–मुमुक्षुवृत्तितो भावित–संस्कारितमतिमन्तो विधिना–'सिद्धाणं. पर्यन्तं' कायोत्सर्गं स्तुतिं च कृत्वानन्तरं पादयोः भूमेश्च प्रमार्जनं कृत्वा, उपविश्य पूर्ववत् प्रणिपातदंडक–'नमोत्थुणं' आदि सूत्रमुच्चारयेत् , ततः स्तोत्रस्तवनादिकमुच्चारयेद,

ततः सकलयोगाक्षेपाय–समस्तसमाधेराकर्षणाय, मुक्ताशुक्तिमुद्रया प्रणिधानं कुर्यात्, ( प्रणिधानसूत्रमुच्चारयेत् ) करोति, कुर्वन्ति वा, मुक्ताशुक्त्या, उक्तं च–

(१) 'पञ्चाङ्गो' प्रणिपातः, स्तवपाठो भवति योगमुद्रया । 'वंदण' ( 'वंदणवत्तियाए' इत्यादि कथयित्वा कायोत्सर्गो) जिनमुद्रया, प्रणिधानं ('जयवीयराय' सूत्रं ) मुक्ताशुक्त्या ।

(२) द्वौ जानू द्वौ करौ पंचमाङ्गं भवत्युत्तमाङ्गं तु, सम्यग् सम्प्रणिपातो ज्ञेयः, पञ्चाङ्गप्रणिपातः ।

(३) अन्योऽन्यान्तरितांगुलिकोसाकारै द्वाभ्यां हस्ताभ्यां, उदरोपरिकूर्पर–संस्थितैस्तथा योगमुद्रया ।

(४) चत्वारि, अङ्गुलानि पुरतो, न्यूनानि यत्र पश्चिमतो । द्वौ पादौ रक्षित्वा यत्र कायोत्सर्गो भवति, सा पुन भवति जिनमुद्रा ।

(५) मुक्ताशुक्तिर्मुद्रा, समौ यत्र (याभ्यां) द्वावपि गर्भितौ हस्तौ, तौ पुनर्ललाटदेशे लग्नौ, अन्ये, अलग्नाविति ।

प्रणिधानं यथाशयं यद्यस्य तीव्रसंयोगहेतुः, ततोऽत्र सद्योगलाभः, यथाऽऽहुरन्ये–

'ततोऽत्रेत्यादि' ततस्तीव्रसंवेगादुक्तरूपाद् 'अत्र' प्रणिधाने 'सद्योगलाभः' शुद्धसमाधिप्राप्तिः, परसमयेनापि समर्थयन्नाह–'यथाहुः' 'अन्ये' पतञ्जलिप्रभृतयः, यदाहुस्तदेव

दर्शयति–"तीव्रसंवेगानामासन्नः समाधिः मृदुमध्याऽधिमात्रत्वाद्, ततोऽपि विशेष इत्यादि" प्रथमगुणस्थानस्थानां तावत् एवंविधमुचितमिति सूरयः ॥

प्रणिधानफलं वर्णयति–'यथाशयं प्रणिधानं' प्रणिधानमुच्चतमं कर्तुं, उच्चतमशुभाशयः (चित्तपरिणामः, अध्यवसायः) आवश्यकोऽस्ति, एष शुभाशयो यावान् महोज्ज्वलः महाप्राणवान् तावानेतत्सूत्रे प्रार्थितभवनिर्वेदादीनां प्रकाशमानं प्रणिधानं भविष्यति, प्राणवती, आशंसा, शुभाशयमूलकः संवेगः–मोक्षाऽभिलाषोऽनिवार्यः ततः, एताः प्रार्थनारूपा आशंसाः सत्याः सिध्यन्ति,

अर्थात् संवेगमूलशुभाशयेन प्राकट्यमाप्नुवन्त्येषा, आशंसा, शुभाशयप्रमाणा यावत्युत्कटा, तावती प्रबलबलवती तिष्ठेत्, किञ्च प्रणिधानतीव्रतया तीव्रसंवेगश्चाशंसा–प्रणिधानस्योत्कटतया संवेगोऽपि ( मोक्षाऽभिलाषः ) उत्कटो भवेदर्थान्मोक्षकारणभवनिर्वेदादिविषयकाशंसा तीव्रा जाताऽतो मोक्षाशंसारूपसंवेगोऽपि तीव्रो भवेत्। तीव्रसंवेगतः सद्योग (समाधि)स्य लाभो भवेत्, निर्मलश्चित्तप्रसादः प्रणिधानशुभाशयस्य तीव्रतया=तीव्रो मूत्वोत्कटसंवेगं जनयति, तत्र प्रणिधाने शुद्धसमाधिः, निर्मलश्चित्तप्रसादः, सहजतया प्राप्यते, एष सद्योगः समाधिरस्ति, तीव्रप्रणिधानसमये उत्कटसंवेगेन शक्यो भवति.

**समाधे नवभेदाः–**

| | | | | |
|---|---|---|---|---|
| १. | आसन्नः | शीघ्रभावी | | जघन्यसमाधिः |
| २. | " | " | | मध्यम " |
| ३. | " | " | | उत्कृष्ट " |
| ४. | आसन्नतर–अतिशीघ्रभावी जघन्यसमाधिः | | | |
| ५. | " | " | | मध्यम " |
| ६. | " | " | | उत्कृष्ट " |
| ७. | आसन्नतम–अतिअतिशीघ्रभावी–जघन्यसमाधिः | | | |
| ८. | " | " | " | मध्यम " |
| ९. | " | " | " | उत्कृष्ट " |

अन्ये पतञ्जलिप्रभृतय आहुः–तीव्रसंवेगतां समाधिरासन्नः–शीघ्रभावी भवति, तत्राऽपि मृदु–मध्योत्कृष्ट (तीव्र) संवेगो भवति. ततः तद्द्वाराऽपि जायमानसमाधि विशेषतावान्, तारतम्यभाववानऽर्थात्, शीघ्रभावी–अतिशीघ्रभावी, अतिअतिशीघ्रभावी भवतीति. परन्तु तीव्र-मात्रायाः संवेगेनाऽपि त्रिविधः समाधि र्भवति.

'तत्रेत्यादि'—गतादिपदेन यत्सूचितं मृदु—मध्यम—उत्कटमात्रक—यमनियमादिप्रत्येकोपाय-द्वाराऽपि त्रिविधसमाधिर्मनः प्रसन्नता प्राप्यते, एवं मृदुतः शीघ्रभावी—अधिकशीघ्रभावी—अतिशीघ्रभावी समाधिः, एवं मध्यमतोऽपि—एतत् त्रिविधसमाधिश्च उत्कृष्टतोऽप्येतत् त्रिविध समाधिरेवं रीत्या नवधा समाधि र्भवेत् प्रणिधानं प्रथमगुणस्थानकेऽपि भवति—

प्राचीनाचार्याः कथयन्ति यत् मिथ्यात्वगुणस्थानकनामक—प्रथमगुणस्थानकस्था मन्द-मिथ्यादृष्टिजीवानामपि, एतद्भवनिर्वेदादिविषयकाशंसा—प्रणिधानभवनं युक्तियुक्तम्, अद्यापि यद्यपि बोधिस्तेषां नास्ति, तथाप्येतत् प्रणिधानं पुनः पुनः कुर्वतां बोधिलाभः, अर्थात् बोधि प्राप्तितः पूर्वमप्येतत् प्रणिधानमवश्यं कर्त्तव्यम्, आगमनानन्तरमप्यूद्‌र्ध्वगुणस्थानके गन्तुं तीव्र—तीव्रतरप्रणिधानमावश्यकम् ।

**—जय वीयराय जगद्‌गुरु सूत्रस्य व्याख्या—**

जय वीतराग ! जगद्‌गुरो ! भवतु, मम, त्वत्प्रभावतः । अत्र भगवतस्त्रैलोक्यनाथ-स्यामन्त्रणमेतद् भावसन्निधानार्थम् । अर्थात्—हे भगवन्—त्रिलोकीनाथ ! त्वामामन्त्रयामि. मम भावेषु सन्निधानं—नैकट्यं कुरु कुरु मम भावे भवतां सन्निधानार्थं, आगच्छेति आगच्छेत्या-मन्त्रणं, आमन्त्रणेन भवतां भावाभेदसान्निध्येन प्रभावैक्य—नैकट्यमायाति । मदीयभाव—भवदीय—प्रभावयो र्मिलितयोः कार्यसिद्धिः, अथवा त्वत्सामर्थ्येन प्रार्थनारूपा अष्टौ विषयाः सिद्धयर्थं व्यज्यन्ते भवनिर्वेदाद्याः, भवनिर्वेदः=संसारान्निर्वेदः=भवाद्‌भवान्तरे, कायात्कायान्तरे, रागादि-भावविषयकर्मोदय—हर्षहास्यादिसुखादिभ्यो भिन्नभिन्न—भावाद्यन्तरेषु गमनं—परिभ्रमणं—परिवर्तनं—वर्त्तनं भयंकरनवनवनरकादिगतिषु गमनं, चतसृषु दिक्षु पुनरपि पुनर्भ्रमणं भवः, धर्मस्य बीजं भवनिर्वेदः, धर्मसाधना सर्वाऽपि तदेव कथ्यते, तदन्तर्गतो भवनिर्वेदः स्यात्, विना भव-निर्वेदं, मोक्षार्थायकृतोऽपि यत्नोऽयत्न एव.

तथा मार्गाऽनुसारिता=यथा भवनिर्वेदः प्रार्थनीयः (आशंसनीयः) तथा मार्गानुसारिता=इष्टा प्रार्थनात्वेन, मार्गानुसारिता=असद्‌ग्रहविजयेन तत्त्वानुसारिता=असद्‌ग्रहस्य (कदाग्रहस्य—पूर्वग्रहस्य—व्युद्‌ग्रहस्य) विजयेन, तत्र विजयं प्राप्य, मार्गं प्रति—तत्त्वं प्रति, अनुसरणं—पक्ष-पातः, आत्मनो हृदयस्य वा गतिः—प्रगतिरनुगति र्यावत्, यत्र मार्गो न, तत्त्वं न तत्र, नानुसरणं, नो गति र्वा पक्षपातो—न तत्त्व बुद्धिः,

हि—यतो, भवतोऽनिर्विण्णो—भवाभिनन्दी, मोक्षमुद्दिश्य न यतते, भवमधिकृत्य न यतते, अनिर्विण्णस्य तत्प्रतिबन्धात्, भवनिर्वेदरहिते—भवरसिके भवासक्तिरप्रतिहता भवति, भवरसासव—

पीतप्रसन्नस्य, भवाभिनन्दिनस्तत्त्वतोऽयत्नो निगद्यतेऽर्थात् निर्जीव–क्रियातुल्या एव–जीवरहिता–प्राणशून्या या क्रिया–तस्यास्तुल्या,

तथा 'इष्टफलसिद्धिः' अविरोधिफलनिष्पत्तिः, अतो हीच्छाविघाताभावेन सौमनस्यं, तत उपादेयाऽऽदरः, न त्वयमन्यत्रा–निवृत्तौत्सुक्यस्येत्ययमपि विद्वज्जनवादः,

भवनिर्वेदे तत्त्वागमनं, ततोऽत्र मार्गानुसारिता प्रार्थिता, ततो मानसिकशुभभावद्वारा चित्तप्रसन्नतासिद्ध्यर्थं, इष्टफलसिद्धि र्याचितेति क्रमः,

तथा इष्टफलसिद्धिः=चित्तनिष्ठसुमनस्कता–सुप्रसन्नता, तस्या विरोधिविघातकं यद् यद् तस्यात्यन्ताभाव–प्रयुक्तं यत् फलं सौमनस्यं तस्य निष्पत्तिः, यतो विघातके–( अप्रशस्ते ) इच्छामात्रस्याभावेन सौमनस्यमात्यन्तिकं चित्तप्रसन्नत्वम्, ततः, सौमनस्यादुपादेय–देवपूजादि कर्त्तव्यमात्रेऽत्यन्तादरः–बहुमानभावः,

अधिकृतादन्यत्र स्थले, अनिवृत्त–असमाप्तौत्सुक्यस्य (अखंडितव्याकुलत्वस्य) न सौमनस्यमिति अयं, अपि विद्वज्जनवादः, न पुनः ' अयं ' उपादेयादरः, अन्यत्र जीवनोपायादौ, अनिवृत्तौत्सुक्यस्य, अव्यावृत्ताऽऽकाङ्क्षातिरेकस्येति, तदौत्सुक्येन चेतसो विह्वलीकृतत्वात्,

–अथ लोकविरुद्धत्यागादारभ्याभवमखंडा–पर्यन्तां व्याख्यां तनोति–

**तथा " लोकविरुद्धत्यागः " लोकसंक्लेशकरणेन तदनर्थयोजनया महदेतदपायस्थानं, तथा "गुरुजनपूजा" मातापित्रादिपूजेतिभावः, तथा परार्थकरणं च जीवलोकसारं पौरुषचिह्नमेतत्, सत्येतावति लौकिके सौन्दर्ये लोकोत्तरधर्म्माधिकारोत्यत आह–"शुभगुरुयोगो" विशिष्टचारित्रयुक्ताचार्यसम्बन्धः, अन्यथाऽपान्तराले सदोषपथ्यलाभतुल्योऽयमित्ययोग एव, तथा "तद्वचनसेवना" यथोदितगुरुवचनसेवना, न जातुचिदयमहितमाहेति।**

**न सकृत् नाप्यल्पकालमित्याह–"आभवमखण्डा" आजन्म आसंसारं वा सम्पूर्णा भवतु ममेति, एतावत्कल्याणावाप्तौ द्रागेव नियमादपवर्गः, फलति चैतदचिन्त्यचिन्तामणेर्भगवतः प्रभावेनेति गाथाद्वयार्थः ॥**

टी०....तथा पूर्ववत् (४) "लोकविरुद्धत्यागः" लोकसंक्लेशकरणेन तदनर्थयोजनया महदेतदपायस्थानं,

अर्थात्, लोकेषु—सर्वत्र लोकेषु तादृशाकृत्यकरणेन चित्ते संक्लेश (कषायादि) जननद्वारा, लोकानां, अनर्थजाले योजनेन, महदेतन्नरकाद्यपायस्थानं, महाऽनिष्टानुबन्धकारणेन, लोकविरुद्धं यद्यत्तत् तत्सर्वं हेयमेव, 'यद्यपि शुद्धं लोकविरुद्धं नादरणीयं नाचरणीयं' इति नीतिवाक्यं स्मरणीयम्।

तथा, एवं पूर्ववत् (५) " गुरुजनपूजा " मातापित्रादिपूजेतिभावः, अर्थाद्, उपकारि—गुणवद्—गुरु—पूज्यपुरुषाणां विनय—सेवा—भक्ति—आदिः, गुरुजनपूजया कृतज्ञतागुणस्य ख्यापनं भवति, गुणानुरागो वर्धते, कल्याणवृद्धि र्भवति.

'श्रेयः सम्प्रतिबध्नाति पूज्यपूजाव्यतिक्रमः' इति वाक्यं स्मरणीयम् ।

तथा—एवं—पूर्ववत्, "परार्थकरणं च" जीवलोकसारं पौरुषचिह्नमेतत्.

अर्थात्—स्वभिन्नपरस्य योऽर्थः—प्रयोजनं—कार्यं तस्य करणं=परहितकरणं, न तु स्वार्थकरणं, यथाशक्ति, परस्य प्रयोजनं—हितं कार्यं, परस्मै, उपयोगी भवेत्, सहायको भवेत्, मनसा—वचसा धनेन च स्वमूल्यवती शक्तिः परोपकारे प्रयोक्तव्या, उत्तमः परार्थकरणे परौदार्यं परम-स्वार्थत्यागो भवतीति, परार्थकरणं पौरुषचिह्नं, परोपकरणे पौरुषं—स्वशक्ति व्यापारयति स पुरुषः, तेन मैत्री—भावना सिद्ध्यति, परहितचिन्तनकरणादौ परमपौरुषोपयोगस्तु तीर्थकृन्नाम जनयति, विश्वोपकारी जगदुद्धारको भवति, जीवलोके, परोपकरणं सारं, "परस्परोपग्रहो जीवानां" इति सूत्रं चिन्तनीयमत्र.

(६) सत्येतावति लौकिक-सौन्दर्ये लोकोत्तरधर्म्माधिकारीत्यत आह " शुभगुरुयोगो " अर्थात्, लौकिकसौन्दर्यं तत् यत्, लोकदृष्ट्या—जनसामान्यदृष्ट्या, असर्वज्ञकथितधर्माणां दृष्ट्या सुन्दरं स्यात्, आभवनिर्वेदात् परार्थकरणं यावद् लौकिकसौन्दर्यं, लोकोत्तरसौन्दर्यं, लोकोत्तर-सर्वज्ञकथितधर्म एव लोकोत्तरधर्मस्याधिकारी भवितुं पूर्वोक्तलौकिकसौन्दर्यं, आवश्यकी, पात्रता-प्राप्तिर्भवति.

यत्र जीवे भवनिर्वेदस्थाने विषयलाम्पट्यं,

तत्त्वानुसारितास्थाने तत्त्वारुचिः, अतत्त्वरुचिः, लोकविरुद्धत्यागस्थाने लोक—संक्लेश-कारिता गुरुजनं प्रति, अविनयादिर्यदि दृश्यते तदा तस्य च, एवं कदाचिद् बाह्यतो लोको-त्तरधर्मसाधकस्याऽपि तस्य हृदये, आत्मनि च लोकोत्तर—शुभपरिणामो नोत्थितोऽनुमीयते,

अर्थात्, शुभगुरुयोगः—विशिष्टचारित्रयुक्ताचार्यसम्बन्धः, अन्यथाऽपान्तराले सदोषपथ्य-लाभतुल्योऽयमित्ययोग एव.

(७)शुभगुरुयोग:=एषा सप्तमी, आशंसा, शुभगुरुयोगस्य कथ्यते, लौकिकसौन्दर्य-प्राप्त्यनन्तरं लोकोत्तरधर्माधिकार आयाति, एतदपेक्षया पूर्वोक्तपरार्थकरणपर्यन्तगुणान् प्राप्य, ततः प्रथमं कार्यं शुभगुरुयोगनामकं साध्यं, अन्यथा यद्येतद् गुणरूपलौकिकसौन्दर्य-प्राप्तेरपेक्षा न भवेदेवं शुभगुरुयोगः साध्यो भवेत्तदा, सदोषजठरवान् पौष्टिकाहारं पथ्यं भुञ्जीत, तथा वस्तुतो गुरु-योगो नास्त्येव. एतादृशाय पथ्यं पथ्यं न, जठरे मलपुञ्जः समुदितश्चेत्, पाचकरसा दूषिता-श्चेत्तदा मिष्टान्नपक्वान्नादिकं भक्षयेत् तदा न पुष्टि भवति, तथैव गुरुजनपूजा, परार्थकरणं, लोकविरुद्धत्यागादि लौकिकसौन्दर्यापेक्षा, न परन्तु शुभगुरुयोगं कर्त्तुं प्रवर्त्तेत, यदा सामान्य-गुरुजनमातापित्रादिकस्य विनयादिकं नहि कुर्वन्, तदा महाशुभगुरुसत्कं योगं विनयादिकं किं सत्यापयेत् ? यस्य सामान्योपकारो नास्ति, परस्मै किं करिष्यति, तदा महागुरोः किं करिष्यति,

तथा "तद्वचनसेवना" यथोदितगुरुवचनसेवना, न जातुचिदयमहितमाहेति, तथाऽष्टमी 'आशंसा,' (८) तद्वचनसेवना भवतु, पूर्वोक्त-विशिष्टचारित्रयुक्ताचार्यरूप-गुरुवचनसेवना, कदाचिदपि, अयं गुरुरहितं न कथयतीति.

न सकृत् नाप्यल्पकालमित्याह—"आभवमखण्डा" आजन्म-आसंसारं वा सम्पूर्णा भवतु ममेति, 'एतावत् कल्याणाऽवाप्तौ द्रागेव नियमादपवर्गः,' तथा च भवनिर्वेद-मार्गाऽनुसारिता-इष्टफलसिद्धि-लोकविरुद्धत्याग-गुरुजनपूजा-परार्थकरण-शुभगुरुयोग-आभवं-अखंडगुरुवचनसेवारूपकल्याणस्य (शिवमंगलमालायाः प्राप्तौ सत्यां शीघ्रातिशीघ्रं, अष्टभवान्तः) एकान्तेन मोक्षो जायते, एते च भवनिर्वेदाद्या अष्टौ गुणाः, कल्याणरूपगुणाः, अचिन्त्य-चिन्तामणिरूपवीतराग-भगवत्-त्रिलोकीनाथस्य प्रभाव-प्रसाद-सामर्थ्यतः फलन्ति, प्रकटा भवन्ति, प्राप्यन्ते इति गाथाद्वयार्थः ।

**—अथ शास्त्रकारः प्रणिधानविषयिणीं चर्चां सुन्दरशैल्या विस्तारयति—**

**सकलशुभानुष्ठाननिबन्धनमेतत्, अपवर्गफलमेव अनिदानं, तल्लक्षणायोगादिति दर्शितं, असङ्गतासक्तचित्तव्यापार एष महान्, न च प्रणिधानादृते प्रवृत्त्यादयः, एवं कर्त्तव्यमेवैतदिति, प्रणिधान-प्रवृत्तिविघ्नजयफलविनियोगानामुत्तरोत्तरभावात्, आशयानुरूपः कर्म्मबन्ध इति, न खलु तद्विपाकतोऽस्यासिद्धिः स्यात् युक्त्या-गमसिद्धमेतत्, अन्यथा प्रवृत्त्याद्ययोगः, उपयोगाभावादिति,**

नानधिकारिणामिदं, अधिकारिणश्चास्य य एव वन्दनाया उक्ताः, तद्यथा—एतद्बहुमानिनो विधिपरा उचितवृत्तयश्चोक्तलिङ्गा एव, प्रणिधानलिङ्गं तु विशुद्धभावनादि, यथोक्तं—"विशुद्धभावनासारं, तदर्थार्प्पितमानसम् । यथाशक्तिक्रियालिङ्गं, प्रणिधानं मुनिर्जगौ ॥ १ ॥" इति, स्वल्पकालमपि शोभनमिदं, सकलकल्याणाक्षेपात्,

अतिगम्भीरोदाररूपमेतत्, अतो हि प्रशस्तभावलाभाद्विशिष्टक्षयोपशमादिभावतः प्रधानधर्म्मकायादिलाभः, तत्रास्य सकलोपाधिविशुद्धिः, दीर्घकालनैरन्तर्यसत्कारासेवनेन श्रद्धावीर्यस्मृतिसमाधिप्रज्ञावृद्ध्या, न हि समग्रसुखभाक् तदङ्गहीनो भवति, तद्वैकल्येऽपि तद्भावेऽहेतुकत्वप्रसङ्गात्, न चैतदेवं भवतीति योगाचार्यदर्शनम्, सेयं भवजलधिनौः प्रशान्तवाहितेति ।

परैरपि गीयते—अयमज्ञातज्ञापनफलः सदुपदेशो हृदयानन्दकारी परिणमत्येकान्तेन, ज्ञाते त्वखण्डनमेव भावतः, अनाभोगतो भोगतोऽपि मार्ग्गगमनमेव सदन्धन्यायेनेत्यध्यात्मचिन्तकाः ॥

पं०..."स्वल्पेत्यादि" स्वल्पकालमपि–परिमितमपि कालं शोभनम्, उत्तमार्थहेतुतया "इदं" प्रणिधानं, कुत इत्याह—"सकलकल्याणाक्षेपात्" निखिलाभ्युदयनिःश्रेयसावन्ध्यनिबन्धनत्वाद्, इदमेव भावयति—

"अतिगम्भीरोदारमिति" प्राग्वत्, "एतत्," प्रणिधानं, कुत इत्याह—"अतः" प्रणिधानाद्, "हिः" यस्मात् "प्रशस्तभावलाभात्" रागद्वेषमोहैरच्छुप्तप्रणिधानप्राप्तेः, किमित्याह—विशिष्टस्य—मिथ्यात्वमोहनीयादेः शुद्धमनुजगतिसुसंस्थानसुसंहननादेश्च कर्म्मणो यथायोगं क्षयोपशमस्य—एकदेशक्षयलक्षणस्यादिशब्दाद्बन्धस्य भावतः—सत्तायाः प्रेत्यप्रधानधर्म्मकायादिलाभप्रधानस्य दृढसंहननशुभसंस्थानतया सर्वोत्कृष्टस्य धर्म्मकायस्य—धर्म्माराधनार्हशरीरस्यादिशब्दादुज्ज्वलकुलजात्यायुर्देशकल्याणमित्रादेर्लाभः—प्राप्तिः, ततः किमित्याह—"तत्र" धर्म्मकायादिलाभे "अस्य" प्रणिधानकर्त्तुः "सकलोपाधिविशुद्धिः" प्रलीननिखिलकलङ्कस्थानतया सर्वविशेषशुद्धिः,

कथमित्याह-दीर्घकालं-पूर्व्वलक्षादिप्रमाणतया नैरन्तर्येण-निरन्तराग्रसातत्येन सत्कारस्य-जिनपूजाया आसेवनम्-अनुभवस्तेन श्रद्धा-शुद्धमार्गरुचिः, वीर्यम्-अनुष्ठानशक्तिःस्मृतिः अनुभूतार्थविषया ज्ञानवृत्तिः, समाधिः-चित्तस्वास्थ्यं, प्रज्ञा-बहुबहुविधादिगहनविषयाऽवबोधशक्ति,स्तासां वृद्धया-प्रकर्षेण, अनासेवितसत्कारस्य हि जन्तोरदृष्टकल्याणतया तदाकाङ्क्षाऽसम्भवेन चेतसोऽप्रसन्नत्वात् श्रद्धादीनां तथाविधवृद्धयभाव इति, इदमेव व्यतिरेकतः प्रतिवस्तूपन्यासेनाह- "न" नैव "हिः" यस्मात् "समग्रसुखभाक्" सम्पूर्णवैषयिकशर्मसेवकः "तदङ्गहीनः" तस्य-समग्रसुखस्याङ्गानि-हेतवो वयोवैचक्षण्यदाक्षिण्यविभवौदार्यसौभाग्यादयस्तैर्हीनो-रहितो भवति, विपक्षे बाधकमाह-" तद्वैकल्येऽपि " तदङ्गाभावेऽपि "तद्भावे" समग्रसुखभावे " अहेतुकत्वप्रसङ्गात " निर्हेतुकत्वप्राप्तेरिति " सेय "मिति प्रणिधानलक्षणा " प्रशान्तवाहिते "ति प्रशान्तो-रागादिक्षयक्षयोपशमवान् वहति-वर्त्तते तच्छीलश्च यः स तथा तद्भावस्तत्ता ।

टी०....अर्थाद् भवनिर्वेदादिगुणाष्टककल्याणविषयकप्रार्थनारूपं प्रणिधानं, सकल-शुभानुष्ठानमूलकारणमेतत्, मोक्षरूपफलकमेव ( नान्यफलकम् ) निदानरहितं, यतः, भौतिक-भोग्योपभोग्यपदार्थविषयकप्रार्थना आशंसा-आसक्ति-अभिष्वंगरूप-तल्लक्षणस्याभावो वर्त्तते, मोक्षकारणप्रणिधानत्वेनासङ्गता (रागद्वेषमोहरागाभावरूपाऽसंगता-वीतरागतादौ सक्त-लग्नचित्त-व्यापारः संकल्पव्यापारः एष महानेव.

"न च प्रणिधानादृते प्रवृत्त्यादयः, एवं कर्त्तव्यमेवैतदिति"

अर्थात् प्रणिधानं विना प्रवृत्त्यादयो न भवन्ति, एवं प्रणिधानस्य सत्तायामेव प्रवृत्त्यादीनां सत्ताऽस्तीति प्रणिधानमेवैतत् कर्त्तव्यमेव. यतः प्रणिधानमस्त्यतः (प्रणिधानं=स्वतो हीनगुणवति, उपरि, द्वेषं विना तदुपर्युपकारकरणबुद्धिसहितं वर्त्तमानधर्मस्थानस्य कर्त्तव्यत्वे चित्तोपयोगो रक्षणीयः)

प्रवृत्तिरस्ति, ( प्रवृत्तिः-वर्त्तमानधर्मस्थानमुद्दिश्य तस्योपायसहितक्रियायां-विधिशुद्धश्च शीघ्रक्रियासमाप्तिं कर्त्तुमिच्छारूपमुत्सुकत्वरहितो यस्तीव्रप्रयत्नः साऽत्र प्रवृत्तिः) अतो विघ्नजयोऽस्ति.

( विघ्नजयः=धर्मक्रियायामन्तरायनिवारकः परिणामः, स त्रिधा, (१) बुभुक्षा-तृषाऽऽदिपरीषहाः (२) शारीरा रोगाः (३) मनसो भ्रान्तिः, एते त्रयः, धार्मिकप्रवृत्तौ विघ्नरूपाश्च तेषां येन परिणामेन जयो भवति, स विघ्नजयः, साधूनां मोक्षमार्गे प्रवर्त्तमानानां क्षुत्तृषाऽऽदिपरीषहाः प्राप्ताः स्युः, तेषां तितिक्षाभावनया सहनं प्रथमो विघ्नजयः,

साधूनां रोगाः स्युस्तदा विचारयेत्, मदीयस्वरूपबाधका न सन्ति, परन्तु देहमात्रस्य बाधका एवैवं भावनया सम्यग् धर्मस्याराधने समर्थत्वं भवेदिति, मध्यमविघ्नजयः,

मोक्षमार्गे प्रवर्त्तमानानां साधूनां मिथ्यात्वादितो मनोविभ्रमो यदि स्यात्तदा मिथ्यात्वस्य प्रतिपक्षभावनया मनोविभ्रमं दूरे कुर्यादित्युत्तमो विघ्नजयः, )

यदि विघ्नजयो भवेत्तदा फलरूपसिद्धिः=फलरूपफलसिद्धिस्तु, अहिंसादि–तात्त्विक–धार्मिक–भूमिकायाः प्राप्ति र्यतोऽधिकगुणवतः प्रति बहुमानादिः, मध्यमगुणवतः प्रति, उपकारस्य भावना, हीनगुणवतश्च प्रति, निर्गुणान् प्रति दयाऽऽदेः प्रवृत्तिर्भवेत्.

यदि फलरूपसिद्धिरस्ति, तदा विनियोगः=अहिंसादि–धार्मिकभूमिका प्राप्ता, तामुपायद्वाराऽन्यान् प्रापयेदिति विनियोगः । इत्येवं पूर्वं पूर्वं कारणं चोत्तरोत्तरं कार्यं ज्ञेयं । आशयाऽनुरूपः कर्मबन्धः” यादृशो भावो वर्त्तते तादृशं फलं 'परिणामे बन्धः' इति नियमोऽस्ति.

अर्थात्, आशयरूपप्रणिधानस्य विपाक–मोक्षरूपफलात् किं कर्मबन्धस्याऽसिद्धि र्भविष्यतीति शङ्का न कार्या. यतो 'मन एव मनुष्याणां कारणं बन्धमोक्षयो'रिति नियमेन कर्मबन्धफलजनकाशयरूपं मनो भिन्नं (पृथग्) यदा मोक्षरूपफलजनकाशय–विशेष–प्रणिधानरूपं मनो भिन्नं (पृथग्) प्रणिधानरूपाशय–विशेषस्य, विपाक–मोक्षफलात्कर्मबन्धस्यासिद्धि र्न ।

किञ्चैष कर्मबन्धः, युक्त्या चागमेन सिद्धः, अन्यथा=कर्मबन्धफलजनकाशयस्य केवलमान्यतायां, मोक्षफलजनकप्रणिधानरूपाशयस्य मन्तव्यत्वाभावे तु, उपयोगाभाव–प्रयुक्त–प्रवृत्त्यादेरभाव इति प्रवृत्त्यादिजनकप्रणिधानमिदं, अनधिकारिणां न–परन्तु–अधिकारिणामेव.

अस्य प्रणिधानस्याधिकारिणश्च ये वन्दनाया (चैत्यवन्दनाया) ये–उक्ताः, तद्यथा–एतद्बहुमानिनो विधिपरा उचितवृत्तयश्चोक्तलिङ्गा एव–ये चैत्यवन्दनस्याधिकारिणः पूर्वोक्तास्त एव प्रणिधानस्य ज्ञेयाः,

(१) प्रणिधानबहुमानिनः=प्रणिधानरूप–आवश्यकसाधनाया अंगस्योपरि–बहु–अत्यन्तादरभावो भवेद्, कीदृशं वर्त्तते येन प्रवृत्तिरपि फलवती, यदेतत् करोति भाग्यवान् तस्य कियन्महत्तमं पुण्यमुत्तमं प्रशंसापात्रं भवति, मयैतत् स्पृहणीयं, इत्येतादृशी मानसिकस्थिति, र्बहुमानं एतादृशबहुमानाऽभावे नास्त्यधिकारिता.

(२) प्रणिधानं प्रति विधितत्परता=सत्यपि बहुमाने कथितविधेरपेक्षा न भवेत्तदा विधिशून्यत्वेन क्रियमाणप्रणिधानं निरर्थकमेव.

(३) उचितवृत्तिः=स्वकुलोचितजीवनस्य वृत्तिः ।

प्रणिधानलिङ्गं तु विशुद्धभावनादि यथोक्तं—

“ विशुद्धभावनासारं, तदर्थाऽर्पितमानसम् ।
यथाशक्ति क्रियालिङ्गं, प्रणिधानं मुनिर्जगौ ॥ ”

अर्थात्–प्रणिधानमपि, एकप्रकारकं मनश्चित्तपरिणामोऽस्ति.

(१) यत्प्रणिधानं विशुद्धभावनया बलवद् भवति.

(२) यच्चित्तप्रणिधानस्य विषये–अर्थे समर्पितमानसवत् प्रणिधानं भवति.

(३) यथाशक्ति बाह्यानुष्ठानरूपक्रियाया लिङ्गं ज्ञापकं तत्प्रणिधानं.

अर्थात् तत्तद्विषयस्य बाह्यक्रियासहितं च निर्मलभावोतप्रोतं, एकाग्रं-तन्मयं मनः प्रणिधानं कथ्यते। इति.

"स्वल्पेत्यादि" स्वल्पकालमपि=परिमितमपि कालं शोभनम्, उत्तमार्थहेतुतया 'इदं' प्रणिधानं, कुत इत्याह–"सकलकल्याणाक्षेपात्" निखिलाभ्युदयनिःश्रेयसाऽवन्ध्यनिबन्धनत्वाद्,

एतत् प्रणिधानं विशुद्धभावनायां च शुभविषये चित्तस्यैकाग्रतावत्त्वात् प्रशस्तपरिणामवत्त्वेन शुद्धशुभपरिणतिरपि स्वल्पकालीनाऽपि जाग्रद्दशां प्राप्ता तदा पापक्षयः, पुण्यवृद्धिः, संस्कारवृद्धि र्जायते, इदं सकलाभ्युदयस्य (ऐहिकसमृद्धेः) तथा निःश्रेयस–मोक्षस्य, अवन्ध्य–असाधारणकारणं प्रणिधानमेव.

प्रणिधानविषयकभावना=अतिगम्भीरम्–अनन्तकालतो रागादिपरवशं चित्तं बहिर्मार्गे भ्रमद्, अशुभ–विषयानुगतं विनिवारयति, प्रणिधानं, विशुद्धभावनया देदीप्यमानं मनःसमर्पयति, शुभविषये प्रणिधानं विशालतात्त्विकदृष्ट्या निरीक्षकं मनः करोति प्रणिधानं,

उदारम्=शुभातिशुभविषयविषयकं गम्भीरविशालस्वरूपं, गृह्णत् प्रणिधानं गम्भीरमुदारं कथ्यते. तस्मात्,

प्रणिधानतो लाभादिः=अस्मात्–प्रणिधानाद्, प्रशस्तभावलाभो, राग–द्वेषमोहैरस्पृष्टप्रणिधान (एकाग्रचित्त)स्य प्राप्ति र्भवति, को लाभः? प्रणिधानाद् विशिष्टः–

(१) मिथ्यात्वमोहनीयादेः कर्मणो विशिष्टक्षयोपशमः.

(२) शुद्धमनुष्यगतिसंस्थानसुसंहननादिरूपस्य कर्मणो यथायोगं, एकदेशक्षयलक्षण–क्षयोपशमस्य लाभः.

(३) आदिशब्दाद्–बन्धस्य भावतः–सत्तायाः परलोक–प्रधानधर्म्मकायादिलाभप्रधानस्य दृढसंहनन–शुभसंस्थानतया, सर्वोत्कृष्टस्य, धर्मकायस्य=धर्माराधनार्हशरीरस्य, आदिशब्दात्–उज्ज्वलकुलजात्यायुर्देशकल्याणमित्रादेर्लाभो भवति.

(४) 'तत्र' धर्मकायादिलाभे 'अस्य' प्रणिधानकर्त्तुः 'सकलोपाधिविशुद्धिः'=प्रलीन (विनष्ट) निखिलकलङ्कस्थानतया सर्वविशेष शुद्धिर्भवति, कथमिति चेदुच्यते दीर्घकालं पूर्वलक्षादिप्रमाणतया, नैरन्तर्येण–निरन्तराय–सातत्येन, सत्कारस्य–जिनपूजासेवनम्, अनुभवः,

तेन श्रद्धा—शुद्धमार्गरुचिः, वीर्यम्—अनुष्ठानशक्तिः, स्मृतिः—अनुभूतार्थविषया ज्ञानवृत्तिः, समाधिः—चित्तस्य स्वास्थ्यं, प्रज्ञा—बहुबहुविधादिगहनविषयाऽवबोध—शक्तिस्तासां वृद्धया—प्रकर्षेण, अनासेवित—सत्कारस्य हि जन्तोरदृष्टकल्याणतया तदाकाङ्क्षाऽसम्भवेन, चेतसोऽप्रसन्नत्वात् श्रद्धादीनां तथाविधवृद्ध्यभाव इति,

(१) प्रणिधानम्=दयादिभावयुक्त—विशुद्धभावनाबलवद्—यत्तत् सुन्दरविषये समर्पित—मानसरूपं प्रणिधानं सदा जीवज्जाग्रद्भाव्यम् ।

(२) दीर्घकालसेवनम्=सा सा साधना, जिनपूजाऽहिंसादानादि—क्षमादि—विषयिणी साधना, दीर्घकालं साध्यमाना साधना, संस्कारवर्धिनी तथा साधना, सहज—निर्दोषा देदीप्यमाना भवितुं सामर्थ्यं समायाति.

(३) निरन्तरासेवनम्=सा साधना, सततधाराबद्धा नियतरूपेण क्रियमाणा भवेत्, अनियतत्वाभाववती कार्या,

(४) सत्कारयुक्तासेवनम्=दीर्घकालीनां, धाराबद्धां साधनां प्रति हार्दिकोच्चार—सन्मान—सद्भावबहुमानवता भाव्यम् .

साधनासमये—श्रद्धा—वीर्य—स्मृति—समाधि—प्रज्ञावृद्धिपञ्चकं निरीक्षणीयम्,

(५) श्रद्धावृद्धिः=साधनायामेतद् दर्शनीयम्, यं प्रणिधानविशिष्टशुद्धमोक्षमार्गं प्रति श्रद्धा—रुचिः—प्रीतिवर्धमाना कर्त्तव्या, ततोऽग्रत उच्चोच्चतरसाधना भविष्यति,

(६) वीर्यवृद्धिः=वर्धमानया श्रद्धया सहैव साधनाविषयकवीर्य—शक्तिविषयकविकासः कार्यः, क्रमेणाभ्यास—वर्धनेन, क्रियागतखेदोद्वेगादिदोषाणां त्यागेन, वीर्यशक्तया वर्धमानया, पराकाष्ठागतसामर्थ्ययोगश्चासङ्गानुष्ठानं प्राप्यते, तत उत्तरोत्तरतः साधनायां वीर्यवृद्धिराव-श्यकीति मन्तव्या,

(७) स्मृतिवृद्धिः=मार्गस्य, तत्त्वस्य, पूर्वपूर्वसाधितस्य च स्मरणं वर्धमानं भवेत्, स्मृतिस्तेजस्विनी कार्या. इन्द्रियविषयाणां विक्षेपाः, विस्मरणानि, मानसिकी निर्बलता दूरतः क्षेप्या. वर्धमानस्मरणेन संस्करणं प्रगाढं भवति.

(८) समाधिवृद्धिः=चित्तस्वास्थ्यस्य वृद्धिः, वर्धमानेन चित्तस्वास्थ्येन, साधनायामुत्साहरंगो वर्धतेऽतोऽसदाचाराःप्रतिबद्धा भवन्ति, साधनायाःकुशलत्वेनाग्रे महासमाधिः 'अपूर्वकरणं' प्राप्यते.

(९) प्रज्ञावृद्धिः=श्रद्धादिविकासेन सह साधनायास्तत्त्वस्य च सूक्ष्मविशेषतां ज्ञातुं बुद्धिशक्तिरपि वर्धमाना प्रेक्षणीयेति, अर्थात्तत्त्वादिविशेषं बहुरूपेण बहुविधरूपेण, शीघ्राऽ-

संदिग्धसहजस्थिररूपतया संज्ञातुं बुद्धिशक्ति वर्धमानां कर्तुमावश्यकत्वम्, एषा, चित्तस्य शोधनप्रकृत्या, तन्मयतया च गम्भीरावगाहनेन साध्या, एतादृश्याः प्रज्ञाया उत्तरोत्तरविकासेन कैवल्यसाधकसामर्थ्ययोगासज्ञानुष्ठानविषयकप्रज्ञा—पर्यन्तं गम्यते.

दीर्घकालं निरन्तरसत्कारासेवने प्रणिधानद्वारा श्रद्धा—वीर्यादि वृद्धिभवनेन सकलोपाधीनां ( विशेषणानां ) शुद्धिर्भवतीत्येतद्वस्तु, व्यतिरेकेणैवं कथ्यते. यत्रैतद् दीर्घकालनिरंतराद्यासेवनं नास्ति, तत्र सर्वोपाधिवृद्धि र्न भवति, अस्य दृष्टांते एवं दर्श्यते, समग्रसुखभाग्, तदंग (तस्य सुखस्य) साधनभूतैरङ्गै र्हीनो—रहितो न भवेत्, यतः साधनानां न्यूनतयाऽपि कार्यसिद्धौ, ( तद्भावे ) अहेतुकत्व—प्रसङ्ग आयाति, न चैतदेवं भवतीति योगाचार्य दर्शनं ( न्यायदर्शनं ) "सेयं भवजलधिनौः प्रशान्तवाहितेति परैरपि गीयते" अर्थात् संसारसागरं तरीतुं नौकासमानमेतत् प्रणिधानम् 'प्रशान्तवाहिते' ति गीयते.

"प्रशान्तवाहितावृत्तेः, संस्कारात्स्यान्निरोधतः ।
पादुर्भावतिरोभावौ तद्वत्युत्थानजयोरयम् ।।"

अध्यात्मचिन्तका एवं कथयन्ति, अस्य—प्रणिधानस्य सदुपदेशः, अज्ञात—(तत्त्वमार्ग)स्य ज्ञापनरूपफलवान् भवति, एकान्तेन हृदयानन्दकारी परिणमति, परंतु तत्त्वमार्गे ज्ञाते सति तु प्रणिधानभावोऽखण्डितो भवति, अनाभोगतोऽपि (ज्ञानाभावेनाऽपि) मार्गगमनमेव 'सदन्धन्यायेन' यथा कश्चिद् सावधानः सन्, अन्ध—पुरुषः, मार्गदर्शनाऽभावेऽपि स्वभावतश्च सद्भाग्येन मार्गे गच्छति—द्रव्यतः स्खलितत्वेऽपि भावतोऽस्खलितमार्गे गमनमेव.

(इदमेव व्यतिरेकतः प्रतिवस्तूपन्यासेनाह—'न' नैव 'हिः' यस्मात् 'समग्रसुखभाक्' सम्पूर्ण—वैषयिकशर्मसेवकः 'तदङ्गहीनः' तस्य समग्रसुखस्याऽङ्गानि—हेतवो वयोवैचक्षण्यदाक्षिण्यविभवौदार्यसौभाग्यादयस्तै र्हीनो—रहितो भवति, विपक्षे बाधकमाह 'तद्वैकल्येऽपि' तदङ्गाभावेऽपि 'तदभावे' समग्रसुखभावे 'अहेतुकत्वप्रसङ्गात्' निर्हेतुकत्वप्राप्तेरिति 'सेय'मिति, प्रणिधानलक्षणा 'प्रशान्तवाहितेति' प्रशान्तो—रागादिक्षयक्षयोपशमवान् वहति—वर्त्तते तच्छीलश्च यः स तथा तद्भावस्तत्ता )

अथ शास्त्रकारः प्रणिधानपर्यन्तं चैत्यवंदनं ततः, आचार्यादिवंदनां, एवं दर्शयित्वा पुरुषो यथोचितं कर्त्तव्यं करोति. एवं अपि प्रदर्श्य ततः एतद्वस्तु सिद्ध्यर्थं सद्बोधविषयक—प्रवाहं वाहयित्वा चैत्यवंदनव्याख्यानस्य माहात्म्यं कथयित्वा ग्रंथस्य विरहशब्देन समाप्तिं करोति.

–अथ शास्त्रकारः तदेवंविध–शुभफलप्रणिधानपर्यन्तं ( यावत् ) चैत्यवन्दनं, अनुष्ठानं सञ्जातं, तदन्वाचार्यादीनभिवन्द्य (एको वाऽनेके साधवः) कुग्रह (कदाग्रह)स्य विरहेण (अत्यन्ताभावेन) यथोचितं तं करोति, (कुर्वन्ति वा)–

तदेवं–त्रिधशुभफलप्रणिधानपर्यन्तं चैत्यवन्दनं, तदन्वाचार्यादीनभिवन्द्य यथोचितं करोति कुर्वन्ति वा कुग्रहविरहेण। एतत्सिद्धये तु यतितव्यमादिकर्म्मणि परिहर्त्तव्योऽकल्याणमित्रयोगः सेवितव्यानि कल्याणमित्राणि न लङ्घनीयोचितस्थितिः, अपेक्षितव्यो लोकमार्ग्गः, माननीया गुरुसंहतिः, भवितव्यमेततन्त्रेण प्रवर्त्तितव्यं, दानादौ कर्त्तव्योदारपूजा, भगवतां निरूपणीयः साधुविशेषः, श्रोतव्यं विधिना धर्मशास्त्रं, भावनीयं महायत्नेन, प्रवर्त्तितव्यं विधानतः, अवलम्बनीयं धैर्यं, पर्यालोचनीया आयतिः, अवलोकनीयो मृत्युः, भवितव्यं परलोकप्रधानेन, सेवितव्यो गुरुजनः, कर्त्तव्यं योगपटदर्शनं, स्थापनीयं तद्रूपादि चेतसि, निरूपयितव्या धारणा, परिहर्त्तव्यो विक्षेपमार्ग्गः, यतितव्यं योगसिद्धौ, कारयितव्या भगवत्प्रतिमाः, लेखनीयं भुवनेश्वरवचनं, कर्त्तव्यो मङ्गलजापः, प्रतिपत्तव्यं चतुः–शरणं, गर्हितव्यानि दुष्कृतानि, अनुमोदनीयं कुशलं, पूजनीया मन्त्रदेवताः, श्रोतव्यानि सच्चेष्टितानि, भावनीयमौदार्यं, वर्त्तितव्यमुत्तमज्ञातेन, एवंभूतस्येह प्रवृत्तिः सा सर्वैव साध्वी, मार्ग्गानुसारी ह्ययं नियमादपुनर्बन्धकादिः, तदन्यस्यैवंभूतगुणसम्पदोऽभावात् , अत आदित आरभ्यास्य प्रवृत्तिः सत्प्रवृत्तिरेव नैगमानुसारेण चित्रापि प्रस्थकप्रवृत्तिकल्पा, तदेतदधिकृत्याहुः–"कुठारादिप्रवृत्तिरपि रूपनिर्म्माणप्रवृत्तिरेव" तद्वदादिधार्मिकस्य धर्म्मे कात्स्न्र्येन तद्गामिनी न तद्बाधिनीति हार्दः ।

तत्त्वाविरोधकं हृदयमस्य, ततः समन्तभद्रता, तन्मूलत्वात्सकलचेष्टितस्य, एवमतोऽपि विनिर्गततत्तद्दर्शनानुसारतः सर्वमिह योज्यं,

सुप्तमण्डितप्रबोधदर्शनादि, न ह्येवं प्रवर्त्तमानो नेष्टसाधक इति, भग्नोऽप्येतद्यत्नलिङ्गोऽपुनर्बन्धक इति तं प्रत्युपदेशसाफल्यं नानिवृत्ताधिकारायां प्रकृतावेवंभूत इति कापिलाः, न अनवाप्तभवविपाक इति च सौगताः, अपुनर्बन्धकास्त्वेवंभूता इति जैनाः, तज्ज्ञोतव्यमेतदादरेण, परिभावनीयं सूक्ष्मबुद्ध्या, शुष्केक्षुचर्वणप्रायमविज्ञातार्थमध्ययनं, रसतुल्यो ह्यत्रार्थः, स खलु प्रीणयत्यन्तरात्मानं, ततः संवेगादिसिद्धेः, अन्यथात्वदर्शनात्, तदर्थं चैष प्रयास इति न प्रारब्धप्रतिकूलमासेवनीयं. प्रकृतिसुन्दरं चिन्तामणिरत्नकल्पं संवेगकार्यं चैतदिति महाकल्याणविरोधि न चिन्तनीयं, चिन्तामणिरत्नेऽपि सम्यग्ज्ञातगुण एव श्रद्धाद्यतिशयभावतोऽविधिविरहेण महाकल्याणसिद्धिरित्यलं प्रसङ्गेन ॥

आचार्यहरिभद्रेण, दृब्धा सन्न्यायसङ्गता ।
चैत्यवन्दनसूत्रस्य, वृत्तिर्ललितविस्तरा ॥ १ ॥

य एनां भावयत्युच्चैर्मध्यस्थेनान्तरात्मना ।
सद्वन्दनां सुबीजं वा, नियमादधिगच्छति ॥२॥

पराभिप्रायमज्ञात्वा, तत्कृतस्य न वस्तुनः ।
गुणदोषौ सता वाच्यौ, प्रश्न एव तु युज्यते ॥ ३ ॥

प्रष्टव्योऽन्यः परीक्षार्थमात्मनो वा परस्य च ।
ज्ञानस्य वाऽभिवृद्ध्यर्थं, त्यागार्थं संशयस्य च ॥ ४ ॥

कृत्वा यदर्जितं पुण्यं, मयैनां शुभभावतः ।
तेनास्तु सर्व्वसत्त्वानां, मात्सर्यविरहः परः ॥५॥

इति ललितविस्तरानामचैत्यवन्दनवृत्तिः समाप्ता ।
कृतिर्द्धर्म्मतो याकिनीमहत्तरासूनोराचार्यहरिभद्रस्येति ॥

पं०..."कुठारे"त्यादि, कुठारादिप्रवृत्तिरपि–कुठारादौ प्रस्थकोचितदारुच्छेदोपयोगिनि शस्त्रे प्रवृत्तिः–घटनदण्डसयोगनिशातीकरणादिकापि आस्तां प्रस्थकोत्किरणादिका "रूपनिर्म्माणप्रवृत्तिरेव" प्रस्थकाद्याकारनिष्पत्तिव्यापार एव, उपकरणप्रवृत्तिमन्तरेण उपकर्त्तव्यप्रवृत्तेरयोगात् "तद्वत्" कुठारादिप्रवृत्तिवद् रूपनिर्माणे अपुनर्बन्धकस्य धर्मविषये या प्रवृत्तिः–दैवयोगात् प्रणामादिका सदोषाऽपि "कार्त्स्न्येन" सामस्त्येन 'तद्गामिनी' धर्म्मगामिनी 'न तु' न पुनः 'तद्बाधनी' धर्म्मबाधिका "इति" एवं "हार्दी" ऐदम्पर्यान्तगवेषिणः, आहुरिति शेषः, कुत इदमित्थमित्याह–

"तत्त्वाविरोधकं" देवादितत्त्वाप्रतिकूलं यतो हृदयम् अस्य–अपुनर्बन्धकस्य, न तु प्रवृत्तिरपि, अनाभोगस्यैव तत्रापराधित्वात्, "ततः" तत्त्वाविरोधकात् हृदयात् "समन्तभद्रता" सर्व्वतः कल्याणता, न तु प्रवृत्तेः केवलायाः, कुशलहृदयोपकारित्वात्तस्याः, तस्य च तामन्तरेणापि, कश्चित्फलहेतुत्वात्, कुत इत्याह–"तन्मूलत्वात्" तत्त्वाविरुद्धहृदयपूर्वकत्वात् "सकलचेष्टितस्य" शुभाशुभरूपपुरुषार्थप्रवृत्तिरूपस्य "एवं" प्रस्थकदृष्टान्तवद् "अतोऽपि" जैनदर्शनादेव विनिर्गतानि–पृथग्भूतानि तानि यानि दर्शनानि–नयवादास्तेषामनुसारतः, तत्रोक्तमित्यर्थः, "सर्व्वं" दृष्टान्तजालम् "इह" दर्शने योज्यं किंविशिष्टमित्याह–

"सुप्तमण्डितप्रबोधदर्शनादि" यथा कस्यचित् सुप्तस्य सतो मण्डितस्य कुङ्कुमादिना प्रबोधे–निद्रापगमे अन्यथाभूतस्य सुन्दरस्य चात्मनो दर्शनम्–अवलोकनमाश्चर्यकारि भवति, तथाऽपुनर्बन्धकस्यानाभोगवतो विचित्रगुणालङ्कृतस्य सम्यग्दर्शनादिलाभकाले विस्मयकारि आत्मनो दर्शनमिति, आदिशब्दान्नावादिना सुप्तस्य सतः समुद्रोत्तीर्णस्य बोधेऽपि तीर्णदर्शनादि ग्राह्यमिति । दार्ष्टान्तिकसिद्ध्यर्थमाह–"न" नैव "हि" यस्माद् "एवं" प्रस्थककर्त्तनन्यायेन प्रवर्त्तमानोऽपुनर्बन्धको "न" नैव न "इष्टसाधकः" प्रस्थकतुल्यसम्यक्त्वादिसाधकोऽपि तु साधक एवेति, अपुनर्बन्धकस्यैव लक्षणमाह–"भग्नोऽपि" अपुनर्बन्धकोचितसमाचारात्कथञ्चित् च्युतोऽपि "एतद्यत्नलिङ्गः" पुनः स्वोचिताचारप्रयत्नावसेयोऽपुनर्बन्धकः आदिधार्म्मिक इति एतदिति–इदमेव प्रकृतं चैत्यवन्दनव्याख्यानमिति, "महेत्यादि" महतः–सच्चैत्यवन्दनादेः कल्याणस्य–कुशलस्य विरोधि–बाधकमवज्ञाविप्लावनादि "न" नैव "चिन्तनीयम्" अध्यवसेयं कुत इत्याह–चिन्तामणीत्यादि सुगमम् ॥

इतिश्रीमुनिचन्द्रसूरिविरचितायां ललितविस्तरापञ्जिकायां सिद्धमहावीरादिस्तवः समाप्तः ॥

**कष्टो ग्रन्थो मतिरनिपुणा सम्प्रदायो न तादृक्, शास्त्रं तन्त्रान्तरमतगतं सन्निधौ नो तथापि। स्वस्य स्मृत्यै परहितकृते चात्मबोधानुरूपं, मागामागः, पदमहमिह व्यापृतश्चित्तशुद्धया ॥१॥**

**(मन्दाक्रान्ता.)**

श्रीमच्छ्रीहरिभद्रसूरीश्वरस्य स्वपरोपकाराय निर्वाणफलसाधनार्थं अतिशयकारणं भविकजनाय नान्यस्य। कल्याणमस्तु। ग्रन्थाग्रम् १५४५ पञ्जिकाग्रन्थ० २१५५ उभयोर्मीलने ३७००॥

**टी.**....अथ ग्रन्थकारमहर्षिश्चैत्यवंदनादिविषयकमहत्या साधनायाः प्रणिधानपूर्वकं सम्यग्रीत्या सिद्धये,

सा साधनाऽन्तरात्मनि परिणता भवेत्तदर्थं, भूमिकारूपाणि त्रयस्त्रिंशत्कर्त्तव्यानि दर्शयति, कर्त्तव्यानि, आत्मन उत्थानाय, अनादिमिथ्यामतिवासितान्तः करणानां परिवर्त्तनाय, मानवीय-जीवनस्य प्राथमिक-सफलता-प्राप्ति-कृतेऽपि, अत्यन्तसुदृढसाधनानि सन्ति, तानि चेत्थम् ।

(१) यतितव्यमादिकर्मणि=आदिधार्मिकस्य कर्त्तव्येषु प्रयत्नशीला भवन्तु, दृष्टान्ततया तु दया-प्रेम-मैत्री-क्षमा-कुसंगत्याग-सत्य-गुणानुराग-विनय-नम्रता-परदारत्याग-परोपकार-गुरुजनपूजा-परगुणग्रहण-परनिन्दात्याग-शीलरक्षेत्याद्या आदिधार्मिकगुणाः ।

(२) परिहर्त्तव्यो-अकल्याणमित्रयोगः=अस्मदीयमात्मानं विना सहायकं मित्रं सदाऽकर्त्तव्यपराङ्मुखं च सदा कर्त्तव्यबद्धं कर्तुं,अशक्यत्वात् कल्याणमित्रं कर्त्तव्यमेव-अकल्याणमित्रपरिहारः. देशसर्वभेदात् पार्श्वस्था द्विभेदाः-(१) सर्वपार्श्वस्थः=सम्यक्दर्शनज्ञानचारित्रत्वेन रहितत्वात् केवलं वेषभृद् भवेद् स सर्वपार्श्वस्थः,

शय्यातराहृतपिण्डः, राजपिण्डः, नित्यपिण्डः, अग्रपिण्डः कुलनिश्रा, स्थापनाकुल, सिखंडी, गृहस्थस्तुतिः-इत्यादि यः करोति स देशपार्श्वस्थः,

द्वौ पार्श्वस्थौ साधू अवंदनीयौ ।

(२) अवसन्नः=साधुसमाचारीषु देशतः सर्वतः शिथिलः यः सो, अवसन्नः कथ्यते, एषोऽवन्दनीयः ।

कुशीलः त्रिधा अष्टधा ज्ञानाचार-विराधकः स ज्ञानकुशीलः, अष्टधा दर्शनाचार-विराधकः स दर्शनकुशीलः, एवं यंत्रमंत्रादिकं करोति, यः स्वप्नफलं ज्योतिषादि, प्रकाशयति चारित्रं विराधयति स चारित्रकुशीलः । एते त्रयोऽवंदनीयाः ।

संसक्तश्चाश्रवयुक्तः, संक्लिष्टसंसक्तः, असंक्लिष्टसंसक्तः, यथाच्छंदोऽप्यवन्दनीयः) ।

(३) सेवितव्यानि कल्याणमित्राणि=आत्मीयहितकारीणि मित्राणि समाराध्यानि ।

(४) न लङ्घनीयोचितस्थितिः=उचितमर्यादा न लङ्घनीया सर्व–मर्यादासु, अन्यैः सह व्यवहारे व्यवसाये चानुचिता–चरणेऽनेकेऽनर्था भवन्ति, धर्मस्य मूलं हन्यते, दोषाणां पोषणं भवत्यतोऽनुचितं वचो विचारश्च वर्त्तनं न कर्त्तव्यम् ।

(५) अपेक्षितव्यो लोकमार्गः=लोकमार्गस्यापेक्षा रक्षणीया, उपेक्षा न कदाचित्कार्या, शिष्टाचारस्यानाचरणे लोकेऽस्माकं च धर्मस्य निन्दा भवेत्, धर्मनिन्दका रङ्का भवान्तरेऽपि दुर्लभबोधिमन्तो भवेयुः ।

(६) माननीया गुरुसंहतिः=गुरुवर्गस्य बहुमानं कर्त्तव्यम्, गुरूणां मान्यत्वेनाऽस्मदीये मानसे गुरुत्वं, तेनानुचितवर्त्तनादिकार्येभ्यो रक्षित आत्मा भवति, पूज्यपूजायाः, व्यतिक्रम-जन्यमहापापाऽभावः स्यात् ।

(७) भवितव्यमेतत्तन्त्रेण=गुरुवर्गाधीनेन भाव्यम्, स्वच्छन्दविहारः, आज्ञाभङ्गः, स्वमतिः–(मन्तव्यम्) औद्धत्यं, अविचारितकार्यं मिथ्यासाहसं इत्यादिकानर्थास्त्याज्याः ।

(८) प्रवर्तितव्यं दानादौ=उचित–दया–पात्रदानादिद्वारा, औदार्य–परोपकारः–परार्थ-वृत्तिः–लोकप्रियता–चित्तस्वास्थ्यादिगुणाः पोषणीया, एवं शील–व्रत–तपोभावेषु प्रवर्त्तनद्वारा, विषयान्ध्याऽसहिष्णुता–बुभुक्षुत्व–दुराचारादि–दोषेभ्यो रक्षणीय आत्मा ।

(९) कर्त्तव्योदारपूजा भगवतां=उदारः–सम्यक्तया धनव्ययं कृत्वा भगवद्भक्तिकरणेन, धनाद् विभु महान्–महामूल्यवानस्ति, एवं मतेन भगवन्नैकट्यं याति, भगवन्तं प्रति सत्यश्रद्धा–प्रीतिर्वर्धते, उदारपूजनया, महाकृतज्ञता–गुणस्य पालनं भवति यतः, एषोऽनन्यो-पकारित्वेनैतत्प्रभावेणाऽस्मत्प्राप्त–धनादिकस्य धरणं चरणयोरेषा कृतज्ञता, वर्धमानेन भगवद्रागेण भगवतां गुणादर्शं नयनसम्मुखं रक्षित्वा गुणार्थकः प्रयत्नः कार्यः ।

(१०) निरूपणीयः साधुविशेषः=गुरुत्वस्य लक्षणैः, विशिष्टसाधो र्लक्षणानां निरूपणं विधातव्यम्, यतः कुगुरो र्जाले पतनावसरो नागच्छेत्, सुगुरुर्जीवन–मार्गदर्शकः कार्यः, तत्पार्श्वतस्तत्त्वमार्गस्य शिक्षाऽधिगन्तव्या, शङ्कासमस्यानां समाधानं प्राप्तव्यम् । सुसाधूनाम-न्वेषणं=विशिष्टमुनीनां शोधनमावश्यकमेव. ।

(११) श्रोतव्यं विधिना धर्मशास्त्रम्=विधिमनतिक्रम्य सद्गुरूणां पार्श्वतः धर्मप्रधानं धर्मशास्त्रं श्रोतव्यं–श्रोतव्यं–श्रवणविषयीकर्त्तव्यम्, आत्मज्ञान–कर्त्तव्यशिक्षादि–प्राप्तितोऽनन्तसुख–मोक्षमार्ग उद्घाटितो भवति ।

(१२) भावनीयं महायत्नेन=महता–विशिष्टेन, धर्मशास्त्र–श्रवणतः प्राप्ततत्त्वकर्त्तव्य-मार्गेण स्वात्मा, भावितो–वासितः कार्यः, अर्थात् प्रयत्नपूर्वकं, शास्त्रीयवस्तुनो भावनं–चिन्तनं–मननं–परिणमनं विधातव्यम् ।

(१३) महायत्नेन प्रवर्तितव्यं विधानतः=शास्त्रीयविधानानुसारेण हेयहानं, उपादेयो-पादानरूपप्रवृत्तिः कार्या, भावितताकरणादपि हेयहानोपादेयोपादानरूपप्रवृत्तिरवश्यं कार्या.

(१४) अवलम्बनीयं धैर्य=महाऽऽपदाद्याऽऽगमनेऽपि कष्टेऽपि विशिष्टमहाकार्यापातेऽपि धैर्य, सत्त्वं–पराक्रमो रक्षणीयः, सर्वं सत्त्वे प्रतिष्ठितं, महति–कार्यप्रसंगेऽपि धैर्यमचलत्वं प्राप्य धीरेण वीरेण–गम्भीरेण भाव्यम्.

(१५) पर्यालोचनीया–आयतिः=‘आयतिस्तूत्तरः कालः’ उत्तरकालस्य–भविष्यत्कालस्य पर्यालोचना कर्त्तव्या, कस्मादपि कार्यात् पूर्वं दीर्घदृष्ट्या भाविपरिणामश्चिन्तनीयः, ‘सहसा विदधीत न क्रियामविवेकः परमापदां पदम्’ विचार्य कार्यं कार्यम्.

(१६) अवलोकनीयो मृत्युः=आयुःप्रधानं जीवनं, आयुषोऽस्थिरत्वेन जीवनं मरण-प्रकृतिकं, मरणं प्रकृतिः प्रकृतितो मरणमेव, कदा मृत्युरागमिष्यतीति निर्णयो न, निर्णीतत्वेऽपि मरणं तत्काले निर्णीतमेव. मरण–निश्चये ‘न’ कोऽप्यर्थः, आत्मनोऽमरत्वमेव परन्तु कर्म-दशाऽपेक्षया मरणदशा प्राप्यते पराधीनोऽयमात्मा, स्वतन्त्रत्वे कर्मरहितत्वे सति न मरणं, न जननं, न भवभ्रमणं, स्वात्मस्वरूपावस्थानेऽनन्त–अमरत्वसुखमयाऽवस्था.

(१७) भवितव्यं परलोकप्रधानेन=जीवने परलोकस्य–(भविष्यल्लोकस्य) प्रधानं कार्यं कार्यं ततो जीवितव्यं, यत एतल्लोकस्य सुखसाधनं सत्तासम्मानं गौणं कृत्वा, परलोके दुर्गति–दुःख–दौर्भाग्यादि कथं नागच्छेत्तथा सद्गति–शुभभाव–सुष्ठुधर्मसामग्री–धर्मवीर्योल्लासादिकं प्राप्नुयादिति मुख्यं रक्षणीयम्.

(१८) सेवितव्यो गुरुजनः=गुरुजनस्य समीचीना सेवा कर्त्तव्या, गुरुसेवात्वतिदुर्लभा, ‘सेवाधर्मः परमगहनो योगिनामप्यगम्यः’.

(१९) कर्त्तव्यं योगपटदर्शनं=मंत्राक्षरादि–सहितेष्टदेवादि–विषयकाध्यात्मिकभाववृद्धि-कारकत्वेन चित्रमयपटस्य दर्शनं कार्यम्.

(२०) स्थापनीयं तद्रूपादि चेतसि=तत्र योगपटे आलेखितं स्वरूपं धारणीयं, चित्ते स्थापनीयम् ततश्चित्ते तत् संस्कारादिपतने हृदयकमले, एतत् समञ्जसं, प्रतिबिम्बितं संनिरीक्ष्य, योगपटीयस्वरूपं ध्येयम् .

(२१) निरूपयितव्या धारणा='धारणा तु क्वचिद्ध्येये चित्तस्य स्थिरबन्धनम्' तत्स्वरूपध्येयविषयकं ध्यानं चित्ते स्थिरबन्धनं निरूपणीयम्.

(२२) परिहर्त्तव्यो विक्षेपमार्गः=पूर्वोक्त–धारणावेलायां विक्षेपमार्गः–विक्षेपकमनइन्द्रियादि-विषयचिन्तनरूप–विक्षेपमार्गः, परिहारविषयः कार्यः, प्रस्तुतविषयाद् विषयान्तरे न गन्तव्यम् ।

(२३) यतितव्यं योगसिद्धौ=मोक्षेण सह योजकत्वेन योगः–सम्यग्दर्शनज्ञानचारित्रात्मको मोक्षमार्गः, तन्मार्गविषयकसाधनायाः सिद्धौ (शुद्धौ) प्रयत्नः–पुरुषार्थः कर्त्तव्यः । योगसिद्धेः प्रभावादशुभकर्मनाशः प्रबलपुण्यानुबंधि–पुण्योपार्जनम् ।

(२४) कारयितव्या भगवत्प्रतिमाः=यै र्भगवद्भिः, सकलनवतत्त्वकर्त्तव्यानि प्रकाशितानि, तेषां परमोपकारेण सह परमोपकारिणं चक्षुः समक्षं आनेतुं, सालंबनं ध्यानं कर्तुं तत्प्रतिमाः कारयितव्याः ।

(२५) लेखनीयं भुवनेश्वरवचनं=त्रिभुवनेश्वराणां वचनानि विशिष्टपत्रेषु लेखनीयानि लेखकानां पार्श्वतोऽपि, तथा च भगवतां मूर्तिनिर्माणं शास्त्रलेखनं भगवतोऽर्हतः प्रति कृत-ज्ञताऽपि, ऋणमुक्तिः प्रकटिता गण्यते ।

(२६) कर्त्तव्यो मङ्गलजापः='भावमंगलं जिननामेत्युक्तेः,' ऋषभादितीर्थंकराणां नाम-रूपभावमंगलजापः कार्यः, नमस्कारमहामंत्ररूपपंचपरमेष्ठिनां मंगलमयजापः, जापेन नामनिक्षेपेण, प्रतिमया स्थापना–निक्षेपेण, शास्त्रलेखनेन, भावनिक्षेपेण भगवत्पूजा कथ्यते, जापतः, त्रिकरण-शुद्धिः, ततो विघ्ना विनश्यन्ति ।

(२७) प्रतिपत्तव्यं चतुःशरणं=अर्हन्तो मे शरणं, सिद्धाश्च मे शरणं, साधवो मे शरणं, जैनधर्मो मे शरणं इति चतुःशरणं स्वीकर्त्तव्यं ।

(२८) गर्हितव्यानि दुष्कृतानि=स्वकृतं यद्यद् दुष्कृतं ( पापं ) तत्तद् गर्हितव्यम् ।

(२९) अनुमोदनीयं कुशलम्–स्वपरकृतं यद्यत्कुशलं ( पुण्यमात्रं ) तत्तद् अनुमोद-नीयं प्रशंसनीयम् ।

(३०) पूजनीया मन्त्रदेवताः=स्वस्वेष्टमन्त्राधिष्ठायका देवाः, सामान्येनार्हदाद्या विशेषतो महावीराद्या देवाः स्वद्रव्यार्पणतो भव्यपूजाः कर्त्तव्याः, ततश्चित्तप्रसन्नत्वं समाधिश्च प्राप्यते ।

(३१) श्रोतव्यानि सच्चेष्टितानि=सत्कृत्यानि, श्रोतव्यानि श्रवणविषयीकर्त्तव्यानि ।

(३२) भावनीयमौदार्यं–उदारत्वेन हृदयं भावनाविषयीकर्त्तव्यम्, पुनः पुनर्जीवनप्रसंगेषु मनो-वृत्तिर्विशाला–उदारा कार्या, तदभ्यासतो हृदयं, औदार्यभावितं भवति, विशालहृदयं सर्वत्र भवति ।

(३३) वर्त्तितव्यमुत्तमज्ञातेन—उत्तमपुरुषाणां दृष्टान्तमादर्शं गृहीत्वा, उत्तमपुरुषनिष्ठ—प्रबलसत्त्व—पराक्रमादिगुणानालम्ब्य, लक्ष्यं सम्मुखीकृत्य, निश्चितसिद्धान्तानुसारिणी सत्क्रिया कार्या।

एवं त्रयस्त्रिंशत् कर्त्तव्यान्यादरणीयानि.

तथा च 'अपुनर्बन्धकप्रवृत्तिरेव' सत्प्रवृत्तिः

यः, एतैस्त्रयस्त्रिंशद् कर्त्तव्याख्य—गुणैः सम्पन्नोऽस्ति, तस्य देवप्रणामादिप्रवृत्तिःसर्वैव साध्वी, न मिथ्या, यतो कदाग्रहरहितत्वेन सदाशयसत्त्वेन, ज्ञाताऽज्ञातरूपेण शुद्धदेवादि—तत्त्वविषयक प्रवृत्तिं प्रति प्रयाणं प्रवर्त्ततेऽवश्य प्रयाणेऽमतो वर्धित्वा शुद्धदेवादिविषयकोपासनां प्राप्स्यति.

पूर्वोक्त—गुणसम्पन्नो जीवो मार्गानुसारी कथ्यते, 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति मोक्षमार्गं प्रति, अनुसरणकारी, अस्ति यतः सम्यग्दर्शने वस्तुद्वयं वर्त्तते, (१) भवनिर्वेदः (२) जिनोक्ततत्त्वरुचिरप्यस्ति, अतो वस्तुद्वयेन, सांसारिकप्रवृत्तित्यागद्वारा, एष विशिष्टविवेक—प्राप्तिमार्गस्थः कथ्यते, ईदृशोऽयं जीवः पूर्वोक्त—कर्त्तव्यगुणानाश्रित्य नियमादपुनर्बन्धकादिकक्षां प्राप्तवान्, तत्र मिथ्यात्वमान्द्यं ततो गुणसम्पत्प्राप्तिः एतद्गुणसम्पन्नजीवद्वारा, शुद्धतत्त्वाभिलाषेण क्रियमाणा, देवपूजादि—प्रवृत्तिः, प्रथमत एव समग्रताऽपेक्षया सत्प्रवृत्तिरेव.

अतः आदित आरभ्याऽस्य प्रवृत्तिः, सत्प्रवृत्तिरेव, नैगमानुसारेण चित्राऽपि प्रस्थकप्रवृत्तिकल्पा, तदेतदधिकृत्याहुः—"कुठारादिप्रवृत्तिरपि रूपनिर्माण—प्रवृत्तिरेव"

'कुठारे' त्यादि, कुठारादिप्रवृत्तिरपि—कुठारादौ प्रस्थकोचितदारुच्छेदोपयोगिनि शस्त्रे प्रवृत्तिः=घटनदण्डसंयोगनिशातीकरणादिकाऽपि, आस्तां प्रस्थकोत्किरणादिका "रूपनिर्माणप्रवृत्तिरेव" प्रस्थकाद्याकारनिष्पत्तिव्यापार एव, उपकरणप्रवृत्तिमन्तरेण, उपकर्त्तव्यप्रवृत्तेरयोगात् "तद्वत्"। कुठारादिप्रवृत्तिवद्रूपनिर्माणे, अपुनर्बन्धकस्य धर्मविषये या प्रवृत्तिः देवयोगात् प्रणामादिका सदोषाऽपि सा "कार्त्स्न्येन" सामस्त्येन "तद्गामिनी" धर्मगामिनी 'न तु' न पुनः "तद्बाधनी" धर्मबाधिका 'इति' एवं "हार्दा" ऐदंपर्यन्तगवेषिणः, आहुरितिशेषः,

(प्रस्थकदृष्टांतं दर्शयति=तद्यथानामकः कश्चित्, पुरुषः, परशु—कुठारं गृहीत्वा, अटवीमुखो गच्छेदित्यादि, इदमुक्तं भवति—प्रस्थको—मागधदेशप्रसिद्धो धान्यमानविशेषस्तद्धेतुभूतकाष्ठकर्त्तनाय कुठारव्यग्रहस्तं तक्षादिपुरुषं, अटवीं गच्छन्तं दृष्ट्वा कश्चिदन्यो वदेत्—क भवान् गच्छति ? तत्राविशुद्धनैगमो भणति—अविशुद्धनैगमनयमतानुसारी सन्नसौ प्रत्युत्तरयतीत्यर्थः, किमित्याह—प्रस्थकस्य गच्छामि, इदमुक्तं भवति—नैके गमा वस्तुपरिच्छेदा यस्य, अपि तु बहवः स निरुक्तवशात् ककारलोपतो नैगम उच्यते, अतो यद्यप्यत्र प्रस्थककारणभूतकाष्ठ-

निमित्तमेव गमनं, न तु प्रस्थकनिमित्तं, तथाऽप्यनेकप्रकारवस्त्वभ्युपगमपरत्वात् कारणे कार्योपचारात्, तथाव्यवहारदर्शनादेवमप्यभिधत्तेऽसौ—प्रस्थकस्य गच्छामीति, तं च कश्चित् छिन्दन्तं, वृक्षमिति गम्यते, पश्येद्, दृष्ट्वा च वदेत्—किं भवाँश्छिनत्ति ? ततः प्राक्तनाद् किञ्चिद्विशुद्ध-नैगमनयमतानुसारी सन्नसौ भणति—प्रस्थकं छिनद्मि, अत्रापि कारणे कार्योपचारात् तथाव्यवहृतिदर्शनादेव काष्ठेऽपि च्छिद्यमाने प्रस्थकं छिनद्मीत्युत्तरं, केवलं काष्ठस्य प्रस्थकं प्रति कारणता भावस्याऽत्र किञ्चिदासन्नत्वाद्विशुद्धत्वं, प्राक् पुनरतिव्यवहितत्वात् मलीमसत्वम्, एवं पूर्वपूर्वापेक्षया यथोत्तरस्य विशुद्धता भावनीया, नवरं तक्षुवन्तं—तनूकुर्वन्तम्, उत्किरन्तं वेधनकेन मध्याद् विकिरन्तं विलिखन्तं—लेखिन्या मृष्टं कुर्वाणम्, एवमनेन प्रकारेण तावन्नेयं यावद् विशुद्धतरनैगमस्य 'नामाउडिउ'ति आकुञ्चितनामा प्रस्थकोऽयमित्येवं नामाऽङ्कितो निष्पन्नः प्रस्थक इति.)

अर्थात् एवं प्रस्थकाकार—निर्माण—प्रवृत्तौ कुठारादि—प्रवृत्तिवद्, अपुनर्बन्धकस्य देवादि-विषयकोपासनायाः प्रवृत्तिः सदोषाऽपि कदाग्रहरहितत्वेऽपि सदाशयवत्त्वेन सम्मतया शुद्धधर्मं प्रति प्रमात्येव, किन्तु धर्मबाधिका न ( धर्मस्य दूरस्था कारणतैतादृशी देवप्रणामादिप्रवृत्तिः पतिताऽस्ति, हिंसादि—विषय—परिग्रहादिप्रवृत्तिस्था, नास्ति, तदर्थं नैगमनयेनाऽपि सत्प्रवृत्तिरस्ति.)

### तत्त्वाविरोधिहृदयस्य महत्त्वम्—

अस्य—अपुनर्बंधकस्य हृदयं तत्त्वाविरोधि—तत्त्वानुकूलं वर्त्तते, तत एतादृशात्, हृदयात् समन्तभद्रता—सर्वतः कल्याणरूपता वर्त्तते, यतः सर्वा प्रवृत्तिरस्य हृदयपूर्विकैव, एवं (यथा प्रस्थकज्ञातं तथा) जैनदर्शनतो विनिर्गततत्तद्—दर्शनानुसारतः सर्वमिह योग्यं, 'सुप्रणिहित—प्रबोध—दर्शनादि', एवं प्रवर्तमानोऽपुनर्बन्धक इष्टसाधको न भवतीति न अपितु भवत्येव, कदाचित् स्वाचाराद् भ्रष्टोऽपि—भग्नोऽपि एतद्यत्नलिङ्गोऽपुनर्बन्धकः, इति तं प्रत्युपदेश—साफल्यम् ।

"नानिवृत्ताधिकारायां प्रकृतावेवंभूत इति कापिलाः, न अनवाप्तभवविपाक इति च सौगताः, अपुनर्बन्धकास्त्वेवंभूता इति जैनाः, तच्छ्रोतव्यमेतदादरेण, परिभावनीयं सूक्ष्मबुद्ध्या, शुष्केक्षुचर्वणप्रायमविज्ञातार्थमध्ययनं, रसतुल्यो ह्यत्रार्थः, स खलु प्रीणात्यन्तरात्मानं, ततः संवेगादिसिद्धेः, अन्यथाप्यस्वदर्शनात्, तदर्थं चैव प्रयास इति न प्रारब्ध—प्रतिकूलमासेवनीयं, प्रकृतिसुन्दरं चिन्तामणिरत्न—कल्पं संवेगकार्यं चैतदिति, महाकल्याणविरोधि, न चिन्तनीयम्, चिन्तामणिरत्नेऽपि सम्यग् ज्ञातगुण एव श्रद्धातिशयभावतोऽविधिविरहेण—महाकल्य—ाणसिद्धिरित्यलं प्रसङ्गेन ।"

**सुप्तमण्डितप्रबोधदर्शनादि–**

यथा कस्यचित् सुप्तस्य सतो मण्डितस्य कुङ्कुमादिना, प्रबोधे–निद्राऽपगमे, अन्यथा-भूतस्य–सुन्दरस्य चात्मनो दर्शनम्–अवलोकनमाश्चर्यकारि भवति, तथाऽपुनर्बन्धकस्य, अना-भोगवतो विचित्रगुणालङ्कृतस्य, सम्यग्दर्शनादि–लाभकाले विस्मयकारि–आत्मनो दर्शनमिति, आदिशब्दात्रावादि, ग्राह्यमिति । दार्ष्टान्तिक–सिद्धयर्थमाह–"न" नैव "हिः" यस्माद् "एवं" प्रस्थककर्तनन्यायेन प्रवर्त्तमानोऽपुनर्बन्धको "न" नैव न "इष्टसाधकः" प्रस्थकतुल्य–सम्यक्त्वादि–साधकोऽपि तु साधक एवेति, अपुनर्बंधकस्यैव लक्षणमाह–"भग्नोऽपि" अपुन-र्बन्धकोचितसमाचारात् कथञ्चित् च्युतोऽपि "एतद्यत्नलिङ्गः" पुनः स्वोचिताचारप्रयत्नाऽवसेयोऽ-पुनर्बन्धकः, आदिधार्मिक इति, एतदिति–इदमेव प्रकृतं चैत्यवन्दनव्याख्यानमिति, "महेत्यादि" महतः–सच्चैत्यवन्दनादेः, कल्याणस्य–कुशलस्य विरोधि–बाधकमवज्ञाविप्लावनादि 'न' नैव 'चिन्तनीयम्' अध्यवसेयं, कुत इत्याह–चिन्तामणीत्यादि, सुगमम् ।।

**एवमतोऽपि विनिर्गततत्तद्दर्शनानुसारतः–**

अनेन प्रस्थकदृष्टांतेन दर्शनान्तरेषु दत्ताः 'सुप्तमंडितप्रबोधदर्शनादि' दृष्टान्ता अत्र सङ्गमनीयाः, एतानि दर्शनान्तराणि जैनदर्शनतो निर्गतानि ग्राह्यानि, जैनदर्शनं हि नयवादानां सागरः, तेषु मध्ये, एकैकं नयं गृहीत्वाऽन्याऽन्यदर्शनानि प्रचलितानि,

दृष्टान्तरूपेण=जैनदर्शनेन संग्रहनयदृष्टया चैतन्यमेकं मानितं, चेतनश्च तद्रूप एव तदा व्यवहारनयदृष्टया चेतना अनंता मानिताः, एवमात्मा, एकानेकात्मकः, अथ वेदान्तदर्शनेनैकः संग्रहनयो गृहीतः, ततो विश्वेऽस्मिन् एक एव शुद्ध आत्मा मतः, तदा न्यायदर्शनेन केवलव्यवहारदृष्टिं नीत्वा अनन्ता आत्मानो मताः, आत्मत्वं–चैतन्यं सर्वथाऽत्मतो भिन्नं मतं, एवमन्यानि अपि दर्शनानि, जैनदर्शनमान्यानेकदृष्टी धृत्वा चलितानि, एतस्यैव परिणाम आगतो यतः जैनदर्शनविषयको, विवेकपूर्ण–दया–सत्यादिरूपभूमिकामार्गस्तेषु संगृहीतो दृश्यते.

**कल्याणस्य प्रधानाधारो हृदयम्–**

कल्याणस्य मुख्य आधारः प्रवृत्तिमात्रं नास्ति, प्रवृत्तिस्तु शुद्धदेवादिविषयिणी पूजा भवति, परन्तु यदि हृदयं मलिनं स्यात्, मलिनाशंसा–दम्भादितो भरितं भवेत्तदा तेन कथं कल्याणं भवेत्, हृदयशुद्धिः प्रथमा, हृदयं शुद्धं भवेत्तदा कल्याणं, सर्वतोमुखकल्याणमतः समन्तभद्रता, अपुनर्बंधको जीवोऽशुद्धसंगे पतितोऽपि सहजभवोद्वेगः–तीव्रभावेन पापाऽकरणं, तत्त्वाद्वेष–जिज्ञासादिगुणान् गृहीत्वा, मलिनचित्तो न भवति, ततः कल्याणाऽधिकारी वर्तते ।

**शुष्केक्षुचर्वण–प्रायमविज्ञातार्थमध्ययनम्–**

अर्थादपुनर्बंधकं प्रति कृत उपदेशः सफलः, अर्थं ज्ञातुमुपेक्षा कार्या, केवलं सूत्राध्ययनं कार्यमेतत्तु शुष्केक्षुचर्वण–प्रायं ततो रसमाधुर्यं कुतो लभेत, रसतुल्योऽत्र सूत्रार्थः, सूत्रार्थाध्ययनमस्ति, अत्र श्रवण–मनन–चिन्तन–परिशीलनादि ज्ञेयं, स खलु प्रीणयत्यन्तरात्मानं ततः संवेगादिसिद्धेः, अन्यथात्वदर्शनात्,

**अर्थस्योपेक्षा महाकल्याणविरोधिनी–**

अस्माकं एष चैत्यवंदनसूत्राणामर्थव्याख्यानप्रयासः, एतदर्थबोधकारणाय, विद्यते, ततः एतस्य कृतस्य प्रयासस्य प्रतिकूलं किञ्चिदपि न कर्तव्यम् । अर्थादेतस्यार्थव्याख्यानस्योपेक्षाऽवगणनाऽरुच्यादि, न कर्तव्यम्, अस्य निन्दातिरस्कारान्यान्तरायादि, किमपि न कार्यम्, अर्थव्याख्याने कथितभव्यभावापेक्षया, अर्थव्याख्यानं तु सहजसुन्दरं चिन्तामणिरत्नसमानं, संवेगोत्पादकं वर्तते, ततस्तस्य विरोधऽस्तु महाकल्याणविरोधोऽस्ति, ततोऽस्य विरुद्धं किञ्चिदपि न धारणीयम् ।

चिन्तामणिरत्नेऽपि सम्यग् ज्ञातगुण एव श्रद्धाद्यतिशयभावतोऽविधिविरहेण महाकल्याणसिद्धिरित्यलं प्रसङ्गेन ॥

**श्लोकस्य भावार्थः–**

(१) चैत्यवन्दनसूत्रस्य ललितविस्तरानामिका वृत्तिः (विवेचनरूपा) प्रामाणिक–समीचीनयुक्ति–न्यायादिसंगता, आचार्यहरिभद्रसूरीश्वरेण दृब्धा (रचिता) वर्तते.

(२) यः पुरुषः, मध्यस्थेनाऽन्तरात्मना, उच्चैरेनां वृत्तिं (ललितविस्तरानामिकावृत्तिं) भावयति–अतिशयेन भावनाविषयां करोति सोऽवश्यं वन्दनां (चैत्यवंदनां)–भावरूप–चैत्यवंदनां, अथवा भावचैत्यवंदनायाः सुबीजं–सम्यक्त्वसहितां-चैत्यविषयकभाववन्दनां नियमादधिगच्छति.

(३) परस्य (परग्रन्थस्य, तद्रचयितुः) अभिप्रायं–आशयं अज्ञात्वा–अबुद्ध्वा, तत्कृतस्य––परकृतस्य (वस्तुनः–पदार्थस्य) गुणसहितदोषौ–दोषसहितगुणौ गुणदोषौ सता–सज्जनधर्मवता पुरुषेण न वाच्यौ–कथनीयौ परन्तु तत्र प्रश्न एव युज्यते.

(४) १–आत्मानो बोधार्थं–परीक्षार्थं अन्यः–परः प्रष्टव्यः,
२–परस्य " " " " " ,
३–ज्ञानस्याभिवृद्धयर्थ " " " ,
४ अथवा संशयस्य त्यागार्थं परः प्रष्टव्यः,

(५) एनां ललितविस्तरानामिकां वृत्तिं, कृत्वा–रचयित्वा यदर्जितं पुण्यं मया शुभभावतः, तेनास्तु सर्वसत्त्वानां, परो मात्सर्यविरहो, उत्कृष्टमात्सर्याभावो भवतु.

इति ललितविस्तरा नाम चैत्यवन्दनवृत्तिः समाप्ता, कृतिर्धर्म्मतो याकिनीमहत्तरासूनोराचार्यहरिभद्रस्येति श्रीललितविस्तराख्यवृत्तौ समाप्तायाम् ॥

'पञ्जिका पदभञ्जिका' न्यासोऽपि कथ्यते, कठिनपदानां स्पष्टीकृत्यार्थकरणं एतस्याः पञ्जिकाया रचयिता महर्षिराचार्यश्रीमुनिचन्द्रसूरीश्वरजी महाराजो जिनागममर्मवेदी, तथा एकः समर्थो दर्शनवेत्ता च प्रखरविद्वान् व्याख्यानकारोऽपि स्वलघुतां दर्शयन् कथयति—

ग्रन्थस्य कष्टत्वेऽपि कठिनत्वेऽपि यदि मतिगतं नैपुण्यं—अन्तर्गतवस्तुप्रकाशकं स्यात्तदा ग्रन्थोऽकष्टः स्यात्, मतेरनिपुणत्वे ग्रन्थः कष्टः स्यात्परन्तु यदि तादृग् सम्प्रदायः स्यात्तदा मतिनिपुणत्वे प्राप्ते ग्रन्थोऽकष्टः स्यात् यदि तंत्रांतरमतगतं शास्त्रं सन्निधौ स्यात्तदा तादृग् सम्प्रदायमतिनैपुण्येन ग्रन्थः कष्टोप्यकष्टः स्यात्तन्नो, तथापि ग्रन्थगतपदार्थानां स्वस्य स्मृत्यै परहितकृते चात्मबोधानुरूपम् यथा स्यात्तथा, इह—ललितविस्तरापञ्जिकानिर्माणे, चित्तस्य शुद्धया व्यापृतः—व्यापारवानहं, आगः—अपराधपदं, मा+आगाम्—नाऽऽगमम् ॥

## समाप्तम्

## प्रशस्तिः

विश्ववत्सलजगदुद्धारकपरमकृपासिंधु—श्रीपति—**शंखेश्वरपार्श्वनाथप्रभोः** परमया कृपया तथा प्रभुश्री **महावीरस्य** त्रिसप्ततितमपट्टाम्बरे भास्करायमाण—श्री पञ्जाबदेशोद्धारकाचार्यवर्य—**विजयानन्दसूरीश्वर**—तत्पट्टप्रभाकर—सद्धर्मसंरक्षक श्रीमदाचार्यवर्य **कमलसूरीश्वर**—पट्टप्रद्योतकाचार्यवर्य श्रीसूरिसार्वभौम—जैनरत्नव्याख्यानवाचस्पति-कविकुलकिरीट—**लब्धिसूरीश्वर**—पट्टभास्कर—धर्मदिवाकर—कविकुलकोटीर—श्रीमदाचार्यवर्य—**भुवनतिलकसूरीश्वराणां** गुरुवर्याणां शुभाशीर्वादेन पू. तार्किकशिरोमणि—आचार्य—श्री—**हरिभद्रसूरीश्वर**—विरचिता—**ललितविस्तरा — चैत्यस्तववृत्ति**—स्ति तथा पू. आ. श्री **मुनिचंद्रसूरीश्वर**—विरचितायां **पञ्जिकायाम्**, विवेचनरूपो **द्वितीयो भागः**, तत्र विक्रमसंवत् द्विसहस्रधिकत्रिचत्वारिंशद् वर्षे (२०४३) आश्विनशुक्लपञ्चम्यां कानपुरनगरे श्री **मुनिसुव्रतस्वामिकृपायां टीका**, आरब्धा,

विक्रमसंवत् द्विसहस्रधिकषट्चत्वारिंशद् वर्षे (२०४६) दीपालिका **प्रभुमहावीर-कल्याणकदिव्यदिने** मुम्बापुरी मध्ये भारतनगरे श्री **शंखेश्वरपार्श्वप्रभोः** कृपायां बालजीवाना—मनुग्रहाय सुलभ—टीकायाः मत्कृतायाः ( **भद्रंकरसूरि कृतायाः** ) समाप्ति र्जाता ।

**अस्मिन्ग्रंथे मया मतिदोषेण छद्मस्थावस्थायां जिनाज्ञाविरुद्धं कदाचित् लिखितं जातं तदा तन्मिथ्या मे दुष्कृतं भूयाद्...**

# 卐 शुद्धिदर्शनम्–प्रथमभागे 卐

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | २४ | यथोक्त | यथोक्तम् |
| ७ | १० | तन्न | तच्च |
| ९ | ७ | पादुर्भवति | प्रादुर्भवति |
| १८ | ,, | नोत्सग | नोत्सर्ग |
| २१ | १५ | ज्ञया | ज्ञेयाः |
| ३१ | १२ | द्वितीया | द्वितीय |
| ३२ | १९ | तत्त्व | तत्त्वं |
| ३४ | १४ | पेक्षावान् | प्रेक्षावान् |
| ४३ | १७ | रत्न अ | रत्न (अ |
| ४४ | ११ | गोरव | गौरव |
| ,, | २५ | ततत् | ततत् |
| ४६ | १ | मक्ति | मुक्ति |
| ४७ | २१ | अक्कुरादि | अङ्कुरादि |
| ५७ | ५ | सधना | साधना |
| ६३ | १९ | द्यंम्यः | द्यंग्यः |
| ६८ | ३० | योग्यताया | योग्यतायां |
| ७० | १६ | तया | यात |
| ७१ | २७ | अर्हतो | अर्हन्तो |
| | | भगवतो | भगवन्तो |
| ७४ | २७ | रुपेण | रूपेण |
| ७५ | २ | हठ | तदन्य |
| ,, | ४ | पक्र | रूप |
| ७६ | २० | सहाकारि | सहकारि |
| ८१ | २५ | मादिकर्तुणां | मादिकर्तृणां |
| ८२ | २६ | सर्वजीव | सर्वजीवो |
| ८३ | ८ | योग्मता | योग्यता |
| ८४ | ४ | पर्यायि | पर्यायो |
| ८६ | ११ | स्वभाया | स्वभावा |
| ,, | २४ | सत्या | सत्यां |
| ८८ | २० | साव | तात्र |
| ८९ | ९ | कम्मांश | कर्मांश |
| ९० | २५ | वाचकै र्या | वाचकैर्या |
| ९५ | २५ | दर्शना | दर्शना |
| ९९ | २७ | तद्भाव | तद्भावे |
| १०२ | १५ | रहित | रहितं |
| ,, | २२ | हस्रेभ्य | सहस्रेभ्य |
| १०३ | २५ | पर्यायाणा | पर्यायाणां |
| १०४ | १२ | न च | न चै |
| ,, | १४ | प्र त्तेः | प्रवृत्तेः |
| १०३ | २२ | अवछदे | अवच्छेदे |
| १०६ | २४ | अविसवादेन | अविसंवादेन |
| १०७ | १४ | प्रकार | प्रकारा |
| ,, | २८ | द्रव्यैः | द्रव्यैः |
| १०९ | ७ | मतत् | मेतत् |
| ११० | २३ | वृत्तित्व | वृत्तित्वं |
| १११ | ५ | तुल्यत्व | तुल्यत्वं |
| ,, | २६ | घटनात | घटनात् |
| ११२ | १० | पारम | पारमा |
| ,, | १४ | तत्र | तत्त |
| ११३ | १८ | अय | अयं |

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ११५ | २ | अर्थाद | अर्थाद् |
| ११६ | १५ | मेतत | मेतत्, |
| ,, | २२ | स्वागतस्य | स्वगतस्य |
| १२० | २० | कर्मबन्ध | कर्मबन्धं |
| ,, | २३ | विषयषु | विषयेषु |
| १२१ | २८ | क्रिमा | किमा |
| १२२ | १२ | अहितयोगात्वा | अहितयोगत्वं |
| ,, | १३ | आरो | आरोप |
| १२३ | ७ | कर्ष्मि | कर्स्मि |
| ,, | १२ | मुग्दा | मुद्गा |
| ,, | ३० | जात | जातं |
| १२४ | १७ | कर्तृः | कर्तुः |
| १२५ | २ | स्वस्वरूपां | स्वस्वरूपं |
| १२६ | १४ | गुरुनि | गुरूणि |
| ,, | २५ | तुल्य | तुल्यं |
| १२७ | | सक्षि शब्दस्य | संक्षिप्त्वेन ज्ञेयम् |
| १२८ | १ | यंति | यं प्रति |
| ,, | २ | तं ति | तं प्रति |
| ,, | १८ | सवित्ति | संवित्ति |
| ,, | ३० | सत्वा | सत्या |
| ,, | ,, | हृटदये | हृदये |
| १२९ | १३ | कथित | कथितं |
| ,, | २० | भव्य | भव |
| १३० | १० | शब्दथं | शब्दार्थः |
| १३१ | १ | यत्र द्रष्ट शब्दो भवेत् | तत्र द्रष्टृ शब्दो ज्ञेयः |
| १३१ | २ | यत्र द्रष्ट शब्दो भवेत् | तत्र द्रष्टृ शब्दो ज्ञेय |
| १३१ | २८ | यत्र द्रष्ट शब्दो भवेत् | तत्र द्रष्टृ शब्दो ज्ञेयः |
| १३१ | १२ | सम्यावन | सम्पादन |
| ,, | २७ | लोकन | लोकनं |
| १३२ | ६ | लोक | लोकं |
| ,, | १२ | वेतृणां | वेतृणा |
| ,, | १५ | ज्ञातृणा | ज्ञातृणा |
| १३३ | २ | द्रष्ट्ट | द्रष्टृ |
| ,, | ,, | ,, | ,, |
| ,, | ७ | ,, | ,, |
| ,, | ८ | ,, | ,, |
| ,, | १४ | काय | कार्यं |
| ,, | १५ | तर | तरा |
| ,, | १६ | वस्त | वस्तु |
| ,, | २६ | ज्ञातृ | ज्ञातृ |
| १३४ | १३ | दशक | दर्शक |
| १३५ | ९ | ववदि | वादि |
| ,, | १२ | जीव | जीवं |
| ,, | २१ | मपद | पद |
| १३६ | ९ | ष्टद् | द्रष्ट |
| ,, | १२ | ज्ञयो | ज्ञेयः |
| ,, | १६ | मत | मतं |
| ,, | १९ | नत्व | नत्वं |
| ,, | २० | ,, | ,, |
| ,, | २५ | लाक | लोक |
| ,, | ३२ | सम | समा |
| १३९ | २० | भभ | भय |
| १४२ | २५ | काल | कालं |
| १४३ | १४ | नयन | नयनं |

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १४३ | १५ | रूपं | रूप |
| १४८ | ४ | विज्ञान | विज्ञानं |
| ,, | ५ | नोहा | नोहा |
| ,, | २१ | कथ | कथं |
| ,, | २२ | प्रबाध | प्रबोध |
| ,, | २४ | तदन्य | तदन्ये |
| ,, | २५ | क | कैः |
| ,, | २६ | मागा | मार्ग |
| १४७ | १३ | रुप | रूप |
| ,, | २४ | रुपांत | रूपानन्त |
| १५० | १८ | रुपं | रूपं |
| ,, | १९ | रुप | रूप |
| १५१ | पृष्ठ मध्ये | यत्र तत्वं तत्र तत्वं | ज्ञेयं |
| ,, | ,, ,, | ,, रुपं ,, रूपं | ,, |
| १५३ | १ | त त्व | तत्त्व |
| ,, | १९ | कम्म | कर्म |
| ,, | १६ | धारणयी | धारणीयैव |
| ,, | १८ | व्यम्ती | व्यती |
| १५६ | १२ | चक्षूष् | चक्षुष् |
| १५८ | २३ | वन्तो | वन्तः |
| १६१ | २२ | धम्मं | धर्मं |
| १६२ | ३ | रेक्या | रैक्या |
| ,, | ९ | दुखानां | दुःखानां |
| १६३ | २३ | पतत | पतत् |
| १६९ | ७ | तुभि | तुभिः |
| १७४ | १४ | बोधः | बाधः |
| १८१ | १६ | अत्र रुपं तत्र | रूपं ज्ञेयं |
| १८४ | ११ | प्रक्रमात | प्रक्रमात् |
| ,, | २६ | मयं | मय |
| १८५ | २० | हृसो | हर्षो |
| १८७ | ८ | रुपेण | रूपेण |
| १९० | २५ | रूप | रुप |
| १९२ | ७ | सत्य | सत्त्व |
| १९६ | १४ | रुप | रूप |
| १९७ | २० | गोशाला | गोशाल |
| १९८ | ,, | तद् | तद् |
| २०१ | १० | निमित्त | निमित्तः |
| ,, | ,, | नुपपत्ते | नुपपत्तेः |
| ,, | १२ | सिद्धि | सिद्धिः |
| ,, | २१ | पाह | पार |
| ,, | २४ | अविद्य | अविध |
| २०२ | ३ | शङ्का | शङ्कया |
| ,, | २५ | वंदितुं | वदितुं |
| २०३ | २० | कतृ | कर्तृ |
| २०४ | १२ | रुर्भ | भ |
| २०६ | १३ | सप्रर्व | सर्वप्र |
| ,, | २४ | मुक्त | मुक्तो |
| २१४ | २० | तथेत | तथैत |
| २१६ | ६ | कृतकृत्या | कृतकृत्यत्वा |
| ,, | ११ | कतृ | कर्तृ |
| ,, | २० | पन्न आः | आपन्नः |
| २१७ | ३ | हस्य | हशास्य |
| २१८ | २३ | स्त्र्थात् | स्त्यर्थात् |
| २२४ | १७ | तान्तरं | तानन्तरं |
| २२७ | ४ | नाऽस्थित | नाऽवस्थित |

| पृ. | पं. | अशुद्धम् | शुद्धम् | पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| २२७ | १२ | रमो: | रमो | २६६ | १३ | वस्तुना | वस्तुनः |
| ,, | १३ | नन्तर्द्धि | नर्न्तर्द्धि | २६८ | ७ | घटा | घटः |
| २२८ | १४ | करणात्व | करणत्व | ,, | ११ | घट | घटः |
| २३६ | १५ | निरूपद्दव | निरुपद्रव | २७० | २४ | धर्मा | धर्माः |
| २३८ | ३ | थः | र्थः | २७३ | २६ | व्यवह्राहा | व्यवहारा |
| ,, | ४ | त्यकृत्वा | त्यक्त्वा | २७४ | ३ | त्यक्ति | व्यक्ति |
| २४३ | १६ | इत्वादि | इत्यादि | २७४ | ७ | महत्वं | महत्त्वं |
| २४७ | २ | दैव | दैवं | ,, | ९ | एव | एवं |
| २५१ | ४ | प्रामाणात् | प्रामाण्यात् | २७७ | २५ | हात्म | रात्म |
| ,, | १९ | पात | पत | २८० | ८ | स्वभावोऽपि | स्वभावोऽप्य |
| २५२ | १० | निश्चेय | निश्चयः | २८१ | ८ | कृत्स्न | कृत्स्नं |
| २५४ | २५ | नेकषां | नेकेषां | २८२ | ४ | कार्य | कार्यं |
| ,, | ४ | मेदस्य | भेदस्य | २८३ | ९ | ग्यं | ग्यं |
| २५९ | ३ | प्रधानां | प्रधाना | २८५ | ६ | इतरेषा | इतरेषां |
| ,, | १२ | रतो | रतो | २८६ | ५ | स्योगय | योगस्य |
| २६३ | १४ | एव | एवं | | | | |

## 卐 द्वितीयभागे–शुद्धिदर्शनम् 卐

| पृ. | पं. | अशुद्धम् | शुद्धम् | पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| २ | १९ | नन्न्रा | नम्रा | १७ | १० | हिंसा | हिंसा |
| ७ | २५ | सगव | समव | २० | १ | न्या | न्या था |
| ८ | २४ | कार्योत्सर्गं | कायोत्सर्गं | २३ | २५ | चेता | चैता |
| ९ | ४ | कत्नम | करभम् | २५ | २४ | फल | फलं |
| ,, | १८ | व्याम | व्यास | २६ | १४ | पर्गो | पसर्गो |
| ११ | २ | प्लुत्यात् | प्लुत्योत | २९ | २२ | प्रक्षिप्त | प्रक्षिप्तः |
| ११ | १८ | यथोयोग्यं | यथायोग्यं | ३० | २ | सद् | सद् |
| १६ | १६ | ष्टभ | ष्टम | ३१ | २२ | मुर्खे | मूर्खे |
| १७ | ५ | स्ज | स्त | ३७ | ,, | मजां | भाजां |

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४० | १९ | अनुप्रेक्षाया | अनुप्रेक्षायाः |
| ४१ | ५ | स्ये | स्यै |
| ४३ | १४ | प्रथमे | प्रथमसे |
| ५१ | १९ | उसस्ग्गो | उसग्गो |
| ५२ | ,, | चतुथ | चतु |
| ५४ | ,, | अन्तह्रायनं | अन्तरायनं |
| ६७ | ३ | प्रचेतौ | प्रचैतौ |
| ७४ | २४ | आसन्स्त | आसंस्तत् |
| ७९ | २१ | घोत | घोत |
| ८० | १ | अर्हता | अर्हतो |
| ८० | ५ | ,, | अर्हतां |
| ८३ | १४ | करत्वं | करत्व |
| ८४ | ३ | वतते | वर्तते |
| ८६ | १५ | मेव | मेव |
| ९१ | ,, | सम्मवो | सम्भवो |
| ९३ | १० | गर्भस्ये | गर्भस्थे |
| ,, | २ | आ सौ | आसौ |
| ९५ | १२ | अयोजन | अप्रयोजन |
| ९६ | १४ | त्रिविधि | त्रिविध |
| ९७ | १३ | निदान | निदानं |
| १०३ | १ | इन्द्रदिकैः | इन्द्रादिकैः |
| ,, | २२ | चतुष्टया | चतुष्टया |
| १०९ | ६ | प्रकृति | प्रकृत |
| ,, | ,, | तत्व | तत्त्व |
| ११५ | २३ | सम्मेत्त | सम्मेत |
| ,, | २७ | सप्तमे | सप्तमे |
| ११६ | १ | द्रावद | द्राद |
| १२१ | ४ | आह्य | आह्वक्य |
| ,, | १३ | बीजाद् | बीजाद |
| १२९ | १६ | महर्षी | महर्षी |
| १३२ | १९ | मोक्ष | मोक्षं |
| १३६ | ५ | असंगग | असंग |
| १४० | ९ | रूपं | रूपः |
| १४९ | २३ | सिद्ध | सिद्धाः, |
| १५० | ५ | सिला | सिद्धा |
| १५१ | १७ | बुद्धौनां | बुद्धौनां |
| १५२ | १० | सिद्धोः | सिद्धाः |
| १५७ | २१ | जीव | जीवश्री |
| | | | जीवत्व भव्यत्वक्षीणत्व-मनुष्यत्वार्योत्पत्तिसंख्यानायुः कोमलमति-मोहोपशान्ति, शुद्धाचार-शुद्धशरीर व्य-वसाय-अपूर्वकरण नवगुण स्थानयुत तत्त्वलब्धियोग्यता-कल्याणभोजनमुत्तमधर्मसाधि-कैव श्रीति । |
| १६३ | २५ | तस्त्रुप्रस्य | तस्त्रुप्रस्य |
| १६९ | १० | त्सुक्यस्य | त्सुक्यस्य |
| १७७ | १२ | मन्तव्यय | मन्तव्य |
| १८० | १२ | पादुर्भाव | प्रादुर्भाव |
| १८३ | ६ | सयोग | संयोग |
| १८४ | २५ | संक्लिष्ट | संक्लिष्ट |
| १८७ | २१ | तत्तद् | तत्तद् |
| १८७ | २६ | जीवन | जीवन |
| १८९ | १८ | ततद् | तत्तद् |
| १९१ | २४ | आत्मानो | आत्मनो |

# વિવિધ તીર્થોના મૂલનાયકપ્રભુની સ્તુતિઓ

(રચયિતા—પૂ. આ. શ્રી. ભદ્રંકરસૂરિ મ. સા.)

પ્રાસાદો રૂપ્યરમ્યો ગિરિરિવ શકુનિપ્રૌઢનામ્ના પ્રસિદ્ધઃ,
તન્મધ્યે દેવવન્દ્યો જિનવર–મુનિનામા વિભુઃ સુવ્રતાન્તઃ ।
ચૈત્યં ભક્તામરાખ્યસ્તવવરનવચન્દ્રસ્ય ચાધઃ સુચારુ,
ઉદ્ધ્વર્સ્થઃ પાર્શ્વનાથઃ પ્રજયતિ ભૃગુકચ્છે સહસ્રસ્ફટાઢ્યઃ ॥ ૧ ॥

ભૃગુકચ્છભવ્યતીર્થે, ભક્તામરમન્દિરે સહિતેન્દિરે ।
શકુનિવિહારાધસ્તાજ્જયતિ વૃષભો વરદઃ શરણદઃ ॥ ૨ ॥

ગન્ધારે શ્રીતીર્થે, શ્રી અમીઝરાપાર્શ્વ–જિનવરેન્દ્રમ્ ।
વન્દે શતશઃ પ્રાતઃ, તથા ચ ચરમજિનં પ્રતિદિનમ્ ॥ ૩ ॥

ભવિકકવિવન્ધકાવૌ, દ્વિપંચાશજ્જિનાલયમયતીર્થે ।
શ્વશ્રૂવધૂભયકૃતે, પ્રથમ પંચદશજિનૌ ભાતઃ ॥ ૪ ॥

ઝઘડીયા–તીર્થેઽસ્મિન્, પ્રથમતીર્થંકનાથોઽનાથ નાથઃ ।
જયતિ દેવાધિદેવઃ, પ્રચમત્કારિદેવસનાથઃ ॥ ૫ ॥

ચિન્તામણિપાર્શ્વેશો, વણછરાનગરાભરણં સુશરણં ।
યચ્છતુવાંછિતમચ્છં, દયામૃતમન્દિરં સેન્દિરમ્ ॥ ૬ ॥

મહાવીરપરમેશ્વરઃ–વિશ્વસ્વામીસંસ્થિતોઽન્તર્યામી ।
જગતઃશિવાય ભૂયાદ્, દહેજબન્દરે સુન્દરે ॥ ૭ ॥

કુરાલે શ્રેયાંસં શ્રેયસે શ્રયામિ શરણંશુચિરુચ્યં ।
કેરવાડા–મધ્યસ્થઃ, પ્રથમપરમેષ્ઠિનં પ્રણમામિ ॥ ૮ ॥

દેશે સાદ્ભુતકોંકણેઽત્ર સુમતિં તીર્થંકરં પંચમમ્,
વન્દે મેઘસુરાજપુત્રતિલકં શ્રીમંગલામાતૃજમ્ ।
જાગ્રદ્રક્ષકયક્ષતુમ્બરુમહાકાલી–પ્રપૂજ્યત્વતઃ,
શ્રી–રત્નાગિરિકોસલાનગરવત્, જૈનોજ્જવલે મન્દિરે ॥ ૯ ॥

સત્પદ્માધરણેન્દ્રાર્ચ્યં, સુભક્ત્યા ભીડભંજનમ્ ।
ભીવણ્ડી મણ્ડનં પાર્શ્વં, વન્દેઽથ જનરંજનમ્ ॥ ૧૦ ॥

## श्री-भरूचतीर्थ-इतिहासाष्टकम्

कारुण्य-पुण्यमहिमातिशयैर्वरेण्यं,
कल्याणकोटिकरणं शरणं शरण्यम् ।
वन्देऽथ विंशतितमं शिवदं जिनेन्द्रं,
श्रीदं विदं च मुनिसुव्रतमाश्रितेन्द्रम् ॥ १ ॥

श्रीजैनशासनिसुमुख्यमतीन्द्रमन्त्री,
श्री अम्बडो जनकभक्तिवशान्महान्तम् ।
प्रासादमेव भृगुकच्छपुरे नवीनं,
चक्रे बुधो नवशताब्दक-पूर्वकाले ॥ २ ॥ (व. ति.)

तज्जीर्णोद्धृतये कृता विनयतः, सङ्घेन विज्ञप्तिका,
श्रीमद्विक्रमसूरये भगवते, प्राक्तीर्थसद्भक्तितः ।
स्वीचक्रे वरसूरिणा समुनिना, कार्यं प्रवृत्तं ततः,
जातःसन्निहितो हितो धननिधिः, सर्वत्र सद्बोधतः ॥ ३ ॥ (शा. वि.)

जीर्णोद्धारःप्रवृत्तःप्रवरतुरगबोधाख्यतीर्थे समर्थं,
जातं नव्यं सुगेहं नयनसुभगभक्तामरस्तोत्रगोत्रम् ।
दृष्ट्वा भव्या अनेके प्रमुदितमनसस्तुष्टुवुर्नित्यपाठं,
सूरीशं विक्रमाख्यं मुनिगणवृषभं सत्प्रभावात्प्रभूतम् ॥ ४ ॥

स्वर्गप्रस्थानमाप्तो हृदयगतकृपाऽऽशीर्वचोवर्षकारी,
विख्यातो विक्रमाख्यो जगति जयति यः कार्यपूर्णत्वकारी ।
कल्याणीयं प्रतिष्ठाऽञ्जनसहितशलाकासमृद्धा प्रवृत्ता,
तत्राद्वैतो ममोच्चोऽद्भुततमसुमहः पञ्चकल्याणकीयः ॥ ५ ॥ (स्रग्धरावृत्तम्)

अद्भुताऽभूतपूर्वं, विमाने मुनिसुव्रतचारु चैत्ये,
प्रचलितप्रतिष्ठोत्सवेऽत्राहो जनप्रवाहो बहुः ॥ ६ ॥

प्रतिष्ठाचार्यनवीन सूरेर्नवाचार्यादिनिश्रायम् ।
सर्वोत्कृष्टं सर्वं, वरघोटकजेमनविधिविधानादि ॥ ७ ॥

राजयशःसूरिमार्ग-दर्शकमार्गदर्शनादि सर्वत्र ।
राजद्बभूव यशस्वि, तल्लब्धिविक्रमाशीः फलम् ॥ ८ ॥

शरवेदद्विसहस्र-प्रमिते वैक्रमे संवत्सरे शुभे ।
जयति सति लब्धिसङ्घे, प्रतिष्ठा तेजःस्फूर्तिमती ॥ ९ ॥

(प्रशस्ति)

शकुनिका विहारतीर्थ-जीर्णोद्धारमहिमाष्टकम् ।
व्यर चि भुवनतिलकाऽऽचार्यशिष्यभद्रङ्करसूरिणा ॥ (आर्या)

પૂ. કર્ણાટકકેસરી આચાર્ય શ્રી ભદ્રંકરસૂરીશ્વરજી મ. ના
સંયમજીવનના ૫૬ મા વર્ષમાં પ્રવેશ પ્રસંગે આવેલ

# શુભ – સંદેશ

છાણીના પનોતા પુત્રની પુણ્યવંતી પ્રવ્રજ્યા પંથની ૫૬મી પાવન તિથિ મનાવવા છાણીસંઘ ભાગ્યશાળી બન્યો છે. જે અનુમોદનીય છે. આ પ્રસંગે હાર્દિક શુભ કામના પાઠવું છું.

તપસ્વી આચાર્ય....

અમારા તરફથી ભાવભરી વંદના...હજી સેન્ચ્યૂરી પૂરી થવામાં ઘણા વર્ષો છે... વર્ષોની એ વણઝાર તોતીંગ કાર્યોની વણઝાર ઉભી કરી ..એક એવી પગથાર પાડે ..જેના પર ચઢી નરનાર પામે ભવપાર...

સુપ્રસિદ્ધ લેખક ગણિવર શ્રી...

આપ દીર્ઘાયુ બનો! ૫૬ તીર્થોના ઉદ્ધારક બનો...૫૬૦૦ સંયમીઓના સંયમ સુકાની બનો . અમારી પર સદા કૃપાદષ્ટિને વરસાવી અમારી અનાદિકાળની જન્મ મરણની જંજાળને કાપી જલ્દીથી શાશ્વત સુખના ભોક્તા બનાવો! એજ પ્રાર્થના...

વિદુષી આર્યા...

---

**અધ્યાત્મઉપનિષદ્:** મૂળકાર: પૂ. ઉપાધ્યાયજી શ્રી યશોવિજયજી ગણિવર. ટીકાકાર: પૂ. આ. શ્રીમદ્‌વિજયભદ્રંકરસૂરીશ્વરજી મ.

સંસ્કૃત-ભાષામાં સર્જન! આજે એક વિરલ ઘટના બનતી ચાલી છે. ત્યારે પ્રસ્તુત-કૃતિને આવકારતા અંતર આનંદ અનુભવે છે. પૂ. ઉપાધ્યાયજી મહારાજની એક મહાન-કૃતિ'અધ્યાત્મ ઉપનિષદ્' પ્રમાણમાં નાની હોવા છતાં ગૂઢભાવોથી ભરેલી છે. હજી સુધી આની પર ટીકા આદિનું કોઈ સર્જન થવા પામ્યું નહોતું, એથી આ ગ્રંથના ભાવ સુધી પહોંચવું વાંચકને માટે સરળ-સુગમ ન હતું. પણ પ્રસ્તુત 'ભુવન-તિલકાવ્ય-ટીકાનું સર્જન થતા હવે આ ગ્રંથના હાર્દ સુધી પહોંચવામાં અભ્યાસીઓને જરૂર સફળતા મળશે. આ પૂર્વે પૂ. ઉપાધ્યાયજી મહારાજ કૃત 'અધ્યાત્મ સાર' ગ્રંથ ઉપર પણ પૂ. આચાર્યદેવશ્રીએ ટીકા રચી છે. વૃદ્ધવયે પણ પૂજ્યશ્રી દ્વારા અવિરત પ્રચલિત-શ્રુતસાધનાને બિરદાવવાપૂર્વક નવા-સર્જકો આમાંથી બોધપાઠ મેળવીને આવી કોઈક ચિરંજીવ-સૃજનાના અનુરાગી બને, એવી આશા સાથે પ્રસ્તુત-કૃતિને શતશત શુભેચ્છા!

❊ સરળ સંસ્કૃતભાષામાં જાણે
પરસ્પર ગુજરાતીમાં જ વાતો કરાતી હોય એ
સંસ્કૃત ભાષામાં અનેકવિધ સાહિત્ય સજ
**પૂ.આ. ભદ્રંકરસૂ. મ.સા.** ભદ્રને કરના
ભદ્રંકરાવૃત્તિ રચિ સંઘ સમક્ષ રજૂ કરેલ
પૂ. શ્રી ગીર્વાણગિરામાં પોતાની કલમ ચાલુ રાખ
**'એકલો જાણે રે...'** ઉક્તિને સાર્થક ક
છે. વયોવૃદ્ધ ઉંમરે સ્વાસ્થ્યની અનૂકુળતા હો
છતાં સાહિત્ય સર્જનની પ્રવૃત્તિ, ધગશ, હિંમ
અપ્રમત્તતા સ્વાધ્યાયરૂચિ વગેરે ઉદાત્ત ગુણો
સૂચિત કરે છે. યુવાન સાધુઓને આદર્શ પુ
પાડે છે. પૂજ્યપાદશ્રીનું આ સર્જન ચતુર્વિ
સંઘમાં મંદ પડતી સ્વાધ્યાય પ્રવૃત્તિને વેગવં
બનાવવામાં ફાળો આપશે એવી આશા...

❊ **લલિતવિસ્તરા** ગ્રંથના ઘ
ઉપકારો છે. આ ગ્રંથનો અભ્યાસ કરવો સામા
કાર્ય નથી. તેની પંક્તિએ પંક્તિએ ન્યાય, દર્શ
તર્ક, વ્યાકરણ, અલંકાર અને સાહિત્ય શાસ
અદ્ભુત રીતે સંકલિત થયેલા જોવા મળે
તેને વાંચવાનું કામ જ જો દુષ્કર છે. તો પ
વિચારવું પચાવવું અને ગીર્વાણગિરામાં ટી
રચવી કેટલી દુષ્કર ગણાય ? છતાં તે અ
અંશે થયેલું આપની સામે આજે છે. આ ગ્રંથ
ટીકા રચવા પૂજ્યશ્રીને કેટલો શ્રમ પડ્યો હ
વિશેષ વિવેચન કરવા માટે બુદ્ધિ કેટલી કસ
પડી હશે તે તો આ વિષયના અનુભવીઓ
જાણી શકે.

❊ પૂજ્યશ્રી તર્કશાસ્ત્ર ત
શબ્દશાસ્ત્રના પ્રૌઢ પંડિત છે. જૈન સિદ્ધાંતો
અવગાહન કરી બહુશ્રુતતા પ્રાપ્ત કરનારા સમ
વિદ્વાન છે. શાંત તથા પ્રસિદ્ધથી દૂર રહેના
ને એકાંત પરાયણ તેઓ સંસ્કૃત - પ્રાકૃત
ગુજરાતી ભાષામાં નૈસર્ગિક કાવ્યો રચના
પ્રતિભાશાળી કવિરત્ન છે. તેઓશ્રીએ જે મન
- ચિંતન, અવગાહન પૂર્વક ખંત ... પરિશ્ર
તથા ધૈર્ય અને નિષ્ઠાથી આ ગ્રંથરત્ન પર ટી
રચવાની અસાધારણ કૌશલ્યતા દાખવી છે
તેમના પુરૂષાર્થ અને પુણ્યાઈથી પ્રાપ્ત ક્ષયોપશમ
સફલતા છે.

ભવ્ય જિનાલય





ઉપાશ્રય

# છાણી દર્શન

સાહિત્ય સદન






પ્રિન્ટર્સ: નેહજ એન્ટરપ્રાઈઝ
૩૪ ૮૧ ૩૪ / ૬૬ ૩૭ ૨૪